वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥

व्याख्यां सर्वपथीनाख्यां भट्टिकाव्यस्य कामपि ।
मल्लिनाथसुधीः सोऽहं कुर्वे सर्वपथीनधीः ॥ ५ ॥

व्याख्या सर्वपथीनाख्या सर्वान्व्याप्नोति यत्पथः ।
गुणालङ्कारशब्दार्थध्वनिभावरसादिकान् ॥ ६ ॥

प्रधानमिह शृङ्गारकरुणादिभिरङ्गवान् ।
वीरो रसो महावीरो नायको रघुनायकः ॥ ७ ॥

नगरार्णवशैलादिवर्णनं चात्र संभवि।
फलं दशाननवधः शब्दः शिष्टपुरस्कृतः॥ ८॥

कृती भट्टिकविस्तावदीदृकाव्यनिबन्धनात्।
धन्या वयं च तत्सूक्तिरत्नाकरपरिभ्रमात्॥ ९॥

जगति निखिलविद्यासिंधुदुग्धंधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम्।
तदिह मम निबन्धे दूषणं भूषणं वा
भवति यदि विदग्धैस्तद्ध्यवश्यं विमृश्यम्॥ १०॥

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते॥ ११॥

JJ.e.66

॥ श्रीः ॥

भट्टिकाव्यम् ।

॥ मल्लिनाथकृतटीकया समेतम् ॥

प्रथमः सर्गः ।

अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत्स्वयम् ॥ १ ॥

अथ तत्रभवान्भट्टिनामा कविः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे' ॥ इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनतां 'काव्यालापांश्च वर्जयेत्' इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन् रामकथामाश्रित्य पाणिनीयसूत्राणामुदाहरणं काव्यं चिकीर्षुराशीराद्यन्यतमस्य तदविघ्नसिद्धिकरत्वात्कथानायकस्य रामनाम्नो भगवतः पुराणपुरुषस्याविर्भावभूमेः पुण्यश्लोकतमस्य पुरुषधौरेयस्य महाराजस्य दशरथस्य सत्तारूपं वस्तु काव्यार्थबीजत्वेन निर्दिशति ॥

१. अभूदिति ॥ विशेषेण बुध्यन्त इति विबुधा विद्वांसो देवाश्च । 'विबुधौ सुरपण्डितौ' इति विश्वः ॥ इगुपधलक्षणः कप्रत्ययः ॥ तेषां सखा

विबुधसखो विद्वत्सेवी देवेन्द्रसहचरश्च विजयसहकारित्वात्तस्येति भावः ॥ "राजाहःसखिभ्यष्टच्" इति टच् ॥ परांस्तापयतीति परन्तपः शत्रुघाती ॥ "द्विषत्परयोस्तापेः" इति खच् ॥ "खचि ह्रस्वः" इत्युपधाह्रस्वः ॥ "अरुर्द्विषत्—" इत्यादिना मुमागमः ॥ श्रुतेन वेदशास्त्रश्रवणेनान्वितः स्वयं च विद्वानित्यर्थः । दशरथ इत्युदाहृतो विख्यातः । नॄन् पातीति नृपो नराधिपः ॥ "आतोऽनुपसर्गे कः" ॥ अभूत् सत्तामलब्धेत्यर्थः ॥ "गातिस्था—" इत्यादिना भुवो लुङि परस्मैपदे सिचो लुक् ॥ "भूसुवोस्तिङि" इति गुणप्रतिषेधः ॥ अथास्य राज्ञस्सत्तालाभस्य फलमाह गुणैरिति । गुणैः शौर्यादिभिर्वरं श्रेष्ठं यं नृपं सना सदा भवस्सनातनो नित्यः पुराणपुरुषः ॥ "सायंचिरम्—" इत्यादिना ट्युप्रत्ययस्तुट् ॥ भुवनहितच्छलेन रावणवधादिलोकोपकारव्याजेन । पितरं जनकं स्वयमुपागमदुपागतः ॥ गमेर्लुङि पुषादित्वादङादेशः । किमतः परं जन्मनः फलं यज्जगद्गुरोरपि गुरुरजनीति भावः ॥ तदुक्तं बालकाण्डे—'ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधम् । पितरं रोचयामास तदा दशरथं नृपम्' इति ॥ अत्र सनातनः पितरमुपागमदिति नित्यत्वजन्यत्वयोराभासमानस्य विरोधस्य भगवतो हरेरचिन्त्यमहिमत्वेन समाधानाद्विरोधाभासोऽलङ्कारः ॥ 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इति लक्षणात् ॥ रुचिरावृत्तमेतत् ॥ 'चतुर्ग्रहैरिह रुचिरा जभौ स्जगाः' इति लक्षणात् ॥ एतच्चात्रैव श्लोके दशरथपदप्रयोगसौकर्यार्थमुक्तम् । अनन्तरश्लोकादारभ्यासर्गान्तादिन्द्रवज्रोपेन्द्रवज्रापादयोगि त्रैष्टुभमुपजातिवृत्तम् ॥ 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति लक्षणात् ॥ अत्रादावकारस्य विष्णुवाचकत्वात्पदस्य सत्तावचनत्वाद्वस्तुनिर्देशरूपत्वाच्च मंगलावहत्वम् । जगणस्य निषिद्धस्यापि भगणोत्तरत्वाच्छुभत्वम् ॥ तदुक्तं भारतीये—'म्नस्तभ्रज्या गणा ह्यष्टौ तेषु म्नयतभाः शुभाः । जस्तजैर्जस्तभैर्युक्तस्सोत्तरो रः शुभप्रदः' ॥ इति सर्वमवदातम् ॥

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत्[1]सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ
समूलघातं न्यवधीदरींश्च ॥ २ ॥

२. सोऽध्यैष्टेत्यादि ॥ गुणैर्वरमित्युक्तं तदेव व्यनक्ति स इत्यादिश्लोकत्रयेण ॥ स दशरथः। वेदयन्ति समग्ज्ञापयन्ति धर्माधर्माविति वेदा ऋग्यजुःसामानि ॥ 'स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी' इत्यमरः ॥ वेत्तेर्ण्यन्तात्पचाद्यच् । तानध्यैष्टाधीतवान् । इङो लुङि ङित्वात्तङ् ॥ "विभाषा लुङ्लृङोः" इति गाङभावपक्षे च्लेः सिचि षत्वष्टुत्वे ॥ "आडजादीनाम्" ॥ "आटश्च" इति वृद्धिः ॥ त्रिः दश परिमाणमेषां त्रिदशाः। बहुव्रीहिसमासान्तो डच्। तिस्रो दशा वयोवस्था येषामिति वा त्रिदशा देवाः। तानयष्ट यागैः पूजितवान्। यजेर्लुङि कर्त्रभिप्राय आत्मनेपदम् । अत्र सिचोऽकित्वान्न संप्रसारणम्। व्रश्चादिना षत्वम् ॥ "झलो झलि" इति सकारलोपः ॥ ष्टुत्वम्। पितॄनतार्प्सीत् पितृयज्ञैर्भोविर्नी वृत्तिमाश्रित्य प्रजया च तर्पितवान् ॥ "स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः" ॥ "अस्तिसिचोऽपृक्ते" इति इडागमः ॥ "अनुदात्तस्य च—" इत्यादिना अमागमाभावपक्षे सिचि वृद्धिः ॥ एतावतास्य त्रिविधमप्यानृण्यमुक्तम् ॥ 'एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी' इत्यादि श्रुतेः ॥ बन्धून्स्वजनान् । 'बन्धुस्वस्वजनाः समाः' इत्यमरः । सममंस्त दानसंमानादिभिः सत्कृतवान्। अन्यथा 'आश्रितान्यः परित्यज्य बन्धूनपि च पार्थिवः । परपोषरतो मूढः सोऽक्षयं नरकं व्रजेत्' इति दोषस्मरणादिति भावः। मन्यतेरनिटो लुङि तङ्। 'तदादिग्रहणं स्याञ्छुमर्थम्'इति सिजन्तस्याङ्गत्वेन इदित्वात् "अनिदिताम्—" इत्यादिना नलोपो नास्ति । षण्णां वर्गः षड्वर्गः कामक्रोधाद्यरिषड्वर्गः। तं व्यजेष्ट विजितवान्। अस्थाने

---

१ पितॄनतार्प्सीत् T_2, T_3, T_4, Com.; पितॄनतारीत् E_1; पितॄनतार्पीत् noticed by E_1.

कामक्रोधादिरहित इत्यर्थः । जयतेर्लुङि "विपराभ्यां जेः" इत्यात्मनेपदम् । स्वरान्तत्वादनिट्त्वम् । सिचोऽकित्वाद्गुणः । नीतौ सामादिसंध्यादिप्रयोगविधौ । अरंस्त विस्रब्धं व्यवहृतवान् इत्यर्थः । रमेर्लुङि सिचोऽकित्वान्नानुनासिकलोपः । नीतिकौशल्यस्य फलमाह । अरीन् बाह्यशत्रूंश्च । समूलं हत्वा समूलघातम् ॥ "समूलाकृतजीवेषु हन्कृञ्ग्रहः" इति णमुल्प्रत्ययः ॥ उपधावृद्धिः ॥ "हो हन्ते—" इति कुत्वम् ॥ "हनस्तोऽचिण्णलोः" इति तत्वम् ॥ न्यवधीत् निहतवान् ॥ "कषादिषु यथाविध्यनुप्रयोगः" ॥ "लुङि च" इति हनो वधादेशः ॥ अदन्तत्वादिडागमः । अतो लोपस्य स्थानिवद्भावात् "अतो हलादेर्लघोः" इति वैभाषिकी च वृद्धिर्न भवति ॥ "इट ईटि" इति सिज्लोपः ॥ इह काव्ये प्रयोगवैचित्री तावदेकोऽलंकारः सार्वत्रिकः । अन्येऽपि शब्दार्थालंकारास्तत्र तत्र यथासंभवमुद्भावयिष्यन्ते । अत्र ह्यध्ययनादिक्रियायौगपद्यात्समुच्चयभेदोऽलंकारः । 'गुणक्रियायौगपद्ये समुच्चयः' इति लक्षणात् ॥

वसूनि तोयं घनवद्व्यकारीत्[1]
सहासनं गोत्रभिदाऽध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थितासौ
यशांसि सर्वेषुभृतां निरास्थत् ॥ ३ ॥

३. वसूनीति ॥ असौ नृपः वसूनि धनानि । 'रिक्थं धनं वसु' इत्यमरयादवौ । तोयं घनवत् ॥ "तेन तुल्यम्—" इत्यादिना वतिप्रत्ययः ॥ व्यतारीत् वितीर्णवान् अर्थिभ्य इति शेषः । तरतेर्लुङि "इट ईटि" इति सिज्लोपः । मेघौपम्यान्निर्व्याजोपकारित्वं बहुप्रदत्वं सार्वत्रिकत्वं चोक्तम् । गोत्रभिदा इन्द्रेण सह आसनमध्यवात्सीत् । एकासने स्थितवानित्यर्थः । विजयसहकारित्वादिति भावः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ वसेर्निवासार्थादनिटो लुङ् ॥ "अस्तिसि-

१ व्यतारीत् T_2, T_4, Com.

चोऽपृक्ते" इति ईट् ॥ "वदव्रज—" इत्यादिना हलन्तलक्षणा वृद्धिः ॥ "सः स्यार्धधातुके" इति सकारस्य तकारः ॥ किं च । त्र्यम्बकात् त्रिलोचनात् । 'अक्षि लोचनमम्बकम्' इति यादवः । अन्यं देवं नोपास्थित नासेविष्ट किमुतार्वाचीनमिति भावः । उपपूर्वात् तिष्ठतेर्लुङि देवपूजायामात्मनेपदम् ॥ "स्थाघ्वोरिच्च" इति इत्वकित्वे ॥ "ह्रस्वादङ्गात्" इति सिज्लोपः ॥ सर्वेषामिषुभृतां धनुर्भृतां यशांसि निरास्थत् निरस्तवान् । एतेन भुजार्जितसंपत्त्वमुक्तम् ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ "अस्यतेस्थुक्" ॥ उपमासमुच्चययोः संसृष्टिः ॥

पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः ।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः ॥ ४ ॥

४. पुण्य इति ॥ पुनातीति पुण्यः पावनः ॥ "पूञो यण्णुग्रस्वश्च" इति औणादिको यदन्तः । महाब्रह्मणां महाब्राह्मणानां समूहैर्जुष्टः ॥ "कुमहद्भ्यामन्यतरस्याम्" इति समासान्तविकल्पात् । वसिष्ठाद्युत्तमद्विजसंघसेवित इत्यर्थः । 'ब्रह्मा विरिञ्चिद्विजयोः' इति विश्वः । नाकसदां दिविषदाम् । संपदादित्वात्क्विप् । कर्मणि षष्ठी । संतर्पयतीति संतर्पणः यज्ञादिभिः सन्तर्पयिता अग्निमुखत्वाद्देवानां तर्पणः ॥ "कृत्यल्युटो बहुलम्" इति कर्त्तरि ल्युट् ॥ वरेण्यः वरणीयः श्रेष्ठः ॥ "वृञ एण्यः" इत्यौणादिक एण्यप्रत्ययः ॥ स राजा दशरथः अध्वरे यज्ञे अभिप्रणीतः गार्हपत्यादुद्धृत्याहवनीयायतने मन्त्रैराभिमुख्येन स्थापितो वह्निर्यथा आहवनीय इव लोकानां स्थितये प्रतिष्ठायै जज्वाल दिदीपे। प्रजापालने जागरूकोऽभूदित्यर्थः । अन्यथा सर्वलोकविप्लवः स्यात् । अग्नेरप्यज्वलने लौकिकवैदिकसर्वक्रियाप्रतिबन्धात् स एव दोषः स्यादिति भावः । श्रौतपूर्णोपमालंकारः ॥

स पुण्यकीर्त्तिः शतमन्युकल्पो
महेन्द्रलोकप्रतिमां समृद्ध्या ।
अध्यास्त सर्वर्तुसुखामयोध्या-
मध्यासितां ब्रह्मभिरिद्धबोधैः ॥ ५ ॥

५. स इति ॥ पुण्यकीर्त्तिः शतमन्युकल्पः शतक्रतूपमः । ईषदसमाप्तौ कल्पप् । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । स राजा समृद्ध्या संपदा महेन्द्रलोकः प्रतिमा प्रतिमानं यस्यास्तां अमरावतीकल्पां सर्वर्तुषु सुखयतीति सर्वर्तुसुखाम् । पचाद्यच् । इद्धबोधैर्दीप्तप्रज्ञानैः ब्रह्मभिर्ब्राह्मणैः अध्यासितामधिष्ठितामयोध्यामध्यास्त अधिष्ठितवान् । आसेः कर्त्तरि लङ् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वम् । अत्राधिष्ठानाधिष्ठात्रोरानुरूप्यात्समालंकारः । 'सा समालंकृतिर्योगे वस्तुनोरनुरूपयोः' इति लक्षणात् । सा चेन्द्रामरावत्युपमाद्वयानुप्राणितेति सङ्करः । एतेनान्योन्योपकारकत्वलक्षणोऽन्योन्यालंकारो ध्वन्यत इत्यलंकारेणालंकारध्वनिः ॥

निर्माणदक्षस्य समीहितेषु
सीमेव पद्मासनकौशलस्य ।
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या-
स्थितावहस्येव पुरं मघोनः ॥ ६ ॥

६. अथ त्रिभिरयोध्यां वर्णयति निर्माणेत्यादिभिः ॥ समीहितेषु संकल्पितार्थेषु विषये निर्माणदक्षस्य अपूर्वसृष्टिसमर्थस्य पद्मासनस्य ब्रह्मणः कौशलस्य नैपुण्यस्य सीमा परमावधिरिव स्थितेत्युत्प्रेक्षा । अतोऽधिकसृष्टौ सोऽपि न समर्थ इत्यर्थः । पद्मासनकौशलस्येत्यत्र न "पूरणगुण—" इत्यादिना षष्ठीसमासप्रतिषेधः । शुक्लः पटः पटस्य शुक्ल इति गुणे गुणिनि च दृष्टानां शुक्लादिशब्दानामेव निषेधात् । केवलगुणवच-

१ महेन्द्रकल्प° T_4.
२ ब्रह्मविशुद्धबोधैः T_2.
३ मरीचिभिर्या E_1.
४ स्थिता विहस्येव E_3, D, Com. स्थिताप्रहस्येव T_3.
५ स्थितावहस्येव T_2.

मानां कौशलं चापलं गन्धो रस इत्यादीनामनिषेधात् । 'तत्स्थैश्च गुणैः षष्ठी समस्यते' इति वचनाद्बहुलमभियुक्तप्रयोगात् । पत्रपीतिमेत्यादौ बलाकायाः शौक्ल्यमित्यादिभाष्यकारप्रयोगेण निषेधज्ञापनादित्यादि प्रपञ्चितमस्माभिः किरातार्जुनीयव्याख्याने घण्टापथेऽर्थगौरवमित्यत्रोपरम्यते । किं च ऊर्ध्वं स्फुरद्भिः उपरि प्रसर्पद्भिः रत्नानां गभस्तिभिर्मयूखैर्मघोन इन्द्रस्य पुरीममरावतीं विहस्य हसित्वेव स्थितेति पूर्वोत्प्रेक्षया सजातीयया संकरः ॥

सद्रत्नमुक्ताफलवज्रभाञ्जि
विचित्रधातूनि सकाननानि[1] ।
स्त्रीभिर्युतान्यप्सरसामिवौघै-
र्मेरोः शिरांसीव गृहाणि यस्याम् ॥ ७ ॥

७. सदिति ॥ यस्यामयोध्यायां सन्ति सम्यञ्चि रत्नानि पद्मरागादीनि मुक्ताफलानि वज्राणि च । ब्राह्मणपरिव्राजकवत्पृथङ्निर्देशः । तानि भजन्तीति तद्भाञ्जि । भजो ण्विः । विचित्रा धातवो येषां तानि । चित्रशालित्वादिति भावः । सकाननानि सोपवनानि अप्सरसामोघैरिव स्त्रीभिः स्त्रीसंघैर्युतानि गृहाणि मेरोः शिरांसि शिखराणीव भान्तीति शेषः । उपमालंकारः ॥

अन्तर्निविष्टोज्ज्वलरत्नभासो
गवाक्षजालैरभिनिष्पतन्त्यः[2] ।
हिमाद्रिटङ्कादिव भान्ति यस्यां
गङ्गाम्बुपातप्रतिमा गृहेभ्यः ॥ ८ ॥

८. अन्तरिति ॥ यस्यां पुरि हिमाद्रेर्हिमवतष्टङ्को भित्तिस्तट इति यावत् । 'न स्त्री पर्वतभित्तौ च' इति टङ्कशब्दार्थेषु विश्वः । तस्माट्टङ्कादिव । जातावेकवचनम् । टङ्केभ्य इव गृहेभ्यो गवाक्षजालैर्गवाक्षसमूहैः अभिनिष्पतन्त्यः बहिर्निष्पतन्त्यः अन्तर्निविष्टानामभ्यन्तरे स्थितानामुज्ज्व-

---

१ सनातनानि T₂. | २ अभिनिस्पतन्त्यः E₂, अभिनिःपतन्त्यः D.

लरत्नानां भासः प्रभाः गङ्गाम्बुनो गङ्गाजलस्य पतन्तीति पाताः प्रवाहास्तत्प्रतिमास्तदुपमास्सत्यो भान्ति त. इव भान्तीत्यर्थः । अत एव फलतोऽनेकेवेयमुपमा ॥

धर्म्यासु कामार्थयशस्करीषु[1]
मतासु लोकेऽधिगतासु[2] काले ।
विद्यासु विद्वानिव सोऽभिरेमे[3]
पत्नीषु[4] राजा तिसृषूत्तमासु ॥ ९ ॥

९. धर्म्यास्विति ॥ स राजा धर्म्यासु धर्मादनपेतासु । धर्मचारित्वादन्यत्र धर्मप्रतिपादकत्वाच्चेति भावः । कामार्थयशांसि कुर्वन्ति नियमेनेति तत्करीषु ॥ "कृञो हेतु—" इत्यादिना हेत्वर्थे टप्रत्यये ङीप् ॥ "अतः कृकमि—" इत्यादिना विसर्जनीयस्य सत्वम् ॥ लोके मतासु पूजितासु काले योग्यकाले अधिगतासु गृहीतासु । उत्तमासु महत्यवरोधे सत्यपि प्रधानभूतासु । अन्यत्राङ्गभूतविद्यान्तरापेक्षया अङ्गिनीषु इत्यर्थः । तिसृषु पत्नीषु कौसल्यादिषु ॥ "पत्युर्नो यज्ञसंयोगे" इति ईकारो नकारश्च ॥ तिसृषु विद्यासु ऋगादिषु विद्वान् विपश्चिदिव अभिरेमे विजहार ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ ॥

पुत्रीयता तेन वराङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान् ।
विपक्षिमज्ञानगतिर्मनस्वी[5]
मान्यो मुनिः स्वां पुरमृष्यशृङ्गः[6] ॥ १० ॥

१०. पुत्रीयतेति ॥ पुत्रमात्मन इच्छता पुत्रीयता पुत्रकामेन ॥ "सुप आत्मनः क्यच्" ॥ "क्यचि च" इति ईकारः ॥ क्यजन्ताल्लटः शत्रादेशः । तेन राज्ञा क्रतुषु यज्ञेषु विषये विद्वान् शास्त्रार्थनिर्णेता । विदेः

१ कामार्थयज्ञःकरीषु E2.
२ विगतासु T3.
३ तासु रेमे T2.
४ पत्नीति T3.
५ निधि D.
६ ऋश्यशृङ्गः T3, Com.

शतुर्वसुः। क्रियावान् स्वयं कर्मानुष्ठानवान्। भूमार्थे मतुप्। विपाकेन निर्वृत्तं विपक्रिमं परिपक्वम्। पचेः "ड्वितः क्त्रिः"। "क्त्रेर्मम्नित्यम्"। तस्य ज्ञानस्य आत्मज्ञानस्य निधिः तत्त्ववेत्तेत्यर्थः। मनस्वी स्थिरचित्तः। प्रशंसायां मत्वर्थीयो विनिः। मान्यो लोकपूज्यः ऋश्यस्य शृङ्गमिव शृङ्गमस्यास्तीति ऋश्यशृङ्गो नाम मुनिः विभाण्डकसुतः स एव ऋश्यशृङ्ग इति पुराणप्रसिद्धः। वराः श्रेष्ठा अङ्गना वराङ्गनास्ताभिः प्रयोज्यकर्त्रीभिः स्वां पुरमानायि आनायितः। नयतेर्ण्यन्तात् 'दुह्याच्पच्—' इत्यादिना द्विकर्मकात् 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति वचनात्प्रधानकर्मणि लुङि चिण् वृद्ध्यायादेशौ॥

ऐहिष्ट तं कारयितुं कृतात्मा[1]
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्।
ज्ञाताशयस्तस्य ततो व्यतानीत्
स कर्मठः कर्म सुतानुबन्धि[2] ॥ ११ ॥

११. ऐहिष्टेति॥ कृतात्मा एवं करिष्यामीति निश्चितबुद्धिः। 'आत्मा यत्नो धृतिर्बुद्धिः' इत्यमरः। नृपो दशरथस्तं मुनीन्द्रं पुत्रः फलं यस्य तं क्रतुं पुत्रीयामिष्टिं कारयितुं तेन कारयितुमित्यर्थः॥ "हृक्रोरन्यतरस्याम्" इति विकल्पादणि कर्तुः कर्मत्वम्॥ ऐहिष्ट ईहितवान् ऐच्छदित्यर्थः। 'इच्छा काङ्क्षा स्पृहेहा तृड्' इत्यमरः। ईहतेर्लुङि तङि सिचीडागमः। ततः कर्मणि घटते चेष्टते सम्यक् करोतीति कर्मठः कर्मशूरः। 'कर्मशूरस्तु कर्मठः' इत्यमरः॥ "कर्मणि घटोऽठच्"॥ "नस्तद्धिते"। स मुनीन्द्रस्तस्य नृपस्य ज्ञाताशयो ज्ञातनृपाशयः सन्नित्यर्थः। सापेक्षत्वेऽपि गमकत्वात्समासः। 'अभिप्रायश्छन्द आशयः' इत्यमरः। सुतानुबन्धः पुत्रलाभोऽस्मिन्नस्तीति सुतानुबन्धि। मत्वर्थीय इनिप्रत्ययः न तु "सुप्यजातौ—" इति णिनिः। सुपीत्यनुवृत्तौ पुनः सुब्ग्रहणेनोपसृष्टधातोस्तन्निषेधात्। सुतानन्नुबध्नाति सन्त-

१ यतात्मा T4. | २ सुतानुबन्धम् D., T1, T2, T3, T4, C., N.

नोतीति सुतानुबन्धमिति वा पाठान्तरम् ॥ "कर्मण्यण्" ॥ तत्कर्म पुत्रकामेष्टिं व्यतानीत् विततान । तनोतेर्लुङि "इट ईटि" इति सलोपः ॥ "अतो हलादेर्लघोः" इति वैकल्पिकी वृद्धिः ॥

रक्षांसि वेदिं परितो निरास्थ-
दङ्गान्ययाक्षीदभितः प्रधानम्।
शेषाण्यहौषीत्सुतसंपदे च
वरं वरेण्यो नृपतेरमार्गीत् ॥ १२ ॥

१२. रक्षांसीति ॥ वरेण्यो वरणीयो मुनिः वेदिं परितः वेदेः सर्वतो रक्षांसि कर्मघातुकान् राक्षसान् निरास्थत् निरस्तवान्। अस्यतेर्लुङ् ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ "अस्यतेस्थुक्" ॥ प्रधानमभितः प्रधानयागस्योभयतः प्रागूर्ध्वं चेत्यर्थः ॥ "पर्यभिभ्यां च" इति क्रमात् सर्वोभयार्थे तसिल्प्रत्ययः ॥ "अभितःपरितः—" इत्यादिना तद्योगादुभयत्र द्वितीया ॥ अङ्गानि प्राच्यानि प्रयाजादीनि उदीच्यान्यनूयाजादीनि च। अयाक्षीदिष्टवान् । यजेर्लुङि सिचि वृद्धिः । व्रश्चादिना षत्वे "षढोः कस्सि" इति कत्वे "इण्कोः" इति षत्वम्। शेषाणि अङ्गापेक्षया अवशिष्टानि प्रधानहवींष्यहौषीत् यथाक्रममिति भावः। जुहोतेर्लुङि सिचि वृद्धिः। अथ नृपतेः सुतसंपदे पुत्रलाभार्थं वरं च विष्णुदत्तं पुत्रभावभजनलक्षणम्। अमार्गीत् विष्णुं प्रार्थितवानित्यर्थः। 'मार्गणं प्रार्थनेऽन्वेषणे' इति विश्वः । 'याच्ञायां वनतेमार्गेत्यमी वनतियाचति' इति भट्टमल्लश्च। मार्ग याच्ञान्वेषणयोरिति धातोर्लुङि "इट ईटि" इति सकारलोपः ॥

निष्ठां गते दात्रिमसभ्यतोषे
विहित्रिमे कर्मणि राजपत्न्यः।
प्राशुर्हुतोच्छिष्टमुदारवंश्या-
स्तिस्रः प्रसोतुं चतुरः सुपुत्रान् ॥ १३ ॥

१ °न्ययाजीद° E1.
२ सुतसंपदर्थम् E1.
३ राज्यपत्न्यः T2.
४ चतुरस्तनूजान् D., T2, T3.

१३. निष्ठामिति ॥ दत्रिमो दानेन निर्वृत्तः सभ्यानां सदस्यानां तोषो यस्मिन्नस्मिन् । क्त्रेर्मम्प्रत्यये ॥ "दोदद्घोः" इति ददादेशः । विहितत्रिमे विधिनिर्वृत्ते विहित इत्यर्थः । पूर्ववत् प्रत्यये दधातेर्हिरादेशः । कर्मणि यज्ञकर्मणि निष्ठां समाप्तिं गते सति । उदारवंश्याः महाकुलप्रसूताः । अत्र 'दिगादियतस्तदन्तविधिनिषेधाद्राजवंश्यादयः साध्वर्थे यः' इति वामनः । तिस्रो राजपत्न्यश्चतुरस्तनूजान् पुत्रान् प्रसोतुं यथायोगं प्रसवितुं ॥ "स्वरतिसूति—" इत्यादिना विकल्पादिडभावः । हुतोच्छिष्टं हुतशेषं हविः प्राशुः भक्षयामासुः । अश्नातेर्लिटि "अत आदेः" इति अभ्यासदीर्घः । झेरुस् । अत्र दिव्यपुरुषोपनीतान्नस्य होमानन्तरप्राप्तत्वाद्धुतशिष्टत्वोपचारः ॥

कौशल्ययाऽसावि सुखेन रामः
प्राक् केकयीतो भरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥ १४ ॥

१४. कौसल्ययेति ॥ प्राक् प्रथमं कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या ॥ "वृद्धेत्कोसलाजादाञ्ञ्यङ्" ॥ ततष्टाप् । तया रामः सुखेनाक्लेशेन असावि प्रसूतः । सूतेः सूयतेर्वा कर्मणि लुङि चिण् । ततोऽनन्तरं केकयानाचष्टे स्वजन्मभूमित्वेनेति केकयी कैकयीत्यर्थः । तदाचष्ट इति णिजन्तादौणादिके स्त्रियामिकारप्रत्यये टिलोपे णिलोपे च ॥ "कृदिकारात्—" इति ङीप् । तस्याः केकयीतः कैकेय्याः ॥ "अपादाने चाहीयरुहोः" इति अपादानपञ्चम्यन्तात्तसिप्रत्ययः । भरतोऽभूज्जात इत्यर्थः । सुमित्रात्वेकैव लक्ष्मणेन सह उदारचेष्टं महापराक्रमम् । शत्रून्हन्तीति शत्रुघ्नस्तम् । अमानुषत्वविवक्षया टक्प्रत्ययः । '"अमनुष्यकर्तृके च" इति चकारात्कचिन्मनुष्यकर्तृकेऽपि टक्प्रत्ययः' इति

१ कौसल्यया B., E2, N., Com.
२ कैकयीतो E1, T2, T3, T4.
३ सुतोऽभूत् E3.

कौमारः। प्रासोष्ट प्रसूतवती। सूतेः सूयतेर्वा कर्त्तरि लुङि "स्वरति-सूति—" इत्यादिना विकल्पादिडभावः। अस्मिन् शत्रुघ्नेनेति तृतीया-प्रयोगे छन्दोभङ्गभयाल्लक्ष्मणेनेत्युक्तम्। अस्य च सहवचनस्य सह शाखया प्रस्तरं प्रहरतीत्यत्र शाखाप्रस्तरयोरिव यमयोरनयोः क्रियान्वयतुल्यकालताप्रतिपादनमात्रत्वात् पित्रा सहागतः पुत्र इत्यत्र पितुरिव ज्यायसो लक्ष्मणस्य शब्दतोऽप्राधान्यस्फुरणेऽपि वास्तवप्राधान्यस्य न कदाचित्क्षतिरिति संतोष्टव्यम्॥

आर्चीद् द्विजातीन् परमार्थविन्दा–
नुदेजयान् भूतगणान्यषेधीत्।
विद्वानुपानेष्ट च तान् स्वकाले
यतिर्वसिष्ठो[१] यमिनां वरिष्ठः॥ १५॥

१५. आर्चीदिति॥ यतिर्जितेन्द्रियः। 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते' इत्यमरः। यमिनां योगिनां वरिष्ठः श्रेष्ठः॥ "प्रियस्थिर—" इत्यादिना उरुशब्दस्य वरादेशः॥ विद्वान्विधिज्ञो वसिष्ठः पुरोधाः परमार्थस्य समस्तवस्तुतत्त्वस्य विन्दन्तीति विन्दान् ज्ञानलब्धॄन् सर्वसाक्षात्कारिण इत्यर्थः। विदेर्लाभार्थात् "अनुपसर्गाल्लिम्पविन्द—" इत्यादिना शप्रत्ययः। द्विजातीन् ब्राह्मणान् आर्चीत् पुत्रजन्मकाले पूजयामास। अर्चतेर्भौवादिकत्वाल्लुङि "इट ईटि" इति सकारलोपः। उद्वेजयन्त्युत्कम्पयन्तीत्युदेजयान् भीकरान्। अत्रापि तेनैव सूत्रेण शप्रत्ययः। भूतगणान् बालग्रहादिसमूहान् न्यषेधीत् मन्त्रैरुच्चाटयामास। सेधतेरूदित्त्वादिड्विकल्पादिट्यपि "नेटि" इति वृद्धिप्रतिषेधे लघूपधगुणः॥ "इट ईटि" इति सकारलोपः॥ सुतान् कुमारान् स्वकाले गर्भैकादशे वर्षे इत्यर्थः। 'गर्भैकादशेषु राजन्यम्' इति स्मरणात्। उपानेष्ट उपनीतवान्। नयतेर्लुङि "सम्मानन-" इत्यादिना आचार्यकरणे आत्मनेपदम्॥

---

१ वशिष्ठो c., D., C.

वेदोऽङ्गवांस्तैरखिलोऽध्यगायि
शस्त्राण्युपायंसत जित्वराणि।
ते भिन्नवृत्तीन्यपि मानसानि
समं जनानां गुणिनोऽध्यवात्सुः॥ १६॥

१६. वेद इति॥ तैरुपनीतैः कुमारैः अङ्गवान् साङ्गोऽखिलो वेदोऽध्यगायि। सर्वे वेदा अधीताः। जातावेकवचनम्। कर्मणि लुङि "विभाषा लुङ्लृङोः" इति गाङादेशे चिणि युगागमः। ते कुमाराः. जित्वराणि जैत्राणि॥ "इण्नशजिसर्तिभ्यः क्वरप्" इति क्वरप्॥ पिति तुगागमः। शस्त्राण्युपायंसत उपयेमिरे। 'विवाहोपयमौ समौ' इत्यमरः। राज्ञां शस्त्रेषु दाराभिमानात्तत्परिग्रहे उपयमव्यपदेशः। अत एव यमेर्लुङि "उपाद्यमः स्वकरणे" इत्यात्मनेपदम्। 'स्वकरणं पाणिग्रहणम्' इति काशिकायाम्॥ "विभाषोपयमने" इति सिचः पक्षे कित्वाभावादनुनासिकलोपाभावः। गुणिनो गुणाढ्यास्ते कुमाराः भिन्नवृत्तीनि भिन्नरुचीन्यपि जनानां मानसानि सममविषममध्यवात्सुः मानसेष्ववात्सुरित्यर्थः॥ "उपान्वध्याङ्वसः" इत्यधिकरणस्य कर्मत्वम्॥ वसतेर्लुङि सिचि वृद्धिः॥ "सः स्यार्धधातुके" इति सकारस्य तकारः॥ "सिजभ्यस्तविदिभ्यश्च" इति झेर्जुसादेशः॥ भिन्नरुचिमनोरञ्जनविरोधस्य गुणत्वेन समर्थनाद्विरोधाभासोऽलंकारः॥

ततोऽभ्यगाद्गाधिसुतः क्षितीन्द्रं
रक्षोभिरभ्याहतकर्मवृत्तिः।
रामं वरीतुं परिरक्षणार्थं
राजार्जिहत्तं मधुपर्कपाणिः॥ १७॥

१७. तत इति॥ ततः शस्त्रपरिग्रहानन्तरकाले रक्षोभिरभ्याहतकर्मवृत्तिः विहतानुष्ठानप्रवृत्तिः गाधिसुतो विश्वामित्रः परिरक्षणार्थं यज्ञ-

---

१ शास्त्रा E.
२ उपायंसत विजित्वराणि T2, उपायंसत च T4.
३ चित्र T3.
४ क्रतुरक्षणार्थम् T4, E3.

रक्षणार्थं रामं वरीतुं स्वीकर्त्तुम् ॥ "वृतो वा" इति वा दीर्घः ॥ क्षितीन्द्रं दशरथम् । अभ्यगात् आपत् ॥ "इणो गा लुङि" ॥ राजा दशरथस्तं गाधिसुतं मधुपर्कपाणिर्दधिमधुयुक्तपाणिः सन् आर्जिहत् अपूजयत् । अर्हेः पूजार्थाच्चौरादिकाण्णौ चङि "नन्द्राः संयोगादयः" इति रेफस्य निषेधात् "अजादेर्द्वितीयस्य" इति हिशब्दस्य द्विर्भावे "कुहोश्चुः"। आड्वृद्धिः ॥

ऐषीः पुनर्जन्मजयाय यत्त्वं
रूपादिबोधान्न्यवृतच्च यत्ते ।
तत्त्वान्यबुद्धाः[1] प्रतनूनि येन
ध्यानं[2] नृपस्तच्छिवमित्यवादीत् ॥ १८ ॥

१८. ऐषीरिति ॥ हे भगवन् ! ते तव येन ध्यानेन पुनर्जन्मनो जयाय निरासाय अपुनर्भवाय तत्त्वमात्मस्वरूपमैषीरज्ञासीः । इष गतौ । ये गत्यर्थास्ते ज्ञानार्थाः । ततो लुङि सिपि सिचि "इट ईटि" इति सिज्लोपः । आड्वृद्धिः । यद् ध्यानं रूपादिबोधाद्रूपादिविषयज्ञानात् न्यवृतत् न्यवर्त्तिष्ट ॥ "द्युद्भ्यो लुङि" इति परस्मैपदम् ॥ द्युतादित्वाच्च्लेरङादेशः । येन ध्यानेन प्रतनूनि सूक्ष्माणि तत्त्वानि महदादीन्यबुद्धाः अज्ञासीः । बुध्यतेः कर्त्तरि लुङि थासि "लिङ्सिचावात्मनेपदेषु" इति सिचः कित्वान्न लघूपधगुणः ॥ "झलो झलि" इति सिज्लोपः ॥ "झषस्तथोर्धोऽधः" ॥ तत्ते ध्यानं शिवमक्षतमिति काकुः । नृपः प्रत्यवादीत् कुशलमप्राक्षीदित्यर्थः ॥ "वदव्रज—" इत्यादिना सिचि वृद्धिः ॥ "इट ईटि" इति सलोपः ॥

आख्यन्मुनिस्तस्य शिवं समाधे-
र्विघ्नन्ति रक्षांसि वने क्रतूंस्तु[3] ।
तानि द्विषद्वीर्यनिराकरिष्णु-
स्तृणेढु रामः सह लक्ष्मणेन ॥ १९ ॥

---

१ तत्त्वान्यबोधाः (धीः ?) E2.
२ ध्यानिर्नृ (ध्यानी नृ ?) T3.
३ क्रतूंश्च C., N., O., T., E2.

१९. आख्यादिति ॥ अथ पृष्टो मुनिस्तस्य राज्ञः समाधेर्ध्यानस्य शिवमक्षतिमाख्यदाख्यातवान् ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" इति च्लेरङादेशः ॥ "आतो लोप इटि च" इत्याकारलोपः । किन्तु रक्षांसि राक्षसाः वने क्रतून्विघ्नन्ति प्रतिबध्नन्ति । हन्तेर्लटि "झोऽन्तः" ॥ "गमहन—" इत्यादिना उपधालोपः ॥ "हो हन्तेः—" इति कुत्वम् ॥ द्विषतां वीर्यं सामर्थ्यं निराकरिष्णुर्निराकरणशीलः ॥ "अलंकृञ्—" इत्यादिना इष्णुच् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात् द्वितीयायां "द्वितीया" इति योगविभागात्समासः ॥ रामो लक्ष्मणेन सह तानि रक्षांसि तृणेढु हिनस्तु । तृह हिंसायां लोटि तिपि "एरुः" ॥ "रुधादिभ्यः श्नम्" ॥ "तृणह इम्" ॥ गुणः धत्वष्टुत्वढलोपाः ॥ आख्यदिति चानुषङ्गः ॥

स शुश्रुवांस्तद्वचनं मुमोह
राजाऽसहिष्णुः सुतविप्रयोगम् ।
अहंयुनाथ क्षितिपः शुभंयु-
रूचे वचस्तापसकुञ्जरेण ॥ २० ॥

२०. स इति ॥ स राजा तस्य मुनेर्वचनं शुश्रुवान् संश्रुतवान् ॥ "भाषायां सदवसश्रुवः" इति लिटः क्वसुरादेशः ॥ सुतविप्रयोगमसहिष्णुः सन् ॥ "अलंकृञ्—" इत्यादिना सहेरिष्णुच् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीया ॥ मुमोह मोहं गतः । अथानन्तरमहंयुना अहंकारयुता तापसकुञ्जरेण पूज्यतापसेन विश्वामित्रेण ॥ "वृन्दारकनागकुञ्जरैः पूज्यमानम्" इति समासः ॥ शुभंयुः शुभवान् ॥ "अहंशुभयोर्युस्" इत्युभयत्र मत्वर्थीयो युस्प्रत्ययः ॥ क्षितिपो राजा वचो वाक्यमूचे उक्तवान् । दुहादित्वादप्रधाने कर्मणि लिट् ।

मया त्वमाप्थाः शरणं भयेषु[1]
वयं त्वयाप्योऽस्महि[2] धर्मवृद्ध्यै[3] ।
क्षात्रं द्विजत्वं च[4] परस्परार्थं
शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥ २१ ॥

---

१ भवेषु E1.
२ त्वया चाप्स्महि E1.
३ धर्मवृद्धैः E2.
४ हि D.

२१. मयेति ॥ हे राजन् ! भयेष्वापत्सु धर्मस्य वृद्ध्यै मया त्वं शरणं रक्षिता सन् । 'शरणं गृहरक्षित्रोः' इत्यमरः । आप्थाः प्राप्तोऽसि । आप्नोतेः कर्मणि लुङि थासि "झलो झलि" इति सिज्लोपः । त्वयापि वयं शरणमाप्स्महि प्राप्ताः स्मः । अहमपि प्राप्त इत्यर्थः ॥ "अस्मदो द्वयोश्च" इत्येकत्वे बहुवचनम् ॥ पूर्ववाक्ये मयेत्येकवचननिर्दिष्टस्यात्रापि तथैव निर्देश्यत्वात् । आप्स्महीत्यत्र आप्नोतेरेव कर्मणि लुङि महीङ् । झल्परत्वाभावान्न सिज्लोपः । तथाहि क्षत्रस्येदं क्षात्रं क्षत्रतेजः द्विजत्वं ब्रह्मतेजश्च परस्परार्थमन्योन्योपकारार्थम् । 'ब्रह्मणैव क्षत्रं संश्यति क्षत्रेण ब्रह्म' इत्यादि । 'नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्धते । ब्रह्मक्षत्रे तु संपृक्ते इह चामुत्र ऋध्नुतः' इति स्मरणाच्चेति भावः । ततः किमत आह । शङ्कामनर्थोत्प्रेक्षां मा कृथाः मा कुरु । करोतेर्माङि लुङि तङि थास् ॥ "न माङ्योगे" इत्यडभावः ॥ "लिङ्सिचावात्मनेपदेषु" इति सिचः कित्वाद्गुणाभावः ॥ "ह्रस्वादङ्गात्" इति सिचो लोपः ॥ स्वसूनुं रामं प्रहिणु प्रेषय । हिनोतेर्लोटि सिपि "उतश्च प्रत्ययात्—" इत्यादिना हेर्लुक् ॥ "हिनुमीना" इति णत्वम् ॥

घानिष्यते तेन महान्विपक्षः
स्थायिष्यते येन रणे पुरस्तात् ।
मा मां[1] महात्मन् परिभूरयोग्ये
न मद्विधो न्यस्यति भारमग्र्यम् ॥ २२ ॥

२२. शङ्कां मा कृथा इत्युक्तं तत्रोपपत्तिमाह । घानिष्यत इति ॥ तथाहि तेन रामेण महान् विपक्षः शत्रुः रावणादिरिति भावः घानिष्यते हनिष्यते ॥ "स्यसिच्सीयुट्—" इत्यादिना चिण्वदिट् आदिवृद्धिर्घत्वं च । किं च रामेण रणे पुरस्तादग्रे स्थायिष्यते स्थास्यते । तिष्ठतेर्भावे लृटि पूर्ववच्चिण्वदिटि युगागमः । हे महात्मन् महानुभाव ! मा माम् ॥ "त्वामौ द्वितीयायाः" इति मादेशः ॥ मा परिभूः प्रत्याख्यानेन नावमन्य-

१ मा T_3, T_1, E_3, T, Com.

स्वेत्यर्थः। भुवो "माङि लुङ्"॥ "न माङ्योगे"॥ तथाहि मम विधेव विधा प्रकारो यस्य स मद्विधो मादृशः। विमृश्यकारीत्यर्थः। योगाय प्रभवतीति योग्यः समर्थः॥ "योगाद्यच्च" ॥ अयोग्ये असमर्थे जने अर्घ्यं गुरुं भारं न न्यस्यति न निधत्ते तस्मान्मा शङ्किष्ठा इत्यर्थः॥

क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-
र्यास्यन् सुतस्तप्स्यति मां समन्युम्।
इत्थं नृपः पूर्वमवालुलोचे[1]
ततोऽनुजज्ञे[2] गमनं सुतस्य॥ २३॥

२३. अथ राजा किमकार्षीदित्याह। क्रुध्यन्निति॥ क्रुध्यन् सुतस्याप्रेषणे क्षुभ्यन् विप्र एव वह्निः कुलं धक्ष्यति भस्मीकरिष्यति। दहतेर्लृटि स्यप्रत्यये घत्वादिकार्यम्। यास्यन् प्रयास्यन् सुतः समन्युं सशोकम्। 'मन्युशोकौ तु शुक् स्त्रियाम्' इत्यमरः। मां तप्स्यति तापयिष्यति। इत्थं नृपः पूर्वं प्रथममवालुलोचे आलोचितवान्। तत आलोचनानन्तरं सुतस्य गमनमनुमेने अङ्गीचकार। कुलदाहादात्मसंतापमात्रं वरमिति निश्चयादिति भावः। मन्यतेः कर्त्तरि लिट्। कौमुद्यां तु ततोऽनुजज्ञ इति पाठमनुसृत्य "अनुपसर्गाज्ज्ञः" इति शास्त्रप्रातिकूल्यमुद्भाव्य नृप इत्यत्र नृपेणेति विपरिणामं कृत्वा दोषपरिहारः कृतः। तदा अनुजज्ञे अनुज्ञातम्। कर्मणि जानाते रूपम्। गमनमिति प्रथमान्तम्॥

आशीर्भिरभ्यर्च्य मुनिः[4] क्षितीन्द्रं
प्रीतः प्रतस्थे पुनराश्रमाय।
तं पृष्ठतः प्रष्ठमियाय नम्रो
हिंस्रेषु दीप्तास्त्रधनुः[5] कुमारः॥ २४॥

१ मुपालुलोचे T4.
२ ततोऽनुमेने T., Com., ततोऽनुजज्ञो (ज्ञौ?) E3.
३ ततः c., C., N.

४ मुनिः c., C., N.
५ दीप्तास्त्रधरः B., E1, E3, दीप्रास्त्रधनुः D., N., दीप्तास्त्रधरः c., C.

२४. आशीर्भिरिति ॥ मुनिः प्रीतः सन् क्षितीन्द्रमाशीर्भिराशीर्वादैरभ्यर्च्य संपूज्य पुनराश्रमाय आश्रमं गन्तुम् ॥ "क्रियार्थोपपदस्य—" इत्यादिना चतुर्थी ॥ प्रतस्थे प्रस्थितः ॥ "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥ हिंस्रेषु रक्षोव्याघ्रादिषु विषये । दीप्रास्त्रं प्रदीप्तविशिखं धनुर्यस्य सः । समासान्तविधेरनित्यत्वात् "धनुषश्च" इति नानङादेशः । कुमारो रामः नम्रः पितरं प्रणतः सन्नित्यर्थः प्रतिष्ठते अग्र इति प्रष्ठमग्रगामिनम् ॥ "आतश्चोपसर्गे" इति कर्तरि कः ॥ "प्रष्ठोऽग्रगामिनि" इति निपातनात्षत्वम् ॥ तं मुनिं पृष्ठतः पश्चादियाय अनुयात इत्यर्थः । इणो लिटि णलि वृद्ध्यायादेशौ ॥ "अभ्यासस्यासवर्णे" इतीयङादेशः ॥ "नमिकम्पि—" इत्यादिना नम्रकम्प्रदीप्रहिंस्रा रप्रत्ययान्ताः ॥

प्रयास्यतः पुण्यवनाय जिष्णो
रामस्य रोचिष्णुमुखस्य धृष्णुः ।
त्रैमातुरः कृत्स्नजितास्त्रशास्त्रः[1]
सध्र्यङ् रतः[2] श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥

२५. प्रयास्यत इति ॥ ततोऽनन्तरं पुण्यवनाय तपोवनाय प्रयास्यतस्तपोवनं गमिष्यतः ॥ "गत्यर्थकर्मणि—" इत्यादिना कर्मणि चतुर्थी ॥ "लृटः सद्वा" इति शत्रादेशः ॥ जिष्णोर्जयशीलस्य ॥ "ग्लाजिस्थश्च ग्स्नुः" ॥ गिदयं न कित् ॥ रोचिष्णुमुखस्य रोचमानमुखस्य ॥ "अलंकृञ्—" इत्यादिना इष्णुच् ॥ रामस्य धृष्णुः धृष्टः । 'धृष्टे धृष्णुर्वियातः' इत्यमरः ॥ "त्रसिगृधिधृषिक्षिपेः क्नुः" ॥ तिसृणां मातृणामपत्यं पुमांस्त्रैमातुरः ॥ "तद्धितार्थ—" इत्यादिना समासः । "मातुरुत्संख्यासंभद्रपूर्वायाः" इत्यण्प्रत्यये परत उकारः । तद्दत्तपायसोद्भवत्वेन इतरयोरपि मातृत्वादिति भावः । तदुक्तं रघुवंशे । 'चरोरधार्धभागाभ्यां तामयोजयतामुभे' इति । रामायणविरोधस्तु पुराणभेदात्परिहृतोऽस्माभिः रघुवंशसंजीविन्यामेव । कृत्स्नं यथा तथा

१ अस्त्रशास्त्रः T_4, E., E_2. | २ गतः E.

जितानि स्वायत्तीकृतानि अस्त्राण्याग्नेयादीनि दैवताधिष्ठितानि शस्त्राण्यनभिमन्त्रितायुधानि च येन सः लक्ष्मणः श्रेयसि हितकृत्ये। सहाञ्चतीति सध्र्यङ् सहचरः सहायोऽभूत्। 'यः सहाञ्चति सध्र्यङ् सः' इत्यमरः ॥ "ऋत्विग्दधृक्—" इत्यादिना अञ्चतेः क्विन् ॥ "क्विन्प्रत्ययस्य कुः" ॥ सहस्य सध्र्यादेशः। लक्ष्मणोऽपि राममनुगत इत्यर्थः ॥

इषुमति रघुसिंहे दन्दशूकाञ्जिघांसौ
धनुररिभिरसह्यं मुष्टिपीडं दधाने ।
व्रजति पुरतरुण्यो बद्धचित्राङ्गुलित्रे[1]
कथमपि गुरुशोकान्मा रुदन्माङ्गलिक्यः[2] ॥२६॥

२६. इषुमतीति ॥ इषुमति प्रशस्तबाणमति। प्रशंसायां मतुप्। दंदशूकान् हिंस्रान् राक्षसान् ॥ "यजजपदशां यङः" इतिदंशेर्यङन्तादूकप्रत्ययः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात् कर्मणि द्वितीया ॥ जिघांसौ हन्तुमिच्छौ। हनः सन्नन्तादुप्रत्ययः ॥ "अज्झनगमां सनि" इति दीर्घः ॥ अत एवारिभिरसह्यं दुःसहं ॥ "शकिसहोश्च" इति यत्प्रत्ययः ॥ धनुः मुष्ट्या मुष्टिना वा पीडा निपीडनं यस्मिन्कर्मणि तद्यथा तथा दधाने ॥ "सप्तम्यां चोपपीड—" इत्यादिना णमुल् इति केचित्। तच्चिन्त्यम्। उपोपसर्गव्यभिचारेण तदसंभवादिति। अङ्गुलीस्त्रायत इत्यङ्गुलित्रमङ्गुलित्राणम् ॥ "आतोऽनुपसर्गे कः" ॥ बद्धं चित्रमङ्गुलित्रं येन तस्मिन्। रघुसिंहे रघुश्रेष्ठे रामे व्रजति पुरान्निर्गच्छति सति। गुरुः शोको विप्रयोगदुःखं यासां ताः पुरतरुण्यः पौराङ्गनाः। मङ्गलं प्रयोजनमासां माङ्गलिक्यः मङ्गलप्रयोजनाः सत्यः ॥ "प्रयोजनम्" इति ठक् ॥ "टिड्ढाणञ्—" इत्यादिना ङीप् ॥ कथमपि महता यत्नेनेत्यर्थः। 'ज्ञातहेतुविवक्षायामप्यादि कथमव्ययम्। कथमादि तथाप्यन्तं यत्नगौरवबाढयोः ॥' इति वचनात्। नारुदन् नाश्रूणि मुमुचुः। रुदेर्लुङि

[1] बद्धगोधाङ्गुलित्रे E2.

[2] गुरुशोका नारुदन् D., Com.; गुरुशोकान्मा रुदन् E1, E2, E3, T.

"इरितो वा" इति विकल्पात् च्लेरङ् । अन्तः सशोका अपि मङ्गल- भयात्कथंचिच्छोकानुभावमश्रुपातं प्रत्यबध्नन्नित्यर्थः ॥

अथ जगदुरनीचैराशिषस्तस्य विप्रा-
स्तुमुलकलनिनादं तूर्यमाजघ्नुरन्ये ।
अभिमतफलशंसी चारु[1] पुस्फोर[2] बाहु-
स्तरुषु चुकुवुः[3]रुच्चैः पक्षिणश्चानुकूलाः ॥ २७ ॥

२७. अथेति ॥ अथास्मिन्नन्तरे विप्रास्तस्य रामस्य अनीचैरुच्चैराशिषो जगदुः । अन्ये वादकास्तुमुलो महान् कलकलश्च निनादो यस्मिन् तद्यथा तथा तूर्यमाजघ्नुः ताडयामासुः । बाहुरस्य दक्षिणभुजः अभिमतफलशंसी इष्टार्थसिद्धिसूचकः सन् चारु साधु पुस्फोर स्फुरितवान् । णलोऽकित्वाद्गुणः ॥ "शर्पूर्वाः खयः" इत्यभ्यासे पकारः शिष्यते ॥ पक्षिणश्चानुकूलाः सन्तः तरुषूच्चैस्तारं चुकुवुः चुकुजुः । कुशब्दे लिट् । अत्र लिटः कित्वेन गुणाभावादुवङादेशः ॥

इति भट्टिकाव्ये प्रकीर्णकाण्डे रामसंभवो[4] नाम
प्रथमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते
भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने प्रथमः सर्गः ॥

---

१ चास्य T2, T3, T4.
२ पुस्फोट E1.
३ चुकुजु E1.
४ रामोत्पत्तिर्नाम C., N., E2, E3; विश्वामित्रगमनो नाम B.

॥ श्रीः ॥

अथ द्वितीयः सर्गः ।

वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशां च ।
निर्याय तस्याः स पुरः समन्ता-[1]
च्छ्रियं दधानां शरदं ददर्श ॥ १ ॥

१. वनस्पतीनामिति ॥ स रामस्तस्याः पुरो निर्याय निर्गत्य । यातेः समासे क्त्वो ल्यबादेशः । समन्ताद्वनस्पतीनां वृक्षाणाम् । पारस्करादित्वात्सुडागमः । सरसां कासाराणां नदीनां सरितां तेजस्विनां चन्द्रादीनाम् । अथवा मेघापायाद्भास्वराणामिति सर्वविशेषणम् ॥ "नपुंसकमनपुंसकेन—" इत्यादिना नपुंसकैकशेषः ॥ कान्तिभृतामिति च सर्वविशेषणम् । दिशां च श्रियं दधानामादधानां पुष्णन्तीमित्यर्थः । शरदं शरल्लक्ष्मीं ददर्श ॥

तरङ्गसङ्गाच्चपलैः पलाशै-
र्ज्वालाश्रियं सातिशयां[2] दधन्ति ।
सधूमदीप्ताग्निरुचीनि रेजु-
स्ताम्रोत्पलान्याकुलषट्पदानि ॥ २ ॥

२. अथ सप्तभिः श्लोकैः शरदं वर्णयति तरङ्गेत्यादिना ॥ तरङ्गसङ्गाच्चपलैश्चलैः पलाशैर्दलैः ज्वालानां श्रियं शोभां सातिशयं भूयिष्ठं यथा तथा दधन्ति दधानानि ॥ "नाभ्यस्ताच्छतुः" ॥ "वा नपुंसकस्य" इति विकल्पान्नुमागमः ॥ आकुलाः षट्पदाः येषु तानि ताम्रोत्पलानि रक्तोत्पलानि सधूमस्य दीप्तस्य ज्वलितस्य अग्नेः रुचिरिव रुचिर्येषां तानि सन्ति रेजुः तद्वद्रेजुरित्युपमालंकारः ॥

---

१ समस्ताच्छ्रियं T., G.
२ सातिशयं D., T_2, T_3, T_4, G., T., Com.

E_2 gives अदृश्यताभांसि' &c. as the 2nd verse.

बिम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां[1] पयोभिः ।
कूलानि सामर्षतयेव[2] तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः[3] ॥ ३ ॥

३. बिम्बेति ॥ बिम्बेन प्रतिबिम्बरूपेणागतैः संक्रान्तैस्तीरवनैरुपलक्षितैः पयोभिः सरोजजलैरपहृतां निजामात्मीयां समृद्धिं वनलक्ष्मीं विलोक्य कूलानि कर्तृणि सामर्षतयेव स्थलपद्महासैः स्थलकमलविकासैः सरोजलक्ष्मीं पयःसम्बन्धिनीं वितेनुर्वितस्तरुः । पयोभिः प्रतिबिम्बच्छलेन स्वकीयवनशोभापहृतेति कूलैः कोपात् स्थलपद्महासमिषेण तदीयसरोजशोभापहारः कृत इत्युत्प्रेक्षार्थः । पराहृतश्रीकाणां तदीयश्रीहरणं युक्तमिति भावः ॥

निशातुषारैर्नयनाम्बुकल्पैः
पर्णान्त[4]पर्यागलदच्छ[5]बिन्दुः ।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ ॥ ४ ॥

४. निशेति ॥ दिनादौ प्रभाते नयनाम्बुकल्पैस्तदुपमानयोग्यैरित्यर्थः । निशायां तुषारैर्हिमैः पर्णान्तेभ्यः पत्राग्रेभ्यः पर्यागलन्तः स्रवन्तः अश्रुबिन्दवो यस्य सः । नदन्तः कूजन्तः पतङ्गाः पक्षिणो यस्मिन्सः तीरतरुः कुमुद्वतीं कुमुदिनीं प्रतीत्यर्थः । गम्यमानोद्देशक्रियापेक्षया कर्मत्वम् । गम्यमानक्रियापेक्षया कारकोत्पत्तेरिष्टत्वात् ॥ "कुमुदनडवेतसेभ्यो ड्मतुप्" ॥ "झयः" इति वकारः ॥ "उगितश्च" इति ङीप् ॥ उपारुरोदेव । हन्त निःश्रीका मुकुलिता इति साक्रन्दमश्रूणि मुञ्चन्तीवेत्युत्प्रेक्षार्थः ॥

---

१ विलोक्योपहृतां B., विलोक्यापभृतां E2.
२ सामर्षतयैव T4.
३ मासैः T2.
E2 gives लतानुपातं &c. as the 3rd verse.
४ पत्रान्त E3, C., N.
५ 'दश्रु Com.
E2 gives तरङ्गसङ्ग &c. as the 4th verse.

वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः[1] ।
परस्परं[2] विस्मयवन्ति लक्ष्मी-
मालोकयांचक्रुरिवादरेण ॥ ५ ॥

५. वनानीति ॥ वनानि तोयानि च विलीनभृङ्गैः कनीनिकायमानभृङ्गैः इति भावः । अत एव नेत्रकल्पैर्यथासंख्यं पुष्पैः सरोजैश्च परस्परं लक्ष्मीमन्योन्यशोभां विस्मयवन्ति आश्चर्याणि सन्ति आदरेणास्थया आलोकयाञ्चक्रुरिवेत्युत्प्रेक्षा । सा च वनानि तोयानि च इति केवलप्रकृतगोचरया तुल्ययोगितया नेत्रकल्पैरित्युपमया पूर्वोक्तयथासङ्ख्येन चोत्थापितेति सङ्करः ॥

प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम्[3] ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनी संसहतेऽन्यसङ्गमम् ॥ ६ ॥

६. प्रभातेति ॥ प्रभाते वाताहत्या कम्पिताकृतिरिति निषेधचेष्टोक्तिः । पद्मिनी कुमुद्वतीरेणुभिः पिशङ्गविग्रहमन्याङ्गरागारुणाङ्गमित्यर्थः । भृङ्गं कुपितेव खण्डिता नायिकेवेत्यर्थः । 'नीत्वान्यत्र निशां प्रातरागते प्राणवल्लभे । अन्यासंभोगचिह्नैस्तु कुपिता खण्डिता मता' ॥ इति लक्षणात् । निरास निरस्तवती । अस्यतेर्लिट् । "अत आदेः" इत्यभ्यासदीर्घः । तथाहि मानिनी मानवती स्त्री अन्यस्याः सङ्गमन्यसङ्गमं स्वप्रियस्येति शेषः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । न संसहते न क्षमते । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । वंशस्थं वृत्तम् ॥

---

१ विलीन T., Com.
२ परस्परां c., T_1, T_2, B., C., N.
E_2 gives बिम्बागतै &c. as the 5th verse.

३ वातागम T_2, T_3, T_4.
c gives अदक्षताम्भांसि &c. as the 6th verse. E_2 gives निशातुषारैः &c. as the 6th verse.

दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।
आकर्णयन्नुत्सुकहंसनादान्[1]
लक्ष्ये[2] समाधिं न दधे मृगावित् ॥ ७ ॥

७. दत्तेति ॥ मधुलेहिनो मधुलिहः । लिहेस्ताच्छील्ये णिनिः । तेषां गीतौ गाने दत्तावधानं दत्तचित्तम् । मृगाणां गानप्रियत्वादिति भावः । अत एव प्रशान्तचेष्टं निष्पन्दं हरिणं जिघांसुर्हन्तुमिच्छुः । हन्तेः सन्नन्तादुप्रत्ययः । मृगान्विध्यतीति मृगावित् व्याधः । व्यध ताडने क्विप् ॥ "ग्रहिज्यावयि—" इत्यादिना संप्रसारणम् ॥ "नहिवृति" इत्यादिना पूर्वस्य दीर्घः ॥ उत्सुकानां हृष्टानां हंसानां नादानाकर्णयन् । तदासक्तचित्तः सन्नित्यर्थः । लक्ष्ये शरव्ये मृगे समाधिमेकाग्र्यं न दधे नाधारयत् । अपूर्वो भावो भावान्तरं प्रतिबध्नातीति भावः । अत्र जिघांसादिसामग्रीसद्भावेऽपि लक्ष्यसमाधिलक्षणकार्यस्य हंसकूजिताकर्णनेनानुत्पत्तेरुक्तनिमित्ता विशेषोक्तिरलंकारः 'तत्सामग्र्यामनुत्पत्तौ विशेषोक्तिर्निगद्यते' इति लक्षणात् ॥

गिरेर्नितम्बे मरुता विभिन्नं
तोयाव[3]शेषेण हिमाभमभ्रम् ।
सरिन्मुखाभ्युच्चय[4]मादधानं
शैलाधिपस्यानुचकार लक्ष्मीम् ॥ ८ ॥

८. गिरेरिति ॥ गिरेर्नितम्बे कटके मरुता वातेन विभिन्नं विस्तारितं तोयानामवशेषेण तोयेषु गतेषु अवशेषेण अवशिष्टेन निर्जलस्वरू-

c gives लतानुपातं &c., and E_2 वनानि तोयानि &c., as the 7th verse.

१ हंसनादं T_3.

२ लक्ष्ये E_2, E_3.

c and E_3 give प्रभातवाताहति &c. as the 8th verse.

३ तोयाविशेषेण T_4.

४ °भ्युच्छ्रय T., G., Com.

पेण हिमाभं हिमप्रभं सरितां मुखेषु प्रवाहेषु अभ्युच्छ्रयं वृद्धिमादधानं प्राक्क्षण एव वृष्ट्या कृतोच्छ्रयमित्यर्थः । अभ्रं मेघः शैलाधिपस्य हिमाद्रेर्लक्ष्मीमनुचकार तादृशीं शोभां प्रापेत्युपमा ॥

गर्जन्[1] हरिः साम्भसि शैलकुञ्जे[2]
प्रतिध्वनीनात्मकृतान्निशम्य ।
क्रमं[3] बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥ ९ ॥

९. गर्जन्निति ॥ साम्भसि शैलकुञ्जे गर्जन् अम्भः पीत्वा हर्षात् क्ष्वेडमानो हरिः सिंहः आत्मकृतान् स्वगर्जनकृतान् प्रतिध्वनीन् निशम्य अन्यमृगेन्द्रनादान् प्रतिसिंहनादान् प्रतर्कयन्मन्यमानोऽत एव सकोपः सन् क्रमितुं सहेलमुत्पतितुं क्रमं बबन्ध पादन्यासं चकारेत्यर्थः । अत्र स्वप्रतिध्वनिषु सादृश्यात्प्रतिपक्षगर्जनभ्रान्तेर्भ्रान्तिमदलंकारः ॥

अदृक्षताम्भांसि नवोत्पलानि
रुतानि चाश्रोषत[4] षट्पदानाम् ।
आघ्रायि वान् गन्धवहः सुगन्ध-[5]
स्तेनारविन्दव्यतिषङ्गवांश्च ॥ १० ॥

१०. अदृक्षतेति ॥ तेन रामेण नवान्युत्पलानि येषु तान्यम्भांसि अदृक्षत दृष्टानि । दृशेः कर्मणि लुङि च्णिवदिडभावपक्षे "न दृशः" इति क्सादेशनिषेधः । हलन्तत्वात् "लिङ्सिचावात्मनेपदेषु" इति कित्वान्न गुणः । व्रश्चादिना षत्वम् ॥ "षढोः कः सि" इति कत्वम् "इण्कोः"

c and E2 give दत्तावधानं &c., as the 9th verse.
१ तर्जन् T3.
२ कुन्ते T3.
३ क्रमे B.

C gives गिरेर्नितम्बे &c., and E2 तिग्मांशु &c. as the 10th verse.
४ वाश्रोषत E1.
५ सुगन्धि B. Noticed also in the Com.

इति षत्वम् ॥ षट्पदानां रुतानि अश्रोषत श्रुतानि । शृणोतेः कर्मणि लुङि अहलन्तत्वेन सिचोऽकित्वाद्गुणः । अरविन्दानां व्यतिषङ्गः सम्पर्कः तद्वान् अत एव सुगन्धः शोभनगन्धः । गन्धस्येत्वे तदेकान्तग्रहणादिहेत्वाभावः । सुगन्धिरिति पाठेऽपि कविप्रयोगबाहुल्यादिष्यते । वान्मन्दं गच्छन् । वातेर्लटः शत्रादेशः । वहतीति वहः । पचाद्यच् । गन्धस्य वहो गन्धवहः वायुश्चाघ्रायि आघ्रातः । जिघ्रतेः कर्मणि लुङि चिणि युक् । एवं सर्वतो निर्वृतिलाभान्नाध्वश्रमसंभावनासीदिति भावः ॥

लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च ।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत्स्मयमान आस्त[1] ॥ ११ ॥

११. लतेति ॥ स काकुत्स्थो रामः कुतूहलात्कौतुकादीषत्स्मयमानो मन्दं हसन् लतां लतामनुपत्यासाद्य तथा लतामनुपत्यानुपत्य च लतानुपातं कुसुमान्यगृह्णात् । ग्रहेर्लङि श्नाप्रत्यये संप्रसारणम् । नदीं नदीमवस्कन्द्य तथा नदीमवस्कन्द्यावस्कन्द्य च नद्यवस्कन्दमुदकमुपास्पृशत् आचामति स्म । 'उपस्पर्शस्त्वाचमनम्' इत्यमरः । स्पृशेर्लङ् । चारुशिलां चारुशिलामुपविश्य तथा चारुशिलामुपविश्योपविश्य चारुशिलोपवेशमास्त तत्रोपविष्ट इत्यर्थः । आसेर्लङि तङ् । 'देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति सकर्मकत्वम् ॥ "विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः" इति सर्वत्र द्वितीयान्त उपपदे विश्यादिभ्यो णमुल् ॥ व्याप्यमाने आसेव्यमाने चार्थे गम्ये गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः क्रियायाः पौनःपुन्यमासेवा ॥ "नित्यवीप्सयोः" इति द्वित्वं तु न

---

१ आस्ते E2.
c gives गर्जन् &c. and E2 दिग्व्यापिनी &c. as the 11th verse.

भवति ॥ "उपपदमतिङ्" इति समासे तेनैव गम्यमानार्थत्वात् पूर्वोक्तविग्रहवाक्यगतनित्यवीप्साप्रयुक्तक्रियाद्वयगतद्विर्वचनस्याप्रयोगः ॥

तिग्मांशुरश्मिच्छुरितान्यदूरात्
प्राञ्चि प्रभाते सलिलान्यपश्यत् ।
गभस्तिधाराभिरिव द्रुतानि
तेजांसि भानोर्भुवि संभृतानि ॥ १२ ॥

१२. तिग्मेति ॥ प्रभाते अदूरादन्तिके प्राञ्चि प्राच्यानि तिग्मांशोः सूर्यस्य रश्मिभिः छुरितानि स्फुरितानि रञ्जितानि सलिलानि गभस्तिधाराभिः किरणश्रेणिभिः अंशुपरंपराभिः द्रुतानि क्षरितानि सन्ति भुवि संभृतानि राशीकृतानि भानोस्तेजांसि इवापश्यदित्युत्प्रेक्षा ॥

दिग्व्यापिनी लोचनलोभनीया
मृजान्वया[१]: स्नेहमिव स्रवन्तीः ।
ऋज्वायताः शस्य[२]विशेषपङ्क्ती-
स्तुतोष पश्यन् वितृणान्तरालाः ॥ १३ ॥

१३. दिगिति ॥ दिग्व्यापिनीः अतिविपुलाः लोचनानां लोभनीयाः प्रलोभिकाः दृष्टिमधुराः । बाहुलकः कर्त्तरि कृत्यः । मृजा शुद्धिः ॥ "षिद्भिदादिभ्योऽङ्"॥ तयान्विताः स्वच्छा इत्यर्थः । स्नेहं चिक्कणतां स्रवन्तीरिवेत्युत्प्रेक्षा । काले मूलसेकादतिमसृणा इत्यर्थः । 'चिक्कणं मसृणं स्निग्धम्' इत्यमरः । ऋजवः समरेखाः पादवक्रा आयता दीर्घाश्च । वितृणान्यन्तरालानि यासां ताः उत्खातान्तस्तृणा इत्यर्थः । सस्यविशेषाणां नानासस्यानां पङ्क्तीः पश्यंस्तुतोष । स्वभावोक्तिरलंकारः ॥

E₂ gives वियोग &c. as the 12th verse.
E₂ gives संभूषणं &c. as the 13th verse.

१ मृजान्विताः T₂, T₄, G., T., Com.
२ सस्य E₁, T₃, G., T., Com., E₂.

वियोगदुःखानुभवानभिज्ञैः
काले नृपांशं[1] विहितं ददद्भिः ।
आहार्यशोभारहितैरमायै-
रैक्षिष्ट पुम्भिः प्रचितान् स गोष्ठान् ॥ १४ ॥

१४. वियोगेति ॥ वियोगेन पुत्रकलत्रादिविप्रयोगेण यो दुःखानुभवस्तस्यानभिज्ञैः विहितं धर्मशास्त्रचोदितं नृपांशं राजदेयं करं काले समये ददद्भिः आहार्यशोभारहितैः कटकमुकुटादिसंपाद्यशोभानपेक्षैरित्यर्थः। अमायैरकपटैः पुम्भिः गोपजनैः प्रचितान् प्रचुरान् गावस्तिष्ठन्त्यत्रेति गोष्ठाः गोनिवासव्रजाः । विशेष्यलिङ्गविवक्षया पुल्लिङ्गनिर्देशः । अत एव 'गोष्ठो भूतपूर्वगोष्ठीनो देशः' इति काशिकायाम्। 'गोष्ठं गोस्थानम्' इत्यमरकोशे । नपुंसकनिर्देशो विशेष्यानुसारादित्याविरोधः ॥ "सुपि स्थः" इति कप्रत्ययः । "अम्बाम्बगोभूमि—" इत्यादिना षत्वम् ॥ तान् गोष्ठान् स रामः ऐक्षिष्ट अद्राक्षीत् । ईक्षतेर्लुङि ताङि सिचीट् । आड्वृद्धिः ॥

स्त्रीभूषणं चेष्टितमप्रगल्भं
चारूण्यवक्राण्यपि वीक्षितानि ।
ऋजूंश्च विश्वासकृतः स्वभावान्[2]
गोपाङ्गनानां मुमुदे विलोक्य ॥ १५ ॥

१५. स्त्रीति ॥ स रामो गोपाङ्गनानां सम्बधि स्त्रीणां भूषणमलंकारभूतमप्रगल्भमधृष्टं चेष्टितं व्यापारमवक्राण्यनपाङ्गप्रवृत्तान्यपि चारूणि वीक्षितानि तथा ऋजूननभिसंधिजान् अत एव विश्वासकृतो विश्वासजनकान् भावान्स्वभावांश्च शीलानिति यावत् । 'भावः सत्तास्वभा-

E2 gives विवृत्त &c. as the 14th verse.
१ नृपांशं च करं T4, नृपांसं E2.

E2 gives विचित्र &c. as the 15th verse.
२ स भावान् G., T., Com.

वाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । स्वभावानिति पाठेऽप्ययमेवार्थः । 'शीलं स्वभावः' इत्यभिधानात् । विलोक्य मुमुदे ॥

विवृत्तपार्श्वं रुचिराङ्गहारं
समुद्वहच्चारुनितम्बरम्यम्[1] ।
आमन्द्रमन्थध्वनिदत्ततालं
गोपाङ्गनानृत्तं[2]मनन्दयत्तम् ॥ १६ ॥

१६. विवृत्तेति ॥ विवृत्तपार्श्वं वलितपक्षकं रुचिराङ्गहारं मनोहराङ्गविक्षेपं समुद्वहता सम्यगुन्नमता चारुणा नितम्बेन रम्यमामन्द्रेण गम्भीरेण मन्थध्वनिना मन्थानघोषेण दत्तस्तालः कालक्रियामानं यस्मिन् तत् गोपाङ्गनानां बल्लवीनां नृत्तमिव नृत्तं तात्कालिकाङ्गचलनविशेषः तं राममनन्दयत् । अत्र गात्रकर्मणि नृत्तत्वारोपाद्रूपकालंकारः स्वभावोक्तिसंकीर्णः ॥

विचित्रमुच्चैः प्लवमानमारात्
कुतूहलं[3] त्रस्नु ततान तस्य ।
मेघात्ययोपात्तवनो[4]पशोभं
कदम्बकं वातमजं मृगाणाम् ॥ १७ ॥

१७. विचित्रमिति ॥ विचित्रं चित्ररूपमाराद्दूरादुच्चैरुदग्रं प्लवमानं वल्गत् त्रस्नु चकितम् ॥ "त्रसिगृधि—" इत्यादिना क्नुप्रत्ययः ॥ मेघात्ययेन शरदागमेनोपात्ते बलमुपशोभा च येन तत् । वातमजतीति वातमजं वाताभिगामी वातमृगाख्यो मृगविशेषः । अत एव 'वातप्रमीर्वातमृगः' इत्यमरः । खश्प्रकरणे "वातशुनीतिलशर्धेष्वजधेट्तुदज-

E2 gives गिरेर्नितम्बे &c. as the 16th verse.

१ बिम्बम् T2.

२ नृत्य c., T1, C., N, E3, B.

c gives सितारविन्द &c. and E2 गर्जन् &c. as the 17th verse.

३ कौतूहलं T1, C., T2.

४ बलोपशोभं E1, E3, D., T2, T3, T, G, Com.

हातीनामुपसंख्यानम्" इति वातोपपदादजेः खशि मुमागमः । मृगाणां कदम्बकं तस्य रामस्य कुतूहलं ततान वितस्तार । स्वभावोक्तिरलंकारः ॥

सितारविन्दप्रचयेषु लीनाः
संसक्तफेणेषु[1] च सैकतेषु ।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥ १८ ॥

१८. सितेति ॥ सितारविन्दप्रचयेषु पुण्डरीकषण्डेषु तथा संसक्तफेनेषु सैकतेषु च लीना कुन्दावदाताः स्वयं च कुन्दकुसुमधवलाः कलहंसमालाः श्रोत्रसुखैः निनादैः प्रतीयिरे प्रतीताः ज्ञाताः । प्रतिपूर्वादिणः कर्मणि लिट् ॥ "लिटस्तझयोरेशिरेच्" ॥ "इणो यण्" ॥ "द्विर्वचनेऽचि" इति यणःस्थानिवद्भावात् द्विर्वचने "दीर्घ इणः किति" इत्यभ्यासदीर्घः । अत्र कलहंसानां पुण्डरीकपुलिनसंदेहगोचराणां निनादैर्निश्चयान्तः संदेहालंकारभेदः । तेन गुणसाम्योत्थवस्त्वन्तरैकतालक्षणः सामान्यालंकारो व्यज्यते ॥

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यद्[2]लीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥ १९ ॥

१९. नेति ॥ किं बहुना यज्जलं सुचारुपङ्कजं न तज्जलं नासीत् । पङ्कजं च यदलीनषट्पदं तन्नासीत् । षट्पदोऽपि यः कलं न जुगुञ्ज । गुजि अव्यक्ते शब्दे । लिट् । असावगुञ्जन् षट्पदो नासीत् । गुञ्जितं च यन्मनो न जहार तद्गुञ्जितं नासीत् । किन्तु सर्वं तत्तदुचितगुणविशिष्टमेवा-

---

c gives विचित्र &c. as the 18th verse.

[1] फेनेषु E_1, E_2, E_3, T., G., Com.
[2] यत्र विलीन T_4.

वर्त्तिष्ठेत्यर्थः। अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य निवर्त्तनमुखेन विशेषणत्वोक्तेरेकावलीभेदोऽलङ्कारः। 'यत्रोत्तरोत्तरेषां स्यात्पूर्वपूर्वं प्रति क्रमात्। विशेषकथनं यत्स्यादसावेकावली मता' इति लक्षणात्॥

तं यायजूकाः सह भिक्षुमुख्यै-
स्तपःकृशाः शान्त्युदकुम्भहस्ताः।
यायावराः पुष्पफलेन चान्ये[1]
प्रानर्चुरर्च्या[2] जगदर्चनीयम्॥ २०॥

२०. तमिति॥ तपसा कृशाः क्षमाः यायजूकाः इज्याशीलाः॥ "यजजपदशां यङः" इति यजेर्यङन्तादूकप्रत्ययः॥ शान्त्यर्थमुदकुम्भः शान्त्युदकुम्भः॥ "एकहलादौ—" इत्यादिना उदकस्योदादेशः॥ स हस्ते येषां ते सन्तः। भिक्षुमुख्यैः परिव्राजकवर्यैः सह। 'भिक्षुः परिव्राट् कर्मन्दी' इत्यमरः॥ "सनाशंसभिक्ष उः"॥ जगदर्चनीयं जगत्पूज्यं तं रामं प्रानर्चुः प्रकर्षेण पूजयामासुः। अर्चतेर्भौवादिकाल्लिट्॥ "अत आदेः"॥ "तस्मान्नुड् द्विहलः" इत्यभ्यासदीर्घनुडागमौ॥ अर्च्याः पूज्याः॥ "ऋहलोर्ण्यत्"॥ अन्ये यायावराः शिलोञ्छमात्रजीविनः गृहस्थविशेषाः॥ "यश्च यङः" इति यातेर्यङन्ताद्वरच्प्रत्ययः॥ अल्लोपयलोपौ। पुष्पैश्च फलैश्च पुष्पफलेन॥ "जातिरप्राणिनाम्" इति बहुप्रकृतिकद्वन्द्वैकवद्भावः॥ 'अप्राणिनामिति प्रतिषेधे श्रूयमाणं बहुत्वं विधावपि बहुत्वं गमयति' इति न्यासकारवचनात्। प्रानर्चुः॥

विद्यामथैनं विजयां जयां च
रक्षोगणं क्षिप्नुमविक्षतात्मा[3]।
अध्यापिपद्गाधिसुतो यथाव-
न्निर्घातयिष्यन्[4] युधि यातुधानान्॥ २१॥

२१. विद्यामिति॥ अथाविक्षतात्मा रागाद्यनुपहतचित्तः गाधिसुतः युधि यातुधानान् राक्षसान् घातयिष्यन् मारयिष्यन्। हन्तेर्ण्यन्तात्

१ वान्ये E1.
२ प्राणर्चु E2, D., N.
३ अविक्षितात्मा D.
४ निर्घातयिष्यन् T3.

"लटः सद्वा" इति शत्रादेशः । रक्षोगणं क्षिप्नुं रक्षोगणस्य क्षेप्त्रीं हन्त्रीम् ॥ "त्रसिगृधि—" इत्यादिना क्नुप्रत्ययः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ विजयां जयां नाम विद्यामेनं रामं यथावत् यथार्हम् ॥ "तदर्हम्" इति वतिप्रत्ययः ॥ अध्यापिपत् अध्यापितवान् ग्राहितवानित्यर्थः । इङो णौ चङि गाङादेशाभावपक्षे "क्रीङ्जीनां णौ" इत्यात्वे पुगागमे अजादित्वाद्द्वितीयैकाचः पर्द्विर्भावः ॥

आयोधने[1] स्थायुकमस्त्रजात-
ममोघमभ्यर्णमहाहवाय ।
ददौ[2] वधाय क्षणदाचराणां
तस्मै[3] मुनिः श्रेयसि जागरूकः ॥२२ ॥

२२. आयोधन इति ॥ श्रेयसि रामहिते जागरूकः प्रवुद्धः अवहितः । जागरूक इति जागर्तेरूकप्रत्ययः । मुनिर्विश्वामित्रः अभ्यर्णमहाहवाय आसन्नमहारणाय । अभ्यर्णेत्यर्देः कर्त्तरि क्तः ॥ "अभेश्चाविदूर्ये" इति ईट्प्रतिषेधः ॥ "रषाभ्याम्—" इति निष्ठानस्य णत्वम् ॥ आहूयन्तेऽस्मिन्नित्याहवः ॥ "आङि युद्धे" इति ह्वयतेराङ्पूर्वादप्रत्ययः संप्रसारणं च ॥ तस्मै रामाय क्षणदाचराणां वधाय रक्षोवधार्थम् । आयोधने युद्धे स्थायुकं स्थास्नुं शत्रुभ्यस्तिष्ठमानमित्यर्थः ॥ "लषपत—" इत्यादिना उकञ् ॥ अमोघमप्रतिहतमस्त्रजातं ददौ उपदिदेशेत्यर्थः ॥

तं विप्रदर्शं कृतघातयत्ना
यान्तं वने रात्रिचरी डुढौके ।
जिघांसुवेदं धृतभासुरास्त्र-[4]
स्तां ताडकाख्यां[5] निजघान रामः ॥ २३ ॥

२३. तामिति ॥ विप्रान् साकल्येन दृष्ट्वा विप्रदर्शं कृतघातयत्ना विहितवधोद्योगा रात्रिचरी राक्षसी ॥ "चरेष्टः" ॥ टित्वात् ङीप् ॥ यान्तं

---

१ आयोधनस्थायुक D., E_2.
२ दधौ T_2.
३ अस्मै T_3.
४ भास्वरास्त्र E_3, com.
५ ताटका T_2, T_4 T., G., Com.

वनेचरं तं रामं डुढौके । ढौकेर्गत्यर्थाल्लिट् । अथ रामस्ताटकाख्यां तां रात्रिचरीं साकल्येन जिघांसुं विदित्वा जिघांसुवेदम् ॥ "कर्मणि दृशिविदोः साकल्ये" इत्युभयत्रापि णमुल्प्रत्ययः ॥ अत्र ताटकाया एकत्वेऽप्यदितिः पाशानिति बहुत्ववदवयवाभिप्रायं साकल्यवचनं वेदितव्यम् । तद्वत्तदवयवेष्वपि जिघांसुत्वसंभवात् । अवयवव्यापार-पूर्वकत्वादवयविव्यापारस्येति । धूतं भास्वरं दीप्तमस्त्रं येन स सन् निजघान निहतवान् ॥

अथालुलोके[1] हुतधूमकेतु-
शिखाञ्जनस्निग्धसमृद्धशाखम् ।
तपोवनं प्राध्ययनाभिभूत-
समुच्चरच्चारुपतत्त्रि[2]शिञ्जम्[3] ॥ २४ ॥

२४. अथेति ॥ अथ ताटकावधानन्तरं रामः हुतस्य हविषा तर्पितस्य धूमकेतोर्धूमध्वजस्याग्नेः शिखानां ज्वालानामञ्जनैस्तदुत्थकज्जलैः स्निग्धाः समृद्धाश्च शाखाः यस्मिन् तत् । प्राध्ययनेन प्रकृष्टेन उच्चतरेण वेदपाठेन अभिभूता तिरोहिता समुच्चरन्ती समन्तादुत्पद्यमाना पतङ्गानां पक्षिणां शिञ्जा रवो यस्मिन् तत् । शिजि अव्यक्ते शब्दे ॥ "गुरोश्च हलः" इति स्त्रियामकारप्रत्ययः ॥ तपोवनमालुलोके ददर्श । लोकृ दर्शने । कर्त्तरि लिट् । तङ् । अभ्यासह्रस्वः ॥

क्षुद्रान्न जक्षुर्हरिणान्मृगेन्द्रा
विशश्वसे पक्षिगणैः समन्तात् ।
नंनम्यमानाः फलदित्सयेव
चकाशिरे तत्र[4] लता विलोलाः ॥ २५ ॥

२५. क्षुद्रानिति ॥ तत्र तपोवने मृगेन्द्राः सिंहाः क्षुद्रान् दुर्बलान् हरिणान् न जक्षुः नाभक्षयन् ॥ "वा लिटि" इत्यदेर्घस्लादेशः ॥ "गमहन—" इत्यादिना उपधालोपः ॥ "शासिवसिघसीनां च" इति

१ लुलोचे C.
२ पतङ्ग T2, T4, T., G., Com.
३ सिञ्जम् D.
४ यत्र E2, E3.

षत्वम् ॥ समन्तात्पक्षिगणैः विशश्वसे विश्वस्तम् । विस्रब्धं विचेरुरित्यर्थः । श्वसेर्भावे लिट् । विलोलाश्चञ्चलाः लताः फलानां दित्सया दातुमिच्छयेव सुखग्रहणमित्युत्प्रेक्षार्थः । ददातेः "सनि मीमा—" इत्यादिना सन्नभ्यासलोपः । ततः स्त्रियामप्रत्यये टाप् । नंनम्यमानाः फलभरेण भृशं नमन्त्यः । नमेर्यङन्ताल्लटः शानजादेशः । चकाशिरे भान्ति स्म ॥

अपूपुजन् विष्टरपाद्यमाल्यै-
रातिथ्यनिष्णा[1] वनवासिमुख्याः ।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं
तावासनादि[2] क्षितिपालपुत्रौ ॥ २६ ॥

२६. अपूपुजन्निति ॥ अतिथ्यर्थमातिथ्यमतिथिसत्कारः ॥ "अतिथेर्ञ्यः" । तत्र निष्णान्तीति निष्णाः कुशलाः ॥ "आतश्चोपसर्गे" इति कः ॥ "निनदीभ्यां स्नातेः कौशले" इति षत्वम् ॥ वनवासिमुख्याः वानप्रस्थवर्याः । 'वैखानसो वनेवासी वानप्रस्थश्च तापसः' इति यादवः । "शयवासवासिष्वकालात्" इति विकल्पान्नालुक् । क्षितिपालपुत्रौ दाशरथी विष्टरमासनम् । विपूर्वात्स्तृणातेः "ऋदोरप्" ॥ "वृक्षासनयोर्विष्टरः" इति षत्वम् ॥ पादार्थं जलं पाद्यम् । 'पाद्यं पादाय वारिणि' इत्यमरः ॥ "पादार्घाभ्यां च" इति यत्प्रत्ययः ॥ माला एव माल्यानि । चातुर्वर्ण्यादित्वात्साधुः । तैरपूपुजन् पूजयामासुः । पूजेर्णौ चङ्युपधाह्रस्वः । क्षितिपालपुत्रौ च तदासनादि मधुपर्कमिश्रं यथा तथा तेन सहेत्यर्थः । प्रत्यग्रहीष्टां प्रतिगृहीतवन्तौ । तसस्तामादेशः । "ह्म्यन्त—" इति वृद्धिप्रतिषेधः ॥ "ग्रहोऽलिटि दीर्घः" ॥

दैत्याभिभूतस्य युवामवोढं
मग्नस्य दोर्भिर्भुवनस्य भारम्[3] ।
हवींषि संप्रत्यपि रक्षतं तौ
तपोधनैरित्थमभाषिषाताम् ॥ २७ ॥

---

[1] निष्ठा C.
[2] तदासनादि T2, T4, Com.
[3] भारं भुवनस्य दोर्भिः E1.

२७. दैत्येति ॥ हे दाशरथी युवां दैत्यैरसुरैरभिभूतस्य पीडितस्य अत एव मग्नस्य निरालम्बनस्य भुवनस्य भारं रक्षणधुरां दोर्भिर्भुजैर्वोढमूढवन्तौ । भुजबलेन दैत्यवधः कृतोऽवतारान्तरेष्विति भावः । वहेर्लुङि मध्यमद्विवचने थसस्तमादेशे "सहिवहोरोदवर्णस्य" इत्योत्वे धत्वादिकार्यम् । संप्रत्यपि तौ युवां हवींषि पशुपुरोडाशादीनि रक्षतम् । रक्षोभ्य इति भावः । रक्षेः प्रार्थनायां लोटि थसस्तमादेशः । इत्थमनेन प्रकारेण ॥ "इदमस्थमुः" ॥ तौ तपोधनैरभाषिषातां भाषितौ । भाषेः कर्मणि लुङि सिचीडागमः ॥

तान्प्रत्यवादीदथ राघवोऽपि[1]
यथेप्सितं प्रस्तुत कर्म धर्म्यम् ।
तपोमरुद्भिर्भवतां शराग्निः
संधुक्ष्यतां[2] नोऽरिसमिन्धनेषु ॥ २८ ॥

२८. तानिति ॥ अथ राघवोऽपि तान्मुनीन् प्रत्यवादीत् प्रत्युवाच ॥ "वदव्रज—" इत्यादिना सिचि वृद्धिः ॥ "इट ईटि" इति सलोपः ॥ तदेवाह । हे तपोधनाः धर्म्यं धर्मादनपेतम् ॥ "धर्मपथ्यर्थ—" इत्यादिना यत्प्रत्ययः ॥ कर्म यज्ञकर्म यथेप्सितं यथेष्टं विस्रम्भादित्यर्थः । आप्नोतेः सन्नन्तात्कर्मणि क्तः ॥ "आप्ज्ञप्यृधामीत्" इतीत्वे "सनि मीमा—" इत्यभ्यासलोपः ॥ प्रस्तुत प्रस्तुध्वं प्रक्रमध्वमित्यर्थः । प्रपूर्वात्स्तौतेर्लोटि थस्य तादेशः । तथाहि भवतां तपोभिरेव मरुद्भिः नोऽस्माकं शराग्निरस्त्राग्निररिष्वेव समिन्धनेषु काष्ठेषु संधुक्ष्यते संदीपिष्यते । ब्रह्मक्षत्रसंमेलनस्य पवनाग्निसमागमप्रायत्वादिति भावः । धुक्ष संदीपने इति धातोः कर्मणि लट् । रूपकालंकारः ॥

---

१ रघुनन्दनोऽपि T4.
२ संधुक्ष्यते D., T3, T4, T., G., Com., E3. संधुक्षते E1.

प्रतुष्टुवुः कर्म ततः प्रकृतै-
स्ते यज्ञियैर्द्रव्यगणै[1]र्यथावत् ।
दक्षि[2]ण्यदिष्टं कृतमा[3]र्त्विजीनै-
स्तद्या[4]तुधानैश्चिचिते प्रसर्पत् ॥ २९ ॥

२९. प्रेति ॥ ततो रामवाक्यानन्तरं ते तपोधनाः प्रकृतैः संपन्नैर्यज्ञियैर्यज्ञकर्मार्हैर्द्रव्यगणैः पशुसोमादिभिर्यथावद्यथार्हं कर्म यज्ञकर्म प्रतुष्टुवुः प्रारेभिरे । स्तौतेर्लिट् । दक्षिण्यैर्दक्षिणार्हैर्दिष्टमुपदिष्टम् ॥ "कडंकरदक्षिणाच्छ च" इति चकाराद्यत्प्रत्ययः । आर्त्विजीनैः ऋत्विक्कर्मार्हैः । "यज्ञर्त्विग्भ्यां घखञौ" इत्युभयत्र यथासंख्यं घखञौ ॥ "तत्कर्मार्हतीत्युपसंख्यानम्" । कृतमनुष्ठितं प्रसर्पत्प्रवर्तमानं तद्यज्ञकर्म यातुधानैश्चिचिते चेतितं ज्ञातम् । चिती संज्ञाने । कर्मणि लिट् ॥

आपिङ्गरूक्षो[5]र्ध्वशिरस्य[6]केशैः
शिरा[7]लजङ्घैर्गिरिकूटदघ्नैः ।
ततः क्षपाटैः पृथुपिङ्गलाक्षैः
खं प्रावृषेण्यैरिव चानशो[8]ऽब्दैः ॥ ३० ॥

३०. आपिङ्गेति ॥ ततो ज्ञानानन्तरमापिङ्गाः सर्वपिङ्गलाः रूक्षाः परुषाः ऊर्ध्वाः स्तब्धाः शिरसि भवाः शिरस्याः ॥ "शरीरावयवाच्च" इति यत्प्रत्ययः ॥ ईदृशाः वालाः केशाः येषां तैः सिरालाः सिरावत्यः जङ्घाः येषां तैः गिरिकूटदघ्नैः पर्वतशिखरप्रमाणैः । प्रमाणार्थे दघ्नच्प्रत्ययः । पृथुपिङ्गलाक्षैः ॥ "बहुव्रीहौ" इति षच् ॥ क्षपास्वटैः क्षपाटैः निशाचरैः । पचाद्यजन्तेन योगविभागात्सप्तमीसमासः । प्रावृषि भवैः

१ गुणे T2.
२ दाक्षिण्य c., B., E2.
३ कृतमृत्विजीनै T2.
४ यद्यातुधानै E3.
५ रुक्ष D., B., E1, E2, E3, N., C., T1, T2, T3, T4.
६ वालैः D., E3, T., G., Com.
७ सिराल T4, T., G., Com.
८ चानशेऽभ्रैः B., E3.

प्रावृषेण्यैः ॥ "प्रावृष एण्यः" इति एण्यप्रत्ययः ॥ महद्भिः श्यामैश्चेति भावः । अब्दैर्जलदैरिव ॥ "आतोऽनुपसर्गे कः" ॥ खमाकाशमानशे व्याप्तं च । चकारः पूर्वश्लोकोक्तशानसमुच्चयार्थः । अश्नोतेः कर्मणि लिट् । "अत आदेः" इत्यभ्यासदीर्घः ॥ "अश्नोतेश्च" इति नुट् ॥

अधिज्यचापः[1] स्थिरबाहुमुष्टि-
रुदञ्चिताक्षोऽञ्चितदक्षिणोरुः ।
तांल्लक्ष्मणः सन्नतवामजङ्घो
जघान शुद्धेषुरमन्दकर्षी ॥ ३१ ॥

३१. अधिज्येति ॥ अधिज्यमधिरोपितगुणं चापं येन सः स्थिरं बाहुश्च मुष्टिश्च बाहुमुष्टि यस्य सः उदञ्चिताक्षः ऊर्ध्वप्रसारितदृष्टिः अञ्चितः किञ्चित्कुञ्चितः दक्षिणोरुः यस्य सः सन्नता सम्यङ्नता वामजङ्घा यस्य सः । एतेन धन्विनां स्थानविशेष उक्तः । शुद्धाः स्वरूपतो लोहतो वा निर्दोषा इषवो यस्य सः । अमन्दकर्षी क्षिप्राकर्षी च लक्ष्मणस्तान् राक्षसान् जघान हतवान् ॥

गाधेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचणमस्त्रचुञ्चुः ।
स्थास्नुं रणे स्मेरमुखो जगाद
मारीचमुच्चैर्वचनं महार्थम् ॥ ३२ ॥

३२. गाधेयेति ॥ अस्त्रैर्वित्तः प्रसिद्धोऽस्त्रचुञ्चुः ॥ "तेन वित्तश्चुञ्चुप्चणपौ" ॥ रामोऽपि स्मेरमुखः स्मितमुखः सन् । गाधेरपत्यं पुमान् गाधेयो विश्वामित्रः ॥ "द्व्यचः" ॥ "इतश्चानिञः" इति ढक् ॥ तेन दिष्टमिदन्तया पुरो निर्दिष्टं विरसं कर्णकठोरं यथा तथा रसन्तं गर्जन्तं मायाचणं मायावित्तम् ॥ "तेन—" इत्यादिना चणप् ॥ रणे स्थास्नुं

१ अधिज्यधन्वा T2, T4. अधिज्यचापस्थिरबाहुमुष्टि E3.

स्थायिनम् ॥ "ग्लाजिस्थश्च ग्स्नुः" ॥ मारीचं महार्थमर्थभूयिष्ठं वचनमुच्चैस्तारं जगाद । दुहादौ ब्रुवेरर्थपरत्वाद्द्विकर्मकता ॥

आत्मम्भरिस्त्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥ ३३ ॥

३३. आत्मम्भरिरिति ॥ हे पापिष्ठ नराणां पिशितैर्मांसैः आत्मानं बिभर्तीत्यात्मम्भरिः कुक्षिम्भरिस्त्वं वनस्पतीनां वृक्षाणां फलानि गृह्णन्तीति फलेग्रहीन् फलग्राहिणः तन्मात्राहारानित्यर्थः । यद्यपि 'फलेग्रहिर्वृक्षः' इति काशिकायां 'स्यादवन्ध्यः फलेग्रहिः' इत्यभिधानकोशेषु च फलसंबन्धिवृक्षे रूढिः प्रतीयते तथाप्यत्र प्रौढ्या रूढ्यनादरेण योगमात्राश्रयणेन मुनिविशेषणत्वमुक्तम् ॥ "फलेग्रहिरात्मम्भरिश्च" इति ग्रहेर्भृञश्चेन्प्रत्ययः ॥ उपपदे च क्रमादेत्वं मुमागमश्च निपातितम् । हंसि हिनस्सि । हन्तेर्लटि शपो लुक् सिप् । येषां मुनीनां विभवाः सम्पदः श्वोभवाः विद्यमानाः शौवस्तिकाः ॥ "श्वसस्तुट् च" इति ठञि तुडागमः ॥ तेषां भावः शौवस्तिकत्वं न व्रजन्ति श्वो न भवितार इत्यर्थः ॥ तेषां विषयनिस्पृहाणां कस्मान्न दयसे किमिति तान्नानुकम्पस इत्यर्थः ॥ "अधीगर्थ—" इत्यादिना कर्मणि षष्ठी ॥

अद्मो द्विजान् देवयजीन्निहन्मः
कुर्मः पुरं प्रेतनराधिवासम् ।
धर्मो ह्ययं दाशरथे निजो नो
नैवाध्यकारिष्महि वेदवृत्ते ॥ ३४ ॥

३४. अथ मारीचो रामं प्रत्याह अद्म इति ॥ हे दाशरथे राम द्विजातीन् ब्राह्मणानद्मः भक्षयामः । अत्तेर्लटि मसि शपो लुक् । देवानां यजीन् यष्टॄन् । यजेरौणादिक इकारः । निहन्मो निबर्हयामः । हन्तेर्निपूर्वा-

लुटि मसि शपो लुक् ॥ "जासिनिप्रहण—" इत्यत्र संघातविगृहीत-विपर्यस्तग्रहणेऽपि शेषग्रहणानुवृत्तेस्तद्विवक्षायामेव षष्ठी । इह तु तदविवक्षायां कर्मणि द्वितीया । पुरं स्वस्थानं प्रेतनराणामधिवासं कुर्मः । सर्वानस्मत्पुरं नीत्वा मारयाम इत्यर्थः । अयं परद्रोहो नोऽस्माकं निजो नित्यो धर्मो हि । 'निज आत्मीयनित्ययोः' इति विश्वः । वेदवृत्ते वेदोक्तानुष्ठाने नाध्यकारिष्महीव नाधिकृता एव । अधिपूर्वात्करोतेः कर्मणि लुङि "स्यसिच्सीयुट्—" इत्यादिना चिण्वद्भावः ॥

धर्मोऽस्तिं[1] सत्यं तव राक्षसाय-
मन्यो व्यतिस्ते तु[2] ममापि धर्मः ।
ब्रह्मद्विषस्ते[3] प्रणिहन्मि येन
राजन्यवृत्तिर्धृतकार्मुकेषु[4] ॥ ३५ ॥

३५. पुनस्तं रामः प्रत्याह धर्म इति ॥ हे राक्षस अयं पूर्वोक्तो द्विजातिवधः तव सत्यं वस्तुतो धर्मोऽस्तु । किन्तु ममाप्ययमन्यो धर्मो व्यतिस्ते व्यतिभवते । व्यतिहारेण वर्तत इत्यर्थः । अस्तेर्लेटि "कर्तरि कर्मव्यतिहारे" इत्यात्मनेपदे "श्नसोरल्लोपः" । व्यतिहारमेवाह । ब्रह्मद्विषस्ते तव प्रणिहन्मि ब्रह्मद्विषं त्वां हन्मीत्यर्थः ॥ "जासिनिप्रहण—" इत्यादिना कर्मणि शेषे षष्ठी ॥ अत्र रामराक्षसकर्तृकयोः परहिंसालक्षणयोः स्वधर्मयोः वध्यघातुकनिष्ठयोः स्वरूपतो भिन्नकालत्वेऽपि क्रियमाणेष्यमाणयोः समानकालत्वसंभवाद् व्यतिभवनं संभवतीत्यविरोधः । तथा च जिघांसन्नेव हन्यसे कुतो हनिष्यसीति भावः । न चायमधर्मः प्रत्युत धर्म एवेत्याह । येन कारणेन धृतकार्मुकेषु शस्त्रपाणिषु विषये । राज्ञोऽपत्यानि पुमांसः राजन्याः क्षत्रियाः ॥ "राजश्वशुराद्यत्" ॥ 'राज्ञोऽपत्ये जातिग्रहणम्' । तेषां वृत्तिर्व्यापारः । तेषां दुष्टनिग्रहाधिकारिणामयं परमो धर्म इति भावः ॥

१ धर्मोऽस्तु T_2, T_3, T_4, Com.
२ नु E.
३ धर्मद्विष D.
४ धृतकार्मुकेषु E_1, E_3, T., G., Com.

इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ ।
तृणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्थत् [1] ॥ ३६ ॥

३६. इत्थमिति ॥ इत्थमनेन प्रकारेण युधि युद्धरङ्गे रामश्च निशायां विहारो यस्येति निशाविहारो निशाचरश्च तौ प्रवादं प्रकृष्टवादमन्योन्यप्रवादरूपं संप्रहारं कलहं वाक्कलहमित्यर्थः । प्रचक्रतुः । अथ रघुनन्दनो रामः पृतनां सेनां तृणाय मत्वा तृणं मत्वा अनादृत्येत्यर्थः ॥ "मन्यकर्मण्यनादरे विभाषाप्राणिषु" इति चतुर्थी ॥ रक्षो राक्षसं प्रधानभूतं मारीचं बाणेन निरास वायव्यास्त्रेण दूरं निक्षिप्तवानित्यर्थः ॥

जग्मुः प्रसादं द्विजमानसानि [2]
द्यौर्वर्षुका पुष्पचयं बभूव ।
निर्व्याजमिज्या ववृते वचश्च
भूयो [3] बभाषे मुनिना कुमारः ॥ ३७ ॥

३७. जग्मुरिति ॥ मुनीनां मानसानि प्रसादं प्रसन्नतां जग्मुः । द्यौरन्तरिक्षं पुष्पचयं वर्षुका कुसुमराशेर्वर्षित्री ॥ "लषपत—" इत्यादिना उकञ् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात्कर्मणि द्वितीया ॥ बभूव । इज्या यागः ॥ "व्रजयजोर्भावे क्यप्" ॥ निर्व्याजं निरुपद्रवं यथा तथा ववृते प्रवृत्ता । मुनिना विश्वामित्रेण कुमारो रामो भूयः पुनर्वचश्च वक्ष्यमाणं बभाषे भाषितः । दुहादित्वादप्रधाने कर्मणि क्तः ॥

---

१ पृतनां निरास T., G., Com. प्रधनान्निरास T2, T3, T4.

२ मुनिमानसानि T., G., Com.

३ भूयः कुमारो मुनिना बभाषे El.

महीय्यमाना भवतातिमात्रं
सुराध्वरे घस्मरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणा[1]या
ह्रि[2]णीयते वीरवती न भूमिः ॥ ३८ ॥

३८. महीय्यमानेति ॥ सुराणामध्वरे यज्ञे । तदर्थे इत्यर्थः । घस्मराः सर्वभक्षकाः । 'भक्षको घस्मरोऽद्मरः' इत्यमरः ॥ "सृघस्यदः क्मरच्"॥ तेषां जित्वरेण जैत्रेण ॥ "इण्नशजि—" इत्यादिना करप् ॥ भवता अतिमात्रं महीय्यमाना पूज्यमाना । कण्ड्वादियगन्तात्कर्मणि लटि पुनर्यकि अतो लोपे शानचि मुक् । वीरवती वीरस्वामिका च सतीत्यर्थः । प्रशंसायां मतुप् । भूमिर्वज्रायुधभूषणायाः वज्रपाणिस्वामिकाया अपीत्यर्थः । दिवः स्वर्गादपि न घृणीयते न जिह्रेति । प्रत्युत तामेव ह्रेपयतीत्यर्थः 'ह्रियां ह्रीच्छति जिह्रेति लज्जते च घृणीयते' इति भट्टमल्लः ॥ घृणिङ् महिङ् इति कण्ड्वादिषु ङित्करणादवयवे कृतं लिङ्गं समुदायस्य भवतीति न्यायात्तङ् ॥ "अकृत्सार्वधातुकयोर्दीर्घः" ॥

बलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यबलं[3] विजिग्ये ।
कल्पान्तदुःस्था वसुधा तथोहे
येनैष भारोऽति गुरुर्न तस्य ॥ ३९ ॥

३९. पुनः स्तौति बलिरिति ॥ हे राम येन भवता बलिर्वैरोचनिर्बबन्धे वामनेन सता बद्धः । सर्वत्र कर्मणि लिट् । जलधिर्ममन्थे कूर्मरूपेण मथितः । बन्ध बन्धने । मन्थ विलोडने । क्र्यादिकौ ॥ "असंयोगात्—"इति लिटोऽकित्वान्नानुनासिकलोपः । अमृतं जह्रे हृतम् । दैत्यबलं विजिग्ये स्त्रीमायया जितं वञ्चितमित्यर्थः ॥ "सन्लिटोर्जेः" इति कुत्वम् । कल्पान्ते दुःखेन तिष्ठतीति दुःस्था ॥ "आतश्चोपसर्गे" इति कर्तरि

[1] भूषणाय D., T2.
[2] घृणीयते T., G., Com.
[3] दैत्यकुलं N., C., E1, E3.

कः॥ तथा तेन प्रकारेण वसुधा भूमिर्वराहात्मना ऊहे ऊढा सागरादुद्धृतेत्यर्थः। वहेर्यजादित्वात्संप्रसारणम्। तस्य तव एष भारः मखत्राणरूपः अतिगुरुर्न। बलिबन्धाद्यपेक्षया कियानयं भार इति भावः॥

इति ब्रुवाणो मधुरं हितं च
तमाजिहन्मैथिलयज्ञभूमिम्।
रामं मुनिः प्रीतमतिर्मखान्ते
यशांसि राज्ञां निजिघृक्षयिष्यन्॥ ४० ॥

४०. इत्थमिति॥ इत्थं मधुरं प्रियं हितं श्रेयस्करं च ब्रुवाणो मुनिः मखान्ते प्रीतमतिः सन् तुष्टमनाः सन् राज्ञां यशांसि निजिघृक्षयिष्यन् निग्रहीतुमेषयिष्यन्। रामस्य धनुर्भङ्गेन राजयशःसंजिहीर्षामुत्पादयिष्यन्नित्यर्थः। ग्रहेः सनि ण्यन्तात् "लृटः सद्वा" इति सत्रादेशः॥ "रुद्विद्—" इत्यादिना सनः कित्वात् "ग्रहिज्यावयि—" इत्यादिना संप्रसारणे भष्भावादि। तं रामं मिथिलाया राजा मैथिलो जनकः॥ 'तस्य राजन्यपत्यवत्' इत्यतिदेशादञ्प्रत्ययः। तस्य यज्ञभूमिमाजिहत् आजीगमत्। अहि गतौ इति धातोरिदित्वान्नुमि णौ चङि "द्विर्वचनेऽचि" इति णिलोपस्य स्थानिवद्भावात् "अजादेर्द्वितीयस्य" इति "नन्द्राः—" इति निषेधान्नकारवर्जितस्य हिशब्दस्य द्विर्भावे अभ्यासकार्ये आड्वृद्धिः॥ "गतिबुद्धि—" इत्यादिना अणि कर्तुः कर्मत्वम्॥

ईतः स्म मित्रावरुणौ किमेतौ
किमश्विनौ सोमरसं पिपासू।
जनं समस्तं जनकाश्रमस्थं
रूपेण तावौजिहतां नृसिंहौ॥ ४१ ॥

१ इत्थं T3, T., G., Com.
२ प्रियं T., G.
३ प्रीतमुखो c
प्रीतमना C., N., E1, B.
४ एतौ स्म E1, D.
इतः सुमि॰, E2.
इति स्म T2, T4.
एतौ सु॰ T3.

४१. इत इति॥ सोमरसं पातुमिच्छू पिपासू। पिबतेः सन्नन्तादुप्रत्ययः॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात् द्वितीया। मित्रश्च वरुणश्च मित्रावरुणौ॥ "देवताद्वन्द्वे च" इत्यानङादेशः॥ इतः स्म किं प्राप्तुतः स्म किम्। इणः कर्त्तरि "लट् स्मे" इति भूते लटि तस्। अश्विनावेतावागतौ किम्। आङ्पूर्वादिणः कर्तरि क्तः। इतीति शेषः। इति तौ नरौ सिंहाविव नृसिंहौ पुरुषश्रेष्ठौ। उपमितसमासः। रूपेण सौन्दर्येण। "रूपं स्वभावे सौन्दर्ये" इति विश्वः। जनकाश्रमे तिष्ठतीति तत्स्थम्॥ "सुपि स्थः" इति कः। समस्तं जनमौजिहतां समस्तजनेन इत्यूहमकारयतामित्यर्थः। ऊह वितर्के। णौ चङि तसस्तामादेशः। णिलोपस्य स्थानिवद्भावात् "अजादेर्द्वितीयस्य" इति हिशब्दस्य द्विर्भावः। चुत्वम्। किं मित्रावरुणावश्विनौ वेति शुद्धसंदेहात् संदेहभेदोऽलंकारः॥

अजिग्रहत्तं जनको धनुस्तद्
येनार्दिदद् दैत्यपुरं[1] पिनाकी।
जिज्ञासमानो बलमस्य बाह्वो-
र्हसन्नभाङ्क्षीद्रघुनन्दनस्तत्॥ ४२॥

४२. अजिग्रहदिति॥ जनकोऽस्य रामस्य बाह्वोर्बलं जिज्ञासमानो ज्ञातुमिच्छन्। जानातेः सन्नन्तात् "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदे लटः शानजादेशः। रामं तद्धनुरजिग्रहत् ग्राहयामास। द्विदण्ड्यादिषु ग्राहिमोदीत्यादिजिप्रभृतय इति वचनात् ग्रहेर्द्विकर्मकत्वम्। ग्रहेर्णौ चङ्युपधाह्रस्वः। आदेः सन्वत्कार्यं च। येन धनुषा पिनाकी महादेवः दैत्यानां पुरो दैत्यपुरः। तिस्रोऽपीत्यर्थः। समासान्तविधेरनित्यत्वात् "ऋक्पूर्—" इति नाकारप्रत्ययः। दैत्यपुरमिति पाठे समासान्तः। एकवचनमतन्त्रम्। दैत्यपुराणीत्यर्थः। 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इति नपुंसकनिर्देशः। आर्दिदत्

[1] दैत्यपुरः T., G., E1, Com. | दैत्यपुरीं T2.

अर्दयामास संजहारेत्यर्थः । अर्देर्हिंसार्थात् चौरादिकाण्णौ चङि रेफवर्जितद्विर्भावादि । रघुनन्दनो रामः हसन् तत् धनुरभाङ्क्षीत् बभञ्ज । भञ्जेर्लुङि सिचि हलन्तलक्षणा वृद्धिः ॥ "अस्तिसिचोऽपृक्ते" इति ईटि कुत्वषत्वे ॥

ततो नदीष्णान्पथिकान् गिरिज्ञा–
नाह्वायकान्भूमिपतेरयोध्याम् ।
दित्सुः सुतां योधहरैस्तुरङ्गै–
र्व्यसर्जयन्मैथिलमर्त्यमुख्यः ॥ ४३ ॥

४३. तत इति ॥ ततो धनुर्भङ्गानन्तरं सुतां सीतां दित्सुः रामाय दातुमिच्छुः । ददातेः सन्नन्तादुप्रत्ययः । मैथिलो जनकः स एव मर्त्यमुख्यो नरेन्द्रः नद्यां स्नान्तीति नदीष्णान् नदीतरणे कुशलानित्यर्थः ॥ "सुपि स्थः" इत्यत्र सुपीति योगविभागात्कः । "निनदीभ्यां स्नातेःकौशले" इति षत्वम् । पथिषु नाना मार्गेषु कुशलान्पथिकान् ॥ "तत्र कुशलः पथः" इति ठक् ॥ "इगुपधज्ञा—" इति कप्रत्ययः । गिरि वाचि ज्ञान् वचनकुशलान् इति च गम्यते । एतावता संदर्भेण अविलम्बगामित्वमुक्तम् । भूमिपतेर्दशरथस्य आह्वायकान् आह्वातॄन् । ह्वयतेर्ण्वुलि युगागमः । योधान् हरन्तीति योधहरैः योधवद्योग्यवयस्कैरित्यर्थः ॥ "वयसि च" इत्यच्प्रत्ययः ॥ तुरङ्गैः साधनैरयोध्यां प्रति तामुद्दिश्येत्यर्थः । अत एव गम्यमानोद्देशक्रियां प्रति कर्मत्वम् । यथाहुः 'न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य किन्तु गम्यमानापि' इति । व्यसर्जयत् प्रेषितवान् । सृजेश्चौरादिकाल्लङ् ॥

क्षिप्रं ततोऽध्वन्यतुरङ्गयायी
यविष्ठवद्वृद्धतमोऽपि राजा ।
आख्यायकेभ्यः[1] श्रुतसूनुवृत्ति[2]–
रग्लानयानो[3] मिथिलामगच्छत् ॥ ४४ ॥

१ आख्यायिकेभ्यः c., T3. प्राख्यायकेभ्यः E1.

२ वृद्धि D.

३ रम्लान E1, T., G, Com.

४४. क्षिप्रमिति ॥ ततो वार्त्ताहरप्राप्त्यनन्तरमाख्यायकेभ्यः आख्यातृभ्यः वार्त्ताहारिभ्य इत्यर्थः । ख्यातेर्ण्वुलि युक् । श्रुता सूनोः रामस्य वृत्तिः धनुर्भङ्गादिव्यापारो येन सः । अध्वानमलंगामिनः अध्वन्याः शीघ्रगा इत्यर्थः ॥ "अध्वनो यत्खौ" इति यत्प्रत्ययः ॥ "ये चाभावकर्मणोः" इति प्रकृतिभावान्न टिलोपः । तैः तुरङ्गैर्यातीति तुरङ्गयायी ॥ "सुप्यजातौ—" इत्यादिना णिनिः ॥ राजा दशरथः वृद्धतमोऽपि वृद्धः सन्नपि यविष्ठवद्युवतमवत् ॥ "तेन तुल्यम्—" इत्यादिना वतिप्रत्ययः ॥ युवशब्दादिष्ठनि "स्थूलदूरयुव—" इत्यादिना यणादि परलोपः पूर्वगुणश्च ॥ म्लानं म्लानिः । भावे निष्ठा । अम्लानं श्रमरहितं यानं वाहनमश्वादिकं यस्य स सन् । मिथिलां जनकपुरीं क्षिप्रमगच्छत् । गमेर्लङ् ॥ "इषुगमियमां छः" ॥

वृन्दिष्ठमार्चीद्वसुधाधिपानां
तं प्रेष्ठमेतं गुरुवद्गरिष्ठम् ।
सदृङ्[1] महान्तं सुकृताधिवासं
बंहिष्ठकीर्त्तिर्यशसा वरिष्ठम् ॥ ४५ ॥

४५. वृन्दिष्ठमिति ॥ सदृक् समानोऽनुरूपइत्यर्थः । 'समानान्ययोश्च' इत्युपसङ्ख्यानात्समानशब्दोपपदाद् दृशेः क्विप् प्रत्ययः ॥ "दृग्दृशवतुषु" इति समानशब्दस्य सभावः ॥ इह कर्त्तुर्दर्शनक्रियानन्वयाद्यथा कथंचित्तैलपायिकादिवद्रूढिशब्द इत्याहुः । अथवा समान इव दृश्यते स्वयमेवेति कर्मकर्त्तरि व्युत्पत्त्या निर्वाहः । तदा भाष्यम् । 'कर्मदर्शनकर्त्ता यान्तमिव पश्यन्ति जनाः सोऽयं स इव दृश्यमानस्तमिवात्मानं पश्यन्ति' इति । बंहिष्ठकीर्त्तिर्बहुलतरकीर्त्तिः स जनकः वसुधाधिपानां राज्ञां मध्ये वृन्दिष्ठं वृन्दारकतमं श्रेष्ठमित्यर्थः । 'वृन्दारकः सुरश्रेष्ठे मनोज्ञे पुनरन्यवत्' इति विश्वः । प्रेष्ठं प्रियतमं गुरुवद्गरिष्ठं गुरुतमं पूज्यतमामित्यर्थः । महान्तं प्रभुं सुकृताधिवासं धर्मनिलयम् । वसेरधि-

---

१ सुदृङ् E3.

करणेघञ्प्रत्ययः । यशसा वरिष्ठमुत्तममधिकमित्यर्थः । एतमागतम् । आङ्पूर्वादिणः कर्त्तरि क्तः । तं दशरथमार्चीदर्चितवान् । अर्चतेर्भौवादिकाल्लुङि "इट ईटि" इति सलोपः । वृन्दिष्ठादौ वृन्दारकादिभ्य इष्ठनि "प्रियस्थिर—" इत्यादिना वृन्दाद्यादेशः ॥

त्रिवर्गपारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः ।
विवेकदृश्वत्वमगात्सुराणां
तं मैथिलो वाक्यमिदं बभाषे ॥ ४६ ॥

४६. त्रिवर्गेति ॥ मैथिलो जनकः तं दशरथमिदं वाक्यं बभाषे । ब्रुवीत्यर्थग्रहणात् द्विकर्मकत्वम् । किं तद्वाक्यं तदाह । हे राजन् ! असाविन्द्रः त्रयाणां धर्मादीनां वर्गः त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थौ' इत्यमरः । तस्य पारीणं पारगामिनं परिपूर्णमित्यर्थः । "अवारपार—" इत्यादिना खप्रत्ययः । भवन्तमेकमासनमध्यासयन् अधितिष्ठापयन् अर्धासनमधिगम्येत्यर्थः ॥ "अधिशीङ्स्थासां कर्म" इत्यधिकरणस्य कर्मत्वम् ॥ "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् ॥ सुराणां मध्ये विवेकदृश्वत्वं विवेकदर्शित्वम् । "दृशेः क्वनिप्" ॥ अगात् प्रापत् ॥ "इणो गा लुङि" ॥ "गातिस्था—" इत्यादिना सिचो लुक् ॥ मान्यमाननाद्विवेकिता भवेदन्यथा मूढता स्यादिति भावः ॥

हिरण्मयी शालिलतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥ ४७ ॥

४७. हिरण्मयीति ॥ हिरण्यस्य विकारो हिरण्मयी ॥ "दाण्डिनायन—" इत्यादिना निपातनात्साधुः । जङ्गम्यते इति जङ्गमा चरिष्णुः । गमेर्यङि नुगागमे पचाद्यचि "यङोऽचि च" इति यङो लुक् । सालशता वृक्ष-

१ साल T2, N.

शाखेवेत्युत्प्रेक्षा । दिवश्च्युता स्थास्नुः स्थिरा ॥ "ग्लाजिस्थश्च ग्स्नुः" ॥ अचिरप्रभा विद्युल्लतेवेत्युत्प्रेक्षा । शशाङ्ककान्तेश्चन्द्रिकाया अधिदेवता तस्या आकृतिरिवाकृतिः स्वरूपं यस्याः सा इत्युपमा । सुता दुहिता मैथिली तस्य दशरथस्य सुताय रामाय ददे दत्ता । कर्मणि लिट् । उपलक्षणमेतत् । लक्ष्मणादिभ्योऽप्यूर्मिलादयो दत्ता इत्यनुसंधेयम् ॥

लब्धां ततो विश्वजनीनवृत्ति-
स्तमात्मनीनामुदवोढ रामः ।
सद्रत्नमुक्ताफलभर्मशोभां[1][2]
संबंहयन्तीं रघुवर्ग्यलक्ष्मीम् ॥ ४८ ॥[3]

४८. लब्धामिति ॥ ततो दानानन्तरं विश्वस्मै जनाय हिता विश्वजनीना वृत्तिर्यस्य स रामः आत्मने हितामात्मनीनाम् ॥ "आत्मन्विश्वजनभोगोत्तरपदात्खः" ॥ शोभनानां रत्नानां पद्मरागादीनां मुक्ताफलानां भर्मणः सुवर्णस्य भूषाः भूषणानि यस्यास्ताम् । 'गाङ्गेयं भर्म कर्बुरम्' इति सुवर्णपर्यायेष्वमरः । रघुवर्गे भवां रघुवर्ग्याम् । वर्गान्तात् "अशब्दे यत्खावन्यतरस्याम्" इति यत्प्रत्ययः । लक्ष्मीं शोभां संबंहयन्तीं सम्यग्बहुलीकुर्वतीम् । संपूर्वाद्बहुलशब्दात् । "तत्करोति—" इत्यादिना ण्यन्ताल्लटः शतरि ङीप् । णाविष्ठवद्भावात् "प्रियस्थिर—" इत्यादिना बहुलशब्दस्य बंह्यादेशः । तां सीतामुदवोढ ऊढवान् । उद्वाहो विवाहः । वहेर्लुङि तङि "सहिवहोरोदवर्णस्य" इत्योत्वे ढत्वादिकार्यम् ॥

सुप्रातमासादितसंमदं तद्[4]
वन्दारुभिः संस्तुतमभ्ययोध्यम् ।
आश्वीयराजन्यकहास्तिकाढ्य-[5]
मगात् सराजं बलमध्वनीनम् ॥ ४९ ॥

१ समुद्र T2.
२ भूषां C., Com, G., T., B., E2.
३ वंश B., E2.
वंश्य c., C.
४ प्राग् T3, T., G., Com.
५ आश्वीय D., T., G., Com.

४९. सुप्रातमिति ॥ शोभनं प्रातरस्य सुप्रातं सुप्रभातम् ॥ "सुप्रात- सुश्व—" इत्यादिना बहुव्रीहौ निपातनादच् समासान्तष्टिलोपश्च ॥ आसादितसंमर्दं प्राप्तहर्षम् ॥ "प्रमदसंमदौ हर्षे" इति निपातितः । प्राक् पुरतः वन्दारुभिः बन्दिभिः संस्तुतम् ॥ "शृवन्द्योरारुः" ॥ अश्वानां समूहः आश्वीयम् ॥ "केशाश्वाभ्यां यञ्छावन्यतरस्याम्" इति छप्रत्ययः ॥ राजन्यकम् ॥ "गोत्रोक्ष—" इत्यादिना वुञ्प्रत्ययः ॥ हस्तिनां समूहो हास्तिकम् ॥ "अचित्तहस्तिधेनोष्ठक्" इति ठक् ॥ तेषां सेनाङ्गत्वात् द्वन्द्वैकवद्भावः । तेनाढ्यं संपन्नम् । अध्वानमलंगा- म्यध्वनीनम् ॥ "अध्वनो यत्खौ" इति यत्प्रत्ययः ॥ "आत्माध्वानौ खे" इति प्रकृतिभावः । तद्बलं सैन्यं सह राज्ञा सराजम् । यौगप- द्येऽव्ययीभावः ॥ "अनश्च" इति समासान्तष्टच् ॥ "नस्तद्धिते" इति टिलोपः ॥ अभ्ययोध्यमयोध्यामभि ॥ "लक्षणेनाभिप्रती आभिमुख्ये" इत्यव्ययीभावः ॥ अगात् अगमत् ॥

विशङ्कटो[1] वक्षसि बाणपाणिः
सम्पन्नतालद्वयसः पुरस्तात् ।
भीष्मो धनुष्मानुपजान्वरत्नि-
रैति[2] स्म रामं[3] पथि जामदग्न्यः ॥ ५० ॥

५०. विशङ्कट इति ॥ विशङ्कटे विशाले ॥ "वेः शालच्छङ्कटचौ" इति शङ्कटच्प्रत्ययः ॥ वक्षसि बाणः पाणौ यस्य वक्षोनिहितबाणयुक्त- पाणिरित्यर्थः ॥ "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ" इति पाणिश- ब्दस्य परनिपातः ॥ संपन्नोऽखण्डस्तालः तालवृक्षः स प्रमाणमस्य सः संपन्नतालद्वयसः । महातालप्रांशुरित्यर्थः ॥ "प्रमाणे—" इत्यादिना द्वय- सच् प्रत्ययः ॥ बिभ्यत्यस्मादिति भीष्मः भयङ्करः ॥ "भियःषुग्वा"

---

१ विसङ्कटे वक्षसि E1.
विसङ्कटो E2.
विशङ्कटे वक्षसि T2, T., G., Com.

२ एति स्म G., T., Com.
३ रामः T3, T4.

इत्यौणादिको मक्प्रत्ययः ॥ "भीमाद्योऽपादाने" इत्यपादानार्थे साधुः ॥ धनुष्मान्धन्वी । संसर्गे प्रशंसायां मतुप् । जानुनोः समीपमुपजानु । समीपार्थेऽव्ययीभावः तत्रारत्निर्लक्षणया बाहुर्यस्य सः आजानुबाहुरित्यर्थः । जमदग्नेरपत्यं पुमान् जामदग्न्यः परशुरामः । गर्गादिपाठादपत्येऽपि गोत्रत्वारोपात् यञ् । साक्षादपत्यत्वविवक्षायां त्वृष्यणि जामदग्नो भवति । पथि मार्गे पुरस्तात् पुरोऽग्रे ॥ "अस्ताति च" इति पूर्वशब्दात्सप्तम्यर्थादस्तातिप्रत्ययः पूर्वस्य पुरादेशश्च ॥ एति स्म इतवान् प्राप्त इत्यर्थः ॥ " लट् स्मे " इति इणो भूते लट् ॥

उच्चैरसौ राघवमाह्वतेदं[1]
धनुः सबाणं कुरु मातियासीः ।
पराक्रमज्ञः प्रियसंततिस्तं
नम्रः क्षितीन्द्रोऽनुनिनीषुरूचे ॥ ५१ ॥

५१. उच्चैरिति ॥ असौ जामदग्न्यो राघवं रामं एवं वक्ष्यमाणप्रकारेण उच्चैस्तारमाह्वत सस्पर्धमाहूतवान् । ह्वेञो लुङि "स्पर्धायामाङः" इति तङ् ॥ "आत्मनेपदेष्वन्यतरस्याम्" इति च्लेरङादेशः ॥ "आतो लोप इटि च" इत्याकारलोपः । तं प्रकारमेवाह । धनुश्चापं सबाणं कुरु मया सह युध्यस्वेत्यर्थः । मातियासीः अतिक्रम्य मागा इत्यर्थः । यातेः "माङि लुङ्" ॥ "न माङ्योगे" ॥ "यमरमनमातां सक् च" इति सगिटौ ॥ "इट ईटि" इति सलोपः । पराक्रमं जामदग्न्यसामर्थ्यं जानातीति तज्ज्ञः ॥ "आतोऽनुपसर्गे कः" ॥ प्रिया संततिर्यस्य सोऽपत्यवत्सलः क्षितीन्द्रो दशरथः तं जामदग्न्यं नम्रः प्रणतः अनुनिनीषुः अनुनेतुमिच्छुः । नयतेः सन्नन्तादुप्रत्ययः । ऊचे उवाच । ब्रुवः कर्तरि लिट् । वचिरादेशः ॥

---

१ माह्वतेनं T4. | माह्वतेवं T3, T., G., Com.

अनेकशो निर्जितराजकस्त्वं
पितॄनतार्प्सीर्नृपरक्ततोयैः।
संक्षिप्य संरम्भमसद्विपक्षं[1]
कास्थार्भकेऽस्मिंस्तव राम[2] रामे ॥ ५२ ॥

५२. अनेकश इति ॥ हे जामदग्न्य! त्वमेकैकवारमेकशः॥ "संख्यैकवचनाच्च वीप्सायाम्" इति शस्प्रत्ययः॥ ततो नञ्समासे अनेकशो बहुवारमित्यर्थः। निर्जितानि राजकानि राजसमूहाः येन स सन्॥ "गोत्रोक्ष—" इत्यादिना वुञ्॥ नृपरक्तैरेव तोयैः पितॄनतार्प्सीः तर्पितवानसि। तृप प्रीणने इति धातोर्लुङि "स्पृशमृशकृषतृपदृपां सिज्वा वक्तव्यः" इति विकल्पात्सिचि "अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" इति अमभावपक्षे रूपमित्युक्तं प्राक्। तस्मादसद्विपक्षमविद्यमानप्रतिपक्षं निर्विषयमिति यावत्। संरम्भं कोपम्। 'संरम्भः संभ्रमे कोपे' इति विश्वः। संक्षिप्य संहर। क्षिपेर्दैवादिकाल्लोटि सिपि "अतो हेः" इति हिलोपः। अर्भके डिम्भे। 'पोतः पाकोऽर्भको डिम्भः' इत्यमरः। "अर्भकपृथुकपाका वयसि" इत्यौणादिको निपातः। अस्मिन् रामे मत्पुत्रे तव का आस्था कोऽभिनिवेशः। नायं बालस्ते कोपस्य लक्ष्यमित्यर्थः॥

अजीगणद् दाशरथं न वाक्यं
यदा स[3] दर्पेण तदा कुमारः।
धनुर्व्यकार्क्षीद्[4] गुरुबाणगर्भं
लोकानलावीद्विजितांश्च तस्य ॥ ५३ ॥

५३. अजीगणदिति॥ यदा स जामदग्न्यो दर्पेण दशरथस्येदं दाशरथं वाक्यं नाजीगणत् न गणितवान्। गण संख्याने इति धातोः स्वार्थण्यन्ताल्लुङि "ई च गणः" इत्यभ्यासस्य वैभाषिक ईकारः। तदास्मिन्

१ विपक्षे E2, C.
२ नाम T2.
३ स्वदर्पेण D., T4.
४ व्यकार्क्षीदुरु T., G., Com.

काले कुमारो रामः उरुर्बाणो गर्भे यस्य तद् धनुर्जामदग्न्यचापं व्यकार्क्षीत् विकृष्टवान् चकर्षेत्यर्थः । पूर्ववत् "स्पृशमृशकृषतृप—" इत्यादिना पक्षे सिच्यमभावे रूपम् । हलन्तलक्षणा वृद्धिः ॥ "षढोः कः सि" इति कत्वम् । शेषं पूर्ववत् । विजितान् तपोजितान् तस्य जामदग्न्यस्य लोकान् पुण्यलोकानलावीत् । निस्पृहस्य तस्य अनुज्ञयैव चिच्छेद चेत्यर्थः । रामबाणस्यामोघवर्त्तित्वादिति भावः ॥

जिते नृपारौ[1] सुमनीभवन्ति
शब्दायमानान्यशनैरशङ्कम् ।
वृद्धस्य राज्ञोऽनुमते[2] बलानि
जगाहिरेऽनेकमुखानि[3] मार्गान् ॥ ५४ ॥

५४. जित इति ॥ नृपारौ क्षत्रियान्तके जामदग्न्ये जिते सति असुमनांसि सुमनांसि संपद्यमानानि भवन्ति सुमनीभवन्ति ॥ "अरुर्मनश्चक्षुः—" इत्यादिना च्वौ अन्त्यस्य लोपे "अस्य च्वौ" इतीकारः ततो लटः शत्रादेशे नपुंसके जसि नुमागमश्च ॥ अत एवाशनैरमन्दमशङ्कं निःशङ्कं शब्दायमानानि शब्दं कुर्वाणानि क्ष्वेडमानानीत्यर्थः ॥ "शब्दवैर—" इत्यादिना क्यङन्ताल्लटः शानजादेशः ॥ बलानि सैन्यानि वृद्धस्य राज्ञो दशरथस्य अनुमतेरनुज्ञानात् अनेकमुखानि बहुमुखानि सन्ति मार्गान् नानापथान् जगाहिरे प्रविविशुः ॥

अथ पुरुंजवयोगान्नेदयद्[4] दूरसंस्थं
दवयदतिरयेण प्राप्तमुर्वीविभागम् ।
क्रमरहितमचेतन्नीरजीकारितक्ष्मां
बलमुपहितशोभां[5] तूर्णमायादयोध्याम् ॥ ५५ ॥

---

१ नृपाले T₃.
२ नुमतेर्बे T., G., Com.
३ मुखांश्च D.
४ पुरजव D., T₃.
गुरुजव E₁.
५ बलमभिहित T₃.

५५. अथेति ॥ अथ नानापथगमनानन्तरं पुरुर्महान् । पूर्यतेः पृणातेर्वा औणादिककुप्रत्ययः । ताहग्जवयोगात् । दूरे संस्था संस्थितिर्यस्य दूरसंस्थं वस्तु ॥ "आतश्चोपसर्गे" इत्यङ् ॥ प्रत्ययान्तोत्तरपदबहुव्रीहिः । नेदयत् अन्तिकस्थं कुर्वत् । अन्तिकशब्दात् "तत्करोति" इति ण्यन्ताल्लटः शत्रादेशः । णाविष्ठवद्भावात् ॥ "अन्तिकबाढयोर्नेदसाधौ" इति नेदादेशः ॥ तथा प्रांतमासन्नमुर्वीविभागमतिरयेण दवयत् दूरीकुर्वत् । दूरशब्दात् "तत्करोति" इति ण्यन्ताल्लटः शत्रादेशः । णाविष्ठवद्भावात् "स्थूलदूर—" इत्यादिना यणादिपरलोपः पूर्वगुणश्च । क्रमरहितमक्रममखेदमचेतत् इयद्दूरं गतमित्यजानत् । चिती संज्ञाने इति धातोर्लटः शत्रादेशः । बलं सैन्यम् । अनीरजा नीरजा संपद्यमाना कारिता नीरजीकृता । सुमनीवत्प्रक्रिया । ताहशी क्ष्मा भूर्यस्यास्तामुपहितशोभां ध्वजपताकादिभिराहितश्रीकामयोध्यां तूर्णं त्वरितम् ॥ "रुष्यमत्वरसंघुषास्वनाम्" इति विकल्पादनिट्पक्षे "ज्वरत्वर—" इत्यादिना वकारोपधयोरूठ् ॥ "रदाभ्याम्" इति निष्ठानत्वम् ॥ णत्वम् । आयात् प्राप्तं यातमित्यर्थः । यातेर्लङ् ॥

इति भट्टिकाव्ये प्रकीर्णकाण्डे सीतापरिणयो[1]
नाम द्वितीयः सर्गः ।

इति श्रीपदवाक्यप्रमाणपारावारपारीणमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने द्वितीयः सर्गः ॥

---

१ C omits सीतापरिणयो नाम.

॥ श्रीः ॥

अथ तृतीयः सर्गः

वधेन सङ्ख्ये पिशिताशनानां
क्षत्रान्तकस्याभिभवेन चैव ।
आढ्यंभविष्णुर्यशसा कुमारः
प्रियंभविष्णुर्न स यस्य नासीत् ॥ १ ॥

१. वधेनेति ॥ सङ्ख्ये युद्धे पिशिताशनानां कौशिकमखध्वंसिनां क्रव्यादां वधेन क्षत्रान्तकस्य जामदग्न्यस्य अभिभवेन च। एवकारः पादपूरणे । उभयत्र कृद्योगे कर्मणि षष्ठी । यशसा अनाढ्य आढ्यो भवतीत्याढ्यंभविष्णुः रक्षोवधजामदग्न्यविजयसंजातकीर्तिसंपन्न इत्यर्थः ॥ "आढ्यसुभग—" इत्यादीनामनुवृत्तौ "कर्तरि भुवः खिष्णुच्खुकञौ" इति खिष्णुच् प्रत्ययः । एवंभूतः कुमारो रामः यस्य । अप्रियः प्रियो भवतीति प्रियंभविष्णुः । पूर्ववत्प्रक्रिया । सोऽप्रियरामो जनो नासीत् । रामस्य सर्वप्रियंकरत्वादिति भावः । एतेनास्य यौवराज्याभिषेकहेतुर्जनानुराग उक्तः ॥

ततः सुचेतीकृतपौरभृत्यो
राज्येऽभिषेक्ष्ये सुतमित्यनीचैः ।
आघोषयन्भूमिपतिः[1] समस्तं
भूयोऽपि लोकं सुमनीचकार ॥ २ ॥

२. तत इति ॥ ततो जनानुरागानन्तरम् । सुचेतीकृताः सम्यक्पालनेनानुरक्तचित्तीकृताः पौराः पौरजनाः भृत्याश्च येन सः भूमिपतिर्दशरथः सुतं रामं राज्येऽभिषेक्ष्ये अभिषेक्ष्यामि । सिचः कर्तरि लृट् तङ् । अनीचैरुच्चैः प्रकाशमाघोषयन् भूयोऽपि पुनरपि समस्तं लोकं

---

१ भूमिपतिस्तदानीं C.

सुमनीचकार संतुष्टचित्तं चकार ॥ "अरुर्मनश्चक्षुः—" इत्यादिना सुचेती सुमनी साधुः ॥ रामाभिषेकवार्त्ता सर्वलोकानन्दकरी जातेत्यर्थः ॥

आदिक्षदादीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम्।
सन्तप्तचामीकरवल्गुवज्रं[1]
विभागविन्यस्तमहार्घरत्नम्[2] ॥ ३ ॥

३. आदिक्षदिति ॥ तस्य रामस्य आदीप्तकृशानुकल्पं सौवर्णत्वात्प्रज्वलिताग्निसवर्णम्। ईषदसमाप्तौ कल्पप्। किं च संतप्तं यच्चामीकरं सुवर्णं तद्वद्वल्गूनि वज्राणि यस्य तत्। विभागेषु तत्तत्प्रदेशेषु विन्यस्तानि महार्घाणि महापूज्यानि रत्नानि पद्मरागादीनि यस्मिन् तत्। सपादपीठं पादपीठसहितं सिंहासनमादिक्षत् सज्जीक्रियतामित्यादिष्टवान्। दिशेर्लुङि "शल इगुपधादनिटः क्सः" ॥

प्रास्थापयत्पूगकृतान् स्वपोषं
पुष्टान्प्रयत्नाद् दृढगात्रबन्धान्।
सभर्मकुम्भान्[3][4]पुरुषान् समन्तात्
पत्काषिणस्तीर्थजलार्थमाशु ॥ ४ ॥

४. प्रास्थापयदिति ॥ अपूगाः पूगाः कृतान् सङ्घीकृतान्। श्रेण्यादिषु च्व्यर्थवचनात् "श्रेण्यादयः कृतादिभिः" इति च्व्यर्थसमासः। स्वेन धनेन पुष्टान् स्वपोषं पुष्टान्। "स्वे पुषः" इति णमुल् ॥ "अमैवाव्ययेन" इति समासः। कषादिषु यथाविध्यनुप्रयोगः। दृढगात्रबन्धान् दृढगात्रसंधीन् भारवहने योग्यानित्यर्थः। सहेमकुम्भान् सुवर्णकलशयुक्तान् ॥ "तेन सह—" इति बहुव्रीहिः ॥ "वोपसर्जनस्य" इति सहस्य सभावः ॥ पादौ कषन्तीति पत्काषिणः ॥ "सुप्यजातौ—"

---

१ वर्ण D., वर्णवज्रं T2, वर्णवज्रं E1.
२ महार्ह c., महार्घ्य B.
३ स्व B., C.
४ हेम D., T2, T3, T., G., Com.

इति ताच्छील्ये णिनिः ॥ "हिमकाषिहतिषु च" इति पादशब्दस्य पदादेशः । पुरुषान् तीर्थजलार्थं तदानयनार्थमित्यर्थः । समन्तादाशु प्रयत्नादुत्साहात् प्रास्थापयत् प्रस्थापितवान् । तिष्ठतेर्ण्यन्ताल्लुङ् ॥ "अर्त्तिह्री—" इत्यादिना पुगागमः ॥

उक्षांप्रचक्रुर्नगरस्य मार्गान्[1] ।
ध्वजान्बबन्धुर्मुमुचुः खधूपान्[2] ।
दिशश्च पुष्पैश्चकरुर्विचित्रै-
रर्थेषु राज्ञा निपुणा[3] नियुक्ताः ॥ ५ ॥

५. उक्षामिति ॥ अर्थेषु कर्त्तव्यार्थेषु निपुणाः दक्षाः राज्ञा नियुक्ताः अधिकृताः पुरुषाः नगरस्य मार्गान् उक्षांप्रचक्रुः धूलिप्रशमनार्थं निषिषिचुः । उक्ष सेचने लिट् ॥ "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्यये कृञोऽनुप्रयोगः ॥ "कृञ्चानुप्रयुज्यते लिटि" इत्यत्र अनुग्रहणस्य व्यवहितविपर्ययनिषेधार्थत्वात् व्यवहितप्रयोगस्यासाधुत्वेऽपि उक्षांचक्रुरित्यत्र अनुप्रयोगवदुपसर्गाणामपि "ते प्राग्धातोः" इति व्यवहितविपर्यस्तपूर्वप्रयोगनियमाद् धात्वर्थाभिव्यञ्जकत्वादिना धात्वक्षरप्रायत्वाच्च प्रोपसर्गस्य न व्यवधायकत्वमिति नासाधुत्वम् । "तं पातयां प्रथममास" "प्रभ्रंशयां यो नहुषं चकार" इत्यादावुपसर्गेतरस्य व्यवधानादसाधुत्वमेव । यत्तु पदमञ्जर्यामुभयमप्यसाधुत्वेनोदाहृतं तदनास्थेयमित्यवगन्तव्यम् । यत्तु जयमङ्गलाकारेण व्यवधानभयात् "गुरोश्च हलः" इत्यकारप्रत्यये ततो मत्वर्थीयाकारे च 'उक्षान् उक्षावतः सेकवतः' इति शसन्तं पाठं परिकल्प्य व्याख्यातं तदतिप्रसिद्धपाठत्यागादत्यन्ताप्रसिद्धपाठकल्पनाच्च साहसमेवेत्युपेक्ष्यमेवेत्यलं प्रसक्तानुप्रसक्त्या । ध्वजान् बबन्धुः उदनीनमन्नित्यर्थः । खं व्यापिनो धूपान् खधूपान्मुमुचुः प्रसारयामासुरित्यर्थः । दिशश्च विचित्रैर्नानाविधैः पुष्पैः चकरुः दिक्षु पुष्पाणि विचिक्षिपुरित्यर्थः । सर्वशक्तियो-

---

१ उक्षान् N., D., E3.
२ मुमुचुश्च धूपान् E1.
३ निपुणाः प्रयुक्ताः E1.

गित्वात् वैवक्षिकी कारकोत्पत्तिः। तदुक्तम् ॥ 'अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः। सर्वदा सर्वथाभावात्कचित्किञ्चिद्विवक्ष्यते' इति॥

मातामहावासमुपेयिवांसं
मोहादपृष्ट्वा[1] भरतं तदानीम्।
तत्केकयी[2] सोढुमशक्नुवाना
ववार रामस्य वनप्रयाणम्[3]॥ ६ ॥

६. मातामहेति ॥ तद्रामाभिषेचनं सोढुमशक्नुवाना अशकनशीला॥ "शकिधृषि—" इत्यादिना सहेस्तुमुन्प्रत्ययः। शक्नोतेरात्मनेपदत्वाभावात्ताच्छील्ये चानश्प्रत्ययः। श्नोरुवङादेशः। प्रथमसर्गे केकयी व्याख्याता। तदानीं वरप्रार्थनाकाले। मातुः पिता मातामहः॥ "पितृव्यमातुलमातामहपितामहाः" इति डामहच्प्रत्ययान्तो निपातः॥ तस्या वसत्यस्मिन्नित्यावासमावसथम्। अधिकरणेऽर्थे घञ्। उपेयिवांसमुपगतम्॥ "उपेयिवाननाश्वाननूचानश्च" इति क्वस्वन्तो निपातः॥ भरतं मोहान्मौढ्यात्। अपृष्ट्वा एवं करिष्यामीत्यननुयुज्य रामस्य कर्तुः वनाय प्रयाणं गमनं वनप्रयाणम्॥ "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ—" इत्यादिना कृद्योगषष्ठ्यपवादेन चतुर्थी॥ "चतुर्थी" इति योगविभागात्समासः। ववार वरमयाचतेत्यर्थः। वृणोतेर्लिट्॥

कर्णेजपैराहित[4]राज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यमृशन्न[5] दोषं
जनापवादं[6] सनरेन्द्रमृत्युम्[7]॥ ७ ॥

७. कर्णेजपैरिति ॥ कर्णेजपैः उपांशु सूचयन्तीति कर्णेजपाः पिशुनाः। 'कर्णेजपः सूचकः स्यात्पिशुनः' इत्यमरः। तैराहितराज्यलोभा जनित-

---

१ मोहाददृष्ट्वा T2, T3.
२ कैकयी D., T3, T4, E1.
३ प्रवासम् T2, T4.
४ °राहृत T2.
५ व्यमृषन् C., B.
६ जनापरागं T2, T3, T4.
७ न E4.

राज्यतृष्णा स्त्रैणेन स्त्रीसंबन्धिना । 'स्त्रीणां पुंसां च यत्किञ्चित्स्त्रैणं पौंस्नमिति क्रमात्' इत्यमरः ॥ "स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्" इति नञ्प्रत्ययः ॥ लघिम्ना तुच्छत्वेन । पृथ्वादीमनिचि टिलोपः । विकृतिं प्रकृतिवैपरीत्यं नीता कैकयी रामप्रवासे सति सनरेन्द्रमृत्युं दशरथमरणसहितं जनापवादं लोकनिन्दापवादं लोकनिन्दारूपं दोषं न व्यमृशत् न व्यचारयत् । मृशेर्लङ् ॥

वसूनि[1] देशांश्च निवर्तयिष्यन्
रामं नृपः सङ्गिरमाण एव ।
तयावजज्ञे भरताभिषेको
विषादशङ्कुश्च मतौ निचख्ने[2] ॥ ८ ॥

८. वसूनीति ॥ नृपो राजा रामं निवर्तयिष्यन् वनगमनान्निवर्त्तयितुकाम इत्यर्थः ॥ "लृट् शेषे च" इति चकारात्क्रियोपपदे लृट् ॥ वसूनि धनानि देशान् जनपदांश्च संगिरमाण एव देव्येतानि ते दास्यामीति प्रतिजानान एव । गिरतेस्तौदादिकात् "समः प्रतिज्ञाने" इत्यात्मनेपदे लटः शानजादेशः ॥ "ऋत इद्धातोः" इति रेफपर इकारः ॥ तया देव्या अवजज्ञे रामविवासनेन अवज्ञात इत्यर्थः । जानातेः कर्मणि लिट् । किं च भरताभिषेक एव विषादशङ्कुः शोकशल्यं च मतौ मनसि निचख्ने निखातः । खनतेः कर्मणि लिट् ॥ "गमहन—" इत्यादिना उपधालोपः ॥ रामविवासनं भरताभिषेचनं चेति वरद्वयमयाचतेत्यर्थः ॥

ततः प्रविव्राजयिषुः कुमार-
मादिक्षदस्याभिगमं[3] वनाय ।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन् ॥ ९ ॥

१ वधूनिदेश्यांश्च T3.
२ निजघ्ने T3.
३ °दस्यागमनं T3.

९. तत इति ॥ ततो वरप्रार्थनानन्तरं राजा दशरथः कुमारं रामं प्रव्राजयितुं प्रवासयितुमिच्छुः प्रविव्राजयिषुः सन् । व्रजतेर्ण्यन्तात्सनि उप्रत्ययः । सुमित्रायाः अपत्यं पुमान् सौमित्रिः लक्ष्मणः ॥ "बाह्वादिभ्यश्च" इति इञ्प्रत्ययः ॥ स च सीता च सौमित्रिसीतम् । 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति वचनादेकवद्भावः । अन्यथानुचरशब्दः पचादिषु चरडिति टित्करणात् स्त्रियां ङीपि "नद्यृतश्च" इति कप्प्रसंगात् । समासान्तानित्यत्वेऽपि पुंवद्भावानुपपत्तेरिति । तदनुचरं यस्य तस्य तथोक्तस्य रामस्य । कर्तरि षष्ठी । सुमन्त्रो नेत्रो नेता सारथिर्यस्य । नयतेरौणादिकष्ट्रन् । बाहुलकात्कर्त्तर्यर्थे । 'नेत्रं मथिगुणे वस्त्रे तरुमूले विलोचने । नेत्रं रवे च नाड्यां च नेत्रो नेतरि भेद्यवत्' इति विश्वः । रथेन वनाय ॥ "गत्यर्थकर्मणि—" इत्यादिना चतुर्थी ॥ अभिगमोऽभिगमनं प्रयाणम् ॥ "ग्रहवृदृनिश्चिगमश्च" इत्यप्रत्ययः ॥ शोचन् रुदन् आदिक्षन्नादिष्टवानाज्ञापितवान् । दिशेर्लुङि "शल इगुपधादनिटः क्सः" ॥

केचिन्निनिन्दुर्नृपम[1]प्रशान्तं
विचुक्रुशुः केचन सास्रमुच्चैः ।
ऊचुस्तथा[2]न्ये भरतस्य मायां
धिक् के[3]कयीमित्यपरो [4]जगाद ॥ १० ॥

१०. केचिदिति ॥ एवं रामप्रव्राजनादेशे केचिज्जनाः अप्रशान्तं नैर्घृण्यात्क्रूरं नृपं निनिन्दुः निन्दितवन्तः । णिदि कुत्सायां लिट् । इदित्वान्नुमागमः । केचन सास्रं सबाष्पमुच्चैस्तारं विचुक्रुशुः हा राम रामेति चक्रन्दुः । क्रोशतेर्लिट् । तदा अस्य भरतस्य मायामूचुः स्वयमपसृत्य मातृमुखेनेदं कपटनाटकमाचरतीत्यूचुः । अपरे कैकयीं धिगिति जजल्पुः व्यक्तमूचुः । अतिपापिष्ठेयमिति निनिन्दुरित्यर्थः ॥ 'धिङ्निर्भ-

१ नृपतिं प्रकाशं T_2, T_4.
२ °स्तदा T., G., Com.
३ कैकयीं D., T_3, T_4, E_1.
४ °त्यपरे जजल्पुः T_2, T_4, T., G., Com.

र्त्सनिन्द्योः' इति विश्वः ॥ धिग्योगे द्वितीया । जल्प व्यक्तायां वाचि । लिट् ॥

गतो[1] वनं श्वो भवितेति रामः
शोकेन देहे जनतातिमात्रम् ।
धीरास्तु तत्र च्युतमन्यवोऽन्ये
दधुः कुमारानुगमे मनांसि ॥ ११ ॥

११. गत इति ॥ जनानां समूहो जनता ॥ "ग्रामजन—" इत्यादिना समूहार्थे तल्प्रत्ययः ॥ रामः श्वः परेह्नि वा वनं गतो भविता भविष्यति ॥ "अनद्यतने लुट्" ॥ अत्र धातुसंबन्धे प्रत्यया इति वचनात्कृतः गतः श्वो भवितेति भूतभविष्यतोर्विशेषणविशेष्यभावेन संबन्धः साधुः । विशेषणस्य विशेष्यकालानुरोधित्वात् इति । शोकेनातिमात्रं देहे दग्धा । दहतेः कर्मणि लिट् ॥ "अत एकहल—" इत्यादिना एत्वाभ्यासलोपौ ॥ तत्र जनतायामन्ये कतिचिद्धीराः धैर्यवन्तस्तु च्युतमन्यवः वीतशोकाः सन्तः । 'मन्युशोकौ तु शुक् स्त्रियाम्' इत्यमरः । कुमारानुगमे रामानुव्रजने मनांसि दधुः निदधुः राममनुगन्तुमीषुरित्यर्थः । अतस्तेषां रामवियोगाभावाच्च्युतमन्यव इत्युक्तम् ॥

प्रस्थास्यमानावुपसेदुषस्तौ[2]
शोशुच्यमानानिदमूचतुस्तान्[3] ।
किं शोचतेहाभ्युदये बतास्मान्
नियोगलाभेन पितुः कृतार्थान् ॥ १२ ॥

१२. प्रस्थास्यमानाविति ॥ प्रस्थास्यमानौ प्रयास्यन्तौ ॥ "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥ "लृटः सद्वा" इति शानजादेशः ॥ तौ रामलक्ष्मणौ उपसेदुषः उपसन्नान् ॥ "भाषायां सदवसश्रुवः" इति सदेर्लिटः क्वसुरादेशः ॥ शोशुच्यमानान् भृशं शोचतः । शोचतेर्यङन्ता-

१ वनं गतः D., E2.
२ °स्तौ T2, T4, T., G.
३ °स्तान् T2, T4, T., G.

लुटः शानजादेशः। तान् जनानिदं वक्ष्यमाणमूचतुः। ब्रुवि शासीति द्विकर्मकता। तदेवाह हे जनाः पितुर्नियोगलाभेन आज्ञाकरणलाभेन कृतार्थान् कृतकृत्यानस्मान् अशोच्यानित्यर्थः। इहास्मिन्नभ्युदये गुर्वाज्ञाकरणमहोत्सवे किमर्थं शोचत न शोचितव्यमित्यर्थः। अधीष्टे लोट्। बतेत्याश्चर्ये। संतोष्टव्ये शोचनादाश्चर्यम्।

अस्रष्ट यो यश्च भयेष्वरक्षीद्
यः सर्वदास्मानपुषत्स्वपोषम्।
महोपकारस्य किमस्ति तस्य
तुच्छेन यानेन वनस्य मोक्षः॥ १३॥

१३. अस्रष्टेति॥ किं च यः पिता अस्मानस्रष्ट सृष्टवान्। प्रथमं तावदिदं शरीरं तद्दत्तमित्यर्थः। सृजेस्तौदादिकस्य परस्मैपदित्वाद्दैवादिकात्कर्त्तरि लुङि तङ्॥ "झलो झलि" इति सलोपः॥ व्रश्चादिना षत्वम्। ष्टुत्वम्। यो भयेष्वापत्सु अरक्षीत् रक्षितवान्। रक्षेर्लुङि "इट ईटि" इति सलोपः। यः सर्वदा स्वेन पुष्टान् स्वपोषम्। गतमेतत्। अपुषत् पुष्टवान्। पुष्यतेर्लुङ्। पुषादित्वाच्लेरङादेशः। तस्य पितुः संबन्धिनो महोपकारस्य ऋणभूतस्येति भावः। तुच्छेनात्यल्पेन वनस्य यानेन तदाज्ञया वनगमनेन मोक्षो निवृत्तिरानृण्यमस्ति किम्। नास्त्येवेत्यर्थः॥

विद्युत्प्रणाशं स वरं[1] प्रणष्टो[2]
यद्वोर्ध्वशोषं तृण[3]वद्विशुष्कः।
अर्थे दुरापे[4] किमुत प्रवासे
न शासनेऽवास्थित यो गुरूणाम्॥१४॥

१४. विद्युदिति॥ उत किं च प्रवासे अत्यल्पे वनप्रवासे किं किन्तु दुरापे दुःशकेऽपि। कृच्छ्रार्थे खल्प्रत्ययः। अर्थे कर्त्तव्यार्थे विषये यो गुरूणा शासने वा नावास्थित नावस्थितः। अवपूर्वात् तिष्ठतेर्लुङि

१ नरः E1, T3, T4.
२ प्रनष्टो N., C., E1.
३ तरु T3.
४ दुरापेऽपि किमु T2, T3, T4.

"समवप्रविभ्यः स्थः" इत्यात्मनेपदे "स्थाघ्वोरिच्च" इति कित्त्वमित्वं च ॥ "ह्रस्वादङ्गात्" इति सिचो लोपः ॥ सः विद्युदिव प्रणाशं विद्युत्प्रणाशं वरं प्रणष्टः सद्य एव मृतप्राय इत्यर्थः ॥ "उपमाने कर्मणि च" इति चकारात्कर्त्तर्युपमानोपपदे णमुल्प्रत्ययः ॥ कषादित्वादनुप्रयोगः ॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इत्युभयत्रापि णत्वम् ॥ यद्वा तृणवदूर्ध्वं शुषित्वा ऊर्ध्वशोषम् ॥ "ऊर्ध्वे शुषिपूरोः" इति कर्त्तर्यूर्ध्वे उपपदे णमुल्प्रत्ययः ॥ पूर्ववदनुप्रयोगः । विशुष्कः ॥ "शुषः कः" इति निष्ठातकारस्य कः । शुष्कतृणवन्निःसार इत्यर्थः ॥

पौरा निवर्त्तध्वमिति न्यगादीत्
तातस्य शोकापनुदा भवेत ।
मा दर्शतान्यं भरतं च मत्तो
निवर्त्तयेत्याह रथं स्म सूतम् ॥ १५ ॥

१५. पौरा इति ॥ हे पौराः निवर्त्तध्वं प्रतियात । विधौ लोट् । तातस्य पितुः शोकमपनुदन्तीति शोकापनुदः दुःखापहर्त्तारः ॥ "तुन्दशोकयोः परिमृजापनुदोः" इति कप्रत्ययः ॥ "आलस्यसुखाहरणयोरिति वक्तव्यम्" ॥ भवेत । विधौ प्रार्थनायां वा लिङ् । भरतं मत्तोऽन्यं मा दर्शत न पश्यत । दृशेर्माङि लुङ् ॥ "इरितो वा" इति विकल्पाच्चेरङादेशः ॥ "ऋदृशोऽङि गुणः" इति गुणः ॥ इति न्यगादीत् निगदितवान् । गदेर्लुङि "अतो हलादेर्लघोः" इति वृद्धिः ॥ "इट ईटि" इति सलोपः ॥ सूतं च रथं निवर्त्तयेत्याह स्म उक्तवान् ॥ "लट् स्मे" ॥ "ब्रुवः पञ्चानामादित आहो ब्रुवः" ॥

ज्ञात्वेङ्गितैर्गत्वरतां जनाना-
मेकां शयित्वा रजनीं सपौरः ।
रक्षन् वनेवासकृताद् भयात्तान्
प्रातश्छलेनापजगाम[1] रामः ॥ १६ ॥

---

१ °भिजगाम T2. °पजहार T3. | °नोपजगाम E1.

१६. ज्ञात्वेति ॥ रामः इङ्गितैश्चेष्टितैः जनानां पौरजनानां गत्वरतां सहगन्तृत्वम् ॥ "गत्वरश्च" इति क्वरबन्तो निपातः ॥ ज्ञात्वा सपौरः पौरजनसहितः एकां रजनीम्। अत्यन्तसंयोगे द्वितीया। तान् पौरजनान् वने वासो वनेवासः ॥ "शयवासवासिष्वकालात्" इत्यलुक्। तेन कृतात् संभावितात् भयात् सिंहव्याघ्रादिभयाद्रक्षन् ॥ "भीत्रार्थानाम्" इत्यपादानत्वम् ॥ शयित्वा सुप्त्वा ॥ "न क्त्वा सेट्" इति कित्वप्रतिषेधात् गुणायादेशौ ॥ प्रातः प्रभाते छलेन संमानादिव्याजेन अपजगाम अपगतः ॥

अस्राक्षुरस्रं[1] करुणं रुवन्तो[2]
मुहुर्मुहुर्न्यश्वसिषुः कवोष्णम्[4]।
हा राम हा कष्टमिति ब्रुवन्तः
पराङ्मुखैस्ते[3] न्यवृतन्मनोभिः ॥ १७ ॥

१७. अस्राक्षुरिति ॥ ते पौराः करुणं दीनं रुवन्तो विलपन्तः। रौतेर्लटः शत्रादेशः। अस्रं बाष्पमस्राक्षुरमुञ्चन्। सृजेस्तौदादिकाल्लुङि ॥ "सृजिदृशोः—" इत्यमागमः ॥ हलन्तलक्षणा वृद्धिः। कुत्वादिकार्यम्। मुहुर्मुहुः पुनः पुनः कवोष्णमीषदुष्णं यथा तथा ॥ "कवं चोष्णे" इति कोः कवादेशः ॥ न्यश्वसिषुः निश्वसितवन्तः। श्वसेर्लुङि ॥ "ह्यन्तक्षणश्वस—" इत्यादिना वृद्धिप्रतिषेधः। हा राम हा कष्टमिति ब्रुवन्तः क्रन्दन्तः पराङ्मुखैर्बहिर्मुखैर्येन गतो रामस्तेन गतैरित्यर्थः। मनोभिरुपलक्षिताः न्यवृतन्निवृत्ताः॥ "द्युद्भ्यो लुङि" इति परस्मैपदम् ॥ द्युतादित्वादङ्॥

सूतोऽपि गङ्गासलिलैः पवित्वा
सहाश्वमात्मानमनल्पमन्युः।
सतीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश[5] ॥ १८ ॥

---

१ °रास्रं T2, T3, T4.
२ रुदन्तो B., E1, E2, T3.
३ °स्तैर्न्यवृतन् E1.
४ कवोष्णं B.
५ पुरमाजगाम T3. पुनराजगाम T2, T4.

१८. सूत इति ॥ सूतः सारथिः सुमन्त्रोऽपि सहाश्वं साश्वम् ॥ "वोपसर्जनस्य" इति विकल्पात्सहस्य सभावः ॥ आत्मानं गङ्गासलिलैः पवित्वा पूत्वा शोधयित्वेत्यर्थः ॥ "पूङश्च" इति विकल्पादिट् ॥ अनल्पमन्युः प्रभूतशोकः सन् ससीतयोः सीतासहितयोः राघवयोः अधीयन् रामलक्ष्मणौ सीतां च संस्मरन्नित्यर्थः । इक् स्मरणे इति धातोः शतरि इयङादेशः ॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी ॥ कदुष्णमीषदुष्णं श्वसन् ॥ "कवं चोष्णे" इति चकारात्कोः कदादेशः॥ पुरमयोध्यामाविवेश ॥

प्रतीय[1] सां पूर्ददृशे जनेन
द्यौर्भानुशीतांशुनिरोकृतेव[2] ।
राजन्यनक्षत्रसमन्वितापि
शोकान्धकारक्षत[3]सर्वचेष्टा ॥ १९ ॥

१९. प्रतीयति ॥ जनेन रामानुयायिना प्रतीय प्रत्येत्य । ईङ् गतौ इति धातोः क्त्वो ल्यपि रूपम् । न त्विणः । तस्य "षत्वतुकोरसिद्धः" इत्येकादेशस्यासिद्धत्वात् तुकि प्रतीत्येति स्यात् । प्रतीयुषेति पाठान्तरे "उपेयिवाननाश्वाननूचानश्च" इति उपोपसर्गस्यातन्त्रत्वात् अत्र इणो लिटः क्वसुप्रत्ययो निपातितः। राजन्यैः क्षत्रियैरेव नक्षत्रैः समन्वितापि शोकेनैवान्धकारेण क्षतसर्वचेष्टा निरस्तसर्वव्यापारा सा पूरयोध्या भानुशीतांशुविनाकृता रामलक्ष्मणवियोगादर्केणेन्दुना वियोजिता द्यौरिव ददृशे तद्वदशोभतेत्यर्थः। कर्मणि लिट् । रूपकोपमयोः संकरः॥

विलोक्य रामेण विना सुमन्त्र-
मच्योष्ट सत्वान्नृपतिश्च्युताशः ।
मधूनि नैषीद् व्यलिपन्न गन्धै-
र्मनोरमे[4] न व्यवसिष्ट वस्त्रे ॥ २० ॥

---

१ प्रतीयुषा C, T2, T4.
प्रतीय पूः संददृशे D.
२ विनाकृतेव D1, T2, T4, T., G., Com.
३ च्युत D.
क्षित T3.
४ मनोहरे T3, T4.

२०. विलोक्येति ॥ नृपतिर्दशरथो रामेण विना ॥ "पृथग्विना—" इत्यादिना तृतीया ॥ सुमन्त्रं विलोक्य च्युताशः रामागमने निराशः सन् सत्वात्स्वभावात् । 'सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः' इति विश्वः । अच्योष्ट च्युतः । धैर्याद् भ्रष्ट इत्यर्थः । च्यवतेरनिटो लुङि तङि च्लेः सिच् । किं च मधूनि मद्यानि नैषीत् नैच्छत् । इषे-र्लुङि "नेटि" इति सिचि वृद्धिप्रतिषेधः । आड्वृद्धिः ॥ "इट ईटि" इति सिज्लोपः ॥ गन्धैः कुङ्कुमचन्दनादिभिः । 'गन्धस्तु सुरभे मृत्यौ गन्धने गर्वलेशयोः । स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृतः' इति वचनाद्बहुवचनम् । न व्यलिपत् न समालब्धः ॥ "लिपिसिचिह्वश्च" इति च्लेरङादेशः ॥ मनोरमे वस्त्रे न व्यवसिष्ट नाच्छादितवान् । वसेराच्छादनार्थाल्लुङि सिचीट् । अतिशोकादत्यपरनामा विषयद्वेषो जात इत्यर्थः ॥

आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः ।
सचन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद् द्युनिवासभूयम् ॥ २१ ॥

२१. आसिष्टेति ॥ चन्दनैरुशीरैर्नलदैर्मृणालैश्च दिग्धः दाहशान्त्यर्थं लिप्तः । दिहेः कर्मणि क्तः । घत्वादिकार्यम् । स राजा शुचा शोकेन एकत्र नासिष्ट नोपविष्टः । तेनानवस्थालक्षणरूपः शोकानुभाव उक्तः। आसेर्लुङि तङि सिचीडागमः । क्षितिपालभाग्भ्यः राजार्हेभ्यः ॥ "भजो ण्विः" ॥ कृतानि चाकृतानि च ॥ "क्तेन नञ्विशिष्टेनानञ्" इति समानाधिकरणसमासः ॥ तेभ्यः कृताकृतेभ्यः हेमरूप्येभ्यः तन्म-यभूषणभजानादिभ्य इत्यर्थः । 'हेमरूप्ये कृताकृते' इत्यमरः । "जुगु-प्साविरामप्रमादार्थानामुपसंख्यानम्" इत्यपादानत्वम् ॥ "अपादाने पञ्चमी" ॥ व्यरंसीत् विरतः विरक्तोऽभूदित्यर्थः । रमेर्लुङि "व्याङ्-

१ सक्च T2, T4.

परिभ्यो रमः" इति परस्मैपदम् ॥ "यमरमनमातां सक् च" इति सगिटौ ॥ "नेटि" इति वृद्धिप्रतिषेधः । किं बहुना शोकाग्निना दिवि निवासो यस्य तस्य भावं द्युनिवासभूयं देवभूयमगात् स्वर्गं गत इत्यर्थः ॥ "भुवो भावे" इति क्यप् ॥

विचुक्रुशुर्भूमिपतेर्महिष्यः
केशाँल्लुलुञ्चुः स्ववपूंषि जघ्नुः ।
विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव ॥ २२ ॥

२२. विचुक्रुशुरिति ॥ अथ भूमिपतेर्दशरथस्य महिष्यो दाराः विचुक्रुशुः हा नाथेत्याजुहुवुः रुरुदुश्चेत्यर्थः । क्रुश आह्वाने रोदने च । लिट् । केशान् शिरोरुहान् लुलुञ्चुः चिच्छिदुः । स्ववपूंषि जघ्नुः ताडयामासुः । विभूषणान्युन्मुमुचुः तत्यजुः । क्षमायां भुवि पेतुः पतिताः ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ । वलयानि कटकानि बभञ्जुश्च । एवकारः पादपूरणे । क्रियासमुच्चयोऽलंकारः ॥

ताः सान्त्वयन्ती भरतप्रतीक्षा
तं बन्धुता न्यक्षिपदाशु तैले ।
दूतांश्च राजात्मजमानिनीषून्[1]
प्रास्थापयन्मन्त्रिमतेन यूनः ॥ २३ ॥

२३. ता इति ॥ अथ बन्धुता बन्धुसमूहः ॥ "ग्रामजनबन्धु—" इत्यादिना सामूहिकस्तल्प्रत्ययः ॥ भरतं प्रतीक्षते संस्कारार्थमिति भरतप्रतीक्षा सती ॥ "ईक्षिक्षमिभ्यां च" इत्युपसंख्यानात्कर्मण्यण्प्रत्ययः । ता राजमहिषीः सान्त्वयन्ती आश्वासयन्ती तं नृपमाशु तैले तैलद्रोण्यामित्यर्थः । 'आहिताग्निं जनाः प्रमीतं तैलद्रोण्यामवधाय

१ °मानिनीषुः D., E1, T., G., Com.

शकटेनाहरन्ति' इति दूरमूतस्य कर्तृप्राप्तिपर्यन्तं तद्विधानात्। न्यक्षिपत् निक्षिप्तवती अविक्रियार्थमित्यर्थः। क्षिपेर्लङ्। तथा राजात्मजं भरतमानिनीषुरानेतुमिच्छुः सती। आनिनीषूनिति पाठे दूतविशेषणम्। यथानियोगकारिण इत्यर्थः। दूतान्संदेशहरान् मन्त्रिणां मतेनानुमत्या प्रास्थापयत् प्रस्थापितवती च। तिष्ठतेर्ण्यन्ताल्लुङ्॥ "अर्त्तिह्री—" इत्यादिना पुगागमः॥

सुप्तो नभस्तः पतितं निरीक्षां-
चक्रे विवस्वन्तमधः स्फुरन्तम्।
आख्यद्वसन्मातृकुले सखिभ्यः[1]
पश्यन्प्रमादं भरतोऽपि राज्ञः॥ २४॥

२४. सुप्त इति॥ अथ मातृकुले मातुलगृहे निवसन्। 'कुलं जनपदे गृहे' इति विश्वः। भरतोऽपि सुप्तो निद्राणः सन् नभस्तः नभसः॥ "पञ्चम्यास्तसिल्"॥ पतितं भ्रष्टमधो भूतले स्फुरन्तं विवस्वन्तं सूर्यं निरीक्षांचक्रे स्वप्ने अद्राक्षीदित्यर्थः। ईक्षतेः कर्त्तरि लिट्॥ "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्ययः॥ अथ राज्ञः सूर्यकल्पस्य प्रमादमनर्थं पश्यन् प्रेक्षमाणः सखिभ्य आख्यत् तं दुःस्वप्नमचकथत्। ख्यातेर्लुङि "अस्यतिवक्तिख्यातिभ्योऽङ्"॥

अशिश्रवन्नासयिकं तमेत्य
दूता यदार्थं[2] प्रयियासयन्तः।
आंहिष्ट जाताञ्जिहिषस्तदासा-[3]
वुत्कण्ठमानो भरतो गुरूणाम्॥ २५॥

२५. अशिश्रवन्निति॥ यदा दूताः एत्यागत्य तं प्रयियासयन्तः प्रयातुमेषयन्तः जिगमिषयन्त इत्यर्थः। यातेः सन्नन्ताण्णिचि लटः शत्रा-

१ आख्यान्द्व॰ E2.
२ यदा तं C.
तमर्थं T2, T4.
३ ॰स्तदानीमुत्क॰ E1.

देशः। तं भरतमात्ययिकमत्ययमात्रफलकम्॥ "प्रयोजनम्" इति ठञ्॥ तमर्थं कैकेयीवृत्तान्तं नाशिश्रवन् न श्रावयन्ति स्म। अनर्थमश्रावयित्वैव मिषान्तरेण जिगमिषामजीजनन्नित्यर्थः। तदा अश्रवणकाले गुरूणां तातपादानामुत्कण्ठमानः अनर्थशङ्कया सशोकं स्मरन्नित्यर्थः। कठि शोके। उपसर्गवशात् स्वार्थं विना भूतार्थान्तरता॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी॥ असौ भरतः अंहितुमिच्छा अञ्जिहिषा। अहि गतौ इति धातोर्भौवादिकात्सन्नन्तादप्रत्यये इट्। इदित्वान्नुम्॥ "नन्द्राः—" इति नकारवर्जमजादित्वाद्द्वितीयैकाचो द्वित्वम्। चुत्वादिकार्यम्। सा जाता यस्य सः जाताञ्जिहिषः जातजिगमिषः सन्। उपसर्जनह्रस्वः। आंहिष्ट अगमत्। जातजिगमिषो गत इत्यर्थः। तस्मादेव धातोर्लुङि सिचि आड्वृद्धिः॥

बन्धूनशङ्किष्ट समाकुलत्वा-
दासेदुषः स्नेहवशादपायम्।
गोमायुसारङ्ग[1]गणाश्च सम्यक्
नायासिषुर्भीममरासिषुश्च॥ २६॥

२६. बन्धूनिति॥ समाकुलत्वात् दुःस्वप्नदूतागमनादिना व्याकुलचित्तत्वात्स्नेहवशाच्च बन्धून् पित्रादीनपायमनर्थमासेदुषः प्राप्तान्॥ "भाषायां सदवस—" इत्यादिना क्वसुः॥ अशङ्किष्ट शङ्कितवान्। शकेर्लुङि तङि सिचीट्। 'प्रेम पश्यति भयान्यपदेऽपि' किमुतात्र पद इति भावः। गोमायवः क्रोष्टारः सारङ्गा हरिणाः तेषां तस्य वा गणाश्च॥ "विभाषा वृक्षमृग—" इत्यादिना वैभाषिकैकवद्भावात्॥ सम्यगनुकूलं नायासिषुः नागमन्। यातेर्लुङि सगिटौ। शृगालाः प्रदक्षिणं मृगाश्च सव्यमित्यर्थः। भीमं प्रतिकूलमरासिषुः रसितवन्त इत्यर्थः। रसतेः शब्दकर्मणो लुङ्॥ "अतो हलादेः—" इति सिचि वृद्धिः॥

[1] शारङ्ग N., C., E1, B.

स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्[1]
शुश्राव घोषं न जनौघजन्यम् ।
आकर्णयामास न वेदनादान्[2]
न चोपलेभे[3] वणिजां पणार्यान्[4] ॥ २७ ॥

२७. स इति ॥ स भरतः प्रोषिवान् इयन्त्यहानि प्रोषितः सन् ॥ "भाषायां सदवसश्रुवः" इति क्वसुः । यजादित्वात्संप्रसारणम् ॥ "वस्वेकाजाद्घसाम्" इतीट् ॥ एत्यागत्य पुरमयोध्यां प्रविश्य जनौघजन्यं जनसंघजातम् ॥ "भव्यगेय—" इत्यादिना कर्त्तरि निपातः ॥ "अचो यत्" इत्यत्र "तकिशसिचतियतिजनीनामुपसंख्यानम्" इति केचित् । घोषं न शुश्राव वेदनादान् नाकर्णयामास नाकर्णितवान् । 'प्रातिपदिकाद् धात्वर्थे' इति ण्यन्ताल्लिट् । तथा वणिजां व्यवहारिणां पणानां कार्षापणादीनामायान् लाभांश्च । 'पणो वराटमाने स्यात् मूल्ये कार्षापणे ग्लहे' इति विश्वः । पणायामिति टाबन्तपाठे वणिजां पणायां परस्परव्यवहारस्तुतिकौशलं चेत्यर्थः ॥

चक्रन्दुरुच्चैर्नृपतिं समेत्य[5]
तं मातरोऽभ्यर्णमुपागतास्ताः[6] ।
पुरोहितामात्यमुखाश्च योधाः[7]
विवृद्धमन्युप्रतिपूर्णमन्याः ॥ २८ ॥

२८. चक्रन्दुरिति ॥ मातरः कौसल्यादयः पुरोहितामात्यौ मुखं प्रधानं येषां ते । पुरस्कृतपुरोहितामात्या इत्यर्थः । अमात्यस्याजाद्यदन्तत्वेऽपि पुरोहितस्याभ्यर्हितत्वात् पूर्वनिपातः । युध्यन्ते इति योधाः वीरभटाश्च । पचाद्यच् । अभ्यर्णमविदूरमासन्नमित्यर्थः । अभिपूर्वादर्दे

---

१ प्रविश्य T_2, T_4, T., G., Com.
प्रविष्टः D.
२ वादान् T_3, T_4, E_1.
वादं D.
३ न वोपलेभे c.
४ पणायाः c.
पणायाम् E_1, E_2, E_3.
५ तमेत्य c.
६ तन्मातरो c. B.
७ पौरा T_2, T_4.

कर्त्तरि क्तः ॥ "अभेश्चाविदूर्ये" इतीट्प्रतिषेधात् "रदाभ्यां—" इति निष्ठानत्वम् ॥ णत्वम् । तं भरतं समेत्य प्राप्य । विवृद्धाभ्यां मन्युभ्यां पितृशोकमातृक्रोधाभ्याम् ॥ 'मन्युः स्यात्क्रोधशोकयोः' इति शाश्वतः । प्रतिपूर्णा कोष्ठवायुपीडनादस्पन्दपुटिता मन्या ग्रीवापृष्ठसिरा येषां ते । "पश्चाद्ग्रीवा सिरा मन्या" इत्यमरः ॥ "संज्ञायां समजनि—" इत्यादिना क्यप् ॥ उपागतास्राः उदीर्णबाष्पाश्च सन्तः उच्चैर्नृपतिं चक्रन्दुः हा नाथ क्व गतोऽसीति चुक्रुशुरित्यर्थः ॥

दिदृक्षमाणः परितः ससीतं
रामं यदा नैक्षत लक्ष्मणं च ।
रोरुद्यमानः स तदाभ्यपृच्छद्
यथावदाख्यन्नथ वृत्तमस्मै ॥ २९ ॥

२९. दिदृक्षमाण इति ॥ स भरतः परितो दिदृक्षमाणः द्रष्टुमिच्छन् पश्यन्नदृष्ट्वा पुनः पुनः द्रष्टुमिच्छन्निवेत्यर्थः ॥ "ज्ञाश्रुस्मृदृशां सनः" इति दृशेः सन्नन्तादात्मनेपदम् । शानच् । "हलन्ताच्च" इति सनः कित्वात् "सृजिदृशोः–" इत्यम् न भवति "अकिति" इति प्रतिषेधात् । यदा ससीतं रामं लक्ष्मणं च नैक्षत नापश्यत् । ईक्षतेर्लङ्याड्वृद्धिः । तदा रोरुद्यमानः भृशं रुदन् । रुदेर्यङन्ताल्लटः शानजादेशः । अभ्यपृच्छत् । क्वैते गता इत्यप्राक्षीदित्यर्थः । अस्मै भरताय । क्रियाग्रहणाच्चतुर्थी । वृत्तं भूतमर्थं यथावत् यथार्हमित्यर्थः ॥ "तदर्हम्" इति वतिप्रत्ययः ॥ आख्यन् कैकेयीदुश्चेष्टमेतदित्याचख्युरित्यर्थः ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥

आबद्धभीमभ्रुकुटीविभङ्गः[1]
शोश्रूयमाणारुणरौद्रनेत्रः[2] ।
उच्चैरुपालभ्य स केकयीं[3] च
शोके मुहुश्चाविरतं न्यमाङ्क्षीत् ॥ ३० ॥

१ भ्रकुटी E2.
२ शोशूयमाना° E1.
३ कैकयीं D., T4, E1.

३०. आबद्धेति ॥ स भरतः भ्रुवोः कुटी कौटिल्यं भ्रुकुटी भ्रूभङ्गः । कुट कौटिल्ये इति धातोरौणादिक इकारः ॥ "कृदिकारात्" इतीकारः ॥ "इको ह्रस्वोऽङ्यो गालवस्य" इति विकल्पात्पूर्वस्येको ह्रस्वः ॥ आबद्धः संबद्धः भीमो भयंकरो भ्रुकुट्येव विभङ्गो विकारो येन स सन् । शेश्वीयमाने अतिरोदनात् भृशं शूने उच्छूने इति यावत् । श्वयतेर्यङन्ताल्लटः शानजादेशः ॥ "विभाषा श्वेः" इति विकल्पात् असंप्रसारणपक्षे रूपम् ॥ "गुणो यङ्लुकोः" इति दीर्घश्च ॥ अरुणे अतिरोदनादतिकोपाच्च रक्ते रौद्रे रोषाद्भयंकरे नेत्रे यस्य स सन् केकयीं मुहुरुपालब्ध च । अयि पापिष्ठे किं कृतमिति मुहुराक्रुक्षच्च । लभतेर्लुङि तङि "झलो झलि" इति सलोपः । धत्वादिकार्यम् । इह मुहुश्शब्दस्य निमज्जनवाक्यस्थस्यापि योग्यत्वादुपालम्भेन संबन्धः । निमज्जनसंबन्धे अविरतत्वविरोधात् । शोके शोकसागरे इत्यर्थः । निमज्जनलिङ्गात् । अविरतं न्यमाङ्क्षीत् निमग्नश्च । मस्जेर्लुङि सिचि "मस्जिनशोर्झलि" इत्यन्तात्पूर्वं नुम्विधानात् संयोगादिलोपानुषङ्गसिद्धिश्च । हलन्तलक्षणा वृद्धिः । हल्ग्रहणस्य समुदायप्रतिपत्त्यर्थत्वात् कुत्वषत्वानुस्वारादिपरसवर्णादिकार्यम् । केकयी व्याख्याता ॥

नृपात्मजौ चिक्लिशतुः ससीतौ
ममार राजा विधवा भवत्यः ।
शोच्या वयं भूरनृपा लघुत्वं
केकय्युपज्ञं[1] बत बह्वनर्थम् ॥ ३१ ॥

३१. उपालम्भमेवाह नृपेति ॥ ससीतौ सीतासहितौ ॥ "तेन सह—" इति बहुव्रीहौ उपसर्जनह्रस्वत्वम् ॥ नृपात्मजौ रामलक्ष्मणौ चिक्लिशतुः वनवासादिना क्लिष्टावित्यर्थः । क्लिश्यतेरकर्मकाल्लिट् । राजा ममार मृतः ॥ "म्रियतेर्लुङ्लिङोश्च" इति नियमात्परस्मैपदम् । भवती च एताश्च भवत्यः । त्यदाद्येकशेषः । विधवाः स्थ । न केवलं त्वमेव

[1] केकैय्यु° D., T2, E3, T., G., Com.

किन्त्वेता अपि त्वया हता इत्यर्थः । वयं शोच्याः निन्दाभाजनत्वादितिभावः । भूरनृपा शोच्या । 'शोच्यं राज्यमराजकम्' इति न्यायात् । त्वमपि शोच्येत्यर्थः । केकयस्यापत्यं स्त्री कैकेयी ॥ "जनपदशब्दात्क्षत्रियादञ्" इति केकयशब्दादञ्प्रत्ययः ॥ "केकयमित्रयुप्रलयानां यादेरियः" इतीयादेशे गुणः ॥ उपज्ञायत इत्युपज्ञा ॥ "आतश्चोपसर्गे" इति कर्मण्यङ् प्रत्ययः ॥ कैकेय्याः उपज्ञा कैकेय्युपज्ञम् । कृद्योगषष्ठीसमासः । कैकेय्या प्रथममुपज्ञातमित्यर्थः ॥ "उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" इति नपुंसकत्वम् ॥ बहवोऽनर्थाः पूर्वोक्ताः यस्मिन् तत् लघुत्वमत्यन्तायुक्तकारित्वलक्षणं तुच्छत्वमित्यहो महदसाधारण्यं संपादितं पापिष्ठेत्युपालम्भार्थः ॥

नैतन्मतं मत्कमिति ब्रुवाणः
सहस्रशो[1]ऽसौ शपथानशप्यत्[2] ।
उद्घाश्य[3]मानः पितरं सरामं
लुठ्यन्[4] सशोको[5] भुवि रोरुदावान् ॥ ३२ ॥

३२. तं प्रति स्वापराधं परिहरति नेति ॥ सशोकः असौ भरतः सरामं पितरमुद्वाश्यमानः हा तात हा रामेति उभावपि नामग्रहमुच्चैः क्रोशन्नित्यर्थः । वाशृ शब्दे इति दैवादिकात्कर्तरि लटः शानजादेशः । भुवि लुठ्यन् । लुठेर्दैवादिकाल्लटः शत्रादेशः । रोरुदा भृशं रोदनम् । रुदेर्यङन्तात् ॥ "अप्रत्ययात्" इत्यप्रत्ययः । अल्लोपयलोपौ । तद्वान् भृशं रुदन्नित्यर्थः । एतत्कैकेय्यनुष्ठितं मतं पक्षः । अहं ग्रामणीरस्य मत्कं मत्कर्तृकं न ॥ "स एषां ग्रामणीः" इति कन्प्रत्ययः ॥ "प्रत्ययोत्तरपदयोश्च" इत्यस्मदो मपर्यन्तस्य मादेशः ॥ इति ब्रुवाणः सहस्रशः अनेकवारं शपथान् विश्वासवचनानि अशप्यदकरोदित्यर्थः । स तपोऽतप्य-

---

१ सहस्रधा T_2, T_4.
२ °नशाप्सीत् T_3.
३ उद्वास्यमानः B., E_1, E_2.
४ लुठन् T_2.
५ सशोकं C.

तेतिवत् निर्देशात् । शपेर्दैवादिकाल्लङ् । 'शपते शप्यति शपत्याक्रो- शत्यपि शप्यते' इति भट्टमल्लः ॥

तं सुस्थयन्तः सचिवा नरेन्द्रं
दिधक्षयन्तः समुदूहुरारात् ।
अन्त्याहुतिं हावयितुं सविप्रां-
श्चिचीषयन्तोऽध्वरपात्रजातम् ॥ ३३ ॥

३३. तमिति ॥ अथ सचिवास्तं भरतं स्वस्थयन्तः सुखस्थं प्रकृतिस्थं कुर्वन्तः आश्वासयन्त इत्यर्थः । 'तत्करोति' इति ण्यन्ताल्लटः शत्रादेशः । नरेन्द्रं दशरथं दिधक्षयन्तः दग्धुमेषयन्तः । दहेः सन्नन्ताण्णिचि लटः शत्रादेशः । घत्वादिकार्यम् । सविप्राः विप्रसहिताः सन्तः अन्त्याहुतिं प्रेताहुतिं हावयितुमग्नौ प्रक्षेपयितुम् । जुहोतेर्ण्यन्तात् "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति तुमुन् । अध्वरपात्रजातं जुह्वादियज्ञपात्रसमूहं चिचीषयन्तो यजमानाङ्गेषु यथाविधि चेतुं निधातुमेषयन्तः । चिनोतेः सन्नन्ताण्णिचि शतृप्रत्ययः । आरान्नगरस्य नातिदूरे समुदूहुः । अन्तर्भावितण्यर्थो निर्देशः । उद्वाहयामासुः । चितामारोपयन्नित्यर्थः । वहेर्लिट् । यजादित्वात्संप्रसारणम् ॥

उदक्षिपन् पट्टदुकूलकेतू-
नवादयन् वेणुमृदङ्गकांस्यम्[3] ।
कम्बूंश्च तारानधमन् समन्ता-
त्तथानयन्[4] कुङ्कुमचन्दनानि ॥ ३४ ॥

३४. उदेति ॥ पट्टदुकूलानि ब्राह्मणपरिव्राजकवन्निर्देशः । तेषां केतून् ध्वजानुदक्षिपन् उत्क्षिप्तवन्तः । वेणुरिति वंशादिसुषिरवाद्योपलक्षणम् । मृदङ्ग इति मुरजाद्यानामुपलक्षणम् । कंसीयस्य विकारः

१ स्वस्थयन्तः D., T2, T3, E1, T., G., Com.
२ साविप्राश्चि° T., G., Com.
३ कांश्यम् C., कास्यं T2, T3, वाद्यम् E1.
४ °स्तयन् T., G., Com., अथानयन् T4.

कांस्य इति तालादिवाद्योपलक्षणम् ॥ "कंसीयपरशव्ययोर्यञञौ लुक् च" इति यञ्प्रत्ययः छस्य लुक् च । तेषाम् ॥ "जातेरप्राणिनाम्" इति द्वन्द्वैकवद्भावः । न तूर्याङ्गत्वात् । मार्दङ्गिकपाणविकादिवन्मृदङ्गादितूर्याणां तूर्याङ्गताभावात् । अवादयन् वादितवन्तः । तारांस्तारध्वनीन् कम्बून् शंखांश्चाधमन् अपूरयन् ॥ "पाघ्रा—" आदिना ध्मो धमादेशः । तथा समन्तात् कुङ्कुमचन्दनानि आसयन् अकिरन्नित्यर्थः । सर्वत्र लङ् ॥

श्रोत्राक्षिनासावदनं सरुक्मं
कृत्वाजिने प्राक्शिरसं निधाय[1] ।
संचित्य पात्राणि यथाविधान-
मृत्विग्जुहाव ज्वलितं[2] चिताग्निम् ॥ ३५ ॥

३५. श्रोत्रेति ॥ ऋतुमृतावृतुप्रयुक्तो वा यजतीति ऋत्विक् संस्कर्ता भरतः ॥ "ऋत्विग्—" इत्यादिना क्विन्नन्तो निपातः । अजिने कृष्णाजिने प्राक्छिरसं विधाय । 'रज्जुषु चैव कृष्णाजिने चैव चोत्तानः शेते' इति शास्त्रात् तथा कृत्वा । सर्वेषु संवेशनेषु दक्षिणाशिरसमिति शास्त्रे सति प्राक्छिरस्त्वाभिधानं चिन्त्यम् । शाखाभेदाद्वा समाधेयम् । श्रोत्रे अक्षिणी नासा वदनं च तथोक्तम् । प्राण्यङ्गत्वादेकवद्भावः । सरुक्ममाधाय । प्राणायतनेषु हिरण्यशकलं कृत्वा । पात्राणि यज्ञपात्राणि तथाविधानं संचित्य । 'पात्राणि चिनोति सर्वाण्यनुलोमानि ध्रुवावर्जं तस्य दक्षिणे हस्ते स्रुवं जुहूं च निदधाति सव्य उपभृतमुरसि ध्रुवामरणीं च मुखेऽग्निहोत्रहवणीं नासिकयोः स्रुवादि' इत्यादि 'स एष यज्ञो युधि यजमानोऽञ्जसा स्वर्गलोकमेति' इत्यन्तशास्त्रोक्तविधानात् तत्तदवयवेषु निधायेत्यर्थः । ज्वलितं चिताग्निं जुहाव आहुतिभिरताप्सींदित्यर्थः ॥

---

१ विधाय T., G., Com. | २ ज्वलिते चिताग्नौ T_2, T_4.

कृतेषु पिण्डोदकसञ्चयेषु
हित्वाभिषेकं प्रकृतं प्रजाभिः ।
प्रत्यानिनीषुर्विनयेन रामं
प्रायादरण्यं भरतः सपौरः ॥ ३६ ॥

३६. कृतेष्विति ॥ अथ भरतः पिण्डश्च उदकं च संचयोऽस्थिसंचयः तेषु कृतेषु सत्सु । श्राद्धसमाप्तावित्यर्थः । प्रजाभिरमात्यादिभिः प्रकृतं प्रक्रान्तम् ॥ "आदिकर्मणि क्तः कर्त्तरि च" इति चकारात्कर्मणि क्तः ॥ अभिषेकं पट्टबन्धनं हित्वा परिहृत्य रामं प्रत्यानिनीषुः अभिषेकाय प्रत्यानेतुमिच्छुः । नयतेः सन्नन्तादुप्रत्ययः । सपौरः पौरसहितः । तैरप्यानाययितुमिति भावः । अरण्यं विनयेन प्रायात् । अन्यथा रामस्याविश्वासादिति भावः । यातेर्लङ् ॥

शीघ्रायमाणैः ककुभोऽश्नुवानै-
र्जनैरपन्थानमुपेत्य सृप्तैः ।
शोकादभूषैरपि भूश्चकासा-
ञ्चकार नागेन्द्ररथाश्वमिश्रैः ॥ ३७ ॥

३७. शीघ्रायमाणैरिति ॥ अशीघ्रैः शीघ्रैर्भवद्भिः शीघ्रायमाणैः । रामदर्शनोत्कण्ठयेति भावः । भृशादिक्यङन्ताल्लटः शानजादेशः । ककुभः अश्नुवानैः आनन्त्याद्दिशो व्याप्नुवद्भिः । अश्नोतेः शानचि उवङादेशः । अत एव अपन्थानमपर्याप्तत्वादपन्थानमुपेत्य ॥ "पथो विभाषा" इति पाक्षिकः समासान्ताभावः । सृप्तैः प्रसर्पद्भिरित्यर्थः । सृपेः कर्तरि क्तः । शोकादभूषैः भूषारहितैरपि नागेन्द्ररथाश्वेन हस्तिरथाश्वेन मिश्रैः ॥ "पूर्वसदृश—" इत्यादिना तृतीयासमासः । बहुष्वनियमाद्धस्तिनां प्राधान्याच्च बह्वचोऽपि नागेन्द्रस्य पूर्वनिपातः । जनैर्हेतुभिः । भूश्चकासाञ्चकार विरेजे । स्वयमभूषितत्वेऽपि भुवनभूषायमाणहस्त्यादियोगात्तैरभूष्येव भूरिति भावः । 'कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' इति लिटि चकासेराम्प्रत्ययः ॥ "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इत्यत्र पूर्ववद्ग्रहणानुवृत्तेश्चकास्तिवत्कर्त्रभिप्रायेऽपि कृञः परस्मैपदम् ॥

उच्चिक्यिरे पुष्पफलं[1] वनानि[2]
सस्नुः पितॄन् पिप्रियुरापगासु ।
आरेमुरित्वा[3] पुलिनान्यशङ्कं
छायां समाश्रित्य[4] विशश्रमुश्च[5] ॥ ३८ ॥

३८. उदिति ॥ किं च ते जनाः वनानि पुष्पाणि फलानि च पुष्पफलम् ॥ "जातिरप्राणिनाम्" इत्येकवद्भावः ॥ उच्चिक्यिरे अपचिक्यिरे । चिनोतेः कर्त्तरि लिटि ञित्वात्तङ् ॥ "विभाषा चेः" इति कुत्वम् ॥ "एरनेकाचः—" इति यण् ॥ 'दुहियाचिरुधिप्रच्छिभिक्षिचिञाम्—' इति द्विकर्मकत्वम् । अपां समूहः आपम् ॥ "तस्य समूहः" इत्यण् ॥ तेन गच्छन्तीत्यापगाः नद्यः ॥ 'डोऽन्यत्रापि दृश्यते' ॥ तासु सस्नुः स्नातवन्तः । स्नातेर्लिट् । झेरुस् ॥ "उस्यपदान्तात्" इति पररूपत्वम् । पितॄन् पिप्रियुः निवापाञ्जलिभिः प्रीणयामासुः । प्रीणातेर्लिट्युसि इयङादेशः । पुलिनानि सैकतानि इत्वा गत्वा । इणः क्त्वाप्रत्ययः । अशङ्कं विस्रब्धमारेमुराक्रीडन् ॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम् ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ ॥ छायां समाश्रित्य विशश्रमुः श्रान्ताः ॥

संप्राप्य तीरं तमसापगाया[6]
गङ्गाम्बुसंपर्कविशुद्धिभाजः ।
विगाहितुं यामुनमम्बु पुण्यं
ययुर्निरुद्धश्रमवृत्तयस्ते ॥ ३९ ॥

३९. संप्राप्येति ॥ ते जनाः गच्छतीति गङ्गा भागीरथी ॥ "गन्गम्यद्योः" इति गमेरौणादिक गन्प्रत्ययः । तदम्बुसंपर्केण विशुद्धिभाजोऽतिपवित्रायास्तमसापगायाः तमसानद्यास्तीरं संप्राप्य निरुद्धश्रमवृ-

---

१ पुष्पफले E1.
२ बलानि E2.
३ आरेदु N.
४ छायाः समाश्रित्य T3.
५ विशश्रमुश्च E2.
६ तरसा D., E1, also noticed by c.

स्तयः निरस्तखेदसंक्रान्तयः सन्तः। पुनातीति पुण्यं यामुनमम्बु यमुनाजलं विगाहितुं ययुः॥

ईयुर्भरद्वाजमुनेर्निकेतं
यस्मिन्विशश्राम समेत्य रामः।
च्युताशनाय[1]ः फलवद्विभूत्या
व्यसन्नुदन्यां[2] शिशिरैः पयोभिः॥ ४० ॥

४०. ईयुरिति॥ ते जनाः भरद्वाजमुनेर्निकेतमाश्रममीयुः जग्मुः। एतेर्लिट्। "इणो यण्" इति यणादेशः॥ "दीर्घ इणः किति" इत्यभ्यासदीर्घः॥ यस्मिन्नाश्रमे रामः समेत्यागत्य विशश्राम विश्रान्तः। अतस्तेऽपि तत्र सोत्कण्ठास्तस्थुरिति भावः। अथ फलवतां फलवृक्षाणां विभूत्या संपदा च्युताशनायाः निवृत्तक्षुधाः सन्तः शिशिरैः पयोभिरुदन्यां पिपासाम्॥ "अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु" इति निपातः। व्यास्यन् अपानयन्। अस्यतेर्लङ्याड्वृद्धिः॥

वाचंयमान्स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून्।
अध्यापयन्तं विनयात्प्रणेमुः
पद्गा भरद्वाजमुनिं सशिष्यम्॥ ४१ ॥

४१. वाचंयमानिति॥ अथ वाचं यच्छन्तीति वाचंयमान् मौनव्रतिनः॥ "वाचि यमो व्रते" इति खच्॥ "वाचंयमपुरन्दरौ च" इति निपातनान्मुमागमः। स्थण्डिले शेरत इति स्थण्डिलशायिनः। तद्व्रतिनश्चेत्यर्थः। अनिशं युयुक्षमाणान् योक्तुमिच्छतः। योगाभ्यासिन इत्यर्थः। युजेः सन्नन्ताल्लटः शानजादेशः। मुमुक्षून् मोक्तुमिच्छून्। विरक्तानित्यर्थः। मुचेः सन्नन्तादुप्रत्ययः। विनयादध्यापयन्तम्। ब्रह्मविद्यां ग्राहयन्तमित्यर्थः॥ "क्रीङ्जीनां णौ" इत्यात्वे पुगागमः॥ सशिष्यं भरद्वाज-

१ च्युताशनायाः D., E1, G., T., Com. | २ व्यास्य° Com.

मुनिम्। पादाभ्यां गच्छन्तीति पद्गाः पादचारिणः सन्तः। 'डोऽन्यत्रापि दृश्यते' इति गमेर्डप्रत्ययः॥ "पादस्य पदाज्यातिगोपहतेषु" इति पादशब्दस्य पदादेशः॥ विनयात्प्रणेमुः प्रणताः। नमेर्लिटि "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ॥

आतिथ्यमेभ्यः परिनिर्विवत्सोः
कल्पद्रुमा योगबलेन फेलुः।
धामप्रथिम्नो म्रदिमान्वितानि
वासांसि च द्राघिमवन्त्युदूहुः॥ ४२॥

४२. आतिथ्यमिति॥ एभ्यो भरतानुगमेभ्यः। संप्रदाने चतुर्थी। अतिथ्यर्थमातिथ्यमतिथिसत्कारम्॥ "अतिथेर्ञ्यः"॥ परिनिर्विवत्सोः निर्वस्तुं परिकल्पयितुमिच्छोः। वसेर्निवासार्थकात्सन्नन्तादुप्रत्ययः। उपसर्गवशादर्थान्तरत्वम्॥ "सः स्यार्धधातुके" इति सकारस्य तकारः॥ धामप्रथिम्नः तेजोराशेर्मुनेरित्यर्थः। तेजोविशेषद्योतनार्थं 'तेजसां हि न वयः समीक्ष्यते' इति वत् तेजस्तद्वतोरभेदेन व्यपदेशः। योगबलेन योगमहिम्ना कल्पद्रुमाः संकल्पोपनताः कल्पवृक्षाः फेलुः भक्ष्यभोज्यादिकम्। फलतेर्लिट्॥ "तृफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ॥ तथा म्रदिमान्वितानि मृदुत्वमुपगतानि द्राघिमवन्ति दैर्घ्ययुक्तानि वासांसि वस्त्राणि च उदूहुः उद्वहन्ति स्म। यजादित्वात्संप्रसारणम्। पृथुमृदुदीर्घशब्देभ्यः तस्य भावः इत्यर्थे पृथ्वादिभ्यः इमनिच्। पृथुम्रदुशब्दयोः॥ "र ऋतो हलादेर्लघोः" इति रादेशः॥ दीर्घशब्दस्य "प्रियस्थिर—" इत्यादिना द्राघादेशः॥ पश्चान्मतुप्॥

आज्ञां प्रतीषुर्विनयादुपास्थु–
र्जगुः सरागं ननृतुः सहावम्।
सविभ्रमं नेमुरुदारमूचु–
स्तिलोत्तमाद्या वनिताश्च तस्मिन्॥ ४३॥

१ परिनिर्विवत्सोः T., G., Com. | ३ सभावम् T2, T4. T., G., Com.

२ प्रतीयुः E2.

४३. आज्ञामिति ॥ तस्मिन् तत्काले तिलोत्तमाद्या वनिता अप्सरसः आज्ञां भरतानुगादेशं प्रतीषुः अग्रहीषुः यथोक्तं चक्रुरित्यर्थः । इषे-र्लिटि द्विर्भावादिकार्ये सवर्णदीर्घादिकार्यम् । विनयादुपास्थुः असेवन्त इत्यर्थः । तिष्ठतेर्लुङि "गातिस्था—" इत्यादिना सिचो लुक् ॥ "आतः" इति झेर्जुस् ॥ "उस्यपदान्तात्" इति पररूपत्वम् । सरागं रागबन्ध-युक्तं जगुरगायन् । गातेर्लिटि द्विर्भावे "कुहोश्चुः" पररूपत्वं च ॥ सभावं शृङ्गारचेष्टायुक्तं ननृतुः अनृत्यन् । नृतेर्लिटि "उरत्" इत्यभ्या-सऋकारस्यात्वम् । "असंयोगात्—" इति लिटः कित्वान्न गुणः ॥ सविभ्रमं सविलासं नेमुः प्रणेमुः । नमेर्लिटि "अत एकहल्—" इत्ये-त्वाभ्यासलोपौ । उदारं गंभीरमूचुः व्याजह्रुः । वचेर्ब्रूञादेशस्य लिटि संप्रसारणे द्विर्भावे सवर्णदीर्घः ॥

वस्त्रान्नपानं शयनं च नाना
कृत्वावकाशे रुचिसंप्रकॢप्तम्[1] ।
तान् प्रीतिमानाह मुनिस्ततः स्म[3]
निवध्वमाध्वं पिबताद्त शेध्वम् ॥ ४४ ॥

४४. वस्त्रेति ॥ अथ मुनिर्भरद्वाजः वस्त्राणि अन्नानि पानानि च वस्त्रान्नपानम् । 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इत्येकवद्भावः । शयनं च ॥ जातावेकवचनम् । नानावकाशे यथाभिमते पृथक्पृथक्-प्रदेशे रुचिरं मनोज्ञं यथा तथा प्रकॢप्तं सज्जं कृत्वा प्रीतवान् हृष्टः सन् । प्रीञः प्रीत्यर्थाद् दैवादिकादकर्मकात्कर्त्तरि निष्ठा । तान् भरतानुगा-नाह स्म उक्तवांश्च । किं तत् । तदाह । हे जनाः अस्मिन्नाश्रमे निवध्वं यथेच्छं वस्त्राणि परिधत्त । वसेराच्छादनार्थाल्लोटि ध्वमि धातुसका-रस्य ॥ "झलां जश् झशि" इति जश्त्वम् ॥ आन्तरतम्याद्धकारः ।

१ रुचिरं प्रक्लृप्तम् B., T3, E1, T., G., Com.
२ प्रीतवान् T. G. Com.
३ मुनिःस्म तस्मिन् T2, T., Com. मुनिस्ततोऽस्मिन् G. मुनिस्तु तस्मिन् T3.

आध्वमुपविशत। आस उपवेशने। सर्वं पूर्ववत्। पिबत पेयजातं यथेच्छं धयत। पा पाने। थस्य तादेशः॥ "पाघ्रा-" इत्यादिना पिबादेशश्च। अत्त सुष्ठु भक्ष्याणि भक्षयत। अदेर्लोटि थस्य तादेशः। शेध्वं विस्रब्धं संविशत। शीङो लोटि ध्वमि शपो लुक्॥ "शीङः सार्वधातुके गुणः" इति गुणः। सर्वत्र "प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च" इत्यतिसर्गे लोट्। अतिसर्गः कामचाराभ्यनुज्ञा। अत्र सर्वत्र विधौ लोडिति पूर्वव्याख्यातारस्तदसत्। न तावत्किञ्चिदत्र ज्योतिष्टोमादिवत्किञ्चिदप्यपूर्वं विधेयमस्ति रागत एवैषां प्राप्तत्वात्। नाप्यत्रर्तौ जायामुपेयादितिवन्नियम्यते तदनिच्छतामकरणे प्रत्यवायाभावात्। नापि स्थानान्तरविहारपरिसंख्यापरत्वमिति वाच्यम्। पञ्चेतरपञ्चनखभक्षणवत् स्थानान्तरविहारे दोषाभावात्। दोषत्रयदुष्टत्वादस्मदुक्तमेव युक्तम्॥

ते भुक्तवन्तः सुसुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते।
द्रुतं समध्वा रथवाजिनागै-
र्मन्दाकिनीं रम्यवनां समीयुः॥ ४५॥

४५. त इति॥ ते जनाः भुक्तवन्तः वासांसि वसित्वा आच्छाद्य। वसेराच्छादनार्थात् क्त्वाप्रत्ययः। वलादित्वादिट्। सुष्ठु सुखं यथा भवति तथा सुसुखं रजनीमुषित्वा स्थित्वा। अत्यन्तसंयोगे द्वितीया। "वसतिक्षुधोरिट्"॥ यजादित्वात्संप्रसारणम्। प्रभाते संप्राप्ता अध्वानं समध्वाः अध्वगता इत्यर्थः। प्रादिसमासः॥ "उपसर्गादध्वनः" इति समासान्तष्टच्प्रत्ययः। द्रुतं रथवाजिना युक्तैर्नागै रथवाजिनागैः। मध्यमपदलोपिसमासाश्रयणेन सेनाङ्गद्वन्द्वैकवद्भावं वारयन्ति। रम्यवनां मन्दाकिनीं नाम चित्रकूटनिकटस्थां कांचन नदीं न तु गङ्गामित्यारण्य-

१ ससुखं D., E1, स्वसुखं T3.

काण्डे द्रष्टव्यम् । समीयुः । इणो लिटि झेरुसि "इणो यण्" ॥ "दीर्घ इणः किति" इत्यभ्यासदीर्घः ॥

वैखानसेभ्यः श्रुतरामवार्त्ता-
स्ततो विशिञ्जानपतत्त्रिसङ्घम् ।
अभ्रंलिहाग्रं रविमार्गभङ्ग-
मानंहिरेऽद्रिं प्रति चित्रकूटम् ॥ ४६ ॥

४६. वैखानसेभ्य इति ॥ ततो मन्दाकिनीगमनानन्तरं वैखानसेभ्यो वानप्रस्थेभ्यः । 'वैखानसवनेवासिवानप्रस्थाश्च तापसाः' इति यादवः ॥ "आख्यातोपयोगे" इत्यपादानत्वम् । श्रुता रामवार्त्ता चित्रकूटगमनवृत्तान्तो यैस्ते सन्तः । विशेषेण शिञ्जानपतङ्गसङ्घं कूजत्पक्षिकुलम् । शिञ्जेर्लटः शानजादेशः । अभ्रं लिहन्तीत्यभ्रंलिहानि अभ्रंकषाणि ॥ "वहाभ्रे लिहः" इति खचि मुमागमः ॥ तान्यग्राणि शिखराणि यस्य तम् । अत एव रविमार्गस्य भङ्गः प्रतिरोधोऽस्यास्तीति तथोक्तम् । मत्वर्थीयोऽकारः । चित्रकूटमद्रिं प्रति आनंहिरे जग्मुः । अहि गतौ इति धातोर्लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ "तस्मान्नुड्द्विहलः" इति नुडागमः ॥

दृष्ट्वोर्णुवानान् ककुभो बलौघान्
वितत्य शार्ङ्गं कवचं पिनह्य ।
तस्थौ सिसंग्रामयिषुः शितेषुः
सौमित्रिराक्षिभ्रुवमुज्जिहानः ॥ ४७ ॥

४७. दृष्ट्वेति ॥ सुमित्राया अपत्यं पुमान् सौमित्रिः । बाह्वादित्वादिञ् । ककुभो दिशः ऊर्णुवानान् व्याप्नुवतः । ऊर्णोतेः शानच् उवङादेशश्च । बलौघान् सेनासमूहान् दृष्ट्वा शृङ्गस्य विकारः शार्ङ्गं धनुः वितत्य

१ वृत्ता° T2, T4.
२ ततोऽवशिञ्जान T3, विसिञ्जान D, E1, E3.
३ पतङ्ग T2, T4, T, G., Com.
४ दृष्ट्वोर्णवानान् E2.
५ वनौघान् C.
६ °माजिहानः T2. T4.

विस्तार्य सज्जं कृत्वेत्यर्थः। तनोतेः समासे क्त्वो ल्यप्। तुक्। अनुनासिकलोपः। कवचं वर्म पिनह्य। नहेर्ल्यप्। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति विकल्पादल्लोपः। सिसंग्रामयिषुः संग्रामयितुं योद्धुमिच्छुः। संग्राम युद्धे इति धातोश्चुरादिण्यन्तात् सन्नन्तादुप्रत्ययः। अत एव शितेषुः निशितबाणः सन्। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्॥ "अचतुर—" इत्यादिना निपातनात्साधुः। उज्जिहानः उद्गमयन्। णिजर्थगर्भो निर्देशः। जहातेः कर्त्तरि लटः शानजादेशः। तस्थौ स्थितवान्। प्रतिपक्षभ्रान्त्या सन्नद्ध इत्यर्थः॥

शुक्लोत्तरासङ्गभृतो विशस्त्रान्
पादैः[1] शनैरापततः[2]समन्यून्।
औहिष्ट[3] तान् वीतविरुद्धबुद्धीन्
विवन्दिषून् दाशरथिः स्ववर्ग्यान्॥ ४८॥

४८. शुक्लेति॥ अथ दाशरथी रामः शुक्लोत्तरासङ्गभृतः शुक्लोत्तरीयधारिणः न तु कवचभृतः। क्विप्। विशस्त्रान् निरायुधान् न तूद्यतायुधान्। पादैः शनैरापतन्तः आगच्छतः न तु यानैस्तूर्णम्। प्रमन्यून् प्रभूतशोकान् रुदत इत्यर्थः। नतु क्ष्वेडमानान्। भरतानुगान् वीतविरुद्धबुद्धीन् विगतवैराभिसन्धीन्। किं तु विवन्दिषून् वन्दितुं प्रणन्तुमिच्छून्। स्ववर्ग्यान् स्ववर्गे भवान् स्वपक्षपातिन इत्यर्थः॥ "वर्गान्ताच्च"॥ "अशब्दे यत्खावन्यतरस्याम्" इति यत्प्रत्ययः॥ औहिष्ट ऊहितवान्। ऊहतेर्लुङि सिच्याड्वृद्धिः। अनुद्धतवेषलिङ्गेन सुहृद्भावेनागतानिश्चिकायेत्यर्थः॥

समूलकाषं चकषू रुदन्तो
रामान्तिकं[4] बृंहितमन्युवेगाः।
आवेदयन्तः क्षितिपालमुच्चैः-
कारं मृतं रामवियोगशोकात्॥ ४९॥

१ पदैः T2.
२ प्रमन्यून् D., T3., T4, T., G., Com.
३ ऐहिष्ट E2.
४ रामान्तिके E3.

४९. समूलेति ॥ अथैते बृंहितमन्युवेगाः प्रवृद्धशोकवेगाः अत एव रुदन्तः क्षितिपालं दशरथं रामवियोगशोकान्मृतम् उच्चैःकारमुच्चैः कृत्वा आवेदयन्तः पुत्रशोकान्मृत इत्युच्चैः कथयन्त इत्यर्थः ॥ "अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ" इति णमुल्प्रत्ययः । नीचैराख्येयस्यानिष्टस्य उच्चैराख्यानमेवात्र अयथाभिप्रेताख्यानम् । रामान्तिकं रामसमीपदेशं समूलकाषं स्वशरीरलुण्ठनैः पतनैः समूलं कषित्वा चकषुः । आमूलाच्चकषुरित्यर्थः ॥ "निमूलसमूलयोः कषः" इति णमुल्प्रत्ययः ॥ "कषादिषु यथाविध्यनुप्रयोगः" ॥

चिरं रुदित्वा करुणं सशब्दं
गोत्राभिधायं सरितं समेत्य ।
मध्ये जलाद्राघवलक्ष्मणाभ्यां
प्रत्तं जलं द्व्यञ्जलमन्तिकेऽपाम् ॥ ५० ॥

५०. चिरमिति ॥ अथ राघवः रामः लक्ष्मणसाहचर्यात् । तथा च रामलक्ष्मणाभ्यामित्यर्थः । चिरं करुणं दीनं सशब्दं सध्वानं च यथा तथा रुदित्वा परिदेव्य सरितमेत्य नदीं गत्वा मध्ये जलस्य मध्येजलं तस्माज्जलमध्यादित्यर्थः । ल्यब्लोपे पञ्चमी । तत्र स्नात्वा निर्गत्येत्यर्थः ॥ "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावः । "अपञ्चम्याः" इति निषेधान्न लुगम्भावौ । अपामन्तिके तीरे । द्वौ अञ्जली समाहृतौ द्व्यञ्जलम् ॥ "तद्धितार्थ—" इत्यादिना समाहारे द्विगुः ॥ "द्वित्रिभ्यामञ्जलेः" इति समासान्तष्टच् ॥ द्व्यञ्जलमिति लक्षणया द्व्यञ्जलिगृहीतमित्यर्थः । अन्यथा घटः पट इति वत् द्व्यञ्जलं जलमिति सामानाधिकरण्यायोगात् । न तु द्व्यञ्जलिः प्रमाणमस्येति सामानाधिकरण्यसिद्धिः ॥ "द्विगोर्लुगनपत्ये" इति प्रमाणतद्धितलुकि समासान्तानुपपत्तिप्रसङ्गात् । तत्र "अतद्धितलुकि" इत्यनुवृत्तेरिति । किं चात्र द्व्यञ्जलमिति साधनाद्वित्वमुच्यते । द्वयोः कर्त्रोरञ्जल्योरपि द्वित्वात् । न तु देयजलाञ्जलित्वम् । अतो न तत्त्रित्वैकोत्तरवृद्धिः विधायकशास्त्रविरोध इति सर्वं

समीहितम् । ईदृग्जलं गोत्रमभिधाय गोत्राभिधायं नामग्राहम् 'गोत्रं नाम्नि कुलेऽचले' इति यादवः ॥ "द्वितीयायां च" इति णमुल्प्रत्ययः ॥ "आतो युक्चिण्कृतोः" इति युक् ॥ प्रत्तं दत्तम् । प्रपूर्वाद्ददातेः कर्मणि क्तः ॥ "अच उपसर्गात्तः" इति ददस्तकारादेशः ॥

अरण्ययाने[1] सुकरे पिता मां
प्रायुङ्क्त[2] राज्ये बत[3] दुष्करे त्वाम् ।
मागाः शुचं वीर[4] भरं वहामु-[5]
माभाषि[6] रामेण वचः कनीयान् ॥ ५१ ॥

५१. अथ रामो राज्याय भरतमनुनयन्नाह अरण्येति ॥ हे वत्स पिता दशरथो मां प्रगल्भमपीति भावः । सुकरेऽरण्ययाने वनवासे प्रायुङ्क्त नियुक्तवान् ॥ "प्रोपाभ्यां युजेः" इत्यात्मनेपदम् ॥ त्वां बालमपीति भावः । दुष्करे राज्ये प्रायुङ्क्त । बतेत्यनौचित्यार्थे । हे धीर धैर्यसंपन्न शुचं मद्वनवासनिमित्तं शोकं मा गाः मा गमः । सुकरत्वात्तस्येति भावः ॥ "इणो गा लुङि" ॥ "न माङ्योगे" ॥ किन्त्वमुं भरं पितृदत्तं राज्यभरं दुर्वहमपीति भावः । भृ भरणे इति धातोः क्र्यादिकात् "ऋदोरप्"। वह संपादय । विधौ लोट् । पित्राज्ञाया दुर्लङ्घ्यत्वादिति भावः । रामेण कनीयाननुज इत्यर्थः ॥ "युवाल्पयोः कनन्यतरस्याम्" इति कनादेशः ॥ पूर्वोक्तमाभाषि भाषितः । ब्रुवेरर्थग्रहणाद्द्विकर्मकत्वम् । 'अप्रधाने दुहादीनाम्' इत्यप्रधाने कर्मणि लुङ् ॥

कृती श्रुती वृद्धमतेषु धीमां-
स्त्वं पैतृकं चेद्वचनं न कुर्याः ।
विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्रकाम्या ॥ ५२ ॥

---

१ आरण्य E2.
२ प्रायुक्त D.
३ च सुदुष्करे E1.
४ धीर E1, T., G., Com.
५ वहाशुभार° c.
६ °मभाषि D., T3, T4.

५२. कृतीति ॥ किं च वत्स वृद्धमतेषु ज्ञानवृद्धाचारेषु श्रुतमनेन श्रुती कृतमनेन कृती । तेषां श्रोता अनुष्ठाता चेत्यर्थः ॥ "इष्टादिभ्यश्च" इति इनिप्रत्ययः ॥ "क्तस्येन्विषयस्य कर्मणि सप्तमी वक्तव्या"। धीमान् त्वं पितुरिदं पैतृकम् ॥ "पितुर्यच्च" इति चकाराट्ठञ् ॥ वचनं न कुर्याश्चेत् न पालयेश्चेत् । इह लोके परस्यान्यस्यापि पुंसः कुले विच्छिद्यमानेऽप्युत्साद्यमानेऽपि पुत्रकाम्या आत्मनः पुत्रेच्छा । पुत्रशब्दात्काम्यजन्तादप्रत्यये टाप् । कथं स्यात् न कथंचिदपि स्यादित्यर्थः । अविधेयपुत्रादपि कुलोच्छेद एव वरमिति न कोऽपि पुत्रकामः स्यादिति भावः॥

अस्माकमुक्तं बहुमन्यसे चे-
द्यदीशिषे त्वं न मयि स्थिते च ।
जिह्रेष्यतिष्ठन्यदि तातवाक्ये
जहीहि[1] शङ्कां व्रज शाधि पृथ्वीम् ॥ ५३ ॥

५३. अस्माकमिति ॥ अस्माकमुक्तमस्मद्वचनं बहु मन्यसे चेत् पितृसमो ज्येष्ठ इति मानयसि चेत् । मयि ज्येष्ठे स्थिते त्वं नेशिषे न प्रभवस्यपि यदि किं तु मत्परतन्त्रोऽसि मदाज्ञाकरोऽसि चेदित्यर्थः । तथा तातवाक्ये पितृशासने अतिष्ठन् अस्थितः सन् जिह्रेषि यदि लज्जसे चेत् । ह्रीलज्जायाम् "श्लौ" इति द्विर्भावः । गुणः । शङ्कामनुशयं जहीहि ॥ "ई हल्यघोः" इतीकारः ॥ व्रजायोध्यां गच्छ पृथ्वीं शाधि पालय ॥ "शा हौ" इति शाभावस्यासिद्धत्वात् "हुझल्भ्यो हेर्धिः"॥

वृद्धौरसां[2] राज्यधुरां[3] प्रवोढुं
कथं कनीयानहमुत्सहेयं[4] ।
मा[5] मां प्रयुक्थाः[6] कुलकीर्तिलोपे[7]
प्राह स्म रामं भरतोऽपि धर्म्यम् ॥ ५४ ॥

---

१ जहाहि E1.
शङ्कां जहीहि E3.
२ वृद्धौरसे E1.
३ राज्यधुरं T2.
४ °मुत्सहेयम् c., D., T2, T4.
५ मां मा E3.
मां मा B., T3, T4.
६ प्रयुङ्क्थाः c., C., T1.
७ कोपे T2, T3, T4.
नाशे E.

५४. अथ भरतो रामं प्रत्याह वृद्धेति ॥ उरसा निर्मितः औरसः उदर्यः पुत्रः ॥ "उरसोऽण् च" इत्यण्प्रत्ययः ॥ वृद्धो ज्येष्ठ औरसो यस्यास्तां राज्यस्य धुरां राज्यधुराम् ॥ "ऋक्पूर्—" इत्यादिना समासान्तोऽप्रत्ययः ॥ परवल्लिङ्गतायां स्त्रियां टाप् । प्रवोढुम् ॥ "शकधृष—" इत्यादिना तुमुन् ॥ "सहिवहोरोदवर्णस्य" इत्योकारः ॥ ढत्वादिकार्यम् । कनीयान् कनिष्ठोऽहं कथमुत्सहेय रोचयेय । गर्हितमेतदित्यर्थः ॥ "विभाषा कथमि लिङ् च" इति गर्हायां सहेर्लिङि तङि "इटोऽत्" ॥ कुलकीर्त्ति लुम्पत्युच्छिनत्तीति तल्लोपम् ॥ "कर्मण्यण्" ॥ तस्मिन्कर्मणि मां मा प्रयुक्थाः मा नियुङ्क्ष्व । युजेर्लुङि तङि सिचि ॥ "झलो झलि" इति सिज्लोपः ॥ इति भरतोऽपि रामं धर्म्यं धर्मादनपेतं वाक्यम् ॥ "धर्मपथ्यर्थन्याय—" इत्यादिना यत्प्रत्ययः ॥ प्राह स्म ॥ "लट् स्मे" इति भूते लट् ॥

ऊर्जस्वलं हस्तितुरङ्गमेत-
दमूनि रत्नानि च राजभाञ्जि ।
राजन्यकं चैतदहं क्षितीन्द्र-
स्त्वयि स्थिते स्यामिति[1] शान्तमेतत् ॥ ५५ ॥

५५. ऊर्जस्वलमिति ॥ ऊर्क् बलं तद्वदूर्जस्वलम् ॥ "ज्योत्स्नातमिस्रा—" इत्यादिना निपातनात्साधुः ॥ हस्तितुरङ्गम् ॥ सेनाङ्गत्वादेकवद्भावः । एतत् राजभाञ्जि राजार्हाणि रत्नानि चामूनि । राजन्यानां समूहो राजन्यकं चैतदिति पुरोवर्तिनिर्देशः ॥ "गोत्रोक्ष—" इत्यादिना वुञ् । त्वयि स्थिते अहं क्षितीन्द्रः स्यामिति एतत्पापं शान्तं निरस्तमस्तु । तदेतदुच्चारणमपि नार्हतीति भावः ॥

इति निगदितवन्तं राघवस्तं जगाद
व्रज भरत गृहीत्वा[2] पादुके त्वं मदीये ।
च्युतनिखिलविशङ्कः[3] पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन ॥ ५६ ॥

---

१ स्यादिति T2. E3.
२ मदीये पादुके त्वं गृहीत्वा T2, T3, T4,
३ सकलविशङ्कः T2, T4.

५६. इतीति ॥ राघवो रामः इति निगदितवन्तमुक्तवन्तं भरतं जगाद । किमिति । हे भरत त्वं मदीये पादुके गृहीत्वा व्रज गच्छ । च्युतनिखिलविशङ्को निरस्तसमस्तातङ्कः तथा जनौघैः पूज्यमानः सन् अस्मन्मतेनास्मदनुमत्यैव सकलभुवनराज्यं सर्वलोकाधिपत्यं कारय पादुकाभ्यां प्रयोज्याभ्यामित्यर्थः ॥

इति भट्टिकाव्ये प्रकीर्णकाण्डे रामप्रवासो[1] नाम
तृतीयः सर्गः ।

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने तृतीयः सर्गः ॥

---

१ वनगमनो C.

॥ श्रीः ॥

अथ चतुर्थः सर्गः ।

निवृत्ते भरते धीमानत्रे रामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥ १ ॥

१. निवृत्त इति ॥ धीमान् पुनः पौराः मा गमन्निति बुद्धिमान् रामः भरते निवृत्ते सति अत्रेरत्रिमहर्षेस्तपोवनं प्रपेदे प्राप्तः । अत्रात्रिवने पूजितः शीताङ्गरागादिना सत्कृतः सन् दण्डकारण्यं दण्डकाख्यवनमीयिवान् प्राप्तः ॥ "उपेयिवान्—" इति क्वस्वन्तनिपातने उपोपसर्गाभ्यासस्यातन्त्रत्वादन्योपसृष्टोऽनुपसृष्टो वा साधुरेव ॥

अटाट्यमानोऽरण्यानीं ससीतः[1] सहलक्ष्मणः ।
बलाद्[2]बुभुक्षुणोत्क्षिप्य जह्रे भीमेन रक्षसा ॥ २ ॥

२. अटाट्यमान इति ॥ सहसीतः सलक्ष्मणः ॥ "तेन सह—" इति बहुव्रीहिः । "वोपसर्जनस्य" इति सहशब्दस्य सभावविकल्पादुभयत्रापि प्रयोगः ॥ अरण्यानीं महारण्यम् । 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् । देशश्चाकर्मकाणां च कर्मसंज्ञा भवेदिह' ॥ इति वचनाद्देशस्याप्यरण्यान्याः कर्मत्वम् । "इन्द्रवरुण—" इत्यादिना "हिमारण्ययोर्महत्त्वे" इति ङीपानुगागमश्च ॥ अटाट्यमानो भृशमटन् । यङ्विधाने "सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामनेकाजहलाद्यर्थमुपसंख्यानम्" इत्यटतेर्यङन्ताल्लटः शानजादेशः ॥ "दीर्घोऽकितः" इत्यभ्यासदीर्घः ॥ रामो बुभुक्षुणा भोक्तुमिच्छुना क्षुधितेनेत्यर्थः । भुजेः सन्नन्तादुप्रत्ययः । बिभ्यत्यस्मादिति भीमेन भयंकरेण रक्षसा विराधाख्येन बलादुत्क्षिप्य ऊर्ध्वं क्षिप्त्वा जह्रे हृतः । यद्यपि सीता हृता न रामः 'स जहार तयोर्मध्ये मैथिलीं लोकशोषणे' इति दर्शनात् । तथापि तद्धरणस्यात्महरणप्रायत्वात्तथाव्यपदेशः ॥

---

१ सहसीतः सलक्ष्मणः T2, T3, T4, T., G., Com.

२ वना° C.

अवाक्शिरसमुत्पादं कृतान्तेनापि दुर्दमम्[1]।
भङ्क्त्वा भुजौ[2] विराधाख्यं[3] तं[4] तौ भुवि निचख्नतुः ॥ ३ ॥

३. अवागिति ॥ ततस्तौ रामलक्ष्मणौ अवाक्छिरसमधोमस्तकमुत्पादमूर्ध्वचरणं कृतान्तेनान्तकेनापि दुर्दमं दुर्हरणं विराधाख्यं तं राक्षसं भुजौ भङ्क्त्वा ॥ "जान्तनशां विभाषा" इति नलोपाभावपक्षे रूपम्। वसुधायां निचख्नतुः निखातवन्तौ । खनतेर्लिट् । तसोऽतुसि "गमहन—" इत्यादिना उपधालोपः ॥

आंहिषातां[5] रघुव्याघ्रौ शरभङ्गाश्रमं ततः[6]।
अध्यासितं श्रिया ब्राह्म्या शरण्यं शरणैषिणाम् ॥ ४ ॥

४. आंहिषातामिति ॥ ततो विराधवधानन्तरं रघू लक्षणया तौ राघवौ व्याघ्राविव रघुव्याघ्रौ रघुश्रेष्ठौ । उपमितसमासः । रघुपदस्य जनपदावाचित्वेन अतद्राजकत्वात् बहुष्वपि तावत्तद्धितलुक् चिन्त्यः द्वयोः का वार्त्ता । तेन लाक्षणिको रघुशब्द इति सुष्ठूक्तं रघू व्याघ्राविवेति । ब्राह्म्या ब्रह्मसंबन्धिन्या वैदिक्या श्रिया। सम्बन्धादणि ङीप्॥ "ब्राह्मोऽजातौ" इति व्यतिरिक्तार्थे निपातनाट्टिलोपः ॥ अध्यासितमधिष्ठितं शरणैषिणां शरणार्थिनाम् । इषेस्ताच्छील्ये णिनिः । शरणे रक्षणे साधुं शरण्यम्। 'शरणं रक्षणे गृहे' इति विश्वः। "तत्र साधुः" इति यत्प्रत्ययः ॥ शरभङ्गनाम्नो मुनेराश्रममांहिषातां गतवन्तौ। अहि गतौ इति धातोर्लुङि तङि सिचीट्। आड्वृद्धिः ॥

पुरो[7] रामस्य जुहवाञ्चकार ज्वलने वपुः ।
शरभङ्गः प्रदिश्यारात्[8] सुतीक्ष्णमुनिकेतनम्[9] ॥ ५ ॥

---

१ दुर्गमम् c., E2, E3.
२ भुजैर्विराधाख्यं विभुवि तंनिचख्नतुः E1.
३ विराधस्य D.
४ ततो T2, T3, T4.
५ आहिषातां E1.
६ प्रति E3.
७ पुरा T3.
८ प्रदर्श्यारात् D., प्रविश्याशु T2, T4.
९ सुतीक्ष्णस्य निकेतनम् T3.

५. पुर इति ॥ अथ शरभङ्गः आरात्समीपे सुतीक्ष्णस्य मुनेर्निकेतनमाश्रमं प्रदिश्य रामस्य निवासत्वेनादिश्य । स्वाश्रमस्यानन्तरमेव स्वप्रयाणे शून्यभावित्वादिति भावः । रामस्य पुरः वपुः स्वशरीरं ज्वलने अग्नौ जुहवांचकार आजुहाव ॥ "भीह्रीभृहुवां श्लुवच्च" इति विकल्पादाम्प्रत्ययः ॥ श्लुवत्कार्यं द्विर्भावश्च ॥

यूयं समेष्यथेत्यस्मिन्नासिष्महि वयं वने ।
दृष्टाः स्थ स्वस्ति वो यामः स्वपुण्यविजितां गतिम् ॥ ६ ॥

६. यूयमिति ॥ हे राघव यूयं तेषां त्रित्वाद्बहुवचनम् । समेष्यथ समागमिष्यथ । समाङ्पूर्वादिणो लृट् ॥ "एत्येधत्यूठ्सु" इति वृद्धिः ॥ इति हेतोर्वयम् ॥ "अस्मदो द्वयोश्च" इति चकारादेकत्वे बहुवचनम् ॥ अस्मिन्वने आसिष्महि आस्थाम । आसेर्लुङि महिङि सिचीट् । स्थितिफलं च सिद्धमित्याह । यूयं दृष्टाः स्थ भवथ । साक्षाद्विष्णुसाक्षात्कारात्कृतार्थोऽस्मीति । अस्तेर्लटि थे ॥ "श्नसोरल्लोपः" ॥ वो युष्मभ्यम् ॥ "बहुवचनस्य वस्नसौ" ॥ स्वस्ति कल्याणम् ॥ "नमःस्वस्ति—" इत्यादिना चतुर्थी ॥ स्वपुण्यविजितां स्वधर्मार्जितां गतिं लोकं यामो यास्यामः । वर्त्तमानसामीप्ये लट् । इति चोक्त्वाजुहावेति योज्यम् ॥

तस्मिन्कृशानुसाद्भूते सुतीक्ष्णमुनिसंनिधौ ।
उवास पर्णशालायां भ्रमन्ननिशमाश्रमान् ॥ ७ ॥

७. तस्मिन्निति ॥ तस्मिन् शरभङ्गे कृशानुसाद्भूते भस्मीभूते सतीत्यर्थः ॥ "विभाषा साति कार्त्स्न्ये" इति सातिप्रत्ययः ॥ अनिशमाश्रमान् भ्रमन् संरक्षणार्थमाश्रमेषु पर्यटन् । 'देशश्चाकर्मकाणाम्' इति वचनादाश्रमाणां कर्मत्वम् । सुतीक्ष्णमुनिसंनिधौ पर्णशालायामुवास उषितवान् । वसेर्लिटि "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य संप्रसारणम् ॥

---

१ समेष्यथे° T3, E1.
२ सुपुण्य° D. सपुण्य° E2.

T2, and T4, omit 6th verse and the 1st half of the 7th.

वनेषु वासतेयेषु निवसन्[1] पर्णसंस्तरः ।
शय्योत्थायं मृगान्विध्यन्नातिथेयो विचक्रमे ॥ ८ ॥

८. वनेष्विति ॥ वसतौ साधुषु वासतेयेषु वसतियोग्येषु वनेषु ॥ "पथ्यतिथिवसतिस्वपतेर्ढञ्" ॥ संस्तीर्यते इति संस्तरः तल्पम् ॥ "ऋदोरप्" ॥ तस्मिन् पर्णानां संस्तरे पर्णतल्पे निवसन् निषीदन् । शेरतेऽस्यामिति शय्या ॥ "संज्ञायां समज—" इत्यादिना क्यप् ॥ तस्याः सत्वरमुत्थाय शय्योत्थायम् ॥ "अपादाने परीप्सायाम्" इति णमुल् । युक् । परीप्सा त्वरा । मृगान्विध्यन् प्रहरन् । व्यधेः शतरि "ग्रहिज्या—" इत्यादिना संप्रसारणम् । अतिथिषु साधुरातिथेयः सन् । न तु कुक्षिंभरिः सन्नित्यर्थः । वासतेयवत् ढञ् । विचक्रमे विचचार ॥ "वेः पादविहरणे" इत्यात्मनेपदम् ॥

ऋग्यजुषमधीयानान् सामन्यांश्च[2] समर्चयन् ।
बुभुजे देवसात्कृत्वा शूल्यमुख्यं च होमवान् ॥ ९ ॥

९. ऋग्यजुषमिति ॥ सः रामः शूले काष्ठाग्रे उखायां स्थाल्यां संस्कृतं मांसं शूल्यमुख्यं च ॥ "शूलोखाद्यत्" ॥ देवसात् देवाधीनं देयं देवसात्कृत्वा ॥ "देये त्रा च" इति चकारात्सातिप्रत्ययः ॥ होमवान् नित्यहोमी सन् । ऋचश्च यजूंषि च ऋग्यजुषमधीयानान् सामन्यांश्च सामाध्येतॄंश्चेत्यर्थः ॥ "तत्र साधुः" इति यत्प्रत्ययः ॥ समर्चयन् मांसेन सम्मानं कुर्वन् बुभुजे भुक्तवान् ॥ "भुजोऽनवने" इति तङ् ॥ देवब्राह्मणहुतशिष्टं भुङ्क्ते नात्मार्थम् । 'न पचेदन्नमात्मनः' इति निषेधादिति भावः ॥

वसानस्तन्त्रकनिभे सर्वाङ्गीणे[3] तरुत्वचौ ।
काण्डीरः खाड्गिकः[4] शार्ङ्गी रक्षन् विप्रांस्तनुत्रवान् ॥ १० ॥

---

१ शयानः पर्णसंस्तरे T2, T4. निवसन् पर्णसंस्तरे E1, T., G., Com.
२ सामगांश्च E3.
३ सर्वाङ्गीने N., C., T., c., D., B., E3.
४ खाड्गिकः T3, T, G, Com.

१०. अथ युग्मेनाह वसान इति ॥ तन्त्रात् तन्तुवायपरिच्छेदादचिरापहृतस्तन्त्रपटस्तन्त्रकं प्रत्यग्रपटः ॥ "तन्त्रादचिरापहृते" इति कन्प्रत्ययः। 'तन्त्रः स्वराष्ट्रचिन्तायां तन्तुवायपरिच्छदे' इति यादवः। तन्निभे तत्तुल्ये। सर्वाङ्गं व्याप्नुत इति सर्वाङ्गीणे ॥ "तत्सर्वादेः—" इत्यादिना खप्रत्ययः। तरुत्वचौ वल्कले वसानः आच्छादयन्। वस आच्छादने शानच्। काण्डीरः बाणवान्। 'काण्डोऽस्त्री दण्डबाण—' इत्यमरः ॥ "काण्डाण्डादीरन्नीरचौ" इति मत्वर्थीय ईरन्प्रत्ययः ॥ खड्गिकः खड्गी। मत्वर्थीयःष्ठन्। खाड्गिक इति पाठे "प्रहरणम्" इति ठक्। शार्ङ्गी धन्वी। मत्वर्थीय इनिः। तनुं त्रायत इति तनुत्रम् ॥ "आतोऽनुपसर्गे कः" ॥ तद्वान् कवची विप्रान् रक्षन् ॥

हित्वाशितङ्गवीनानि फलैर्येष्वाशितम्भवम्।
तेष्वसौ दन्दशूकारिर्वनेष्वानभ्र निर्भयः ॥ ११ ॥

११. हित्वेति ॥ दन्दशूकानां हिंस्राणामरिः ॥ "यजजप—" इत्यादिना ऊकञ् प्रत्ययः ॥ असौ रामः। आशिताः आशितवत्यो गावः एष्विति आशितङ्गवीनानि गोभक्षितकुशपलालादिकानि इत्यर्थः ॥ "अषडक्षाशितङ्ग्वलंकर्म—" इत्यादिना स्वार्थे खप्रत्ययः. ॥ एतस्मादेव निपातनात्पूर्वपदस्य मुमागमः। तानि हित्वा। येषु वनेषु फलैराशितानामाशितवतां च भवनमाशितम्भवं तृप्ताशित्वं संभवतीति शेषः ॥ "आशिते भुवः करणभावयोः" इति भावे खच् ॥ मुमागमः। तेषु वनेषु निर्भयः सन् आनभ्र बभ्रामेत्यर्थः। अभ्र गतौ इति धातोर्लिट् ॥ "अजादेः—" इति द्वित्वे "अत आदेः" इत्यभ्यासदीर्घः ॥ "तस्मान्नुड् द्विहलः" इति नुडागमः ॥ रिक्तानि वनानि हित्वा पूर्णेषु विजहारेत्यर्थः ॥

आतीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन्।
पर्षद्वलान् महाब्रह्मैराट नैकटिकाश्रमान् ॥ १२ ॥

१ दीप्त° E1, E2.
२ सुन्वतः E2.
३ परिषद्वलान् E1, E2, noticed also by c, C., T1.
४ ब्राह्मै° T2, T4.

१२. व्रातीनेति ॥ नानाजातीयाः अनियतवृत्तयः उत्सेधजीविनो व्राताः तत्कर्म व्रातं तेन जीवन्तीति व्रातीनाः ॥ "व्रातेन जीवति" इति खञ्प्रत्ययः ॥ तेषां स्वशरीरायासजीविनां वनवर्त्तिनां ये व्यालाः हिंस्राः तेषु दीप्रास्त्रः तीक्ष्णास्त्रः सन् । सुन्वन्ति सोममिति सुत्वानः सोमसुतः सोमयाजिनः ॥ "सुयजोर्ङ्वनिप्" ॥ तुगागमः । तान् सुत्वनः ॥ "न संयोगाद्वमन्तात्" इत्यल्लोपनिषेधः ॥ तान् सुत्वनः परिपूजयन् सत्कुर्वन् । महान्तो ब्रह्माणो महाब्रह्माः महाब्राह्मणाः ब्राह्मणोत्तमाः ॥ "कुमहद्भ्यामन्यतरस्याम्" इति समासान्तष्टच् ॥ तैर्महाब्रह्मैः । परितः सीदन्तीति परिषत् सभा । क्विप् । 'पर्षत्त्रैविध्यमेव' इत्यादिप्रयोगः इकारपरिहारेण पर्षदित्यप्युच्यत इति गमयितव्यः। तथा च पर्षद्वलान् पर्षद्वतः उत्तमब्राह्मणसभावत इत्यर्थः ॥ "रजःकृष्यासुतिपरिषदो वलच्" इति मत्वर्थीयो वलच्प्रत्ययः । निकटे वर्त्तिनो नैकटिकाः तेषां तान् वा आश्रमान् आट तेषु विचचारेत्यर्थः । 'देशश्चाकर्मकाणाम्' इति वचनात् आश्रमाणां कर्मत्वम् । अटेर्लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥

परेद्यव्यद्य पूर्वेद्युरन्येद्युश्चापि चिन्तयन् ।
वृद्धिक्षयौ मुनीन्द्राणां प्रियम्भावुकतामगात् ॥ १३ ॥

१३. परेद्यवीति ॥ परस्मिन्नहनि परेद्यवि । अस्मिन्नहन्यद्य । पूर्वस्मिन्नहनि पूर्वेद्युः । अन्यस्मिन्नहनि अन्येद्युश्चापि सर्वदा इत्यर्थः ॥ "सद्यः परुत्—" इत्यादिना निपातनात्सर्वत्र साधुत्वम् ॥ "तद्धितश्चासर्वविभक्तिः" इत्यव्ययत्वम् । मुनीन्द्राणां वृद्धिक्षयौ हानिवृद्धी चिन्तयन् ध्यायन् प्रियम्भावुकतां तेषामेव प्रियीभूतत्वम् ॥ "आढ्यसुभग—" इत्याद्यनुवृत्तौ "कर्त्तरि भुवः खिष्णुच्खुकञौ" इत्यभूततद्भावे कर्त्तरि खुकञ् प्रत्ययः । मुमागमः । अगात् प्राप्तः । सर्वदा तद्योगक्षेमानुसन्धानात् तेषामहरहरतिप्रियोऽभूदित्यर्थः ॥

---

१ परेद्युरद्य E1.

आतिष्ठद्गु जपन्सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम्[1] ॥ १४ ॥

१४. आतिष्ठद्विति ॥ रामः पतत्रिभ्यः कुक्कुटादिपक्षिभ्यः प्रातस्तराम-तिप्रभाते ततोऽप्यत्यन्तपूर्वकाले प्रबुद्धः सन् ॥ "पञ्चमी विभक्ते" इति पञ्चमी ॥ प्रातस्तरामित्यव्ययादाम्प्रत्ययः । आयत्यो दोहाय गोचरा-दागच्छन्त्यो गावो यस्मिन्काले स काल आयतीगवम् । तिष्ठद्गुप्रभृति-त्वादव्ययीभावः । तस्मिन्काले ॥ "तृतीयासप्तम्योर्बहुलम्" इति सप्तम्या अम्भावः । प्रक्रान्तां प्रवृत्ताम् । सम्यक् ध्यायन्ते अस्यामिति सन्ध्या ॥ "आतश्चोपसर्गे" इति अङ्प्रत्ययः ॥ रात्रिन्दिवं सन्धौ भवा वा सन्ध्या । भवार्थे यत्प्रत्ययः । तां तस्यामित्यर्थः । अत्यन्तसंयोगे द्वितीया । तिष्ठन्ति गावो यस्मिन्दोहायेति तिष्ठद्गु ॥ ' तिष्ठद्गुप्रभृतीनि च" इत्यव्ययीभावनिपातनात्साधुः । तत्पर्यन्तमातिष्ठद्गु ॥ "आङ् मर्या-दाभिविध्योः" इति पुनरव्ययीभावः ॥ जपन् गायत्रीजपं कुर्वन् रविं प्रणमन् । अपररात्रे आयतीगवकालमारभ्य तिष्ठद्गुकालपर्यन्तं तिष्ठन्नेव सावित्रीं जपन् सूर्योदये तं प्रणतः । 'जपन्नासीत सावित्रीं प्रत्यगाता-र्कोदयात् । संध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात्' ॥ इति स्मरणादिति भावः ॥

ददृशे पर्णशालायां राक्षस्याभीकया[2]ऽथ सः ।
भार्योढं तमवज्ञाय तस्थे सौमित्रयेऽसकौ[3] ॥ १५ ॥

१५. ददृशे इति ॥ अथ सूर्योपस्थानानन्तरं स रामः पर्णशालायामभी-कया कामुकया ॥ "अनुकाभिकाभीकः कमिता" इति निपातः ॥ राक्षस्या रावणावरजया कामरूपिण्या शूर्पणखया ददृशे दृष्टः । कर्मणि लिट् । असका कुत्सिता असौ राक्षसी ॥ "अव्ययसर्वनाम्नामकच् प्राक्

---

१ प्राणमद्रविम् D. B. adds युग्मम् after the 14th verse.

२ °भिकया C.

३ °सका T., G., Com.

टे:" ॥ भार्योढमूढभार्यम् ॥ "वाहिताग्न्यादिषु" इति निष्ठायाः परनिपातः ॥ तं राममवज्ञाय सापत्न्यादवधीर्य सौमित्रये लक्ष्मणाय ॥ "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इति संप्रदानत्वाच्चतुर्थी ॥ तस्थे स्वाभिप्रायं प्रकाशयन्ती स्थिता । तिष्ठतेः कर्मकर्त्तरि लिट् ॥ "प्रकाशनस्थेयाख्ययोश्च" इति प्रकाशने तङ् ।

दधाना वलिभं मध्यं कर्णजाहविलोचना ।
वाक्त्वचेनातिसर्वेण चन्द्रलेखेव पक्षतौ ॥ १६ ॥

१६. अथास्या रूपं वर्णयति श्लोकत्रयेण दधानेत्यादिना ॥ वलिभं त्रिवलीमत् ॥ "तुन्दिवलिवटेर्भः" इति मत्वर्थीयो भप्रत्ययः । मध्यमवलग्नं दधाना । कर्णयोर्मूले कर्णजाहे ॥ "तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ" इति जाहच्प्रत्ययः ॥ तयोर्विलोचने यस्याः सा कर्णजाहविलोचना कर्णान्तलोचनेत्यर्थः ॥ सप्तमीपूर्वपदो बहुव्रीहिः । अतिक्रान्तेन सर्वमतिसर्वेण सर्वोत्कृष्टेनेत्यर्थः ॥ "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः ॥ "एकविभक्ति चापूर्वनिपाते" इति प्रतिषेधात् उपसर्जनस्यापि सर्वशब्दस्य न पूर्वनिपातः । वाक् च त्वक् च वाक्त्वचम् । प्राण्यङ्गत्वादेकवद्भावः ॥ "द्वन्द्वाच्चुदषहान्तात्समाहारे" इति टच्प्रत्ययः । तेनोपलक्षिता । इत्थंभूतलक्षणे तृतीया । मृदुभाषिणी मृद्वङ्गी चेत्यर्थः । पक्षतौ पक्षमूले प्रतिपदि चन्द्रलेखेव स्थितेत्युपमालंकारः ॥ "पक्षात्तिः" इति तिप्रत्ययः । 'पक्षतिर्गरुतो मूले द्वयोः प्रतिपदोरपि' इति यादवः ॥

सुपाद् द्विरदनासोरूर्मृदुपाणितलाङ्गुलिः ।
प्रथिमानं दधानेन जघनेन घनेन सा ॥ १७ ॥

१७. सुपादिति ॥ शोभनौ पादौ यस्याः सा सुपात् ॥ "संख्यासुपूर्वस्य" इति समासान्तलोपः ॥ "पादोऽन्यतरस्याम्" इति विकल्पादनीकारः । द्विरदनासा करिकर इव उरू यस्याः सा द्विरदनासोरूः

तद्वद्वृत्तानुपूर्वोरुरित्यर्थः ॥ "ऊरूत्तरपदादौपम्ये" इत्यूङ् प्रत्ययः । मृदुनी पाणितले अङ्गुलयश्च यस्याः सा तथोक्ता । नपुंसकैकशेषपूर्वपदो बहुव्रीहिः । तलशब्दस्याप्राण्यङ्गवाचित्वात् न द्वन्द्वैकवद्भावः । अङ्गुलिशब्दस्याल्पाच्तरत्वेऽपि पूर्वनिपातव्यभिचारः । "समुद्राभ्राद्घः" इति सौत्रव्यभिचारलिङ्गात् । प्रथिमानं दधानेन पृथुलेन घनेन निबिडेन जघनेन उपलक्षिता सा राक्षसी तस्थे इति पूर्वेण सम्बन्धः ॥

उन्नसं दधती वक्त्रं शुद्धदल्लोलकुण्डलम्[1] ।
कुर्वाणा पश्यतः शंयून् स्रग्विणी सुहसानना ॥ १८ ॥

१८. उन्नसमिति ॥ उन्नसमुन्नतनासिकम् ॥ "उपसर्गाच्च" इति नसादेशः ॥ शुद्धाः शुभ्राः दन्ताः यस्य तत् शुद्धदत् ॥ "अग्रान्तशुद्ध—" इत्यादिना दत्रादेशः ॥ लोलकुण्डलं वक्त्रं दधती पश्यतः प्रेक्षमाणान् जनान् । शं सुखमेषामस्तीति शंयून् सानन्दान् कुर्वाणा ॥ "कंशंभ्यां वभयुस्तितुतयसः" इति युस्प्रत्ययः ॥ स्रग्विणी माल्यवती ॥ "अस्मायामेधास्रजो विनिः" ॥ सुहसं सुस्मितमाननं यस्याः सा ॥ "स्वनहसोर्वा" इति विकल्पादप्प्रत्ययः ॥

प्राप्य चञ्चूर्यमाणासौ[2] पतीयन्ती रघूत्तमम् ।
अनुका प्रार्थयाञ्चक्रे प्रियां[3]कर्तुं प्रियंवदा ॥ १९ ॥

१९. प्राप्येति ॥ अनुका कामुकी ॥ "अनुकाभिक—" इत्यादिना निपातः ॥ अत एव पतीयन्ती पतिमात्मन इच्छन्ती ॥ "सुप आत्मनः क्यच्" ॥ "अकृत्सार्वधातुकयोर्दीर्घः" ॥ शतरि ङीप् । चञ्चूर्यमाणा इतस्ततो गर्हितं चरन्ती ॥ "लुपसद—" इत्यादिना भावगर्हायां चरेर्यङि "चरफलोश्च" इत्यभ्यासस्य नुक् ॥ "उत्परस्यातः" इत्युत्वम् ॥ "र्वोरुपधाया दीर्घ इकः" ॥ "हलि च" इति दीर्घः । रघूत्तमं लक्ष्मणं प्राप्य प्रियं वदतीति प्रियंवदा सती ॥ प्रियवशे वदः खचि मुमागमः ।

---

१ शुक्ल T2.
२ °सा T2, T4.
३ प्रियां कर्तुं E3.

प्रियाकर्त्तुमनुलोमयितुमित्यर्थः ॥ "सुखप्रियादानुलोम्ये" इति डाच् ॥ प्रार्थयाञ्चक्रे प्रार्थितवती ॥ "कास्प्रत्ययाद्—" इत्याम्प्रत्ययः ॥

सौमित्रे मामुपायंस्थाः कम्रामिच्छुर्वशंवदाम्[1] ।
स्वभोगीनां[2] सहचरीमशङ्कः पुरुषायुषम् ॥ २० ॥

२०. प्रार्थनाप्रकारमेवाह सौमित्रे इति ॥ सौमित्रे कम्रां कामयित्रीम् । 'कम्रः कामयिताभीकः' इत्यमरः ॥ "नमिकम्पि—" इत्यादिना रप्रत्ययः ॥ वशंवदां वशवर्त्तिनीम् ॥ "प्रियवश—" इत्यादिना वदेः खच् ॥ मुमागमः । स्वभोगाय हितां स्वभोगीनाम् ॥ "आत्मन्विश्वजनभोग—" इत्यादिना खप्रत्ययः ॥ चरतीति चरी । 'पचादिषु चरट्' इति टित्करणात् ङीप् । तेन सहशब्दस्य "सुप्सुपा" इति समासः ॥ केचित्तु सहचरतीति सहचरी ॥ "भिक्षासेनादायेषु च" इति चकाराट्टप्रत्यय इत्याहुः । तां सहचरीं सर्वानुगामिनीमित्यर्थः । ईदृशीं मामिच्छुरभिलाषुकः सन् ॥ "विन्दुरिच्छुः" इति निपातः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ पुरुषस्यायुः पुरुषायुषं यावज्जीवम् ॥ "अचतुर—" इति निपातः ॥ अत्यन्तसंयोगे द्वितीया । उपायंस्थाः उपयच्छस्वेत्यर्थः ॥ "उपाद्यमः स्वकरणे" इत्यात्मनेपदम् ॥ स्वकरणं विवाहः ॥ "आशंसायां भूतवच्च" इति भूतवत्प्रत्ययो लुङ् ॥ "विभाषोपयमने" इति पक्षे कित्वाभावान्नानुनासिकलोपः ॥

तामुवाच स गौष्ठीने वने स्त्रीपुंसभीषणे ।
असूर्यंपश्यरूपा त्वं किमभीरुररार्यसे ॥ २१ ॥

२१. तामिति ॥ लक्ष्मणस्तां राक्षसीमुवाच किमित्यपेक्षिते सप्तभिराह । अयि मुग्धे । न सूर्यं पश्यतीत्यसूर्यंपश्या सूर्यकिरणासंस्पृष्टेत्यर्थः ॥ "असूर्यललाटयोर्दृशितपोः" इत्यसूर्यशब्दोपपदात् दृशेः खश्प्रत्यये मुमागमः ॥ "पाघ्रा—" इत्यादिना दृशेः पश्यादेशः ॥ असूर्यंपश्येत्यस-

[1] °स्थास्त्वं मामिच्छु° T4.

[2] स्वङ्गोगीनां T3, D., N., सुभोगीनां B., C., E3.

मर्थसमासोऽयं दृशिना नञः संबन्धात्। अन्यथा अविवक्षितार्थप्रसंगात्। तथापि गमकत्वादिष्यते। एतद्रूपा कोमलाङ्गी त्वं भूतपूर्वे गोष्ठे गौष्ठीने इदानीं व्यालाक्रान्ते। 'गौष्ठीनं भूतपूर्वकम्' इत्यमरः॥ "गोष्ठात्खञ् भूतपूर्वे" इति खञ्प्रत्ययः॥ स्त्री च पुमांश्च स्त्रीपुंसौ मिथुनम्॥ "अचतुर—" इत्यादिना निपातः॥ तयोर्भीषणम्। स्तनादिवज्जातौ द्विवचनम्। तद्बहुत्वस्येहाविवक्षितत्वात्। द्वन्द्वान्तेन समासैकशेषेण स्त्रीपुंसानां भीषणमिति किमु वक्तव्यमिति भावः। नन्द्यादिल्युप्रत्ययान्तः। कर्त्तरि ल्युडिति व्याख्याने 'भीषणां तामयोजयत्' इति टाबन्तप्रयोगविरोधः। तस्मिन्वने किं किमर्थमभीरुरभीता सती॥ "भियः क्रुक्लुकनौ" इति क्रुप्रत्ययः॥ अरार्यसे अटाट्यसे। ऋ गतौ॥ "सूचिसूत्रि—" इत्यादिना यङ्॥ "यङि च" इत्यर्त्तेर्गुणः॥ "न न्द्राः—" इति प्रतिषेधापवादेन सरेफस्यैव द्वितीयैकाचो द्विर्भावे हलादिशेषे "दीर्घोऽकितः" इत्यभ्यासदीर्घः॥

मानुषानभिलष्यन्ती रोचिष्णुर्दिव्यधर्मिणी।
त्वमप्सरायमाणेह स्वतन्त्रा कथमश्नासि॥ २२॥

२२. मानुषानिति॥ दिव्यानां देवतानां धर्माः रूपलावण्यादयः तद्वती तद्धर्मिणी। अत एवाप्सरा इवाचरन्तीत्यप्सरायमाणा अप्सरःकल्पा॥ "कर्त्तुः क्यङ् सलोपश्च" इति क्यङन्ताल्लटः शानजादेशः। 'ओजसोऽप्सरसोनित्यम्' इति नित्यं सलोपः। त्वमिहारण्ये स्वतन्त्रा एकाकिनी मानुषान् नीचानिति भावः अभिलष्यन्ती अभिलषन्ती॥ "वा भ्राश—" इत्यादिना श्यन्वा॥ कथमश्नासि अटसि॥

उग्रम्पश्याकुलेऽरण्ये शालीनत्वविवर्जिता।
कामुकप्रार्थनापट्वी पतिवत्नी कथं न वा॥ २३॥

२३. उग्रम्पश्येति॥ उग्रं पश्यन्तीत्युग्रंपश्याः हिंस्राः॥ "उग्रम्पश्येरम्मदपाणिन्धमाश्च" इति निपातः॥ तैराकुले सङ्कीर्णेऽरण्ये शालीन-

१ मनुष्या T4.

त्वविवर्जिता अधार्ष्ट्यरहिता धृष्टा सतीत्यर्थः॥ "शालीनकौपीने अधृष्टाकार्ययोः" इति अधार्ष्ट्ये शालाशब्दात्खञन्तो निपातः॥ कामुकः कामी॥ "लषपत—" इत्यादिना उकञ्प्रत्ययः॥ तस्य प्रार्थनासु अनुनयेषु पत्नी चतुरा त्वम्। पतिरस्या अस्तीति पतिवत्नी जीवत्पतिकेत्यर्थः॥ "अन्तर्वत्पतिवतोर्नुक्" इति गर्भभर्तृसंयोगे निपातनादर्थविशेषलाभः। मतोर्वत्वं निपात्यते। अत्र सूत्रे उगित्वादेव ङीप्सिद्धिः। 'अन्तर्वत्पतिवतोर्नुक् मतुब्वत्वे निपातनात्। गर्भिण्यां जीवत्पत्न्यां च वा च च्छन्दसि नुग्विधिः'॥ इति वचनात्। कथं न वा कथं न किमित्यर्थः। पतिवत्न्याः कथमयं कामचार इति भावः॥

राघवं पर्णशालायामिच्छानुरहसं पतिम्।
यः स्वामी मम कान्तावानौपकर्णिकलोचनः॥ २४॥

२४. राघवमिति॥ अथ सर्वथा पतिं वरयसि चेत् अनुरहसं रहसि॥ "अन्ववतप्ताद्रहसः" इत्यच् समासान्तः॥ पर्णशालायां राघवं रामं पतिमिच्छ वृणुष्वेत्यर्थः। अथ प्ररोचनार्थं सार्धश्लोकत्रयेण रामं स्तौति। यो रामो ममापि स्वामी ईशिता संभवति राजसम्बन्धेनेति भावः॥ "स्वामिन्नैश्वर्ये" इति निपातः॥ कान्तावान् रागीति भावः। सौन्दर्यादिगुणाढ्यश्चायमित्याह। उपकर्णमिति समीपार्थेऽव्ययीभावः। तत्र प्रायभवे औपकर्णिके॥ "उपजानूपकर्ण—" इति ठक्॥ उपकर्णादयस्त्रयः सामीप्ये। ते लोचने यस्य सः। कर्णान्तविश्रान्तलोचन इत्यर्थः॥

वपुश्चान्दनिकं यस्य[1] कार्णवेष्टनिकं[2] मुखम्।
संग्रामे सर्वकर्मीणौ पाणी[3] यस्यौपजानुकौ॥ २५॥

२५. वपुरिति॥ यस्य वपुश्चन्दनेन संपाद्यवश्यं संपन्नमुत्कृष्टं भवतीति चान्दनिकम्। मुखं कर्णवेष्टनाभ्यां कुण्डलाभ्यां संपादि कार्णवेष्टनिकम्॥

१ पश्य E1.
२ कार्णवेष्टकिकं N., D., E1, E2, E3.
३ बाहू E2.

उभयत्रापि "संपादिनि" इति ठञ् ॥ यस्य पाणी संग्रामे सर्वाणि कर्माणि धनुराकर्षणादीनि व्याप्नुतः इति सर्वकर्मीणौ सर्वकर्मक्षमावित्यर्थः ॥ "तत्सर्वादेः—" इत्यादिना खप्रत्ययः ॥ उपजानु जानुसमीपे भवौ औपजानुकौ आजानुलम्बिनावित्यर्थः। एतेन शौर्यभाग्यसंपत्तिरुक्ता ॥ "उपजानू—" इत्यादिनैव ठक् ॥ "इसुसुक्तान्तात्कः" ॥

बद्धो दुर्बलरक्षार्थमसिर्येनौपनीविकः[1]।
यश्चापमाश्मनप्रख्यं सेषुं धत्तेऽन्यदुर्वहम् ॥ २६ ॥

२६. बद्ध इति ॥ येन रामेण असिः दुर्बलानां रक्षार्थं दुर्बलघातुकशिक्षार्थं न तु दुर्बलघातार्थमित्यर्थः। उपनीवि नीवीसमीपे भवः औपनीविकः। स एव ठक्। बद्धः कटिनिबद्ध इत्यर्थः। यो रामः अश्मैव आश्मनम्। स्वार्थेऽण्प्रत्ययः। "अश्मनो विकारे उपसंख्यानम्" इति विकारे एव टिलोपविधानान्न टिलोपः। प्रख्याति प्रकाशयति इति प्रख्यं सदृशम्। 'प्रख्यप्रतिनिधी अपि' इति सदृशार्थेषु दण्डी ॥ "आतश्चोपसर्गे" इत्यङ् प्रत्ययः ॥ आश्मनप्रख्यमश्मवद् दृढमित्यर्थः। सेषुं सबाणमन्यैर्दुर्वहं चापं धत्ते। महाधानुष्क इत्यर्थः ॥

जेता यज्ञद्रुहां संख्ये धर्मसन्तानसूर्वने।
प्राप्य दारगवाणां[2] यं[3] मुनीनामभयं सदा ॥ २७ ॥

२७. जेतेति ॥ संख्ये युद्धे। यज्ञेभ्यो द्रुह्यन्तीति यज्ञद्रुहो राक्षसाः ॥ "सत्सूद्विष—" इत्यादिना क्विप्प्रत्ययः ॥ तेषाम्। कर्मणि षष्ठी। जेता। तृच्। अत एवात्र धर्मसन्तानं धर्मपरंपरां सूते इति तत्सूः निरन्तरधर्मकारीत्यर्थः। पूर्ववत्क्विप्। किं च यं रामं प्राप्य शरणमासाद्य मुनीनां वानप्रस्थानां तेषां धाराग्निपरिग्रहसंभवात्। शेषषष्ठीयम्। दाराश्च गावो होमधेनवश्च दारगवम् ॥ "अचतुर—" इत्यादिना निपातः। दारगवाणामिति कर्मणि षष्ठी ॥ "कुमति च" इति णत्वम् ॥ मुनिबहुत्वे

---

१ °र्यस्यौप° T2, T3, T4. B., D., E1, E2, E3.
२ दारगवादीनां C. दारगवानां यो T4, दारगवानां यं N., C., T1, T2, T3,
३ तं T3.

तद्धत्वात् ॥ "सरूप—" इत्येकशेषः ॥ सदा अभयं भयवर्जनमत्र-सनमिति प्राप्त्यभययोः समानकर्तृकता ॥

ततो वावृत्यमानासौ रामशालां न्यविक्षत ।
मामुपायंस्त रामेति वदन्ती सादरं वचः ॥ २८ ॥

२८. तत इति ॥ ततो लक्ष्मणवाक्यानन्तरमसौ राक्षसी वावृत्यमाना रामं वृण्वाना वरिष्यन्ती सतीत्यर्थः । वर्त्तमानसामीप्ये वर्त्तमानवत्प्रत्ययः । वावृतु वरणे इति धातोर्दैवादिकात्कर्त्तरि लटः शानच् । हे राम मामुपायंस्त परिणयतु भवान् । शेषविवक्षायां प्रथमपुरुषः ॥ "उपाद्यमःस्वकरणे" इत्यात्मनेपदम् ॥ इति सादरं वचः वदन्ती रामस्य शालां न्यविक्षत ॥ "शल इगुपधादनिटः क्सः" ॥

अस्त्रीकोऽसावहं स्त्रीमान् सं पुष्यातितरां तव ।
पतिरित्यब्रवीद्रामस्तमेव व्रज मा मुचः ॥ २९ ॥

२९. अस्त्रीक इति ॥ असौ लक्ष्मणः अस्त्रीकः अविद्यमानभार्यः ॥ "नद्यृतश्च" इति कप् ॥ "न कपि" इति केऽणो ह्रस्वप्रतिषेधः । तस्यैव सन्निहितत्वात् । उपसर्जनह्रस्वस्य स्त्रीप्रत्ययान्तविषयस्य इह समासार्थोपपद एव कपि सति पश्चात्समासे कबन्तप्रातिपदिकस्य स्त्रीप्रत्ययान्तत्वाभावादेव निवृत्तेरिति । अहं स्त्रीमान् सभार्यः । प्रशंसायां मतुप् । स एव तव पतिर्भर्त्ता भविष्यतितरां सम्पत्स्यतेतरामित्यर्थः ॥ "किमेत्तिङ—" इत्यादिना तिङ आम्प्रत्ययः ॥ तं लक्ष्मणमेव व्रज गच्छ । मा मुचः न त्यज । मुचेर्लुङि लृदित्वादङ् ॥ "न माङ्योगे" ॥ इति तां रामोऽब्रवीत् ॥

लक्ष्मणं सा वृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथ्यमानमतिः पुनः ॥ ३० ॥

१ भविष्यतितरां T., G., Com.
२ °वदद्राम° E1.
३ तद्वदागमत् D.
४ कुसुमायुध B.
५ व्यथमान T., G., Com.
६ मतिस्ततः T3., T4., Com.

३०. लक्ष्मणमिति ॥ ततो रामवाक्यानन्तरं । वृषमात्मन इच्छतीति वृषस्यन्ती ॥ "सुप आत्मनः क्यच्" ॥ ततो लटः शतरि ङीप् ॥ "अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि" इत्यसुगागमः ॥ "अश्ववृषयोर्मैथुनेच्छायाम्" । अत एव मन्मथायुधसंपातेन मदनशरपातेन व्यथमानमतिः दूयमानमानसा राक्षसी । महानुक्षा महोक्षः महावृषभः । अचतुरादिना निपातः । तं गौरिव लक्ष्मणमगमत् आससाद ॥

तस्याः सासद्यमानाया लोलूयावान्रघूत्तमः ।
असिं[1] कौक्षेयमुद्यम्य चकारापनसं मुखम् ॥ ३१ ॥

३१. तस्या इति ॥ रघूत्तमो लक्ष्मणः सासद्यमानायाः गर्हितं सीदन्त्याः आसीदन्त्याः ॥ "लुपसदचर—" इत्यादिना सदेर्यङि लटः शानच् । राक्षस्याः मुखम् । लोलूया भृशलवनम् । लुनातेर्यङन्तादप्रत्यये टाप् । तद्वान् । तद्युक्तः सन्नित्यर्थः । अत एव कुक्षौ भवं कौक्षेयं लोहविशेषप्रभवम् ॥ "दृतिकुक्षिकलशिबस्त्यस्त्यहेर्ढञ्" ॥ असिं खड्गमुद्यम्य । अपगता नासिका यस्य तत् अपनसं नासिकारहितं चकार ॥ "उपसर्गाच्च" इति नासिकाशब्दस्य बहुव्रीहिसमासान्तो नसादेशः ॥

अहं शूर्पणखा[2] नाम्ना नूनं नाज्ञायिषि त्वया ।
दण्डोऽयं क्षेत्रियो येन मय्यपातीति[3] साब्रवीत् ॥ ३२ ॥

३२. अहमिति ॥ अहं नाम्ना शूर्पणखा ॥ "नखमुखात्संज्ञायाम्" इति ङीप्प्रतिषेधः ॥ "पूर्वपदात्संज्ञायामगः" इति णत्वम् ॥ किं तु त्वया नाज्ञायिषि शूर्पणखेति न ज्ञातास्मि । जानातेः कर्मणि लुङि तङि सिचि चिण्वदिटि युक् । स्वाज्ञाने लिङ्गमाह । येन अज्ञानेन अज्ञेन त्वया वा अयं नासाछेदरूपः क्षेत्रियः परक्षेत्रे चिकित्स्यः प्रतिसमाधेय इत्यर्थः ॥ "क्षेत्रियच् परक्षेत्रे चिकित्स्यः" इति परशब्दलोपो घप्रत्ययश्च निपात्यते । क्षेत्रियो नाम परत्र जन्मान्तरशरीरे चिकित्स्यो

---

१ कौक्षेयमसिमुद्यम्य D.
२ सूर्पणखा C., E3, T1, T4. सूर्पनखा D., E2.
३ मय्यापातीति T3, T4.

42200

मरणान्तिकव्याधिः । अयं दण्डोऽपि छिन्नस्याङ्गस्य पुनः प्ररोहासंभवात् तत्प्राय इति तथा व्यपदिष्टः । दण्डो दमो मयि अपाति पातितः । मत्स्वरूपज्ञाने तु नेदं घटत इति तात्पर्यम् । पततेर्ण्यन्तात्कर्मणि लुङि च्लेश्चिणादेशो णिलोपश्च । इति सा तमब्रवीत् । तदेतदुल्मुकेन शिरःकण्डूयनं तव भविष्यतीति भावः ॥

पर्यशाप्सीद् दिविष्ठासौ संदर्श्य[1] भयदं वपुः ।
अपिस्फवच्च[2] बन्धूनां निनङ्क्षुर्विक्रमं मुहुः ॥ ३३ ॥

३३. परीति ॥ अथ असौ राक्षसी दिवि आकाशे तिष्ठतीति दिविष्ठा सती ॥ "सुपि स्थः" इति कः ॥ "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ "अम्बाम्ब—" इत्यादिना षत्वे ष्टुत्वम् ॥ भयं ददातीति भयदं भयंकरम् ॥ "आतोऽनुपसर्गे कः" ॥ वपुर्निजशरीरं प्रदर्श्य पर्यशाप्सीत् तर्जनाभिराक्रुक्षत् । शप आक्रोशे । लुङि सिचि हलन्तलक्षणा वृद्धिः । किं च । निनङ्क्षुः नङ्क्षुमिच्छुः सतीत्यर्थः । विनाशकाले विपरीतबुद्धिः सतीत्यर्थः । नशेः सन्नन्तादुप्रत्ययः ॥ "मस्जिनशोर्झलि" इति नुम् ॥ मुहुरसकृत् बन्धूनां खरादीनां विक्रमं शौर्यमपिस्फवत् वाचा अवीवृधत् । बलवद्द्वेषोद्घाटनेन भीषितवतीत्यर्थः । स्फायी ओप्यायी वृद्धौ इति धातोर्णिचि ॥ "स्फायो वः" ॥ णौ चङ्युपधाह्रस्वः । द्विर्भावः । अभ्यासकार्यं चर्त्वम् ॥

खरदूषणयोर्भ्रात्रोः पर्यदेविष्ट सा पुरः ।
विजिग्राहयिषू रामं दण्डकारण्यवासिनो[3]ः ॥ ३४ ॥

३४. खरेति ॥ सा राक्षसी भ्रात्रोः खरदूषणयोः पुरः अग्रे । तयोस्तदा नेदिष्ठत्वादिति भावः । दण्डकारण्यवासिनं समानदेशस्थमित्यर्थः । रामं विजिग्राहयिषुः विरोधयितुमिच्छुः सती । ग्राहयतेः सन्नन्तादुप्रत्ययः ॥ "रो रि" इति रेफलोपः ॥ "ढ्लोपे पूर्वस्य

१ प्रदर्श्य T2, T3, T., G., Com.
२ अपुस्फुरच्च B., E2.
३ °वासिनम् T2, T4, T., G., Com.

दीर्घोऽणः" ॥ पर्यदेविष्ट विललाप। 'विलापः परिदेवनम्' इत्यमरः। देवृ देवने इति धातोर्देवादिकाल्लुङि तङि सिचीट्॥

कृते सौभागिनेयस्य भरतस्य विवासितौ।
पित्रा दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः॥ ३५॥

३५. अथ त्रिभिः। परिदेवनप्रकारमेवाह कृत इत्यादि॥ दुर्भगायाः निर्भाग्यायाः अपत्ये पुमांसौ दौर्भागिनेयौ। अन्यथा कथमिदं निर्वासनमिति भावः॥ "स्त्रीभ्यो ढक्" इति ढकि "कल्याणादीनामिनङ्" इति इनङादेशः॥ "हृद्भग—" इत्यादिना उभयपदवृद्धिः। यौ द्वौ। सुभगाया अपत्यं पुमान् सौभागिनेयः। अन्यथा कथमाकस्मिको राज्यलाभ इति भावः। तस्य भरतस्य कृते कार्य्याय। संपदादिक्विबन्ताच्चतुर्थी। तादर्थ्येऽव्ययमिति केचित्। पित्रा विवासितौ तयोः पापिष्ठयोश्चेष्टितं स्वनासाछेदनव्यापारं पश्यतम्। प्रार्थनायां लोट्॥

मम रावणनाथाया भगिन्या युवयोः पुनः।
अयं तापसकाद् ध्वंसः क्षमध्वं यदि वः क्षमम्॥ ३६॥

३६. ममेति॥ रावणनाथायाः रावणस्वामिकायाः पुनर्विशेषतः युवयोः भगिन्याः स्वसुर्मम तापसकात्कुत्सिततापसात्। कुत्सितार्थे कन् प्रत्ययः। अयं ध्वंसः वैरूप्यम्। क्षमध्वं सहध्वमुपेक्षध्वमित्यर्थः। यदि वो युष्माकम्॥ "युष्मदि गुरावेकेषाम्" इति बहुवचननिर्देशः। अत एव अपिस्फवच्च बन्धूनामित्युक्तम्। क्षमं युक्तं यदि। सर्वबन्धुसाधारणोऽयमवमानो नोपेक्षणीय इत्यर्थः॥

असंस्कृत्रिमसंव्यानावनुप्त्रिमफलाशिनौ।
अभृत्रिमपरीवारौ पर्य्यभूतां तथापि माम्॥ ३७॥

३७. असंस्कृत्रिमेति॥ संस्कारेण कुविन्दव्यापारेण निर्वृत्तं संस्कृत्रिममतत्संव्यानौ वल्कले वसानावित्यर्थः। पाकेन निर्वृत्तं पक्त्रिम-

१ निर्वासितौ B. | २ °वपक्त्रिम° T., G., Com.

मतत्फलाशिनौ अकृष्टपच्यफलाशिनावित्यर्थः। भरणेन निर्वृत्तौ भृत्रिमः अतत्परिवारौ अभृतपरिजनौ मृगमात्रपरिवारावित्यर्थः। अत एव "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इत्युपसर्गस्य दीर्घः। सर्वत्र "ड्वितः क्त्रिः"॥ "क्त्रेर्मम् नित्यम्"॥ तथाप्यतिनीचावपि मां पर्यभूताम्। कथमेतत्सह्यमिति भावः॥

श्वःश्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा।
प्राणिवस्तव मानार्थं व्रजाश्वसिहि मा रुदः॥ ३८॥

३८. अथ श्लोकद्वयेन प्रत्युत्तरमाह श्वःश्रेयसमिति॥ सा शूर्पणखा भ्रातृभ्यां खरदूषणाभ्यां प्रत्यभाणि प्रत्युक्ता। भणतेः कर्मणि लुङि चिणि वृद्धिः। तदेवाह वत्से शोभनं श्रेयः श्वःश्रेयसमुत्कृष्टं श्रेय इत्यर्थः। 'अत्र श्वः शब्द उत्तरपदार्थप्राशस्त्यवाची' इति काशिका। मयूरव्यंसकादित्वात्समासः। "श्वसो वसीयः श्रेयसः" इति समासान्तः। अवाप्तासि अवाप्स्यसि। आप्नोतेरनद्यतने भविष्यति लुटि सिपि तासिप्रत्ययः॥ "तासस्त्योर्लोपः" इति सकारलोपः॥ तव मानार्थमेव प्राणिवः जीवावः। अन प्राणने। लट्। वस्। शपो लुक्॥ "रुदादिभ्यः सार्वधातुके" इतीट्॥ "अनितेः" इति णत्वम्॥ श्वसिहि आश्वसिहि। श्वस प्राणने। लोट्। पूर्ववदिट्। सेर्हिरादेशः। मा रुदः मा रोदीः। रुदेर्लुङि सिपि॥ "इरितो वा" इति च्लेरङादेशः। व्रज गच्छ। मार्गं प्रदर्शयेत्यर्थः॥

जक्षिमोऽनपराधेऽपि नरान्नक्तन्दिवं वयम्।
कुतस्त्वं भीरु यत्तेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे॥ ३९॥

३९. यदुक्तं क्षमध्वमिति तत्रोत्तरमाहतुः जक्षिम इति॥ वयं सर्वे राक्षसा इत्यर्थः। त्यदादिपरैकशेषः। अनपराधे अपराधाभावेऽपि। 'क्वचित्प्रतिषेधेऽपि समास इष्यते'। नरान्मानुषान्। नक्तं च दिवा च नक्तन्दि-

---

१ व्रज श्वसिहि T., G., Com.
२ °पराधेन c.
३ तत्तेभ्यो T2.

वम्। अच्चतुरादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वसमासान्तनिपातः। जक्षिमो भक्षयामः। जक्ष भक्ष हसनयोरिति धातोर्लट्। मस्। शपो लुक्। रुदादित्वात्सार्वधातुके इट्। हे भीरु भयशीले। संज्ञापूर्वो विधिरनित्य इति न गुणः। द्रुह्यद्भ्योऽपराधभाग्भ्यो नरेभ्यः क्षमामहे मृष्यामहे इति यत् तत् कुतस्त्यं कुत आगतम्॥ "अव्ययात्त्यप्"॥ न क्षमामहे इत्यर्थः। क्रियाग्रहणाच्चतुर्थी॥

तौ चतुर्दशसाहस्रबलौ निर्ययतुस्ततः।
पारश्वधिक[1]धानुष्कशाक्तीक[2]प्रासिकान्वितौ॥ ४०॥

४०. ताविति॥ ततः शूर्पणखासमाश्वासनानन्तरं चतुर्दशसहस्राणि परिमाणमस्य इत्यस्मिन्नर्थे "शतमानविंशतिकसहस्रवसनादण्"। "प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि" इति तदन्तविधिः॥ "संख्यायाः संवत्सरसंख्यस्य च" इति उत्तरपदवृद्धिः॥ तावद्बलं सैन्यं ययोस्तौ खरदूषणौ। परश्वधः कुठारः प्रहरणमेषां पारश्वधिकाः॥ "परश्वधाट्ठञ्च"॥ "ठस्येकः"॥ धनुः प्रहरणमेषामस्तीति धानुष्काः॥ "प्रहरणम्" इति ठक्॥ "इसुसुक्तान्तात्कः"॥ शक्तिः प्रहरणमेषां शाक्तीकाः॥ "शक्तियष्ट्योरीकक्"॥ प्रासः कुन्तः प्रहरणमेषां प्रासिकाः। स एव ठक्। तैरन्वितौ सन्तौ निर्ययतुः। यातेर्लिटि॥ "आतो लोप इटि च" इत्याकारलोपः॥

अथ संपततो[3] भीमान् विशिखै रामलक्ष्मणौ।
बहुमूर्ध्नो द्विमूर्धांश्च त्रिमूर्धांश्चाहतां मृधे[4]॥ ४१॥

४१. अथेति॥ अथ रामलक्ष्मणौ संपततः संमुखमागच्छतः भीमान् भयङ्करान् बहुमूर्ध्नो बहुशिरस्कान् द्विमूर्धान् द्विशिरस्कान् त्रिमूर्धान्

१ पारस्वधिक D., E1, E2.
२ शाक्तिक C., N., B., T1, T2, T4, शार्ङ्गिक E., याष्टीक D.
३ संपाततो E1.
४ °श्च मृधे हतान् T2, T4.

त्रिशिरस्कांश्च ॥ "द्वित्रिभ्यां ष मूर्ध्नः" इति समासान्तः षप्रत्ययः ॥ मृधे रणे विशिखैर्बाणैः अहतां हतवन्तौ । हन्तेर्लुङि तसस्तामादेशः ॥ "अनुदात्तोपदेश—" इत्यनुनासिकलोपः ॥

तैर्वृक्णरुग्णसंभुग्नक्षुण्णभिन्नविपन्नकैः ।[1]
निमग्नोद्विग्नसंह्रीणैः पप्रे[2] दीनैश्च मेदिनी ॥ ४२ ॥

४२. तैरिति ॥ वृक्णैस्तीक्ष्णैः । ओव्रश्चेरोदित्त्वान्निष्ठानत्वम् । तस्यासिद्धत्वात् "चोः कुः" इति कुत्वम् ॥ "ग्रहिज्यावयि—" इत्यादिना संप्रसारणम् ॥ "स्कोः संयोगाद्योरन्ते च" इति सकारलोपः ॥ "ऋवर्णाच्चेति वक्तव्यम्" इति णत्वम् । रुग्णैर्भुग्नैः संभुग्नैः प्रहारवेदनया कुटिलिताङ्गैः । उभयत्रापि पूर्ववन्निष्ठानत्वं कुत्वं च । क्षुण्णैश्चूर्णितैः भिन्नैः विदारितैः विपन्नकैः कुत्सितं विपन्नैः मृतैः ॥ "कुत्सिते" इति कप्रत्ययः ॥ त्रिष्वपि "रदाभ्यां—" इति निष्ठानत्वम् ॥ निमग्नैर्भूमौ मग्नैः आविग्नैर्भीतैः । उभयत्रापि "ओदितश्च" इति निष्ठानत्वे तस्यासिद्धत्वात्कुत्वम् ॥ संह्रीणैः सम्यग्लज्जितैः ॥ "नुदविद—" इत्यादिना निष्ठानत्वम् ॥ सर्वत्र स्वतन्त्रार्थत्वाद् द्वन्द्वः । दीनैः क्षीणबलैश्च । स्वादित्वान्निष्ठानत्वम् । एवं नानाभूतैः तैः राक्षसैः मेदिनी वव्रे आवृता । वृञ् वरणे । कर्मणि लिट् ॥

केचिद्वेपथुमासेदुरन्ये दवथुमुत्तमम् ।
सरक्तं वमथुं केचिद् भ्राजथुं न[4] च केचन ॥ ४३ ॥

४३. केचिदिति ॥ केचिद् वेपथुं कम्पमासेदुः प्रापुः । अन्ये उत्तमं महान्तं दवथुं परितापमासेदुः । केचित् सरक्तं वमथुं वमनमासेदुः रक्तमवमन्नित्यर्थः । भ्राजथुं दीप्तिं तु केचनापि नासेदुः । सर्वत्र "ट्वितोऽथुच्" इत्यथुच् ॥

---

१ क्षुन्न E1.
२ निमग्नाविग्न T., G., Com., D., T3, T4.
३ वव्रे T., G., Com.
४ नैव केचन D., न तु केचन T2, T4.

मृगयुमिव मृगोऽथ दक्षिणेर्मा
दिशमिव दावर्वती मरावुदन्यन्।
रघुतनयमुपाययौ त्रिमूर्धो
विषभृदिवोग्रमुखं पतत्रिराजम्॥ ४४॥

४४. मृगयुमिति ॥ अथास्मिन्नवसरे दक्षिणे ईर्मं व्रणोऽस्यास्तीति दक्षिणेर्मा व्याधेन व्रणितदक्षिणाङ्ग इत्यर्थः। 'दक्षिणारुलुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः'। 'व्रणोऽस्त्रियामीर्ममरुः' इति चामरः॥ "दक्षिणेर्मा लुब्धयोगे" इत्यनिच्प्रत्ययान्तो निपातः॥ स मृगः मृगान्यातीति मृगयुं व्याधमिव। 'व्याधो मृगवधाजीवी' इत्यमरः। 'मृगय्वादयश्च' इत्यौणादिकः कुप्रत्ययान्तो निपातः। मरौ निर्जलदेशे। 'समानौ मरुधन्वानौ' इत्यमरः। उदकमिच्छन्नुदन्यन् पिपासुर्जन्तुः॥ "अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु" इति क्यजन्तधातावुदन्यादेशनिपातः॥ तस्माल्लटः शत्रादेशः। दाववर्तीं दावानलवर्तीं दिशमिव। विषं बिभर्तीति विषभृदाशीविषः उग्रमुखं पतत्रिराजं गरुडमिव त्रयो मूर्धानो यस्य त्रिमूर्धः त्रिशिरा नाम राक्षसः। त्रिमूर्धो व्याख्यातः। रघुतनयं राममुपाययौ। मालोपमालंकारः। अनेनोपमात्रयेणास्य रक्षसः सद्योमरणं व्यज्यते इति अलंकारेण वस्तुध्वनिः॥

शितविशिखनिकृत्तकृत्स्नवक्त्रः
क्षितिभृदिव क्षितिकम्पकीर्णशृङ्गः।
भयमुपनिदधे स राक्षसाना-
मखिलकुलक्षयपूर्वलिङ्गतुल्यः॥ ४५॥

४५. शितेति ॥ शितैर्विशिखैः निकृत्तकृत्स्नवक्त्रः छिन्नसर्वमूर्धा अत एव क्षितिकम्पेन औत्पातिकभूकम्पेन कीर्णशृङ्गो विकीर्णशिखरः क्षिति-

१ दाव T3, E1, T., G., Com.
२ रघुवृषभ C.
३ विषधृगिव D.
४ रुषं C.
५ शीर्ण T2, T4.

भृत् पर्वत इव स्थितः किं च अखिलकुलस्य कृत्स्नरक्षःकुलस्य क्षये विनाशे पूर्वलिङ्गं प्रथमावेदकनिमित्तं तत्तुल्यः तथा प्रतीयमान इत्यर्थः। स राक्षसः राक्षसानामवशिष्टानां च भयमुपनिदधे जनयामासेत्यर्थः। औत्पातिकपर्वतोपमानेन कुलक्षयसूचनात्सर्वराक्षसानां महाभयमुत्पन्नमिति भावः॥

इति भट्टिकाव्ये प्रकीर्णकाण्डे[१] चतुर्थः सर्गः ।

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने चतुर्थः सर्गः ॥

---

१ T. & G. add त्रिशिरवधो नाम | T3 adds खरदूषणयुद्धं नाम.

॥ श्रीः ॥

अथ पञ्चमः सर्गः ।

निराकरिष्णू वर्त्तिष्णू[1] वर्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥ १ ॥

१. निराकरिष्णू इति ॥ अथ त्रिशिरःपातानन्तरं खरदूषणौ निराकरिष्णू प्रतिपक्षनिराकरणशीलौ । वर्धिष्णू वर्धनशीलौ रणोत्साहिनावित्यर्थः । वर्त्तिष्णू अतिप्रहारेऽपि वर्त्तनशीलौ । स्थायिनावित्यर्थः । उत्पतिष्णू ऊर्ध्वमुत्पतनशीलौ । सहिष्णू प्रहारसहनशीलौ च सन्तौ । सर्वत्र "अलंकृञ्—" इत्यादिना ताच्छीलिक इष्णुच् प्रत्ययः । रणं परितः रणे सर्वतः ॥ "पर्यभिभ्यां च" इति सर्वार्थे तसिल्प्रत्ययः ॥ "अभितः परितः—" इत्यादिना द्वितीया ॥ चेरतुः बभ्रमतुः । चरेर्लिटि तसोऽतुस् ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ ॥ क्रियासमुच्चयालंकारः ॥

तौ[2] खङ्गमुशैल[3]प्रासचक्रबाणगदाकरौ ।
अकार्ष्टा[4]मायुधच्छायं[5] रजः[6]सन्तमसे रणे ॥ २ ॥

२. ताविति ॥ खङ्गादयः करे ययोस्तौ तत्करौ । "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति परनिपातः । अत्र खङ्गादीनां जातिवचनत्वेऽपि जातिप्राधान्यन्यक्कारेण नियतद्रव्यविवक्षया निर्देशाद्बदरामलकानि तिष्ठन्तीत्यादिवत् "जातिरप्राणिनाम्" इत्येकवद्भावो न कृतः । कृते वा नपुंसकलिङ्गप्रसङ्गात्स्त्रीलिङ्गनिर्देशो न स्यादिति । तौ खरदूषणौ रक्षांस्येव सन्तमसं विषूचीनं तमो यत्र तस्मिन् । रजःसन्तमसमिति पाठान्तरम् । 'विष्वक् सन्तमसम्' इत्यमरः ॥ "अवसमन्धेभ्यस्त-

---

१ वर्धिष्णू वर्त्तिष्णू T2, T4, T., G., Com.
२ तत्खङ्ग T3.
३ मुषल C., T1, E2,; मुसल T., G., Com.
४ आकार्ष्टा° E1, E3.
५ °च्छायरजः° T3.
६ रक्षःसन्त° T., G., Com.

मसः" इति समासान्तोऽच् ॥ रणे आयुधानां छाया आयुधच्छायम् ॥ "छाया बाहुल्ये" इति पूर्वपदार्थबाहुल्ये नपुंसकत्वम् ॥ अकार्ष्टामायुधैश्छादितवन्तावित्यर्थः । करोतेः कर्त्तरि लुङि तसस्तामादेशः । सिचि वृद्धिः ॥

अथ तीक्ष्णायसैर्बाणैरधिमर्म रघूत्तमौ ।
व्याधं व्याधममूढौ तौ[1] यमसाच्चक्रतुर्द्विषौ ॥ ३ ॥

३. अथेति ॥ अथ राक्षसविक्रमानन्तरं रघूत्तमौ रामलक्ष्मणौ । अमूढावप्रमत्तौ सन्तौ द्विषौ द्वेषिणौ खरदूषणौ ॥ "सत्सूद्विष—" इत्यादिना क्विप् ॥ तीक्ष्णायसैस्तीक्ष्णफलैर्बाणैः । अधिमर्म मर्मसु । विभक्त्यर्थेऽव्ययीभावः । व्याधं व्याधमभीक्ष्णं विद्धा ॥ "आभीक्ष्ण्ये णमुल्च" इति णमुलि चाद्विर्भावश्च ॥ यमसादन्तकाधीनम् ॥ "तदधीनवचने" इति सातिप्रत्ययः ॥ चक्रतुरहतामित्यर्थः ॥

हतबन्धुर्जगामासौ ततः[2] शूर्पणखा[3] वनात्[4] ।
पारेसमुद्रं[5] लङ्कायां वसन्तं रावणं गतिम्[6] ॥ ४ ॥

४. हतेति ॥ अथ हतबन्धुर्हतभ्रातृका असौ शूर्पणखा ततस्तस्माद्वनाज्जनस्थानात् मध्ये समुद्रस्य मध्येसमुद्रम् । "पारे मध्ये षष्ठ्या वा" इत्यव्ययीभावः ॥ लङ्कायां वसन्तं रावणं गतिं शरणं जगाम । तद्वधोऽपि प्रारम्भीति भावः ॥

संप्राप्य राक्षससभं चक्रन्द क्रोधविह्वला ।
नामग्राहमरोदीत्[7] सा भ्रातरौ रावणान्तिके ॥ ५ ॥

५. संप्राप्येति ॥ क्रोधविह्वला क्रोधान्धा सा शूर्पणखा । राक्षसानां सभा राक्षससभम् ॥ "सभाराजामनुष्यपूर्वा" इत्यमनुष्यपूर्वकत्वा-

---

१ तु T2.
२ तत्र T2, T4.
३ सूर्पनखा D., E2 शूर्पनखा c. सूर्पणखा C., B., E1. T1.
४ बलात् c.
५ मध्येस° T2, T4, T., G., Com.
६ पतिम् N., C., T1, E2, E3, B., c.
७ °रोदीच E3.

नपुंसकत्वम् ॥ संप्राप्य रावणान्तिके ॥ "सप्तम्यधिकरणे च" इति 'चकाराद्दूरान्तिकार्थेभ्यश्च सप्तमी' इति काशिका । भ्रातरौ खरदूषणौ नाम गृहीत्वा नामग्राहम् ॥ "नाम्न्यादिशिग्रहोः" इति णमुल् ॥ चक्रन्द चुक्रोश ॥

दण्डकांनध्यवात्तां यौ वीर रक्षःप्रकाण्डकौ ।
नृभ्यां संख्येऽकृषातां तौ सभृत्यौ भूमिवर्धनौ ॥ ६ ॥

६. दण्डकामिति ॥ हे वीर यौ प्रकाण्डावेव प्रकाण्डकौ । स्वार्थे कन्प्रत्ययः । 'स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इति नपुंसकप्रकृतित्वेऽपि पुल्लिङ्गता । रक्षसी प्रकाण्डकौ रक्षःप्रकाण्डकौ प्रशस्तराक्षसौ । रूढशब्दानामादिष्टलिङ्गत्वेन स्वस्वलिङ्गानामेव सामानाधिकरण्यम् । 'मतल्लिकामचर्चिकाप्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि' इत्यमरः । अथवा 'अस्त्री प्रकाण्डः स्कन्धः स्यात्' इति प्रकाण्डशब्दः स्कन्धवचनः । रक्षसी प्रकाण्डाविवेत्युपमितसमासः । तद्धुरंधरावित्यर्थः । दण्डो नाम कश्चिद्राजा तत्पालितो देशोऽपि दण्ड इत्युपचर्यते । स च शुक्रशापादिदानीमरण्यभूतत्वेन कुत्सितत्वेन "कुत्सिते" इति कप्रत्यये दण्डकेति दण्डका इति चोच्यते लोकतो लिङ्गवचननियमादिति । तदुक्तं रामायणे । 'तस्यायं दण्डविषयो विन्ध्यशैवलयोर्नृपः । शप्तो ब्रह्मर्षिणा तेन पुरा वैधर्म्यके कृते ॥ ततःप्रभृति काकुत्स्थ दण्डकारण्यमुच्यते । तपस्विनः स्थिता यत्र जनस्थानमतोऽभवत् ॥' तां दण्डकां तान् दण्डकान्वा अध्यवात्ताम् । तत्रोषितावित्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ वसेरनिटो लुङि सिचि हलन्तलक्षणा वृद्धिः ॥ "सः स्यार्धधातुके" इति धातुसकारस्य तकारः ॥ "झलो झलि" इति सिचो लोपः ॥ तौ खरदूषणौ सभृत्यौ । नृभ्यां मनुष्याभ्यां संख्ये युद्धे । वर्धयत इति वर्धनौ भूमेर्वर्धनौ । नन्द्यादित्वाल्ल्युः । स्वशरीरेण मृद्भूतेन पूरकौ मृतावित्यर्थः । अकृषातां कृतौ । करोतेः कर्मणि लुङि आतामि सिचि पक्षे चिण्वदिडभावाद्गुणाभावः ॥

१ दण्डकाम° T., G., Com.

विग्रहस्तत्र शक्रेण बृहस्पतिपुरोधसा ।
सार्धं कुमारसेनान्या शून्यश्चासीति को नयः ॥ ७ ॥

७. अथ रावणमुपालभमाना षोडशभिः सिश्वमन्त्रयते विग्रह इत्यादिभिः ॥ हे स्वामिन् । बृहस्पतिः पुरोधीयत इति पुरोधाः मन्त्री यस्य तेन । पुरोधसोऽपि मन्त्राधिकारत्वात् । तदुक्तं मनुना । 'सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता । मन्त्रयेत परं मन्त्रं राजा षाड्गुण्यसंयुतः' ॥ इति । कुमारः स्कन्दः सेनानीः सेनापतिर्यस्य तेन शक्रेण सार्धं विग्रहः प्रबलविरोधो नित्यानुषक्त इति शेषः । तथापि शून्यो निरुद्योगश्चासि । अस्तेर्लटि सिपि "तासस्त्योर्लोपः" इति सलोपः । इतीदमौदासीन्यं को नयः का नीतिः । बलवद्विरोधग्रस्तस्य जिगीषोरौदासीन्यमनर्थानुबन्धीति भावः ॥

यद्यहं नाथ नायास्यं विनसा[१] हतबान्धवा ।
नाज्ञास्यस्त्वमिदं सर्वं प्रमाद्यंश्चार[२]दुर्बलः ॥ ८ ॥

८. यदीति ॥ हे नाथ स्वामिन् । विगता नासा नासिका यस्याः सा विनसेति नासान्तो बहुव्रीहिः । 'घोणा नासा च नासिका' इत्यमरः । नासिकान्तत्वे "उपसर्गाच्च" इति नसादेशं बाधित्वा "वेर्ग्रो वक्तव्यः" इति ग्रादेशे विग्रेति स्यादिति । हतबान्धवा हतभ्रातृकाहं नायास्यं यदि नागच्छेयं चेत् । प्रमाद्यन्निति वर्तमाननिर्देशान्नित्यप्रमत्त इत्यर्थः । चरतीति चरः । पचाद्यच् । स एव चारो गूढचारः । प्रज्ञादित्वादण् । तेन दुर्बलः तच्छून्यः । साक्षाद्दृष्ट्या चारदृष्ट्या वा न किञ्चिद्दृष्टवानित्यर्थः । एवं गर्वान्धस्त्वं सर्वमिदमनर्थजातं नाज्ञास्यः न जानीयाः ॥ "लिङ्निमित्ते लृङ्क्रियातिपत्तौ" इति यातेर्जानातेश्च क्रियातिपत्तौ लृङ् । कुतश्चिद्वैगुण्यात्क्रियाया अनभिनिर्वृत्तिः क्रियातिपत्तिः । स्वस्यानागमे ज्ञातव्यज्ञानानभिनिर्वृत्तिरिह क्रियातिपत्तिः ॥

---

१ विनासा T3, T4, D., Com. | २ °श्चर° T3.

करिष्यमाणं विज्ञेयं कार्यं किं नु कृतं परैः ।
अपकारे कृतेऽप्यज्ञो विजिगीषुर्न वा भवान् ॥ ९ ॥

९. करिष्यमाणमिति ॥ परैः शत्रुभिः करिष्यमाणं कार्यं किं कृतं च किन्नु तद्विज्ञेयम् । एतदुभयं विजिगीषुणावश्यं विज्ञेयम् । एवं स्थिते भवांस्तु अपराधे द्रोहे कृते परैराचरितेऽपि अज्ञः । ज्ञानमेव नास्ति प्रतीकारस्तु दूरापास्त इति भावः । अथवा भवान् त्वं विजिगीषुर्नासि अन्यथा कथमिदमनात्मज्ञत्वमिति भावः ॥

वृत्तस्त्वं पात्रेसमितैः खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥ १० ॥

१०. अज्ञतामेवाह वृत इति ॥ त्वं तु पात्रेसम्मितैः भोजनमात्रसङ्गतैर्वृतः न तु मन्त्रसंगतैरित्यर्थः ॥ "पात्रेसम्मितादयश्च" इति क्षेपे समासनिपातः । खट्वामारूढः खट्वारूढः परतल्पगतः उत्पथप्रस्थित इत्यर्थः ॥ "खट्वा क्षेपे" इति क्षेपे क्तान्तेन द्वितीयासमासः ॥ प्रमादवान् नित्यप्रमादयुक्तः । नित्ययोगे मतुप् । पाने शौण्डो मत्तः पानशौण्डः पानव्यसनीत्यर्थः "सप्तमी शौण्डैः" इति समासः ॥ 'मत्ते शौण्डोत्कटक्षीबाः' इत्यमरः । उन्मनाः उत्सुकचित्तः विषयासक्त इत्यर्थः । श्रियं लक्ष्मीम् । अत्यन्तीनत्वमत्यन्तगामित्वं केवलात्मगामित्वमित्यर्थः ॥ "अवारपार—" इत्यादिना खप्रत्ययः । नेता प्रापणशीलो नासि । ताच्छील्ये तृन् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः । नयतिर्द्विकर्मकः । त्वच्चेष्टितानि सर्वथा राज्यभ्रंशकारीणीत्यर्थः ॥

अध्वरेष्वग्निचित्वत्सु सोमसुत्वत आश्रमान् ।
अत्तुं महेन्द्रियं भागमेति दुश्च्यवनोऽधुना ॥ ११ ॥

१ न E2.
२ परैः कृतम् T2, T3, T4, E2, E3, B.
३ अपराधे T., G, Com.
४ वृत्तोऽसि E1, वृतस्तु T3, T4.
५ पात्रेसम्मितैः T., G., Com.
६ नात्यन्तीनां त्व° D.
७ माहेन्द्रियं T2.
८ दुश्च्यवनो E2.

११. अध्वरेष्विति ॥ अधुना अस्मिन् काले ॥ "अधुना" इत्यधुनाप्रत्ययान्तो निपातः । दुष्टं च्यवते परदारेषु रेतश्च्योतते दुःखेन च्यवते रणादिति वा दुश्च्यवनः दिवस्पतिः ॥ "चलनशब्दार्थादकर्मकाद्युच्"॥ महाकाव्ये दुश्च्यवनशब्दप्रयोगनिषेधेऽप्यत्र तद्दोषोद्घाटनार्थमनुवादान्न दोषः । अग्निं चितवन्तोऽग्निचितः ॥ "अग्नौ चेः" इति क्विप् ॥ तद्वत्सु अग्निचित्वत्सु तत्कर्तृकेष्वित्यर्थः ॥ "तसौ मत्वर्थे" इति भत्वात्तकारस्य जश्त्वंस्याभावः । एकसंज्ञाधिकारात् "झयः" इति मतोर्वत्वम् । अध्वरेषु यज्ञेषु महेन्द्रियं महेन्द्रदेवताकम् । "महेन्द्राद्घाणौ च" इति घप्रत्ययः ॥ भागमत्तुं भक्षयितुं सोमं सुतवन्तः सोमसुतः ॥ "सोमे सुञः" इति क्विप् ॥ तद्वतः सोमसुत्वतः सोमयाजिमतः । भत्वादि पूर्ववत् । आश्रमानृष्याश्रमान् ऐति आगच्छति । आङ्पूर्वादिणो लिट् ॥ "एत्येधत्यूठ्सु" इति वृद्धिः ॥ अशस्त्रवधस्तवाय माशाभङ्ग इति भावः ॥

आमिक्षीयं दधिक्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनं च नाप्युपघ्नन्ति राक्षसाः ॥ १२ ॥

१२. आमिक्षीयमिति ॥ तप्ते पयसि दध्यानयति सामिक्षा तदर्थमामिक्षीयम् । दधि च क्षीरं च दधिक्षीरम् ॥ "विभाषा वृक्षमृगतृण-" इत्यादिना वैभाषिको व्यञ्जनद्वन्द्वः ॥ तथा पुरोडाश्यं पुरोडाशार्थमोषधिरेवौषधं व्रीहियवादि ॥ "ओषधेरजातौ" इति स्वार्थेऽण्प्रत्ययः॥ आमिक्षापुरोडाशयोर्हविष्ट्वात् ॥ "विभाषा हविरपूपादिभ्यः" इति वैभाषिकौ प्राक्क्रीतीयौ यथाक्रमं छयतौ ॥ हैयङ्गवीनं ह्योगोदोहविकारं घृतं च । 'तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतम्' इत्यमरः॥ "हैयङ्गवीनं संज्ञायाम्" इति ह्योगोदोहशब्दस्य हियङ्ग्वादेशः खञन्तो निपातः । हविः पूर्वोक्तं त्रिविधं हविरपि राक्षसाः नोपघ्नन्ति न लुम्पन्ति । सर्वत्र रक्षसां विस्रम्भविहारप्रतिबन्ध इत्यर्थः ॥

युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः ।
रामो यज्ञद्रुहो हन्ति कालकल्पशिलीमुखः[1] ॥ १३ ॥

१३. युवेति ॥ किं च युवतिर्जाया यस्य सः युवजानिः तरुणभार्यः तथापि निःशङ्क इति भावः ॥ "जायाया निङ्" इति बहुव्रीहिसमासान्तो निङादेशः ॥ "लोपो व्योर्वलि" इति यकारलोपः ॥ "स्त्रियाः पुंवत्—" इत्यादिना पुंवद्भावः ॥ धनुः पाणौ यस्य सः धनुष्पाणिः ॥ "प्रहरणार्थेभ्यः—" इति सप्तम्याः परनिपातः ॥ "नित्यं समासेऽनुत्तरपदस्थस्य" इति नित्यं षत्वम् ॥ भूमौ तिष्ठतीति भूमिष्ठः ॥ "सुपि स्थः" इति कप्रत्ययः ॥ "अम्बाम्ब—" इति षत्वे ष्टुत्वम् ॥ खविचार एषामस्तीति खविचारिणः खचरानित्यर्थः । मत्वर्थीय इनिप्रत्ययः । न तु "सुप्यजातौ—" इति णिनिः । पुनः सुब्ग्रहणेनोपसृष्टात्तन्निषेधात् । यज्ञेभ्यो द्रुह्यन्तीति यज्ञद्रुहो राक्षसान् ॥ "सत्सूद्विष—" इति क्विप् ॥ कालकल्पैरन्तकप्रख्यैः । शिली शल्यं मुखं येषां तैः शिलीमुखैः बाणैः हन्ति । न चास्य कश्चित्प्रतिपक्ष इति भावः ॥

मांसान्योष्ठावलोप्यानि साधनीयानि[2] देवताः ।
अश्नन्ति रामाद्रक्षांसि बिभ्यत्य[3]श्नुवते दिशः ॥ १४ ॥

१४. मांसानीति ॥ ओष्ठाभ्यामेवावलोप्तुमर्हाणि ओष्ठावलोप्यानि अतिमृदूनीत्यर्थः ॥ "ऋहलोर्ण्यत्" ॥ "कृत्यैरधिकार्थवचने" इति करणे तृतीयासमासः । सवनाय हितस्तदर्थे वा पशुः सवनीयः । प्राक्क्रीतीयश्छप्रत्ययः । तदीयानि सावनीयानि । साधनीयानीति पाठे यज्ञसाधनीयार्थानि यज्ञार्थे संपाद्यानि वा । मांसानि देवताः अश्नन्ति । रक्षांसि राक्षसास्तु रामाद्बिभ्यति भीतानि सन्ति । बिभेतेः शतरि ॥ "नाभ्यस्ताच्छतुः" ॥ "वा नपुंसकस्य" इति नुम्प्रतिषेधविकल्पात्पाठद्वयेऽपि साधुत्वम् । दिशोऽश्नुवते व्याप्नुवन्ति पलायन्त

१ कालकल्पैः शिलीमुखैः T., G., Com.
२ सावनीयानि E1, T2, T3, T., G., Com.
३ बिभ्यन्त्य° T2, T3, T4.

इत्यर्थः । पूर्वं राक्षसाः यज्ञेष्वाच्छिद्य मांसान्यश्नन्ति देवता दिशोऽश्नुवते । अधुना तद्विपरीतं वर्त्तत इत्यर्थः ॥

कुरु बुद्धिं कुशाग्रीयामनुकामीनतां त्यज ।
लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥ १५ ॥

१५. कुर्विति ॥ कुशाग्रीयां कुशाग्रमिव सूक्ष्माग्रामित्यर्थः ॥ "कुशाग्राच्छः" इति इवार्थे छप्रत्ययः ॥ बुद्धिं कुरु । सूक्ष्मदर्शी भवेत्यर्थः । अनुकामं गामी अनुकामीनः यथेष्टं गन्ता ॥ "अवारपार—" इत्यादिना खप्रत्ययः ॥ तत्तां त्यज यथेष्टचारी मा भूरित्यर्थः । परांश्च परतरांश्च अनुभवतीति परम्परीणा पितृपितामहादिक्रमागतेत्यर्थः ॥ "परोवरपरम्परपुत्रपौत्रमनुभवति" इति खप्रत्ययः ॥ तत्संनियोगात्परंपरतरशब्दयोः परम्परादेशनिपातनात् तत्तत्प्रकृतिकश्चायं प्रत्ययः । न तु लोकप्रसिद्धपरंपराशब्दप्रकृतिकः । सूत्रे टाबन्तनिर्देशाभावादिति । तां लक्ष्मीं त्वम् । पुत्रांश्च पौत्रांश्च अनुभवतीति पुत्रपौत्रीणा । पूर्वोक्त एव प्रत्ययः । तत्तां नय । पूर्वपुरुषवदुत्तरोत्तरपुरुषगामिनीं च कुरु । न तूपेक्षया त्वन्मात्रावसितां कुर्वित्यर्थः । नयतिर्द्विकर्मक इत्युक्तम् ॥

सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाशासते लोलां तां हस्तेकुरु माश्वसीः ॥ १६ ॥

१६. ननु मद्धस्तगतायाः लक्ष्म्याः कथं विपर्ययकथेत्याशङ्क्याह सहायेति ॥ लोलामस्थिरां यां श्रियं सहायवन्तः कोशदण्डसम्पन्नाः प्रभुशक्तिमन्त इत्यर्थः । उद्युक्ता उत्साहशक्तियुक्ता इत्यर्थः । निपुणाः मन्त्रकुशला इत्यर्थः । तेऽपि बहवो बहुमन्त्रियुक्ता विदुषोऽप्येकस्यानिर्णायकत्वादित्यर्थः । एवं शक्तित्रयोपेता अपि आशासते लब्धामप्यलब्धवदनुपालयन्तीत्यर्थः । आङः शासु इच्छायामित्यात्मनेपदम् । शपो लुक् ॥ "आत्मनेपदेष्वनतः" इति झस्यादादेशः । तां श्रियं हस्तेकृत्य उपयम्येत्युपचारः । स्वायत्तीकृत्यापीत्यर्थः ॥ "नित्यं हस्ते

१ हस्तेकृत्याश्व T3..

पाणावुपयमने" इति हस्तेशब्दस्य गतित्वात् समासे क्त्वो ल्यप् । माश्वसीः मा विश्वसीः । आङ्पूर्वात् श्वसेर्लुङि सिचि "ह्यन्त—" इत्यादिना वृद्धिप्रतिषेधः ॥ "इट ईटि" इति सिज्लोपः ॥

लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात् ।
अन्तिकेऽपि स्थिता पत्युश्[1]छलेनान्यं निरीक्षते ॥ १७ ॥

१७. अनाश्वासकारणमाह लक्ष्मीरिति ॥ लक्ष्मीः कुलटा स्वैरिणीव कुतूहलात् पुंसा पुंस्त्ववता योगमाशंसुरभिलषन्ती । "सनाशंसभिक्ष उः" ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ पत्युरन्तिके स्थितापि छलेन वञ्चनेनान्यं पुरुषं पुरुषान्तरं निरीक्षते । ईषत्प्रमादेऽप्यन्यमुपगच्छतीत्यर्थः ॥

योषिद्वृन्दारिका तस्य दयिता हंस[2]नादिनी ।
दूर्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥ १८ ॥

१८. लक्ष्मीस्तावदास्तामतिलक्ष्मीः कापि कान्ता तदन्तिके चकास्तीति श्लोकपञ्चकेनाह योषिदित्यादिना ॥ वृन्दं गुणवृन्दमस्या अस्तीति वृन्दारिका मुख्या । 'वृन्दारकौ रूपिमुख्यौ' इत्यमरः । "शृङ्गवृन्दाभ्यामारकन् वक्तव्यः" । कात्पूर्वस्येत्वम् । योषिच्च सा वृन्दारिका च योषिद्वृन्दारिका ॥ "वृन्दारकनागकुञ्जरैः पूज्यमानम्" इति समासः ॥ तस्य रामस्य दयिता । हंसवद्गच्छतीति हंसगामिनी ॥ "कर्त्तर्युपमाने" इति णिनिः॥ दूर्वाकाण्डमिव श्यामा । एतच्च पुराणान्तरे द्रष्टव्यम् कल्पभेदेन वा । अन्यथा रामायणविरोधात् । न्यग्रोधपरिमण्डला वटपत्रवद्वृत्तानुपूर्वोदरेत्यर्थः । एतदेवाभिप्रेत्योक्तं सामुद्रे । 'काककुक्षिस्तु या कन्या न्यग्रोधपरिमण्डला । एकं जनयते पुत्रं स च राजा भविष्यति' ॥ इति ॥

नास्यं पश्यति यस्तस्या निस्ते दन्तच्छन्दं न वा ।
संशृणोति न चो[3]क्तानि मिथ्यासौ विहितेन्द्रियः ॥ १९ ॥

---

१ पत्युः काक्षेणान्यं E1.
२ हंसगामिनी N., D., T., G., Com.
३ न वोक्तानि E1.

१९. नेति ॥ यो युवा तस्या आस्यं मुखं न पश्यति । छाद्यते अनेन इति छदः दन्तानां छदो दन्तच्छदोऽधरः ॥ "पुंसि संज्ञायां घः प्रायेण" इति घप्रत्ययः ॥ "छादेर्घेऽद्व्युपसर्गस्य" इति ह्रस्वत्वम् ॥ तं न निंस्ते न चुम्बति वा । णिसि चुम्बने । लटि तङ् । अदादित्वाच्छपो लुक् । इदित्वान्नुम् । उक्तानि सूक्तानि न संशृणोति न समाकर्णयति च । सकर्मकत्वात् "समो गम्यृच्छि—" इति नात्मनेपदम् । तस्याकर्मकाधिकारात् । असौ पुमान् मिथ्या वृथैव विहितेन्द्रियः निर्मितकरणः । निष्फलैव तस्येन्द्रियसृष्टिरित्यर्थः ॥

सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः ।
तल्पे कान्तान्तरैः सार्धं मन्येऽहं धिङ् निमज्जथुम् ॥ २० ॥

२०. सार इति ॥ असौ स्त्री इन्द्रियार्थानां रूपरसादिविषयाणां सम्बन्धी सारः एकत्र संगृहीतस्सर्वविषयसारः । अथवा इन्द्रियार्थानां मध्ये असौ सारः उत्कृष्ट इन्द्रियार्थः । अत एवासौ यस्य सम्बन्धिनी तस्य नन्दथुः आनन्दः । किं च कान्तान्तरैः एतस्यां सत्यां स्त्र्यन्तरैः सार्धं तल्पे शयनीये निमज्जथुं निमज्जनं शयनं धिक् कष्टमहं मन्ये । धिग्योगे द्वितीया । उभयत्र "ट्वितोऽथुच्" ॥

न तं पश्यामि यस्यासौ भवेन्नोद्देजया मतेः ।
त्रैलोक्येनापि विन्दस्त्वं तां क्रीत्वा[1] सुकृती भव ॥ २१ ॥

२१. नेति ॥ असौ स्त्री यस्य यूनो मतेर्मानसस्य । उद्वेजयते कम्पयतीत्युद्वेजया कम्पनी ॥ "अनुपसर्गाल्लिम्पविन्द—" इत्यादिना शप्रत्ययः । एतेनैव विन्दोऽपि व्याख्यातः । न भवेत् तं न पश्यामि । तादृग्धीरो नास्त्येवेत्यर्थः । अतः त्वं तां सुन्दरीम् । त्रयो लोकास्त्रैलोक्यम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः । स्वार्थिकत्वात्प्रकृतितो लिङ्गवचनातिक्रमः । तेनापि तां क्रीत्वा । त्रैलोक्यस्यापि तव स्वत्वात् तस्य

[1] हत्वा B., E2.

रत्नस्य तावन्मूल्यार्हत्वाच्चेति भावः । विन्दतीति विन्दः क्रयेण लब्धा सन्नित्यर्थः । सुकृती भव सुष्ठु कृतकृत्यो भव । लोकोत्तरस्त्रीरत्नलाभादिति भावः ॥

नैवेन्द्राणी[1] न[2] रुद्राणी न मनावी न रोहिणी ।
वरुणानी न[3] नाग्नायी तस्याः सीमन्तिनी समा[4] ॥ २२ ॥

२२. ननु शच्यादिषु जाग्रतीषु केयमुद्घोष्यते अत आह न चेति ॥ इन्द्रस्य स्त्री इन्द्राणी शची तस्याः सीतायाः ॥ "तुल्यार्थैः—" इत्यादिना विकल्पात्षष्ठी ॥ समा सीमन्तिनी तुल्या स्त्री न । एवं रुद्रस्य स्त्री रुद्राणी पार्वती । सा च न तस्याः समा सीमन्तिनीति सर्वत्र योज्यम् । सर्वत्र "पुंयोगादाख्यायाम्" इति ङीप् । तत्सन्नियोगात् "इन्द्रवरुण—" इत्यादिना यथायोगमानुगागमः । मनोः स्त्री मनावी ॥ "मनोरौ वा" इति विकल्पात् औकारे तस्यावादेशः ॥ एवमग्नेः स्त्री अग्नायी ॥ "वृषाकप्यग्नि—" इत्यादिना ऐकारे तस्यायादेशः ॥

प्रत्यूचे राक्षसेन्द्रस्तामाश्वसिहि बिभेषि किम् ।
खज नक्तंचरि क्षोभं वाचाटे[5] रावणो ह्यहम् ॥ २३ ॥

२३. प्रत्यूच इति ॥ राक्षसेन्द्रो रावणः तां शूर्पणखां प्रत्यूचे प्रत्युवाच । ब्रुवः कर्त्तरि लिटि तङ् । किमित्यपेक्षायामाह । हे नक्तंचरि राक्षसि ॥ "चरेष्टः" ॥ टित्वान्ङीप् । सम्बुद्धौ नदीह्रस्वः । हे वाचाटे बहुभाषिणीति तदुपालम्भासहिष्णुतया सोल्लुण्ठनमामन्त्रितम् । समाश्वसिहि । श्वसेर्लोटि सिपि "रुदादिभ्यः सार्वधातुके" इतीट् । सेर्हिरादेशः । 'अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्' इति शास्त्रादुच्छास्त्रपाठे दीर्घ इति केचित् । अमात्रावृत्तत्वादक्षरसंख्ययैवालं यथा ऋग्य-

१ न चेन्द्राणी T_2, T_4.
२ मनावी वा न रुद्राणी न रोहिणी T_3, E_1.
३ न चाग्नायी C., T_1, E_1, B., न वाग्नायी T_3.
४ समाः E_3.
५ वाचाले D.

शुषमधीयाना इत्यादावित्यन्ये । किं बिभेषि मा भैषीरित्यर्थः । क्षोभं क्रोधं त्यज । अहं रावणो हि रावयति लोकानिति रावणः ख्यातः खल्वित्यर्थः ॥

मामुपास्त[1] दिदृक्षावान् याष्टीकव्याहतो हरिः ।
आज्ञालाभोन्मुखो[2] दूरात् काक्षेणानादरेक्षितः ॥ २४ ॥

२४. यदुक्तं विग्रहस्तव शक्रेणेति तत्रोत्तरमाह मामित्यादि ॥ द्रष्टुमिच्छा दिदृक्षा। दृशेः सन्नन्तात्स्त्रियामप्रत्यये टाप् । तद्वान् दिदृक्षावान् दिदृक्षुः । यष्टिः प्रहरणमेषां याष्टीकाः वेत्रपाणयः ॥ "शक्तियष्ट्योरीकक्" ॥ तैर्व्याहतो द्वारि प्रतिबद्धो हरिरिन्द्रः । आज्ञादाने दर्शनाभ्यनुज्ञाने उत्सुक उत्कण्ठितः सन् ॥ "प्रसितोत्सुकाभ्यां तृतीया च" इति सप्तम्या "सप्तमी" इति योगविभागात्समासः । दूरात् काक्षेण कुदृष्ट्या अप्रसन्नदृष्ट्या इत्यर्थः । इन्द्रियवाचिना अक्षशब्देन तद्विशेषश्चक्षुर्लक्ष्यते । 'अथाक्षमिन्द्रियम्' इत्यमरः । "का पथ्यक्षयोः" इति कुशब्दस्य तत्पुरुषे कादेशः । केचित्तु न्यासकारेण तत्पुरुषाधिकारभङ्गेन बहुव्रीहिसमासान्तत्वेनापि व्याख्यानादिहापि कुत्सितमक्षि यस्य तेन काक्षेण मयेति व्याचक्षते । अनादरेणेक्षितः सन् मामुपास्त आसेवत । आसेर्लुङि तङ् । शपो लुक् । ईदृगवस्थः शक्र उपेक्षमाणमपि मां किं करिष्यतीति भावः ॥

विरुग्णोदग्रधाराग्रः कुलिशो मम वक्षसि ।
अभिन्नं शतधात्मानं मन्यते बलिनं बली ॥ २५ ॥

२५. विरुग्णेति ॥ किं च बली बलवान् दृढः कुलिशो वज्रः । 'अस्त्रियां वज्रकुलिशौ' इति यादवः । मम वक्षसि विरुग्णानि भग्नानि उदग्राण्युन्नतराणि धाराणां कोटीनामग्राणि मुखानि यस्य सः । कुण्ठितमुखः

[1] °मुपास्ते C.
[2] °लाभोत्सुको T4, T4, T., G., °दानोत्सुको Com.

सन्नित्यर्थः । किं तु शतधा अभिन्नमविदीर्णमात्मानं बलिनं बलिष्ठं मन्यते न तु मद्वक्षोविदारणेनेत्यर्थः ॥

कृत्वा लङ्काद्रुमालानमहमैरावतं गजम् ।
बन्धनेऽनुपयोगित्वान्न तं तृणवदत्यजम् ॥ २६ ॥

२६. कृत्वेति ॥ किं चाहमैरावतं गजं लङ्काद्रुम एव आलानं यस्य तं कृत्वा तत्र बद्ध्वेत्यर्थः । बन्धनेऽनुपयोगित्वादिच्छापनेयत्वादिति भावः । तमैरावतं तृणवन्नात्यजं नात्याक्षं किमिति काकुः ॥

आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा ॥ २७ ॥

२७. आहोपुरुषिकामिति ॥ किं च मम । 'अहो पुरुष इति यस्यां क्रियायां सा आहोपुरुषिका' इति काशिका । मत्वर्थीयठञ्प्रत्ययः । मयूरव्यंसकादित्वात्समासः । तामाहोपुरुषिकां पश्य । स्वपुरुषकारं पश्येत्यर्थः । केचित्तु 'आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि' इत्यत्र क्षीरस्वामिनो व्याख्यानानुसारेणाहोपुरुषस्य भावः आहोपुरुषिका आश्चर्यपुरुषत्वम् । मनोज्ञादित्वाद्वुञिति व्याचक्षते । किं तु मनोज्ञादिषु मृग्यमेतत् । यद्यस्माद्रत्नकान्तिभिरेव ध्वस्तान्धकारे निरस्ततमस्केऽपि पुरे सदा पूर्णेन्दोः सन्निधिः सन्निधानम् । तमोनिरासानुपयुक्तस्यापि चन्द्रस्य तत्रापि पूर्णस्य सदा पुरे निवसनं केवलाज्ञासिद्ध्यर्थमेवेत्यहो मे दृश्यतामाहोपुरुषिकेति भावः । अत्र रत्नकान्तिभिर्ध्वस्तान्धकार इति समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः । 'समृद्धिमद्वस्तुवर्णनमुदात्तम्' इति लक्षणात् ॥

---

१ मन्वानोऽनु° T3, मन्वानोऽनुपयोगं किं T2, T4.
२ किं न तं तृणमत्यजम् T3.
३ यद्रत्नकान्तिभिः T2, T3, E1, D., T., G., Com.
४ पुरे ध्वस्तान्धकारेऽपि E3.

हृतरत्नश्च्युतोद्योगो रक्षोभ्यः करदो दिवि।
पूतक्रतायीमभ्येति[1] सत्रपः किं न गोत्रभित्॥ २८॥

२८. हृतेति॥ हृतानि रत्नान्युत्कृष्टवस्तूनि यस्य सः। 'रत्नं श्रेष्ठमणावपि' इति यादवः। अत एव च्युतोद्योगो नष्टोत्साहः अत एव रक्षोभ्योऽस्मभ्यं करदः बलिप्रदः गोत्रभित्पर्वतच्छेदी देवेन्द्रः सत्रपः सन् दिवि स्वर्गे। पूतक्रतोः स्वस्य स्त्रीं पूतक्रतायीं शचीम्॥ "पूतक्रतोरै च" इति ङीप्सन्नियोगादैकारे तस्यायादेशः। नान्वेति किमन्वेत्येव। लज्जयान्तः पुरे निलीय तिष्ठतीत्यर्थः॥

अतुल्यमहसा सार्धं[3] रामेण मम विग्रहः।
त्रपाकरस्तथाप्येष यतिष्ये तद्विनिग्रहे॥ २९॥

२९. अतुल्येति॥ अतुल्यमहसा असमानबलेन रामेण सार्धं विग्रहो विरोधो मम त्रपाकरो लज्जावहः॥ "कृञो हेतु—" इत्यादिना ताच्छीलिकष्टप्रत्ययः॥ तथाप्येषोऽहं तस्य रामस्य विनिग्रहे हिंसने यतिष्ये त्वत्कृते इति भावः॥

उत्पत्य[2] खं दशग्रीवो मनोयायी शितास्त्रभृत्[4]।
समुद्रसविधावासं मारीचं प्रति चक्रमे॥ ३०॥

३०. उत्पत्येति॥ अथ मनोवद्यातीति मनोयायी मनोवेगीत्यर्थः॥ "कर्त्तर्युपमाने" इति णिनिप्रत्ययः॥ शितास्त्रभृत् निशितास्त्रधारी दशग्रीवः खमुत्पत्य समुद्रस्य सविधः समीपमावासो निवासो यस्य तं समुद्रतीरवासिनं मारीचं प्रति तमुद्दिश्य चक्रमे जगाम॥ "अनुपसर्गाद्वा" इति क्रमेर्लिटि तङ्॥

१ °मन्वेति T2, T3, E1, T4, T., G., Com.
२ किल T2, T4.
३ साकं T2, T3, T4, E1. साकं मम रामेण E3.
४ शाता° T3.

संपेत्य तत्सनीडेऽसौ तं वृत्तान्तमशिश्रवत् ।
त्रस्नुनाथ श्रुतार्थेन तेनागादि दशाननः ॥ ३१ ॥

३१. संपत्येति ॥ असौ रावणस्तस्य मारीचस्य सनीडे समीपे । 'समीपे निकटासन्नसन्निकृष्टसनीडवत्' इत्यमरः । संपत्य निपत्य । तं शूर्पणखोक्तं वृत्तान्तमशिश्रवत् श्रावयति स्म । शृणोतेः "णौ चङ्युपधाया ह्रस्वः" इति ह्रस्वः । सन्वद्भावे "स्रवतिशृणोति—" इत्यादिना विकल्पादभ्यासस्येत्वम् । अथ श्रवणानन्तरं श्रुतार्थेन श्रुतवृत्तान्तेन अत एव त्रस्नुना भीरुणा ॥ "त्रसिगृधि—" इत्यादिना क्नुप्रत्ययः ॥ तेन मारीचेन दशाननो रावणः अगादि गदितः ॥

अन्तर्धत्स्व रघुव्याघ्रात्तस्मात्त्वं राक्षसेश्वर ।
स[3] रणे दुरुपस्थानो हस्तरोधं दधद्धनुः ॥ ३२ ॥

३२. यद्गदितं तदाह अन्तरिति ॥ हे राक्षसेश्वर त्वं तस्मात् प्रसिद्धाद्रघुव्याघ्रात् रघूत्तमाद्रामात् । गतमेतत् ॥ "अन्तर्धौ येनादर्शनमिच्छति" इत्यपादानत्वात्पञ्चमी । अन्तर्धत्स्व अन्तर्हितो भव नात्मानं दर्शयेत्यर्थः । दधातेः कर्त्तरि लोटि तङि "थासः से" ॥ "सवाभ्यां वामौ" ॥ "श्नाभ्यस्तयोरातः" इत्याकारलोपः ॥ "दधस्तथोश्च" इत्यभ्यासस्य भष्भावः । "अदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्या" इत्युपसर्गवद्भावादन्तःशब्दस्य धातोः प्राक् प्रयोगः । तथाहि रणे हस्तेन रोधः पीडनं यस्य तद्धस्तरोधं दृढमुष्टिगृहीतमित्यर्थः ॥ "सप्तम्यां चोपपीडरुधकर्षः" इति णमुल् । उपोपसर्गव्यभिचारश्चिन्त्यः व्याकरणान्तरे वा द्रष्टव्यः । धनुः दधत् दधानः ॥ "नाभ्यस्ताच्छतुः" इति नुम्प्रतिषेधः ॥ स रामो दुःखेनोपस्थीयत इति दुरुपस्थानो दुरासदः ॥ "आतो युच्" इति खलर्थे युच् ॥

---

१ समेत्य D., E3.
२ °मशुश्रवत् E2, T4
३ यो रणे N., C., E2, E3, T1, B2, T2, T.

भवन्तं कार्त्तवीर्यो[1] यो हीनसंधिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्वलौकिकः[2] ॥ ३३ ॥

३३. दुरासदत्वं व्यनक्ति भवन्तमिति ॥ यः कृतवीर्यस्यापत्यं पुमान् कार्त्तवीर्यः हैहयपतिः भवन्तं हीनं निकृष्टं संधिमाज्ञाकरत्वलक्षणं सन्धानमचीकरत् भवता कारितवानित्यर्थः । करोतेर्णौचङ्युपधाह्रस्वः ॥ "दीर्घो लघोः" इत्यभ्यासदीर्घः ॥ "हृक्रोरन्यतरस्याम्" इत्यणि कर्त्तुः कर्मत्वम् । तस्य कार्त्तवीर्यस्य । कृद्योगात्कर्मणि षष्ठी । हन्तारं जामदग्न्यं यो रामो जिगाय जितवान् । जेर्लिटि "सन्लिटोर्जेः" इत्यभ्यासात्परस्य धातुजकारस्य कुत्वम् । स रामः सार्वलौकिकः सर्वस्मिन् लोके विदितः । नाप्रसिद्ध इत्यर्थः ॥ "लोकसर्वलोकाट्ठञ्" इति ठञ् ॥ "अनुशतिकादीनां च" इत्युभयपदवृद्धिः ॥ ३३ ॥

यमास्यदृश्वरी तस्य ताडका[3] वेत्ति[4] विक्रमम् ।
शूरम्मन्यो रणाच्चाहं निरस्तः सिंहनादिना ॥ ३४ ॥

३४. यमेति ॥ किं च यमास्यमन्तकमुखं दृष्टवती यमास्यदृश्वरी रामेण यमलोकं गमितेत्यर्थः । भूतार्थे कर्मोपपदात् "दृशेः क्वनिप्" ॥ "वनो र च" इति ङीप् रेफादेशश्च ॥ ताटका तस्य रामस्य विक्रमं वेद वेत्ति ॥ "विदो लटो वा" इति तिपो णलादेशः ॥ सिंहवन्नर्दति सिंहनर्दी सिंहनादी ॥ "कर्त्तर्युपमाने" इति णिनिः ॥ तेन रामेण रणान्निरस्तः । शूरमात्मानं मन्यत इति शूरम्मन्यः शूरमानी ॥ "आत्ममाने खश्च" इति मन्यतेः खश्प्रत्ययः ॥ अहं च वेदेत्यनुषङ्गः । वेद्मीत्यर्थः । मिपो णलादेशः । रामप्रधर्षणे तवाप्येषैव गतिरिति भावः ॥ ३४ ॥

न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाप्यसौ ।
अनुभूतो मया चासौ[6] तेन चान्वभविष्यहम् ॥ ३५ ॥

---

१ कार्त्तवीर्योऽसौ T4.
E1, omits verses 33 and 34.
२ सार्वलौकिकम् N., D.
३ ताटका T., G., Com.
४ वेद T., G., Com.
५ बला° c.
६ वासौ T4.

१५. नेति ॥ त्वं तेन रामेण नान्वभाविष्ठाः समरे साक्षान्नाज्ञायिष्ठाः न ज्ञात इत्यर्थः। भुवः कर्मणि लुङि थासि सिचि चिण्वदिटि वृद्धिः। त्वयाप्यसौ रामो नान्वभावि नानुभूतः । पूर्ववच्चिण्वदिटि चिणि वा चिणो लुक्। अतस्तच्छक्तिं त्वं न जानासीत्यर्थः। मया चासावनुभूतः तेन चाहमन्वभविषि । चिण्वदिडभावे इटि सिचि गुणः। अतस्तच्छक्तिमहं जानामीत्यर्थः ॥

अध्यङ् शस्त्रभृतां रामो न्यञ्चस्तं प्राप्य मद्विधाः।
स कन्याशुल्कमभनङ्मिथिलायां मखे धनुः ॥ ३६ ॥

३६. असंभवावधृतमर्थं निष्कृष्याह अध्यङ्ङिति ॥ रामः शस्त्रभृतां वीराणाम्। अध्यञ्चत्युपरि वर्तते इत्यध्यङ् सर्वाधिक इत्यर्थः ॥ "ऋत्विग्—" इति क्विन् ॥ अनुस्वारपरसवर्णादिकार्ये ॥ "क्विन्प्रत्ययस्य कुः" इति कुत्वम् ॥ मद्विधा मादृशाः तं रामं प्राप्य योद्धुमासाद्य । नीचमञ्चन्तीति न्यञ्चः अधरीणाः । पूर्ववत्क्विन् । प्राप्त्यभावात्कुत्वाद्यभावः । सर्वाधिक्यं व्यनक्ति। स रामो मिथिलायां जनकनगरे मखे यज्ञान्ते कन्याशुल्कं शुल्कभूतं सर्वगर्वनिर्वापणमिति भावः । धनुरभनक् बभञ्ज । अतः सर्वाधिक इति भावः। भञ्जेर्लङि "श्नान्नलोपः"। कुत्वचर्त्वे ॥

संविचः सहयुध्वानौ तच्छक्तिं खरदूषणौ।
यज्वानश्च ससुत्वानो यानगोपीन्मखेषु सः ॥ ३७ ॥

३७. संवित्त इति ॥ किं च सह योधितवन्तौ सहयुध्वानौ ॥ "सहे च" इति युधेः क्वनिप्। खरदूषणौ तस्य रामस्य शक्तिं संवित्तः। सकर्मकत्वात् 'समो गम्यृच्छि—" इत्यादिना न तङ् । तस्याकर्मकाधिकारात्। सम्यग्जानीतः। वेत्तेर्लटि तसि शपो लुक्। ससुत्वानः सोमसुत्सहिताः यज्वानः आहिताग्नयश्च तच्छक्तिं संविदन्तीति वचनविपरिणामेनानुषङ्गः। स रामो यान् यज्वनो मखेष्वगोप्सीत् येषां मखा-

१ महद्धनुः T_3. | २ °गौप्सीन्म° T_3, T_4, T_7, G., Com.

मगोप्सीदित्यर्थः । वनेष्वस्मद्रक्षतीति तद्गोपनादेव ते गुप्ता भवन्तीति भावः । गुपू रक्षणे । ऊदित्वादिडभावपक्षे सिचि हलन्तलक्षणा वृद्धिः ॥

सुखजातः सुरापीतो नृजग्धो माल्यधा[1]रयः ।
अधिलङ्कं स्त्रियो दी[2]व्यं मारब्धा बलिविग्रहम् ॥ ३८ ॥

३८. किं तर्हीदानीमुचितं तदाह सुखेति ॥ सुखजातो जातसुखः सुरापीतः पीतसुरः । नरो जग्धा येन सः नृजग्धः जग्धनृको भक्षितमनुष्य इत्यर्थः ॥ "अदो जग्धिर्ल्यप्ति किति" इत्यदो जग्धिरादेशः ॥ आहिताग्न्यादित्वात्सर्वत्र वैकल्पिको निष्ठायाः परनिपातः । माल्यानां धारयो धारयिता माल्यधारयः ॥ "अनुपसर्गाल्लिम्पविन्द—" इत्यादिना धारेः कर्त्तरि शप्रत्यये गुणायादेशौ ॥ ईदृशः सन् । अधिलङ्कं लङ्कायाम् । विभक्त्यर्थेऽव्ययीभावः । स्त्रियो दीव्य । स्त्रीभिः करणैः क्रीडस्वेत्यर्थः ॥ "दिवः कर्म च" इति करणस्य कर्मसंज्ञा ॥ बलिविग्रहं प्रबलविरोधं मारब्धाः मा कृथाः । अन्यथा मरिष्यसीत्यर्थः । रभेराङ्पूर्वान्माङि लुङि थासि "झलो झलि" इति सिचो लोपः ॥ "झषस्तथोर्धोऽधः" ॥ "झलां जश् झशि" इति जश्त्वम् ॥

तं भीतङ्कारमाक्रुश्य रावणः प्रत्यभाषत ।
यातयामं विजितवान् स रामं[3] यदि किं ततः ॥ ३९ ॥

३९. तमिति ॥ रावणस्तं मारीचं भीतं कृत्वा भीतङ्कारम् ॥ "कर्मण्याक्रोशे कृञः खमुञ्" इति खमुञ् । आक्रुश्य भीरुस्त्वमिति निर्भर्त्स्येत्यर्थः । प्रत्यभाषत । तदेवाह । स राघवो यातयामं वृद्धत्वाद्गतरसम् । 'यातयामं गतरसम्' इत्यभिधानात् । रामं जामदग्न्यं विजितवान् यदि ततः किम् । वृद्धपीडनात्क उत्कर्ष इत्यर्थः ॥

[4]अघानि ताडका[5] तेन लज्जाभयविभूषणा ।
स्त्रीजने यदि तच्छ्लाघ्यं धिग्लो[6]कं क्षुद्रमानसम् ॥ ४० ॥

१ °धारकः T2.
२ दीव्यन्मार° E2.
३ रामो T2.
४ आघानि E2.
५ ताटका G., T., Com.
६ धिग्जनं E2.

४०. अघानीति ॥ लज्जा च भयं च विभूषणं यस्याः सा न शौर्यशालिनी सा ताटका स्त्री तेन रामेणाघानि हता । हन्तेः कर्मणि लुङि चिणो लुक् ॥ "हो हन्तेः—" इति कुत्वम् ॥ स्त्रीजने कृतं तद्धननं स्त्रीहत्या श्लाघ्यं भूषणं यदि तर्हि क्षुद्रमानसं लघुचित्तमीदृग्गर्हिततमं कर्म बहु मन्यमानं लोकं धिक् ॥ निन्द्य इत्यर्थः । धिग्योगे द्वितीया ॥

यद्गेहेनर्दिनमसौ शरैर्भीरुमभायर्यत्[1] ।
कुब्रह्मयज्ञके रामो भवन्तं पौरुषं[2] न[3] तत् ॥ ४१ ॥

४१. यदिति ॥ असौ रामो गेह एव नर्दतीति गेहेनर्दी गृहेशूरः । 'गेहेनर्दी गृहेशूरः पिण्डिमारश्च कथ्यते' इति हलायुधः ॥ "पात्रेसम्मितादयश्च" इति समासः ॥ तं भीरुं भवन्तम् । कुत्सितो ब्रह्मा कुब्रह्मः ब्राह्मणाभासो विश्वामित्रः । आगन्तुकब्राह्मण्यत्वादिति भावः ॥ "कुमहद्भ्यामन्यतरस्याम्" इति समासान्तष्टच् ॥ तस्य यज्ञके कुयज्ञे ॥ "कुत्सिते" इति कप्रत्ययः ॥ शरैः करणैः अभाययत् । अत एव हेतुभयप्रयुक्तयोः षुगात्मनेपदयोरभावः । बिभेर्ण्यन्ताल्लङि शपि वृद्ध्यायादेशौ । तद्भीरुत्रासनं पुरुषस्य कर्म पौरुषं पुरुषकारो न । युवादित्वादण् । शूरत्रासनं पुरुषकारो न भीरुत्रासनमिति भावः ॥

चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः ।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके ॥ ४२ ॥

४२. चिरेति ॥ चिरकालमुषितं चिरकालोषितं पुराणमित्यर्थः । अत्यन्तसंयोगे द्वितीया ॥ "अत्यन्तसंयोगे च" इति समासः ॥ "वसतिक्षुधोरिट्" ॥ अत एव जीर्णं निःसारम् । जॄ वयोहानौ ॥ "ॠत इद्धातोः" इतीकारे "हलि च" इति दीर्घः ॥ "रषाभ्याम्—" इति नस्य णत्वम् ॥ कीटनिष्कुषितं घुणक्षतम् ॥ "निरः कुषः" ॥ "इण्निष्ठायाम्" इतीट् ॥ धनुरैशं चापं रामेण । क्षत्रियकः क्षत्रियाभासः जनः

---

१ °मभापयत् E1.
२ पुष्कलं च तत् T2, T4.
३ तु T3.

क्षात्रहीन इति भावः । कुत्सायां कन् । तस्यान्तिके ॥ "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्" इति षष्ठ्यां "षष्ठी" इति षष्ठीसमासः ॥ "सप्तम्यधिकरणे च" इति चकारेण दूरान्तिकार्थग्रहणादन्तिक इति सप्तमी ॥ भग्नं यदि भग्नं चेत् । किं चित्रं न किञ्चिच्चित्रम् । जीर्णकाष्ठभङ्गस्य सुकरत्वादिति भावः । अत्राचित्रत्वस्य विशेषणगत्या चिरकालोषितादिपदार्थहेतुकत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति लक्षणात् ॥

वनतापसके वीरौ विपक्षे गलितादरौ[1] ।
किं[2] चित्रं यदि सावज्ञौ मम्रतुः खरदूषणौ ॥ ४३ ॥

४३. वनेति ॥ वने तापसके तापसाभासे । कुत्सायां कन् । विपक्षे शत्रौ विषये गलितादरौ निष्प्रयत्नौ किं तु सावज्ञौ कियानयं क्षुद्र इति सावधीरणौ अगणितवन्ताविव्यर्थः । वीरौ खरदूषणौ मम्रतुर्यदि मृतौ चेत् ॥ "म्रियतेर्लुङ्लिङोश्च" इति नियमाल्लिटि न तङ् ॥ किं चित्रम् । प्रमत्तवधस्य सुकरत्वादिति भावः । पूर्ववदलङ्कारः ॥

त्वन्तु[3] भीरुश्च दुर्बुद्धे नित्यं[4] शरणकाम्यसि ।
गुणांश्चापह्नुषेऽस्माकं स्तौषि शत्रूंश्च नः[5] सदा ॥ ४४ ॥

४४. एवं मारीचोक्तान् रामपराक्रमानन्यथाकृत्य संप्रति श्लोकद्वयेन तन्निग्रहान्यथाकारपूर्वकमनन्तरकार्ये तं नियच्छति त्वमित्यादिना ॥ हे दुर्बुद्धे त्वं तु भीरुः । अत एव नित्यं शरणकाम्यसि शरणमात्मन इच्छसि च न त्वेकवीरः । अतस्त्वन्निग्रहोऽपि न पराक्रम इति भावः ॥ "काम्यच्च" इति काम्यचि तदन्ताल्लटि सिप् ॥ किं चास्माकं गुणानपह्नुषे च ॥ "थासः से" ॥

१ स्खलिता° D.
२ को दोषो T2, T3, T4.
३ त्वं च भीरुः सुदुर्बुद्धे N., C., T1,.
त्वं भीरुश्चासि दुर्बुद्धे T2.
त्वं च भीरुश्च दुर्बुद्धे E3.
त्वं तु भीरुः सुदुर्बुद्धे T.
४ नित्यं च रणकाम्यसि c., C., T1.
नित्यं मरणकाम्यसि E2.
५ नस्तथा T., G., Com.

शपो लुक् । तथा नोऽस्माकं शत्रून् स्तौषि प्रशंससे च । स्तौतेर्लेटि सिपि शपो लुक् ॥ "उतो वृद्धिर्लुकि हलि" इति वृद्धिः ॥

शीर्षच्छेद्यमतोऽहं त्वां करोमि क्षितिवर्धनम् ।
कारयिष्यामि वा कृत्यं निजिघृक्षुर्वनौकसौ ॥ ४५ ॥

४५. शीर्षेति ॥ अतोऽस्मादपराधात् शीर्षच्छेद्यं शीर्षच्छेदार्हम् ॥ "शीर्षच्छेदाद्यच्च" इति यत्प्रत्ययः । त्वां क्षितिवर्धनं मृतम् । नन्द्यादित्वाल्ल्युरित्युक्तम् । करोमि करिष्यामि । सामीप्ये वर्त्तमानप्रत्ययः । अथवा वनमोकः स्थानं ययोस्तौ वनौकसौ राज्यभ्रष्टौ रामलक्ष्मणौ निजिघृक्षुः निग्रहीतुमिच्छुरहम् । ग्रहेः सन्नन्तादुप्रत्ययः ॥ "सनि ग्रहगुहोश्च" इतीट्प्रतिषेधः । संप्रसारणभष्भावढत्वकुत्वषत्वानि । कृत्यं तन्निग्रहौपयिकं कर्म ॥ "विभाषा कृवृषोः" इति क्यप् ॥ त्वां त्वया कारयिष्यामि ॥ "हृक्रोरन्यतरस्याम्" इत्यणि कर्त्तुः कर्मत्वम् ॥

तमुद्यतनिशातासिं[1] प्रत्युवाच जिजीविषुः ।
मारीचोऽनुनयंस्त्रासादभ्यमित्र्यो भवामि ते ॥ ४६ ॥

४६. तमिति ॥ अथ जिजीविषुर्जीवितुमिच्छुः । जीवेः सन्नन्तादुप्रत्ययः । मारीचः उद्यतनिशातासिमुत्क्षिप्तनिशितखड्गम् । श्यतेर्निष्ठायाम् "आदेच उपदेशेऽशिति" इत्यात्वम् ॥ "शाच्छोरन्यतरस्याम्" इति विकल्पादित्वाभावः ॥ तं रावणं त्रासादनुनयन् प्रार्थयमानः ते तवाभ्यमित्र्योऽभ्यमित्रमलंगामी त्वदमित्राभिगामी ॥ "अभ्यमित्राच्छ च" इति चकाराद्यत्प्रत्ययः ॥ भवामीति प्रत्यवादीत् । सद्योमरणाद्वरमशुभस्य कालहरणमेवेति बुद्ध्वा तथा प्रवृत्त इत्यर्थः ॥

हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ ।
उद्योगमभ्यमित्रीणो[2] यथेष्टं त्वं च[3] सन्तनु ॥ ४७ ॥

---

१ °निशातासिः T3.
D. reverses the 2nd and 4th Pâdas.

२ °भ्यमित्रीयो E2.
३ तु T2, T3, T4, Com.

४७. हरामीति ॥ मृगैर्दीव्यत इति मृगद्युवौ मृगयासक्तौ । दिवः क्विप् ॥ "च्छ्वोः शूडनुनासिके च" इति वकारस्य ऊठादेशे यणादेशो- वङादेशौ ॥ रामसौमित्री रामलक्ष्मणौ मृगो भूत्वा हरामि अन्यत आकर्षामि । सामीप्ये वर्त्तमानप्रयोगः । त्वं तु अभ्यमित्रमभिसपत्न- मलंगामी अभ्यमित्रीणः सन् ॥ "अभ्यमित्राच्छ च" इति चकारात् खप्रत्ययः । यथेष्टमुद्योगं प्रयत्नं सन्तनु कुरुष्वेत्यर्थः । तनोतेर्लोटि सिपि "उतश्च प्रत्ययात्—" इति हेर्लुक् ॥

ततश्चित्रीयमाणोऽसौ हेमरत्नमयो मृगः ।
यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन् ॥ ४८ ॥

४८. तत इति ॥ ततो रावणानुनयानन्तरमसौ मारीचः रत्नानां हेम्नश्च विकारो रत्नहेममयो मृगः सन् ॥ "मयड्वैतयोर्भाषायामभक्ष्या- च्छादनयोः" इति मयट्प्रत्ययः ॥ अत एव चित्रीयमाणश्चित्रीभवन् ॥ "नमोवरिवश्चित्रङः क्यच्" ॥ चित्रङ् आश्चर्ये । 'अवयवे कृतलिङ्गं समुदाये पर्यवस्यति' इति क्यजन्तादात्मनेपदम् । शानच् । सीताया यथामुखं दर्शनं यस्मिन् यथामुखीनः संमुखीनः सन् ॥ यथामुखमिति निपातनात्सादृश्येऽव्ययीभावः । तस्मात् "यथामुखसंमुखस्य दर्शनः खः" इति खप्रत्ययः । बहु भूयिष्ठं लोभयन् प्रलोभयन् पुप्लुवे प्लुतानि चकार ॥

तेनादुद्रूषयद्रामं मृगेण मृगलोचना ।
मैथिली विपुलोरस्कं प्रावुवूर्षुर्मृगाजिनम् ॥ ४९ ॥

४९. तेनेति ॥ मृगलोचना मैथिली सीता मृगाजिनं पूर्वोक्तचित्रमृग- चर्म प्रावुवूर्षुः प्रावरितुमिच्छुः सती । प्राङ्पूर्वाद्वृञः सन्नन्तादुप्र- त्ययः ॥ "इट् सनि वा" इति विकल्पादिडभावपक्षे "अज्झनगमां सनि" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इति दन्त्योष्ठ्यस्यापि ग्रहणादुत्वे "वोरुपधाया दीर्घ इकः" । ततो द्विर्वचनादि । विपुलोरस्कं विशालव-

१ रत्नहेम° T3, T., G., Com. | रक्तहेम° T2, T4.

क्षमं कर्मक्षमदेहसंपन्नमित्यर्थः ॥ "उरःप्रभृतिभ्यः कप्" इति कप् ॥ रामं तेन मृगेण करणेनादुद्यूषयत् देवितुमैषयत् । दीव्यतेः सनि "सनीवन्तर्ध—" इत्यादिना विकल्पादनिट्पक्षे ऊठादेशे यणादेशः । ततः सन्नन्ताण्णिचि लङ् । मृगवधे प्रावर्त्तयदित्यर्थः ॥

योगक्षेमकरं कृत्वा जानक्यां लक्ष्मणं ततः ।
मृगस्यानुपदी रामो जगाम गजविक्रमः ॥ ५० ॥

५०. योगेति ॥ ततो दुद्यूषानन्तरं गजविक्रमो गजगती रामो लक्ष्मणं सीतायाः जानक्याः योगक्षेमौ स्थितिरक्षणे करोतीति तत्करं कृत्वा ॥ "कृञो हेतु—" इत्यादिना हेत्वर्थे टप्रत्ययः ॥ "क्षेमप्रियमद्रेऽण्च" इत्यणग्रहणस्य तद्बाधकत्वेऽपि ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात्तदप्रवृत्तेरिति । मृगस्यानुपदी अन्वेष्टा सन् । संबन्धसामान्ये षष्ठी । कृद्योगाभावाद्गम्यमानान्वेषणक्रियापेक्षया कर्मणि षष्ठी वा । तदपेक्षयापि कारकोत्पत्तिशासनात् । जगाम ॥

स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित् ।
वीक्षमाणो मृगं रामश्चित्रवृत्तिं विसिष्मिये ॥ ५१ ॥

५१. स्थायं स्थायमिति ॥ क्वचित्प्रदेशे स्थायं स्थायं पुनः पुनः स्थित्वा ॥ "आभीक्ष्ण्ये णमुल्च" इति णमुल् ॥ द्विर्वचनं चोपसंख्यानात् । पौनःपुन्यमाभीक्ष्ण्यम् । यान्तं प्लवमानं क्वचित्क्रान्त्वा क्रान्त्वा उत्प्लुत्योत्प्लुत्य । णमुल्चेति चकारात् क्त्वाप्रत्ययः । स्थितं तिष्ठन्तमत एव चित्रवृत्तिमद्भुतव्यापारं मृगं वीक्षमाणो रामो विसिष्मिये विस्मितवान् । स्मयतेर्ङित्वाल्लिटि तङ् ॥

चिरं क्लिशित्वा मर्मावित्रामो विलुभितप्लवम् ।
शब्दायमानमव्यात्सीद्धृदयं क्षणदाचरम् ॥ ५२ ॥

---

१ सीताया N., C., T., G., T1, Com.
२ गत्वा गत्वा E1, स्थित्वा स्थित्वा क्वचित्क्वचित् E3.
३ क्वचित्स्थितम् T2, T4.
४ °स्तत्र चित्रं D. चित्रवृत्तं E1.
५ विलुलित C.
६ प्लुतम् E1, E2.

५२. चिरमिति ॥ मर्म विध्यतीति मर्मावित् मर्मभेदी । विध्यतेः क्विप्॥ "नहिवृति—" इत्यादिना पूर्वस्य दीर्घः ॥ रामश्चिरं चिरकालम्। अत्यन्तसंयोगे द्वितीया । क्लिशित्वा क्लिष्ट्वा प्रयस्येत्यर्थः ॥ "क्लिशः क्त्वानिष्ठयोः" इति क्लिश्यतेर्विकल्पादिडागमः ॥ विलुभिता विमोहिताः चिरप्रयासाद् व्याकुलिताः प्लवाः प्लुतानि यस्य तम् ॥ "लुभो विमोहने" इतीट् ॥ शब्दायमानं शब्दं कुर्वाणं हा लक्ष्मणेत्युच्चैः क्रन्दन्तमित्यर्थः ॥ "शब्दवैर—" इत्यादिना क्यङ् ॥ भयदं भयंकरं शब्दविशेषणं वा। क्षणदाचरं मारीचमव्यात्सीत् विध्यति स्म । व्यध ताडने लुङि सिचि हलन्तलक्षणा वृद्धिः ॥

श्रुत्वा विस्फूर्जथुप्रख्यं[1] निनादं[2] परिदेविनी ।
मत्वा कष्टश्रितं[3] रामं सौमित्रिं गन्तुमैजिहत्[4] ॥ ५३ ॥

५३. श्रुत्वेति ॥ अथ सीता विस्फूर्जथुप्रख्यं वज्रघोषकल्पम् । 'स्फूर्जथुर्वज्रनिर्घोषः' इत्यमरः ॥ "ट्वितोऽथुच्" ॥ निनादं निनदं ॥ "नौ गदनद—" इत्यादिना पक्षे घञ् ॥ श्रुत्वा रामं कष्टश्रितं कृच्छ्रगतिमापन्नं मत्वा। 'स्यात्कृच्छ्रं कष्टमाभीलम्' इत्यमरः ॥ "द्वितीया श्रितातीत—" इत्यादिना द्वितीयासमासः ॥ परिदेवने विलपतीति परिदेविनी सती। देवृ देवने इति धातोर्भौवादिकात् "संपृच—" इत्यादिना घिनुण्प्रत्ययः ॥ सौमित्रिं लक्ष्मणं गन्तुमैजिहत् रामं प्रति गन्तुमीहयामास ॥ "समानकर्तृकेषु तुमुन्" ॥ ईहतेर्णौ चङि "द्विर्वचनेऽचि" इति णिलोपस्य स्थानिवद्भावात् "अजादेर्द्वितीयस्य" इति हेर्द्विर्भावे चुत्वाद्यभ्यासकार्यम् ॥

एष प्रावृषिजाम्भोदनादी भ्राता विरौति ते ।
ज्ञातेयं कुरु सौमित्रे भयात् त्रायस्व राघवम् ॥ ५४ ॥

५४. एष इति ॥ हे सौमित्रे प्रावृषि जातः प्रावृषिजः ॥ "प्रावृट्शरत्कालदिवां जे" इति सप्तम्या अलुक् ॥ स चासावम्भोदश्च स इव

१ प्रख्यंनिनादं T3.
२ निदानं T2.
३ कष्टाश्रितं E1.
४ °मौजिहत् C.

नदतीति तन्नादी ॥ "कर्त्तर्युपमाने" इति णिनिः ॥ एष ते भ्राता रामो विरौति क्रोशति । ज्ञातेः कर्म ज्ञातेयं ज्ञात्युचितं कुरु ॥ "कपिज्ञात्यो-र्ढक्" ॥ तदेवाह । राघवं रामं भयाद्भयहेतोस्त्रायस्व रक्ष ॥ "भीत्रा-र्थानां भयहेतुः" इत्यपादानात्पञ्चमी ॥

रामसंघुषितं नैतन्मृगस्यैव[1] विवञ्चिषोः ।
रामस्वनितसङ्काशः स्वान इत्यवदत्स ताम् ॥ ५५ ॥

५५. रामेति ॥ हे आर्ये एतद्रामस्य संघुषितं संघुष्टं स्वरो न भवति । भावे क्तः । किन्तु वञ्चितुं प्रलोभयितुमिच्छोः विवञ्चिषोः । वञ्चु गताविति भौवादिको धातुरनेकार्थत्वाद्धातूनां प्रलोभने प्रयुक्तः । वञ्चु प्रलोभने इति चौरादिकाद्वा । तेषां नित्यणिच्कत्वादिति । मृगस्यैव रामस्वनितसङ्काशो रामस्वरसदृशः स्वानः स्वरः ॥ "स्वनहसोर्वा" इति विकल्पादिडभावः ॥ इति लक्ष्मणस्तां सीतामवददुक्तवान् ॥

आप्यानस्कन्धकण्ठांसं रुषितं सहितुं रणे[2] ।
प्रोर्णुवन्तं[3] दिशो बाणैः काकुत्स्थं भीरु कः क्षमः[4] ॥ ५६ ॥

५६. आप्यानेति ॥ हे भीरु कातरे । संज्ञापूर्वकस्य विधेरनित्यत्वान्न गुणः । आप्यानं स्थूलं ॥ प्यै वृद्धाविति धातोरात्वे "संयोगादेरातो धातोर्यण्वतः" इति निष्ठानत्वम् । ओप्यायी वृद्धौ इत्यस्य तु "ओदि-तश्च" इति निष्ठानत्वम् । यलोपः । 'आङ्पूर्वस्यान्धूधसोर्नित्यम्' इति नियमात् "प्यायः पी" इति पीभावोऽपि न भवति । स्कन्धः ककुत्प्र-देशः स च कण्ठश्च अंसः भुजशिखरं च । प्राण्यङ्गत्वादेकवद्भावः । तदाप्यानं यस्य तं कर्मक्षमाङ्गमित्यर्थः । रुषितं रुष्टम् ॥ "रुष्यमत्वरसं-घुषास्वनाम्" इति विकल्पादिट् ॥ बाणैर्दिशः प्रोर्णुवन्तमाच्छादय-न्तम् । ऊर्णोतेः शतरि उवङादेशः । काकुत्स्थं रामं रणे सहितुं सोढुं

१ मृगस्यैष E1.
२ सहितुं रुषितं रणे E3.
३ ऊर्णवन्तं E1.
४ क्षमा E1.

पर्यवस्थातुमित्यर्थः ॥ "तीषसहलुभरुषरिषः" इति विकल्पादिट् ॥ कः क्षमः शक्तः । क्षमेः शक्त्यर्थत्वात् ॥ "शकधृष—" इत्यादिना तुमुन् ॥

देहं बिभ्रक्षुरस्त्राग्नौ मृगः प्राणैर्दिदेविषन् ।
ज्याघुष्टकठिनाङ्गुष्ठं राममायान्मुमूर्षया ॥ ५७ ॥

५७. देहमिति ॥ किं तु मृग एवास्त्राग्नौ शराग्नौ देहं स्वाङ्गं बिभ्रक्षुः भ्रष्टुं पक्तुमिच्छुर्बिभ्रक्षुः । भ्रस्जेः सन्नन्तादुप्रत्ययः । इडागमरमागमाभावपक्षे "स्कोः संयोगाद्योः—" इति सलोपे व्रश्चादिना षत्वे "षढोः—" इति कत्वे "आदेशप्रत्यययोः" इति षत्वम् ॥ प्राणैः ॥ "दिवः कर्म च" इति चकारात्करणत्वम् ॥ दिदेविषन् देवितुं क्रीडितुमिच्छन् ॥ "सनीवन्त—" इत्यादिना विकल्पादिट् ॥ मुमूर्षया मर्तुमिच्छया । मृङः सन्नन्तादप्रत्यये टाप् । बुबूर्षुवत्प्रक्रिया । ज्याघृष्टेन मौर्वीघर्षणेन । भावे क्तः । कठिनाङ्गुष्ठं तत्र क्षुण्णमित्यर्थः । राममायादायातः । यातेराङ्पूर्वाल्लुङ् । रणे रामाभियायिनो मरणं न तु रामस्येत्यर्थः ॥

शत्रून्भीषयमाणं तं रामं विस्मापयेत कः ।
मा स्म भैषीस्त्वयाद्यैव कृतार्थो द्रक्ष्यते पतिः ॥ ५८ ॥

५८. शत्रूनिति ॥ किं च शत्रून्भीषयमाणं त्रासयन्तं न तु स्वयं कुतश्चिद्बिभ्यतमित्यर्थः ॥ "भियो हेतुभये षुक्" ॥ "भीस्म्योर्हेतुभये" इत्यात्मनेपदम् ॥ शानच् । तं रामं कोऽन्यो विस्मापयेत विजयेन विस्मितं कुर्यात् कस्तं जेष्यतीत्यर्थः ॥ "भीस्म्योः—" इति हेतुभय आत्मनेपदम् ॥ "नित्यं स्मयतेः" इत्यात्वे पुगागमः ॥ मा स्म भैषीः मा बिभीहि ॥ "स्मोत्तरे लङ् च" इति चकाराल्लुङि सिचि वृद्धिः ॥ अद्यैवाधुनैव त्वया कृतार्थः कृतकृत्यः पतिः प्रियो द्रक्ष्यते दर्शिष्यते । दृशेर्लृटि चिण्वदिडभावपक्षे व्रश्चादिनाषत्वे कत्वम् । स्यसकारस्य षत्वं च ॥

१ घृष्ट Com. T. | २ विस्माययेत B.

यायास्त्वमिति कामो[1] मे गन्तुमुत्सहसे न च[2]।
इच्छुः कामयितुं त्वं मामित्यसौ जगदे तया ॥ ५९ ॥

५९. याया इति ॥ त्वं यायाः रामान्वेषणाय गच्छेः इति मे कामोऽभिप्रायः ॥ "कामप्रवेदनेऽकच्चिति" इत्यकच्चित्युपपदे कामप्रवेदने स्वाभिप्रायाविष्करणापराख्ये लिङ्। त्वं तु गन्तुं नोत्सहसे नेच्छसि ॥ "शकधृष—" इत्यादिना तुमुन् ॥ ततस्त्वं मां कामयितुं कामिनीं कर्त्तुं कलत्रीकर्त्तुमिच्छुरभिलाषुकः। कामिनीशब्दात् तत्करोतीति ण्यन्तात् "समानकर्त्तृकेषु तुमुन्"। णाविष्ठवद्भावात् "तसिलादिष्वाकृत्वसुचः" इति पुंवद्भावः ॥ "टेः" इति टिलोपश्च ॥ "विन्दुरिच्छुः" इति निपातः ॥ इतीत्थं तया सीतया असौ लक्ष्मणो जगदे गदितः। कर्मणि लिट् ॥

मृषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः।
निरगाच्छत्रुहस्तं त्वं यास्यसीति शपन् वशी ॥ ६० ॥

६०. मृषोद्यमिति ॥ वशो वशीकरणम्। "वशिरण्योरुपसंख्यानम्" इत्यप्। सोऽस्यास्तीति वशी जितेन्द्रियः पूर्वोक्तशङ्कानर्ह इत्यर्थः सत्यवद्यं सत्यवादः ॥ "वदः सुपि क्यप् च" इति चकाराद्यत् ॥ तद्वान् सत्यवद्यः सत्यवादी। मत्वर्थीयोऽकारः। रघूत्तमो लक्ष्मणः मृषोद्यं त्वं मां कामयसे इति मृषावादम् ॥ "राजसूय—" इत्यादिना क्यबन्तो निपातः ॥ प्रवदन्तीं तां सीतां त्वं शत्रुहस्तं यास्यसीति शपन् अनिष्टागमोक्त्या निगृह्णन्निरगान्निर्गतः ॥

गते तस्मिन् जलशुचिः शुद्धदन्[3] रावणः शिखी।
जञ्जपूकोऽक्षमालावान् धारयो[4] मृदलाबुनः ॥ ६१ ॥

६१. अथास्मिन्नन्तरे रावणप्रवेशं चतुर्भिराह गत इत्यादिभिः ॥ तस्मिन् लक्ष्मणे गते सति जलशुचिः स्नानपूत इत्यर्थः। शुद्धदन् शुभ्रदन्तः ॥ "अग्रा-

१ कामेन हन्तु° T3.
२ च न T2.
न चेद् E2.
३ शुद्धदन्रावणः E1.
४ धारयन् C.

स्तशुद्र—" इत्यादिना दन्तशब्दस्य विभाषा दत्रादेशः। शिखी शिखावान्। नित्ययोगे व्रीह्यादित्वादिनिः। जञ्जपूकः मायावित्वात् गर्हितजापी॥ "लुपसदचर—" इत्यादिना भावगर्हायां यङ्॥ "जपजभ—" इत्यादिना अभ्यासस्य नुगागमः॥ "यजजपदशां यङः" इत्यूकप्रत्ययः॥ अक्षमालावान् जपमाली। संसर्गे मतुप्। अलाब्वाः विकारः फलमलाबु॥ "ओरञ्"॥ "फले लुक्"॥ नपुंसकह्रस्वत्वम्। मृत् द्वारकामृत्तिका सा चालाबु च मृदलाबु॥ "जातिरप्राणिनाम्" इति द्वन्द्वैकवद्भावः॥ तस्य धारयो धारयिता। कर्मणि षष्ठी॥ "अनुपसर्गाल्लिम्प—" इत्यादिना शप्रत्ययः॥

कमण्डलुकपालेन शिरसा च मृजावता।
संवस्त्र्य लाक्षिके वस्त्रे मात्राः[1] संभाण्ड्य दण्डवान्॥ ६२॥

६२. कमण्डल्विति॥ कमण्डलुरेव कपालं कर्परं जीर्णकमण्डलुरित्यर्थः। तेन मृजा शुद्धिः॥ "षिद्भिदादिभ्योऽङ्"॥ तद्वता शिरसा। खल्वाटत्वात्स्निग्धेनेत्यर्थः। तेन शिरसा चोपलक्षितः। लाक्षया रक्ते लाक्षिके॥ "लाक्षारोचनाट्ठक्" इति ठक्॥ वस्त्रे संवस्त्र्य समाच्छाद्य॥ "मुण्डमिश्र—" इत्यादिना "वस्त्रात्समाच्छादने" णिजन्तात्क्त्वो ल्यप्। मात्रां पूर्वोक्तानुक्तालाबुशिक्यादिपरिकरम्। 'मात्रा परिच्छदेऽकेशे' इति यादवः। संभाण्ड्य समाचित्य समाहृत्येत्यर्थः॥ "पुच्छभाण्डचीवर—" इत्यादिना "भाण्डात्समाचयने" इति णिङन्तात्क्त्वो ल्यप्॥ समागत्येत्युत्तरेण सम्बन्धः। दण्डवान् त्रिदण्डीत्यर्थः। अत एव शिखीत्युक्तम्। एकदण्डिनः शिखाभावात्॥

अधीयन्नात्मविद्विद्यां[2] धारयन्मस्करिव्रतम्।
वदन्बह्वङ्गुलिस्फोटं भ्रूक्षेपं[3] च विलोकयन्॥ ६३॥

---

१ मात्रां D., B., E1, T., G., Com.
२ °ात्मवाद्विद्यां T3, Com.
३ भ्रूविक्षेपं च लोकयन् T2, T4. भ्रूविक्षेपं विलोकयन् T., G., Com., T3.

६३. अधीयन्निति ॥ एवंभूतो रावणः आत्मवतां विद्यामुपनिषद्मधीयन्नकृच्छ्रेणाधीयानः मस्करिव्रतं परिव्राजकनियमम् ॥ "मस्करमस्करिणौ वेणुपरिव्राजकयोः" इति निपातनात्सुट् ॥ धारयन्नकृच्छ्रेण दधानः ॥ "इङ्धार्योः शत्रकृच्छ्रिणि" इत्युभयत्र शतृप्रत्ययः । बहु प्रचुरं यथा तथा अङ्गुलिस्फोटमङ्गुलिं चालयित्वा वदन् । प्रायेणाङ्गुलिसंज्ञयैव जल्पन्नित्यर्थः । भ्रुवं विक्षिप्य भ्रूविक्षेपम् । चक्षुषि पतितां भ्रुवं हस्तेनापक्षिप्येत्यर्थः । उभयत्रापि "स्वाङ्गेऽध्रुवे" इति णमुल्प्रत्ययः । विलोकयन् पश्यंश्च ॥

संदिदर्शयिषुः साम निजुहूषुः क्षपाटताम् ।
चङ्क्रमावान् समागम्य[1] सीतामूचे सुखाभव[2] ॥ ६४ ॥

६४. समिति ॥ साम सान्त्वं संदिदर्शयिषुः संदर्शयितुमिच्छुः । दर्शयतेः सन्नन्तादुप्रत्ययः । क्षपाटतां निशाचरत्वं निजुहूषुः निह्नोतुमिच्छुः । निजं क्रौर्यमाच्छाद्य शान्तिं नाटयन्नित्यर्थः ॥ "अज्झनगमां सनि" इति दीर्घः ॥ कुटिलं क्रमणं गतिः चङ्क्रमा ॥ "नित्यं कौटिल्ये गतौ" इति यङि "नुगतोऽनुनासिकान्तस्य" इत्यभ्यासस्य नुक् ॥ "अ प्रत्ययात्" इत्यप्रत्यये टाप् ॥ "अतो लोपः" ॥ "यस्य हलः" इति यकारलोपः ॥ तद्वान् चङ्क्रमावान् । जरानाटितकेन कुटिलं गच्छन्नित्यर्थः । एवंभूतः समागम्य सीतां सुखाकुरु अस्मच्चित्ताराधनं कुर्वित्यूचे ॥ "सुखप्रियादानुलोम्ये" इति सुखशब्दात्कृयोगे डाच्प्रत्ययः । स्वाम्यादिचित्ताराधनमानुलोम्यम् ॥

सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम् ।
कान्तिं कान्त्या सदातन्या[3] ह्रेपयन्ती शुचिस्मिता[4] ॥ ६५ ॥

६५. सायमिति ॥ हे शुचिस्मिते सीते । तिथीः शुक्लकृष्णपक्षतिथीः प्रणयति पञ्चदशानामपि कलानामेकैकवृद्धिह्रासक्रमेण पञ्चदश पञ्च-

१ समागत्य N., C., T1, E2, E3, c.
२ सुखाकुरु T., G., Com.
B. adds कुलकम् after 64th verse.
३ सनातन्या T3, T., G., Com.
४ शुचिस्मिते T., G., Com.

दृश प्रवर्त्तयतीति तिथिप्रणीश्चन्द्रः ॥ "सत्सूद्विष—" इति क्विप् ॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम् ॥ तस्य तिथिप्रण्यश्चन्द्रस्य ॥ "एरनेकाचः—" इति यणादेशः ॥ सायं सायं वा भवा सायन्तनी । सायशब्दात्स्यतेर्घञन्तादस्मादेव निपातनान्मान्तात्सायंशब्दाद्वा अव्ययात् "सायंचिरम्—" इत्यादिना ट्युप्रत्यये तुट् । तां कान्तिं पङ्कजानां दिवाभवां दिवातनीं कान्तिं सदा भवा सनातनी । स एव प्रत्ययः । तया कान्त्या ह्रेपयन्ती त्रपयन्ती । कादाचित्कात्सनातनस्योत्कृष्टत्वादिति भावः । अत एवोपमानादुपमेयस्याधिक्यकथनात् व्यतिरेकालङ्कारः । 'भेदप्रधानं सामान्यमुपमानोपमेययोः । आधिक्यालपत्वकथनाद्व्यतिरेकः स उच्यते" ॥ इति लक्षणात् ॥

का त्वमेकाकिनी भीरु निरन्वयजने[1] वने ।
क्षुध्यन्तोऽप्यघसन् व्यालास्त्वामपालां कथं न वा ॥ ६६ ॥

६६. का त्वमिति ॥ हे भीरु त्रस्नो एकाकिन्यसहाया ॥ "एकादाकिनिच्चासहाये" ॥ "ऋन्नेभ्यो ङीप्" ॥ निरन्वयाः निरनुप्रवेशाः नराः यस्मिंस्तस्मिन् मनुष्यसंचारशून्ये वने का त्वम् । क्षुध्यन्तो बुभुक्षमाणाः व्यालाः श्वापदाः । 'व्यालः श्वापदसर्पयोः' इति विश्वः। पालयतीति पालः । पचाद्यच् । अपालामरक्षकां त्वां कथं वा नाघसन्नपि नाभक्षयन्नपि । अहो महच्चित्रमिति भावः । अपिः संभावनायाम् ॥ "लुङ्सनोर्घस्लृ" इत्यदेर्घस्लादेशो लृदित्वादङ् ॥

हृदयङ्गममूर्त्तिस्त्वं सुभगम्भावुकं वनम् ।
कुर्वाणा भीममप्येतद्दाभ्यैः केन हेतुना ॥ ६७ ॥

६७. हृदयङ्गमेति ॥ हे सौम्ये हृदयं गच्छन्ती हृदयङ्गमा हृद्या मूर्त्तिर्यस्याः सा ॥ "गमश्च" इति खचि मुम् ॥ त्वं भीमं भयङ्करमप्येतद्वनम् । असुभगं सुभगं भवतीति सुभगम्भावुकं सौम्यं कुर्वाणा ॥

१ नरे T2, T3, T4, D., T., G., Com. | °वने वरे E1.

"कर्त्तरि भुवः—" इत्यादिना च्व्यर्थे भुवः खुकञ् ॥ मुमागमः । केन हेतुना अभ्यैरभ्यगच्छः । इणो लङ्याड्वृद्धिः । वद ॥

सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे ।
पुण्यकृच्चाटुकारस्ते किङ्करः सुरतेषु कः ॥ ६८ ॥

६८. सुकृतमिति ॥ हे सुभगे त्वं रहस्येकान्ते प्रियं करोतीति प्रियकारी प्रियकरा अनुकूलवर्तिनी सती ॥ "क्षेमप्रियमद्रेऽण् च" इत्यणि ङीप् ॥ कं सुकृतं साधुकारिणम् ॥ "सुकर्मपाप—" इत्यादिना क्विप् ॥ उपतिष्ठसे संगच्छसि । उपात्संगतिकरणे आत्मनेपदम् । किं च सुरतेषु ते तव चाटुकारः प्रियवादी ॥ "न शब्दश्लोक—" इत्यादिना टप्रतिषेधात् "कर्मण्यण्" ॥ किमपि करोत्यानुकूल्येनेति किङ्करो दासः ॥ "कृञो हेतु—" इत्यादिनानुलोम्ये टप्रत्ययः ॥ पुण्यकृत् कः । अकृतपुण्येन दुर्लभत्वादीदृक्फलस्येति भावः ॥ "सुकर्म—" इत्यादिनैव क्विप् । कस्ते भर्त्तेति प्रश्नार्थः । एतेन समानराग उक्तः । अन्यथा रसाभासप्रसङ्गात् । किङ्कर इत्यत्र हेत्वाद्यर्थविवक्षायां "कृञो हेतु—" इत्यादिना ट एव । जातिः किङ्करीत्यादिङीबन्तप्रयोगदर्शनात् । तदविवक्षायां तु "दिवा—'इत्यादि सूत्रप्राप्तटप्रत्ययबाधेन 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यजेव । किङ्करा यत्करेत्यादिटाबन्तप्रयोगदर्शनात् । यत्तु '"दिवा—"आदिनैव टप्रत्ययः अज्विधानं तु स्त्रीलिङ्गमात्रविषयम्' इति जयमङ्गलाकारव्याख्यानं तद्वृत्तावच्प्रत्ययान्तत्वाभिव्यक्त्यर्थे किङ्करा यत्करेति टाबन्तोदाहरणदर्शनाद्भ्रान्तमित्युपेक्ष्यम् ॥

परिपर्युदधे रूपमाद्युलोकाच्च दुर्लभम् ।
भावत्कं दृष्टवत्स्वेतदस्मास्वधि सुजीवितम् ॥ ६९ ॥

६९. परिपरीति ॥ उदधेः परिपरि उदधिं वर्जयित्वा स्थितमिति शेषः । तत्रापि दुर्लभमित्यर्थः ॥ "परेर्वर्जने" ॥ 'असमासे वा' इत्यसमासपक्षे विकल्पाद्द्विर्वचनम् ॥ "अपपरी वर्जने" इति कर्मप्रवचनीयत्वाद्द्वितीयाप्राप्तौ "पञ्चम्यपाङ्परिभिः" इति तदपवादिनी पञ्चमी ॥

माद्युलोकाद्रास्वर्गाच्च दुर्लभम् । भूवत्स्वर्गेऽपि दुर्लभमित्यर्थः ॥ "आङ्मर्यादाभिविध्योः" इति विकल्पाद्समासः ॥ "आङ् मर्यादावचने" इति वचनग्रहणादभिविधावपि कर्मप्रवचनीयत्वेऽपि पूर्ववत्पञ्चमी । भवत्या इदं भावत्कं भवदीयम् ॥ "भवतष्ठक्छसौ" इति ठकि ठक्छसोरुपसङ्ख्यानात्पुंवद्भावे "इसुसुक्तान्तात्कः" ॥ एतद्रूपं दृष्टवत्स्वस्मासु अधि अस्मदधिकरण इत्यर्थः । "अधिपरी अनर्थकौ" इति कर्मप्रवचनीयसंज्ञायाः गत्युपसर्गसंज्ञानिवृत्तिमात्रार्थत्वात् तद्योगेऽपि न द्वितीया । विभक्त्यर्थमात्रद्योतकत्वमानर्थक्यम् । 'तिङ्कृत्तद्धितादिष्वपरिगणनात्तद्द्योतितेऽप्यर्थे भवत्येव विभक्तिः' इति न्यासकारः । सुजीवितमिति वर्त्तत इति शेषः । त्वद्रूपदर्शनादस्मज्जीवितं सुजीवितमित्यर्थः ॥

आ[1]पीतमधुका भृङ्गैः सुदिवेवारविन्दिनी ।
सत्पररि[2]मलक्ष्मीका नापुंस्कासीति मे मतिः ॥ ७० ॥

७०. आपीतेति ॥ भृङ्गैरापीतमधुका निष्पीतमकरन्दा । वैभाषिकः शैषिकः कप् । शोभना दिवा दिनं यस्याः सा सुदिवा । अर्ककरसम्पर्कशालिनीत्यर्थः ॥ "सुप्रातसुश्वसुदिव—" इत्यादिना समासान्तनिपातः ॥ अरविन्दिनी कमलिनीव स्थिता । सती परिमललक्ष्मीर्विमर्दगन्धसंपत्तिर्यस्याः सा सत्परिमललक्ष्मीका । 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे' इत्यमरः । एकवचनान्तस्य लक्ष्मीशब्दस्योरःप्रभृतिषु पाठात् "उरःप्रभृतिभ्यः कप्" इति बहुव्रीहौ समासान्तः कप् । छन्दोभङ्गवहनं तु पूर्ववत् । ईदृशी त्वमपुंस्का अविद्यमानपुंस्का । अविद्यमानपुरुषसम्पर्केत्यर्थः । लक्ष्मीशब्दवत्पुंशब्दस्यैकवचनस्य उरःप्रभृतिपाठात्कप् ॥ "पुमः खय्यम्परे" इति पुंसो रुत्वे विसर्जनीयस्य "संपुंकानां सो वक्तव्यः" इति ≍कपापवादो सः ॥ नासि न भवसि । किं तु भुक्तपूर्वैवेति मे मतिर्मम प्रतिपत्तिः ॥

१ आपीत N., T3, D., T., G., Com. | २ °परीमल° T2, T4.

मिथ्यैव श्रीः श्रियम्मन्या श्रीमन्मन्यो मृषा हरिः।
साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियं[1] श्रियम् ॥ ७१ ॥

७१. मिथ्येति ॥ श्रियो लक्ष्म्याः श्रियं शोभां हरन्तीं ततोऽधिकशोभामित्यर्थः। त्वां साक्षात्कृत्य प्रत्यक्षीकृत्य॥ "साक्षात्प्रभृतीनि च" इति पक्षे गतित्वात्समासे क्त्वो ल्यप्॥ अहं श्रियमात्मानं मन्यमाना श्रियम्मन्या॥ "आत्ममाने खश्च"॥ "दिवादिभ्यः श्यन्"॥ "इच एकाचोऽम्प्रत्ययवच्च" इत्यमागमे तस्याम्प्रत्ययवद्भावात् "न विभक्तौ तुस्माः" इति मलोपप्रतिषेधः। क्विबन्तानां धातुत्वानपायादियङादेशः। श्रीर्मिथ्यैव न श्रीरित्यर्थः। श्रीमन्तमात्मानं मन्यमानः श्रीमन्मन्यः। पूर्ववत्खश्। हरिर्मृषैव। न श्रीमानित्यर्थः। किं तु त्वमेव श्रीः त्वदीय एव श्रीमानिति भावः। इत्यभिमन्ये॥

नोदकण्ठिष्यतात्यर्थं त्वामैक्षिष्यत चेत्स्मरः।
खेलायन्[2]निशं नापि सजूःकृत्य रतिं वसेत् ॥ ७२ ॥

७२. नेति ॥ स्मरः त्वामैक्षिष्यत चेत् ईक्षेत चेत् रतिं प्रति अत्यर्थं नोदकण्ठिष्यत किंचिदपि नोत्कण्ठेतेत्यर्थः। क्रियातिपत्तौ लृङ्। किंचानिशं खेलायन् क्रीडन्। कण्ड्वादियगन्ताल्लटः शत्रादेशः। रतिं सजूःकृत्य सहचरीकृत्यापि। 'सजूःकरोत्यात्मनेऽपि साह्ये सत्राकरोति च' इति भट्टमल्लः। ऊर्यादित्वेन गतित्वात्समासे क्त्वो ल्यप्। न वसेत्॥

वल्गूयन्तीं विलोक्य त्वां स्त्री न मन्तूयतीह का।
कान्तिं नाभिमनायेत को वा स्थाणुसमोऽपि ते ॥ ७३ ॥

७३. वल्गूयन्तीमिति ॥ वल्गूयन्तीं मनो हरन्तीं त्वां विलोक्य इहास्मिन् लोके का स्त्री न मन्तूयति न कुप्यति नेर्ष्यतीत्यर्थः। उभयत्र धातोः कण्ड्वादित्वाद्यक्॥ "अकृत्सार्वधातुकयोर्दीर्घः" किं च स्थाणु-

[1] श्रियं श्रियः N., C., T., B., T1, G. | [2] खेलयन् T2, T3.

समः काष्ठतुल्योऽत्यन्तमूढोऽपि रुद्रतुल्योऽपि वा कस्ते तव कान्ति लावण्यं विलोक्य नाभिमनायेत नोत्सुकायेत । भृशादित्वात् क्यङ् सलोपश्च । संभावनायां लिङ् ॥

दुःखायते जनः सर्वः स एवैकः सुखायते ।
यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके[1] ॥ ७४ ॥

७४. दुःखायत इति ॥ सर्वो जनो दुःखायते दुःखमनुभवति । किं तु स एक एव सुखायते सुखमनुभवति ॥ "सुखादिभ्यः कर्तृवेदनायाम्" इत्युभयत्रापि क्यङ् ॥ यस्यान्तिके त्वमुत्सुकायमाना उत्सुकाभवन्ती न प्रतीपायसे न प्रतीपा अप्रतिकूला भवसि । उभयत्रापि भृशादित्वात्क्यङ् ॥

कः पण्डितायमानस्त्वामादायामिषसन्निभाम् ।
त्रस्यन् वैरायमाणेभ्यः शून्यमन्ववसद्वनम् ॥ ७५ ॥

७५. क इति ॥ अपण्डितः पण्डितो भवन् पण्डितायमानो दुर्बुद्धिः कः । भृशादित्वात्क्यङ् । आमिषसन्निभां मांसपिण्डकल्पां तद्वन्मृद्वङ्गीमित्यर्थः । त्वामादायानीय वैरायमाणेभ्यो वैरं कुर्वाणेभ्यः ॥ "शब्दवैर—" इत्यादिना क्यङि शानच् ॥ "भीत्रार्थानाम्—" इत्यपादानत्वात्पञ्चमी ॥ त्रस्यन् शून्यं वनमन्ववसत् । वने उषितवानित्यर्थः ॥ "उपान्वध्याङ्वसः" इत्यधिकरणस्य कर्मत्वम् ॥

ओजायमाना तस्यार्घ्यं[2] प्रणीय[3] जनकात्मजा ।
उवाच दशमूर्धानं सादरा[4] गद्गदं वचः ॥ ७६ ॥

७६. ओजायमानेति ॥ ओज इवाचरन्ती ओजायमाना । मूर्त्तमोज इव स्थितेत्यर्थः ॥ "कर्त्तुः क्यङ् सलोपश्च" इति क्यङ् नित्यं सलोपश्च ।

१ °ऽन्तिकम् c.
२ °र्घं E1, E2.
३ प्रदाय T3, T., G., Com.
४ सादरं T4.

"ओजसोऽप्सरसो नित्यं पयसस्तु विभाषया" इति वचनात् । जनकात्मजा सीता तस्य रावणस्य । सम्प्रदानत्वेऽपि संबन्धसामान्ये षष्ठी । अर्घ्यमर्घार्थं जलम् ॥ "पादार्घाभ्यां च" इति यत्प्रत्ययः ॥ प्रदाय दत्त्वा सादरा सती दशमूर्धानं रावणं गद्गदं भयात्किञ्चित्कण्ठं यथा तथा वच उवाच । "ब्रुविशासि—" इति वचनात् द्विकर्मकत्वम् ॥

महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम् ॥ ७७ ॥

७७. यत्पृष्टं सुकृतं प्रियकारीत्यत्र कस्ते भर्त्तेति तत्रोत्तरमाह महाकुलीन इति ॥ महाकुलस्यापत्यं पुमान् महाकुलीनः ॥ "महाकुलादञ्खञौ" इति विकल्पादनुवृत्तः खप्रत्ययः । आदिवृद्धिपाठे सौत्रः खञ्प्रत्ययः । इक्ष्वाकूणामयमैक्ष्वाकः ॥ "दाण्डिनायन—" इति निपातनादुकारलोपः । तस्मिन्वंशे दाशरथिर्दशरथसुतः ॥ "अत इञ्" ॥ मम भर्त्ता । कथंभूतः । पितुः प्रियङ्करः प्रियकारी । तपस्विनां क्षेमकारः क्षेमङ्करः ॥ "क्षेमप्रियमद्रेऽण् च" इति यथाक्रमं खजणौ ॥

निहन्ता वैरकाराणां सतां बहुकरः सदा ।
पारश्वधिकरामस्य शक्तेरन्तकरो रणे ॥ ७८ ॥

७८. निहन्तेति ॥ वैरकाराणां वैरायितॄणाम् ॥ "न शब्द—" इत्यादिना टप्रतिषेधे "कर्मण्यण्" ॥ कर्मणि षष्ठी । निहन्ता । तृच् । सदा सतां बहुकरो बहूपकर्त्ता ॥ "कृञो हेतु—" इत्यादिना ताच्छील्ये टप्रत्ययः ॥ शेषं किङ्करवत् । परश्वधः प्रहरणमस्य पारश्वधिकः ॥ "परश्वधाट्ठञ्च" इति ठक् ॥ तस्य रामस्य परशुरामस्य । 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इत्यमरः । शक्तेः सामर्थ्यस्य रणे अन्तकरो नाशकरः ॥ "दिवाविभा—" इत्यादिना टप्रत्ययः ॥

---

१ माहा° D., E1. | २ क्षेमंकरः C.

अध्वरेष्विष्टिनां पाता पूर्त्ता कर्मसु सर्वदा ।
पितुर्नियोगाद्राजत्वं हित्वा योऽभ्यागमद्वनम् ॥ ७९ ॥

७९. अध्वरेष्विति ॥ अध्वरेषु यागेषु इष्टमेभिरिष्टिनः । अध्वरानिष्टवन्त इत्यर्थः ॥ "इष्टादिभ्यश्च" इतीनिप्रत्ययः । 'क्तस्येन्विषयस्य कर्मणि सप्तमी वक्तव्या' । तेषां पाता रक्षिता । सर्वदा पूर्त्तकर्मसु खातश्राद्धादिकर्मसु पाता तेषामपि रक्षक इत्यर्थः । यो रामः पितृनियोगाद्राजत्वं राज्यं हित्वा वनमभ्यगमत् । गमेर्लुङि लृदित्वादङ् ॥

पतत्रिक्रोष्टुजुष्टानि रक्षांसि भयदे वने ।
यस्य बाणैर्निकृत्तानि श्रेणीभूतानि शेरते ॥ ८० ॥

८०. पतत्रीति ॥ भयदे वने यस्य बाणैर्निकृत्तानि भिन्नानि रक्षांसि । पतत्रिभिः पक्षिभिः क्रोष्टुभिः शृगालैश्च जुष्टानि भक्षितानीत्यर्थः । अश्रेणयः श्रेणयो भूतानि श्रेणीभूतानि राशीभूतानीत्यर्थः । "श्रेण्यादिषु च्व्यर्थवचनम्" इति च्व्यर्थानामच्व्यन्तानां "श्रेण्यादयः कृतादिभिः" इति समासः । च्व्यन्तानां तु "ऊर्यादिच्विडाचश्च" इति गतित्वात् "कुगतिप्रादयः" इति समासः । शेरते दीर्घं निद्रान्तीत्यर्थः ॥ "शीङो रुट्" इति रुडागमः ॥

दीव्यमानं शितान्बाणानस्यमानं महागदाः ।
निघ्नानं शात्रवान्रामं कथं त्वं नावगच्छसि ॥ ८१ ॥

८१. दीव्यमानमिति ॥ शितान् बाणान् शितैर्बाणैः ॥ "दिवः कर्म च" इति करणस्य कर्मत्वम् ॥ दीव्यमानं देवनशीलम् । देवनं क्रीडा विजिगीषा वा । महागदाः अस्यमानं क्षेपमाणम् । तद्योग्यवयस्कमित्यर्थः । शत्रूनेव शात्रवान् । स्वार्थेऽण् । निघ्नानं निहननशक्तम् ॥ "गमहन—" इत्यादिना उपधालोपः । क्रमात् त्रिषु "ताच्छील्यवयोवचनशक्तिषु चानश्" इति चानश् । तं रामं कथं नावगच्छसि न वेत्सि ॥

१ पूर्त्तकर्मसु T3, T4, T., G., Com.
२ ॰ऽभ्यगमद्वनम् T3, E1, T., G., Com.
३ रणे E2.
४ बाणैर्निकृत्तानि B., E2.

भ्रातरि न्यस्य यातो मां मृगाविन्मृगयामसौ।
एषितुं[1] प्रेषितो यातो मया तस्यानुजो[2] वनम्॥ ८२॥

८२. भ्रातरीति॥ मृगान्विध्यतीति मृगावित्। क्विप्॥ "नहिवृति—" इत्यादिना पूर्वस्य दीर्घः॥ असौ रामो मां भ्रातरि लक्ष्मणे न्यस्य रक्षणार्थमर्पयित्वा मृगयामाखेटम्। 'आखेटो मृगया स्त्रियाम्' इत्यमरः। परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानाच्छप्रत्ययान्तो निपातः। यातो गतः। तं राममेषितुमन्वेतुम्। इष्यतेर्गत्यर्थत्वान्नित्यमिडागमः। तस्य रामस्यानुजो लक्ष्मणो मया वनं प्रति प्रेषितः। पूर्ववदिडागमः। यातः।

अथायस्यन् कषायाक्षः स्यन्नस्वेदकणोल्वणः[3]।
संदर्शितान्तराकूतस्तामवादीद्दशाननः॥ ८३॥

८३. अथेति॥ अथ सीतावाक्यश्रवणानन्तरमायस्यन् प्रयस्यन् क्रोधादुच्चलन्नित्यर्थः। यसु प्रयत्ने दैवादिकः ततो लटः शत्रादेशः। कषायाक्षो रोषरक्ताक्षः। 'रागे काथे कषायोऽस्त्री' इति यादवः। क्रोधादेव स्विन्नः अत एव स्वेदकणैरुल्वणः प्रचुरः दशाननः संदर्शितमान्तरमाकूतमभिप्रायो येन स सन्। तां सीतामवादीत्॥ "वदव्रज—" इति सिचि वृद्धिः॥

कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयं[4] विवासितम्[5]।
को नग्नमुषितप्रख्यं बहु मन्येत राघवम्॥ ८४॥

८४. कृत इति॥ कानिष्ठिनेयस्य कनिष्ठापुत्रस्य भरतस्य कृते कार्यार्थम्। संपदादित्वात्क्विप्। अव्ययमिति केचित्। विवासितं प्रवासितम्। अत एव नग्नमुषितप्रख्यम्। मुषितो हृतवस्त्रः अत एव नग्नः॥ "पूर्वकाल—" इत्यादिना समासे राजदन्तादित्वात्पूर्वकालस्य परनि-

१ सचितुं T2.
२ रामं E3.
३ स्विन्नः स्वेद° T4., T., G., Com. स्यन्दत्स्वेद° E2.
४ °मगादीद° B.
५ ज्यैष्ठिनेयो विवासितः D.

पातः ॥ तत्प्रख्यं तत्तुल्यम् । ज्यैष्ठिनेयं ज्येष्ठापुत्रं ज्येष्ठमिति भावः। उभयत्र "कल्याणादीनामिनङ्" इतीनङादेशः । राघवं रामं को बहु मन्येत पूजयेत् । न कोऽपीत्यर्थः । बह्विति क्रियाविशेषणम् ॥

राक्षसान्बटुयज्ञेषु[1] पिण्डीशूरान्[2] निरस्तवान् ।
यद्यसौ कूपमाण्डूकि तवैतावति कः स्मयः ॥ ८५ ॥

८५. यदुक्तमध्वरेष्विष्टिनां पातेति तदाभासीकरोति राक्षसानिति ॥ असौ रामो बटुयज्ञेषु कुब्रह्मयज्ञकेषु पिण्डेशूरानन्नशूरान् न तु रणशूरान् । 'गेहे-नर्दी गृहेशूरः पिण्डेशूरश्च कथ्यते' इति हलायुधः । पात्रेसम्मितादि-त्वात्समासः । सः राक्षसान्निरस्तवान्यदि हतवांश्चेत् । हे कूपमाण्डूकि तत्तुल्यबुद्धे ॥ "ढक् च मण्डूकात्" इति चकारादपत्याणि ङीप् । तवै-तावत्येतावन्मात्रे कः स्मयो विस्मयः । यथा कूपमाण्डूकी कूपमेव सर्वाधिकं मन्यते न तु समुद्रादिकं तथा त्वमपि राममेव बहु मन्यसे नास्मान् जानासीति तात्पर्यार्थः ॥

मत्पराक्रमसंक्षिप्तराज्यभोगपरिच्छदः ।
ममैव युक्तं[3] किं वक्तुं दरिद्राति यथा हरिः ॥ ८६ ॥

८६. मदिति ॥ मम पराक्रमेण संक्षिप्ताः सुहृताः राज्यभोगपरिच्छदाः हस्त्यश्वादिराज्योपभोगसाधनानि यस्य सः । मदपहृतसर्वस्व इत्यर्थः। हरिरिन्द्रो यथा दरिद्राति निःस्वो भवति । दरिद्रा दुर्गतौ । लटि शपो लुक् । तन्ममैव वक्तुं युक्तं किम् । न युक्तमित्यर्थः । आत्मश्लाघायाः लोकवेदगर्हितत्वादितिभावः ।

निर्लङ्को[4] विमदः स्वामी धनानां हृतपुष्पकः ।
अध्यास्तेऽन्तर्गिरं यस्मात् कस्तन्नावैति कारणम्[5] ॥ ८७ ॥

---

१ बहु° D.
२ पिण्डेशूरान् T., G., Com.
३ युक्तं ममैव किं वक्तुम् N., C., c., E3, T1, T.,
४ नितङ्को E3.
५ रावणम् T3, E1.

८७. निर्लङ्क इति ॥ यस्मान्मद्विक्रमलक्षणात् कारणात् धनानां स्वामी कुबेरः । निष्क्रान्तो लङ्कायाः निर्लङ्कः सन् । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति गतिसमासः । द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु परलिङ्गताप्रतिषेधाद्विशेष्यलिङ्गता ॥ "एकविभक्ति चापूर्वनिपाते" इति लङ्काशब्दस्योपसर्जनत्वात् "गोस्त्रियोरुपसर्जनस्य" इत्युपसर्जनह्रस्वत्वम् । हृतपुष्पकोऽपहृतविमानश्च । अत एव विमदो वीतदर्पः सन् । गिरावन्तर्गिरं कैलासमित्यर्थः । अध्यास्ते । विभक्त्यर्थेऽव्ययीभावः ॥ "गिरेश्च सेनकस्य" इति विकल्पादव्ययीभावसमासान्तष्टच् ॥ "अधिशीङ्स्थासां कर्म" इति कर्मत्वात् द्वितीया ॥ "अव्ययीभावश्च" इत्यव्ययत्वम् ॥ तत्कारणं मद्विक्रमलक्षणं को नावैति न वेत्ति । सर्वोऽपि वेत्त्येवेत्यर्थः ॥

भिन्ननौक इव ध्यायन् मत्तो बिभ्यद्यमः स्वयम् ।
क्ष्णिमानं दधानेन मुखेनास्ते निरुद्यतिः ॥ ८८ ॥

८८. भिन्नेति ॥ किं च यमोऽन्तकः स्वयं मत्तो मत्सकाशाद्बिभ्यत् त्रस्यन् भिन्ननौको मध्येजलं विशीर्णतरणिरिव । 'स्त्रियां नौस्तरणिस्तरीः' इत्यमरः । कप् । ध्यायन् का गतिरिति चिन्तयन् क्ष्णिमानं मालिन्यं दधानेन मुखेनोपलक्षितः । विवर्णमुखः सन्नित्यर्थः । निरुद्यतिर्निरुद्योगः सन् । यमेः स्त्रियां क्तिन् । अनुनासिकलोपः । आस्ते न तु किञ्चिद्व्याप्रियत इत्यर्थः ॥

समुद्रोपत्यका हैमी पर्वताधित्यका पुरी ।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि ॥ ८९ ॥

८९. समुद्रेति ॥ हे मैथिलि समुद्रस्योपत्यका आसन्ना समुद्रपरिसरेत्यर्थः ।•पर्वतासन्नवाचकेनासन्नमात्रं लक्ष्यते । पर्वतस्य त्रिकूटाद्रेरधित्यका । लक्षणया उपरि स्थितेत्यर्थः । गिरिदुर्गं चेत्यर्थः । 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः ॥ "उपाधिभ्यां त्यकन्ना-

सञ्ज्ञारूढयोः" इति त्यकन्प्रत्ययः । प्रतिषेधे त्यकन उपसंख्याना त्कात्पूर्वस्येत्वाभावः । हेम्नो विकारो हैमी हेममयी ॥ "प्राणिरजतादिभ्योऽञ्" ॥ "नस्तद्धिते" इति टिलोपः ॥ रत्नानां पारस्य समासेऽयनं स्थानं सर्वरत्नानामाकर इत्यर्थः । नाम्ना लङ्केति प्रसिद्धा मम पुरीति प्ररोचनापि यथार्थैव ॥

आवासे सिक्तसंमृष्टे गन्धैस्त्वं लिप्तवासिता ।
अर्पितोरुसुगन्धिस्रक् तस्यां वस मया सह ॥ ९० ॥

९०. आवास इति ॥ हे सीते तस्यां पुर्यां सिक्तसंमृष्टे पूर्वं गन्धोदकैः सिक्ते पश्चाच्छोधनीभिः संमृष्टे शोधिते । स्नातानुलिप्तवत् ॥ "पूर्वकाल—" इत्यादिना समासः ॥ आवासे गृहे त्वं गन्धैर्यक्षकर्दमादिभिर्लिप्ता अनुलिप्ता पश्चाद्वासिता अगरुधूपादिभिरधिवासिता । पूर्ववत्समासः । अर्पिताः न्यस्ताः उरवः प्रभूताः सुगन्धयः शोभनगन्धाः स्रजो यस्याः सा सती ॥ "गन्धस्येदुत्पूतिसुसुरभिभ्यः" इति समासान्त इकारः ॥ मया सह वस । प्रार्थनायां लोट् ॥

संगच्छ पौंस्नि स्त्रैणं मां युवानं तरुणी शुभे ।
राघवः प्रोष्यपापीयान् जहीहि तमकिंचनम् ॥ ९१ ॥

९१. संगच्छेति ॥ हे शुभे शोभने । इगुपधलक्षणः कप्रत्ययः । हे पौंस्नि पुंहिते पुमर्हे वा पौंस्नि । एवं स्त्रीभ्यो हितमर्हं वा स्त्रैणम् । नञ्स्नञो-रुपसंख्यानादीकारः । युवानं तरुणं मां मा तरुणी युवतिः । तरुणस्योपसंख्यानान्ङीप् । त्वं संगच्छ प्राप्नुहि । सकर्मकत्वात् "समो गम्यृच्छि—" इत्यादिना नात्मनेपदम् । राघवो रामः प्रोष्य राज्यात्प्रभ्रश्य अत एवातिशयेन पापो निकृष्टः पापीयान् अभाग्य इत्यर्थः । 'अथ त्रिषु द्रव्ये पुण्यपापसुखानि च' इति विशेष्यलिङ्गत्वात् पापशब्दादीयसुनि तदुत्तरपदस्तत्पुरुषो मयूरव्यंसकादित्वात्साधुः । नास्ति किंचनास्येत्यकिंचनं निःस्वम् । मयूरव्यंसकादिषूच्चावचोच्चनीचाचोपचाचपराचनखप्रचनिश्चप्रचाकिंचनाकुतोभयानीति पाठात्साधुः । तं रामं

जहीहि त्यज । जहातेः प्राप्तकाले लोट् । सेर्हित्वे "आच हौ" इति चकाराद्वैकल्पिक ईकारः ॥

अश्नीतपिबतीयन्ती प्रसिता[1] स्मरकर्मणि ।
वशेकृत्य[2] दशग्रीवं मोदस्व वरमन्दिरे ॥ ९२ ॥

९२. अश्नीतेति ॥ अश्नीत पिबतेति सातत्येन यस्यां क्रियायां सा अश्नीतपिबता गृहे सर्वनियामकत्वं स्वाम्यमिति यावत् । मयूरव्यंसकादिषु 'आख्यातमाख्यातेन समस्यते क्रियासातत्ये' इति वचनात्समासः । तामात्मन इच्छन्ती अश्नीतपिबतीयन्ती स्वामिनी सतीत्यर्थः ॥ "सुप आत्मनः क्यच्" ॥ ततः लटः शतरि ङीप् । स्मरकर्मणि प्रसिता सुरतासक्ता सती । 'तत्परे प्रसितासक्तौ' इत्यमरः । दशग्रीवं वशीकृत्य वरमन्दिरे रम्यगृहे मोदस्व आनन्देत्यर्थः ॥

मा स्म भूर्ग्राहिणी भीरु गन्तुमुत्साहिनी भव ।
उद्भासिनी च भूत्वा नो[3] वक्षःसम्मर्दिनी भव ॥ ९३ ॥

९३. मास्मेति ॥ हे भीरु ग्राहिणी आग्रहिणी प्रतिकूला मा स्म भूः ॥ "स्मोत्तरे लङ् च" इति चकाराल्लुङ् ॥ गन्तुं प्रस्थातुम् । उत्सहत इत्युत्साहिनी भव । उद्भासत इति उद्भासिनी भूत्वा नोऽस्माकं वक्षःसंमर्दिनी वक्षसः पीडयित्रीति षष्ठीसमासः । अनुपपदाधिकारात् । भव । आलिङ्गेत्यर्थः । सर्वत्र "नन्दिग्रहि—" इत्यादिना णिनिः ॥

तां प्रातिकूलिकीं[4] मत्वा जिहीर्षुर्भीमविग्रहः[5] ।
बाहूपपीडमाश्लिष्य जगर्हे[6] द्यां निशाचरः ॥ ९४ ॥

९४. तामिति ॥ निशाचरो रावणस्तां सीतां प्रतिकूलं वर्त्तत इति प्रातिकूलिकीं प्रतिकूलवर्त्तिनीमनुनयासाध्याम् ॥ "तत्प्रत्यनुपूर्वमीपलोमकूलम्" इति ठक् ॥ मत्वा निश्चित्य जिहीर्षुर्बलादपहर्त्तुमिच्छुः

१ प्रसृता E1.
२ वशीकृत्य T2, T4, D., T., G., Com.
३ मे C., N., T1, T., T4, E3, c.
४ प्रातिकूलिनीं T2.
५ °विक्रमः T2, E2.
६ जगाम T3.

भीमविग्रहो भयोत्पादनाय प्रकटीकृतनिजाकारः सन् । बाहुभ्यामुपपीड्य बाहूपपीडम् । "सप्तम्यां चोपपीड—" इत्यादिना णमुल् ॥ आश्लिष्य द्यां दिवमाकाशं जगाहे जगाम । दिव्शब्दादन्य ओकारान्तो द्योशब्दः तस्यामि "औतोऽम्शसोः" इत्यात्वम् ॥

त्रस्यन्तीं तां समादाय[1] यातो रात्रिञ्चरालयम्[2] ।
तूष्णींभूय भयादासाञ्चक्रिरे मृगपक्षिणः ॥ ९५ ॥

९५. त्रस्यन्तीमिति ॥ त्रस्यन्तीं तद्रूपदर्शनाद्बिभ्यतीं तां सीतां समादाय गृहीत्वा । रात्रौ चरन्तीति रात्रिञ्चराः राक्षसाः ॥ "चरेष्टः" ॥ "रात्रेः कृति विभाषा" इति पक्षे मुमागमः ॥ तेषामालयं लङ्कां यातो गच्छतो रावणात् । यातेः शत्रन्तात् "भीत्रार्थानां भयहेतुः" इत्यपादानत्वात्पञ्चमी । भयाद्भयादिवेत्यर्थः । व्यञ्जकाप्रयोगाद्गम्योत्प्रेक्षा । मृगाश्च पक्षिणश्च मृगपक्षिणः तूष्णींभूय तूष्णीं भूत्वा मौनीभूयेत्यर्थः । 'मौने तु तूष्णीं तूष्णीकाम्' इत्यमरः ॥ "तूष्णीमि भुवः" इति पक्षे क्त्वाप्रत्ययः ॥ "क्त्वा च" इति पक्षे समासे क्त्वो ल्यबादेशः आसाञ्चक्रिरे आसितवन्तः । न तु न्यवारयन्नित्यर्थः । तेन निवारकान्तराभावो व्यज्यत इत्यलंकारेण वस्तुध्वनिः । आसेर्लिट् ॥ "दयायासश्च" इत्याम्प्रत्ययः ॥

उच्चै रारस्यमानां तां कृपणां रामलक्ष्मणौ ।
जटायुः प्राप पक्षीन्द्रः परुषं रावणं वदन् ॥ ९६ ॥

९६. उच्चैरिति ॥ उच्चैस्तारं रामलक्ष्मणौ रारस्यमानां हा राम हा लक्ष्मणेति भृशं क्रोशन्तीम् । रसतेः शब्दकर्मणो यङन्तात् लटः शानचि टाप् । कृपणां दीनां तां सीतां जटायुर्नाम पक्षीन्द्रो गृध्रराजो रावणं परुषं रे रे चोर दुरात्मन् क यासीत्यादिनिष्ठुरं वदन् प्राप । वत्से मा भैषीरित्याश्वासयन्नागत इत्यर्थः ॥

एते प्रकीर्णकाः ।

---

१ तामुपादाय T_2, T_3, D., E_1. | २ रात्रिचरा° E_3.

अतः परं टाधिकारः ।

द्विषन्वनेचराग्र्याणां त्वमादायचरो वने ।
अग्रेसरो जघन्यानां मा भूः पूर्वसरो मम ॥ ९७ ॥

९७. एवं प्रकीर्णकाण्डं समाप्याधिकारकाण्डमन्तरान्तरा प्रकीर्णकसंकीर्णमारभमाणः प्रथमं तावत् टप्रत्ययाधिकारमारभते द्विषन्नित्यादिना ॥ हे द्विषन्नमित्र ॥ "द्विषोऽमित्रे" इति शतृप्रत्ययः ॥ वनेऽस्मिन्नरण्ये । वने चरन्तीति वनेचरास्तापसाः ॥ "चरेष्टः" इति टप्रत्ययः ॥ तेष्वग्र्याणां श्रेष्ठानाम् । कर्मणि षष्ठी । आदाय गृहीत्वा चरति भक्षतीत्यादायचरः आच्छिद्य भक्षकः ॥ "भिक्षासेनादायेषु च" इति टः ॥ जघनमिव जघन्या नीचाः ॥ "शाखादिभ्यो यः" ॥ तेषामग्रे सरतीति अग्रेसरोऽधमाधमस्त्वम् ॥ "पुरोऽग्रतोऽग्रेषु सर्त्तेः" इति टः ॥ मम पूर्वः सरतीति पूर्वसरोऽग्रयायी प्रष्ठो मा भूः ॥ "पूर्वे कर्त्तरि" इति टप्रत्ययः ॥ ममाग्रे निर्भीकः कथं चरसीत्यर्थः ॥

यशस्करसमाचारं ख्यातं भुवि दयाकरम् ।
पितुर्वाक्यकरं रामं धिक् त्वां दुन्वन्तमत्रपम् ॥ ९८ ॥

९८. यशस्करेति ॥ यशः करोतीति यशस्करः यशोहेतुः समाचारश्चरित्रं यस्य तम् ॥ "अतः कृकमि—" इत्यादिना विसर्जनीयस्य सत्वम् ॥ अत एव भुवि ख्यातं प्रसिद्धम् । दयां करोति ताच्छील्येनेति दयाकरं पितुर्वाक्यकरमाज्ञाकरमनुकूलवर्तिनमित्यर्थः ॥ "कृञो हेतु—" इत्यादिना क्रमात् हेत्वाद्यर्थेषु टः ॥ एवंविधं रामं दुन्वन्तं परितापयन्तम् । दुनोतेः शतृप्रत्ययः । अत्रपं निर्लज्जं त्वां धिक् निन्दाम इत्यर्थः ॥

अहमन्तकरो नूनं ध्वान्तस्येव दिवाकरः ।
तव राक्षस रामस्य नेयः कर्मकरोपमः ॥ ९९ ॥

९९. अहमिति ॥ हे राक्षस । रामस्य कर्म करोतीति कर्मकरो भृत्यः ॥ "कर्मणि भृतौ" इति टः ॥ तदुपमस्तत्तुल्यः अत एव नेयो नेतव्यः

---

१ वनचर° T3. | २ धिक् त्वां रामं E3.

विधेयः अहं ध्वान्तस्य दिवाकरो दिनकर इव तव । अन्तं करोतीत्यन्तकरो नाशकरः नूनम् । उभयत्र दिवादिसूत्रणे टः ॥

सतामरुष्करं पक्षी वैरकारं[1] नराशिनम्[2] ।
हन्तुं कलहकारोऽसौ शब्दकारैः[3] पपात खम् ॥ १०० ॥

१००. सतामिति ॥ सतां सज्जनानामरुष्करं व्रणकरं पीडाकरमित्यर्थः । दिवादिना टः । वैरकारं सीताहरणेन वैरायमाणं शब्दकारं सिंहनादकरं नराशिनं राक्षसं हन्तुं कलहकारो युद्धकरः सन्नसौ पक्षी जटायुः खमाकाशमुत्पपात उज्जगाम । सर्वत्र वैरकारादौ "न शब्दश्लोक—" इत्यादिना टप्रतिषेधात् "कर्मण्यण्"। 'शब्दकारमित्यत्र "द्वितीयायां च" इति णमुल्' इति केचित् । पक्षी शब्दकारं सिंहनादं कृत्वा खमुत्पपातेति साधीयानेवायमर्थः ॥ किन्तु न शब्देत्यादिसूत्रोदाहरणप्रक्रमभङ्गदोषः सोढव्यः स्यात् ॥

अतः परं प्रकीर्णकाः ।

धुन्वन् सर्वपथीनं खे वितानं पक्षयोरसौ[4] ।
मांसशोणितसंदर्शं तुण्डघातमयुध्यत ॥ १०१ ॥

पुनःप्रकीर्णमेव श्लोकत्रयेणाह धुन्वन्नित्यादिना ॥ असौ पक्षी । सर्वान् पथः सर्वपथान् व्याप्नोतीति सर्वपथीनम् । "पूर्वकाल—" इति समासः ॥ "ऋक्पूर्—" इति समासान्तः ॥ "तत्सर्वादेः—" इत्यादिना खप्रत्ययः ॥ तं प्रसिद्धं पक्षयोर्वितानं धुन्वन् । विततौ पक्षौ धुन्वन्नित्यर्थः । साकल्येन मांसशोणिते संदृश्य मांसशोणितसंदर्शम् ॥ "कर्मणि दृशिविदोः साकल्ये" इति णमुल् ॥ दृशिरन्तर्हितण्यर्थः ॥ "अमैवाव्ययेन" इति समासः ॥ तुण्डेन घातो यस्मिन्कर्मणि तद्यथा तथेति

---

[1] वैरकारं तपस्विनाम् E2.
[2] नराशनम् B., D., E1, T3.
[3] शब्दकारं T., G., Com. शब्दपातं T2, T3, E1.
[4] तं T., G., Com.

घञन्तोत्तरपदो बहुव्रीहिः ॥ "करणे हनः" इति णमुलन्तत्वे पादघातं हन्तीतिवत् "कषादिषु—" इति यथाविध्यनुप्रयोगः स्यात् । न च "हिंसार्थानां च समानकर्मकाणाम्" इति णमुल् । अनुप्रयोगस्य युधेरकर्मकत्वेन समानकर्मकत्वाभावात् । अयुध्यत युद्धं कृतवान् । युधेर्दैवादिकाल्लुङि तङ् ॥

न बिभाय न जिह्राय न चक्राम न विव्यथे ।
आघ्नानो विध्यमानोऽपि[1] रणान्निववृते न[2] च ॥ १०२ ॥

१०२. नेति ॥ आघ्नानः स्वयमेव परं घ्नन् ॥ "आङो यमहनः" इत्यकर्मकाद्धन्तेस्तङ् ॥ "गमहन—" इत्यादिनोपधालोपः ॥ विध्यमानो व्याहन्यमानश्च । विध्यतेः कर्मणि यकि संप्रसारणम् । न बिभाय नाभैषीत् । शूरत्वादिति भावः । न जिह्राय न लज्जितवान् । अपराजितत्वादिति भावः । भीह्रीभ्यां लिटि तिपो णलि वृद्ध्यायादेशौ । न चक्राम न क्रान्तवान् । जितश्रमत्वादिति भावः । न विव्यथे न व्यथां गतवान् । मनस्वित्वादिति भावः । न चातिव्यायामादुपरतिरपीत्याह रणान्निववृते न च नोपरराम च । अनिवृत्तिविधानात् । अनिवृत्तिश्च विजयावधिकः प्राणावधिको वा व्यापार इति स्मरणादिति भावः । सर्वत्र लिट् ॥

पिशाचमुखधौरेयं सच्छत्रकवचं रथम् ।
युधि कद्रथवद्भीमं बभञ्ज ध्वजशालिनम् ॥ १०३ ॥

१०३. पिशाचेति ॥ किं चायं पक्षी युधि । पिशाचस्य मुखमिव मुखं येषां तादृशाः धुरं वहन्तीति धौरेया अश्वाः यस्य तम् ॥ "धुरो यड्ढकौ" इति ढक् ॥ सह छत्रकवचाभ्यां सच्छत्रकवचम् ॥ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः ॥ ध्वजेन शालते इति तच्छालिनं तच्छोभिनम् । भीमं भयंकरं रथम् । महान्तमपीति भावः । कुत्सितः

---

1 विध्यमानो वा N., T2, T3, D. विध्यमानोऽसौ E1.
2 न सः E2.

क्षुद्रो रथः कद्रथः ॥ "रथवदयोश्च" इति कोः कदादेशः ॥ तेन तुल्यं तद्वत् ॥ "तेन तुल्यम्—" इति वतिप्रत्ययः । बभञ्ज ॥

इति प्रकीर्णकाः ।

अतः परमामधिकारः ।

सन्त्रासयाञ्चकारारिं सुरान् पिप्राय पश्यतः ।
सन्त्याजयाञ्चकाराथ सीतां विंशतिबाहुना ॥ १०४ ॥

१०४. पुनः प्रकृतमधिकारकाण्डमेव ब्रुवन् आम्प्रत्ययाधिकारं तावदाह सन्त्रासयामिति ॥ अरिं रावणं सन्त्रासयाञ्चकार भीषयाञ्चक्रे । अथ सन्त्रासनानन्तरं विंशतिबाहुना दशाननेन सीतां सन्त्याजयाञ्चकार त्याजितवान् ॥ "कास्प्रत्ययात्—" इत्यादिना आम्प्रत्ययः ॥ "अयामन्त—" इत्यादिना णेरयादेशः । कृञोऽनुप्रयोगः । पश्यतः स्वपौरुषमालोकमानान् सुरान् पिप्राय प्रीणयामास । प्रीणातेर्लिट् । तिपो णलि वृद्ध्यायादेशौ ॥

असीतो रावणः कासाञ्चक्रे शस्त्रैर्निराकुलः ।
भूयस्तं बेभिदाञ्चक्रे नखतुण्डायुधः खगः ॥ १०५ ॥

१०५. असीत इति ॥ अथासीतस्त्यक्तसीतको रावणः शस्त्रैः साधनैः शस्त्रबलेनेत्यर्थः निराकुलोऽनाकुलः सन् कासाञ्चक्रे रे मूर्ख अण्डजाधम हतोऽसीत्येवं कुत्सितं शब्दाप्यामास प्रललापेत्यर्थः । कासृ शब्दकुत्सायाम् । लिट् । "कास्प्रत्ययात्—" इत्याम्प्रत्ययः ॥ खे गच्छतीति खगः पक्षी ॥ डोऽन्यत्रापि च दृश्यत इति गमेर्डप्रत्ययः । नखास्तुण्डं मुखं च तन्नखतुण्डमेवायुधं यस्य स सन् । भूयः पुनरपि तं रावणं चेच्छिदाञ्चक्रे भृशं चिच्छेद । छिदेर्यङन्ताल्लिट् । "कास्प्रत्ययात्—" इत्याम्प्रत्ययः । यङो ङित्वात्तङि तद्वदनुप्रयोगात्कृञोऽपि तङ् ॥ "गुणो यङ्लुकोः" इत्यभ्यासस्य गुणः ॥ अल्लोपयलोपौ ॥

---

१ स त्याजयां° N., C., D., E1. B., T1.
२ शस्त्रैरनाकुलः E2.
३ चेच्छिदांचक्रे G., T., Com.

हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम्।
न वी[1] पलायाञ्चक्रे विर्दयाञ्चक्रे न राक्षसः॥ १०६॥

१०६. हन्तुमिति॥ तौ पक्षिराक्षसौ क्रोधवशात् क्रोधपारवश्यात् परस्परं हन्तुमीहाञ्चक्राते तथा व्यापृतवन्तावित्यर्थः। ईह चेष्टायाम्। लिट्॥ "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्ययः॥ वयतीति विः पक्षी वा। 'विविष्किरपतत्रिणः' इत्यमरः॥ "वेञो डिच्च" इतीण्प्रत्यये टिलोपः॥ न पलायाञ्चक्रे न पलायितश्च। राक्षसो रावणश्च न दयाञ्चक्रे नानुचकम्पे। अयतेर्दयतेश्च लिट्॥ "दयायासश्च" इत्याम्प्रत्ययः॥

उपासाञ्चक्रिरे द्रष्टुं देवगन्धर्वकिन्नराः।
छलेन[2] पक्षौ लोलूयाञ्चक्रे क्रव्यात्पतत्रिणः॥ १०७॥

१०७. उपासामिति॥ देवगन्धर्वकिन्नराः द्रष्टुं युद्धदर्शनार्थमुपासाञ्चक्रिरे समीपे स्थिता इत्यर्थः। आसेर्लिट्॥ "दयायासश्च" इत्याम्प्रत्ययः॥ क्रव्यमत्तीति क्रव्याद्राक्षसः भल्लेन बाणविशेषेण। 'स्नुहीदलफलो भल्लः' इति यादवः। पतत्रिणः पक्षौ पतत्रे लोलूयाञ्चक्रे भृशं लुलाव। लुनातेर्यङन्ताल्लिटि "कास्प्रत्ययात्—" इत्याम्प्रत्ययः॥

प्रलुठितमवनौ विलोक्य कृत्तं
दशवदनः खचरोत्तमं प्रहृष्यन्।
रथवरमधिरुह्य भीमधुर्यं[3]
स्वपुरमगात्परिगृह्य रामकान्ताम्[4]॥ १०८॥

१०८. प्रलुठितमिति॥ अथ दशवदनः कृत्तं छिन्नपक्षमत एवावनौ प्रलुठितं निपत्य लुठन्तम्। खे चरन्तीति खेचराः खगाः॥ "चरेष्टः"॥ तेषु

१ न विः पलायाञ्चक्रे वा D.
२ भल्लेन T2, T., G., Com.
३ धुर्यं T2, T3, T4, T., G., Com.
४ रामाम् T2, T3, T4, D.

त्तमं जटायुषं विलोक्य प्रहृष्यन् रामस्य कान्तां सीतां परिगृह्यादाय । भीमा भयंकराः युगं वहन्तीति युग्याः अश्वा यस्य तम् ॥ "तद्वहति रथयुगप्रासङ्गम्" इति यत्प्रत्ययः ॥ रथवरं रथश्रेष्ठमधिरुह्य स्वपुरं लङ्कानगरमगात् गतवान् । पुष्पिताग्रा वृत्तम् । 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति लक्षणात् ॥

इति भट्टिकाव्ये सीताप्रहरणो नाम
पञ्चमः सर्गः ।

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल
मल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने
सर्वपथीनाख्याने पञ्चमः सर्गः ॥

॥ श्रीः ॥

अथ षष्ठः सर्गः ।

ओषाञ्चकार कामाग्निर्दशवक्त्रमहर्निशम् ।
विदाञ्चकार वैदेहीं रामादन्यनिरुत्सुकाम् ॥ १ ॥

१. अथाम्प्रत्ययमेवाधिकृत्य श्लोकचतुष्टयेन रावणवृत्तान्तमेवाह ओषाञ्चकारेति ॥ काम एवाग्निः कामाग्निरिति रूपकम् । दाहलिङ्गात् । दशग्रीवं रावणम् । अहश्च निशा च अहर्निशम् । सर्वो द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः । अत्यन्तसंयोगे द्वितीया । ओषाञ्चकार उवोष ददाहेत्यर्थः । उष दाह इत्यस्माल्लिट् ॥ "उषविदजागृभ्योऽन्यतरस्याम्" इति विकल्पादाम्प्रत्ययः ॥ ततो लघूपधगुणः । दाहे कारणमाह । तथाहि रावणः वैदेहीं सीतामन्यस्मिन् रामातिरिक्तपुरुषे निरुत्सुकामनुत्सुकामननुरक्तां विदाञ्चकार विवेद । तद्वेदनादेवेयं विरहवेदना जातेति भावः ॥ "उषविद—" इत्याम्प्रत्ययः ॥ अत्र विदेरदन्तत्वान्न लघूपधगुणः । तथाच काशिका 'आमोऽमित्वमदन्तत्वादगुणत्वं विदेस्तथा । आस्कासोराम्विधानाच्च पररूपं कतन्तवत् ॥" इति ॥

प्रजागराञ्चकारारेरीहास्वनिशमादरात् ।
प्रबिभयाञ्चकारासौ काकुत्स्थादभिशङ्कितः ॥ २ ॥

२. प्रजागरामिति ॥ किं चासौ रावणः काकुत्स्थाद्रामादभिशङ्कितः । बलवद्विरोधस्य दुरन्तत्वादनिष्टागममुत्प्रेक्षमाण इत्यर्थः । 'अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः' इति लक्षणात् । अरेः रामस्य ईहासु चेष्टासूद्योगेषु विषये अनिशमादरादभिनिवेशात्प्रजागराञ्चकार । अप्रमत्तः स्थित इत्यर्थः ॥ "उषविद—" इत्यादिना विकल्पादाम्प्रत्ययः ॥ बिभयाम्प्रचकार अतिमात्रं बिभाय चेत्यर्थः ॥ "भीह्रीभृहुवां

---

१ °ग्रीव° T2, T3, T4, T., G., Com.
२ रावणोऽन्यनि° T3.
३ बिभयांप्रचकारा° T., G., Com.

श्लुवच्च" इति विकल्पादाम्प्रत्ययः ॥ "श्लौ" इति द्विर्भावश्च ॥ प्रोपसर्गेऽव्यवधानं तूक्षाम्प्रचक्रुरितिवत्समाधेयम् । प्रबिभयाञ्चकारेति पाठे पूर्ववच्छन्दोभङ्गः सोढव्यः ॥

न जिह्रयाञ्चकाराथ सीतामभ्यर्थ्य तर्जितः ।
नाप्यूर्जां[1] बिभरामास वैदेह्यां प्रसितो भृशम् ॥ ३ ॥

३. नेति ॥ किं चायं रामाद्भीतोऽपि सीतामभ्यर्थ्यानुनीय तर्जितो भर्त्सितो निरस्त इत्यर्थः । तथापि न जिह्रयाञ्चकार न जिह्राय । वैदेह्यां भृशं प्रसितः आसक्तः सन्नूर्जं बलं पुष्टिं न बिभरामास न बभार । किं तु कार्श्यं गत इत्यर्थः । अत्रोभयत्रापि "भीह्री—" इत्यादिना पूर्ववत्प्रक्रिया ॥

विदाङ्कुर्वन्तु रामस्य वृत्तं[2] इत्यवदत्स्वकान् ।
रक्षांसि रक्षितुं सीतामा[3]शिषच्च प्रयत्नवान् ॥ ४ ॥

४. विदाङ्कुर्वन्त्विति ॥ किं च रामस्य वृत्तं व्यापारं विदाङ्कुर्वन्तु जानन्त्वित्यर्थः । विध्यर्थे लोट् ॥ "विदाङ्कुर्वन्त्वित्यन्यतरस्याम्" इति विदेर्लोट्याम्प्रत्ययगुणाभावादिनिपातनात्साधुः ॥ इति स्वकान् स्वकीयान् शुकसारणादीन् गूढपुरुषानवदत् । विदित्वोच्यतामिति चारान्नियुक्तवानित्यर्थः । प्रयत्नवानवहितः सन् तां रक्षितुं गोपायितुं रक्षांसि राक्षसानशिषदादिष्टवान् । शासेर्लुङि "सर्त्तिशास्त्यर्त्तिभ्यश्च" इति च्लेरङादेशः ॥ "शास इदङ्हलोः" इतीकारः ॥ "शासिवसिघसीनां च" इति षत्वम् ॥ योषिद्वृन्दारिकेत्यादिना एतदन्तेन सन्दर्भेण दशावस्थासून्मादादर्वाचीनाः सप्तापि सुव्यक्तमुक्ता यथायोगमुन्नेयाः ॥ "दृङ्मनःसङ्गसंकल्पौ जागरः कृशता रतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" ॥

१ नाप्यूर्जं T2, D., T., G., Com.
२ वृत्तिमित्याह राक्षसान् T2, T3
३ °मशिषच्च D., T., G., Com. °मादिदेश E2.

अथ प्रकीर्णकाः ।

रामोऽपि हतमारीचो निवर्त्स्यन् खरनादिनः ।
क्रोष्टून् समशृणोत्क्रूरान् रसतोऽशुभशंसिनः[1] ॥ ५ ॥

५. पुनस्त्रिभिः प्रकीर्णकमनुक्रामत्रामवृत्तान्तमेवाह रामोऽपीति ॥ रामः हतमारीचः सन् निवर्त्स्यन् निवर्त्तिष्यमाणः ॥ "वृद्भ्यः स्यसनोः" इति पाक्षिकं परस्मैपदम् । "लृटः सद्वा" इति शत्रादेशः ॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः ॥ खरवन्नदन्तीति खरनादिनः परुषाराविण इत्यर्थः ॥ "कर्त्तर्युपमाने" इति णिनिः ॥ क्रूरान्भीमान् अत एव अशुभशंसिनोऽनिष्टसूचकान् रसतः क्रोशतः क्रोष्टून् शृगालान् समशृणोदाकर्णयत् । सकर्मकत्वात् "समो गम्यृच्छि—" इत्यस्येदं प्रत्युदाहरणं तत्राकर्मकाधिकारात् । शंखः श्रूयत इतिवत् शब्दधर्मस्तद्वत्युपचरितः ॥

आशङ्कमानो वैदेहीं खादितां निहतां मृताम् ।
स शत्रुघ्नस्य सोदर्यमाराद[2]ायान्तमैक्षत ॥ ६ ॥

६. आशङ्कमान इति ॥ वैदेहीं सीतां खादितां व्याघ्रादिभिर्भक्षितां निशाचरैर्मारितां मृतां स्वत एवायुःक्षयात्परेतामाशङ्कमानः पूर्वोक्तदुर्निमित्तादुत्प्रेक्षमाणः स रामः आराद्दूरादायान्तमागच्छन्तं शत्रुघ्नस्य समानोदरे शयितं सोदर्यं लक्ष्मणम् ॥ "सोदराद्यः" ॥ "विभाषोदरे" इति समानस्य सभावः ॥ ऐक्षत अपश्यत् ॥

सीतां सौमित्रिणा त्यक्तां सध्रीचीं त्रस्नुमेकिकाम् ।
विज्ञायामंस्त काकुत्स्थः क्षये क्षेमं सुदुर्लभम् ॥ ७ ॥

७. सीतामिति ॥ काकुत्स्थो रामः सहाञ्चतीति सध्रीचीं सहचरीम् ॥ ऋत्विगादिना क्विन् ॥ "सहस्य सध्रिः" इति सध्र्यादेशः ॥ "अचः" इत्यकारलोपः ॥ "चौ" इति दीर्घः । "अञ्चतेश्चोपसंख्यानम्" इति

---

१ °शासिनः T3. | २ °र्यं दूराद्आ° C., N., T., G., Com.

ङीप् । त्रस्तुं भीरुमेकिकामेकाकिनीम् । "एकादाकिनिच्चासहाये" इति चकारात्कन् ॥ कात्पूर्वस्येत्वम् । सीतां सौमित्रिणा त्यक्तां विज्ञाय तस्यैकाकिन आगमनादनुमाय । क्षयन्ति निवसन्त्यस्मिन्निति क्षये गृहे ॥ 'निवासः शरणं क्षयः' इति गृहपर्यायेष्वमरः । क्षिनिवासगत्योः । तौदादिकः ॥ "एरच्" ॥ क्षेमं कुशलं सुदुर्लभमत्यन्तदुर्लभममंस्त निश्चितवानित्यर्थः । मन्यतेरनिटो लुङि सिच् ॥

अतः परं दुहादिः ।

सोऽपृच्छल्लक्ष्मणं सीतां याचमानः[1] शिवं सुरान् ।
रामं यथास्थितं सर्वं भ्राता ब्रूते स्म विक्लवः[2] ॥ ८ ॥

८. अथाधिकारकाण्डे दुहादीनाह ॥ स इत्यादिना ॥ स रामः सुरान् शिवं शुभं याचमानो भिक्षमाणः लक्ष्मणं सीतामपृच्छत् अनुयुक्तवान् । 'प्रश्नोऽनुयोगः पृच्छा च' इत्यमरः । भ्राता लक्ष्मणो विक्लवश्चकितः सन् सर्वं रामं यथास्थितं यथावृत्तं । यथार्थेऽव्ययीभावः । ब्रूते स्म रामायाख्यदित्यर्थः ॥

संदृश्य शरणं शून्यं भिक्षमाणो वनं प्रियाम् ।
प्राणान्दुहन्निवात्मानं शोकं चित्तमवारुधत् ॥ ९ ॥

९. संदृश्येति ॥ शरणं गृहं शून्यं सीताविरहितं संदृश्य दृष्ट्वा वनमरण्यं प्रियां भिक्षमाणः वैदेहीं देहीति याचमानः आत्मानं देहम् । 'आत्मा जीवे धृतौ देहे' इति यादवः । प्राणान्दुहन् प्रपूरयन्निव । प्रपूरणं रिक्तीकरणम् । प्राणशून्यं कुर्वन्निवेत्यर्थः । शोकं चित्तमवारुधत् । चित्ते शोकमरौत्सीदित्यर्थः । रुधेर्लुङि "इरितो वा" इति विकल्पाच्चेरङादेशः ॥

गता स्यादवचिन्वाना[3] कुसुमान्याश्रमद्रुमान् ।
आं[4] यत्र तापसान्धर्मं[5] सुतीक्ष्णः शास्ति तत्र सा ॥ १० ॥

१ याचमानं C.
२ विह्वलः N., C., T1, B.
३ °दपचिन्वाना T., G., Com.
४ आं C.
५ धर्मान् T., G., Com.

१०. गतेति ॥ सा सीता आश्रमद्रुमान् कुसुमान्यपचिन्वाना अवच्छिन्दती ॥ चिनोतेः शानच् । गता वा स्यात् । अथवा सुतीक्ष्णः सुतीक्ष्णाख्यो मुनिः यत्र तापसान्मुनीन् धर्मान् शास्ति उपदिशति तत्र गता स्यात् । आ इति स्मृतौ । 'आ प्रगृह्यस्मृतौ वाक्ये' इत्यमरः । अत्र सोऽपृच्छदित्यादिश्लोकत्रये सर्वत्र सीतादीनां प्रधानकर्मणामीप्सितकर्मत्वं लक्ष्मणादीनामप्रधानकर्मणामकथितकर्मत्वं च द्रष्टव्यम् ॥ 'दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना' ॥ इति वचनात् ॥

अतः परं प्रकीर्णकाः ।

आः कष्टं बत ही चित्रं हूं[1] मातर्दैवतानि धिक् ।
हा पितः क्वासि हे[2] सुभ्रु बह्वेवं विललाप सः ॥ ११ ॥

११. पुनः पञ्चभिः प्रकीर्णकमेवोदाहरन् रामस्य शोकानुभवं प्रलापमाह आः कष्टमित्यादिभिः । स रामः एवमाःकष्टमित्यादिप्रकारेण बहु विललाप । आः इति पीडायाम् । 'आस्तु स्यात्कोपपीडयोः' इत्यमरः । कष्टं कृच्छ्रं प्राप्तमित्यर्थः । 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः । बतेति खेदे । हीति विषादे । चित्रं स्वहस्तगतापि क्व गतेति चित्रीयत इत्यर्थः । हुमित्यपकारिणि क्रोधे । मातरित्यापदि स्मृताया मातुरामन्त्रणम् । दैवतानि धिगिति शोकातिरेकाद्दैवनिन्दा । हा पितरिति मातृवदेवामन्त्रणम् । हे सुभ्रु क्वासि क्व गतासीत्यगत्या प्रश्नः । 'ऊकारादप्यूङ् वक्तव्यः' इति ऊङन्तत्वात्सुभ्रूशब्दस्य नदीत्वात्संबुद्धौ नदीह्रस्व इति प्रपञ्चितमन्यत्र ॥

इहासिष्टाशयिष्टेह सा सखेलमितोऽगमत् ।
अग्लासीत्[3]संस्मरन्नित्थं मैथिल्या भरताग्रजः ॥ १२ ॥

---

१ हुं D., E3, T., G., Com.
२ मे T2.
३ अम्लासी° C.

१२. इहेति ॥ सा सीता इह प्रदेशे आसिष्ट उपविष्टा । इह अशयिष्ट शयिता । आसेः शीङश्च लुङि तङि सिचीट् । इतोऽस्माद्देशात् सखेलं सलीलमगमत् गता । गमेर्लुङि लृदित्वाच्च्लेरङादेशः । इत्थं मैथिल्याः संस्मरन् मैथिलीं स्मरन् । "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी ॥ भरताग्रजो रामोऽग्लासीत् ग्लानवान् । ग्लायतेरनिटो लुङि "आदेच—" इत्यात्वे सगिटौ ॥

इदं नक्तन्तनं दाम पौष्पमेतद्दिवातनम् ।
शुचेवोद्बध्य शाखायां मम्लायति[1] तया विना ॥ १३ ॥

१३. इदमिति ॥ इदं नक्तं भवं नक्तन्तनं पौष्पं पुष्पमयं दाम माल्यम् । तदिदं दिवा भवं दिवातनं दाम ॥ "सायंचिरम्—" इत्यादिना ट्युप्रत्ययः । तया सीतया विना शुचा शोकेन शाखायामुद्बध्येव उद्बन्धनेन मृत्वेवेत्युत्प्रेक्षा । मम्लायति । म्लायतेर्लटि शपः शित्वेनात्वाभावादायादेशः ॥

ऐक्षिष्महि मुहुः सुप्तां यां मृताशङ्कया वयम् ।
अकाले दुर्मरमहो यज्जीवामस्तया विना ॥ १४ ॥

१४. ऐक्षिष्महीति ॥ वयं सुप्तां यां सीतां मृताशङ्कया मृतेत्याशङ्कया मुहुरेक्षिष्महि पुनः पुनः स्पर्शनादिना परीक्षाञ्चक्रमहे । अस्थानशङ्काकरत्वात्प्रेमातिरेकस्य । ईक्षतेर्लुङि तङि महीङि सिच इट् । तया विना यज्जीवामः तज्जीवनमकाले आयुषोऽक्षये दुर्मरं मर्त्तुमशक्यमयोग्यं च आत्महत्याया निषिद्धत्वादिति भावः ॥ म्रियतेर्भावे खल्प्रत्ययः । अहो कष्टं वर्त्तत इत्यर्थः ॥

अक्षेमः[2] परिहासोऽयं परीक्षां मा कृथा मम[3] ।
मत्तो मान्तर्धिथाः[4] सीते मा रंस्था जीवितेन नः[5] ॥ १५ ॥

---

१ मम्लायति B., T2, E2, E3, T., G., Com.
२ अक्षेमपरि° T3.
३ मयि T., G., Com.
४ ना° c.
५ मे B.

१५. अक्षेम इति ॥ हे सीते अयं परिहासोऽन्तर्धानकेलिरक्षेमः अहितः । मयि विषये परीक्षां वियोगासहत्वपरीक्षणं मा कृथाः. मा कार्षीः । करोतेर्लुङि तङि थासि "ह्रस्वादङ्गात्" इति सलोपः । मत्तः मत्सकाशात् ॥ "पञ्चम्यास्तसिल्" ॥ "अन्तर्धौ येनादर्शनमिच्छति" इत्यपादानत्वम् ॥ मान्तर्धिथाः अन्तर्हिता मा भूरित्यर्थः । दधातेर्लुङि तङि थासि "स्थाघ्वोरिच्च" इतीकारादेशो "ह्रस्वादङ्गाद्" इति सिचो लोपः । नोऽस्माकं जीवितेन प्राणैर्मा रंस्थाः मा क्रीडीः । अन्तर्धानक्रीडया प्राणान्मापहरेत्यर्थः । रमेरनिटो लुङि सिचोऽकित्वान्नानुनासिकलोपः ॥

अथ सिजधिकारः ।

अहं न्यवधिषं भीमं[1] राक्षसं क्रूरविक्रमम् ।
मा घुक्षः पत्युरात्मानं मा न श्लिक्षः प्रियं प्रिये ॥ १६ ॥

१६. अथ सिजधिकारः अहमिति ॥ हे प्रिये अहं भीमं भयंकरं क्रूरविक्रमं राक्षसं मारीचं न्यवधिषममीमरम् । हन्तेः "लुङि च" इति वधादेशे अदन्तात्सिच इडागमः । आत्मानं पत्युर्मे । संबन्धसामान्ये षष्ठी । मा घुक्षः मा संवृणु । गुहू संवरणे । लुङ् ॥ "शल इगुपधादनिटः क्सः" इति च्लेः क्सादेशः ॥ "हो ढः" ॥ भष्भावकत्वषत्वानि । प्रियं मा न श्लिक्षः । द्वौ नञौ प्रकृतमर्थं गमयतः । आलिङ्गेत्यर्थः । 'संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ' इति वामनः । श्लिष्यतेर्लुङि "श्लिष आलिङ्गने" इत्यालिङ्गनार्थे च्लेः क्सः । कत्वषत्वे ॥

मा स्म द्राक्षीर्मृषा दोषं भक्तं मां मातिचिक्लिशः[2] ।
शैलं[3] न्वशिश्रियद्रामा[4] नदीं नु[5] प्रसदुद्रुवत ॥ १७ ॥

---

१ क्रूरं राक्षसं भीमविक्रमम् E2.
२ मा विचिक्लिशः T., G., Com.
३ शैलान् T., G., Com.
४ °द्रामा C., T., G., Com.
५ नु नदीं C.

१७. मास्मेति ॥ हे प्रिये मृषा अविद्यमानं दोषमपराधं मा स्म द्राक्षीः मा स्म विद्यमानं मंस्थाः इत्यर्थः ॥ "स्मोत्तरे लङ् च" इति चकाराल्लुङि "न दृशः" इति क्सप्रतिषेधः ॥ "इरितो वा" इति विकल्पादङभावपक्षे "सृजिदृशोर्झल्यमकिति" इत्यमागमे हलन्तलक्षणा वृद्धिः। व्रश्चादिना षत्वे कत्वम्। भक्तं सेवकं मां मा विचिक्लिशः न विक्लेशय। क्लिश्यतेर्णौ चङ्युपधाह्रस्वः। सर्वत्र "न माङ्योगे" इत्यडभावः। अथवा रामा सीता शैलानशिश्रियन्नु श्रिता वा नदीं प्रत्यदुद्रुवन्नु अभिद्रुता वा ॥ "णिश्रि—" इत्यादिना श्रिद्रुभ्यां लुङि चङि द्विर्भावे इयङुवङादेशौ ॥ नुशब्दः संशये ॥

ऐ[1] वाचं देहि धैर्यं नस्तव हेतोरसुस्रुवत्[2]।
त्वं नो मतिमिवाधासीर्नष्टा प्राणानिवादधः[3] ॥ १८ ॥

१८. है इति ॥ है भो इति संबोधने निपातः। वाचं देहि संभाषस्वेत्यर्थः। ददातेः प्रार्थनायां लोट् ॥ "घ्वसोरेद्धावभ्यासलोपश्च" इत्यभ्यासलोपः एकारश्च। तव हेतोस्त्वयि निमित्ते ॥ "षष्ठी हेतुप्रयोगे"॥ नोऽस्माकं धैर्यमसुस्रुवत् स्रुतम्। पूर्ववत् णिश्रीत्यादि कार्यम्। त्वं नष्टा अदर्शनं गता सती नो मतिं बुद्धिमधासीरिव अपा इव। धेटो लुङि सिपि "विभाषा घ्राधेट्शाच्छासः" इति सिचो लुगभावपक्षे "आदेच—" इत्यात्वे "यमरमनमातां सक्च" इति सगिडागमौ ॥ "इट ईटि" इति सलोपः ॥ किं च प्राणानदध इव पीतवतीव। मत्प्राणैः सह नष्टासीति भावः ॥ "विभाषा धेट्श्व्योः" इति चङ्पक्षे द्विर्वचनम् ॥ "आतो लोप इटि च" इत्याकारलोपः ॥

रुदतोऽशिश्वियच्चक्षुरास्यं चार्थे तवाश्वयीत्।
प्रियेऽहं[4] मां निरास्थश्चेन्मा न वोचश्चिकीर्षितम् ॥ १९ ॥

---

१ है T., G., Com. अयि D.
२ °रसुस्रवत् B., T2, D.
३ हेतोस्तवा° N., C., T1, T., E3. तेऽर्थे ममा° D.
४ प्रिये त्वं मां T4.

१९. रुदत इति ॥ तवार्थे त्वत्कृते रुदतस्त्वद्दिदृक्षया बाष्पायमाणस्य मे चक्षुरशिश्वियत् उच्छूनमभूत् । श्वयतेर्लुङि "विभाषा धेट्श्व्योः" इति पक्षे चङि द्विर्वचने इयङादेशः । आस्यं मुखं चाश्वयीत् । चङो वैकल्पिकत्वादुभयाभावपक्षे सिचि इडागमे "ह्म्यन्तक्षण—" इत्यादिना वृद्धिप्रतिषेधः ॥ "इट ईटि" इति सलोपः ॥ गुणायादेशौ । मां निरास्थश्चेत् निरस्तवती चेत् । अस्यतेर्लुङि "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ "अस्यतेस्थुक्" ॥ म्रिये मरिष्यामि । वर्त्तमानसामीप्ये सामान्ये लट् ॥ "रिङ् शयग्लिङ्क्षु" इति रिङादेशः ॥ कर्त्तुमिष्टं चिकीर्षितं मा न वोचः । किं तु ब्रूह्येवेत्यर्थः । उक्ते तत्करिष्यामीति भावः । वक्तेर्लुङि ब्रूआदेशाद्वा "अस्यतिवक्ति—" इत्यङ् ॥ "वच उम्" इत्युमागमः ॥ मा न श्लिक्ष इतिवन्नञ्द्वयं व्याख्येयम् ॥

लक्ष्मणाचक्ष्व यद्याख्यत्[1] सा किञ्चित्कोपकारणम् ।
दोषे प्रतिसमाधानमज्ञाते क्रियतां कथम् ॥ २० ॥

२०. लक्ष्मणेति ॥ हे लक्ष्मण सा सीता किञ्चित्कोपकारणं व्याख्यद्यदि तुभ्यमाख्यातवती चेत् । ख्यातेर्लुङि पूर्ववदङ् ॥ "आतो लोप इटि च" इत्याकारलोपः ॥ आचक्ष्व कथय । चक्षिङो लोटि थासि रूपम् । तथाहि दोषे अपराधे अज्ञाते सति कथं प्रतिसमाधानं प्रतीकारः क्रियतां क्रियेत न शक्यमित्यर्थः । अतः कारणं कथ्यतां येन प्रतिविधास्यामीति भावः ॥

इह सा न्वलिपद्गन्धैः[2] स्नान्तीहाभ्यषिचज्जलैः[3] ।
इहाहं द्रष्टुमाह्वं तां स्मरन्नेवं[4] मुमोह सः ॥ २१ ॥

२१. इहेति ॥ सा सीता इह प्रदेशे गन्धैश्चन्दनादिगन्धद्रव्यैः । गन्धशब्दस्य द्रव्यवाचित्वे बहुत्वमुक्तं प्राक् । अन्वलिपदनुलिप्तवती । इह

---

१ यद् व्याख्यत् T., G., Com. Between the two halves of this verses T3, adds. तन्ममाख्यः करिष्यामि तस्य श्रुत्वा प्रतिक्रियाम् ।
२ सान्वलिपद° T., G. Com.
३ जलम् T3.
४ स्मरन्नेव E2.

स्नान्ती स्नानं कुर्वती। स्नातेः शतरि ङीप्॥ "आच्छीनद्योः—" इति विकल्पान्नुम्॥ जलैरभ्यषिचत् मामिति शेषः। इहाहं तां द्रष्टुमाह्वमाकारयम्॥ "लिपिसिचिह्वश्च" इति सर्वत्र च्लेरङादेशः॥ "आतो लोप इटि च" इति ह्वयतेराकारलोपः॥ एवमित्थं स्मरन्नेव स रामो मुमोह मुमूर्च्छ॥

तस्यालिपत शोकाग्निः स्वान्तं काष्ठमिव [1]ज्वलन्।
अलिप्तै[2]वानिलः शीतो वने तं[3] न [4]व्यजिह्लदत्॥ २२॥

२२. तस्यैति॥ ज्वलन् दीप्यमानः शोक एवाग्निः शोकाग्निः तस्य रामस्य स्वान्तं चित्तं काष्ठमिवालिपत। लेपो व्याप्तिः दाह इति यावत्॥ "लिपिसिचिह्वश्च" इत्यनुवृत्तौ "आत्मनेपदेष्वन्यतरस्याम्" इति च्लेरङ्॥ शीतो वने अनिलः वनवायुः तं राममलिप्तैव तथा गाढमस्पृक्षदित्यर्थः। अङभावपक्षे "झलो झलि" इति सलोपः॥ किन्तु न व्यजिह्लदत् न ह्लदयति स्म प्रत्युत सोऽपि ददाहैवेत्यर्थः। ह्लादेर्णौ चङ्युपधाह्रस्वः॥

स्नाने[5]भ्यषिचताम्भोऽसौ रुदन् दयितया विना।
तथाभ्यषिक्त वारीणि पितृभ्यः शोकमूर्छितः॥ २३॥

२३. स्नान इति॥ दयितया सीतया विना शोकमूर्छितः शोकमूढः सन् रामः स्नाने प्राप्ते रुदन् अम्भोभिर्नेत्रजलैरेवाभ्यषिचत आत्मानमभिषिक्तवान्। तथा तर्पणे प्रसक्ते पितृभ्यो वारीण्यश्रुजलान्येवाभ्यषिक्त क्षरितवान्। दत्तवानित्यर्थः। सिञ्चतेः क्षरणमात्रपरत्वे जलानां कर्मत्वं सेकपरत्वे करणत्वं चेति विवेकः। अत्रापि पूर्ववद्विकल्पादङभावपक्षे "झलो झलि" इति सिज्लोपः॥

---

१ °मिवोज्वलः T2, T4.
२ अलिप्तैवा° T., G., Com.
३ न तमजिह्लदत् D.
४ व्यजिह्लदत् T., G., Com.
५ स्नानेऽभ्यषिचताम्भोभी T., G., Com.

तथार्त्तोऽपि क्रियां धर्म्यां[2] स कालेनामुचत्क्वचित् ।
महतां हि क्रिया नित्या छिद्रे[3] नैवावसीदति ॥ २४ ॥

२४. तथेति ॥ तथा तेन प्रकारेणार्त्तोऽपि स रामो धर्म्यां धर्मादनपेतां विहितामित्यर्थः ॥ "धर्मपथ्यर्थ—" इत्यादिना यत्प्रत्ययः ॥ क्रियामनुष्ठानं क्वचिदपि काले नामुचत् न त्यक्तवान् ॥ "पुषादि—" इत्यादिना ऌदित्वादङ् ॥ तथाहि महतां सतां छिद्रे व्यसनेऽपि नित्या क्रिया नियतानुष्ठानं नावसीदत्येव न लुप्यत एव । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

आह्वास्त[4] स मुहुः शूरान्[5] मुहुराह्वत राक्षसान् ।
एत सीताद्रुहः संख्ये प्रत्यर्थयत राघवम् ॥ २५ ॥

२५. आह्वास्तेति ॥ स रामो मुहुः शूरान् शूराभिमानिनः आह्वास्त स्पर्धया आहूतवान् । तथा राक्षसानपि मुहुराह्वत ॥ "स्पर्धायामाङः" इत्यात्मनेपदे पूर्ववद्विकल्पात्सिजङौ ॥ हे सीताद्रुहः एत आगच्छत । आङ्पूर्वादिणः कर्त्तरि लोटि थस्य तादेशः । संख्ये युद्धे राघवं रामं प्रत्यर्थयत प्रत्यर्थिनं कुरुत योधयध्वमित्यर्थः । प्रत्यर्थिन्शब्दात् तत्करोतीतिण्यन्तात् लोटि थस्य तादेशः । णाविष्ठवद्भावाट्टिलोपः । अर्थयतेस्तु नित्यात्मनेपदित्वात् परस्मैपदविरोधः ॥

स्वपोषमपुषद्युष्मान् या पक्षिमृगशावकाः[6] ।
अद्युतचेन्दुना सार्धं तां[7] प्रब्रूत गता यतः ॥ २६ ॥

२६. स्वपोषमिति ॥ हे पक्षिमृगाणां शावकाः शिशवः या सीता युष्मान् स्वेन धनेन पुष्ट्वा स्वपोषम् ॥ "स्वे पुषः" इति णमुल्प्रत्ययः ॥ अपुषत् । कषादित्वादनुप्रयोगः । पुषादित्वादङ् । इन्दुना सार्धमद्युतत्

---

१ तथार्त्तोऽपि कश्चिद्रामो न धर्म्यामभुचत्क्रियाम्. T3.
२ धर्म्यौ E3.
३ कृच्छ्रे E3.
४ आह्वास्त स मुहू रामः शूरानाह्वत राक्षसान् T3.
५ शूरं T2.
६ °शावकान् T2.
७ यातां ब्रूत D.

इन्दुसाम्येन व्यद्योतिष्टेत्यर्थः ॥ "द्युद्भ्यो लुङि" इति विकल्पात्परस्मैपदम् ॥ द्युतादित्वादङ् । तां सीतां प्रब्रूत कथयत यतो गता यत्र गता तद्ब्रूतेत्यर्थः ॥

गिरिमन्वसृपद्रामो लिप्सुर्जनकसंभवाम् ।
तस्मिन्नायोधनं वृत्तं लक्ष्मणायाशिषन्महत् ॥ २७ ॥

२७. गिरिमिति ॥ रामो जनकसंभवां जानकीं लिप्सुर्लब्धुमिच्छुः सन् ॥ "सनि मीमा—" इत्यादिना इकारेऽभ्यासलोपः ॥ गिरिमन्वसृपत् अभ्यगमत् । लृदित्वादङ् । तस्मिन्गिरौ वृत्तं पुराभूतं महदायोधनं युद्धं लक्ष्मणाय । क्रियाग्रहणाच्चतुर्थी । अशिषत् अवोचत् ॥ "सर्त्तिशास्त्यर्त्तिभ्यश्च" इत्यङ् ॥ "शास इदङ्हलोः" इतीकारे षत्वम् ॥

सीतां जिघांसू सौमित्रे राक्षसावारतां ध्रुवम् ।
इदं शोणितमभ्यग्रं[1] संप्रहारेऽश्च्युतत्तयोः[2] ॥ २८ ॥

२८. सीतामिति ॥ हे सौमित्रे लक्ष्मण सीतां जिघांसू हन्तुमिच्छू । हन्तेः सन्नन्तादुप्रत्ययः ॥ "अज्झनगमां सनि" इति दीर्घः ॥ राक्षसावारतामागतौ ध्रुवम् । ऋ गतौ । लुङि "सर्त्तिशास्त्यर्त्तिभ्यश्च" इत्यङ् ॥ "आडजादीनाम्" ॥ तथाहि तयोः संप्रहारे युद्धे इदमभ्यग्रं प्रत्यग्रं शोणितमश्चुतत् क्षरितम् । श्चुतिर् क्षरणे । लुङि "इरितो वा" इत्यङ् । एतच्च युद्धानुमापकं लिङ्गमित्यर्थः ॥

इदं कवचमच्योतीत्[3] साश्वोऽ[4]यं चूर्णितो रथः ।
एह्यमुं गिरिमन्वेष्टुमवगाहावहे द्रुतम् ॥ २९ ॥

२९. इदमिति ॥ इदं कवचं वर्म अश्चोतीत् अपतत् ॥ "इरितो वा" इत्यङभावपक्षे रूपम् ॥ सिचि "नेटि" इति हलन्तलक्षणा वृद्धिप्रति-

१ °मत्यर्थं E2.
२ °श्चुतत्तयोः T., G., Com.
°श्च्युतत्तयोः E2.
३ °मश्चोतीत् D., G., T., Com.
°मश्च्योतीत् E2.
४ साश्वो E2.

षेधे लघूपधगुणः । अयं साश्वो रथश्चूर्णितः । अन्वेष्टुं सीतां गवेषितुममुं गिरिमवगाह्यावहे प्रवेक्ष्यावहे । द्रुतमेह्यागच्छ ॥

मन्युर्मन्ये ममास्तम्भीद्विषादोऽस्तभदुद्यतिम् ।
अजारीदिव च प्रज्ञा[1] बलं शोकात्तथाजरत्[2] ॥ ३० ॥

३०. मन्युरिति ॥ हे लक्ष्मण मम मन्युः शोकोऽस्तम्भीत् । अतिदुःखो निर्दुःख इति न्यायात् स्तब्धोऽभूदिति मन्ये । उन्मस्तकः शोक इति भावः ॥ "जृस्तम्भु—" इति विकल्पादङभावे सिचि "इट ईटि" इति सलोपः ॥ विषादो मनोभङ्गः । 'विषादश्चेतसो भङ्ग उपायाभावनाशनैः' इति लक्षणात् । उद्यतिमुद्यममस्तभत् तस्तम्भ । अङ्पक्षेऽनुनासिकलोपः । प्रज्ञा बुद्धिश्च अजारीत् जीर्णेव ॥ "जृस्तम्भु—" इत्येवाङभावे सिचि वृद्धिः "इट ईटि" इति सलोपश्च ॥ तथा प्रज्ञावदेव बलं चाजरत् जीर्णम् । अङ्पक्षे "ऋदृशोऽङि गुणः" ॥

गृध्रस्येहाश्वतां पक्षौ कृत्तौ[3] वीक्षस्व लक्ष्मण ।
जिघत्सोर्नूनमापादि[4] ध्वंसोऽयं तां निशाचरात् ॥ ३१ ॥

३१. गृध्रस्येति ॥ हे लक्ष्मण इह प्रदेशे कृत्तौ छिन्नौ गृध्रस्य पक्षौ अश्वतां शूनौ । श्वयतेर्लुङि ॥ "जृस्तम्भु—" इत्यङि "श्वयतेरः" इत्यकारे "अतो गुणे" इति पररूपता ॥ वीक्षस्व पश्य । तां सीतां घस्तुमत्तुं वा इच्छोर्जिघत्सोः बिभक्षयिषोरस्य गृध्रस्येति शेषः । घसेरदेर्वा सन्नन्तादुप्रत्ययः । अदेरपि "लुङ्सनोर्घस्लृ" । अयं ध्वंसः पक्षच्छेदो निशाचराद्राक्षसादापादि आपन्नः आगत इत्यर्थः । पद्यतेः कर्त्तरि लुङि "चिण् ते पदः" इति च्लेश्चिणादेशः ॥ "चिणो लुक्" इति तशब्दस्य लुक् ॥

क्रुद्धो[5]ऽदीपि रघुव्याघ्रो रक्तनेत्रोऽजनि क्षणात् ।
अबोधि दुःस्थं त्रैलोक्यं दीप्तैरापूरि[6] भानुवत् ॥ ३२ ॥

---

१ अजारि वचनं प्रज्ञा T3.
२ शोकादिवाजरत् T2, T4.
३ भूमौ E3.
४ जिघांसो° C., c., T1, E2 T2, T4,
५ शुद्धो° T3.
६ रापदि C., T1.

३२. क्रुद्ध इति ॥ रघुव्याघ्रो रघुश्रेष्ठो रामः क्रुद्धः सन्नदीपि दिदीपे। क्रोधादग्निरिव जज्वालेत्यर्थः। क्षणाद्रक्तनेत्रोऽजनि जातः॥ "जनिवध्योश्च" इति चिणि वृद्धिप्रतिषेधः। त्रयो लोकास्त्रैलोक्यम्। चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। दुःखेन तिष्ठतीति दुःस्थं दुरवस्थम्॥ "आतश्चोपसर्गे" इति कर्त्तरि कप्रत्ययः॥ अबोधि बुद्धवान्। सर्वं संहनिष्यामीत्यमन्यतेत्यर्थः। भानुवत् भानुना तुल्यं दीप्तैर्दीप्तिभिः। भावे क्तः। आपूरि आपूर्णः। स तिग्मभानुरिव दुर्दर्शोऽभूदित्यर्थः। सर्वत्र कर्त्तरि लुङि ताङि "दीपजन—" इत्यादिना च्लेश्चिणादेशे "चिणो लुक्"॥

अताय्यस्योत्तमं सत्त्वमप्यायि[1] कृतकृत्यवत्।
उपाचायिष्ट सामर्थ्यं तस्य संरम्भिणो महत्॥ ३३॥

३३. अतायीति ॥ कृतकृत्यवत् कृतकर्त्तव्यस्येव सर्वं कृतप्रायं मन्यमानस्य। तथा तद्वधे व्यग्रस्येत्यर्थः। तस्य रामस्य सत्त्वं शरीरबलमतायि सन्ततमविच्छिन्नमभूदित्यर्थः। तथाप्यायि अवर्धिष्ट। तायृ संतानपालनयोः। प्यायी वृद्धौ॥ इत्याभ्यां कर्त्तरि लुङि पूर्ववत् "दीपजन—" इत्यादिना च्लेश्चिणादेशः। किं च संरम्भिणः संभ्रान्तस्य कुपितस्य वा। 'संरम्भः संभ्रमे कोपे' इति विश्वः। तस्य रामस्य सामर्थ्यमन्तःशक्तिः महदधिकमुपाचायिष्ट स्वयमेवोपाचायि ववृधे॥ "अचः कर्मकर्त्तरि" इति चिनोतेर्लुङि च्लेश्चिणभावपक्षे सिचि चिण्वदिटि वृद्धिः॥

अदोहीव विषादोऽस्य समरुद्धेव विक्रमः।
समभावि[2] च कोपेन न्यश्वसीच्चायतं[3] मुहुः॥ ३४॥

३४. अदोहीति ॥ अस्य रामस्य विषादः प्रागनुवर्त्तमानो मनःखेदः अदोहीव स्वयमेव दुग्धः क्षारित इव तथा गत इत्यर्थः। दुहः कर्म-

१ °माप्यायि T2, T3, E3.
२ समतन T., G., Com.
३ तेन न्यश्वसि चायतम् T., G., Com.

कर्त्तरि लुङि तङि "दुहश्च" इति विकल्पात् च्लेश्चिणादेशः । विक्रमः समरुद्धेव स्वयमेवावरुद्ध इव एकत्र राशीभूय स्थित इत्यर्थः । रुधः कर्मकर्त्तरि लुङि तङि कर्मवत् भावेन प्राप्तस्य चिणः "न रुधः" इति प्रतिषेधे सिच् । सकारस्य "झलो झलि" इति लोपे तङि स्थानिवद्भावान्न लघूपधगुणः । धत्वजश्त्वे । किं च कोपेन समतप्त च कष्टं कालेनाशासिषमनेन वञ्चितोऽस्मीत्यन्वतप्त च पश्चात्तापं गमित इत्यर्थः । तपेः कर्मणि "तपोऽनुतापे च" इति चिणः प्रतिषेधः ॥ "झलो झलि" इति सलोपः ॥ तेन रामेणायतं दीर्घं न्यश्वासि निश्वसितं च । श्वसेर्भावे लुङि "चिण्भावकर्मणोः" इति च्लेश्चिणादेशः । एतेन रौद्रस्थायिना क्रोधेन शोकस्तिरस्कृतः ॥

अथ श्नमधिकारः ।

अथालम्ब्य धनू रामो जगर्ज गजविक्रमः ।
रुणध्मि[1] सवितुर्मार्गं भिनद्मि कुलपर्वतान् ॥ ३५ ॥

३५. अथेति ॥ अथ क्रोधप्रादुर्भावानन्तरं गजविक्रमो गजपराक्रमो रामो धनुरालम्ब्यावष्टभ्य जगर्ज उच्चैर्बहु भीषणं च बभाषे इत्यर्थः । धनू राम इत्यत्र "ढ्रलोपे पूर्वस्य दीर्घोऽणः" । 'एवं वदन् दाशरथिः' इत्यतः प्राग्गर्जनप्रकारमेव प्रपञ्चेनाह । सवितुर्मार्गं रुणध्मि आवरिष्यामीत्यर्थः ॥ रुधिर् आवरणे । लटि मिपि "रुधादिभ्यः श्नम्" । सामीप्ये वर्त्तमानप्रत्ययः । एवमुत्तरत्रापि द्रष्टव्यम् । कुलपर्वतान् भिनद्मि विदारयिष्यामि ॥

रिणच्मि जलधेस्तोयं विविनच्मि दिवः सुरान् ।
क्षुणद्मि सर्पान्पाताले छिनद्मि क्षणदाचरान् ॥ ३६ ॥

---

१ सीताविरहदुःखार्तः कोपरक्तान्तलोचनः D., c., B.

२ c. and B. read the verse as follows:—
रुणध्मि सवितुर्मार्गं &c.
रिणच्मि जलधेस्तोयं &c.
D. reads it as under:—
रुणध्मि सवितुर्मार्गं &c.
क्षुणद्मि सर्पान् पाताले &c.

३६. रिणच्मीति ॥ जलधेस्तोयं रिणच्मि रेचयिष्यामि। रिचिर्विरेचने। सुरान् दिवः स्वर्गाद्विविनच्मि पृथक् करिष्यामि। अपनेष्यामीत्यर्थः। विचिर् पृथग्भावे। पाताले सर्पान् क्षुणद्मि चूर्णयिष्यामि। क्षुदिर् संचूर्णने। क्षणदाचरान् राक्षसान् छिनद्मि छेत्स्यामि। छिदिर् द्वैधीकरणे ॥

यमं[1] युनज्मि कालेन समिन्धानोऽस्त्रकौशलम्।
शुष्कपेषं पिनष्म्युर्वीमखिन्दानः स्वतेजसा ॥ ३७ ॥

३७. यममिति ॥ अस्त्रकौशलं समिन्धानो दीपयन्। ञीइन्धी दीप्तौ। शानच् ॥ "श्नान्नलोपः" इति धातुनकारलोपः ॥ "श्नसोरल्लोपः" इति प्रत्ययाकारलोपः। यममन्तकं कालेन मृत्युना युनज्मि योक्ष्यामि। किमुतान्यमिति भावः। अखिन्दानोऽश्राम्यन्। खिद् दैन्ये। पूर्ववच्छानचि "श्नसोरल्लोपः"। स्वतेजसा स्वप्रतापेनोर्वीं शुष्कं पिष्ट्वा शुष्कपेषं पिनष्मि संचूर्णयिष्यामि। शुष्कं पिनष्मीत्यर्थः ॥ "शुष्कचूर्णरूक्षेषु पिषः" इति कर्मोपपदे णमुल्प्रत्ययः। कषाद्यनुप्रयोगः ॥

भूर्तिं[2] तृणद्मि यक्षाणां हिनस्मीन्द्रस्य विक्रमम्।
भनज्मि सर्वमर्यादास्तनच्मि व्योम विस्तृतम्[3] ॥ ३८ ॥

३८. भूतिमिति ॥ यक्षाणां भूतिं कुबेरसंपदमित्यर्थः। तृणद्मि हिनस्मि। तृदि हिंसायाम्। इन्द्रस्य विक्रमं हिनस्मि नाशयिष्यामीत्यर्थः। हिंसि हिंसायाम्। सर्वमर्यादाः व्यवस्थाः भनज्मि भङ्क्ष्यामी-

१ c. and B. read the verse as
क्षुणद्मि सर्पान् पाताले &c.
यमं युनज्मि कालेन &c.
E3. reads it as under:—
यमं युनज्मि कालेन &c.
विनज्मि धाम सर्वेषां तृणेह्मि सकलं जगत् ॥

२ C. and B. read the following as the 38th verse.
विनज्मि धाम सर्वेषां तृणेह्मि सकलं जगत्।
{ शुष्कपेषं पिनष्म्युर्वी &c.
{ भूर्तिं तृणद्मि यक्षाणां &c., is given in c. and B. as the 39th verse.
E3. reads thus:—
शुष्कपेषं पिनष्म्युर्वीं &c.
भूर्तिं तृणद्मि यक्षाणां &c.

३ विस्तृतिम् T., G., Com.

त्यर्थः । भञ्जो आमर्दने । ञ्योम्नो विस्तृतिं महत्ताम् । स्तृञ् आच्छादने इति ह्रस्वान्तात्सौवादिकात् स्त्रियां क्तिन् । न तु क्रैयादिकाद्दीर्घान्तात् । तस्य स्तीर्णीरिति स्यात् । तनच्मि संकोचयिष्यामि । तञ्चू संकोचने ॥ "श्नान्नलोपः" ॥

न तृणेह्मीति लोकोऽयं मां विन्त्ते निष्पराक्रमम् ।
एवं वदन् दाशरथिरपृणग्धनुषा शरम् ॥ ३९ ॥

३९. नेति ॥ न तृणेह्मि अद्यापि न हन्मि । तृह हिंसायाम् । लटि मिपि श्नमि "तृणह इम्" इतीम् । गुणः । इति हेतोः अयं लोको मां निष्पराक्रमं विन्त्ते विचारयति । पौरुषहीनं मन्यत इत्यर्थः । विद विचारणे लटि तङ् ॥ "श्नसोरल्लोपः" ॥ टेरेत्वम् । दाशरथिः रामः एवं वदन् गर्जन् धनुषा शरमपृणक् अयुनक् । पृची संपर्के । लङि तिपि श्नम् । "हल्—" आदिना लोपः ॥

अथ पुनः प्रकीर्णकाः ।

न्यवर्त्तयत्सुमित्राभूस्तं चिकीर्षुं जगत्क्षयम् ।
तेजः क्षात्रं विवृण्वन्तं दिधक्षन्तमिवानलम् ॥ ४० ॥

४०. न्यवर्त्तयदिति ॥ सुमित्रायां भवतीति सुमित्राभूः सौमित्रिः ॥ "क्विप् च" इति क्विप् ॥ क्षत्रस्येदं क्षात्रं तेजःप्रतापं विवृण्वन्तं पूर्वोक्तगर्जनेन प्रकटयन्तम् । अत एव दिधक्षन्तं दग्धुमिच्छन्तम् । दहेः सन्नन्तात्लटः शत्रादेशः । घत्वादिकार्यम् । अनलमग्निमिव स्थितं

१ विन्त्ते मां D., c.
E3, reads thus:—
भनज्मि सर्वे मर्यादा &c.
न तृणेह्मीति लोकोऽयं &c.

२ The second line of this verse is not found in C., N., B., E2, and E3. It is found in T., G., Com. D., T2, T3, and T4.
C., N., B., E2, read thus:—
न्यवर्त्तयत् सुमित्राभू &c.
ऐक्षेतामाश्रमादारा &c. (*l.* 1 *v.* 41).
E3, reads thus:—
एवं वदन् दाशरथि &c.
न्यवर्त्तयत् सुमित्राभू &c.
ऐक्षेतामाश्रमादारा &c.

३ क्षात्रं तेजो D., T.

४ विवृण्वानं T2, T3.
विचिन्वानं D.

जगतः क्षयं जगत्संहारं चिकीर्षुं कर्त्तुमिच्छन्तं रामं न्यवर्त्तयत् न्यवारयत् ॥

ऐक्षेतामाश्रमादाराद्गिरिकल्पं पतत्रिणम् ।
[1]तं सीताघातिनं मत्वा हन्तुं रामोऽभ्यधावत ॥ ४१ ॥

४१. ऐक्षेतामिति ॥ अथ तौ राघवौ आश्रमादारादाश्रमस्य समीपे ॥ "अन्यारात्—" इति पञ्चमी ॥ गिरिकल्पं पर्वतप्रख्यम् । ईषदसमाप्तौ कल्पम् । 'कल्पब्देशीयदेश्यादिप्रख्यप्रतिनिधी अपि' इति सादृश्यवाचकेषु दण्डी । पतत्रिणं पक्षिणं जटायुषमैक्षेतामपश्येताम् । रामस्तं जटायुषं सीताघातिनं सीतां हतवन्तं मत्वा ॥ "कर्मणि हनः" इति हन्तेः कुत्सितार्थे भूतो णिनिः । स्त्रीवधस्य निन्दितत्वादिति । हन्तुम् ॥ "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति तुमुन् ॥ अभ्यधावत अभ्यगच्छत् । स्वरितेत्त्वात्तङ् ॥

मा[2]वधिष्ठा[3] जटायुं मां सीतां रामाहमैक्षिषि ।
उपास्थितैवमुक्ते तं सखायं राघवः पितुः ॥ ४२ ॥

४२. मेति ॥ हे राम मावधिष्ठाः मा वधीरित्यर्थः । अत्राङ्प्रश्लेषादाङ्पूर्वाद्धन्तेरकर्मकात् "आङो यमहनः" इत्यात्मनेपदम् ॥ "आत्मनेपदेष्वन्यतरस्याम्" इति वधादेशः ॥ अवध्यत्वे हेतुमाह । मां जटायुषं विद्धीति शेषः । यस्ते पितृसखो न त्वन्य इति भावः । हिंसार्थो वधिरयं प्रकृत्यन्तरमिति पक्षेऽप्यात्मनेपदं चिन्त्यम् । मा

---

१ c., E3, E2, B., read as follows:—
तं सीताघातिनं मत्वा &c . . . ।
प्रोवाच स तदा पक्षी भयाद्रामेण तार्जितः ॥
N. and C. read:—
तं सीताघातिनं मत्वा &c . . . ।
मावधिष्ठा जटायुं मां &c. . . . . ॥

२ N. and C. read as under a verse of 3 lines:—
उपास्थितैवमुक्ते तं &c.
पप्रच्छ जानकीवार्त्तां संग्रामं च पतत्रिणम्
ततो रावणमाख्याय &c. (*l.* 1 *v.* 43).
c. reads as under:—
मा वधीस्त्वं जटायुं मां &c.
उपास्थितैवमुक्ते तं &c.
पप्रच्छ जानकीवार्त्तां संग्रामं च पतत्रिणम् ॥

३ °वधीस्त्व° E2, c.

४ मा E3.

बाधिष्ठा इति पाठान्तरकल्पनं च साहसमेव । मा बन्धिष्ठा इति जयमङ्गलाकारकल्पितपाठस्तु पापिष्ठः । बध्नातेरनात्मनेपदित्वादर्थविरोधाच्चेति । अहं सीतामैक्षिषि अद्राक्षम् । ईक्षतेः कर्त्तरि लुङि तङि सिच इट् । एवं पक्षिणोक्ते राघवो रामः पितुः सखायं तं जटायुषमुपास्थित सङ्गतः ॥ "उपाद्देवपूजा—" इत्यादिना संगतकरणे तङ् ॥ "स्थाघ्वोरिच्च" ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥

ततो[1] रावणमाख्याय[2] द्विषन्तं पततां वरः ।
व्रणवेदनया ग्लायन् ममार गिरिकन्दरे ॥ ४३ ॥

४३. तत इति ॥ ततो रामसमागमानन्तरं पततां पक्षिणां वरो जटायुः रावणं द्विषन्तं द्रोहिणं सीताहर्त्तारमाख्याय व्रणवेदनया प्रहारव्यथया ग्लायन् ग्लानः सन् । ग्लैधातोः शतरि शप्यात्वाभावादायादेशः । गिरेः कन्दरे दर्यां ममार ॥ "म्रियतेर्लुङ्लिङोश्च" इति नियमाल्लिटि न तङ् ॥

तस्याग्[3]न्यम्बुक्रियां कृत्वा प्रतस्थाते पुनर्वनम् ।
विषादमीयिवांसौ तौ विचिन्वानावितस्ततः ॥ ४४ ॥

४४. तस्येति ॥ तौ रामलक्ष्मणौ तस्य जटायोरग्न्यम्बुनोः क्रियामग्निदाहमुदकदानं च कृत्वा विषादं खेदमीयिवांसौ प्राप्तौ ॥ "उपेयिवान्—" इति निपातः ॥ पुनर्भूय इतस्ततो विचिन्वानौ सीतामन्विष्यन्तौ वनं प्रति प्रतस्थाते प्रस्थितौ । तिष्ठतेर्लिट् ॥ "समवप्रविभ्यः स्थः" इति तङ् ॥

---

१ N. and C. read as under:—
व्रणवेदनया ग्लायन् &c.
तस्याग्न्यम्बुक्रियां कृत्वा &c.(*l*. 1 *v*. 44).
E2, E3, B. पप्रच्छ जानकीवार्त्तां &c.
ततो रावणमाख्याय &c.
२ °माचख्यौ.
३ c. reads 3 lines as under:—
तस्याग्न्यम्बुक्रियां &c.
सत्त्वानजस्रं घोरेण &c. (*l*. 1 *v*. 45).
क्षुध्यता जगृहाते तौ &c. (*l*. 2 *v*. 45).
B. reads as follows:—
व्रणवेदनया ग्लायन् &c.
तस्याग्न्यम्बुक्रियां &c.
विराधं प्रापिवांसौ तां &c.
सत्त्वानजस्रं घोरेण &c.

सत्वानजस्रं घोरेण वनाकर्षं समश्नता ।
क्षुध्यता जगृहाते तौ रक्षसा दीर्घबाहुना ॥ ४५ ॥

४५. सत्वानिति ॥ क्षुध्यता बुभुक्षमाणेन अत एव अजस्रं सत्वान् जन्तून् । 'सत्वमस्त्री तु जन्तुषु' इत्यमरः । वनात्त्वरयाकृष्य वनाकर्षम् ॥ "अपादाने परीप्सायाम्" इति णमुल् ॥ परीप्सा त्वरा । समश्नता भुञ्जानेन घोरेण भयंकरेण दीर्घबाहुना योजनबाहुनेत्यर्थः । रक्षसा कबन्धाख्येन राक्षसेन जगृहाते युगपद्गृहीतावित्यर्थः ॥

भुजौ चकृततुस्तस्य निस्त्रिंशाभ्यां रघूत्तमौ ।
स छिन्नबाहुरपतद्विह्वलो ह्वलयन्भुवम् ॥ ४६ ॥

४६. भुजाविति ॥ रघूत्तमौ तस्य कबन्धस्य भुजौ । त्रिंशतोऽङ्गुलिभ्यो निष्क्रान्तौ निस्त्रिंशौ खड्गौ । "डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं । निस्त्रिंशाद्यर्थम्" इति डच्प्रत्यये टिलोपः । ताभ्यां चकृततुः कृत्तवन्तौ । कृती छेदने । लिटि तसोऽतुसादेशः । छिन्नबाहुः स कबन्धः विह्वलो विभ्रान्तः सन् भुवं ह्वलयन् कम्पयन् । ह्वल चलने चुरादौ । मित्वाद्ध्रस्वः । अपतत् ॥

अथ कृत्याधिकारः ।

प्रष्टव्यं पृच्छतस्तस्य कथनीयमवीवचत् ।
आत्मानं वनवासं च जेयं चारिं रघूत्तमः ॥ ४७ ॥

४७. अथ कृत्याधिकारः । ते च प्राङ्ण्वुलीयास्तव्यादयः । तानेवोदाहरति । प्रष्टव्यमिति ॥ रघूत्तमो रामः कस्त्वं किमीयः कुतो वनवासः किं

---

१ बलापकर्षमश्नता N., C., c., B., T1. घोरेणापकर्षं चाश्नता वनात् D. B. reads:—क्षुध्यता जगृहातेतौ. भुजौ चकृततुस्तस्य.
२ रघूद्वहौ T3.
३ सञ्छिन्न° T2, T3.
४ ज्वलयन् B. B. has स छिन्नबाहुरपत &c. as the first line. The second line is not given.
५ व्रजतः T3.

ते कार्यमिति यत्प्रष्टव्यम् । प्रश्नादिना षत्वे ष्टुत्वम् । तत्सर्वं पृच्छतोऽनुयुञ्जानस्य देवभूयं गतस्य तस्य कबन्धस्य कथनीयं वक्तव्यम् ॥ "तव्यत्तव्यानीयरः" इति क्रमात्तव्यानीयरौ प्रत्ययौ ॥ आत्मानं रामं दाशरथिमित्यर्थः । पित्रादेशाद्वनवासम् । जेयं जेतव्यम् ॥ "अचो यत्" इति यत्प्रत्ययः ॥ अरिं सीताहारिणं च अवीवचदवोचत् । वच परिभाषणे इति धातोश्चौरादिकात् स्वार्थण्यन्ताण्णौ चङ्युपधाह्रस्वः ॥

लभ्या कथं नु वैदेही शक्यो द्रष्टुं कथं रिपुः[1] ।
सह्यः कथं वियोगश्च गद्यमेतत्त्वया मम[3] ॥ ४८ ॥

४८. लभ्येति ॥ वैदेही कथं नु लभ्या प्राप्या ॥ "पोरदुपधात्" इति यत्प्रत्ययः ॥ हरिः सुग्रीवः कथं द्रष्टुं शक्यः । वियोगश्च कथं सह्यः ॥ "शकिसहोश्च" इति यत्प्रत्ययः ॥ एतत्सर्वं त्वया मम गद्यं वाच्यम् ॥ "गदमद—" इत्यादिना यत्प्रत्ययः ॥ ममेति कर्मणः शेषत्वविवक्षायां षष्ठी । इयं च प्रार्थना । कस्त्वं किंनिमित्तं च ते राक्षसत्वं कथं च तद्विमोक्ष इत्यादि प्रश्नान्तरमप्युत्तरानुसाराद्दूह्यम् ॥

अहं राम श्रियः पुत्रो मद्यपीत इव भ्रमन् ।
पापचर्यो मुनेः शापाज्जात इत्यवदत्स तम् ॥ ४९ ॥

४९. अथ त्वं क इति पृष्टे अस्य नवभिरुत्तरमाहाहमित्यादिभिः ॥ हे राम अहं श्रियः पुत्रः । माद्यन्त्यनेनेति मद्यं मदिरा ॥ "कृत्यल्युटो बहुलम्" इति करणार्थे यत्प्रत्ययः ॥ मद्यपीतः पीतमद्य इव । वाहिताग्न्यादित्वान्निष्ठायाः परनिपातः । भ्रमन्नैश्वर्यमदाद् भ्रान्तः सन् । अन्यायवर्त्ती सन्नित्यर्थः । मुनेः स्थूलशिरोनामकस्य शापात् । पापं चर्यं चरणीयं यस्य स पापचर्यः क्रूरकर्मा जातोऽस्मीति स कबन्धः तं राममवदत् ॥

तेव भयातो यम्यत्वं शस्त्रपूतो ब्रवीमि ते[4] ।
रावणेन हृता सीता नीता लङ्कां[5] सुरारिणा[6] ॥ ५० ॥

---

१ रिपुः कथम् B.
२ हरिः T., G., Com.
३ द्रुतम् T2, T3, T4.
४ भयातस्तव N., C., D., T1.
५ लङ्कां नीता N., C., T.
६ सुदुर्गमाम् T2, T3, T4.

५०. तवेति ॥ संप्रति तव यम्यत्वं प्रयातः त्वया दण्डितोऽस्मीत्यर्थः । गद्यादि यम्यान्ते "गदमद—" इत्यादिना यत्प्रत्ययः । शस्त्रेण त्वच्छस्त्रपातेन पूतो निष्पापः सन्नित्यर्थः । 'राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा' ॥ इति मनुस्मरणादिति भावः । शापावसाने ज्ञानोदयात् ते तुभ्यं ब्रवीमि सर्वं स्पष्टं कथयामीत्यर्थः । कथयति । सुरारिणा रावणेन सीता हृता सती लङ्कां नीता । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति तत्रैव क्तः ॥

ऋष्यमूके[1]ऽनवद्योऽस्ति पण्यभ्रातृवधः कपिः ।
सुग्रीवो नाम वर्योऽसौ भवता चारुविक्रमः ॥ ५१ ॥

५१. सीतावृत्तान्तमुक्त्वा सुग्रीवसमागमोपायं ब्रुवन्नवद्यपण्येत्यादिनिपातत्रयं क्रमेणोदाहरति ऋष्यमूक इति ॥ ऋष्यमूके ऋष्यमूकाद्रौ । वदितुमनर्हमवद्यं गर्ह्यं पापमिति यावत् । वदेर्नञ्पूर्वात् क्यबपवादी गर्ह्यार्थे यत्प्रत्ययान्तो निपातः । अनवद्योऽगर्ह्यो निष्पापः । वालिनः स्वयमद्रोहित्वादिति भावः । पण्यः पणितव्यः त्वया प्रत्युपकारेण विनिमेतव्यः भ्रातुर्वालिनः स्वदारहरस्याततायिनो वधो यस्य सः तथोक्तः । 'नाततायिवधे दोषो हन्तुर्भवति कश्चन' इति स्मरणादिति भावः । पण व्यवहारे । पणितव्यार्थे ण्यदपवादी पूर्ववद्यत्प्रत्ययान्तो निपातः । सुग्रीवो नाम कपिः अस्ति । चारुविक्रमः श्लाघ्यपौरुषः प्रत्युपकारसमर्थ इति भावः । असौ सुग्रीवो भवता वर्यः मित्रत्वेनाप्रतिबन्धं वरणीय इत्यर्थः । अनिरोधेऽर्थे वृञः पूर्ववत् ण्यदपवाद्येव यत्प्रत्ययान्तो निपातः । किन्तु स्त्रियामस्य निपातनात्पुंसि प्रयोगः कवेः स्वातन्त्र्यात् । यद्वा वार्य इति ण्यदन्तपाठः प्रत्युदाहरणार्थः । तेनार्थोदुदाहरणस्य सुज्ञानत्वादिति भावः ॥

तेन वध्येन[2] हन्तासि त्वमर्यं पुरुषाशिनाम् ।
राक्षसं क्रूरकर्माणं शक्रारिं दूरवासिनम् ॥ ५२ ॥

---

१ ऋश्य° T. | २ भव्येन T3.

५२. तेनेति ॥ हे राम त्वम् । वहन्त्यनेनेति वह्यं शकटम् ॥ "वह्यं करणम्" इति ण्यदपवादेन यत्प्रत्ययान्तो निपातः । इह वह्येन करणेन सहायभूतेन तेन सुग्रीवेण पुरुषाशिनां रक्षसामर्यं स्वामिनं बलाधिकमित्यर्थः । ऋ गतौ इत्यस्मात् "अर्यः स्वामिवैश्ययोः" इति पूर्ववद्यत्प्रत्ययान्तो निपातः । क्रूरकर्माणं निष्कृपमित्यर्थः । शक्रारिमप्रतिद्वन्द्विनमित्यर्थः । दूरवासिनं समुद्रवर्त्तितया दुरासदमित्यर्थः । राक्षसं जात्यापि क्रूरं रावणं हन्तासि । दुर्धर्षमपि सुग्रीवसहायो हनिष्यसीत्यर्थः । हन्तेर्लुटि सिपि "स्यतासी लृलुटोः" इति तास्प्रत्ययः ॥

आस्ते स्मरन् स कान्ताया हृताया वालिना कपिः ।
वृषो यथोपसर्याया गोष्ठे गोदण्डताडितः ॥ ५३ ॥[1]

५३. अथ सुग्रीवस्य वालिवधे कारणमाह आस्त इति ॥ स कपिः सुग्रीवः गोष्ठे व्रजे दण्डताडितो दण्डघातेन वारितप्रवृत्तिर्वृषो वृषभः उपसर्या उपसंक्रमणीया प्राप्तगर्भग्रहणकालेत्यर्थः ॥ 'काल्योपसर्या प्रजने' इत्यमरः ॥ "उपसर्या काल्या प्रजने" इति सर्त्तेरुपपूर्वाद्यत्प्रत्ययान्तो निपातः ॥ तस्याः गोः यथा तां गामिव वालिना हृतायाः कान्तायाः भार्यायाः स्मरन् कान्तां स्मरन् ॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी ॥ आस्ते निवृत्तव्यापारान्तरस्तिष्ठतीत्यर्थः । दारहरोऽपि भ्रातापि पापिष्ठत्वाद्वध्य इति भावः ॥

तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम् ।
लङ्कां प्राप्य ततः पापं दशग्रीवं हनिष्यसि ॥ ५४ ॥

५४. तेनेति ॥ हे राम आर्येण अर्तुमर्हेण संगत्यर्हेण । ऋ गतौ ॥ "ऋहलोर्ण्यत्" ॥ अर्यस्येदं प्रत्युदाहरणम् । तेन सुग्रीवेण । न जीर्यतीति जर्यमनपायि ॥ "अजर्यं संगतम्" इति संगतविषये जीर्यतेर्नञ्पूर्वात्कर्त्तरि यत्प्रत्ययान्तो निपातः ॥ संगतं संगतिं सख्यमित्यर्थः । भावे क्तः । द्रुतं क्षिप्रं कुरु । 'अजर्यमार्यसंगतम्' । 'अजर्यं नोऽस्तु संग-

1 This latter half is omitted in T_3, and T_4.

तम्'। 'अजरिता कम्बलः' इति वृत्तौ उदाहरणप्रत्युदाहरणयोर्विशेषण-विशेष्यभावावगमात् अजर्यं सङ्गतमिति तथैव प्रयुक्तम्। कालिदासेन तु पर्यायत्वदृष्ट्या 'मृगैरजर्यं जरसोपदिष्टम्' इति कैवल्येन प्रयुक्तम्। अथवा तत्रापि सङ्गतमिति शेष इत्यास्तां तावत्। ततः सुग्रीवसं-गत्या लङ्कां प्राप्य पापं क्रूरं दशग्रीवं हनिष्यसि॥

अनृतोद्यं न तत्रास्ति सत्यवद्यं ब्रवीम्यहम्[1]।
मित्रभूयं गतस्तस्य रिपुहत्यां करिष्यसि॥ ५५॥

५५. न चायं कृतघ्न इत्याह अनृतेति॥ तत्र सुग्रीवे अनृतोद्यमनृतवचनं नास्ति॥ "वदः सुपि क्यप् च" इति भावे क्यपि संप्रसारणम्। अहं सत्यवद्यं सत्यवचनं ब्रवीमि। अत्रैव सूत्रे चकाराद्यत्। तस्य सुग्रीवस्य मित्रभूयं मित्रभावं गतः सन्॥ "भुवो भावे" इति क्यप्। रिपुहत्यां शत्रुवधं करिष्यसि॥ "हनस्त च" इति हन्तेः क्यप्॥ तकारश्चान्तादेशः॥

आदृत्यस्तेन[2] वृत्येन स्तुत्यो जुष्येण सङ्गतः।
इत्यः शिष्येण गुरुवद्गृध्यमर्थमवाप्स्यसि॥ ५६॥

५६. आदृत्य इति॥ किं च वृत्येन त्वया मित्रत्वेन वरणीयेनेत्यर्थः। जुष्येण हनूमदादिना सेव्येन परिवारवतेत्यर्थः। तेन सुग्रीवेण संगतस्त्वमादृत्यः तेषां सुग्रीवादीनामादरणीयः सत्करणीयः स्तुत्यः स्तोतव्यश्च तथा शिष्येण शासनीयेनान्तेवासिना॥ "शास इदङ्-हलोः" इतीकारः॥ गुरुवद्गुरुरिव इत्य एतव्योऽनुगम्यश्च सन्॥ "एति-स्तुशास्वृदृजुषः क्यप्" इति सर्वत्र क्यपि यथायोगं तुगागमो गुणप्र-तिषेधश्च द्रष्टव्यः। गृध्यमभिकाङ्क्ष्यमर्थं रावणवधसीताप्राप्तिलक्षण-मीप्सितार्थम्॥ "ऋदुपधाच्चाक्लृपिचृतेः" इति क्यप्॥ अवाप्स्यसि प्राप्स्यसि॥

---

१ ब्रवीमि ते E2, E3. | २ प्रादृत्यः C.

नाखेयः सागरोऽप्यन्यस्तस्य सद्भृत्यशालिनः ।
मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते ॥ ५७ ॥

५७. नेति ॥ सन्तः कार्यक्षमाः भृत्या भर्त्तव्याः कर्मकराः ॥ "भृञोऽसंज्ञायाम्" इति क्यपि तुक् ॥ तैः शालत इति तच्छालिनस्तस्य सुग्रीवस्य ॥ "कृत्यानां कर्त्तरि वा" इति षष्ठी ॥ अन्यो द्वितीयोऽपि सागरः । अपिः संभावनायाम् । न खेयोऽखेयः खनितुमशक्यो न । अयं तु कियानस्येति भावः ॥ "ई च खनः" इति क्यपीकारश्चान्तादेशः । प्रश्लिष्टदीर्घनिर्देशात् "ये विभाषा" इत्यात्वाभावः । किन्तु तस्य मन्युः शोकस्त्वया मार्ग्यो मार्जनीयः । तेन च तव शोको मृज्यो मार्ष्टव्यः । परस्परोपकारादुभाभ्यामपि कृतार्थाभ्यां भवितव्यमित्यर्थः ॥ "मृजेर्विभाषा" इति क्यपि मृज्यः ण्यति मार्ग्यः ॥ "मृजेर्वृद्धिः" "चजोः कु घिण्यतोः" इति कुत्वम् ॥

स राजसूययाजीव तेजसा सूर्यसंनिभः ।
अमृषोद्यं वदन् रुच्यो जगाहे द्यां निशाचरः ॥ ५८ ॥

५८. अथ राजसूयादिसूत्रोक्तान् क्यबन्तनिपातान् सपादश्लोकद्वयेनोदाहरति स इत्यादिना ॥ स निशाचरः । राज्ञा सूयते इति राजसूयः क्षत्रियाधिकारः क्रतुविशेषः । सुनोतेः क्यबन्तो निपातः । तेनेष्टवान् राजसूययाजी ॥ "करणे यजः" इति भूतार्थे णिनिः ॥ स इव तेजसा सूर्यसंनिभः । सरति सुवतीति वा सूर्यः । पूर्ववन्निपातः । तत्सन्निभः । मृषोद्यं मृषा वदनं न भवतीत्यमृषोद्यं सत्यवादं वदन् मृषापूर्वाद्वदः "वदः सुपि क्यप् च" इति पक्षे यति प्राप्ते नित्यं क्यबेव निपातितः । रोचत इति रुच्यो रोचमानः सन् । कर्त्तरि निपातः । द्यां दिवं जगाहे जगाम ॥

अकृष्टपच्याः[1] पश्यन्तौ ततो दाशरथी लताः ।
रत्नान्नपानकुप्यानामाटतुर्नष्टसंस्मृती ॥ ५९ ॥

१ अकृष्टपच्याः E2.

५९. अकृष्टेति ॥ ततः कबन्धगमनानन्तरं दाशरथी रामलक्ष्मणौ। कृष्टे पच्यन्त इति कृष्टपच्याः । कर्मकर्त्तरि निपातनात् क्यपि ततो नञ्समासः । अकृष्टपच्या लताः पश्यन्तौ तत्फलशालिनौ सन्ताविस्यर्थः । अत एव रत्नान्नपानकुप्यानां नष्टसंस्मृती नष्टरत्नादिसंस्मरणौ विस्मृतराजभोगौ सन्तावित्यर्थः । 'रतेर्गृहीतानुनयेन' इत्यादिवत्सापेक्षत्वेऽपि गमकत्वात्समासः । गोप्यत इति गुप्यं हेमरूप्यातिरिक्तं धनम् । गुपेः क्यपि निपातनाद्गस्य कः । आटतुः चेरतुः ॥

समुत्तरन्तावव्यथ्यौ नदान् भिद्योद्ध्यसंनिभान् ।
सिध्यतारामिव ख्यातां शबरीमापतुर्वने ॥ ६० ॥

६०. समुत्तरन्ताविति ॥ अव्यथ्यावव्यथमानावश्रान्तावित्यर्थः । नञ्पूर्वाद् व्यथेः तत एव निपातनात्कर्त्तरि क्यप् । भिनत्ति कूलमिति भिद्यः उज्झत्युदकमित्युद्ध्यश्च नदौ ॥ "भिद्योद्ध्यौ नदे" इति क्यप् उज्झेर्धत्वं च ॥ तत्संनिभान्नदान् पुंप्रवाहान् समुत्तरन्तौ । सिध्यन्त्यस्मिन्नर्था इति सिध्यः पुष्यः ॥ "पुष्यसिध्यौ नक्षत्रे" इत्यधिकरणे निपातनात्क्यप् ॥ स एव तारा नक्षत्रं तामिव ख्यातां शबरीं नाम कांचित्तापसीं वने कचिदाश्रमे आपतुः प्राप्तौ ॥

वसानां वल्कले शुद्धे[1] विपूयैः कृतमेखलाम् ।
क्षामामञ्जनपिण्डाभां[2] दण्डिनीमजिनास्तराम् ॥ ६१ ॥

६१. अथ श्लोकत्रयेण तामेव विशिषन्नाह वसानामित्यादिना ॥ शुद्धे वल्कले वसानामाच्छादयन्तीम् । विपूयन्त इति विपूयाः मुञ्जाः ॥ "विपूयविनीय—" इत्यादिना विपूर्वात्पवतेर्मुञ्जार्थे कर्मणि क्यबन्तो निपातः ॥ तैः कृतमेखलां कृतमौञ्जीकां क्षामां तपःकृशामञ्जनखण्डाभां कृष्णवर्णां दण्डिनीं धृतदण्डामजिनमास्तरस्तल्पं यस्यास्ताम् ॥

प्रगृह्य पदवत् साध्वीं स्पष्टरूपामविक्रियाम् ।
अगृह्यां वीतकामत्वादेवगृह्यामनिन्दिताम् ॥ ६२ ॥

१ मुञ्जैः D. | २ खण्डा° T., G., Com.

६२. प्रगृह्येति ॥ पुनः ॥ "ईदूदेद्द्विवचनं प्रगृह्यम्" इत्यादि सूत्रैर्यत्कृतसंज्ञं तत्प्रगृह्यपदं तद्वत्साध्वीं सद्वृत्ताम्। अन्यत्र सौशब्द्यात्प्रयोगार्हम्। स्पष्टरूपां स्वच्छमूर्तिम्। अन्यत्र संहितायां प्रकृतिभावात् पदान्तरासंकीर्णरूपम्। अविक्रियां विरुद्धचेष्टारहिताम्। अन्यत्र सन्धिप्रयुक्तवर्णविकाररहितम्। किं च वीतकामत्वान्निःस्पृहत्वात्। गृह्या अस्वैरिणी परतन्त्रा अगृह्यां स्वतन्त्राम्। देवगृह्यां देवपक्ष्याम्। अनिन्दितामगर्हितां प्रत्युत प्रशस्यामित्यर्थः। सर्वत्र "पदास्वैरिबाह्यापक्ष्येषु च" इति पदाद्यर्थेषु क्यप् ॥

धर्मकृत्यरतां नित्यमवृष्यफलभोजनाम्।
दृष्ट्वा तामभुचद्रामो युग्यायात[1] इव श्रमम् ॥ ६३ ॥

६३. धर्मेति ॥ नित्यं धर्मकृत्यरतां धर्मकार्यसक्ताम् अवृष्याण्यनिन्द्रियवर्धनानि प्रत्युत शोषणानीत्यर्थः ॥ "विभाषाकृवृषोः" इत्युभयत्र क्यप् ॥ ह्रस्वस्य तुक्। तानि फलानि भोजनमाहारो यस्यास्ताम्। तां शबरीं दृष्ट्वा रामो। युग्यं पत्रं वाहनम् ॥ "युग्यं च पत्रे" इति क्यबन्तो निपातः ॥ तेनायातः प्रयात इव श्रममभुचत्। तद्दर्शनादाह्लादं गत इत्यर्थः। मुचेर्लुङि लृदित्वादङ् ॥

स तामूचेऽथ कच्चित्त्वममावास्यासमन्वये[2][3]।
पितॄणां कुरुषे कार्यमपाक्यैः[4] स्वादुभिः[5] फलैः ॥ ६४ ॥

६४. स इति ॥ अथ स रामस्तां शबरीमूचे। यदूचे तदेव सप्तभिराह। हे भद्रे। अमा सह वसतोऽस्यां सूर्याचन्द्रमसावित्यमावस्या अमावास्या ॥ "अमावस्यदन्यतरस्याम्" इत्यमाशब्दपूर्वाद्वसेः विकल्पेन निपातनादधिकरणार्थे ण्यत्। तस्याः समन्वये समागमे अपाक्यैर पचनीयैरनग्निपक्वैरित्यर्थः ॥ "ऋहलोर्ण्यत्" ॥ "चजोः कु—" इति

१ युग्ययात D., T2, T3, T4.
२ °ममावस्या° T., L., Com.
३ समुन्नये C., c.
४ °मवाच्यैः D., B.
५ स.धुभिः T3. वारिभिः T2.

कृत्वम्॥ स्वादुभिः रुच्यैः फलैः पितॄणां कार्यं पितृकृत्यं श्राद्धकर्म। पूर्ववण्ण्यत्। कुरुषे कच्चित्॥

अवश्यपाव्यं पवसे कच्चित्त्वं देवभाग्घविः।
आसाव्यमध्वरे सोमं द्विजैः कच्चिन्नमस्यसि॥ ६५॥

६५. अवश्येति॥ हे पुण्ये त्वमवश्यपाव्यमवश्यशोध्यम्। पूञो भौवादिकात् "ओरावश्यके" इति ण्यत्॥ मयूरव्यंसकादित्वात्समासः। 'लुम्पेदवश्यमः कृत्ये' इति मकारलोपः। देवभाक् देवतार्हं हविराज्यादिकं पवसे कच्चित्पुनासि किम्। तस्माद्देवधातोर्लटि "थासः से"। अध्वरे क्रतौ द्विजैरासाव्यमभिषोतव्यम्। आङ्पूर्वात्सुनोतेः "आसुयुवपि—" इत्यादिना ण्यत्। सोमं नमस्यसि नमस्करोषि कच्चित्॥ "नमो वरिवश्चित्रङः क्यच्"॥ ततो लटि सिप्॥

आचाम्यं सन्ध्ययोः कच्चित् सम्यक् ते न प्रहीयते।
कच्चिदग्निमिवानाय्यं काले संमन्यसेऽतिथिम्॥ ६६॥

६६. आचाम्यमिति॥ हे कल्याणि सन्ध्ययोः सायंप्रातःकालयोः ते तवाचाम्यमाचमनकर्म॥ "आसुयुवपि" इत्येव ण्यत्॥ न प्रहीयते न लुप्यति कच्चित्। काले प्राप्तमतिथिं गार्हपत्याग्नित्यादानीय प्रणीयतेऽग्निरनित्य आनाय्यो दक्षिणाग्निः। 'यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते। तस्मिन्नानाय्य—' इत्यमरः। "आनाय्योऽनित्ये" इत्यनित्याग्नावाङ्पूर्वान्नयतेर्ण्यदायादेशनिपातः। तमग्निमिव संमन्यसे मानयसि कच्चित्॥

न प्रणाय्यो जनः कच्चिन्निकाय्यं तेऽधितिष्ठति।
देवकार्यविघाताय धर्मद्रोही महोदये॥ ६७॥

६७. नेति॥ हे महोदये पुण्ये धर्माय द्रुह्यतीति धर्मद्रोही धर्मविघातकः॥ "प्रणाय्योऽसंमतौ" इति निपातः॥ देवकार्यविघाताय ते तव

१ पवसे D. | २ कश्चित् C.

निकाय्यं निवासम् ॥ "पाय्यसांनाय्य—" इत्यादिना वासार्थे निपातः॥ 'निकाय्यनिलयालयाः' इत्यमरः । नाधितिष्ठति कच्चित् ॥

कुण्डपाय्यवतां कच्चिदग्निचित्यावतां तथा ।
कथाभी रमसे नित्यमुपचाय्यवतां शुभे ॥ ६८ ॥

६८. कुण्डेति ॥ हे शुभे शोभने कुण्डैः पीयते सोमोऽस्मिन्निति कुण्डपाय्यः क्रतुविशेषः ॥ "क्रतौ कुण्डपाय्यसंचाय्यौ" इति स्वरार्थं यत्प्रत्ययान्तो निपातः ॥ तद्वतां तद्याजिनामित्यर्थः । तथा उपचाय्यश्चित्याग्निविशेषः ॥ "अग्नौ परिचाय्योपचाय्यसमूह्याः" इति चिनोतेर्ण्यदायादेशनिपातः ॥ तद्वतामग्निचित्याग्निचयनम् ॥ "चित्याग्निचित्ये च" इति चिनोतेः स्वरार्थं भावे यकारस्तुक् च निपातितौ । तद्वतामग्निचितां च कथाभिः पुण्यकथाभिः नित्यं रमसे सन्तुष्यसि कच्चित् ॥

इति कृत्याधिकारः ।

वर्धते ते तपो भीरु व्यजेष्ठा विघ्ननायकान् ।
अजैषीः कामसंमोहौ संप्राप्था विनयेन वा ॥ ६९ ॥

६९. अथ श्लोकत्रयेण प्रकीर्णकानाह वर्धत इति ॥ हे भीरु भयशीले । संज्ञापूर्वकस्य विधेरनित्यत्वात् न गुणः । ते तव तपो वर्धते कच्चिदिति सर्वत्रानुषङ्गः । विघ्ननायकान् तपोविघ्नकारिण इन्द्रियदोषान् व्यजेष्ठाः विजितवत्यसि कच्चित् । जेर्लुङि "विपराभ्यां जेः" इत्यात्मनेपदम् । कामसंमोहौ । उपलक्षणमेतत् । अरिषड्वर्गमजैषीः किमित्यर्थः । जेर्लुङि सिचि वृद्धिः । विनयेनानौद्धत्येन संप्राप्थाः प्राप्तासि किम् । आप्नोतेः कर्मणि लुङि थासि "झलो झलि" इति सलोपः ॥

नायस्यासि तपस्यन्ती गुरून्सम्यगतूतुषः ।
यमान्नोदविजिष्ठास्त्वं निजाय तपसेऽतुषः ॥ ७० ॥

---

१ दण्डपाय्य° E2.
२ कच्चिदुप° T2, T3, T4.
३ °मुपकार्यवतां C.

७०. नेति ॥ हे पुण्ये त्वं तपस्यन्ती तपश्चरन्ती ॥ "कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः" इति क्यङ् ॥ "तपसः परस्मैपदं वक्तव्यम्"। तस्माल्लटः शतरि ङीप् । नायस्यसि न क्लिश्यसि किम् । यसु प्रयत्ने। लटि सिपि श्यन् । गुरून् सम्यगतूतुषः शुश्रूषया तोषितवत्यसि। तुष्यतेर्णौ चङ्युपधाह्रस्वः । अभ्यासदीर्घः । यमादन्तकान्नोदविजिष्ठाः नोद्विग्नासि नाभैषीः किमित्यर्थः । कृतकृत्यानां मृत्युभयायोगादिति भावः । ओविजी भयचलनयोः । लुङि तङि थासि इट् ॥ "विज इट्" इति ङित्वान्न गुणः । निजाय नित्याय । 'निजमात्मीयनित्ययोः' इति विश्वः । तपसे तपश्चरणाय अतुषः । नित्यं तपसि त्वमुत्सुकासि किमित्यर्थः । पुषादित्वादङ् ॥

अथार्घ्यं[1] मधुपर्काद्यमुपनीयादरादसौ ।
अर्चयित्वा फलैरर्च्यौ सर्वत्राख्यदनामयम् ॥ ७१ ॥

७१. अथेति ॥ अथ कुशलप्रश्नानन्तरमसौ शबरी । अर्घार्थं जलमर्घ्यं तन्मधुपर्कश्चाद्यं यस्य तदर्चासाधनमुपानीय अर्च्यौ पूज्यौ तावादरात्फलैरर्चयित्वा सर्वत्र सर्वेषु पृष्टार्थेषु अनामयं क्षेममाख्यदवोचत् ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्"॥

अथ कृदधिकारः ।

सख्यस्य[2] तव सुग्रीवः कारकः कपिनन्दनः ।
द्रुतं द्रष्टासि मैथिल्याः सैवमुक्त्वा तिरोऽभवत् ॥ ७२ ॥

७२. कृत्सु कृत्यान्भावकर्मार्थानुक्त्वा कर्त्रर्थान् ण्वुलादीन्निरुपपदानधिकृत्याह सख्यस्येति ॥ हे राम कपीनां नन्दनो नन्दयिता । नन्द्यादित्वाल्ल्युः । सुग्रीवस्तव सख्यस्य सखित्वस्य ॥ "सख्युर्यः" ॥ कर्मणि षष्ठी । कारकः कर्त्ता सख्यं करिष्यतीत्यर्थः । द्रुतं क्षिप्रमेव मैथिल्याः सीतायाः द्रष्टा पश्यन् असि भविष्यसीत्यर्थः । वर्त्तमानसामीप्ये लट् । कृदशिभ्यां

[1] °र्घ्यंमधुपर्का° T., G., Com. | [2] तव सख्यस्य T2, T3, T4.

क्रमात् "ण्वुल्तृचौ" इति ण्वुल्तृचौ। इत्युक्त्वा सा शबरी तिरोऽभवत्तिरोभूता ॥

नन्दनानि मुनीन्द्राणां रमणानि वनौकसाम्।
वनानि भेजतुर्वीरौ ततः पाम्पानि[1] राघवौ ॥ ७३ ॥

७३. नन्दनानीति ॥ ततः शबरीतिरोधानानन्तरं वीरौ राघवौ मुनीन्द्राणां नन्दनानि नन्दकानि वनौकसां वनवासिनां प्राणिनां रमणानि मनोरमाणि। उभयत्रापि नन्द्यादित्वाल्ल्युः। कर्मणि षष्ठी। पम्पाया अदूरभवानि पाम्पानि ॥ "अदूरभवश्च" इत्यण् ॥ वनानि भेजतुः प्रापतुः। भजेर्लिट् ॥ "तृफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ ॥

भृङ्गाली[2]कोकिलक्रुङ्भिर्वाशनैः पश्य लक्ष्मण।
रोचनैर्भूषितां पम्पामस्माकं हृदयाविधम् ॥ ७४ ॥

७४. भृङ्गेति ॥ हे लक्ष्मण वाश्यन्त इति वाशनैः कूजद्भिः रोचन्त इति रोचनैः रोचमानैः। उभयत्रापि नन्द्यादित्वाल्ल्युः ॥ भृङ्गालिभिः कोकिलैः क्रुङ्भिः क्रौञ्चैश्च। 'क्रुङ् क्रौञ्चः' इत्यमरः। ऋत्विगादिना क्रुञ्चतेः क्विन्प्रत्ययः। निपातसाहचर्यान्नानुनासिकलोपः ॥ "संयोगान्तस्य लोपः" ॥ "क्विन्प्रत्ययस्य कुः" ॥ भूषितामत एवोद्दीपकत्वादस्माकं हृदयं विध्यतीति हृदयावित्। क्विप्। ग्रह्यादिना संप्रसारणम् ॥ "नहिवृति—" इत्यादिना दीर्घः ॥ तां पम्पां पम्पासरः पश्य ॥

परिभावीनि[3] ताराणां पश्य मन्थीनि चेतसाम्।
उद्भासीनि जलेजानि दुन्वन्[4]सदयितं जनम् ॥ ७५ ॥

७५. परीति ॥ ताराणां नक्षत्राणां परिभावीनि तिरस्कारीणि। ततोऽपि रमणीयानीत्यर्थः। चेतसां विरहिचित्तानां मन्थन्तीति मन्थीनि प्रमाथीनि। मन्थेर्भौवादिकस्येदित्वान्नुमागमः। उद्भासीनि विकासीनि।

---

१ पम्पानि C., T3.
२ भृङ्गालि T., G., Com.
३ परिभावीणि N., C.
४ धुवन्त्य° C.

सर्वत्र "नन्दिग्रहि—" इत्यादिना ग्रह्यादित्वाण्णिनिः । जले जातानि ॥ जलेजानि ॥ "सप्तम्यां जनेर्डः" ॥ "तत्पुरुषे कृति बहुलम्" इत्यलुक् ॥ अदयितं दयिताविरहिणं जनं दुन्वन्ति तपन्ति । टुदु उपतापे । छन्द् । स्वादिभ्यः श्नुः ।

सर्वत्र दयिताधीनं सुव्यक्तं रामणीयकम् ।
येन जातं प्रियापाये कद्वदं हंसकोकिलम् ॥ ७६ ॥

७६. सर्वत्रेति ॥ सर्वत्र सर्वेष्वपि वस्तुषु रामणीयकं रमणीयत्वम् ॥ "योपधाद्गुरूपोत्तमाद्वुञ्" ॥ दयिताधीनं सुव्यक्तम् । कुतः । येन कारणेन प्रियापाये प्रियाविरहे । हंसाश्च कोकिलाश्च हंसकोकिलम् ॥ "विभाषा वृक्षमृग—" इत्यादिना शकुनिद्वन्द्वः ॥ कुत्सितं वदतीति कद्वदमसह्यमपि जातम् । वदेः पचाद्यच् ॥ "रथवदयोश्च" इति कोः कदादेशः ॥ यत्पूर्वं प्रियासहचरस्य मे सुखावहं तत्सर्वमिदानीमसह्यं जातमिति तात्पर्यम् ॥

पक्षिभिर्वितृदैर्[1] यूनां शाखिभिः कुसुमोत्किरैः[2] ।
अज्ञो यो यस्य वा नास्ति प्रियः[3] प्रग्लो भवेन्न सः ॥ ७७ ॥

७७. पक्षिभिरिति ॥ यो न जानातीत्यज्ञो विषयरसानभिज्ञः । अज्ञस्य वा यस्य । प्रीणयतीति प्रियः प्रीतिकरः प्रेमास्पदीभूतः । जनो नास्ति स एव यूनां तरुणानाम् । कर्मणि षष्ठी । वितृन्दन्तीति वितृदाः हिंसकाः । इगुपधलक्षणः कः प्रत्ययः । तैः पक्षिभिः कोकिलादिभिः । उत्किरन्ति विक्षिपन्तीत्युत्किराः ॥ सर्वत्र "इगुपधज्ञाप्रीकिरः कः" ॥ कुसुमानामुत्किराः पुष्पवर्षिणः । कर्मणि षष्ठीसमासः । तैः शाखिभिः वृक्षैश्च । ग्रीह्यादित्वादिनिः । प्रकर्षेण ग्लायत इति प्रग्लः प्रग्लानः क्षीणहर्षो न भवेत् । अभिज्ञः प्रियजनवांश्च ग्लायत्येवैतैरित्यर्थः ॥ "आतश्चोपसर्गे" इति कप्रत्ययः ॥

---

१ विभृतैः B.
२ कुसुमोत्करैः C.
३ प्रिया C., E3.

ध्वनीनामुद्धमैरेभिर्मधूनामुद्धयैर्भृशम् ।
आजिघ्रैः पुष्पगन्धानां पतङ्गैर्ग्लपिता वयम् ॥ ७८ ॥

७८. ध्वनीनामिति ॥ ध्वनीनां शब्दानाम् । उद्धमन्तीत्युद्धमाः उत्पादकाः ध्वनन्त इत्यर्थः । तैर्मधूनां मकरन्दानाम् । उद्धयन्तीत्युद्धयाः पातारः । तैः पुष्पगन्धानाम् । आजिघ्रन्तीत्याजिघ्राः आघ्रातारः । तैः । सर्वत्र "पाघ्रा—" इत्यादिना शप्रत्यये कर्मणि षष्ठी । सासमेन "पाघ्रा—" इत्यादिना घ्राध्मोर्जिघ्रधमादेशौ । धेटस्त्वयादेशः । एभिः पतङ्गैः पक्षिविशेषैः भृङ्गैः । विशेषणैस्तद्धर्माभिधानात्सामान्यशब्देन विशेषलक्षणा । वयं ग्लपिताः पीडिताः । ग्लायतेर्ण्यन्तात्करणे "अर्त्तिह्री—" इत्यादिना पुगागमः ॥ "ग्लास्नावनुवमां च" इति मित्वाद्ध्रस्वत्वम् ॥

धारयैः कुसुमोर्मीणां पारयैर्बाधितुं जनान्[2] ।
शाखिभिर्हा हतो[3] भूयो हृदयानामुदेजयैः ॥ ७९ ॥

७९. धारयैरिति ॥ कुसुमोर्मीणां पुष्पपरंपराणाम् । धारयन्तीति धारयैः धारकैः । जनान् विरहिजनान् बाधितुम् । पारयन्तीति पारयैः शक्तैः हृदयानाम् । उदेजयन्तीत्युदेजयैरुत्कम्पनैः ॥ "अनुपसर्गाल्लिम्प—" इत्यादिना सर्वत्र शप्रत्ययः । कर्मणि षष्ठी च । शाखिभिर्वृक्षैर्भूयो हतोऽस्मि । हेति खेदे ॥

ददैर्दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम् ।
लिम्पैरिव तनोर्वातैश्चेतयः स्याज्ज्वलो न कः[4] ॥ ८० ॥

८०. ददैरिति ॥ मादृग्भ्यो मादृशेभ्यः वियोगिभ्यः । त्यदादिसूत्रे चकाराद्दृशेः क्विन्प्रत्ययः । दुःखस्य । ददतीति ददैर्दायकैः ॥ "ददातिदधात्योर्विभाषा" इति विकल्पात्कर्त्तरि शप्रत्ययः । उत्तममुत्कृष्टमामोदं सौरभम् । दधतीति धायैः दधानैः ॥ "ददातिदधात्योः—" इति शाभावपक्षे

---

१ °र्ग्लपिता C.
२ जनम् T2, T3, T4.
३ हतो T., G., Com.
४ स्याज्जनो न कः E3.

आकारान्तत्वात् "श्याद्व्यध—" इत्यादिना णप्रत्यये युगागमः ॥ "कर्तृकर्मणोः कृति" इत्यत्र शेषत्वविवक्षायामेव षष्ठीविधानादिह तदविवक्षायामामोदमिति कर्मणि द्वितीया । तनोर्देहस्य । लिम्पन्तीति लिम्पैरिव तनुं लिम्पद्भिरिव स्थितैः ॥ "अनुपसर्गाल्लिम्प—" इत्यादिना शप्रत्ययः । वातैः कः । चेतयतीति चेतनः प्राणी ॥ "अनुपसर्गात्—" इत्यादिनैव चेतयतेः शप्रत्ययः । ज्वलयतीति ज्वलः प्रज्वलनात्मको न स्यात् । सर्वोऽपि स्यादेवेत्यर्थः ॥ "ज्वलितिकसन्तेभ्यो णः" इति णविकल्पात्पचाद्यच् ॥

अवश्यायकणास्रावाश्चारुमुक्ताफलत्विषः ।
कुर्वन्ति चित्त[1]संस्रावं चलत्पर्णाग्रसंभृताः[2] ॥ ८१ ॥

८१. अवश्यायेति ॥ चलत्सु पर्णाग्रेषु संभृताः संचिताः अत एव चारूणां मुक्ताफलानां त्विष इव त्विषो येषां ते तत्कल्पा इत्यर्थः । अवश्यायत इत्यवश्यायो हिमम् । तस्य कणास्त एव आस्रवन्तीत्यास्रावाः निष्यन्दाः । निष्यन्दमानहिमबिन्दव इत्यर्थः । चित्तम् । संस्रवतीति संस्रावं द्रवम् । कुर्वन्ति । द्रावयन्तीत्यर्थः ॥ "श्याद्व्यध—" इत्यादिना श्यायतेरवपूर्वात्कर्त्तरि णप्रत्ययः

अवसायो भविष्यामि दुःखस्यास्य कदा न्वहम् ।
न जीवस्यावहारो[3] मां करोति सुखिनं यमः ॥ ८२ ॥

८२. अवसायेति ॥ अहं कदा अस्य अवस्यतीत्यवसायोऽवसायकः समापको भविष्यामि । यमोऽन्तकोऽपि जीवस्य प्राणस्यापहरतीत्यपहारो हर्त्ता सन् मां सुखिनं न करोति । अस्मज्जीवनान्मरणमेव वरमिति भावः । श्यादिनैवावापपूर्वात्स्यतेर्हरतेश्च णप्रत्ययः ॥

दह्येऽहं मधुनो लेहैर्दावैरुग्रैर्यथा गिरिः ।
नायः को नु[4] स येन[5] स्यां बताहं विगतज्वरः ॥ ८३ ॥

---

१ चित्तं सं° T., G., Com.,
२ संहताः E2.
 संस्थिताः E3.
३ °स्यापहारो T., G., T2, Com.
४ कोऽत्र N., C., E2, E3, c., T1, T.
५ येनाहं बत स्यां विगत° T2, T3, T4.

८३. दह्य इति ॥ अहं मधुनो मकरन्दस्य लिहन्तीति लेहैर्मधुलिड्भिः ॥ "श्याद्व्यध—" इति लिहेर्णः ॥ उग्रैः क्रूरैः दुन्वन्तीति दावैः दवानलैः गिरिर्यथा गिरिरिव दह्ये। दहेः कर्मणि लटि मिप्। येनोपायेनाहं विगतज्वरः स्यां सः नयतीति नायः उपायः ॥ "दुन्योरनुपसर्गे" इति णः ॥ को नु न कोऽपीत्यर्थः। बतेति खेदे ॥

समाविष्टं ग्रहेणेव ग्राहेणेवात्तमर्णवे[1]।
दृष्ट्वा गृहान्स्मरस्येव वनान्तान्मम मानसम् ॥ ८४ ॥

८४. समिति ॥ मम मानसं वनान्तान्वनप्रदेशान् स्मरस्य गृह्णन्तीति गृहान् गेहानिव तथोद्दीपकानित्यर्थः ॥ "गेहे कः" इति कप्रत्ययः ॥ दृष्ट्वा ग्रहेण कुजादिक्रूरखेटेन समाविष्टमाक्रान्तमिव अर्णवे ग्राहेण नक्रेण आत्तं गृहीतमिव भवतीति शेषः ॥ "विभाषा ग्रहः" इति व्यवस्थितविभाषया जलचरे कर्त्तरि णः ज्योतिषि पचाद्यच् ॥

वाताहति[2]चलच्छाखा नर्त्तका इव शाखिनः।
दुःसहा ही[3] परिक्षिप्ताः क्वणद्भिरलिगाथकैः ॥ ८५ ॥

८५. वातेति ॥ वातेनाहताः अत एव चलन्त्यः शाखाः लताः बाहवश्च येषां ते। 'शाखा वेदप्रभेदेषु बाहुपार्श्वद्रुमाङ्गयोः' इति यादवः। क्वणद्भिर्गुञ्जद्भिरलिभिरेव गाथकैर्गायकैः ॥ "गस्थकन्" इति गायतेः शिल्पिनि थकन् प्रत्ययः ॥ परिक्षिप्ताः परिवृताः शाखिनो वृक्षाः नृत्यन्तीति नर्त्तकाः लासका इव ॥ "शिल्पिनि ष्वुन्" ॥ हा कष्टम्। दुःसहा असह्याः। सहेः खल् ॥

एकहायनशारङ्ग[4]गती रघुकुलोत्तमौ।
लवंकौ[5] शत्रुशक्तीनामृष्यमूकमगच्छताम्[6] ॥ ८६ ॥

---

१ ग्राहेणैवा° T4.
२ वाताहत E2, T4, T., G., Com.
३ हा E2, T., G., Com.
४ सारङ्ग N., B., E2, T., G., Com.
५ लावकौ D.
६ °मृश्यमूक° T2, T4, T., G., Com.

८६. एकेति ॥ जिहीते भावानिति हायनः संवत्सरः ॥ "हश्च व्रीहिकालयोः" इति जहातेर्जिहीतेश्च तन्त्रेणोपादानाद्यथासंख्यं व्रीहिकालयोर्ल्युट्प्रत्यये युगागमः । एकहायनस्य प्रथमवयसः सारङ्गस्य गजस्येव गतिर्ययोस्तौ । 'सारंगश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' इति विश्वः । शत्रुशक्तीनां लवकौ साधुच्छेदनौ ॥ "प्रुसृल्वः समभिहारे वुन्" इति लुनातेः समभिहारे लक्षणया साधुकारित्वे वुन्प्रत्ययः । रघुकुलोत्तमौ रामलक्ष्मणौ ऋश्यमूकमगच्छतां प्राप्तौ ॥

तौ वालिप्रणिधी मत्वा सुग्रीवोऽचिन्तयत्कपिः ।
बन्धुना विगृहीतोऽहं भूयासं जीवकः कथम् ॥ ८७ ॥

८७. ताविति ॥ अथ सुग्रीवः कपिस्तौ राघवौ वालिनः प्रणिधी चारौ मत्वा बन्धुना भ्रात्रा विगृहीतः एवं प्रच्छन्नं पीडितः सन् अहं कथं जीवको जीव्यासमित्यर्थः ॥ "आशिषि च" इति धातुमात्रादाशीरर्थे वुन्प्रत्ययः ॥ भूयासमिति तस्यैव स्फुटार्थमनुवादः । इत्यचिन्तयत् ॥

स शत्रुलावौ मन्वानो राघवौ मलयं गिरिम् ।
जगाम संपरीवारो व्योममायमिवोत्थितम् ॥ ८८ ॥

८८. अथ सोपपदाधिकारः ॥ स इति ॥ स सुग्रीवः राघवौ शत्रून् लुनीत इति शत्रुलावौ शत्रुघातिनौ ॥ "कर्मण्यण्" ॥ मन्वानो निश्चिन्वन् सपरीवारो हनूमदादिसहितः । कपीनाममनुष्यत्वात् "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । व्योम मिमीत इति व्योममायः ॥ "ह्वावामश्च" इति माङः कर्मण्यणि युक् ॥ तमिवोत्थितं नभः परिच्छेत्तुमिवोच्छ्रितमित्यर्थः । मलयं गिरिं जगाम । तत्पादमृष्यमूकं विहाय तमेवारूढ इत्यर्थः ॥

शर्मदं मारुतिं[1] दूतं विषमस्थः कपिद्विपम्[2] ।
शोकापनुदमव्यग्रं प्रायुङ्क्त[3] कपिकुञ्जरः[4] ॥ ८९ ॥

---

१ मारुतं E2.
२ कपिद्विपः T2.
३ प्रायुक्त D.
४ कपिकुञ्जरम् T2.

८९. शर्मदमिति ॥ विषमे तिष्ठतीति विषमस्थ आपन्नः ॥ "सुपि स्थः" इति कप्रत्ययः ॥ कपिः कुञ्जर इव कपिकुञ्जरः सुग्रीवः । उपमितसमासः । शर्म सुखं ददातीति शर्मदं हितकारिणमित्यर्थः । अन्यथा सुखाहरणवाचिना शोकापनुदशब्देन पौनरुक्त्यापत्तेः ॥ "आतोऽनुपसर्गे कः" ॥ अत एव शोकमपनुदतीति शोकापनुदं सुखाहर्तारमित्यर्थः ॥ "तुन्दशोकयोः परिमृजापनुदोः" इत्यत्र "आलस्यसुखाहरणयोरिति वक्तव्यम्" इत्यर्थविशेषे कविधानात् । अव्यग्रं विमृश्यकारिणमित्यर्थः कपिद्विपं कपिश्रेष्ठम् । गम्भीरस्वभावमित्यर्थः । द्वाभ्यां पीबतीत्यर्थे "सुपि" इति योगविभागात्कः । मारुतस्यापत्यं पुमांसं मारुतिं हनूमन्तम् ॥ "अत इञ्" ॥ द्रुतं प्रायुङ्क्त । इदानीमियमेव नीतिरिति निश्चित्य संधित्सुः प्रेषितवानित्यर्थः ॥

विश्वासप्रदवेशो[१]ऽसौ पथिप्रज्ञः समाहितः ।
चित्तसंख्यो जिगीषूणामुत्पपात नभस्तलम् ॥ ९० ॥

९०. विश्वासेति ॥ विश्वासं प्रददातीति विश्वासप्रदो वेषो यस्य सः भिक्षुवेषधारीत्यर्थः । रामायणे तथैवोक्तेः । पन्थानं प्रजानातीति पथिप्रज्ञः पथि कुशल इत्यर्थः ॥ "प्रे दाज्ञः" इति ददातेर्जानातेश्च प्रोपसृष्टात्कर्मोपपदात्कः ॥ समाहितोऽप्रमत्तः जिगीषूणां चित्तानि संचष्टे संख्यातीति वा चित्तसंख्यः चित्तज्ञः ॥ "समि ख्यः" इति संपूर्वात्ख्यातेश्च क्शिङादेशाच्च कर्मोपपदात्कः ॥ असौ मारुतिः नभस्तलमुत्पपात ॥

सुरापैरिव घूर्णद्भिः शाखिभिः पवनाहतैः ।
ऋष्यमूक[२]मगाद्भृङ्गैः प्रगीतं सामगैरिव ॥ ९१ ॥

९१. सुरापैरिति ॥ पवनेनाहतैराकम्पितैरत एव सुरां पिबन्तीति सुरापाः मद्यपास्तैरिव घूर्णद्भिस्तद्वद्भ्रमद्भिः शाखिभिर्वृक्षैरुपलक्षितम् । किं च भृङ्गैः सामानि गायन्तीति सामगास्तैरिव प्रगीतमुपगीतमृश्य-

१ वेषो N., D., T., Com. G., E3. | २ ऋश्यमूक T., G., Com.

मूकमगात् गतः ॥ "गापोष्टक्" इति गायतेः पिबतेश्च टक् ॥ सुरापै-रित्यत्र "सुराशीध्वोः पिबतेरिति वक्तव्यम्" इति धातूपपदनियमः ॥

तं मनोहरमागम्य[1] गिरिं वर्महरौ कपिः ।
वीरौ सुखाहरोऽवोचद्भिक्षुर्भिक्षार्हविग्रहः ॥ ९२ ॥

९२. तमिति ॥ भिक्षुः परिव्राड्वेषधारी । 'भिक्षुः परिव्राट् कर्मन्दी' इत्यमरः । तत्रापि भिक्षामर्हतीति भिक्षार्हो विग्रहो यस्य सः भिक्षा-कालोचितवेष इत्यर्थः ॥ "अर्हः" इत्यर्हतेः कर्मोपपदादच्प्रत्ययः ॥ कपिर्हनूमान् । मनो हरतीति मनोहरम् ॥ "हरतेरनुद्यमनेऽच्" ॥ तं गिरिमागम्य प्राप्य वर्म हरत इति वर्महरौ कवचधारणवयस्कौ ॥ "वयसि च" इत्यच् ॥ वीरौ राघवौ । सुखमाहर्त्तुं शीलमस्यास्तीति सुखाहरः आनन्दकरः सन् ॥ "आङि ताच्छील्ये" इत्यच् ॥ अवोचत् ॥

बलिनावमुमद्रीन्द्रं युवां स्तम्बेरमाविव ।
आचक्षाथामिथः कस्माच्छङ्करेणापि दुर्गमम् ॥ ९३ ॥

९३. बलिनाविति ॥ हे वीरौ स्तम्बे रमेते स्तम्बेरमौ हस्तिनाविव ॥ "स्तम्बकर्णयो रमिजपोः" इत्यत्र "हस्तिसूचकयोरिति वक्तव्यम्" इति हस्तिन्यच्प्रत्ययः ॥ बलिनौ बलाढ्यौ युवां शङ्करेणेश्वरेणापि ॥ "शमिधातोः संज्ञायाम्" इत्यच् ॥ दुर्गममद्रीन्द्रमृश्यमूकं कस्मा-त्कारणादिथः प्राप्नुथः । इणो वर्त्तमानसामीप्ये भूते लटि थस् । आच-क्षाथां कथयतम् । चक्षिङो लोट् आथाम् ॥

व्याप्तं गुहाशयैः क्रूरैः क्रव्याद्भिः सनिशाचरैः ।
तुङ्गशैलैतरुच्छन्नं[2] मानुषाणामगोचरम् ॥ ९४ ॥

९४. व्याप्तमिति ॥ पुनर्गुहासु शेरत इति गुहाशयैः ॥ "अधिकरणे शेतेः" इत्यच्प्रत्ययः ॥ क्रूरैर्हिंस्रैर्निशासु चरन्तीति निशाचराः ॥ "चरेष्टः" इति टः ॥ सह तैः सनिशाचरैः क्रव्यमदन्तीति क्रव्याद्भिः राममांसभ-

१ °मागत्य N., C., T., B., D., c. | २ तुङ्ग T., G., Com.

क्षकैः सिंहव्याघ्रादिभिः व्याप्तम् ॥ "क्रव्ये च" इत्यत्तेरण्बाधेन विट्-प्रत्ययः ॥ तुङ्गशृङ्गः उच्चशिखरः स चासौ तरुच्छन्नश्च तमत एव मानुषाणामगोचरममुमद्रीन्द्रमिति पूर्वेण संबन्धः ॥

अथ खशादिप्रत्ययाधिकारः।

सत्वमेजयसिंहाढ्यान् स्तनन्धयसमत्विषौ।
कथं नाडिन्धमान्मार्गानागतौ विषमोपलान् ॥ ९५ ॥

९५. सत्वमेजयेति ॥ सत्वान् प्राणिनः एजयन्ति कम्पयन्तीति सत्वमेजयाः सर्वप्राणिभीषणाः ॥ "एजेः खश्" ॥ "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः ॥ तैः सिंहैराढ्यान् पूर्णान् विषमोपलान् निम्नोन्नतपाषाणान् अत एव नाडीः सिराः धमन्त्युपलोत्पीडनादापूरयन्तीति नाडिन्धमान्। 'नाडी तु धमनिः सिरा' इत्यमरः ॥ "नाडीमुष्ट्योश्च" इति खश्प्रत्यये मुमागमः ॥ "खित्यनव्ययस्य" इति ह्रस्वः ॥ मार्गान्। स्तनं धयतीति स्तनन्धयो बालः ॥ "नासिकास्तनयोर्ध्माधेटोः" इति धेटः खश्ययादेशः ॥ पूर्ववन्मुमागमः। तत्समत्विषौ तद्वत्कोमलाङ्गाविलर्थः। युवां कथमागतौ प्राप्तौ ॥

उत्तीर्णौ वा कथं भीमाः सरितः कूलमुद्वहाः।
आसादितौ कथं ब्रूतं न गजैः कूलमुद्रुजैः ॥ ९६ ॥

९६. उत्तीर्णाविति ॥ किं च कूलान्युद्वहन्त्युत्क्रम्य वहन्तीति कूलमुद्वहाः अत एव भीमाः भीषणाः सरितो नदीः कथमुत्तीर्णौ तीर्णवन्तौ। मारुतिः सागरं तीर्ण इतिवत्कर्त्तरि क्तः। कूलान्युद्रुजन्तीति कूलमुद्रुजाः कूलभञ्जकाः ॥ "उदि कूले रुजिवहोः" इत्युभयत्रापि खशि मुमागमः ॥ तैर्गजैः कथं नासादितौ नास्कन्दितौ ब्रूतम् ॥

रामोऽवोचद्धनूमन्तमावामभ्रंलिहं गिरिम्[1]।
ऐव विद्वन्पितुः कामात्पान्तावल्पम्पचान्मुनीन् ॥ ९७ ॥

---

१ रामोऽवदद्ध° T3, Com. E3, reads the verse thus:— | ऐव विद्वन्पितुः &c. रामोऽवोचद्धनू &c.

९७. राम इति ॥ अथ रामः हनू कपोलपार्श्वे ।'गण्डौ कपोलौ तत्परा हनुः' इत्यमरः । तद्वन्तं हनूमन्तम् । निन्दार्थे मतुप् । भग्नहनुरयमिति प्रसिद्धः ॥ "अन्येषामपि दृश्यते" इति दृशिग्रहणसामर्थ्यात्पाक्षिको दीर्घः ॥ अवदत् । किमिति । हे विद्वन् वेषानुरूपमामन्त्रितम् । आवां पितुः कामात् काममभिप्रायमनुसृत्येत्यर्थः ॥ ल्यब्लोपे पञ्चमी । अल्पं पचन्तीत्यल्पम्पचान् मितम्पचानल्पसंतुष्टानित्यर्थः ॥ "मितनखे च" इति मितशब्दस्यार्थपरत्वादनुक्तसमुच्चयार्थकाराद्वा अल्पशब्दोपपदात्पचेः खशित्याहुः । मुनीन्पान्तौ रक्षन्तौ सन्तौ । पातेर्लटः शत्रादेशः । अभ्रं लेढीत्यभ्रंलिहमत्युन्नतम् ॥ "वहाभ्रे लिहः" इति खशि मुम् ॥ गिरिमृश्यमूकमेव आगतौ । आङ्पूर्वादिणो लङि वसि सलोपः । आड्वृद्धिः ॥

अमितम्पचमीशानं सर्वभोगीणमुत्तमम् ।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि ॥ ९८ ॥

९८. अथ कस्ते पिता तमाह अमितम्पचमिति ॥ मितं पचतीति मितम्पचः ॥ "मितनखे च" इति खश् ॥ नञ्समासे अमितम्पचं बहुप्रदमित्यर्थः । ईशानमीशितारं न त्वन्येनेश्यमानम् । सर्वभोगाय हितं सर्वभोगीणं महाभोगिनमित्यर्थः ॥ "आत्मन्विश्वजनभोगोत्तरपदात्खः" ॥ णत्वम् ॥ उत्तममुत्तमपुरुषं भुवि ख्यातं दशरथमावयोः पितरं विद्धि जानीहि ॥ "हुझल्भ्यो हेर्धिः" ॥

छलेन दयितारण्याद्रक्षसारुन्तुदेन नः ।
असूर्यम्पश्यया मूर्त्या हृता तां मृगयावहे ॥ ९९ ॥

९९. अथर्श्यमूकप्राप्तौ कारणमाह छलेनेति ॥ अरुः तुदतीत्यरुन्तुदेन मर्मभेदिना ॥ "विध्वरुषोस्तुदः" इति खश् ॥ "अरुर्द्विषत्—" इत्यादिना मुमागमे संयोगान्तलोपः ॥ रक्षसा रावणेन सूर्यं न पश्यतीत्यसूर्यम्पश्या किमुतान्यमित्यतिगोप्येत्यर्थः । नञः सूर्यसंबन्धे वैरस्यादसमर्थस-

१ सर्वभोगीन° B., E2, c. | २ हृतां E2.

मासेऽपि दृशिनैवेष्यते ॥ "असूर्यललाटयोर्दृशितपोः" इति खशि मुमागमः ॥ पाघ्रादिना दृशेः पश्यादेशः । तया मूर्त्या उपलक्षिता नोऽस्माकं दयिता छलेन मायया मृगच्छद्मना अरण्याद्धृता । तां मृगयावहे अन्विष्यावहे । मृग अन्वेषणे । स्वार्थण्यन्तः ॥

प्रत्यूचे मारुती राममस्ति वालीति वानरः ।
शमयेदपि संग्रामे यो ललाटन्तपं रविम् ॥ १०० ॥

१००. प्रतीति ॥ अथ मारुतिः हनूमान् रामं प्रत्यूचे प्रत्युवाच । किमिति । नाम्ना वालीति प्रसिद्धो वानरोऽस्ति । यो वालिः संग्रामे रणे ललाटं तपतीति ललाटन्तपः सर्वोत्तरः ॥ "असूर्यललाटयोः—" इत्यादिना खशि मुम् । तं रविमपि शमयेदवसादयेत् । शमयितुं शक्नोतीत्यर्थः ॥ "शकि लिङ् च" इति शक्यर्थे लिङ् ॥

उग्रम्पश्येन सुग्रीवस्तेन भ्रात्रा निराकृतः ।
तस्य मित्रीयतो दूतः संप्राप्तोऽस्मि वशंवदः ॥ १०१ ॥

१०१. उग्रम्पश्येति ॥ उग्रं पश्यतीत्युग्रम्पश्यः पापदर्शी ॥ "उग्रम्पश्य—" इत्यादिना निपातनादण्बाधेन खशि मुम् पश्यादेशश्च ॥ तेन भ्रात्रा तेन वालिना सुग्रीवो निराकृतः हृतदारो निरस्त इत्यर्थः । मित्रमात्मन इच्छतो मित्रीयतः त्वया मैत्रीमिच्छत इत्यर्थः ॥ "सुप आत्मनः क्यच्" ॥ ततो लटः शत्रादेशः । तस्य सुग्रीवस्य वशं वदतीति वशंवदोऽनुकूलचारी ॥ "प्रियवशे वदः खच्" ॥ एवंभूतः संप्राप्तोऽस्मि ॥

प्रियंवदोऽपि नैवाहं ब्रुवे मिथ्या परन्तप ।
सख्या तेन दशग्रीवं निहन्तासि द्विषन्तपम् ॥ १०२ ॥

१०२. प्रियवंद इति ॥ × × × × × × हे राम द्विषतः परांस्तापयतीति द्विषन्तपं महावीरमपीत्यर्थः । पूर्ववत्खचि मुमागमे संयोगान्तलोपः । दशग्रीवं निहन्तासि हनिष्यासि । निपूर्वाद्धन्तेर्लुटि सिप् ॥ "जासिनिप्रहण—" इत्यत्र संघातविगृहीतविपर्यस्तग्रहणेऽपि शेषत्वाविवक्षायामेव षष्ठीविधानादिह तदविवक्षायां कर्मणि द्वितीयैव ॥

वाचंयमोऽहमनृते सत्यमेतद्ब्रवीमि ते ।
एहि सर्वंसहं मित्रं सुग्रीवं कुरु वानरम् ॥ १०३ ॥

१०३. वाचंयम इति ॥ अहमनृते विषये वाचं यच्छतीति वाचंयमो मौनव्रती ॥ "वाचि यमो व्रते" इति खच् ॥ "वाचंयमपुरन्दरौ च" इति निपातनान्मुमागमः ॥ सत्यमेव ते तुभ्यं ब्रवीमि । एह्यागच्छ । सर्वं सहत इति सर्वंसहं सर्वकार्यक्षमम् ॥ "पूःसर्वयोर्दारिसहोः" इति खचि मुम् ॥ सुग्रीवं नाम वानरं मित्रं कुरु । यतस्ते हस्तस्था कार्यसिद्धिरिति भावः ॥

सर्वंकषयशःशाखं रामकल्पतरुं[1] कपिः ।
आदायाभ्रंकषं प्रायान्मलयं फलशालिनम् ॥ १०४ ॥

१०४. सर्वंकषेति ॥ ततः कपिः हनूमान् सर्वं कषन्तीति सर्वंकषाणि सर्वव्यापीनि यशांस्येव शाखा यस्य तं राममेव कल्पतरुमादाय गृहीत्वा पृष्ठमारोप्येत्यर्थः । अभ्रं कषतीत्यभ्रंकषम् ॥ "सर्वकूल—" इत्यादिनोभयत्रापि खचि मुम् ॥ फलेन चूतादिना कार्यसिद्ध्या च शालत इति फलशालिनं मलयं मलयाद्रिं प्रायात् प्रयातः । अत्र यशः-शाखं रामकल्पतरुमिति सावयवरूपकम् ॥

मेघंकरमिवायान्तमृतुं रामं क्लमान्वितः ।
दृष्ट्वा मेने न सुग्रीवो वालिभानुं भयंकरम् ॥ १०५ ॥

१०५. मेघंकरमिति ॥ क्लमान्वितो वालिभानुसंतापात्क्लान्तः सुग्रीवः मेघान् करोतीति मेघंकरम् ॥ "मेघर्त्तिभयेषु कृञः" इति खचि मुम् ॥ एतेन भयंकरो व्याख्यातः । तमृतुं वर्षर्तुमिवायान्तं रामं दृष्ट्वा । वालि-र्भानुरिवेत्युपमितसमासः । ऋतुमिवेति लिङ्गात् । तं भयं करोतीति भयंकरं न मेने । वालिभयं मुमोचेत्यर्थः ॥

उपाह्व्यकुरुतां सख्यमन्योन्यस्य प्रियंकरौ[2] ।
क्षेमंकराणि कार्याणि पर्यालोचयतां[3] ततः ॥ १०६ ॥

१ रामं कल्प° T2, B.
२ °मुभौ B.
३ प्रत्यालोचयतां T2, E2, D.

१०६. उपाग्नीति ॥ अन्योन्यस्य प्रियं कुरुतः इति प्रियङ्करौ परस्परोपकारकौ सन्तौ तौ रामसुग्रीवौ अग्नेः समीपे उपाग्नि। सामीप्येऽव्ययीभावः। सख्यं मैत्रीम् ॥ "सख्युर्यः" अकुरुताम्। अग्निसाक्षिकां मैत्रीं चक्रतुरित्यर्थः। ततः सख्यानन्तरं क्षेमं कुर्वन्तीति क्षेमङ्कराणि ॥ "क्षेमप्रियमद्रेऽण् च" इति चकारादुभयत्रापि खचि मुम् ॥ कार्याण्यनन्तरकर्त्तव्यानि पर्यालोचयतां पर्यालोचितवन्तौ। लुचेश्चौरादिकात्कर्त्तरि लङि तसस्तामादेशः ॥

आशितम्भवमुत्कुष्टं वलिगतं शयितं स्थितम्।
बह्वमन्यत काकुत्स्थः कपीनां स्वेच्छया कृतम् ॥ १०७ ॥

१०७. आशितम्भवमिति ॥ कपीनां कपिसंबन्धि स्वेच्छया कृतम्। आशित इत्याङ्पूर्वादश्नातेरविवक्षिते कर्मणि कर्त्तरि क्तः। आशितस्य भावः आशितम्भवः ॥ "आशिते भुवः करणभावयोः" इति भावे खचि मुमागमः ॥ तमाशितम्भवमाशितमशनं भोजनमिति यावत्। उत्कुष्टमुच्चैः क्रोशनं क्ष्वेडितमित्यर्थः। वलिगतं वल्गनं शयितं शयनं स्थितं स्थितिम्। सर्वत्र भावे क्तः। दृष्ट्वा काकुत्स्थो रामो बह्वमन्यत। चिरात्स्वप्रसादलब्धं तेषां स्वच्छन्दचारं दृष्ट्वा सन्तुष्ट इत्यर्थः ॥

ततो बलिन्दमप्रख्यं कपिर्विश्वम्भराधिपम्।
सुग्रीवः प्राब्रवीद्रामं वालिनो युधि विक्रमम् ॥ १०८ ॥

१०८. तत इति ॥ ततः कपिचेष्टादर्शनानन्तरं कपिः सुग्रीवः बलिं दमयतीति बलिन्दमो बलिध्वंसो विष्णुः तद्वत्प्रख्याति प्रकाशत इति तत्प्रख्यम् ॥ "आतश्चोपसर्गे" इति कः ॥ विश्वं बिभर्त्तीति विश्वम्भरा भूः। उभयत्रापि "संज्ञायां भृतॄवृजि—" इत्यादिना खच्। तस्या अधिकं पातीत्यधिपः। पूर्ववत्कः। रामं वालिनो युधि विक्रमं प्राब्रवीत् रामाय प्रोवाचेत्यर्थः। अकथितकर्मत्वविवक्षायां द्वितीया ॥

---

१ वलितं E3.
२ स्वेहया D.
३ बुद्धिविक्रमम् T2.

वसुन्धरायां कृत्स्नायां नास्ति वालिसमो बली ।
हृदयङ्गममेतत्त्वां[1] ब्रवीमि न पराभवम् ॥ १०९ ॥

१०९. वसुन्धरायामिति ॥ कृत्स्नायां वसूनि धारयतीति वसुन्धरा भूः । पूर्ववत्खचि "खचि ह्रस्वः" । तस्यां वालिसमो बली बलाढ्यो नास्ति । हृदयं गच्छतीति हृदयङ्गमं हृद्गतम् ॥ "गमश्च" इति संज्ञायां खच् ॥ हृद्गतस्येयं संज्ञेति मन्यते । एतद्वालिबलं त्वां ब्रवीमि तुभ्यं ब्रवीमीत्यर्थः । पूर्ववद्द्विकर्मकत्वम् । पराभवं न ब्रवीमि । तदुत्कर्षेण न ते पराभवं ब्रवीमि । तव सर्वोत्कृष्टत्वात् । किन्तु हृद्गतं वाच्यमित्युच्यत इत्यर्थः ॥

इति खशाधिकारः ॥

दूरगैरन्तगैर्बाणैर्भवानत्यन्तगः[2] श्रियः ।
अपि संक्रन्दनस्य स्यात् क्रुद्धः किमुत वालिनः ॥ ११० ॥

११०. रामोत्कर्षमेवाह दूरगैरिति ॥ हे राम क्रुद्धो भवान् दूरगैर्दूरगामिभिः अन्तगैर्लक्ष्यपातिभिः अमोघैरित्यर्थः बाणैः साधनैरत्यन्तगा अतिभूमिं गता श्रीर्यस्य ॥ "अन्तात्यन्त—" इत्यादिना सर्वत्र गमेर्डः ॥ तस्य सङ्क्रन्दनस्य इन्द्रस्यापि । नन्द्यादित्वाल्ल्युः । स्यात् प्रत्यर्थीभवितुं शक्नुयादित्यर्थः ॥ "शकि लिङ् च" इति शक्त्यर्थे लिङ् । शेषे प्रथमः । वालिनः किमुत तज्ज्ञस्य कपेरिति भावः ॥

वरेण[3] तु मुनेर्वाली सञ्जातो दस्युहो रणे ।
अवार्यप्रसरः प्रातरुद्यन्निव तमोपहः ॥ १११ ॥

१११. तथापि वालिबलं विचिन्त्य शङ्कते मे हृदयमित्याह श्लोकद्वयेन वरेणेत्यादिना ॥ असि त्वं महावीरः किंतु वाली रणे दस्युहः दस्यून् शत्रून् वध्यात् । 'दस्युशात्रवशत्रवः' इत्यमरः ॥ "आशिषि हनः" इत्याशीरर्थे हन्तेर्डप्रत्ययः ॥ इति मुनेर्ब्रह्मणो वरेणानुग्रहेण प्रातर्दिनादौ

१ °मेतत्त्वा N., C., T1, T2, T3, T4.
२ °त्यन्तगश्रियः Com.
३ वरेणात्र T3.

उद्यन्नुदयमानः । उत्पूर्वादिणो लटः शत्रादेशः । तमांस्यपहन्तीति तमोपहः सूर्यः ॥ "अपेः क्लेशतमसोः" इति हन्तेरपपूर्वात् डप्रत्ययः ॥ स इवावार्यप्रसरो दुर्वारगतिः सञ्जातः ॥

अतिप्रियत्वान्न हि मे कातरं प्रतिपद्यते ।
चेतो वालिवधं राम क्लेशापहमुपस्थितम् ॥ ११२ ॥

११२. ततः किमत आह अतिप्रियत्वादिति ॥ हे राम क्लेशानपहन्तीति क्लेशापहं सर्वदुःखोच्छेदकम् । पूर्ववत् डः । उपस्थितं त्वत्सामर्थ्यादासन्नं वालिवधमतिप्रियत्वात् वालिवधस्येप्सिततमत्वात् कातरं व्यग्रमत्यौत्सुक्यात्त्वरमाणं मे चेतो न प्रतिपद्यते न प्रत्येति । वालिबलानुभवितृत्वान्न विश्वसिति हीत्यर्थः ॥

इति डाधिकारः ॥

शीर्षघातिनमाया[1]तमरीणां[2] त्वां विलोकयन् ।
पतिघ्नी[3]लक्षणोपेतां मन्येऽहं वालिनः[4] श्रियम्[5] ॥ ११३ ॥

११३. तर्हि माभून्नेत्याह शीर्षेति ॥ हे राम अहं रिपूणां शीर्षाणि हन्तीति शीर्षघातिनं शीर्षच्छेदिनम् ॥ "कुमारशीर्षयोर्णिनिः" इति हन्तेर्णिनिप्रत्ययः ॥ आयान्तं त्वां विलोकयन् वालिनः श्रियं पत्नीं पतिं हन्तीति पतिघ्नम् ॥ "लक्षणे जायापत्योष्टक्" इति हन्तेष्टक् ॥ "गमहन—" इत्यादिना उपधालोपः ॥ "हो हन्तेः—" इति कुत्वम् ॥ तेन लक्षणेन पाणिरेखादिना उपेतां मन्ये । वालिनं हतं मन्ये इत्यर्थः । उभयबलपर्यालोचनया मे मन उभयतो डोलायते इति भावः ॥

शत्रुघ्नान् युधि हस्तिघ्नो गिरीन्क्षिप्यन्नकृत्रिमान् ।
शिल्पिभिः पाणिघै[6]: क्रुद्धस्त्वया जय्यो[7]ऽभ्युपायवान् ॥ ११४ ॥

---

१ °मायान्त° D., T3, T4, Com.
२ °यातं रिपूणां त्वा T2, T3, T4, Com. reads रिपूणां त्वां.
३ पतिघ्नी T1, T3, N., C., B., E2, E3.
४ वालिनि श्रियम् T3.
५ श्रियम् T., G., Com.
६ पाणिघ्नैः Com.
७ जय्यो ह्युपायवान् Com. जय्योऽप्युपायवान् noticed by c.

११४. पुनःश्लोकत्रयेण वालिबलमेव प्रकटयन्नाह शत्रुघ्नानिति ॥ युधि हस्तिनो हन्तुं शक्तो हस्तिघ्नः ॥ "शक्तौ हस्तिकपाटयोः" इति टक् ॥ कुत्वोपधालोपौ । शत्रून् घ्नन्तीति शत्रुघ्नान् ॥ "अमनुष्यकर्तृके च" इति टकि शेषं पूर्ववत् । अकृत्रिमानमानुषनिर्मितान् गिरीन् पाणीन्घ्नन्तीति पाणिघ्नैः पाणिवादकैः शिल्पिभिस्तद्विदैः सह । उत्साहार्थं पाणिवाद्यं कुर्वद्भिः सहेत्यर्थः । 'वृद्धो यूना' इतिवत् सहार्थे तृतीया ॥ "पाणिघताडघौ शिल्पिनि" इति निपातनात् टकि टिलोपकुत्वे । क्षिप्यन् क्षिपन् । क्षिपेर्दैवादिकात् लटः शत्रादेशः । उपायवान् बहूपायसंपन्नः । भूम्नि मतुप् । क्रुद्धो वाली त्वया जय्यो हि जेतुं शक्य इति काकुः ॥ "क्षय्यजय्यौ शक्यार्थे" इति निपातनात्साधुः ॥

आढ्यङ्करणविक्रान्तो महिषस्य सुरद्विषः ।
प्रियङ्करणमिन्द्रस्य दुष्करं कृतवान्वधम् ॥ ११५ ॥

११५. आढ्यङ्करणेति ॥ किं च अनाढ्य आढ्यः क्रियतेऽनेनेत्याढ्यङ्करणमाख्यातिकरं विक्रान्तं विक्रमो यस्य स वाली इन्द्रस्य अप्रियं प्रियं क्रियतेऽनेनेति प्रियङ्करणम् ॥ "आढ्यसुभग—" इत्यादिनोभयत्र ख्युन्प्रत्ययः ॥ दुष्करमशक्यं महिषस्य महिषरूपस्य सुरद्विषोऽसुरस्य दुन्दुभिनामकस्य वधं कृतवान् ॥

प्रियम्भावुकतां यातस्तं क्षिपन् योजनं मृतम् ।
स्वर्गे प्रियम्भविष्णुश्च कृत्स्नं शक्तोऽप्यबाधयन् ॥ ११६ ॥

११६. प्रियम्भावुकतामिति ॥ किं च मृतं तं महिषं योजनं योजनदूरं क्षिपन् किरन् अप्रियः प्रियो भवन् प्रियम्भावुकः तस्य भावस्तत्तां यातः । किं च शक्तोऽपि कृत्स्नमबाधयन् किञ्चिदप्यपीडयन् । बाधेश्चौरादिकाल्लटः शत्रादेशः । स्वर्गे अप्रियः प्रियो भवन् प्रियम्भविष्णुः प्रियो जात इत्यर्थः ॥ "आढ्यसुभग—" इत्यनुवृत्तौ "कर्त्तरि भुवः खिष्णुच्खुकञौ" इति भवतेः कर्त्रर्थे यथायोगमुभौ प्रत्ययौ ॥

जिज्ञासोः शक्तिमस्त्राणां रामो न्यूनधियः कपेः ।
अभिनत्प्रतिपत्त्यर्थं सप्त व्योमस्पृशस्तरून् ॥ ११७ ॥

११७. जिज्ञासोरिति ॥ अथ रामोऽस्त्राणां शक्तिं जिज्ञासोर्ज्ञातुमिच्छोरत एव न्यूनधियोऽल्पबुद्धेः । स्थाने अविश्वासादिति भावः । कपेः सुग्रीवस्य प्रतिपत्त्यर्थं प्रत्ययार्थं व्योमस्पृशोऽभ्रङ्कषान् सप्त तरूनभिनद्व्यदारयत् । भिदेर्लङ् । 'बिभेद च पुनः सालान्सप्तैकेन महेषुणा' इति दर्शनात् ॥

ततो वालिपशौ वध्ये रामर्त्विग्जितसाध्वसः ।
अभ्यर्यभून्निलयं भ्रातुः सुग्रीवो निनदन् दधृक् ॥ ११८ ॥

११८. तत इति ॥ ततस्तरुभेदनानन्तरं वालिन्येव पशौ वध्ये आलभ्ये सति । राम एव ऋतुमृतावृतुप्रयुक्तो वा यजतीति ऋत्विग्याजको यस्य स रामर्त्विक् । अत एव जितसाध्वसो निर्भीकः धृष्णोतीति दधृक् धृष्टश्च ॥ "ऋत्विग्दधृक्—" इत्यादिना द्वावपि क्विन्प्रत्ययान्तौ ॥ निपातनादेव दधृगिति द्विर्वचनम् ॥ "क्विन्प्रत्ययस्य कुः" इति कुत्वम् ॥ सुग्रीवो यजमान इति भावः । निनदन् सिंहनादं कुर्वन् । यजमानपाठश्च गम्यते । भ्रातुर्वालिनो निलयमालयमभ्ययादभियातः । पशुमानेतुमित्यर्थः । अभ्यभूदिति पाठेऽप्यभियानमेवाभिभवः ॥

गुहाया निरगाद्वाली सिंहो मृगमिव द्युवन् ।
भ्रातरं युङ् भियः संख्ये घोषेणापूरयन्दिशः ॥ ११९ ॥

११९. गुहाया इति ॥ संख्ये युद्धे भियो भयस्य युङ् योक्ता शत्रुभीषण इत्यर्थः । कर्मणि षष्ठी ॥ "ऋत्विक्—" इत्यादिना युजेः क्विन् ॥ "युजेरसमासे" इति नुमि संयोगान्तलोपः । कुत्वे नकारस्य ङकारः । वाली सिंहो मृगमिव भ्रातरं सुग्रीवं द्युवन्नभिगमिष्यन् । द्यु अभिगमने इति धातोर्वर्तमानसामीप्ये लटि शपो लुक् । लटः शतर्युवङादेशः ।

१ अभ्ययाद्नि° T., G., Com. | २ भियो युङ् भ्रातरं T_2, T_3, T_4.

घोषेण सिंहनादेन दिशः। "ऋत्विक्—" इत्यादिना क्विन्नन्तो निपातः॥ आपूरयन् गुहाया निरगान्निर्गतः॥

व्यायच्छमानयोर्मूढो भेदे सदृशयोस्तयोः।
बाणमुद्यतमायंसीदिक्ष्वाकुकुलनन्दनः॥ १२०॥

१२०. व्यायच्छमानयोरिति॥ इक्ष्वाकुकुलनन्दनो रामः व्यायच्छमानयोर्व्याप्रियमाणयोः युध्यमानयोरित्यर्थः॥ "आङो यमहनः" इति यमेराङ्पूर्वादकर्मकत्वादात्मनेपदम्। सदृशयोः समानयोः समरूपयोः॥ "त्यदादिषु—" इत्यत्र समानान्ययोरुपसंख्यानात्समानोपपदाद्दृशेः कञ्प्रत्ययः॥ "दृग्दृशवतुषु" इति समानस्य सभावः। तयोर्वालिसुग्रीवयोर्भेदे मूढोऽयमसाविति विवेक्तुमशक्तः सन्नित्यर्थः। उद्यतं तूणादुद्धृतं बाणमायंसीत् उपसंहृतवान्। यमेराङ्पूर्वाल्लुङि सगिडागमौ॥ "नेटि" इति प्रतिषेधान्न हलन्तलक्षणा वृद्धिः। अकर्त्रभिप्रायत्वात् "समुदाङ्भ्यो यमोऽग्रन्थे" इति नात्मनेपदम्। सकर्मकत्वात् "आङो यमहनः" इति न तङ्॥

ऋष्यमूकमगात् क्लान्तः कपिर्मृगसदृग् द्रुतम्।
किष्किन्धाद्रिसदात्यर्थं निष्पिष्टः कोष्णमुच्छ्वसन्॥ १२१॥

१२१. ऋश्यमूकमिति॥ कपिः सुग्रीवः किं किं दधातीति किष्किन्धा गुहा॥ "आतोऽनुपसर्गे कः"॥ स्त्रीत्वाट्टाप्। पारस्करादित्वात्सुडादिनिपातः। तस्या अद्रिः तत्र सीदति इति तत्सदा तद्वासिना वालिना॥ "सत्सूद्विष—" इति क्विप्॥ अत्यर्थं निष्पिष्टो निष्पीडितः अत एव क्लान्तः श्रान्तः अत एव कोष्णमीषदुष्णं यथा तथा॥ "कवं चोष्णे" इति कोः कादेशः॥ उच्छ्वसन् मृगेण सदृक् सदृशं यथा तथा। पूर्वोपसंख्यानादेव समानोपपदाद्दृशेः क्विन्। शेषं सर्वं पूर्ववत्। द्रुतं क्षिप्रमृश्यमूकमगात्॥

---

१ वावयमानयो° D.
२ ऋश्यमूक° T., G., Com.
३ गतः D.
४ °न्धाद्रिं C.

कृत्वा वालिद्रुहं रामो मालया सविशेषणम् ।
अङ्गदस्वं पुनर्हन्तुं कपिनाह्वाययद्रणे ॥ १२२ ॥

१२२. कृत्वेति ॥ अथ रामो वालिने द्रुह्यतीति वालिद्रुहं वालिविरोधिनं सुग्रीवम् ॥ "सत्सूद्विष—" इत्यादिना क्विप् ॥ मालया लतानिर्मितया सविशेषणं सचिह्नं कृत्वा । अङ्गदं सूत इत्यङ्गदसूः अङ्गदजनकः । तेनैव क्विप् । तमङ्गदस्वं वालिनम् ॥ "ओः सुपि" इति यणादेशः ॥ हन्तुं कपिना सुग्रीवेण पुनराह्वाययत् सस्पर्धमाह्वाययामास । ह्वयतेराङ्पूर्वाण्ण्यन्ताल्लङि "शाच्छासाह्वा—" इत्यादिना युक् । अकर्त्रभिप्रायत्वात् "णिचश्च" इति नात्मनेपदम् ॥

तयोर्वानरसेनान्योः संप्रहारे तनुच्छिदम् ।
वालिनो दूरभाग्रामो बाणं प्राणादमत्यजत् ॥ १२३ ॥

१२३. तयोरिति ॥ वानरसेनान्योर्वानरपरिवृढयोः । नयतेः "सत्—" आदिना क्विप् ॥ "एरनेकाचः—" इति यणादेशः ॥ तयोर्वालिसुग्रीवयोः संप्रहारे संयुगे सति । 'संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः' इत्यमरः । रामो दूरभाग्दूरगत एव सन् ॥ "भजो ण्विः" ॥ वालिनस्तनुच्छिदं शरीरच्छेदिनम् । "सत्—" आदिनैव क्विप् । प्राणानत्तीति प्राणादं प्राणहारिणम् ॥ "अदोऽनन्ने" इति विट् ॥ बाणमत्यजत् मुमोच ॥

अथ बाणेन जविना तेन विद्धो महाकपिः ।
क्रव्याद्त्रासकरं नादं कुर्वन्कामदुघोऽर्थिनाम् ॥ १२४ ॥

अग्रेगावा च शूराणामभिभूः सर्वविद्विषाम् ।
ध्वांस्थरूपः स्थिरप्रज्ञः पपात सहसा भुवि ॥ १२५ ॥

१२४–१२५. अथ युग्मेन वालिपातमाह अथ बाणेनेति अग्रेगावेति च ॥ अथ बाणमोक्षानन्तरमर्थिनां कामान् दोग्धीति कामदुघः ॥ "दुहःकब्घश्च"

Verses 124 and 125 are found only in T2, T3, T4, and T., G., and Com.

१ कुर्वन्नादं T2, T3, T4.

इति कपि घकारश्चान्तादेशः। शूराणामग्रे गच्छतीत्यग्रेगावा अग्रगामी॥ "अन्येभ्योऽपि दृश्यन्ते" इति गमेर्वनिप्॥ "विड्वनोरनुनासिकस्याऽऽत्" इत्यात्वम्॥ सर्वविद्विषाम्। कर्मणि षष्ठी। अभिभवतीत्यभिभूरभिभविता॥ "क्विप् च" इति भवतेः क्विप्॥ शमि सुखे तिष्ठतीति शंस्थः सुखैकवृत्तिः॥ "स्थः क च" इति तिष्ठतेः कप्रत्ययः। तद्रूपं स्वरूपं यस्य सः शंस्थरूपः सुखपरायण इत्यर्थः। स्थिरप्रज्ञः स महाकपिः वाली जविना वेगवता तेन बाणेन विद्धः सन् क्रव्यमदन्तीति क्रव्यादो मांसभक्षकाः गृध्रगोमायुप्रभृतयः॥ "क्रव्ये च" इति विट्प्रत्ययः॥ तेषां त्रासकं भयकरं यथा तथा नादं कुर्वन् उच्चैः क्रोशन् सहसा भुवि पपात॥

वालिनं पतितं दृष्ट्वा वानरा रिपुघातिनम्।
बान्धव[1]क्रोशिनो भेजुरनाथाः ककुभो दश॥ १२६॥

१२६. वालिनमिति॥ रिपून्हन्तीति रिपुघातिनम्॥ "सुप्यजातौ—" इति ताच्छील्ये णिनिः। पतितं वालिनं दृष्ट्वा। वानरास्तदुपजीविनः कपयः बन्धव एव बान्धवाः पुत्रकलत्रादयः त इव क्रोशन्तीति बान्धवक्रोशिनः तद्वद्विलपन्तः॥ "कर्त्तर्युपमाने" इति णिनिः॥ अनाथाः सन्तो दश ककुभो दिशो भेजुरपलायन्तेत्यर्थः।

धिग्दाशरथिमित्यूचुर्मुनयो वनवर्तिनः।
उपेयुर्मधुपायिन्यः क्रोशन्त्यस्तं कपिस्त्रियः॥ १२७॥

१२७. धिगिति॥ वने वर्त्तन्ते शास्त्रतो नियमादिति वनवर्त्तिनः॥ "व्रते" इति णिनिः॥ मुनयः तत्रत्याः वानप्रस्थाः। दाशरथिं रामं धिगित्यूचुः। निरपराधवधात्करुणया निनिन्दुरित्यर्थः। मधु पिबन्त्यभीक्ष्णमिति मधुपायिन्यो नित्यभोगिन्यः दुःखलेशानभिज्ञा इत्यर्थः॥ "बहुलमाभीक्ष्ण्ये" इत्याभीक्ष्ण्ये णिनिः॥ कपिस्त्रियो वाल्यवरोधाङ्गनाः क्रोशन्त्यो विलपन्त्यस्तं वालिनमुपेयुः उपसेवुरित्यर्थः॥

---

१ बान्धवाक्रोशिनो N., C., T., B., E2, E3. बान्धवाः क्रोशिनो C.

रामसुच्चैरुपालब्ध शूरमानी कपिप्रभुः ।
व्रणवेदनया ग्लायन् साधुम्मन्यमसाधुवत् ॥ १२८ ॥

१२८. राममिति ॥ शूरमात्मानं मन्यत इति शूरमानी ॥ "आत्ममाने खश्च" इति चकारान्मन्यतेर्णिनिः ॥ कपिप्रभुः वाली व्रणवेदनया प्रहारव्यथया ग्लायन् क्षीणः सन् साधुमात्मानं मन्यत इति साधुम्मन्यम् । तेनैव खशि दिवादित्वाच्छ्यन् । राममसाधुना तुल्यमसाधुवत् ॥ "तेन तुल्यम्—" इति वतिः । उच्चैस्तारमुपालब्ध निःशङ्कमशपत् । लभेरनिटो लुङि "झलो झलि" इति सलोपे धत्वजश्त्वे ॥

मृषासि त्वं हविर्याजी राघव छद्मतापसः ।
अन्यव्यासक्तघातित्वाद्ब्रह्मघ्नां पापसम्मितः ॥ १२९ ॥

१२९. अत्राष्टाभिरुपालम्भमाचष्टे मृषेत्यादिभिः ॥ हे राघव त्वं छद्मतापसः कपटतापसः किं च मृषा मिथ्यैव हविषा इष्टवान् हविर्याजी दाम्भिकः इत्यर्थः ॥ "करणे यजः" इति भूते णिनिः ॥ किं चान्येन योध्रा व्यासक्तं हतवानन्यव्यासक्तघाती ॥ "कर्मणि हनः" इति भूते णिनिः ॥ तत्त्वात् ब्रह्माणं हतवतां ब्रह्मघ्नाम् ॥ "ब्रह्मभ्रूणवृत्रेषु क्विप्" ॥ पापेन संमितः सङ्गतः । न परेण समायुक्तमिति निषिद्धवधाचरणात् त्वं ब्रह्महत्यापापभागसीत्यर्थः ॥

पापकृत्सुकृतां मध्ये राज्ञः पुण्यकृतः सुतः ।
मामपापं दुराचार किं निहत्याभिधास्यसि ॥ १३० ॥

१३०. पापकृदिति ॥ हे राम दुराचार पुण्यकृतः पुण्यं कृतवतो राज्ञो दशरथस्य सुतस्तथापि पापकृत् पापं कृतवांस्त्वमपापमनपराधं मां निहत्य सुकृतां साधुकारिणां मध्ये ॥ "सुकर्मपापमन्त्रपुण्येषु कृञः" इति सर्वत्र भूते क्विप् ॥ किमभिधास्यसि । अकार्यकारिणः सभामध्ये वक्तुं जिह्वा कथं प्रवर्त्तेतेत्यर्थः ॥

---

१ विहत्या° E2.

अग्निचित्सोमसुद्राजा रथचक्रचिदादिषु।
अनलेष्विष्टवान्[1] कस्मान्न[2] त्वयापेक्षितः[3] पिता ॥ १३१ ॥

१३१. अग्निचिदिति ॥ हे राम अग्निं चितवानग्निचित् अग्न्यर्थमिष्टकाचयनं कृतवानित्यर्थः ॥ "अग्नौ चेः" इति क्विप् ॥ सोमं सुतवान् सोमसुत् सोमयाजीत्यर्थः ॥ "सोमे सुञः" इति क्विप् ॥ रथचक्रमिव चीयत इति रथचक्रचित् रथचक्रविधोऽग्न्यर्थ इष्टकाचय इत्यर्थः ॥ "कर्मण्यग्न्याख्यायाम्" इति धातूपपदप्रत्ययसमुदायेनाग्न्याख्यायां रूढ्याग्न्याधारेष्टकाचयनविशेषाख्यायां चिनोतेः क्विप् ॥ स आदिर्येषां तेषु श्येनकङ्कचिदादिष्वनलेष्वनलाधारेष्टकाचितावेदिष्विष्टवान् कृतयागः। यजेः क्तवतुप्रत्ययः। पिता ते जनको राजा दशरथः परमधार्मिकः कस्मात्त्वया नापेक्षितो न विचारितः। तादृशस्य पितुरयशस्करोऽसीत्यर्थः ॥

मांसविक्रयिणः[4] कर्म व्याधस्यापि विगर्हितम्।
मां घ्नता भवताकारि निःशङ्कं पापदृश्वना ॥ १३२ ॥

१३२. मांसेति ॥ पापं दृष्टवान् तेन पापदृश्वना निरन्तरपापचिन्तकेनेत्यर्थः ॥ "दृशेः क्वनिप्" ॥ अत एव मां निःशङ्कं घ्नता अनपराधवधं भीवर्जं मारयता भवता मांसं विक्रीतवान् मांसविक्रियानिकृष्टकर्मकारीत्यर्थः ॥ "कर्मणीनि विक्रियः" इति क्रीणातेः कुत्सायामिनिप्रत्ययः। तस्य व्याधस्य मृगवधाजीविनोऽपि विगर्हितं जुगुप्सितं कर्म अकारि कृतम्। करोतेः कर्मणि लुङि चिणि वृद्धिः ॥

बुद्धिपूर्वं ध्रुवन्न[5] त्वां[6] राजकृत्वा पिता खलम्।
सहयुध्वानमन्येन योऽहिनो मामनागसम् ॥ १३३ ॥

---

१ अनले दृष्टवान् T2.
२ कस्मात्त्वयानापे° D., c., E3.
३ त्वयावेष्टितोऽनलः T2, T4.
४ °विक्रयिणस्तस्य T2, T4.
५ ध्रुवन् T., G., Com. खलं न त्वां D.
६ त्वां D., E1, T., G., Com.
७ ध्रुवन् D.

१३३. बुद्धीति ॥ हे राम पिता दशरथस्त्वां खलं द्रवन् जानन्। द्रु गताविति धातोस्तौदादिकाच्छतर्युवङादेशः। गत्यर्थत्वात् ज्ञानार्थत्वम्। बुद्धिपूर्वमेव राजकृत्वा राजानं कृतवान्नाभूत् राजानं न कृतवानित्यर्थः ॥ "राजनि युधि कृञः" इति कृञः क्वनिप्। ध्रुवमिति पाठे त्वां राजकृत्वेति योजनायां कृद्योगषष्ठ्यां त्वामिति द्वितीया न स्यात्। खलत्वे हेतुमाह। यस्त्वमन्येन योधान्तरेण सहयुध्वानं सह युद्धवन्तम् ॥ "सहे च" इति युधेः क्वनिप्। अत एवानागसं तवानपराधिनं मामहिनः हिंसितवान्। हिनस्तेर्लङि सिपि श्नमि नलोपः। हल्ङ्यादिलोपे "सिपि धातो रुर्वा" इति धातुसकारस्य रुत्वविसर्गौ ॥

पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः।
कौशल्याज शशादीनां तेषां नैकोऽप्यहं कपिः ॥ १३४ ॥

१३४. अथ मांसलोभान्मामवधीस्तदपि न योग्यमित्याह पञ्चेति ॥ कृते कृतयुगे जातैः कृतजैः ॥ "सप्तम्यां जनेर्डः" ॥ द्विजातैर्द्विजैर्महर्षिभिः ॥ "अन्येष्वपि दृश्यते" इति डः ॥ ये पञ्च पञ्चनखाः भक्ष्याः प्रोक्ताः। 'शशकः शल्यको गोधा खड्गी कूर्मश्च पञ्चमः' इति भक्ष्यत्वेनोक्ताः। हे कौसल्यायाः जात कौसल्याज राम ॥ "पञ्चम्यामजातौ" इति डः ॥ तेषां शशकादीनां कपिरहमेकोऽन्यतमोऽपि न प्रत्युत निषिद्ध एवेत्यर्थः ॥

कथं दुष्ठुः स्वयं धर्मे प्रजास्त्वं पालयिष्यसि।
आत्मानुजस्य जिह्रेषि सौमित्रेस्त्वं कथं न वा ॥ १३५ ॥

१३५. कथमिति ॥ स्वयं धर्मे दुष्ठु तिष्ठतीति दुःस्थः अप्रतिष्ठितः ॥ "आतश्चोपसर्गे" इति कर्त्तरि कप्रत्ययः। त्वं प्रजाः जनान् ॥ 'प्रजा स्यात्सन्ततौ जने' इत्यमरः ॥ "उपसर्गे च संज्ञायाम्" इति जनेर्डः ॥ कथं पालयिष्यसि। स्वयमधार्मिकः स्वप्रतिबन्ध्यैवोच्छृङ्खलवृत्तीः प्रजाः कथं नियन्तुं शक्नुयादित्यर्थः। किं चात्मानमनुजातः आत्मानुजः ॥ "अनौ कर्मणि" इति डः ॥ तस्य सौमित्रेर्लक्ष्मणस्य

१ दुष्ठुः C., E2, E3. दुःस्थः T. Com.

वा कथं न जिह्रेषि लक्ष्मणात्कथं न लज्जस इत्यर्थः । संबन्धसामान्ये षष्ठी ॥

मन्ये किञ्जमहं घ्नन्तं त्वामक्षत्रियजे रणे ।
लक्ष्मणाधिज दुर्वृत्तं[१] प्रयुक्तमनुजेन नः ॥ १३६ ॥

१३६. "अन्येष्वपि दृश्यते" इत्यस्योदाहरणान्याह मन्य इति ॥ तत्रापिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वात् तथैव प्रयुङ्क्ते। अधिजातोऽधिजः अग्रज इत्यर्थः ॥ "उपसर्गे च संज्ञायाम्" इत्यस्य व्यभिचारः प्रजेतिवदसंज्ञत्वात् । हे लक्ष्मणाधिज नोऽस्माकमनुजातेनानुजेन सुग्रीवेण ॥ "अनौ कर्मणि" इत्युक्तं तस्य व्यभिचारः सोमविक्रयीत्यादिवत् कर्माश्रवणात् । प्रयुक्तं प्रेरितं दुर्वृत्तं दुराचारम् । तदेवाह । क्षत्रियाज्जातं क्षत्रियजम् ॥ "पञ्चम्यामजातौ" इत्यस्य व्यभिचारः। क्षत्रियशब्दस्य जातिवाचित्वात् अक्षत्रियजे क्षत्रियजप्रतियोगिके रणे घ्नन्तमनपराधिनि मयि वानरे प्रच्छन्नप्रहारिणं त्वामहं किञ्जं कुतोऽपि जातं मन्ये न तु दशरथजमित्यर्थः ॥ "सप्तम्यां जनेर्डः" इत्युक्तस्य सप्तमीव्यभिचारः ॥

अथानुपपदाधिकारः ।

प्रत्यूचे वालिनं रामो नाकृतं कृतवानहम् ।
यज्वभिः सुत्वभिः पूर्वैर्जरद्भिश्च कपीश्वर ॥ १३७ ॥

१३७. प्रत्यूच इति ॥ रामो वालिनं प्रत्यूचे । किमिति । हे कपीश्वर पूर्वैः पुरातनैर्यज्वभिः विधिवदिष्टवद्भिः सुत्वभिः सोमं सुतवद्भिः ॥ "सुयजोर्ङ्वनिप्" ॥ जरद्भिर्वृद्धैः । 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि' इत्यमरः ॥ "जीर्यतेरतृन्" ॥ अकृतमहं न कृतवान् अपि तु तत्कृतमेवाकार्षमित्यर्थः ॥ "निष्ठा" इति क्तवतू ॥

ते हि जालैर्गले पाशैस्तिरश्चामुपसेदुषाम् ।
ऊषुषां परदारैश्च सार्धं निधनमैषिषुः ॥ १३८ ॥

---

१ दुर्वृत्तं D., c., E3, Com.

१३८. किं तैः कृतं तदाह ॥ ते हीति ॥ ते वृद्धाः मन्वादयः उपसेदुषामुपसन्नानामुपसद्योपद्रवकारिणामित्यर्थः । तिरश्चां भवादृशां परदारैः परस्त्रीभिः सार्धमूषुषां सहोषितवतां च भवादृशामेव ॥ "भाषायां सदवसश्रुवः" इत्युभयत्रापि क्वसुः ॥ यजादित्वाद्वसेः संप्रसारणम् । जालैर्वागुराभिर्गले कण्ठे पाशैर्बन्धविशेषैश्च निधनं वधमैषिषुः अमंसतेत्यर्थः । इषेर्लुङि झेरुसादेशः । वृद्धानामपि परोपद्रवकारिणस्तिर्यञ्चोऽपि दण्ड्या एवेत्यर्थः ॥

अहं तु शुश्रुवान् भ्रात्रा स्त्रियं भुक्तां कनीयसा ।
उपेयिवाननूचानैर्निन्दितस्त्वं लतामृग ॥ १३९ ॥

१३९. अस्तु मया किमपराद्धमत आह अहं त्विति ॥ हे लतामृग शाखामृग अहं तु कनीयसा भ्रात्रा भुक्तां स्त्रियं तत्कलत्रमित्यर्थः उपेयिवान् संजग्मिवानिति शुश्रुवानश्रौषम् ॥ "भाषायाम्—" इत्यादिना क्वसुः ॥ तस्मात्त्वमनूचानैर्वेदवृद्धैः निन्दितस्तस्मात्पारदारिकस्त्वमाततायित्वाद्वध्य एवेत्यर्थः । 'अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः' इत्यमरः ॥ "उपेयिवाननाश्वाननूचानश्च" इतीण्वचिभ्यां क्वसुकानजन्तौ निपातितौ ॥

अन्वनैषीत्ततो वाली त्रपावानिव राघवम् ।
न्यक्षिपच्चाङ्गदं यत्नात्काकुत्स्थे तनयं प्रियम् ॥ १४० ॥

१४०. भूतार्थे कृदन्तानुदाहृत्य सूत्रक्रमेण तिङन्तानुदाहरति ॥ अन्विति ॥ ततो रामवाक्यानन्तरं वाली त्रपावानिव किञ्चिल्लज्जितः सन्नित्यर्थः राघवमन्वनैषीत् अज्ञोऽयं जनः क्षम्यतामित्यनुनीतवानित्यर्थः । नयतेः "लुङ्" इति भूते लुङि च्लेः सिचीट् ॥ प्रियं तनयमङ्गदं यत्नादभिनिवेशात्काकुत्स्थे रामे न्यक्षिपत् रक्ष्योऽयमिति हस्ते न्यस्तवानित्यर्थः । अनद्यतनभूते लङ् ॥

म्रियमाणः स सुग्रीवं प्रोचे सद्भावमागतः ।
संभविष्याव एकस्यामभिजानासि मातरि ॥ १४१ ॥

१४१. म्रियमाण इति ॥ स वाली म्रियमाणः प्राणांस्त्यजन् सद्भावं साधुभावं सौजन्यमागतः सन् सुग्रीवमूचे किमिति । हे वत्स एकस्यां मातरि संभविष्यावः संभूतावित्यर्थः । अभिजानासि स्मरसि ॥ "अभिज्ञावचने लृट्" इत्यभिज्ञावचन उपपदे भूतानद्यतने लृट् । अभिजानासीत्येतदभिज्ञावचनम् । अभिज्ञा स्मृतिः ॥

अवसाव नगेन्द्रेषु यत्पास्यावो मधूनि च ।
अभिजानीहि तत्सर्वं बन्धूनां समयो ह्ययम् ॥ १४२ ॥

१४२. अवसावेति ॥ वत्साभिजानासि यन्नगेन्द्रेष्ववसाव उषितवन्तौ । अत्र वासमात्रप्रत्यभिज्ञावचनमुपपदम् । तस्य यच्छब्दयोगात् "न यदि" इति लृण्निषेधाल्लुङेव । अथ मधूनि च यत्पास्यावः । चकारो वानुकर्षार्थः तथा च नगेन्द्रेषु यद्वत्स्यावः तत्र मधूनि च पास्यावः तत्सर्वमभिजानासीति योज्यम् ॥ "विभाषा साकाङ्क्षे" इतिपक्षे यच्छब्दसहिते साकाङ्क्षे प्रत्यभिज्ञावचने उपपदे विकल्पाद्भूते लृट् । एवं यदवसाव अपिबाव चेति लङि च द्रष्टव्यम् । केवलपक्षेऽपि यच्छब्दवर्जमेत एवोदाहरणे । आकाङ्क्षा चात्र प्रयोक्तुर्लक्ष्यलक्षणयोः संबन्धविवक्षा । वासेन पानं लक्ष्यते । किं च बन्धूनामयं समयो हि । आपदि बन्धुभिः स्थातव्यमित्यर्थः ॥

दैवं न विदधे नूनं युगपत्सुखमावयोः ।
शश्वद्बभूव तद्दुःस्थं[2] यतो नौ[3] इति हाकरोत् ॥ १४३ ॥

१४३. न चेदं श्मशानवैराग्यमिति मन्तव्यं दैवस्य दुरतिक्रमत्वादित्याह दैवमिति ॥ नूनमवश्यं दैवमेवावयोः युगपत्सुखं सहोपभोगसुखं न विदधे ॥

१ अभिजानासि.
२ दुस्थं Com.
दुःखं noticed by c.
३ नाविति.

"परोक्षे लिट्" ॥ तथाहि तद्दैवं शश्वत् सदा दुस्थं प्रतिकूलं बभूव अभवत् ॥ "हशश्वतोर्लङ् च" इति चकाराच्छश्वच्छब्द उपपदे भूतानद्यतनपरोक्षे लिट् ॥ यतो यस्मान्नावावामिति हाकरोत् एवंप्रयुक्तौ चकार ह । तेनैव हशब्द उपपदे तस्मिन्नेव अर्थे लङ् ॥

दद्दौ स दयितां भ्रात्रे मालां चाग्र्यां हिरण्मयीम् ।
राज्यं संदिश्य भोगांश्च[1] ममार व्रणपीडितः ॥ १४४ ॥

१४४. ददाविति ॥ स वाली भ्रात्रे सुग्रीवाय दयितां तत्कान्तां तथाग्र्यां श्रेष्ठां हिरण्मयीं मालां हेमाब्जमालां च ददौ । "परोक्षे लिट्" । राज्यं भृत्यांश्च संदिश्य साधु पालयेत्युपदिश्य व्रणपीडितः प्रहारव्यथितो ममार ॥

तस्यै[2] निर्वर्त्य कर्त्तव्यं सुग्रीवो राघवाज्ञया ।
किष्किन्धाद्रिगुहां गन्तुं मनः प्रणिदधे द्रुतम् ॥ १४५ ॥

१४५. अस्येति ॥ सुग्रीवोऽस्य वालिनः कर्त्तव्यमौर्ध्वदैहिकं निर्वर्त्य राघवाज्ञया वर्षापगमे आगच्छ इति राघवाज्ञया रामादेशाद्द्रुतं किष्किन्धाख्यामद्रिगुहां गन्तुं मनः प्रणिदधे गन्तुमैच्छदित्यर्थः ॥

नामग्राहं कपिभिरशनैः स्तूयमानः समन्ता-
दन्वग्भावं रघुवृषभयोर्वानरेन्द्रो विराजन् ।
अभ्यर्णेऽम्भःपतनसमये पैर्णली[3]भूतसानुं
किष्किन्धाद्रिं न्यविशत मधुक्षीबगुंजाद्रि[4]रेफम् ॥ १४६ ॥

१४६. नामेति ॥ वानरेन्द्रः सुग्रीवः समन्तात् कपिभिः हनूमदादिभिः नामग्राहं नाम गृहीत्वा ॥ "नाम्न्यादिशिग्रहोः" इति णमुल्प्रत्ययः ॥ अशनैरमन्दं स्तूयमानः प्रशस्यमानः । स्तौतेः कर्मणि लटि "लक्षणहेत्वोः क्रियायाः" इति शानच् ॥ रघुवृषभयो रामलक्ष्मणयोरन्वग्भाव-

१ भृत्यांश्च D., T., G., Com.
२ अस्य Com., तस्यापि कृत्वा D.
३ वर्णली° T., G., Com. पल्वली° noticed by c.
४ कूजाद्रि° T., G., Com.

मन्वग्भूत्वा अनुकूलीभूयेत्यर्थः ॥ "अन्वच्यानुलोम्ये" इति भवतेः णमुल्प्रत्ययः ॥ अत एव विराजन् दीप्यमानः । लक्षणे शत्रादेशः । अम्भःपतनसमये वर्षाकाले अभ्यर्णे आसन्ने सति वर्णलाः वर्णवन्तः ॥ "सिध्मादिभ्यश्च" इति मत्वर्थे लच् ॥ ततश्चिवः । वर्णलीभूताः सानवो यस्य तं मधुक्षीबाः मकरन्दमत्ताः कूजन्तो गुञ्जन्तः द्विरेफाः यस्य तं किष्किन्धाद्रिं तदाश्रयमद्रिं न्यविशत प्राविशत् प्रविष्टः । निपूर्वाद्विशेर्लङि "नेर्विशः" इति तङ् । मन्दाक्रान्ता वृत्तमेतत् ॥

इति भट्टिकाव्येऽधिकारकाण्डे वालिवधो नाम
षष्ठः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने षष्ठः सर्गः ॥

॥ श्रीः ॥

अथ सप्तमः सर्गः ।

ततः कर्ता वनाकम्पं ववौ वर्षाप्रभञ्जनः[1] ।
नभः पूरयितारश्च समुन्नेमुः पयोधराः ॥ १ ॥

१. अथ "आक्वेस्तच्छील—" इत्युक्तताच्छीलिकादिप्रत्ययाधिकारः । तत इति ॥ ततः सुग्रीवप्रस्थानानन्तरं वनानामाकम्पमीषत्कम्पं कर्त्ता तत्साधुकारी । तृन् ॥ "आक्वेः—" इत्यादिना तृन् प्रत्ययः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ वर्षाप्रभञ्जनः प्रावृण्मारुतो ववौ वाति स्म । वा गतिगन्धनयोः । लिट् । तथा नभोऽन्तरिक्षं पूरयितारस्तद्व्यापिन इत्यर्थः । पूर्ववत्प्रक्रियार्थौ । पयोधरा मेघास्समुन्नेमुरुन्नभूवुः विरहिदुःसहाः प्रावृड्धर्माः प्रवृत्ता इत्यर्थः ॥

तर्पणं प्रजनिष्णूनां शस्यानाम[2]मलं पयः ।
रोचिष्णवः सविस्फूर्जा मुमुचुर्भिन्नवद्घनाः ॥ २ ॥

२. तर्पणमिति ॥ रोचिष्णवो दीप्राः सविस्फूर्जाः सनिर्घोषा गर्जन्तो घनाः मेघाः भिन्नैर्विदीर्णैः तुल्यं भिन्नवत् ॥ "तेन तुल्यम्—" इत्यादिना वतिप्रत्ययः ॥ प्रजनिष्णूनां प्रादुर्भावुकानां सस्यानाम् । कृद्योगात्कर्मणि षष्ठी । तर्पणं तृप्तिकरणम् । करणे ल्युट् । अमलं पयो जलं मुमुचुर्ववृषुरित्यर्थः । सर्वत्र "अलंकृञ्—" इत्यादिना इष्णुच् प्रत्ययः ॥

निराकरिष्णवो भानुं दिवं वर्तिष्णवोऽभितः ।
अलङ्करिष्णवो[3] भान्तस्तडित्वन्तश्चरिष्णवः ॥ ३ ॥

३. घनानेव विशिनष्टि । निरिति । भानुं निराकरिष्णवस्तिरस्कर्तारः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ दिवमभितः समन्ताद्वर्त्तिष्णवः स्थायुकाः ॥ "अभितःपरितः—" इत्यादिना द्वितीया ॥ तडित्वन्तो

---

१ वर्षप्रभञ्जनः T2.
२ सस्याना° B., E2, T., G., Com.
३ अलङ्करिष्णवद्भान्त° T., G., Com.

विद्युत्वन्तः ॥ "झयः" इति मतोर्वत्वम् ॥ तद्वियोगादेवालङ्करिष्णुवत् आत्मानं दिशो वा अलंकर्त्तार इव भान्तः दीप्यमानाः । भातेः शत्रन्तः । चरिष्णवो भ्रमणशीलाः । सर्वत्र पूर्ववदिष्णुच् ॥

तान्विलोक्यासहिष्णुः सन्[1] विललापोन्मदिष्णुवत् ।
वैसन् माल्यवति ग्लास्नू रामो जिष्णुरधृष्णुवत् ॥ ४ ॥

४. तानिति ॥ माल्यवति पर्वते वसन् रामः तान् घनान् विलोक्यासहिष्णुवदुन्मादशीलवत् । उभयत्रापि पूर्ववदिष्णुच् । किं च जिष्णुर्जयशीलोऽपि ग्लास्नुः ग्लानिं गतः । "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नुः ॥ अधृष्णुवदधीरवत् ॥ "त्रसिगृधिधृषिक्षिपेः क्नुः" इति क्नुः ॥ विललाप परिदेवितवान् ॥

भ्रमी कदम्बसंभिन्नः पवनः शमिनामपि ।
क्लमित्वं कुरुतेऽत्यर्थं मेघशीकरशीतलः ॥ ५ ॥

५. विलापप्रकारमेव प्रपञ्चेनाह भ्रमीति ॥ भ्रमी भ्रमणशीलः न तु धावतीति मान्द्योक्तिः । कदम्बसंभिन्नः सुरभिरित्यर्थः । मेघशीकरशीतलः पवनः शमिनां शान्तिशीलानां विरक्तानामपीत्यर्थः । अत्यर्थं क्लमित्वं क्लमशीलत्वं कुरुते । किमुत विरहिणामित्यर्थः ॥ "शमित्यष्टाभ्यः—" इत्यादिना भ्रमिशमिक्लमिभ्यो घिनुण्प्रत्ययः ॥ "नोदात्तोपदेशस्य—" इत्यादिना निषेधान्नोपधावृद्धिः ॥

संज्वारिणेव मनसा ध्वान्तमायासिना मया ।
द्रोहि खद्योतसंपर्कि नयनामोषि दुःसहम् ॥ ६ ॥

६. अथ श्लोकपञ्चकेन "संपृच—" आदिसूत्रोक्तघिनुणन्तानुदाहरति । संज्वारिणेति ॥ संज्वारिणा संज्वरशीलेन ज्वररोगिणेत्यर्थः । मया कर्त्रा आयासिना यातायातप्रयासशीलेन मनसा करणेन । द्रुह्यतीति द्रोही जिघांसुः खद्योतैर्ज्योतिकीटैः । 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः । संपर्कि संसर्गि । नयनयोरामोषि संहारि ध्वान्तं मेघान्धकारं दुःसहमसह्यम् ॥

---

१ स विललापो° D.

कुर्वन्ति परिसारिण्यो विद्युतः परिदेविनम् ।
अभ्या[1]घातिभिरामिश्राश्चातकैः परिराटिभिः ॥ ७ ॥

७. कुर्वन्तीति ॥ परिसारिण्यः परिनृत्वर्यः अभ्याघातिभिरभिघातकैः परिराटिभिः परिक्रन्दनशीलैः । रट शब्दे । चातकैस्तोककैः । 'अथ सारङ्गस्तोककश्चातकः समाः' इत्यमरः । आमिश्राः मिलिताः विद्युतः परिदेविनं विलापिनम् । देविरियं भौवादिकः । कुर्वन्ति मामिति शेषः । 'विलापः परिदेवनम्' इत्यमरः ॥

संसर्गी परिदा[2]हीव शीतोऽप्या[3]भाति शीकरः ।
सोढुमाक्रीडिनोऽशक्याः शिखिनः परिवादिनः ॥ ८ ॥

८. संसर्गीति ॥ संसर्गी संसर्जनशीलः शीकरो वर्षाम्बुकणः शीतोऽपि परिदाही परिदग्धेवाभाति तथा भासते । किं चाक्रीडिनः आक्रीडनशीलाः नर्त्तितारः परिवादिनः परिवादनशीलाः कूजन्त इत्यर्थः । शिखिनः शिखण्डिनः सोढुमशक्याः । सर्वदा सर्वेऽपि मां मारयिष्यन्तीत्यर्थः ॥

एता दैवानुरोधिन्यो द्वेषिण्य इव रागिणम् ।
पीडयन्ति जनं धाराः पतन्त्योऽनपचा[4]रिणम् ॥ ९ ॥

९. एता इति ॥ दैवस्यानुरोधिन्योऽनुवर्त्तनशीलाः तद्वत्प्रतिकूलवर्त्तिन्य इत्यर्थः । पतन्त्य एता धारा वर्षधाराः द्वेषिण्यो द्वेषणशीलाः वैरिण्य इव अनपचारिणमतच्छीलमनपराधिनमित्यर्थः रागिणं रागशीलजनं कामिजनम् । संपृचादिसूत्रे रजेति निपातनादेव रञ्जेरनुनासिकलोपः । पीडयन्ति बाधन्ते ॥

कुर्याद्योगिनमप्येष स्फूर्जावान् परिमोहि[5]णम् ।
सागिनं सुखदुःखस्य परिक्षेप्यम्भसामृतुः ॥ १० ॥

---

१ अभिघातिभि° D.
चञ्चुभ्याघातिभिर्मिश्राः T_2.
२ परिदाही च भाति शीतोऽपि शीकरः D.
३ °प्यायाति B.
४ ऽनपकारिणम् C., N., c. c. notices °ऽनपचारिणम् also.
५ परिमोहिनम् C., N., T_1, T_2, T_3, E_3.

१०. कुर्यादिति ॥ स्फूर्जावान् गर्जावान् । भिदाद्यङन्तान्मतुप् । एषोऽम्भसां परिक्षेपी तच्छीलो मोक्ता ऋतुर्वर्षर्तुः सुखदुःखस्य सुखदुःखयोः ॥ "विप्रतिषिद्धं चानधिकरणवाचि" इति विकल्पादेकवद्भावः । त्यागिनं त्यागशीलं निःस्पृहमित्यर्थः । योगी योगशीलः तमपि परिमोहिणं तच्छीलं कुर्यात् किमुतान्यमितिभावः । परिमोहिणमित्यत्र "कृत्यचः" इतीनि नकारस्य णत्वम् । 'अनमानानीयरनींन्निष्ठादेशाः प्रयोजनम्' इति वचनात् ॥

विकत्थी याचते प्रत्तमविश्रम्भी[1] मुहुर्जलम्[2] ।
पर्जन्यश्चातकः पक्षी[3] निकृन्तन्निव मानसम् ॥ ११ ॥

११. विकत्थीति ॥ विकत्थी विकत्थनशीलः पर्जन्यादन्यं न याचत इत्यात्मश्लाघाशील इत्यर्थः । अत एव मानसं निकृन्तन्निव छिन्दन्निव तथोद्वेगकारीत्यर्थः । चातकः पर्जन्यं पर्णे पत्रे प्रत्तं दत्तं न तु भूमिपतितं तस्य चातकानां विषप्रायत्वादिति भावः । जलं मुहुर्विस्रम्भी न भवतीत्यविस्रम्भी मानित्वात्सङ्कुचन्नेव याचते । "वौ कषलसकत्थस्रम्भः" इत्युभयत्रापि घिनुण्प्रत्ययः ॥

प्रलापिनो भविष्यन्ति कदा न्वेते[4]ऽपलाषिणः ।
प्रमाथिनो वियुक्तानां हिंसकाः पापदर्दुराः ॥ १२ ॥

१२. प्रलापिन इति ॥ प्रलापिनः प्रलपनशीलाः अनर्थारविण इत्यर्थः । प्रमाथिनः प्रमथनशीलाः कर्णकठोरत्वात्प्राणिमात्रपीडका इत्यर्थः । उभयत्र "प्रे लपसृद्रुमथवदवसः" इति घिनुण् । वियुक्तानां तु हिंसकाः घातुकाः ॥ "निन्दहिंस—" इत्यादिना वुञ्प्रत्ययः ॥ एते पापदर्दुराः दुष्टभेकाः । 'दर्दुरस्तोयदे भेके' इति विश्वः ॥ कदा नु अपलाषिणोऽपलषणशीला वृथाभाषिणो भग्नकामाः भविष्यन्ति । लष कान्तौ ॥ "अपे च लषः" इति घिनुण्प्रत्ययः ॥

---

१ °मविस्रम्भी E3, T., G., Com. °तको व्योम्नि B., D., E3.
२ पुनर्जलम् E2, E3.
३ पर्णे T., G., Com.
४ ह्येते E3.
५ भविष्यन्ति T4.

निन्दको रजनिम्मन्यं दिवसं क्लेशको निशाम् ।
प्रावृष्यनैषीत्काकुत्स्थः कथंचित्परिदेवकः ॥ १३ ॥

१३. निन्दक इति ॥ काकुत्स्थो रामः प्रावृषि वर्षर्त्तौ रजनिमात्मानं मन्यते मेघान्धकारादिति रजनिम्मन्यम् ॥ "आत्ममाने खश्च" इति खशि मुमागमः ॥ दिवसं तथा निशां च निन्दकः धिगिमौ मारकाविति निन्दिता सन् । क्लेशकः ताच्छील्येन क्लिश्यन् ॥ "निन्दहिंसक्लिशखाद्—" इत्यादिना वुञ्प्रत्ययः ॥ परिदेवको विलपिता च सन् ॥ "देविक्रुशोश्चोपसर्गे" इति देवतेर्वुञ् ॥ कथंचिदनैषीत् अतिदुःखेन वार्षिकदिवसान्नीतवानित्यर्थः ॥

अथोपशरदेऽपश्यत् क्रौञ्चानां चेष्टनैः कुलैः ।
उत्कण्ठावर्धनैः शुभ्रं रवणैरम्बरं ततम् ॥ १४ ॥

१४. अथेति ॥ अथ वर्षापनयनानन्तरं रामः उपशरदे शरत्समीपे शरदारम्भ इत्यर्थः । समीपार्थेऽव्ययीभावः । "अव्ययीभावे शरत्प्रभृतिभ्यः" इति समासान्तः ॥ "तृतीयासप्तम्योर्बहुलम्" इति विकल्पादमभावः ॥ चेष्टनैश्चलनैः रवणैः शब्दनैः । 'रवणः शब्दनो नान्दी' इत्यमरः । क्रमात् "चलनशब्दार्थादकर्मकाद्युच्" इति युच्प्रत्ययः । उत्कण्ठाया औत्सुक्यस्य वर्धनैरुद्दीपकैः ॥ "अनुदात्तेतश्च हलादेः" इति ताच्छील्ये कर्त्तरि युच् ॥ क्रौञ्चानां कुलैः सङ्घैः ततं व्याप्तं शुभ्रं मेघापगमादमलमम्बरमपश्यत् । तदा शरदागमनमज्ञासीदित्यर्थः ॥

विलोक्य द्योतनं चन्द्रं लक्ष्मणं शोचनोऽवदत् ।
पश्य दन्द्रमणान् हंसानरविन्दसमुत्सुकान् ॥ १५ ॥

१५. विलोक्येति ॥ द्योतनं साधु द्योतमानम् ॥ "अनुदात्तेत—" इत्यादिनैव युच्प्रत्ययः ॥ चन्द्रं विलोक्य शोचनः शोकशीलः सन् । शोचनादयो गर्धनान्ताः "जुचङ्क्रम्य—" इत्यादिना युजन्ताः ।

---

१ रावणै° T_3.

लक्ष्मणमवदत् । दन्द्रम्यन्त इति दन्द्रमणान् कुटिलगमनशीलान् । द्रमु पादविक्षेपे इत्यस्मात् "नित्यं कौटिल्ये गतौ" इति यङि "नुगतोऽनुनासिकान्तस्य" इति नुक् अल्लोपयलोपौ ॥ अरविन्देषु समुत्सुकान् कौतुकिनः ॥ "प्रसितोत्सुकाभ्यां तृतीया च" इति सप्तम्याः "सप्तमी" इति योगविभागात्समासः । हंसान् पश्य । शरदागमं पश्येत्यर्थः ॥

कपिश्चङ्क्रमणोऽद्यापि नासौ भवति गर्धनः ।
कुर्वन्ति[1] कोपनं[2] तारा मण्डना[3] गगनस्य[4] माम् ॥ १६ ॥

१६. कपिरिति ॥ असौ कपिः सुग्रीवः गर्धनो विषयगृध्नुः सन् अद्यापि शरदागमेऽपि चङ्क्रमणः क्रमणप्रवणो न भवति । अद्यापि न यातीत्यर्थः । दन्द्रमणवद्रूपनयः । गगनस्य मण्डयन्तीति मण्डनाः भूषणास्तारास्तारका मां क्रुध्यतीति क्रोधनं कोपनं कुर्वते ॥ "क्रुधमण्डार्थेभ्यश्च" इत्युभयत्र ताच्छील्ये कर्त्तरि युच् ॥

नावैत्याप्यायितारं किं कमलानि रविं[5] कपिः ।
दीपितारं दिनारम्भे निरस्त[6]ध्वान्तसञ्चयम् ॥ १७ ॥

१७. नेति ॥ कपिः सुग्रीवः कमलान्याप्यायितारं साधु आप्याययन्तम् ॥ "न यः" इति यकारान्ताद्युच्प्रतिषेधे तृन् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधात् द्वितीया ॥ किं च दिनारम्भे दीपितारं दीप्रम् ॥ "सूददीपदीक्षश्च" इति युच्प्रतिषेधात् तृन् ॥ दीप्रत्वादेव विरुद्धध्वान्तसंचयं निरस्ततमस्काण्डं रविं नावैति नावगच्छति किम् । अहो प्रमत्त इति भावः ॥

अतीते वर्षुके काले प्रमत्तः स्थायुको गृहे ।
गामुको ध्रुवमध्वानं सुग्रीवो वालिना गतम् ॥ १८ ॥

---

१ कुर्वते Com.
२ क्रोधनं T. G. Com.
३ तारा मण्डनं C., E2.
४ गगणस्य C.
५ दिशः T2, T4.
६ निरुद्ध° T3, T4, D., E2. विरुद्ध T., G., Com.

१८. अतीत इति ॥ वर्षुके वर्षणशीले काले वर्षर्त्तावतीते प्रमत्तो मदान्धः सन् गृह एव स्थायुकः स्थितिशीलः सुग्रीवो वालिना गतं क्रान्तमध्वानं गामुको गन्ता ध्रुवम् । अन्यथा कथमद्यापि नागच्छतीति भावः । सर्वत्र "लषपत—" इत्यादिना उकञ्प्रत्ययः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधाद्द्वितीया ॥

जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया ।
गत्वा लक्ष्मण वक्तव्यो जयिना निष्ठुरं वचः ॥ १९ ॥

१९. जल्पाकीभिरिति ॥ हे लक्ष्मण प्रजविनातिजविना ॥ "प्रजोरिनिः" इति जवतेरिनिप्रत्ययः ॥ जयिना जयशीलेन ॥ "जिदृक्षि—" इत्यादिना जयतेरिनिप्रत्ययः ॥ त्वया गत्वा जल्पाकीभिः वाचालाभिः ॥ "जल्पभिक्ष—" इत्यादिना षाकन्प्रत्ययः ॥ "षिद्गौरादिभ्यश्च" इति ङीष् ॥ स्त्रीभिः सहासीनः स्त्रीमध्यगत एव सुग्रीवो निष्ठुरं वचो वक्तव्यः । अन्यथा लज्जानुदयादिति भावः । 'अप्रधाने दुहादीनाम्' इति वचनादप्रधाने कर्मणि तव्यप्रत्ययः ॥

शैले[1] विश्रयिणं क्षिप्रमनादरिणमभ्यमी ।
न्याय्यं परिभवी ब्रूहि पापमव्यथिनं कपिम् ॥ २० ॥

२०. शैल इति ॥ शैले किष्किन्धाद्रौ विश्रयिणमाश्रयणशीलमनादरिणमगणनाशीलमव्यथिनमभीरुमचलं वा अत एव पापमनाचारिणं कपिं क्षिप्रमभ्यमी अभिगन्ता । अम गत्यादौ । परिभवी परिभावुकः सन् न्याय्यं न्यायादनपेतं ब्रूहि सर्वत्र "जिदृक्षि—" इत्यादिना इनिप्रत्ययः ॥

स्पृहयालुं कपिं स्त्रीभ्यो निद्रालुमदयालुवत् ।
श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम् ॥ २१ ॥

२१. स्पृहयालुमिति ॥ स्त्रीभ्यः स्पृहयालुं स्त्रीकामुकम् ॥ "स्पृहेरीप्सितः" इति संप्रदानत्वम् ॥ "स्पृहिगृहि—" इत्यादिना सर्वत्रा-

---

१ शैलविश्रयिणं T2.

लुच् प्रत्ययः ॥ निद्रालुं स्त्रीभिः सह शयालुमनन्तरकर्त्तव्येष्वजागरूकं वा । श्रद्धालुं विषयाभिलाषिणम् । 'श्रद्धास्तिक्याभिलाषयोः' इति यादवः । भ्रमरैः कृतं भ्रामरं क्षौद्रम् ॥ "क्षुद्राभ्रमर—" इत्यादिना संज्ञायामञ् ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ धयतीति धारुं धातारं पातारमित्यर्थः । अद्रौ सीदतीति सद्रुं सत्तारं स्थातारमित्यर्थः ॥ "दाधेट्सिशदसदो रुः" इति धेटः सदेश्च रुप्रत्ययः । कपिं सुग्रीवं द्रुतमदयालुवन्निर्दयेन तुल्यं वद ॥

सृमरोऽभङ्गुरप्रज्ञो[1] गृहीत्वा भासुरं धनुः ।
विदुरो जित्वरः प्राप लक्ष्मणो गत्वरान् कपीन् ॥ २२ ॥

२२. सृमर इति ॥ सृमरः साधुसरणशीलः ॥ "सृघस्यदः क्मरच्" इति क्मरच्प्रत्ययः ॥ अभङ्गुरप्रज्ञः स्थिरधीः ॥ "भञ्जभासमिदो घुरच्" इति घुरच्प्रत्ययः ॥ विदुरो ज्ञाता । 'ज्ञाता तु विदुरो विन्दुः' इत्यमरः ॥ "विदिभिदिच्छिदेः कुरच्" इति कुरच्प्रत्ययः ॥ जित्वरो जयशीलः ॥ "इण्नशजिसर्त्तिभ्यः क्वरप्" इति क्वरप्प्रत्ययः ॥ एवंभूतो लक्ष्मणो भासुरं भासनशीलम् ॥ "भञ्जभास—" इत्युक्तम् ॥ धनुर्गृहीत्वा गत्वरान् भयात्प्रतिदिशं गन्तॄन् ॥ "गत्वरश्च" इति क्वरबन्तो निपातः ॥ कपीन् प्राप प्राप्तवान् ॥

तं जागरूकः[2] कार्येषु दन्दशूकरिपुं कपिः[3] ।
अकम्प्रं मारुतिर्दीप्रं नम्रः प्रावेशयद्गुहाम् ॥ २३ ॥

२३. तमिति ॥ दन्दशूकाः हिंस्राः ॥ "यजजपदशां यङः" इति दंशेर्यङन्तादूकप्रत्ययः ॥ तेषां रिपुं हन्तारमकम्प्रमकम्पसंस्थिरं दीप्रं दीप्यमानम् ॥ "नमिकम्पि—" इत्यादिना सर्वत्र रप्रत्ययः ॥ तं लक्ष्मणं कार्येषु स्वामिकृत्येषु जागरूकमप्रमत्तम् ॥ "जागरूकः" इत्यूकप्रत्ययः ॥ मारुतिर्वायुनन्दनो हनूमान् नम्रः प्रणतः सन् गुहां किष्किन्धाख्यां

१ °मरो भङ्गुर N.
२ जागरूकं D.
३ रिपुः D.

प्रावेशयत् प्रवेशितवान्। विशेर्हेतुमण्ण्यन्ताल्लुङ्। प्रवेशनस्य गतिविशेषत्वात् "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम्॥

कम्राभिरावृतः[1] स्त्रीभिराशंसुः क्षेममात्मनः।
इच्छुः प्रसादं प्रणमन् सुग्रीवः प्रावदन्नृपम्[2]॥ २४॥

२४. कम्राभिरिति॥ कम्राभिः कमनाभिः। 'कम्रः कामयिताभीकः कमनः कामनोऽभिकः' इत्यमरः॥ "नमिकम्पि—" इत्यादिना रप्रत्ययः॥ स्त्रीभिरावृतः। अनुकम्पार्थं तत्पुरःसर इत्यर्थः। आत्मनः क्षेममनपायमाशंसुरिच्छुः॥ "सनाशंसभिक्ष उः" इत्युप्रत्ययः॥ प्रसादमनुग्रहमिच्छुः॥ "विन्दुरिच्छुः"॥ इत्युप्रत्ययान्तो निपातः॥ सुग्रीवो नृपं लक्ष्मणं प्रणमन्प्रावदत्प्रोवाच॥

अहं स्वप्नक् प्रसादेन[3] तव[4] वन्दारुभिः सह।
अभीरुरवसं स्त्रीभिर्भासुराभिरि[5][6]हेश्वर[7]॥ २५॥

२५. अहमिति॥ हे ईश्वर स्वामिन् अहं तव प्रभावेन महिम्ना वन्दारुभिः वन्दनशीलाभिः॥ "शृवन्द्योरारुः" इत्यारुप्रत्ययः॥ भास्वराभिः॥ "स्थेशभास—" इत्यादिना वरच्प्रत्ययः॥ स्त्रीभिः सह स्वप्नक्। ञिष्वप् शये॥ "स्वपितृषोर्नजिङ्" इति नजिङ्प्रत्ययः॥ अभीरुर्निर्भीकः सन्॥ "भियः क्रुक्लुकनौ" इति क्रुप्रत्ययः॥ इहावसमुषितवान्॥

विद्युन्नाशं रवेर्भासं[8] विभ्राजं शशलाञ्छनम्।
रामप्रत्तेषु भोगेषु नाहमज्ञासिषं रतः॥ २६॥

२६. विद्युदिति॥ हे नाथ। अहं रामेण प्रत्तेषु दत्तेषु॥ "अच उपसर्गात्तः" इति घोस्तः॥ भोगेषु विषयेषु रतः सक्तः सन् विद्युन्नाशं विद्युतामु-

१ कम्राभिः प्रावृतः E3.
२ प्राब्रवीन्नृ° D., c.
३ प्रभावेन T., G., Com.
४ तेन T2, T4.
५ दीप्ताभिर° T2, T4.
६ °र्भास्वराभि° T3, D., B., T., E2, G., Com.
७ °हेश्वर T., G., Com., E2.
८ रवेर्भासो T., G., Com., E2, D.

परमं रवेर्भासः प्रकाशान् । विभ्राजते इति विभ्राट् ॥ "भ्राजभास—" इत्यादिना सर्वत्र ताच्छील्ये क्विप् ॥ तं शशलाञ्छनं च नाज्ञासिषम् । वर्षापगमं शरदागमं च न ज्ञातवानस्मि । 'मोहं विधत्ते विषयाभिलाषः' इति भावः ॥

एष शोकच्छिदो वीरान् प्रभो सम्प्रति वानरान् ।
धरा[1]समु[2]द्रशैलानामन्तगान्प्रहिणोम्यहम् ॥ २७ ॥

२७. एष इति ॥ हे प्रभो एषोऽहं सम्प्रति शोकस्य छिदः । भ्राजादिसूत्रादनुपपदे क्विप्यनुवृत्ते "अन्येभ्योऽपि दृश्यते" इति ताच्छील्ये क्विप् । वीरान् शूरान् धरायाः शैलानां समुद्राणां चान्तगान् पारगान् ॥ "अन्तात्यन्त—" इत्यादिना डप्रत्ययः ॥ वानरान् प्रहिणोमि प्रहेष्यामि । प्रेषयिष्यामीत्यर्थः । हि गतौ । वर्त्तमानसामीप्ये लट् ॥ "हिनुमीना" इति णत्वम् ॥

इति ताच्छीलिकाः ॥

राघवस्य ततः कार्यं का[3]रुर्वानरपुङ्गवः ।
सर्ववानरसे[4]नानामाश्वागमनमादिशत् ॥ २८ ॥

२८. अथोणादिपदोक्तप्रत्ययाधिकारः ॥ राघवस्येति ॥ ततो लक्ष्मणानुनयानन्तरं पुमान्गौः पुङ्गवः वृषभः ॥ "गोरतद्धितलुकि" इति समासान्तष्टच् ॥ तेनोपमितसमासे वानरपुङ्गवः सुग्रीवो राघवस्य कार्यं प्रयोजनम् । करोतीति कारुः कर्त्ता सन् ॥ "कृवापाजि—" इत्यादिना उणप्रत्ययः ॥ सर्ववानरसैन्यानामाश्वागमनं शीघ्रागमनमादिशदादिष्टवान् । कारुवदाशुशब्दः ॥

वयमद्यैव गच्छामो रामं द्रष्टुं त्वरान्विताः ।
कारका मित्रकार्याणि सीतालाभाय सोऽब्रवीत् ॥ २९ ॥

---

१ सरित्समुद्र° B.
२ शैलसमुद्राणां° D., E2, E3, N., T., G., Com.
३ कुर्यांद्वा° T2, T4.
४ सैन्याना° T3, T., G., Com.

२९. पुनः स एवाह वयमिति ॥ सीतालाभाय सीतां लब्धुम् ॥ "भाववचनाश्च" इति तुमर्थे घञ् ॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी ॥ मित्रकार्याणि मित्रकृत्यानि कारकाः करिष्यन्तः कर्तुमित्यर्थः ॥ "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति ण्वुल्प्रत्ययः ॥ "अकेनोर्भविष्यदाधमर्ण्ययोः" इति षष्ठीप्रतिषेधः । रामं द्रष्टुम् ॥ "तुमुन्ण्वुलौ—" इत्यनेनैव तुमुन् ॥ त्वरया अन्विताः सन्तः वयमद्यैव गच्छामः इति सः सुग्रीवोऽब्रवीत् ॥

ततः कपीनां सङ्घाता हर्षाद्राघवभूतये[1] ।
पूरयन्तः समाजग्मुर्भयदाया दिशो दश ॥ ३० ॥

३०. तत इति ॥ आदेशानन्तरं कपीनां संघाताः संघाः हर्षात्स्वाम्यादेशसन्तोषाद्राघवस्य भूतये भूतिमभ्युदयं कर्तुम् ॥ "भाववचनाश्च" इति तुमर्थे क्तिन् ॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी ॥ दश दिशः पूरयन्तः व्याप्नुवन्त इत्यर्थः । भयं दास्यन्तो भयदायाः ॥ "अण् कर्मणि च" इति कर्मोपपदाद्ददातेर्भविष्यदर्थे अण्प्रत्ययः ॥ समाजग्मुरागताः ॥

सुग्रीवान्तिकमासेदुः साधयिष्याम[2] इत्यरिम्[3] ।
करिष्यन्त इवाकस्माद्भुवनं निर्दशाननम् ॥ ३१ ॥

३१. सुग्रीवेति ॥ अकस्मादतर्कितं भुवनं जगन्निर्दशाननमरावणं करिष्यन्त इव ॥ "लृट् शेषे च" इति शेषार्थे लृट् ॥ "लृटः सद्वा" इति शत्रादेशः ॥ तथा अरिं साधयिष्याम इति सुग्रीवान्तिकमासेदुः साधयितुमासन्ना इत्यर्थः ॥ "लृट् शेषे च" इति चकारात्क्रियार्थक्रियोपपदे लृट् ॥ आसदनस्य साधनार्थत्वादिति भावः ॥

अथ घञधिकारः ।

कर्तास्मि कार्यमायातैरेभिरित्यवगम्य[4] सः ।
काकुत्स्थपादपच्छायां शीतस्पर्शामुपागमत् ॥ ३२ ॥

---

१ हर्षाद्रामविभूतये B.
२ साधयिष्याम B., D., E3, N.
३ इत्यरीन् T_2, T_3, T_4.
४ °त्यभिगम्य E_2.

३२. कर्त्तास्मीति ॥ आयातैरागतैरेभिर्वानरैः साधनैः कार्यं रामप्रयोजनं कर्त्तास्मि करिष्यामि ॥ "अनद्यतने लुट्" इत्यनद्यतनभविष्यति लुट् ॥ इत्यवगम्य । कार्यसिद्धिं निश्चित्येत्यर्थः । शीतस्पर्शामाह्लादिकामित्यर्थः । काकुत्स्थ एव पादपः तस्य छायामुपागमत् । रामान्तिकं गत इत्यर्थः ॥ "पदरुजविशस्पृशो घञ्" इति पादस्पर्शौ घञन्तौ ॥

कार्यं सारनिभं दृष्ट्वा वानराणां समागमम् ।
अवैन्नाशं दशास्यस्य निर्वृत्तमिव राघवः ॥ ३३ ॥

३३. कार्येति ॥ राघवः कार्यस्य सीताप्राप्तिरूपस्य । सरति कालान्तमिति सारः स्थिरांशः । 'सारो बले स्थिरांशे च' इत्यमरः ॥ "सृ स्थिरे" इति घञ्प्रत्ययः ॥ तन्निभं तत्सङ्काशं वानराणां समागमं दृष्ट्वा दशास्यस्य नाशं विनाशम् ॥ "भावे" इति घञ् ॥ निर्वृत्तमिवावैत् अवगतवान् सिद्धप्रायममन्यतेत्यर्थः ॥ इणो लङि तिपि शपो लुकि गुणः । आड्वृद्धिः

ततः कपिसमाहारमेक[1]निश्चा[2]यमागतम् ।
उपाध्याय इवायामं सुग्रीवोऽध्यापिपद्दिशाम् ॥ ३४ ॥

३४. तत इति ॥ ततः कपिसमागमनानन्तरं सुग्रीवः । निष्कृष्य चीयत इति निश्चायो राशिः ॥ "परिमाणाख्यायां सर्वेभ्यः" इति चिनोतेर्घञ् ॥ एकनिश्चायमेकराशीभूतमागतम् । एकशब्दस्य "पूर्वकाल—" इत्यादिना समासः । कपिसमाहारं कपिसङ्घम् ॥ "अकर्त्तरि च कारके संज्ञायाम्" इति घञि वृद्धिः । उपेत्याधीयतेऽस्मादित्युपाध्यायो गुरुरिव ॥ "इङश्च" इति घञ् ॥ दिशामायामं विस्तारकृत्स्निम् । परिमाणाख्यायां घञ् । अध्यापिपत् बोधितवानित्यर्थः ॥ "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् । इङो णौ चङि "क्रीङ्जीनां णौ" इत्यात्वे "अर्त्तिह्री—" इत्यादिना पुगागमः ॥

---

१ °मेकं निश्चाय° C. | २ निश्चय° B.

सजलाम्भोदसंरावं हनूमन्तं सहाङ्गदम् ।
जाम्बवन्नीलसहितं चारुसन्द्रावमब्रवीत् ॥ ३५ ॥

३५. सजलेति ॥ सजलाम्भोदस्येव संरावो यस्य तम् ॥ "उपसर्गे रुवः" इति घञ् ॥ सहाङ्गदमङ्गदसहितं जाम्बवता नीलेन च सहितम् । केचिदकारान्तत्वमाश्रित्य नीलसहितं जाम्बवं चेति व्याचक्षते तच्चिन्त्यम् । चारुसन्द्रावं श्लाघ्यगतिम् ॥ "समि युद्रुदुवः" इति घञ् ॥ हनूमन्तमब्रवीत् ॥

यात यूयं यमश्रायं दिशं नायैर्न दक्षिणाम् ।
विक्षावैस्तोयविश्रावं तर्जयन्तो महोदधेः ॥ ३६ ॥

३६. यदब्रवीत्तदेव नवभिराह ॥ यातादिभिः ॥ यूयम् । श्रीयते इति श्रायः । यमस्य श्रायमाश्रयं स्थानं दक्षिणां दिशम् । नीयन्त इति नायैर्नीतिभिरुपायैरित्यर्थः ॥ "श्रिणीभुवोऽनुपसर्गे" इत्युभयत्रापि कर्मणि घञ् ॥ विक्षावैः सिंहनादैः । टुक्षुशब्दे । महोदधेस्तोयानां विश्रूयते इति विश्रावं शब्दम् ॥ "वौ क्षुश्रुवः" इत्युभयत्रापि कर्मणि घञ् । तर्जयन्तस्तिरस्कुर्वन्तो यात गच्छत ॥

उन्नायानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम् ।
वनाभिलावान् कुर्वन्तः स्वेच्छया चारुविक्रमाः ॥ ३७ ॥

३७. उन्नायानिति ॥ हे चारुविक्रमाः श्लाघ्यपराक्रमाः वसुधाभृतां गिरीणामुन्नायानुत्सेधान् ॥ "अवोदोर्नियः" इति घञ् ॥ प्रद्रावैः प्रकृष्टगतिभिः ॥ "प्रेद्रुस्तुस्रुवः" इति घञ् ॥ अधिगच्छन्तः आरोहन्तः स्वेच्छया वनानामभिलावानुत्सेधान्कुर्वन्तः सर्वत्र यातेति पूर्वेणान्वयः ॥

---

१ सजलाम्भोधि° B.
२ हनुमन्तं N.
३ जाम्बवं N., D.
४ यमाश्रायं E2.
५ नायेन दक्षिणां दिशम् E2.
६ नायैश्च T., G., Com.

सदोद्गारसुगन्धीनां फलानामलमाशिताः ।
उत्कारेषु[1] च धान्यानामनभीष्टपरिग्रहाः ॥ ३८ ॥

३८. सदेति ॥ सदोद्गारो निरन्तरसंस्रावः[2] ॥ "उन्न्योर्ग्रः" इति गिरतेर्घञ् ॥ तेन सुगन्धीनां हृद्यगन्धानाम् ॥ "गन्धस्य—" इतीत्वम् ॥ फलानामलं पर्याप्तमाशिताः आशितवन्तः ॥ "आशितः कर्त्ता" इति निपातनादात्पूर्वादश्नातेः कर्त्तरि क्तः ॥ आशितशब्दस्य सुहितार्थत्वात् "पूरणगुणसुहित—" इत्यादिना षष्ठीसमासप्रतिषेधः ॥ एतस्मादेव ज्ञापकात्षष्ठी । तथा धान्यादीनां व्रीहियवादीनामुत्कारेषु राशिषु च ॥ "कॄ धान्ये" इति किरतेर्घञ् । अनभीष्टपरिग्रहास्तत्स्वीकारनिस्पृहा इत्यर्थः ॥

संस्तावमिव शृण्वन्तश्छन्दोगानां[3] महाध्वरे[4] ।
शिञ्जितं[5] मधुलेहानां पुष्पप्रस्तारशायिनाम् ॥ ३९ ॥

३९. संस्तावमिति ॥ महाध्वरे छन्दोगानां सामगानां संस्तावं संभूय स्तवनमिव ॥ "यज्ञे समि स्तुवः" इति घञ् ॥ पुष्पाणां प्रस्तारा राशयः ॥ "प्रे स्त्रोऽयज्ञे" इति घञ् ॥ तेषु शेरत इति तच्छायिनाम् ॥ "सुप्यजातौ—" इत्यादिना णिनिः ॥ मधुलेहानां मधुलिहाम् ॥ "कर्मण्यण्" इत्यण् ॥ शिञ्जितं कूजितं शृण्वन्तः ॥

आलोचयन्तो[6] विस्तारमम्भसां दक्षिणोदधेः ।
स्वादयन्तः फलरसं मुष्टिसंग्राहपीडितम् ॥ ४० ॥

४०. आलोचयन्त इति ॥ दक्षिणोदधेरम्भसामुदकानां विस्तारं परिणाहम् ॥ "प्रथने वावशब्दे" इति घञ् ॥ आलोचयन्त इयानिति रूपयन्तः । मुष्टीनां संग्राहः सम्यग्ग्रहणम् ॥ "समि मुष्टौ" इति ग्रहेर्घञ् ॥ तेन पीडितं निःसारितं फलरसं स्वादयन्तः ॥

---

१ उत्करेषु C.
२ संश्राव° T_3.
३ °श्छान्दोगानां C.
४ छन्दोगानामिवाध्वरे T_2, T_3, T_4.
५ सिञ्जितं D.
६ आलोकयन्तो C.

न्याय्यं यद्यत्र तत्कार्यं पर्यायेणाविरोधिभिः।
निशोपशायः कर्त्तव्यः फलोच्चायश्च संहतैः ॥ ४१ ॥

४१. न्याय्यमिति ॥ अविरोधिभिः परस्परमविरुन्धानैः किं तु संहतैरैकमत्यं गतैर्युष्माभिर्यत्र यन्न्याय्यं न्यायादनपचारेण यथाप्राप्तकरणलक्षणादभ्रेषादनपेतम् ॥ "परिन्योर्नीणोर्द्यूताभ्रेषयोः" इत्यभ्रेषार्थे निपूर्वादिणो घञ् ॥ ततः "धर्मपथ्यर्थन्यायादनपेते" इति यत्प्रत्ययः॥ तत्कार्यम्। निशोपशायो निशायां पर्यायशयनम्। ईशोपशाय इति पाठे राजोपशाय इत्यर्थः ॥ "व्युपयोः शेतेः पर्याये" इत्युपपूर्वात् शीङो घञ् ॥ कर्त्तव्यः। किं च पर्यायेणानुपात्ययेन तवोपशायो ममोपशाय इति क्रमेणेत्यर्थः ॥ "परावनुपात्यय इणः" इति परिपूर्वादिणो घञ् ॥ फलोच्चायः क्षुन्निवृत्त्यर्थमासन्नफलादानम्। स च कर्त्तव्यः॥ "हस्तादाने चेरस्तेये" इति चिनोतेर्घञ् हस्तादानमिति प्रत्यासत्त्युपलक्षणम् ॥

सीता रक्षोनिकायेषु स्तोककायैश्छलेन च।
मृग्या शत्रुनिकायानां व्यावहासीमनाश्रितैः ॥ ४२ ॥

४२. सीतेति ॥ रक्षोनिकायेषु राक्षसनिवासेषु स्तोककायैरल्पशरीरैः तथा शत्रुनिकायानां शत्रुसंघानां व्यावहासी मिथोहासव्यवहारः॥ "कर्मव्यतिहारे णच् स्त्रियाम्" इति हसतेर्णच् ॥ "णचः स्त्रियामञ्" इत्यञ् ॥ "टिड्ढाणञ्—" इत्यादिना ङीप् ॥ तामनाश्रितैरप्रमत्तैर्भवद्भिः सीता छलेन छद्मना मिषान्तरेण मृग्या ॥ "निवासचितिशरीरोपसमाधानेष्वादेश्च कः" इति निकायादिषु निवासाद्यर्थेषु चिनोतेर्घञ् आदेश्चकारस्य ककारः॥

सांराविणं न कर्त्तव्यं यावन्नायाति दर्शनम्।
संदृष्टायां तु वैदेह्यां निग्राहो वोऽर्थवानरैः ॥ ४३ ॥

---

१ कार्यं तत् D., T_2, T_3. | २ निग्राहोऽप्यर्थवा° E_2.

४३. सांराविणमिति ॥ किं च वैदेही यावद्दर्शनं नायाति तावत्समन्ताद्रावः कलकलः सांराविणम् ॥ "अभिविधौ भाव इनुण्" इति संपूर्वाद्रौतेरिनुण्प्रत्ययः ॥ "अणिनुणः" इति ततोऽण् ॥ "इनण्यनपत्ये" इति प्रकृतिभावात् "नस्तद्धिते" इति न टिलोपः ॥ न कर्त्तव्यम् । वैदेह्यां संदृष्टायां तु वो युष्माकं संबन्धी अरेः । कर्मणि षष्ठी । निग्राहः आक्रोशः शपनमर्थवान् सफलो भवति ॥ "आक्रोशेऽवन्योर्ग्रहः" इति निपूर्वाद्ग्रहेर्घञ् ॥

प्रग्राहैरिव पात्राणामन्वेष्या मैथिली[१] कृतैः ।
ज्ञातव्या चेङ्गितैर्धर्म्यैर्ध्यायन्ती राघवागमम् ॥ ४४ ॥

४४. प्रग्राहैरिति ॥ मैथिलीकृतैः सीताकृतैः सीतालिप्सया कल्पितैः पात्राणां प्रग्राहैर्भिक्षापात्रस्वीकारैः ॥ "प्रे लिप्सायाम्" इति प्रपूर्वाद्ग्रहेर्घञ् ॥ इवशब्दोऽपारमार्थिकत्वे । अन्वेष्या भिक्षुवेषैरन्वेष्टव्येत्यर्थः । किं च राघवागमं ध्यायन्ती रामागमनमेव चिन्तयन्ती सा सीता धर्म्यैर्धर्मादनपेतैः ॥ "धर्मपथ्यर्थ—" इत्यादिना यत् ॥ इङ्गितैः पतिव्रताचेष्टितैः ज्ञातव्या च ॥ 'प्रोषिते मलिना कृशा' इत्यादिशास्त्रोक्तकार्श्यादिलिङ्गैरवगन्तव्या चेत्यर्थः ॥

वेदिवत्सपरिग्राहा यज्ञियैः संस्कृता द्विजैः ।
दृश्या मासतमादह्नः प्रागनिन्दितवेश[२]भृत् ॥ ४५ ॥

४५. वेदिवदिति ॥ किं च वेद्या तुल्यं वर्त्तते वेदिवत् सपरिग्राहा स्थण्डिलशयनादिव्रतपरिग्रहवती । अन्यत्र 'वसवस्त्वापरिगृह्णन्तु' इत्यादिमन्त्रसाध्यपूर्वोत्तरपरिग्रहाख्यसंस्कारवती ॥ "परौ यज्ञे" इति परिपूर्वाद्ग्रहेर्घञ् ॥ यज्ञियैर्यज्ञार्हैः ॥ "यज्ञर्त्विग्भ्यां घखञौ" इति घप्रत्ययः ॥ द्विजैर्याज्ञिकैः संस्कृता जातकर्मादिभिः प्रोक्षणादिभिश्च योग्यत्वमापादिता । 'संपूर्वस्य क्वचिदभूषणेऽपीष्यते' इति सुडागमः । अनिन्दितवेषभृत् पतिव्रतोचितवेषधारिणी सा मासस्य पूरणात् मासत-

१ The Com. takes मैथिलीकृतैः as one word.

२ वेष D., T., G., Com.

मात् ॥ "नित्यं शतादिमासार्धमाससंवत्सराच्च" इति डटस्तमडादेशः। एतस्मादेव ज्ञापकादसंख्यावाचिनोऽपि डट्। अह्नः प्राग्दश्या द्रष्टव्या। तदतिक्रमे दण्ड्या इति भावः ॥

नीवारफलमूलाशानृषीनप्यतिशेरते।
यस्या गुणा निरुद्भावास्तां द्रुतं यात पश्यत[1] ॥ ४६ ॥

४६. नीवारेति ॥ निरुद्भावा निश्चापलाः स्थिरा इत्यर्थः ॥ "उदि श्रयतियौतिपूद्रुवः" इत्युत्पूर्वाद्द्रवतेर्घञ् ॥ यस्या गुणाः नीवाराः अकृष्टपच्या व्रीहयः ॥ "नौ वृ धान्ये" इति निपूर्वाद्वृञो घञ् ॥ "उपसर्गस्य घञि—" इत्यादिना नेर्दीर्घः। तान् फलानि मूलानि चाश्नन्तीति तदाशाः ॥ "कर्मण्यण्" इत्यण्प्रत्ययः ॥ तानृषीनप्यतिशेरते तां सीतां पश्यत द्रुतं यात गच्छत ॥

उच्छ्रायवान् घनारावो[2] वानरं जलदारवम्।
दूराप्लावं[3] हनूमन्तं रामः प्रोचे गजाप्लवः[4] ॥ ४७ ॥

४७. उच्छ्रायवानिति ॥ उच्छ्रायवानुन्नतिमान् ॥ "उदि श्रयति—" इत्यादिना घञ् ॥ महारावो गम्भीरध्वनिः गजाप्लावो गजगमनो रामः जलदारवं मेघगम्भीरघोषं दूराप्लवं दूराप्लुतं हनूमन्तं नाम वानरं प्रोचे प्रोवाच ॥ "विभाषाङि रुप्लुवोः" इत्याङ्पूर्वाद्रौतेः प्लवतेश्च विकल्पाद्घञ् ॥ तदभावे "ऋदोरप्" इत्यप्प्रत्ययः ॥

अवग्राहे[5] यथा वृष्टिं प्रार्थयन्ते[6] कृषीवलाः।
प्रार्थयध्वं तथा सीतां[7] यात सुग्रीवशासनात् ॥ ४८ ॥

४८. अवग्राह इति ॥ अवग्राहे वर्षाभावे ॥ "अवे ग्रहो वर्षप्रतिबन्धे" इति विकल्पाद्घञ् ॥ यथा कृषीवलाः कर्षकाः ॥ "रजःकृषि—" इत्या-

---

१ यात पश्यत द्रुतम् E2.
२ महारावो T., G., Com.
३ गजाप्लावो T., G., Com.
दूराप्लवं D.
दूराह्वावं E3, T2.
४ दुराप्लवम् T., G., Com.
५ अवग्रहे T2, T4.
६ प्रार्थयन्ति c.
७ यात सीतां T4.

दिना मत्वर्थीये वलचि "वले" इति पूर्वस्य दीर्घः ॥ वृद्धिं प्रार्थयन्ते आशंसन्ते तथा सीतां प्रार्थयध्वम् सुग्रीवशासनादयात ॥

वणिक् प्रग्राहवान् यद्वत् काले चरति सिद्धये ।
देशापेक्षास्तथा[1] यूयं यातादायाङ्गुलीयकम्[2] ॥ ४९ ॥

४९. वणिगिति ॥ प्रगृह्यतेऽनेनेति प्रग्राहस्तुलासूत्रम् ॥ "प्रे वणिजाम्" इति घञ् ॥ तद्वान् तुलाहस्तो वणिक् यद्वद्यथा काले व्यवहारकाले सिद्धये लाभाय देशापेक्षः समृद्धदेशापेक्षश्चरति तथा यूयमङ्गुलौ भवमङ्गुलीयं तदेवाङ्गुलीयकम् ॥ "जिह्वामूलाङ्गुलेश्छः" इति छप्रत्ययः ॥ आदाय देशापेक्षाः सीताधिष्ठितदेशापेक्षाः सन्तः ॥ "कर्मण्यण्" इत्यण् ॥ यात गच्छत ॥

अभिज्ञानं गृहीत्वा ते समुत्पेतुर्नभस्तलम्[3] ।
वाजिनः स्यन्दने भानोर्विमुक्त[4]प्रग्रहा इव ॥ ५० ॥

५०. अभीति ॥ ते वानराः अभिज्ञानं चिह्नमङ्गुलीयकं गृहीत्वा भानोः स्यन्दने रथे विमुक्ताः शिथिलिताः प्रग्रहाः रश्मयः संयमनरज्जवो येषां ते ॥ "रश्मौ च" इति प्रपूर्वाद्ग्रहेः घञभावपक्षे "ग्रहवृदृनिश्चिगमश्च" इत्यप् ॥ वाजिनोऽश्वा इव नभस्तलं समुत्पेतुः ॥

उदक् शतबलिं कोट्या सुषेणं पश्चिमां तथा ।
दिशं[5] प्रास्थापयद्राजा वानराणां कृतत्वरः ॥ ५१ ॥

५१. उदगिति ॥ राजा सुग्रीवः कृतत्वरः सन् शतबलिं नाम कञ्चन कपियूथपं वानराणां कोट्या सह उदक् उदीचीं दिशं प्रतीत्यर्थः । उदीचीशब्दात्प्रथमान्तात् "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यः—" इत्यादिना अस्तातिप्रत्यये तस्य "अञ्चेर्लुक्" इति लुकि "लुक् तद्धितलुकि" इति स्त्रीप्रत्ययस्यापि लुकि भसंज्ञाभावात् "उद ईत्" इतीत्वेऽपि निवृत्ते "तद्धितश्चासर्वविभक्तिः" इत्यव्ययत्वात्पश्चादुत्पन्नायाः

---

१ देशापेक्ष्या° E3.
२ °याङ्गुरीयकम् C., c., E2, E3.
३ नभस्तले c.
४ वियुक्त E2.
५ This latter half is not found in T3.

द्वितीयायाः "अव्ययादाप्सुपः" इति लुकि सर्वमवदातम् ॥ प्रास्थापयत् प्रस्थापितवान् । तथा तद्वत्कोट्या सहैव सुषेणं पश्चाद्भवां पश्चिमां प्रतीचीं दिशं प्रति प्रास्थापयत् ॥ "अग्रादिपश्चाड्डिमच्" इति डिमच् ॥

प्राचीं तावद्भिरव्यग्रः कपिभिर्विनतो ययौ ।
अप्रग्राहैरिवादित्यो वाजिभिर्दूरपातिभिः ॥ ५२ ॥

५२. प्राचीमिति ॥ विनतो नाम कश्चिद्यूथपः तावद्भिः कोटिसंख्याकैरेव कपिभिः सह अप्रग्राहैः शिथिलितप्रग्रहैरित्यर्थः ॥ "रश्मौ च" इति विकल्पात्प्रपूर्वाद्ग्रहेर्घञ् ॥ अत एव दूरपातिभिर्दूरगामिभिः वाजिभिरश्वैरादित्य इव अव्यग्रः सन् प्राचीं दिशं प्रति ययौ ॥

ययुर्विन्ध्यं शरन्मेघैः प्रावारैः प्रवरैरिव ।
प्रच्छन्नं मारुतिप्रष्ठाः सीतां[3] द्रष्टुं प्लवङ्गमाः ॥ ५३ ॥

५३. ययुरिति ॥ प्रतिष्ठत इति प्रष्ठोऽग्रगामी ॥ "आतश्चोपसर्गे" इति तिष्ठतेः प्रोपसृष्टात्कर्त्तरि कः ॥ "प्रष्ठोऽग्रगामिनि" इति षत्वनिपातः ॥ मारुतिप्रष्ठाः हनूमत्पुरोगाः प्लवैर्गच्छन्तीति प्लवङ्गमाः वानराः । खशि मुम् । सीतां द्रष्टुं प्रवरैः श्रेष्ठैः ॥ "ग्रहवृदृनिश्चिगमश्च" इत्यप् ॥ प्रावारैरुत्तरासङ्गैरिव । 'द्वौ प्रावारोत्तरासङ्गौ' इत्यमरः ॥ "वृणोतेराच्छादने" इति घञ् ॥ "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः ॥ शरन्मेघैः प्रच्छन्नं विन्ध्यं ययुः ॥

परिभावं मृगेन्द्राणां कुर्वन्तो नगमूर्धसु[4] ।
विन्ध्ये तिग्मांशुमार्गस्य चेरुः परिभवोपमे ॥ ५४ ॥

५४. परिभावमिति ॥ नगमूर्धसु विन्ध्याद्रिशिखरेषु मृगेन्द्राणां सिंहानां परिभावमवज्ञानं कुर्वन्तः ॥ "परौ भुवोऽवज्ञाने" इति पक्षे घञ् ॥ तिग्मां-

---

१ अप्रग्रहै° T_3.
२ दूरयायिभिः D., T_2, T_4.
३ द्रष्टुं सीतां T_2, T_3, T_4.
४ गिरिमूर्धसु T_3.
गिरिमूर्धनि T_2, T_4.

शुमार्गस्य सूर्यमार्गस्य यः परिभवो निरोधः । घञभावपक्षे "ऋदोरप्" इत्यप् ॥ तस्य उपमापयतीत्युपमे सदृशे । मूर्त्तः परिभव इव स्थित इत्यर्थः ॥ "आतश्चोपसर्गे" इति कः ॥ तस्मिन्विन्ध्ये चेरुः पर्भ्रेमुः ॥

भ्रेमुः शिलोच्चयान्भीमा[1]नुत्तेरुरतरान् नदान् ।
आशंसवो लवं शत्रोः सीतायाश्च विनिश्चयम् ॥ ५५ ॥

५५. भ्रेमुरिति ॥ शत्रोर्लवमुच्छेदनम् ॥ "ऋदोरप्" इत्यप् ॥ सीताया विनिश्चयं स्थाननिर्णयं च ॥ "ग्रहवृदृनिश्चिगमश्च" इत्यप् ॥ आशंसव इच्छवः । "सनाशंसभिक्ष उः" इत्युप्रत्ययः ॥ ते वानराः भीमान् भयङ्करान् शिलोच्चयान् शिलोत्करान् गिरीन् । उत्पूर्वाच्चिनोतेः "एरच्" इत्येरच् । भ्रेमुस्तेषु बभ्रमुरित्यर्थः । "देशकालाध्वभावानां कर्मसंज्ञा ह्यकर्मणाम्" इति कर्मत्वम् ॥ "वा जॄभ्रमुत्रसाम्" इति विकल्पाद्भ्रमेर्लिट्येत्वाभ्यासलोपौ ॥ अतरानविद्यमानतरणान् दुस्तरानित्यर्थः ॥ "ऋदोरप्" इत्यप् ॥ नदान्प्रवाहान् तेरुरुत्तीर्णवन्तः ॥ "तॄफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ ॥

[2]आदरेण[3] गमं चक्रुर्विषमेष्वप्यसङ्गसाः ।
व्याप्नुवन्तो दिशो न्यादान् कुर्वन्तः सव्यधा[4]न्हरीन् ॥ ५६ ॥

५६. आदरेणेति ॥ विषमेषु विषमस्थलेष्वप्यसङ्गसाः अविद्यमानसम्यग्ग्रासाः ॥ "उपसर्गेऽदः" इत्यदेरुपसृष्टादप् ॥ "घञपोश्च" इति घस्लादेशः ॥ दिशो व्याप्नुवन्तः हरीन् सिंहान् सव्यधान् ससंप्रहारान् ॥ "व्यधजपोरनुपसर्गे" इत्यप् ॥ न्यादान् निराहारांश्च ॥ "नौ ण च" इत्यदेर्णप्रत्ययः ॥ कुर्वन्तः आदरेण गमं गमनं चक्रुः । ग्रहादिनैवोभयत्राप्यप् ॥

संचेरुः सहसाः केचिदस्वनाः केचिदाटिषुः ।
संयामवन्तो यतिवन्निगदा[5]नपरेऽमुचन् ॥ ५७ ॥

१ शिलोच्चयांस्तुङ्गा° N., C., T., B.. शिलोच्चयान्भीमांस्ते तेरु° T., G., Com.
२ The verse is not found in T_3.
३ आदरेणागमं T_4.
४ सव्यथा° D.
५ निनादा° c., T_4, T., G., Com.

५७. संचेरुरिति ॥ केचिद्वानराः सहसाऽस्सहासाः संचेरुः। केचिद्-स्वनाः निःशब्दाः आटिषुः पर्यटितवन्तः। अटतेर्लुङ् ॥ "स्वनहसोर्वा" इत्युभयत्र विकल्पादप् ॥ अपरे यतिवत् संयामवन्तो नियमवन्तः ॥ "यमः समुपनिविषु च" इति विकल्पाद्धञ् ॥ निनादान् वाचः ॥ "नौ गदनद—" इत्यादिना विकल्पादेव घञ् ॥ अमुचन्। वाचो निजगदु-रित्यर्थः। मुचेर्लुङि लृदित्वादङ् ॥

अथ क्रमाद[1]निक्काणा[2] नराः क्षीणपणा इव।
अमदाः सेदुरेकस्मिन् नितम्बे निखिला गिरेः ॥ ५८ ॥

५८. अथेति ॥ अथानन्तरं क्रमात् परिभ्रमणश्रमात्। क्रमेर्भावे घञ् ॥ "नोदात्तोपदेशस्य—" इत्यादिना वृद्धिप्रतिषेधः ॥ अनिक्काणाः निःशब्दाः "क्वणो वीणायां च" इति निपूर्वात्क्वणतेः वीणायां वा घञ् ॥ क्षीणपणाः क्षीणवित्ताः नरा इव ॥ "नित्यं पणः परिमाणे" इति पणतेः परिमाणार्थे अप्प्रत्ययः। इह वित्तमात्रं लक्ष्यते। अमदाः निर्मदाः ॥ "मदोऽनुपसर्गे" इत्यप् ॥ निखिलाः वानराः एकस्मिन्गिरेर्नितम्बे कटके सेदुर्निषेदुः ॥

ततः ससंमर्दा[4]स्तत्र निरैक्षन्त पतत्रिणः।
गुहाद्वारेण निर्यातः समजेन[6] पशूनिव ॥ ५९ ॥

५९. तत इति ॥ ततो निषदनानन्तरं तत्राद्रिकटके ससंमदान् सह-र्षान् ॥ "प्रमदसंमदौ हर्षे" इत्यप्प्रत्ययान्तो निपातः ॥ गुहाद्वारेण निर्यातो निर्गच्छतः। यातेः शतरि शस्। पतत्रिणः पक्षिणः समजेन सङ्घेन ॥ "समुदोरजः पशुषु" इति संपूर्वादजेरप् ॥ निर्यातः पशूनिव निरैक्षन्त अपश्यन्। ईक्षतेर्लङि "झोऽन्तः" इत्यन्तादेशः ॥

---

१ क्रमेन c., T3, D. क्रामेन E3.
२ °दनिःक्काणाः N., C., T1.
३ समदा° T2.
पतत्रिणस्त° D.
४ ससंमर्दास्तत्र Com.
५ ससंमदाः D.
६ समाजेन c.

ग्लहमक्षेषु कुर्वाणाञ्छद्मना कितवानिव ।[1]
मलिम्लुचानिवापश्यञ्शकुन्तानागतान्गिरेः ॥ ६० ॥

६०. ग्लहमिति ॥ अक्षेषु पाशकेषु विषये छद्मना कपटेन ग्लहं पणं कुर्वाणान् । 'पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते' इत्यमरः । "अक्षेषु ग्लहः" इति ग्रहेरबन्तो लत्वार्थे निपातः । कितवानक्षदेवकानिव । 'धूर्तोऽक्षदेवी कितवः' इत्यमरः । गिरेरागतान् मलिम्लुचान् पाटच्चरानिव । 'पाटच्चरमलिम्लुचौ' इत्यमरः । गिरेरागतान् शकुन्तान् पक्षिणोऽपश्यन् ॥

वीनामुपसरं[2] दृष्ट्वा तेऽन्योन्योपहवा गुहाम् ।
प्राविशन्नाहवप्रज्ञा आहावमुपलिप्सवः[3] ॥ ६१ ॥

६१. वीनामिति ॥ वीनां पतत्रिणां । 'विविष्किरपतत्रिणः' इत्यमरः । उपसरः प्रजनो गर्भाधानाय वृषभाणां गोषूपगमनमिति यावत् । "प्रजने सर्तेः" इत्यप् ॥ इह लक्षणयोपसरमिवोपसरं संभ्रमोपसर्पणं दृष्ट्वा । पक्षिसंचारादुदकसत्तां निश्चित्येत्यर्थः । अन्योन्यमुपहवः आह्वानं येषां ते अन्योन्योपहवाः ॥ "ह्वः संप्रसारणं च न्यभ्युपविषु" इति ह्वयतेरप् संप्रसारणं च ॥ आह्वयन्ते सस्पर्धमाकारयन्त्यस्मिन्नित्याहवो युद्धम् ॥ "आङि युद्धे" इत्यप् संप्रसारणं च । तत्र प्रज्ञाः प्रौढाः ते वानराः आहावं निपानाख्यं जलाशयम् । 'आहावस्तु निपानं स्यादुपकूपजलाशये' इत्यमरः ॥ "निपानमाहावः" इति निपातनात्साधुः ॥ उपलिप्सवः पिपासोपशमार्थं लिप्सवो गुहां प्राविशन् ॥

कुर्वन्तो हवमाप्तानां पिपासावधकाङ्क्षिणः ।
द्वारं तमोघनप्रख्यं गुहायाः प्राविशन् द्रुतम् ॥ ६२ ॥

६२. कुर्वन्त इति ॥ आप्तानां सुहृदां हवमाह्वानम् ॥ "भावेऽनुपसर्गस्य" इत्यप्संप्रसारणं च ॥ कुर्वन्तः पिपासाया वधो निवृत्तिः ॥ "हनश्च

१ Verse 60 is found only in T., G., Com., and T_2, T_4.

२ °मुपासरं T_3, T_4.

३ आहार° C., D.

वधः" इति हन्तेरब्वधादेशश्च ॥ तत्काङ्क्षिणः सन्तः तमसो घनो मूर्त्तिः काठिनत्वं संघात इति यावत् ॥ "मूर्त्तौ घनः" इति निपातः ॥ तत्प्रख्यं तत्सन्निभं गाढान्धकारं गुहायाः द्वारं द्रुतं प्राविशन् ॥

तस्मिन्नन्तर्घने[1] पश्यन्प्रघणे[2] सौधसद्मनः ।
लौहोद्घनघनस्कन्धा ललितापघनां स्त्रियम् ॥ ६३ ॥

६३. तस्मिन्निति ॥ तस्मिन्बिले अन्तर्हन्यते गम्यते इत्यन्तर्घनोऽन्तर्घणो वा । बाह्लिकेषु देश इति काशिका । अत्राभ्यन्तरावकाशमात्रं लक्ष्यते ॥ "अन्तर्घनो देशे" इति हन्तेरप्प्रत्ययो घनादेशश्च । तस्मिन्नन्तर्घनेऽवकाशे सौधस्य सद्मनः प्रघणेऽलिन्दे । 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठकः' इत्यमरः । "अगारैकदेशे प्रघणः प्रघाणश्च" इति प्रपूर्वाद्धन्तेरप्प्रत्ययान्तो निपातः । उद्धन्यतेऽस्मिन्नित्युद्घनो हन्यमानस्य तप्तायःपिण्डादेराधारभूतोऽत्याधानाख्यो लोहकूटः ॥ "उद्घनोऽत्याधानम्" इति हन्तेरुत्पूर्वादप्प्रत्ययान्तो निपातः ॥ लौहोद्घनवद्घनाः निबिडाः स्कन्धाः येषां ते वानराः ललितापघनां कोमलाङ्गाम् ॥ "अपघनोऽङ्गम्" इत्यपपूर्वाद्धन्तेरप्प्रत्ययान्तो निपातः ॥ स्त्रियमपश्यत् ॥

द्रुघणोद्भिन्नकल्पाग्रास्तरसा[3] तरुसंहतीः ।
अभ्याध्यपृच्छन्कुर्वाणास्तां तेऽयोघनमुष्टयः ॥ ६४ ॥

६४. द्रुघणेति ॥ अयो हन्यते एभिरित्ययोघनाः लोहघण्टास्त इव मुष्टयो येषां ते । तद्वन्निबिडमुष्टय इत्यर्थः । अत एव तरसा तरुसंहतीः द्रुर्द्रुमो हन्यतेऽनेनेति द्रुघणः कुठारादिः ॥ "करणेऽयोविद्रुषु" इत्युभयत्रापि करणार्थे हन्तेरप्प्रत्ययो घनादेशश्च ॥ अरिहणादिपाठात् "पूर्वपदात्संज्ञायामगः" इति वा द्रुघण इति णत्वम् । तेनोद्भिन्नकल्पानि तत्प्रायाण्यग्राणि यासां ताः कुर्वाणास्ते वानरास्तां स्त्रियम् ।

---

१ °न्तर्घणे N., C., D., E3.
२ प्रघाणे N., C., B.
प्रघाने c., E2.
३ The verse 64 in found only in T., G., Com.

व्याधेरभावोऽव्याधि अनामयमित्यर्थः। अर्थाभावेऽव्ययीभावः। अपृच्छन् कुशलमपृच्छन्नित्यर्थः॥

सा स्तम्बघ्नपदन्यासान् विघनेन्दुसमद्युतिः।
परिघोरु[1]भुजानाह हसन्ती स्वागतं[2] कपीन्॥ ६५॥

६५. सेति॥ विहन्यते तमस्तेजोऽन्तरं वानेनेति विघनः। पूर्ववत् "करणेऽयोविद्रुषु" इत्यप्। तेनेन्दुना समद्युतिः सा स्त्री स्तम्बाः गुल्माः हन्यन्त एभिरिति स्तम्बघ्नाः। 'अप्रकाण्डे स्तम्बगुल्मौ' इत्यमरः॥ "स्तम्बे क च" इति स्तम्बोपपदाद्धन्तेः करणे कप्रत्ययः॥ "गमहन—" इत्यादिना उपधालोपः॥ ते पदन्यासा येषां तान्। परिहन्यतेऽनेनेति परिघोऽर्गला॥ "परौ घः" इत्यप्प्रत्ययो घादेशश्च॥ तद्वदुरवो भुजाः येषां तान् कपीन् हसन्ती स्वागतमाह। स्मितपूर्वं स्वागतमपृच्छदित्यर्थः॥

पिप्रायाद्रिगुहोपघ्नानुद्घान् सङ्घ[3]समागतान्।
फलैर्नाना[4]रसैश्चित्रैः स्वादुशीतैश्च वारिभिः॥ ६६॥

६६. पिप्रायेति॥ अद्रिगुहोपघ्नान् तदाशयान् स्वाश्रयं गतानित्यर्थः॥ "उपघ्न आश्रये" इति हन्तेरप्प्रत्यये उपधालोपनिपातः। उद्घान् प्रशस्तान् सङ्घशो गणश आगतान्॥ "सङ्घोद्घौगणप्रशंसयोः" इति समुत्पूर्वाद्धन्तेरप्प्रत्यये घादेशनिपातः॥ कपीन् नानाविधैर्बहुविधैः चित्रैरद्भुतैः फलैः स्वादुशीतैः मधुरशिशिरैः वारिभिश्च पिप्राय सन्तर्पयामास। प्रीणातेर्लिटि वृद्ध्यायादेशौ॥

निघानिघतरुच्छन्ने तस्मिं[5]स्ते लब्धिमैः फलैः।
तृप्तास्तां भ्राजथुमतीं पप्रच्छुः कस्य पूरियम्॥ ६७॥

६७. निघेति॥ निघाः निमिताः समसंस्थानाः अनिघाः विपरीताः॥ "निघो निमितम्" इति निपूर्वाद्धन्तेरप्प्रत्यये घादेशनिपातः। तैरुभयै-

---

१ परिघाभभुजा° T3, T4.
२ सादरं noticed by c.
३ सङ्घश आगतान् T., G., Com.
४ नानाविधै° T., G., Com.
५ ते तास्मिन् D.

स्तरुभिश्छन्ने तस्मिन् बिले ते वानराः लब्धैर्मैर्लब्धैः । "ड्वितः क्त्रिः" इति क्त्रिः ॥ फलैस्तृप्ताः सन्तः भ्राजथुमतीं दीप्तिमतीम् ॥ "ट्वितोऽथुच्" इत्यथुच्प्रत्ययान्तः ॥ तां स्त्रियमियं कस्य पूरिति पप्रच्छुः ॥

रक्षणं[1] करोषि कस्मात्त्वं[2] यत्नेनाख्याय[3]तां शुभे ।
स्वप्ने निधिवदाभाति तव संदर्शनं हि नः ॥ ६८ ॥

६८. रक्षणमिति ॥ हे शुभे कस्मात्कारणात्त्वं यत्नेन रक्षणं रक्षणं करोषि ॥ "यजयाचयत—" इत्यादिना यतिरक्षिभ्यां भावे नङ्प्रत्ययः ॥ नोऽस्मभ्यमाख्याहि । तव संदर्शनं नोऽस्माकं स्वप्ने स्वप्नावस्थायाम् ॥ "स्वपो नन्" इति नन् ॥ निधिवत् निधिरिव ॥ "उपसर्गे घोः किः" ॥ आभाति प्रतिभाति ॥

ततो जलधिगम्भीरान्वानरान्प्रत्युवाच सा ।
इयं दानवराजस्य पूः सृष्टि[4]र्विश्वकर्मणः ॥ ६९ ॥

६९. तत इति ॥ ततः प्रश्नानन्तरं सा स्त्री जलानि धीयन्तेऽस्मिन्निति जलधिः समुद्रः ॥ "कर्मण्यधिकरणे च" इति घोः किः ॥ तद्वद्गम्भीरान् वानरान्प्रत्युवाच । किमिति । इयं दानवराजस्य दानवेन्द्रस्य पूः पुरी विश्वकर्मणः । कृद्योगात्कर्त्तरि षष्ठी ॥ सृज्यत इति सृष्टिः । तेन सृष्टेत्यर्थः । कर्मणि "स्त्रियां क्तिन्" इति क्तिन् ॥

निहतश्च स्थितिं भिन्दन् दानवोऽसौ बलद्विषा[5] ।
दुहिता मेरुसावर्णेरहं नाम्ना स्वयंप्रभा ॥ ७० ॥

७०. निहत इति ॥ असौ दानवः स्थितिं मर्यादाम् ॥ "स्थागापापचो भावे" इत्यङपवादेन क्तिन् ॥ "द्यतिस्यतिमास्थामित्ति किति" इती-

१ रक्षं B.
२ कस्माद्वा T3, T4.
३ °नाख्याहि नः शुभे D., T3, T4, Com.
४ सृष्टिः पूर्विश्व° D., E2.
५ बलिद्रुहा T., G., Com. बलिद्विषा B. बलद्रुहा T3.

त्वम् ॥ भिन्दन्नुत्सादयन् बलिद्रुहा बलिध्वंसिना दैत्यारिणा निहतश्च । अहं मेरुसावर्णेर्नाम तस्य दानवेन्द्रस्य दुहिता नाम्ना स्वयंप्रभा ॥

जूतिमिच्छथ चेत्तूर्णं कीर्त्तिं वा पातुमात्मनः ।
करोमि वो बहिर्यूतीन् पिधद्ध्वं पाणिभिर्दृशः[१] ॥ ७१ ॥

७१. जूतिमिति ॥ तूर्णं जूतिं बहिर्गतिं तदा आत्मनो मम कीर्त्तिं युष्मत्त्राणजनितं यशः पातुं वा त्रातुं चेत्यर्थः ॥ 'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः । इच्छथ चेत् । वो युष्मान् बहिर्गुहाबहिर्देशे यूतिर्मिश्रणं मेलनं येषां तान् बहिर्यूतीन् करोमि । युष्मानभ्रष्टयूथान् बहिः स्थापयिष्यामीत्यर्थः ॥ "ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च" इति निपातनात् जूतियूत्योर्जवतेर्यौतेश्च दीर्घनिपातः कीर्त्तयतेः कीर्त्तिः । पाणिभिर्दृशः पिधद्ध्वं छादयत । अपिपूर्वाद्धाञो लोटि तङि ध्वमि "दधस्तथोश्च" इत्यभ्यासस्य भष्भावे "श्नाभ्यस्तयोरातः" इत्याकारलोपः । 'वष्टि भागुरिरल्लोपम्' इत्यपेरल्लोपः ॥

व्रज्यावती निरुद्धाक्षान् विद्येवानुष्ठितक्रियान् ।
निरचिक्रमदिच्छातो वानरांश्चङ्क्रमावतः ॥ ७२ ॥

७२. व्रज्येति ॥ व्रज्यावती प्रशस्तगतिमती ॥ "व्रजयजोर्भावे क्यप्" इति क्यप् ॥ ततः प्रशंसायां मतुप् । ततो ङीप् । सा स्त्री विद्येव काचिन्मन्त्रविद्येव ॥ "संज्ञायां समज—" इत्यादिना विदेः क्यप् ॥ निरुद्धाक्षान् पाणिपिहितदृष्टीन् अनुष्ठितक्रियान् कृतोचितव्यापारान् ॥ "कृञः श च" इति स्त्रियां शप्रत्यये रिङादेशः ॥ चङ्क्रमावतः कुटिलगतिमतः ॥ "नित्यं कौटिल्ये गतौ" इति क्रमेर्यङन्तात् "अ प्रत्ययात्" इति स्त्रियामकारप्रत्यये टाप् । ततो मतुपि शस् । वानरानिच्छातस्तादिच्छानुसारतः ॥ "इच्छा" इतीषेः शप्रत्यये यगभावो निपातितः ॥ निरचिक्रमत् निष्क्रामितवती । क्रमेर्णौ चङि "सन्यतः" इत्यभ्यासस्येत्वम् । तस्यालघुत्वान्न दीर्घः ॥

१ पाणिभिर्दृशम् E3.

निष्क्रम्य शिक्षया तस्याश्चपावन्तो रसातलात् ।
ज्ञात्वा मासमतिक्रान्तं व्यथामवललम्बिरे ॥ ७३ ॥

७३. निष्क्रम्येति ॥ तस्याः स्त्रियाः शिक्षयोपदेशेन ॥ "गुरोश्च हलः" इत्यप्रत्यये टाप् ॥ रसातलाद्बिलान्निष्क्रम्यात एव स्त्रीशरणागमात् त्रपावन्तः । त्रपूषित्वात् "षिद्भिदादिभ्योऽङ्" इत्यङ् । ततो मतुप् । काले स्वामिकृतं मासकालमतिक्रान्तं ज्ञात्वा व्यथां भयम् । व्यथ भयसंचलनयोः । भिदादित्वादङ् । अवललम्बिरे प्राप्ताः ॥

चिन्तावन्तः कथां चक्रुरुपधाभेदभीरवः ।
अकृत्वा नृपतेः कार्यं पूजां लप्स्यामहे कथम् ॥ ७४ ॥

७४. चिन्तावन्त इति ॥ उपधानमुपधा सम्यक् परीक्षा । 'उपधा सुपरीक्षापि' इति यादवः ॥ "आतश्चोपसर्गे" इत्यङ् ॥ तया तज्जन्या सिद्धिर्लक्ष्यते । तद्भेदात् तद्भङ्गाद्भीरवः अत एव चिन्तावन्तः इतिकर्तव्यतामूढाः किमपि ध्यायन्तः नृपतेः स्वामिनः कार्यमकृत्वा कथं पूजां संमानं लप्स्यामह इति कथाः संलापांश्चक्रुः । सर्वत्र "चिन्तिपूजिकथिकुम्बिचर्चश्च" इत्यङ् ॥

प्रायोपासनया शान्तिं मन्वानो वालिसंभवः ।
युक्त्वा योगं स्थितः शैले विवृण्वंश्चित्तवेदनाम् ॥ ७५ ॥

७५. प्रायेति ॥ वालिसंभवोऽङ्गदः प्रायोपासनया प्रायोपवेशनेन अनशनस्थित्येत्यर्थः । 'प्रायश्चानशने मृत्यौ' इति विश्वः । उपपूर्वादासेः "ण्यासश्रन्थो युच्" इति युच् । शान्तिं सर्वारिष्टनिवृत्तिं मन्वानो निश्चिन्वन् योगं चित्तनिरोधं युक्त्वा अवलम्ब्य चित्तवेदनां मनोव्यथाम् । "घट्टिवन्दिविदिभ्यो युज्वक्तव्यः" इति विदेर्युच् । विवृण्वन् प्रकाशयन् शैले स्थितः ॥

---

१ काल° T., G., Com.

प्रस्कन्दिकामिव प्राप्तो ध्यात्वा ब्रूते स्म जाम्बवान् ।
धिक् शालभञ्जिकाप्रख्यान् विषयान् कल्पनारुचीन् ॥ ७६ ॥

७६. प्रस्कन्दिकामिति ॥ अथ जाम्बवान् ध्यात्वा किं त्वं करिष्यसीति प्रश्नस्योत्तरमालोच्येत्यर्थः । प्रस्कन्दिकां प्रस्कन्दनरोगं प्राप्त इव तथा गद्गदः सन्नित्यर्थः ॥ "रोगाख्यायां ण्वुल् बहुलम्" इति स्कन्देः प्रपूर्वाद्रोगाख्यायां स्त्रियां ण्वुल् ॥ ब्रूते स्म । तदेवाह सार्धश्लोकेन धिगित्यादिना । सालभञ्जिकाः दारुदन्तवस्त्रादिनिर्मिताः क्रीडासाधनभूताः पुत्रिकाः । 'पाञ्चालिकादिवस्त्रादिपुत्रिका सालभञ्जिका' इति यादवः ॥ "संज्ञायाम्" इति ण्वुल् ॥ "नित्यं क्रीडाजीविकयोः" इति समासः ॥ तत्प्रख्यांस्तत्प्रायान् अपारमार्थिकानित्यर्थः । अत एव कल्पनातोऽभिमानतो रुचिरिच्छा येषु तान् स्वभावतः स्पृहणीयानित्यर्थः । विषयान् शब्दादीन् धिक् ॥

यां कारिं राजपुत्रोऽयमनुतिष्ठति तां क्रियाम् ।
अहमप्यनुतिष्ठामि सोऽप्युक्त्वैवमुपाविशत् ॥ ७७ ॥

७७. यामिति ॥ अयं राजपुत्रोऽङ्गदः यां कारिं क्रियामनुतिष्ठति ॥ "विभाषा ख्यानपरिप्रश्नयोरिञ्च" इति करोतेरिञ्प्रत्ययः । चकारात्तां क्रियामित्यत्र शप्रत्ययः । अहमप्यनुतिष्ठामीत्येवमुक्त्वा जाम्बवानप्युपाविशदुपविष्टः । प्रायोपवेशनं कृतवानित्यर्थः ॥

उवाच मारुतिर्वृद्धे सन्न्यासिन्यत्र वानरान् ।
अहं पर्यायसंप्राप्तां कुर्वे प्रायोपवेशिकाम् ॥ ७८ ॥

७८. उवाचेति ॥ अथ मारुतिर्हनुमान् अत्रास्मिन्पर्वते वृद्धे जाम्बवति संन्यासिनि सर्वसङ्गपरित्यागिनि सति अहं पर्यायसंप्राप्तामङ्गदजाम्बवदानन्तर्यप्राप्तां प्रायोपवेशिकां प्रायोपवेशनम् ॥ "पर्यायार्हणोत्पत्तिषु ण्वुच्" इति पर्यायार्थे ण्वुच् ॥ कुर्वे इति वानरानुवाच ॥

१ स T₃.
२ साल° T., G., Com.
३ वानरान् D.

अभावे भवतां योऽस्मिन् जीवेत्तस्यास्त्वजीवनिः।
इत्युक्त्वा सर्व एवास्थुर्बद्ध्वा योगासनानि ते ॥ ७९ ॥

७९. अभाव इति ॥ अस्मिन् शैले भवतामभावे मरणे सति यो जीवेत्तस्य अजीवनिरस्तु अजीवनमेवास्तु। धिक् तस्य जीवनमिति भावः ॥ "आक्रोशे नञ्यनिः" इत्याक्रोशे जीवेरनिप्रत्ययः ॥ इत्युक्त्वा ते सर्वे एव सर्वेऽपि योगासनानि स्वस्तिकपद्मकादीन्यासनानि बद्ध्वा अस्थुरनशने स्थिताः। तिष्ठतेर्लुङि "गातिस्था—" इत्यादिना सिचो लुक् ॥ "आतो लोप इटि च" इत्याकारलोपः ॥

अक्लेश्यमसिनाद्यन्तं[1] कबन्धवधमभ्यधुः।
धिङ् नः प्रपतनं घोरं क्लेदान्तत्वमनाथवत् ॥ ८० ॥

८०. अक्लेश्यमिति ॥ असिना खड्गेन कृतमिति शेषः। अत एवाक्लेश्यमक्लेशकरमाशुभावादिति भावः ॥ "कृत्यल्युटो बहुलम्" इति कर्त्तरि कृत्यः। किं चाद्यन्तमग्निसंस्कारान्तं तत्रापि रामहस्तकृतमिति भावः कबन्धवधमभ्यधुरभिहितवन्तः प्रशंसितवन्त इत्यर्थः। घोरं दारुणं नोऽस्माकं प्रपतनं शरीरपातं धिक्। अशस्त्रवधत्वादिति भावः। किं चानाथवदनाथानामिव क्लेदः पूतीभावः तदन्तत्वम्। अग्निसंस्काराभावादिति भावः ॥

ततो मन्दगतः[2] पक्षी तेषां प्रायोपवेशनम्।
अशनीयमिवाशंसुर्[3]महानायादशोभनः ॥ ८१ ॥

८१. तत इति ॥ ततस्तेषां प्रायोपवेशनानन्तरं मन्दगतो मन्दगमनः ॥ "नपुंसके भावे क्तः" इति क्तः ॥ महान्महाकायः न शोभत इत्यशोभनः अमङ्गलरूपः ॥ "कृत्यल्युटो बहुलम्" इति कर्त्तरि ल्युट् ॥ पक्षी संपातिर्नाम जटायोर्भ्राता गृध्रस्तेषां प्रायोपवेशनं मरणव्रतम्। भावे ल्युट्।

१ अक्लिश्य° T4.
२ मन्दगतिः B.
३ पयः पानमिवा° T., G., Com.

पयःपानं क्षीरपानमिव भक्ष्यलाभात्तद्वच्छरीरसुखकरमित्यर्थः ॥ "कर्मणि च येन संस्पर्शात्कर्त्तुः शरीरसुखम्" इति कर्मोपपदात्पिबते-र्भावे ल्युट् ॥ आशंसुरभिलाषुकः सन् ॥ "सनाशंसभिक्ष उः" इत्युः ॥ आयादायातः ॥

देहव्रश्चनतुण्डाग्रं तं विलोक्याशुभाकरम् ।
पापगोचरमात्मानमशोचन् वानरा मुहुः ॥ ८२ ॥

८२. देहेति ॥ वृश्च्यते भिद्यतेऽनेनेति व्रश्चनम् । "करणाधिकरण-योश्च" इति करणे ल्युट् ॥ देहस्य व्रश्चनं देहव्रश्चनम् ॥ "कृद्योगादि-षष्ठी समस्यते" इति समासः इध्मप्रव्रश्चनवत् । तादृक् तुण्डाग्रं यस्य तम् । अशुभाकरममङ्गलालयम् ॥ "पुंसि संज्ञायां घः प्रायेण" इति घः ॥ तं गृध्रं विलोक्य वानराः पापगोचरं पापाश्रयम् ॥ "गोचर-संचर—" इत्यादिना घप्रत्ययान्तो निपातः ॥ आत्मानं मुहुरशोचन् ॥

जटायुः पुण्यकृत्पक्षी दण्डकारण्यसंचरः ।
कृत्वा राघवकार्यं यः स्वरारूढोऽग्निसंस्कृतः ॥ ८३ ॥

८३. जटायुरिति ॥ संचरत्यस्मिन्निति संचरः संचारस्थानम् ॥ "गोच-रसंचर—" इत्यादिना अधिकरणार्थे घान्तो निपातः ॥ दण्डकारण्य-मेव संचरोऽस्येति सः जटायुर्नाम पक्षी गृध्रः पुण्यकृत् पुण्यं कृतवान् ॥ "सुकर्म—" इत्यादिना भूते क्विप् ॥ तथाहि यः जटायुः राघवकार्यं रामप्रयोजनं कृत्वा अग्निसंस्कृतो रामेण कृताग्निसंस्कारः सन् स्वः स्वर्गमारूढः ॥

नरकस्यावतारोऽयं प्रत्यक्षोऽस्माकमागतः ।
अचेष्टा यदिहान्यायादनेनात्स्यामहे वयम् ॥ ८४ ॥

८४. स्वयं तु पापकृदित्याहुः नरकस्येति ॥ अस्माकमयं प्रत्यक्षो नरकस्य रौरवादेरवतारोऽवतरणमार्गः ॥ "अवे तॄस्त्रोर्घञ्" इति करणे घञ् ॥

१ पापे गोच° T4. | २ नितरां मुहुः T2.

आगतः प्राप्तः यद्यस्माद्विहाद्रौ अचेष्टाः निश्चेष्टाः वयमन्यायादकारणात् ॥ "अध्यायन्याय—" इत्यादिना निपूर्वादिणः करणे घञन्तो निपातः ॥ अनेनात्स्यामहे भक्षिष्यामहे । अतो दुर्मरणहेतुत्वादस्माकमयं प्रत्यक्षं नरकद्वारमित्यर्थः । अदेः कर्मणि लृटि तङ् ॥

हृदयोदङ्कसंस्थानं कृतान्तानायसंनिभम् ।
शरीराखनतुण्डाग्रं प्राप्यामुं शर्म दुर्लभम् ॥ ८५ ॥

८५. हृदयेति ॥ हृदयस्य उदच्यते उद्ध्रियतेऽनेनेत्युदङ्क उद्धरणी ॥ "उदङ्कोऽनुदके" इत्युत्पूर्वादञ्चतेः करणे घञन्तो निपातः ॥ तस्येव संस्थानं संनिवेशो यस्य तं हृदयोद्धारकोदङ्कवद्वयङ्करमित्यर्थः ॥ कृतान्तस्यान्तकस्य आनीयते आकृष्यतेऽनेनेत्यानायो जालं जलजन्तुबन्धनम् । 'आनायः पुंसि जालं स्यात्' इत्यमरः ॥ "जालमानायः" इत्याङ्पूर्वान्नयतेः करणे घञन्तो निपातः ॥ तत्संनिभं तत्सदृशं तद्वत्प्राणाकर्षकमित्यर्थः । शरीरस्य आखन्यतेऽनेनेत्याखनं विदारणं क्रकचादिकम् ॥ "खनो घ च" इत्याङ्पूर्वात्खनतेः करणे घप्रत्ययः ॥ तदिव तुण्डाग्रं चञ्चुकोटिर्यस्य तममुं गृध्रं प्राप्य शर्म सुखं दुर्लभं जीवनं नास्तीत्यर्थः ॥ "न सुदुर्भ्यां केवलाभ्याम्" इति निषेधात् "उपसर्गात्खल्घञोः" इति नुम्न भवति । अत्रामुमिति पुल्लिङ्गनिर्देशात्तुण्डाग्रधर्मं उदङ्कादिसाम्यमवयवतद्वतोरभेदोपचारात्पक्षिगतत्वेनोक्त इत्यनुसन्धेयम् ॥

ईषदाढ्यङ्करोऽप्येष न परत्रा[1]शुभक्रियः ।
अस्मानत्तुमितो[2]ऽभ्येति परिग्लानो बुभुक्षया ॥ ८६ ॥

८६. ईषदिति ॥ किं च एष वानरगणः परत्राप्यकृच्छ्रेण सुखेनानाढ्यः आढ्यः कृतो विधात्रा ईषदाढ्यङ्करो न । इह तावदास्तां दैवेन परत्रापि सुखभाक् न कृत इत्यर्थः ॥ "कर्तृकर्मणोश्च भूकृञोः" इति करोतेः कर्मणीषदादौ चोपपदे खल्प्रत्ययः ॥ तथाहि अशुभक्रियः

[1] परत्र शुभक्रियः T_3, T_4.
[2] °मिहाभ्येति E_2, E_3.

पापकर्मा बुभुक्षया भोक्तुमिच्छया क्षुधा । भुजेः सन्नन्तात्स्त्रियामप्रत्यये टाप् । परिम्लायतीति परिम्लानः परिक्षीणः । बहुलग्रहणात्कर्त्तरि ल्युट् । निष्ठायां वा "संयोगादेरातो धातोर्यण्वतः" इति नत्वम् । एष पक्षीत्यनुवर्त्तते । अस्मानत्तुं भक्षयितुमितोऽभ्येतीत आगच्छति । दुर्मरणदोषात्परलोकोऽपि नास्माकमस्तीत्यर्थः ॥

इति कृदधिकारः ॥

संप्राप्य वानरान् पक्षी जगाद मधुरं वचः ।
के यूयं दुरुपस्थाने मनसाप्यद्रिमूर्धनि[1] ॥ ८७ ॥

८७. संप्राप्येति ॥ अथ पक्षी वानरान्संप्राप्य मधुरं वचो जगाद । तदेवाह । मनसापि दुरुपस्थाने दुष्प्रापे गिरिमूर्धनि पर्वताग्रे यूयं के किमर्थमागताः किमिदमिह क्रियत इति शेषः ॥

आत्मनः परिदेवध्वे कुर्वन्तो रामसंकथाम्[2] ।
समानोदर्यमस्माकं जटायुं[3] च स्तुथादरात् ॥ ८८ ॥

८८. अथ पुनः प्रकीर्णकाधिकारः । आत्मन इति ॥ यूयं के रामसंकथाः रामसंबन्धिनीः कथाः कुर्वन्तः आत्मनः ॥ "न संयोगाद्वमन्तात्" इति निषेधाच्छसि नाल्लोपः ॥ परिदेवध्वे शोचथ । देवृ देवने । भौवादिकाल्लटि ध्वमि टेरेत्वम् । किंचास्माकं समानोदरे शयितं समानोदर्यमेकोदरभ्रातरम् ॥ "समानोदरे शयित ओ चोदात्तः" इति यत्प्रत्ययः ॥ "विभाषोदरे" इति समानस्य विकल्पेन सभावाभावः । जटायुमादरात्स्तुथ च प्रशंसथ च । स्तौतेर्लटि थे शपो लुक् ॥

शङ्काधवित्रवचनं[4] प्रत्यूचुर्वानराः खगम् ।
वयं शत्रुलवित्रेषोर्दूता रामस्य भूपतेः ॥ ८९ ॥

---

१ मनसा नगमूर्धनि T2, T3, T4. मनसा गिरिमूर्धनि T., G., Com.
२ °संकथाः T., G., Com.
३ जटायुं च कथं स्तुथ E2. जटायुं प्रस्तुथादरात् D.
४ वचनमित्यूचुर्वा° T2.

८९. शङ्केति ॥ धानराः धूयतेऽनेनेति धवित्रं विधूननम् । "अर्त्तिलूधू-सूखनसहचर इत्रः" इति करणे धुनातेरित्रप्रत्ययः ॥ शङ्काधवित्रं हिंस्रत्वशङ्कानिराकरणं वचनं यस्य तं विश्वसनीयमित्यर्थः । खगं पक्षिणं वयं शत्रूणां लूयन्ते एभिरिति लवित्राश्छेदकाः । पूर्ववदित्रप्रत्ययः । त इषवो यस्य तस्य रामस्य भूपतेः स्वामिनो दूता इति प्रत्यूचुः ॥

केनापि दौष्कुलेयेन कुल्यां माहाकुलीं[1] प्रियाम् ।
हृतां माहाकुलीनस्य[2] तस्य लिप्सामहे वयम् ॥ ९० ॥

९०. के यूयमित्यत्रोत्तरमुक्त्वा किमर्थमागता इत्यत्रोत्तरमाह केनापीति ॥ केनापि दौष्कुलेयेन दुष्कुलापत्येन ॥ "दुष्कुलाड्ढक्" इति ढक् ॥ हृतां कुल्याम् । अर्हार्थे साध्वर्थे वा यत् । माहाकुलीं महाकुलापत्यं महाकुलीनस्य महाकुलापत्यस्य ॥ "महाकुलादञ्खञौ" इति क्रमादञ्खञौ ॥ तस्य रामस्य प्रियां सीतां वयं लिप्सामहे लब्धुमिच्छामः । लभेः सन्नन्ताल्लटि "सनि मीमा—" इत्यादिना इसादेशे "पूर्ववत् सनः" इति तङ् ॥

त्रिंशत्तममहर्यातं[3] मत्वा प्रत्यागमावधिम् ।
अकृतार्था विषीदन्तः परलोकमुपास्महे ॥ ९१ ॥

९१. अथ किमिदानीमिह क्रियत इत्यत्रोत्तरमाचक्षते त्रिंशत्तममिति ॥ प्रत्यागमस्य प्रत्यागमनस्यावधिमवधीकृतं त्रिंशतोऽह्नां पूरणं त्रिंशत्तमम् ॥ "तस्य पूरणे डट्" इति डट् ॥ "विंशत्यादिभ्यस्तमडन्यतरस्याम्" इति डटस्तमडागमः ॥ अहर्दिनमतीतमतिक्रान्तं मत्वा ज्ञात्वा । अत्राहोतीतमिति सन्धिश्चिन्त्यः । "रोऽसुपि" इति रेफादेशे अहरतीतमिति भाव्यमिति । अकृतार्थाः मासात्प्रागेवाकृतप्रयोजनाः अत एव विषीदन्तो भग्नोत्साहाः सन्तः । 'विषादश्चेतसो भङ्ग उपायाभावनाशनैः' इति लक्षणात् । परलोकमुपास्महे उपसीदामः ॥

---

[1] महाकुलीं B.
[2] महाकु° B., c., T., G., Com.
[3] अहोऽतीतं T_3, T., G., Com. अहो यातं T_4.

म्रियामहे न गच्छामः कौशल्यायनिवल्लभाम् ।
उपलम्भ्यामपश्यन्तः कौमारीं पततां वर ॥ ९२ ॥

९२. म्रियामह इति ॥ हे पततां पक्षिणां वर । अनूढपूर्वायाः स्त्रियाः वोढा कौमारः तस्य स्त्री कौमारी ॥ "कौमारापूर्ववचने" इति पाणिग्रहणापूर्वत्वेऽण्प्रत्ययान्तनिपाते ङीप् ॥ तां कौमारीं कोसलानां राजा कोसलस्तस्यापत्यं कौसल्यायनिरुत्तरकोसलेश्वरापत्यं दाशरथी रामः ॥ "कौसल्यकार्मार्याभ्यां च" इति परमप्रकृतेः कोसलशब्दादपत्यार्थे फिञ्प्रत्ययः । तत्सन्नियोगात्कोसलशब्दस्य कौसल्यभावनिपातः । अत एव भाष्यवार्त्तिकयोरपि "कोसलकर्मार—" इत्यादिना मूलप्रकृतेरेव प्रत्ययो दर्शितः । कौसल्याया अपत्यमित्यस्मिन्नर्थे फिञिति जयमङ्गलादयस्तदसत् । तदा स्त्रीभ्यो ढकि कौसलेय इति स्यादित्यास्तां तत् । तस्य वल्लभां दयितामुपलम्भ्यां प्रशस्ततया सर्वथा द्रष्टव्यामित्यर्थः ॥ "उपात्प्रशंसायाम्" इति लभेर्यकारादिप्रत्ययविषये नुमागमः ॥ अत एव प्रत्ययात्पूर्वे नुमि सत्यदुपधत्वाभावाद्यतो प्राप्तौ "ऋहलोर्ण्यत्" इतिण्यत् । यण्णतोः स्वरे विशेषः । अपश्यन्तोऽनुपलभमानाः । हेतौ शतृप्रत्ययः । म्रियामहे न गच्छामः । सामीप्ये लट् ॥

इति प्रकीर्णकाः ॥

अथातिदेशिकङिदधिकारः ।

जगाद वानरान् पक्षी नाध्यगीढ्वं ध्रुवं स्मृतीः
यूयं संकुटितुं यस्मात् कालेऽस्मिन्नध्यवस्यथ ॥ ९३ ॥

९३. जगादेति ॥ पक्षी संपातिर्वानरान् जगाद । किमिति यूयं ध्रुवं स्मृतीः धर्मशास्त्राणि नाध्यगीढ्वं नाधीतवन्तः । इणो लुङि "विभाषा लुङ्लृङोः" इति गाङादेशः "गाङ्कुट—" इत्यादिना सिचो ङित्वे

१ स्मृतिम् N.

"घुमास्था—" इत्यादिना ईकारः॥ "धि च" इति सिचसलोपः॥ "इणः षीध्वं—" इत्यादिना मूर्धन्यादेशः॥ यस्मादस्मिन्काले व्यापारकाले संकुटितुमवसत्तुम्। कुट कौटिल्ये॥ "गाङ्कुट—" इत्यादिना ङित्त्वान्न गुणः॥ अध्यवस्यथ यतध्वे। स्यतेर्लेटि थप्रत्ययः॥

नायमुद्विजितुं कालः स्वामिकार्याद्भवादृशाम्[1]।
हृतभार्ये च्युते राज्याद्रामे पर्युत्सुके भृशम्॥ ९४॥

९४. नेति॥ रामे स्वरूपत एवोपास्य इत्यर्थः राज्याच्च्युते राज्यभ्रष्टे एकाकिनीत्यर्थः तत्रापि हृतभार्ये अत एव भृशं पर्युत्सुके विरहदुःखिते सति भवादृशां प्रतीकारसमर्थानां स्वामिकार्यादुद्विजितुम्। ओविजी भयचलनयोः॥ "विज इट्" इतीटो ङित्त्वान्नोपधागुणः॥ अयं कालो न। निर्गुणं चापि भर्तारमापत्सु न परित्यजेदिति धर्मशासनादित्यर्थः किं पुनरीदृशं गुणाढ्यमिति भावः॥

यत्नं प्रोर्णवितुं[2] तूर्णं दिशं कुरुत दक्षिणाम्।
प्रोर्णुवित्रीं[3] दिवस्तत्र पुरीं[4] द्रक्ष्यथ काञ्चनीम्॥ ९५॥

९५. यत्नमिति॥ किं तु दाक्षिणां दिशं प्रोर्णुवितुमाच्छादयितुम्॥ "विभाषोर्णोः" इतीटो ङित्त्वपक्षे गुणप्रतिषेधादुवङादेशः। तूर्णं यत्नं कुरुत कुरुध्वम्॥ "सार्वधातुकमपित्" इति ङित्त्वाद्विकरणस्य गुणाभावः॥ धातोर्गुणे सति "अत उत्सार्वधातुके" इत्युकारः॥ तत्र दक्षिणस्यां दिशि दिवोऽन्तरिक्षस्य। कर्मणि षष्ठी। प्रोर्णवित्रीं स्वकान्त्याच्छादयित्रीम्। ऊर्णोतेस्तृचि ङीप्। इटो ङित्त्वाभावपक्षे गुणावादेशौ। काञ्चनस्य विकारं काञ्चनीं हिरण्मयीम्॥ "प्राणिरजतादिभ्योऽञ्" इत्यञ्॥ पुरं पुरीं द्रक्ष्यथ॥

१ प्रभु° E_3.
२ प्रोर्णुवितुं C., D., E_2, E_3, T., G., Com.
३ प्रोर्णवित्रीं T., G., Com., B.
४ पुरं Com.

अथ किदधिकारः।

लङ्कां नाम्ना गिरेर्मूर्ध्नि राक्षसेन्द्रेण पालिताम्।
निर्जित्य शक्रमानीता ददृशुर्यां सुरस्त्रियः ॥ ९६ ॥

९६. लङ्केति ॥ सा पुरी नाम्ना लङ्केति प्रसिद्धिरुक्ता। गिरेस्त्रिकूटाद्रेर्मूर्ध्नि इति दुर्गत्वमुक्तम्। किं च राक्षसेन्द्रेण पालितेति स्वामिबलमुक्तम्। यां पुरीं शक्रं निर्जित्यानीता आहृताः सुरस्त्रियो ददृशुः शक्रपुरीं विस्मृत्याद्राक्षुरित्यर्थः। दृशेर्लिटि "असंयोगाल्लिट् कित्" इति कित्त्वाद्गुणाभावः ॥

बभूव याधिशैलेन्द्रं मृदित्वेवेन्द्रगोचरम्।
कुषित्वा जगतां सारं सैका शङ्के कृता भुवि ॥ ९७ ॥

९७. बभूवेति ॥ या पुरी अधिशैलेन्द्रं त्रिकूटाद्रौ। विभक्त्यर्थेऽव्ययीभावः। इन्द्रगोचरमिन्द्रालयममरावतीं मृदित्वा निष्पेष्य कृतेव बभूवेत्युत्प्रेक्षा ॥ "इन्धिभवतिभ्यां च" इति लिटः कित्त्वान्न गुणः। अथवा जगतां सारं कुषित्वोत्कृष्योद्धृत्येत्यर्थः सा एका भुवि कृता निर्मिता शङ्के इत्यपरोत्प्रेक्षा। इवशङ्के शब्दावुत्प्रेक्षायाम् ॥ "मृडमृदगुधकुषक्लिशवदवसः क्त्वा" इति क्त्वः कित्त्वान्न मृदिकुष्योर्गुणः ॥

अमृडित्वा सहस्राक्षं क्लिशित्वा कौशले निजे।
उदित्वालं चिरं यत्नात् सैका धात्रा विनिर्मिता ॥ ९८ ॥

९८. अमृडित्वेति ॥ सहस्राक्षममृडित्वा असुखयित्वा तन्नगरादुत्कृष्टनिर्माणेन तस्य दुःखमुत्पाद्येत्यर्थः। मृड सुखन इति धातोः क्त्वाप्रत्यये नञ्समासः। 'अनञ्पूर्वे' इति निषेधान्न क्त्वो ल्यबादेशः। निजे स्वकीये कौशले च विषये चिरं क्लिशित्वा परिश्रम्य चिरमभ्यस्येत्यर्थः। अलमुदित्वोक्त्वा एवं करिष्यामीत्युद्घोष्येत्यर्थः यत्नात् सा

१ लङ्का T., G., Com.
२ नाम T3.
३ पालिता T., G., Com.
४ °मानीतां T4.
५ °न्द्रगोपुरम् B.
६ कृषित्वा D.
७ सैषा T2, T3.
८ कौशलैर्निजैः N., D.

पुरी एका अद्वितीया धात्रा विनिर्मिता । उत्प्रेक्षा । व्यञ्जकाप्रयोगात् गम्या ॥ "मृडमृद्—" इत्यादिना सर्वत्र क्त्वः कित्त्वान्न गुणः ॥

मुषित्वा धनदं पापो यां गृहीत्वावसद्द्विषन् ।
तां रुदित्वेव शक्रेण यात लङ्कामुपेक्षिताम् ॥ ९९ ॥

९९. मुषित्वेति ॥ पापः क्रूरः । 'नृशंसो घातुकः क्रूरः पापः' इत्यमरः। द्विषन्नमित्रो रावणः ॥ "द्विषोऽमित्रे" इति शतृप्रत्ययः । यां लङ्कां धनदं कुबेरं मुषित्वा चोरयित्वा गृहीत्वादाय । 'जिद्ण्डिकृषिकृञ्जु-ण्डिनीह्न्मुषिवहिग्रहाम् । द्विकर्मसु पचादीनां चोपसंख्यानमिष्यते' इति मुषिग्रह्योर्द्विकर्मकत्वम् । अवसत् यस्यामवसदित्यर्थः । 'देश-कालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति वसेः सकर्मकत्वम् । पूर्वं लङ्का कौबेरी रावणेनाच्छिद्य गृहीतेति कथात्रानुसंधेया । अथ शक्रे-णापि रुदित्वा शोचित्वेवोपेक्षितामसाध्यतयावधीरितां लङ्कां यात गच्छत ॥ सर्वत्र "रुदविद—" इत्यादिना क्त्वः कित्त्वान्न गुणः ॥

विदित्वा शक्तिमात्मीयां रावणं विजिघृक्षवः ।
उक्तं पिपृच्छिषूणां वो मा स्म भूत सुषुप्सवः ॥ १०० ॥

१००. विदित्वेति ॥ आत्मीयां शक्तिं विदित्वा रावणं विजिघृक्षवः विग्रहीतुं विरोद्धुमिच्छवो यूयं स्वप्तुमिच्छवः सुषुप्सवः प्रमत्ताः मा स्म भूत किं तु जागरूकाः स्तेत्यर्थः ॥ "स्मोत्तरे लङ् च" इति चका-राल्लुङ् ॥ पिपृच्छिषूणां प्रष्टुमिच्छूनां जिज्ञासूनामित्यर्थः ॥ "किरश्च पञ्चभ्यः" इति प्रच्छेः सनीडागमः । वो युष्माकमुक्तमुपदिष्टम् । 'नापृष्टः कस्य चिद्ब्रूयात्' इति भावः । अत्रापि "रुदविद—" इत्या-दिना क्त्वासनोः कित्त्वाद्विदादीनां गुणाभावः प्रच्छेः स्वपेश्च संप्र-सारणम् ॥

नाविविदिषुमभ्येति सम्पद्रुरुदिषुं नरम् ।
किं मुमुषिषुवद्यात द्विषो नापचिकीर्षया ॥ १०१ ॥

१ द्विषत् T_3.
२ अभ्येति नाविविदिषुं T., G., Com.
३ न द्विषोऽपचि° D. द्विषो नोऽपचि° T_2.

१०१. अभ्येतीति ॥ अविविदिषुं कार्याकार्यमजिज्ञासुमविवेकिनमित्यर्थः । रुरुदिषुं रोदितुमिच्छुमनुद्योगिनमित्यर्थः । ईदृशं नरं पुरुषं संपल्लक्ष्मीर्नाभ्येति नोपैति । 'निवसन्ति पराक्रमाश्रयानविषादेन समं समृद्धयः' इति भावः । मोषितुमिच्छुर्मुमुषिषुः स्तेनस्तद्वत्तथा रन्ध्रान्वेषिणः सन्त इत्यर्थः । द्विषः शत्रोरपचिकीर्षया अपकर्त्तुमिच्छया ॥ "इको झल्" इति सनः किंत्वान्न गुणः ॥ "अज्झनगमां सनि" इति दीर्घः । अन्यत्र पूर्ववत् "रुदविद—" इत्यादिना सनः किंत्वादगुणः ॥ किं न यात न गच्छत शीघ्रं गच्छतेत्यर्थः । विधौ लोट् ॥

बुभुत्सवो द्रुतं[1] सीतां भुत्सीध्वं प्रब्रवीमि वः ।
मा च[2] भुद्ध्वं मृषोक्तं[3] नः कृषीढ्वं स्वामिने[4] हितम् ॥ १०२ ॥

१०२. बुभुत्सव इति ॥ ध्रुवं सत्यं सीतां बुभुत्सवो बोद्धुमिच्छवस्ते इत्यर्थः ॥ "हलन्ताच्च" इति बुधः सनः किंत्वान्न लघूपधगुणः ॥ "एकाचो बशः—" इत्यादिना भष्भावः ॥ "खरि च" इति धकारस्य चर्त्वम् ॥ भुत्सीध्वं जानीध्वमन्विष्य पश्यतेत्यर्थः । आशीरर्थो न विवक्षितः ॥ "लिङ्सिचावात्मनेपदेषु" इति लिङः किंत्वान्न गुणः ॥ "लिङः सीयुट्" इति सीयुट् ॥ यलोपः । शेषं पूर्ववत् । वो युष्मभ्यं प्रब्रवीमि हितमुपदिशामीत्यर्थः । नोऽस्माकमुक्तमुक्तिं मृषानृतं मा स्म भुद्ध्वं न जानीध्वमित्यर्थः ॥ "स्मोत्तरे लङ् च" इति चकाराल्लुङ् । "लिङ्सिचौ—" इत्यादिना सिचः किंत्वान्न लघूपधगुणः ॥ "धि च" इति सलोपः ॥ भष्भावश्च । स्वामिने रामाय हितम् । हितयोगे चतुर्थी । कृषीढ्वं कुरुध्वमित्यर्थः । अत्राप्याशीरर्थो न विवक्षितः ॥ "उश्च" इति लिङः किंत्वान्न गुणः ॥ "लिङः सीयुट्" इति सीयुट् ॥ "इणः षीध्वम्—" इत्यादिना मूर्धन्यादेशः ॥

---

१ ध्रुवं T., G., Com.
२ मावभुद्ध्वं T3.
३ स्म T., G., Com., T2.
४ स्वामिनो D., T2, c., B.

समगध्वं पुरः शत्रोर्मोदयध्वं रघूत्तमम् ।
नोपायध्वं भयं सीतां नोपायंस्त दशाननः ॥ १०३ ॥

१०३. समगध्वमिति ॥ शत्रोः पुरः समगध्वं संगस्यध्वे संगताः स्थास्यध्व इत्याशास्महे इत्यर्थः ॥ "समो गम्यृच्छि—" इत्यादिना संपूर्वाद्गमेरकर्मकाल्लुङि तङ् ॥ "आशंसायां भूतवच्च" इति भविष्यदर्थे भूतवत्प्रत्ययः ॥ "वा गमः" इति सिचः कित्त्वात् "अनुदात्तोपदेश—" इत्यादिना अनुनासिकलोपः ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥ रघूत्तमं रामं मोदयध्वं सीतान्वेषणेनानन्दयत । मुद हर्षे । ण्यन्ताल्लोटि "णिचश्च" इति तङ् । सुबोधिनीकारस्तु मोदाहध्वमिति पाठं दृष्ट्वा किदधिकारलोभात्तथैव व्याचष्ट । रघूत्तमं मोदाहध्वं प्रायोपवेशनेन सीतावार्त्तालोडनाद्रामं मा वधिष्ट । उदाङ्पूर्वाद्धन्तेर्लुङि "आङो यमहनः" इति तङि ध्वमि "हनः सिच्" इति सिचः कित्त्वादनुनासिकलोपे "ह्रस्वादङ्गात्" इति सलोपः । 'आहध्वं मा रघूत्तमम्' इति क्वचित्पाठः । अत्राकर्मकाधिकारस्य भट्टिकविनानुमतत्वात् सकर्मकत्वे न तङित्यन्ये तु साहसभीरवोऽधिकारभ्रंशेऽपि पूर्वपाठमेवाश्रिता इत्यास्तां तत् । भयं मोपायध्वं धातूनामनेकार्थत्वान्मा गन्धयतेत्यर्थः । गन्धनं सूचनमाविष्करणमिति यावत् ॥ "आङो यमहनः" इत्याङ्पूर्वाद्यमेर्लुङि सकर्मकत्वादात्मनेपदं चिन्त्यम् ॥ "यमो गन्धने" इति सिचः कित्त्वादनुनासिकलोपे सलोपः । तथा दशाननः सीतां मोपायंस्त न स्वीकरोतु तस्य दौरात्म्यादिति भावः ॥ "उपाद्यमः स्वकरणे" इति उपपूर्वाद्यमेरात्मनेपदम् ॥ "विभाषोपयमने" इति सिचः पक्षे कित्त्वाभावान्नानुनासिकलोपो नापि सलोपः ॥ उभयत्रापि "न माङ्योगे" इत्यडभावः ॥

ततः मास्थिषताद्रीन्द्रं महेन्द्रं वानरा द्रुतम् ।
सर्वे किलकिलायन्तो धैर्यं चाधिषताधिकम् ॥ १०४ ॥

---

१ मादयध्वं T_3.
२ रघूत्तमौ E_2.
३ मोपायध्वं T_2, T_3, T., G., Com.
४ मोपायंस्त T., G., Com.
५ किलिकिला T_2, T_3, T_4.

१०४. तत इति ॥ ततः संपातिवाक्यश्रवणानन्तरं सर्वे वानराः किलकिलायन्तः किलकिलशब्दं कुर्वाणाः ॥ "अव्यक्तानुकरणात्—" इत्यादिना डाचि "लोहितादिडाज्भ्यः क्यष्" इति क्यषि "वा क्यषः" इति पक्षे परस्मैपदम् । महेन्द्रं महेन्द्राख्यमद्रीन्द्रं प्रति द्रुतं प्रास्थिषत प्रस्थिताः ॥ "समवप्रविभ्यः स्थः" इति तिष्ठतेर्लुङि तङ् ॥ अधिकं धैर्यं चाधिषत दधिरे ॥ "स्थाघ्वोरिच्च" इत्युभयत्रेत्वं सिचः कित्त्वं च तस्मान्न गुणः ॥

निकुञ्जे तस्य वर्त्तित्वा रम्ये प्रक्ष्वेदिताः परम् ।
मणिरत्नाधिशयितं प्रत्युदैक्षन्त तोयधिम् ॥ १०५ ॥

१०५. निकुञ्ज इति ॥ रम्ये तस्य गिरेर्निकुञ्जे गृहकल्पे तरुषण्डे । 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। वर्त्तित्वा स्थित्वा विहृत्येत्यर्थः॥ "न क्त्वा सेट्" इति कित्त्वप्रतिषेधाद्गुणः ॥ परमत्यन्तं प्रक्ष्वेदिताः कृतसिंहनादाः । क्ष्विदः कर्त्तरि क्तः ॥ "निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः" इति निष्ठायां कित्त्वप्रतिषेधाद्गुणः ॥ मणीनां पद्मरागादीनां रत्नानां स्वजातिश्रेष्ठवस्तूनां च । 'रत्नं स्वजातिश्रेष्ठे च' इत्यमरः । अधिशेरतेऽत्रेत्यधिशयनमधिष्ठानम् ॥ "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति शेतेर्ध्रौव्यार्थादकर्मकापराख्यादधिकरणे क्तः ॥ "निष्ठा शीङ्—" इत्यादिना कित्त्वप्रतिषेधाद्गुणः॥ तोयधिं समुद्रं प्रत्युदैक्षन्त कियानयं कीदृशो वेति समन्तादवैक्षन्तेत्यर्थः ॥

अमर्षितमिव घ्नन्तं तटाद्रीन् सलिलोर्मिभिः ।
श्रिया समग्रं[1] द्युतितं[2] मदेनेव प्रलोठितम्[3] ॥ १०६ ॥

१०६. अथैनं चतुर्भिर्विशिनष्टि अमर्षितमित्यादिभिः ॥ सलिलानामूर्मिभिस्तटाद्रीन् तटस्थान्पर्वतान् घ्नन्तं ताडयन्तमत एवामर्षितं कुपितमिव स्थितमित्युत्प्रेक्षा । मृषेः कर्त्तरि क्तः ॥ "मृषस्तितिक्षायाम्" इति

१ क्रिया E2.
२ समग्रद्युतितं T2, T., G., Com.
३ प्रलोटितम् D.

कित्त्वप्रतिषेधाद्गुणः॥ ततो नञ्समासः। श्रिया रत्नादिसम्पदा समग्रं द्युतितं द्योतनं यस्य तं समग्रद्युतितमित्यर्थः। द्युतेर्भावे क्तः॥ "उदुपधाद्भावादिकर्मणोरन्यतरस्याम्" इति पक्षे कित्त्वाद्गुणाभावः॥ मदेनेवेति हेतूत्प्रेक्षा। प्रलोठितं प्रघूर्णितम्। लुठेः आदिकर्मणि क्तः॥ "उदुपधात्—" इत्यादिना कित्त्वाभावपक्षे गुणः॥

पूतं शीतैर्नभस्वद्भिः ग्रन्थित्वेव स्थितं रुचः।
गुम्फित्वेव[1] निरस्यन्तं तरङ्गान् सर्वतो मुहुः॥ १०७॥

१०७. पूतमिति॥ पुनः शीतैः शीतलैर्नभस्वद्भिर्वायुभिः। हेतौ कर्त्तरि वा तृतीया। पूतं पवित्रं हृद्यमित्यर्थः। पूङः कर्त्तरि कर्मणि वा क्तः॥ "पूङश्च" इति विकल्पादिडभावे "पूङः क्त्वा च" इति सेटोरेव क्त्वानिष्ठयोः कित्त्वनिषेधादनिटोः कित्त्वान्न गुणः। पुनः रुचो दीप्तीः ग्रन्थित्वा सन्दर्भ्येव स्थितं तेजःस्रजामिव स्थितमित्युत्प्रेक्षा। पुनस्तरङ्गान् गुम्फित्वेव एकत्र क्रोडीकृत्येव मुहुः सर्वतो निरस्यन्तं क्षिपन्तम्। ग्रन्थिगुम्फ्योर्नकारोपधयोः "नोपधात्थफान्ताद्वा" इति विकल्पात्कित्त्वाभावपक्षे "अनिदिताम्—" इत्यादिना नोपधानकारलोपः॥

वञ्चित्वाप्यम्बरं दूरं स्वस्मिंस्तिष्ठन्तमात्मनि।
तृषित्वेवानिशं[2] स्वादु पिबन्तं सरितां पयः॥ १०८॥

१०८. वञ्चित्वेति॥ पुनः अम्बरमाकाशं दूरं यथा तथा वञ्चित्वापि लङ्घित्वापि॥ "वञ्चिलुञ्च्यृतश्च" इति वञ्चेः क्त्वायाः कित्त्वप्रतिषेधान्नोपधानकारलोपः॥ स्वस्मिन्नात्मनि पुनः स्वरूपे तिष्ठन्तम्। निरन्तरं पतनोत्पतने कुर्वन्तमित्यर्थः। पुनः तृषित्वा पिपासित्वेवेत्युत्प्रेक्षा॥ "तृषिमृषिकृशेः काश्यपस्य" इति क्त्वः पक्षे कित्त्वान्न लघूपधगुणः। स्वादुं मधुरं सरितां गङ्गादीनां पयो जलमनिशं पिबन्तं स्वयं लवणोदत्वादिति भावः॥

द्युतित्वा शशिना नक्तं रश्मिभिः परिवर्धितम्।
मेरोर्जेतुमिवाभोगमुच्चैर्दिद्योतिषुं मुहुः॥ १०९॥

---

१ गुपित्वेव T2. | २ कृशित्वे° E2.

१०९. द्युतित्वेति ॥ शशिना कर्त्रा नक्तं द्युतित्वा द्योतित्वा अत एव रश्मिभिः किरणैः परिवर्धितं पुनः मेरोराभोगं विस्तारमौन्नत्यमित्यर्थः जेतुमतिशयितुमिवेति फलोत्प्रेक्षा । मुहुरुच्चैरूर्ध्वं दिद्योतिषुं द्योतितुं वर्धितुमिच्छुमित्यर्थः । द्युतः सन्नन्तादुप्रत्ययः । तस्योदुपधत्वात् ॥ "रलो व्युपधाद्धलादेः संश्च" इति क्त्वासनोः सेटोः पक्षे कित्वाद् द्युतित्वेत्यत्र न लघूपधगुणः दिद्योतिषुमित्यत्र गुणः ॥

विलोक्य सलिलोच्चयानधिसमुद्रमभ्रंलिहान्
भ्रमन्मकरभीषणं समधिगम्य चाधः पयः ।
गमागमसहं द्रुतं कपिवृषाः परिप्रैषयन्
गजेन्द्रगुरुविक्रमं तरुमृगोत्तमं मारुतिम् ॥ ११० ॥

११०. विलोक्येति ॥ कपिवृषाः कपिपुङ्गवाः अधिसमुद्रं समुद्रे । विभक्त्यर्थेऽव्ययीभावः । अभ्रं लिहन्तीत्यभ्रंलिहानभ्रङ्कषान् ॥ "वहाभ्रे लिहः" इति खशि मुमागमः ॥ सलिलोच्चयान् जलोच्छ्रायान् ॥ "एरच्" इत्येरच् ॥ तथा भ्रमद्भिर्मकरैर्भीषणं भयङ्करम् । नन्द्यादित्वाल्ल्युः । उच्चैरुन्नम्रं पयश्च विलोक्य गजेन्द्रः ऐरावणः तद्वद्गुरुविक्रममप्रतिहतगतिमत एव तरुमृगेषु कपिषूत्तमं श्रेष्ठं मारुतिं हनूमन्तं गमागमयोर्गमनागमनयोः सहं क्षमम् । पचाद्यच् । समधिगम्य निश्चित्य द्रुतं परिप्रैषयन् प्रेषितवन्तः । इषु गतौ । ण्यन्ताल्लङ् ॥ पृथ्वीवृत्तम् । 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात् ॥

इति भट्टिकाव्येऽधिकारकाण्डे सीतान्वेषणो नाम
सप्तमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल
मल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने
सर्वपथीनाख्याने सप्तमः सर्गः ॥

---

१ चाधः° D.
चोचैः° T., G., Com.

२ द्विजेन्द्र T2, T3, T4.

॥ श्रीः ॥

अथाष्टमः सर्गः ।

अगाधत ततो व्योम हनूमानुरुविग्रहः ।
अत्यशेरत तद्वेगं न सुपर्णार्कमारुताः ॥ १ ॥

१. अगाहतेति ॥ ततः कपिवराभ्यनुज्ञानन्तरमुरुविग्रहोऽब्धिलङ्घनोचितमहाकायो हनूमान् व्योमाकाशमगाहत प्राविशत् । तस्य हनूमतो वेगं सुपर्णार्कमारुताः नात्यशेरत तेऽप्येनमतिशयितुं न शेकुरित्यर्थः । गाहेः शीङश्च लङि क्रमात् "अनुदात्तङित आत्मनेपदम्" ॥ "शीङो रुट्" इति रुडागमः ॥

अभायत यथार्केण सुप्रातेन शरन्मुखे ।
गम्यमानं न तेनासीदगतं क्रामता पुरः ॥ २ ॥

२. अभायतेति ॥ तेन हनूमता शरन्मुखे शरदारम्भे शोभनं प्रातर्यस्य तेन सुप्रातेन निर्मेघोदयेनार्केण यथार्केणेवाभायत अदीप्यत । कुतः । यत्पुरः क्रामता आक्रामता तेन गम्यमानमगतं गन्तव्यं च नासीत् । गतिवेगेन सर्वं गतमेव भवतीत्यर्थः । भातेर्गमेश्च क्रमात् "भावकर्मणोः" इत्यात्मनेपदम् ॥ अगतस्यैकदागतत्वासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिभेदोऽलङ्कारः ॥

वियति व्यत्यतन्वातां मूर्त्ती हरिपयोनिधी ।
व्यत्यैतां चोत्तमं मार्गमर्केन्द्रेन्दुनिषेवितम् ॥ ३ ॥

३. वियतीति ॥ हरिपयोनिधी हनूमत्सागरौ वियत्याकाशे मूर्त्ती शरीरे व्यत्यतन्वातां मिथो मत्सराद्व्यतिहारेणावर्धयतामित्यर्थः । तनोतेर्लङि "कर्त्तरि कर्मव्यतिहारे" इति तङ् । परस्परकरणं कर्म-

१ अगाहत T., G., Com.
२ विक्रमः B.
३ शरण्मुखे C.

व्यतिहारः । किं चोत्तममत्युन्नतमर्केन्द्रेन्दुभिर्निषेवितं मार्गं तत्संचारपथं व्यत्यैतामन्योन्यमत्यक्रामताम् । इणो गत्यर्थात्कर्मव्यतिहारे लङि तसस्तामादेशः ॥ "न गतिहिंसार्थेभ्यः" इति निषेधान्न तङ् ॥

व्यतिजिग्ये समुद्रोऽपि न धैर्यं तस्य गच्छतः ।
अगच्छच्चास्य न गतं प्रचण्डोऽपि प्रभञ्जनः ॥ ४ ॥

४. व्यतीति ॥ गच्छतस्तद्गतिप्रतिबन्धाय वर्धमानमात्मानं विजित्य लङ्घयतस्तस्य मारुतेः धैर्यमुत्साहं समुद्रोऽपि न व्यतिजिग्ये स्वजयिनं तं प्रतिजेतुं न शशाकेत्यर्थः ॥ "कर्त्तरि कर्मव्यतिहारे" इति जयतेर्लिटि तङ् ॥ किं च गच्छत आत्मानमतीत्य धावतस्तस्य गतं गतिं च प्रचण्डः प्रभञ्जनोऽपि चण्डमारुतोऽपि न व्यत्यगच्छत् न व्यतिचक्राम ॥ "न गतिहिंसार्थेभ्यः" इति प्रतिषेधात्कर्मव्यतिहारेऽपि न गमेरात्मनेपदम् ॥

व्यतिघ्नतीं व्यतिघ्नन्स[2] राक्षसीं पवनात्मजः ।
जघानाविश्य वदनं निर्यान् भित्त्वोदरं द्रुतम् ॥ ५ ॥

५. व्यतिघ्नतीमिति ॥ स पवनात्मजो हनूमान् व्यतिघ्नतीं घाते घातं कुर्वतीम् । व्यतिपूर्वाद्धन्तेः शतरि ङीप् । व्यतिशब्दः कर्मव्यतिहारद्योतनार्थः । राक्षसीं समुद्रादुत्थितां काञ्चन सिंहिकाख्यां नक्तंचरीं व्यतिघ्नन् स्वयमपि घाते घ्नन्नेव । पूर्ववद्धन्तेः शतृप्रत्ययः ॥ "उगिदचाम्—" इत्यादिना शतुर्नुमागमः ॥ "न गतिहिंसार्थेभ्यः" इति निषेधादुभयत्र कर्मव्यतिहारेऽपि नात्मनेपदम् ॥ वदनमाविश्य द्रुतमुदरं भित्त्वा निर्यान्निर्गच्छन् । यातेः शतृप्रत्ययः । जघान हतवान् ॥

अन्योन्यं स्म व्यतियुतः श[3]ब्दान् शब्दैस्तु भीषणान् ।
उदन्वांश्चानिलोद्धूतो म्रियमाणा च राक्षसी ॥ ६ ॥

---

१ व्यत्यगच्छन्न च N., T2, T4, T., G., Com.
अत्यागच्छच्च न गतं T3.
२ व्यतिघ्नंस्तां D.
व्यतिघ्नन्तं E2.
पथि घ्नन्तं B., E3, T1, N., C.
३ शब्दैः शब्दान्सुभीषणान् T2, T3, T4.
४ प्रेयुषी च निशाचरी T2, T3, T4, T., G., Com.

६. अन्योन्यमिति ॥ अनिलोद्धूतः उदकानि धीयन्तेऽस्मिन्नित्युदन्वान् उदधिश्च॥ "उदन्वानुदधौ च" इति दधात्यर्थे मतावुदन्नादेशनिपातः॥ प्रेयुषी प्रेता मृता सती ॥ "उपेयिवान्—" इत्यादिना क्वसन्तनिपातने ङीप्। निशाचरी राक्षसी चान्योन्यमन्योन्यस्येत्यर्थः ॥ "कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः समासवच्च बहुलम् । बहुलग्रहणाद्यदा न समासवत्ता तदा पूर्वपदस्य प्रथमैकवचनमुत्तरपदस्याम्भाव इति वक्तव्यम्"। विभीषणानतिभयङ्करान् । नन्द्यादित्वाल्ल्युः। शब्दान् घोषान् शब्दैर्घोषैः सह । अत्रापि विभीषणैरिति विभक्तिपरिणामेन योज्यम् । व्यतियुतः स्म मिश्रीकुरुतः स्म । यु मिश्रण इति धातोः "लट् स्मे" इति भूते लट् अत्रापि कर्मव्यतिहारे आत्मनेपदस्य "इतरेतरान्योऽन्योपपदाच्च"। इति प्रतिषेधः ॥

न्यविक्षत महाग्राहसङ्कुलं मकरालयम्।
सैका[1] बहूनां कुर्वाणा[2] नक्राणां स्वाशितम्भवम्[3] ॥ ७ ॥

७. न्यविक्षतेति ॥ एका सती बहूनां नक्राणां जलग्राहाणामाशिताः भुक्तवन्तः। आङ्पूर्वादश्नातेः कर्तरि क्तः । आशितानां भवनमाशितम्भवमाशितत्वम्॥ "आशिते भुवः करणभावयोः" इति खचि मुमागमः ॥ तं कुर्वाणा एकापि बहुभोजनपर्याप्तेति तस्याः कायाधिक्यमुक्तम्। सा राक्षसी । गृह्णन्तीति ग्राहाः जलचराः ॥ "विभाषा ग्रहः" इति ग्रहेर्जलचरे कर्तरि णप्रत्ययः॥ महद्भिस्तैः संकुलं मकरालयं समुद्रं न्यविक्षत प्राविक्षत्। विशेर्लुङि "नेर्विशः" इत्यात्मनेपदम् ॥ "शल इगुपधादनिटः क्सः" इति क्सः ॥

कृतेनोपकृतं वायोः[4] परिक्षीणानमुत्थितम्।
पित्रा संरक्षितं शक्रात्स मैनाकाद्रिमैक्षत ॥ ८ ॥

---

१ एका T4. E2, E3.
२ नक्राणां कुर्वाणा B.
३ नक्राणामाशि° C., T., G., Com.
४ साधोः T2.

८. कृतेनेति ॥ सः हनूमान् पित्रा स्वजनकेन वायुना शक्राद्गोत्रभिदः सकाशात्संरक्षितं पक्षच्छेदकाले वेगादादाय समुद्रे गुप्तमत एव वायोः कर्तुरुपकृतमुपकारं पूर्वोक्तं रक्षणरूपं कृतेन प्रत्युपकारेण विश्रामदानरूपेण। उभयत्र भावे क्तः। परिक्रीणानं विनिमिन्वन्तम्। उपकारस्य प्रत्युपकारं कुर्वाणमित्यर्थ ॥ "परिव्यवेभ्यः क्रियः" इति क्रीणातेरात्मनेपदम् ॥ शानच्। उत्थितं प्रत्युपकारार्थमेव समुद्रादुद्भूतं मैनाकाद्रिमैक्षताद्राक्षीत् ॥

खं पराजयमानोऽसावुन्नत्या पवनात्मजम्।
जगादाद्रिर्विजेषीष्ठा मयि विश्रम्य वैरिणम् ॥ ९ ॥

९. खमिति ॥ उन्नत्या निजौन्नत्येन खमाकाशं पराजयमानः परिभवन्नाच्छादयन्नित्यर्थः ॥ "विपराभ्यां जेः" इत्यात्मनेपदम् ॥ असावद्रिर्मैनाकः पवनात्मजं हनूमन्तं जगाद। किमिति। हे सौम्य मयि विश्रम्य श्रान्तिमपनीय वैरिणं रावणं विजेषीष्ठाः विजयस्व विजेतुं गच्छेत्यर्थः। विपूर्वाज्जयतेराशीर्लिङ्। पूर्ववत्तङ् ॥

फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु।
साध्वनुक्रीडमानानि[1] पश्य[2] वृन्दानि पक्षिणाम् ॥ १० ॥

१०. पुनरष्टभिस्तदेवाह फलानीत्यादिभिः ॥ हे सौम्य चित्राणि विविधानि फलान्यादत्स्व गृहाण। आङ्पूर्वाद्ददातेर्लोटि थासि "आङो दोऽनास्यविहरणे" इत्यात्मनेपदम्। सानुष्वनुक्रीडमानानां विहरतां पक्षिणां वृन्दानि पश्यन् साधु परिक्रीडस्व विहर ॥ "क्रीडोऽनुसंपरिभ्यश्च" इत्यात्मनेपदम् ॥

क्षणं भद्रावतिष्ठस्व ततः प्रस्थास्यसे[3] पुनः।
न तत्संस्थास्यते[4] कार्यं दक्षेणोरीकृतं त्वया ॥ ११ ॥

---

१ °क्रीडमानानां T., G., Com.
२ पश्यन् T., G., Com., T2.
३ प्रस्थास्यते T2.
४ च सं° D., E3.
न सं° T4, T., G., Com.

११. क्षणमिति ॥ हे भद्र मङ्गलमूर्त्ते क्षणमवतिष्ठस्व विश्राम्येत्यर्थः। ततो विश्रामानन्तरं पुनः प्रस्थास्यसे प्रयास्यसे। दक्षेण क्षिप्रकारिणा त्वया उरीकृतमङ्गीकृतं कार्यं सीतान्वेषणकृत्यं कर्तृ। न न संस्थास्यते न समाप्तं भविष्यतीति न किं तु भविष्यत्येवेत्यर्थः। 'संस्था व्यवस्था-प्रणिधिसमाप्त्याकारमृत्युषु' इति यादवः। एतावता दक्षस्य ते न कोऽपि कार्यप्रतिबन्ध इत्यर्थः। 'संभाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ' इति वामनः। संपूर्वात्तिष्ठतेः कर्त्तरि लृट्। सर्वत्र "समवप्रविभ्यः स्थः" इति तङ्"

त्वयि नस्तिष्ठते प्रीतिस्तुभ्यं तिष्ठामहे वयम्।
उत्तिष्ठमानं मित्रार्थे कस्त्वां न[1] बहु मन्यते ॥ १२ ॥

१२. त्वयीति ॥ हे प्राज्ञ नोऽस्माकं प्रीतिः प्रीतियुक्ता चित्तवृत्ति-स्त्वयि तिष्ठते सर्वकार्यसंशयेषु स्थेये निर्णेतरि त्वयि तिष्ठते त्वद्वाक्ये वर्त्तत इत्यर्थः। इति वयं तुभ्यं तिष्ठामहे स्वाभिप्रायं प्रकाशयामः ॥ "प्रकाशनस्थेयाख्ययोश्च" इति यथायोगमुभयत्रात्मनेपदम् ॥ किं च मित्रार्थे मित्रप्रयोजने उत्तिष्ठमानमुद्युञ्जानम् ॥ "उदोऽनूर्ध्वकर्मणि" इत्यात्मनेपदम् ॥ त्वां को न बहु मन्यते पितृवत्त्वमपि मित्रोपकारि-त्वात्तद्वदेव सर्वमान्य इत्यर्थः ॥

ये सूर्यमुपतिष्ठन्ते मन्त्रैः संध्यात्रयं द्विजाः।
रक्षोभिस्तापितास्तेऽपि सिद्धिं ध्यायन्ति तेऽधुना ॥ १३ ॥

१३. य इति ॥ ये द्विजाः संध्यात्रयं त्रिसंध्यम्। अत्यन्तसंयोगे द्वितीया। मन्त्रैः सूर्यमुपतिष्ठन्ते उपासते ॥ "उपान्मन्त्रकरणे" इत्यात्मनेपदम् ॥ रक्षोभिस्तापिताः उपद्रुतास्ते द्विजा अप्यधुना ते तव सिद्धिं रक्षो-विजयकार्यसिद्धिं ध्यायन्ति निरन्तरं चिन्तयन्ति ॥

अव्यग्रमुपतिष्ठस्व वीर[2] वायोरहं सुहृत्।
रविर्वितपतेऽत्यर्थमाश्वस्य[3] मयि गम्यताम् ॥ १४ ॥

---

१ बहु न B.
२ धीर C., E3.
३ °माश्रम्य C.
°र्थं विश्रम्य D., E3.

१४. अव्यग्रमिति ॥ हे वीर अव्यग्रमसहसा उपतिष्ठस्व संनिधत्स्व ॥ "अकर्मकाच्च" इत्युपतिष्ठतेरात्मनेपदम् ॥ अहं वायोः सुहृत् तवाहं पितृसख इत्यर्थः । रविरत्यर्थं वितपते तीव्रं प्रतपति ॥ "उद्विभ्यां तपः" इति विपूर्वात्तपतेरकर्मकादात्मनेपदम् ॥ मय्याश्वस्य विश्रम्य गम्यतामीषदातपं नीत्वा गच्छेत्यर्थः ॥

तीव्रमुत्तपमानोऽयमशक्यः सोढुमातपः ।
आघ्नान इव संदीप्तैरलातैः सर्वतो मुहुः ॥ १५ ॥

१५. तीव्रमिति ॥ संदीप्तैः प्रज्वलितैः सर्वतोमुखैर्विषूचीनैरलातैरुल्मुकै-राघ्नानस्ताडयन्निवेत्युत्प्रेक्षा ॥ "आङो यमहनः" इत्याङ्पूर्वाद्धन्तेरक-र्मकादात्मनेपदम् ॥ "गमहन—" इत्यादिना उपधालोपः ॥ "हो हन्तेः—" इत्यादिना कुत्वम् ॥ तीव्रं तीक्ष्णमुत्तपमानः प्रदीप्यमानः । पूर्ववत् "उद्विभ्याम्—" इत्यादिना आत्मनेपदम् ॥ अयमातपः सोढु-मशक्यः ॥

संशृणुष्व कपे मत्कैः संगच्छस्व वनैः शुभैः ।
समारन्त ममाभीष्टाः संकल्पास्त्वय्युपागते ॥ १६ ॥

१६. संशृणुष्वेति ॥ हे कपे संशृणुष्व आकर्णय ॥ "समो गम्यृच्छि—" इत्यादिना शृणोतेः संपूर्वादकर्मकादात्मनेपदम् ॥ कौमुद्यां तु समो गम्यृच्छिभ्यामिति पाठः । तदा तत्रत्यवार्त्तिकेनात्मनेपदम् । अहमेषां ग्रामणीः मत्कानि मत्स्वामिकानीत्यर्थः ॥ "स एषां ग्रामणीः" इति कन्प्रत्ययः ॥ "प्रत्ययोत्तरपदयोश्च" इत्यस्मदो मपर्यन्तस्यैकवचने मदादेशः ॥ तैः शुभैः वनैः संगच्छस्व तानि संगच्छ तेषु विहरेत्यर्थः । संपूर्वाद्गमेः पूर्ववत्तङ् । त्वय्युपागते सति ममाभीष्टाः प्रियाः संकल्पा मनोरथाः समारन्त सम्यगृताः सत्या बभूवुरित्यर्थः । संपूर्वादर्त्तेर्लुङि

१ °यं न शक्यः D.
२ °रालातैः D.
३ सर्वतोमुखैः T₂, T., G., Com.
४ बलैः B.
५ °य्युपासते T₄.

पूर्ववत्तङि "सर्त्तिशास्त्यर्त्तिभ्यश्च" इति च्लेरङादेशः। आद्वृद्धिश्च रपरा॥

के न संविद्रते वायोर्मैनाकाद्रिर्यथा सखा।
यत्नादुपह्वये[1] प्रीतः संह्वयस्व विवक्षितम्॥ १७॥

१७. क इति॥ हे कपे यथा मैनाकाद्रिर्वायोः सखा तथा के न संविद्रते न विदन्ति। तत्सर्वेऽपि विदन्तीत्यर्थः। पूर्ववत्संपूर्वाद्विदेरकर्मकात्तङ्। शपो लुकि झेरदादेशः॥ "वेत्तेर्विभाषा" इति रुडागमः॥ अतः प्रीतो यत्नादुपह्वये त्वामाह्वयामि। अकर्मकादिति निवृत्तम्। सामान्येन विधानम्। विवक्षितमभिप्रेतं संह्वयस्व कथयेत्यर्थः॥ "निसमुपविभ्यो ह्वः" इति ह्वयतेस्तङ्॥

द्यामिवाह्वयमानं तमवोचद्भूधरं कपिः।
उपकुर्वन्तमत्यर्थं प्रकुर्वाणोऽनुजीविवत्॥ १८॥

१८. द्यामिति॥ कपिर्हनूमान् द्यामाकाशमाह्वयमानं महत्त्वेन सस्पर्धमाकारयन्तामिव। तादृङ्माहिमानमित्यर्थः। अत्यर्थमुपकुर्वन्तं विश्रामदानेनाद्रियमाणं तं भूधरं मैनाकमनुजीविवत् भृत्यवत् प्रकुर्वाणः सेवमानस्तथाजुनयन्नित्यर्थः॥ "गन्धनावक्षेपण—" इत्यादिना कृञः सेवने तङ्॥ अवोचत्॥

कुलभार्यां प्रकुर्वाणमहं द्रष्टुं दशाननम्।
यामि त्वरावान् शैलेन्द्र मा कस्यचिदुपस्कृथाः॥ १९॥

१९. कुलेति॥ हे शैलेन्द्र अहं कुलभार्यां कुलाङ्गनां प्रकुर्वाणं सहसा संगृह्णानम्॥ "गन्धनाव—" इत्यादिना साहसिक्ये आत्मनेपदम्॥ दशाननं द्रष्टुं त्वरावान् द्रुततरो यामि गच्छामि। कस्यचिन्मोपस्कृथाः अध्वश्रमार्थं न किंचित्खाद्यपेयादिकमुपस्कर्त्तव्यमित्यर्थः। कस्यचिदित्यत्र "कृञः प्रतियत्ने" इति कर्मणि षष्ठी। सतो गुणान्तराधानं

---

[1] °दुपाह्वये N., C., E2.

प्रतियत्नः। कृथा इति करोतेर्लुङि "गन्धन—" इत्यादिना प्रतियत्ने तङि थासि "ह्रस्वादङ्गात्" इति सलोपः॥ "उपात्प्रतियत्न—" इत्यादिना सुडागमः॥ "न माङ्योगे" इत्यडभावः॥

योऽपचक्रे[1] वनात्सीतामधिचक्रे न यं हरिः।
विकुर्वाणः[3] स्वरानद्य बलं तस्य निहन्म्यहम्॥ २०॥

२०. य इति॥ यो रावणो वनात्सीतामपचक्रे अवक्षिप्तवान् भर्त्सितवान् अवक्षिप्य जहारेत्यर्थः। अन्यथा वनादित्यपादाननिर्देशायोगात्॥ "गन्धन—" इत्यादिनैव अवक्षेपणे तङ्॥ यं रावणं हरिरिन्द्रोऽपि नाधिचक्रे न प्रसेहे नाभिबभूव अभिभवितुं नाशकदित्यर्थः॥ "अधेः प्रसहने" इत्यात्मनेपदम्॥ 'प्रसहनमभिभवः' इति काशिका। अद्याहं स्वरान् विकुर्वाणो विविधं शब्दान् कुर्वाणः क्ष्वेडमान इति यावत्॥ "वेः शब्दकर्मणः" इत्यात्मनेपदम्॥ तस्य रावणस्य बलं निहन्मि संहरिष्यामीत्यर्थः। "जासिनिप्रहण—" इत्यादिना शेषे कर्मणि षष्ठीविधानादशेषे कर्मणि द्वितीया॥

विकुर्वे नगरे तस्य पापस्याद्य[4] रघुद्विषः।
विनेष्ये वा प्रियान् प्राणानुदानेष्येऽथवा यशः॥ २१॥

२१. विकुर्वे इति॥ अद्य रघुद्विषो रघुकुलद्रोहिणः अत एव पापस्य पापकर्मणः तस्य रावणस्य नगरे विकुर्वे विविधं चेष्टिष्ये। यथेष्टं पराक्रमिष्यामीत्यर्थः। विपूर्वात्करोतेः "अकर्मकाच्च" इति तङ्। अथवा प्रियान् प्राणान्विनेष्ये सम्मानयिष्यामि॥ "संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" इति विपूर्वान्नयतेः संमानने तङ्॥ स्वाम्यर्थे प्राणानां क्लेशनं संमानने पर्यवस्यति। अथवा यश उदानेष्ये उत्संजयिष्यामि शत्रुविजयेन कीर्त्तिमुच्चैः करिष्यामीत्यर्थः। तेनैवोत्संजने तङ्॥

---

१ योऽवचक्रे E_3.
२ बलात्सी° E_2, B.
३ विकुर्वाणं D., E_3.
४ पापस्यास्य T_3.

विनेष्ये क्रोधमथवा क्रममाणोऽरिसंसदि ।
इत्युक्त्वा खे पराक्रंस्त तूर्णं सूनुर्नभस्वतः ॥ २२ ॥

२२. विनेष्य इति ॥ किं बहुना अधुनेदानीमेव अरिसंसदि शत्रुसमाजे क्रममाणोऽप्रतिबन्धं विजृम्भमाणः ॥ "वृत्तिसर्गतायनेषु क्रमः" इति वृत्तावप्रतिबन्धे तङ् ॥ क्रोधं विनेष्ये ॥ "कर्त्तृस्थे चाशरीरे कर्मणि" इति नयतेस्तङ् ॥ क्रोधः कर्त्तृस्थं कर्म । शरीरं तदेकदेशो वा न भवतीतिभावः । इत्युक्त्वा नभस्वतः सूनुर्वायुनन्दनस्तूर्णं खेऽन्तरिक्षे पराक्रंस्त अप्रतिबन्धेनोत्साहेन वा जगामेत्यर्थः ॥ "उपपराभ्याम्" इति परापूर्वात्क्रमेर्वृत्तौ सर्गे वा तङ् । वृत्तिरप्रतिबन्धः सर्ग उत्साहः ॥

परीक्षितुमुपाक्रंस्त राक्षसी तस्य विक्रमम् ।
दिवमाक्रममाणेव केतुतारा भयंप्रदा ॥ २३ ॥

२३. परीक्षितुमिति ॥ दिवमाकाशं प्रत्याक्रममाणा उद्गच्छन्ती ॥ "आङ उद्गमने" इति क्रमेराङ्पूर्वादात्मनेपदम् ॥ अत एव केत्वाख्या तारा ज्योतिः केतुतारा औत्पातिको धूमकेतुरिव भयप्रदा भीषणा ॥ "प्रे दाज्ञः" इति कः ॥ राक्षसी सुरसा नाम नागमाता देवप्रेरिता काचिन्नागलोकनिवासिनी तस्य हनूमतो विक्रमं पौरुषं परीक्षितुमुपाक्रंस्त उत्सेहे उद्युक्तेत्यर्थः । पूर्ववत् "उपपराभ्याम्" इति क्रमेर्लुङि तङि सिचि "स्नुक्रमोरनात्मनेपदनिमित्ते" इति निषेधान्नेडागमः ॥

जले विक्रममाणाया हनूमान् शतयोजनम् ।
आस्यं प्रविश्य निरगादणूभूयाप्रचेतितः ॥ २४ ॥

२४. जल इति ॥ अथ हनूमान् जले जलस्योपरीत्यर्थः ॥ विक्रममाणायाः पादाभ्यां विहरन्त्याः गतिविशेषान्कुर्वत्या इत्यर्थः ॥ "वेः पाद-

---

१ °मधुना T2, T3, T4, Com.
The 2nd half not found in T3.

२ सूनुस्तूर्णं D.

३ भयङ्करा D., T2, T4.
The 1st half not found in T3.

४ °याप्रचोदितः D., T3.
°याप्रचेतितम् T2.

विहरणे" इति विपूर्वात्क्रमेः पादविक्षेपार्थादपि धातूनामनेकार्थत्वादात्मनेपदम् ॥ तस्याः राक्षस्याः शतं योजनानि प्रमाणमस्य शतयोजनम् ॥ "प्रमाणे लः" । "द्विगोर्नित्यम्" इति प्रमाणतद्धितस्य मात्रचो लुक् । आस्यं प्रविश्य अणूभूयातिसूक्ष्मो भूत्वा अत एवाप्रचेतितोऽप्रज्ञातः सन्निरगान्निर्गतः ॥

द्रष्टुं प्रक्रममाणोऽसौ सीतामम्भोनिधेस्तटम् ।
उपाक्रंस्ताकुलं घोरैः क्रममाणैर्निशाचरैः ॥ २५ ॥

२५. द्रष्टुमिति ॥ सीतां द्रष्टुं प्रक्रममाणः आरभमाणोऽसौ हनूमान् घोरैर्भयङ्करैः क्रममाणैरितस्ततः संचरद्भिः ॥ "अनुपसर्गाद्वा" इत्यात्मनेपदम् ॥ निशाचरैराकुलं संकीर्णमम्भोनिधेस्तटमुपाक्रंस्त क्रमितुमारब्धवान् ॥ "प्रोपाभ्यां समर्थाभ्याम्" इत्युभयत्राप्यात्मनेपदम् ॥

आत्मानमपजानानः शशमात्रोऽनयद्दिनम् ।
ज्ञास्ये रात्राविति प्राज्ञः प्रत्यज्ञासीत्क्रियापटुः ॥ २६ ॥

२६. आत्मानमिति ॥ प्राज्ञः प्रज्ञावान् क्रियापटुः कर्मदक्षः स हनूमानात्मानं स्वस्वरूपमपजानानोऽपह्नुवानः ॥ "अपह्नवे ज्ञः" इति जानातेरपोपसृष्टादपह्नवेऽर्थे आत्मनेपदम् ॥ शशमात्रः शशप्रमाणकः सन् ॥ "प्रमाणे—" इत्यादिना मात्रच् ॥ दिनं नयन् रात्रौ ज्ञास्ये भोत्स्ये अनुसंधास्यामीति ॥ "अकर्मकाच्च" इति तङ् ॥ प्रत्यज्ञासीत् आध्यातवान् चिन्तितवान् विचारितवानिति यावत् ॥ "संप्रतिभ्यामनाध्याने" इत्याध्याने निषेधान्न तङ् ॥

संजानानान् परिहरन् रावणानुचरान् बहून् ।
लङ्कां समाविशद्रात्रौ वदमानोऽरिदुर्गमाम् ॥ २७ ॥

---

१ प्रत्यज्ञास्त N., C., T1, E2.
२ क्रियापरः T2, T3, T4.
३ परिभवन् T4.
४ रावणार्थेच° T., G., Com. रावणार्थे चरान् T3. रावणाधिष्ठितान् T2.

२७. समिति ॥ संजानानान् स्वपरान् परामृशतः ॥ "संप्रतिभ्यामनाध्याने" इत्यात्मनेपदम् ॥ बहूननेकान् रावणस्य अर्थेषु कृत्येषु चरन्तीति तच्चरान्नगररक्षकानित्यर्थः परिहरन् दूरात्त्यजन् वदमानो वदितुं जानानः ॥ "भासन—" इत्यादिना ज्ञाने वदेरात्मनेपदम्॥ सोऽरिभिर्दुर्गमां दुरासदां लङ्कां रात्रौ समाविशत् प्रविष्टः ॥

किंचिन्नोपावदिष्टासौ केनचिन्नव्यवदिष्ट न।
शृण्वन्संप्रवदमानाद्रावणस्य गुणान् जनात् ॥ २८ ॥

२८. किंचिदिति ॥ असौ हनूमान् किंचिन्नोपावदिष्ट नोपसंभाषितवान्। उपसान्त्वनवादमपि केनचिन्नाकरोदित्यर्थः ॥ "भासन—" इत्यादिनैव उपसंभाषायामुपसान्त्वनापराख्यायामात्मनेपदम् ॥ केनचिन्न व्यवदिष्ट विवादं च नाकरोदित्यर्थः। तेनैव विमतौ तङ्। किं च रावणस्य गुणान् प्रवदमानान् संभूय कथयतः ॥ "व्यक्तवाचां समुच्चारणे" इत्यात्मनेपदम् ॥ अभिवदनव्यवहारसमर्था मनुष्यादयो व्यक्तवाचः। जनान् संशृण्वन् सम्यगाकर्णयन्नित्यर्थः। 'शङ्खः श्रूयते'। 'भेरी श्रूयते' इतिवत्प्रयोगः। सकर्मकत्वात् "समोगम्यृच्छि—" इत्यादिना संश्रूयतेर्न तङ्। प्रविष्ट इति शेषः ॥

जल्पितोत्क्रुष्टसङ्गीतप्रनृत्तस्मितवल्गितैः।
घोषस्यान्ववदिष्टेव लङ्का पूतक्रतोः पुरः ॥ २९ ॥

२९. जल्पितेति ॥ लङ्का लङ्कापुरी जल्पितैर्व्याहारैरुत्क्रुष्टैरुच्चैःक्रोशनैराह्वानैः संगीतैः सम्यग्गानैः प्रनृत्तैर्नर्त्तनैः स्मितैर्लक्षणयाट्टहासैर्वल्गितैर्वल्गनैश्चैवंरूपैः प्रजाकलकलैरित्यर्थः। सर्वत्र भावे क्तः। पूतक्रतोरिन्द्रस्य पुरोऽमरावत्याः संबन्धिनो घोषस्य प्रजाकलकलस्य। संबन्धसामान्ये षष्ठी। अन्ववदिष्टेव अनुचकारेव। इन्द्रनगरे यादृशी

१ कंचिन्नो° N., E2, E3.
२ संशृण्वन्प्रवदमानात्रावणस्य गुणान् जनान् T., G., Com.
संशृण्वन्वदमानांस्तान् रावणस्य गुणान् जनान् T2, T3, T4.
३ जल्पिताक्रुष्ट D.
४ स्मयजृम्भितैः T4.

प्रजासमृद्धिस्तादृशी लङ्कायामित्यर्थः । अनुपूर्वाद्वदतेर्लुङ् ॥ "अनोरकर्मकात्" इति तङ् ॥

ऐद्विप्रवदमानैस्तां[1] संयुक्तां ब्रह्मराक्षसैः ।
तथावगिरमाणैश्च पिशाचैर्मांसशोणितम् ॥ ३० ॥

३०. तामिति ॥ विप्रवदमानैर्युगपत्परस्परविरुद्धं प्रलपद्भिः ॥ "विभाषा विप्रलापे" इत्यात्मनेपदम् ॥ ब्रह्मराक्षसैस्तथा मांसानि शोणितानि च मांसशोणितम् ॥ "जातिरप्राणिनाम्" इति द्वन्द्वैकवद्भावः ॥ अवगिरमाणैर्गिरद्भिः ॥ "अवाद्ग्रः" इति गिरतेस्तौदादिकादात्मनेपदम् ॥ पिशाचैश्च संयुक्तां तां लङ्कामैदगच्छत् । इणो लङि शपो लुक् । आड्वृद्धिः ॥

यथास्वं[2] संगिरन्ते स्म गोष्ठीषु[3] स्वामिनो गुणान् ।
पानशौण्डाः पथः क्षीबा वृन्दैरुदचरन्त च ॥ ३१ ॥

३१. यथार्थमिति ॥ किं च पूर्वोक्ताः राक्षसाः पिशाचाश्च पानशौण्डाः पानेन विख्याताः । मत्तार्थत्वे क्षीबशब्देन पौनरुक्त्यात् । 'शौण्डो मत्ते च विख्याते' इति विश्वः ॥ "सप्तमी शौण्डैः" इति समासः ॥ अत एव क्षीबा मत्ताः सन्तः । 'मत्ते शौण्डोत्कटक्षीबाः' इत्यमरः । क्षीबृ मदे इति धातोः कर्त्तरि क्तान्तः ॥ "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति निपातनात्तलोपः इडभावश्च ॥ गोष्ठीषु विद्यागोष्ठीषु पानगोष्ठीषु च स्वामिनो रावणस्य गुणान् यथार्थं यथा तथा संगिरन्ते स्म प्रतिजानते स्म । सर्वावस्थास्वपि न तत्र विप्रतिपद्यन्त इत्यर्थः ॥ "समः प्रतिज्ञाने" इति तङ् ॥ तथा वृन्दैः सङ्घशः पथः मार्गान् उदचरन्त च उल्लङ्घ्य चरन्ति स्म । उत्पथप्रवृत्ताः संचेरुरित्यर्थः ॥ "उदश्चरः सकर्मकात्" इति तङ् ॥

---

[1] तां विप्रवदमानैरैत् T., G., Com.
ऐत्तां विप्रवदमानैः D.
ऐद्विप्रवदमानैश्च T2, T3, T4.

[2] यथार्थं T., G., Com.
यथावत् T3.

[3] गोष्टीषु E3, D.

यानैः समचरन्तान्ये कुञ्जराश्वरथादिभिः[1] ।
संप्रायच्छन्त बन्दीभिरन्ये पुष्पफलं शुभम् ॥ ३२ ॥

३२. यानैरिति ॥ अन्ये कुञ्जराश्वरथमादिर्येषां तैः यानैर्वाहनैः समचरन्त संचरितवन्तः ॥ "समस्तृतीयायुक्तात्" इति संपूर्वाच्चरेस्तङ् ॥ अन्ये शुभं शोभनं पुष्पाणि च फलानि च पुष्पफलम् ॥ "जातिरप्राणिनाम्" इत्येकवद्भावः ॥ बन्दीभिः संप्रायच्छन्त बन्दीकृताभ्यः स्त्रीभ्यो ददुरित्यर्थः । दाण् दाने इति धातोः "पाघ्रा—" इत्यादिना यच्छादेशः । "अशिष्टव्यवहारे दाणः प्रयोगे तृतीया चतुर्थ्यर्थे भवति" इति वचनात् चतुर्थ्यर्थे तृतीया ॥ "दाणश्च सा चेच्चतुर्थ्यर्थे" इति तङ् ॥

कोपात्काश्चित्प्रियैः[2] प्रत्तमुपायंसत नासवम् ।
प्रेम जिज्ञासमानाभ्यस्ताभ्योऽशंप्सत[3] कामिनः ॥ ३३ ॥

३३. कोपादिति ॥ काश्चित्कान्ताः प्रियप्रत्तं प्रियदत्तम् ॥ "अच उपसर्गात्तः" इति दस्तकारः ॥ आसवं कोपादन्यासंगदोषान्नोपायंसत न स्वीचक्रुः ॥ "उपाद्यमः स्वकरणे" इति पाणिग्रहणे विधानेऽप्यत्र स्वीकरणमात्रे तङ्प्रयोगश्चिन्त्यः । किन्तु प्रेम स्वविषयानुरागं जिज्ञासमानाभ्यो ज्ञातुमिच्छतीभ्यः ॥ "ज्ञाश्रुस्मृदृशां सनः" इति जानातेः सन्नन्तादात्मनेपदम् ॥ ताभ्यः स्त्रीभ्यः ॥ "श्लाघह्नुङ्—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ कामिनः अशप्यन्त विश्वासार्थे शपथवाक्यानि प्रायुञ्जतेत्यर्थः । शपेर्दैवादिकात्स्वरितेत्त्वाल्लुङि तङ् ॥

प्रादिदृक्षत नो नृत्यं[4] नाशुश्रूषत[5] गायनान् ।
रामं सुस्मूर्षमाणोऽसौ कपिर्विरहदुःखितम्[6] ॥ ३४ ॥

---

१ कुञ्जरैश्च रथादिभिः T2, T4.
२ श्रियः प्रत्त° T4.
प्रियप्रत्त° T2, T3, T., G., Com.
३ °भ्योऽशंसन्त T2.
°भ्योऽशप्यन्त T., G., Com.
४ नृत्तं T2, T3, T4.
५ नोऽशु° T2, T4.
६ °दुःखितः T2.

३४. प्रेति ॥ विरहदुःखितं रामं सुस्मूर्षमाणः स्मर्त्तुमिच्छन्। इच्छापूर्वकमेव निरन्तरं स्मरन्नित्यर्थः। अत एवासौ कपिः कुत्रापि नृत्तं नो प्रादिदृक्षत प्रद्रष्टुं प्रेक्षितुं नैच्छत् गायनान् गायकान्॥ "ण्युट् च" इति गायतेः शिल्पिनि ण्युट्प्रत्ययः। नाशुश्रूषत श्रोतुं नैच्छत्। "ज्ञाश्रुस्मृदृशां सनः" इति दृशेः शृणोतेश्च सन्नन्ताल्लुङि तङ्। स्मरतेस्तु लटः शानजादेशः॥ "अज्झनगमां सनि" इति दीर्घे "उदोष्ठ्यपूर्वस्य" इत्युत्वे "हलि च" इति दीर्घः॥

अनुजिज्ञासतेवार्थं[1] लङ्कादर्शनमिन्दुना।
तमोपहविमुक्तांशु पूर्वस्यां दिश्युदैयत॥ ३५॥

३५. अन्विति॥ तस्मै हनूमते लङ्कायाः लङ्कास्थपदार्थानां दर्शनं साक्षात्कारमनुजिज्ञासता अनुज्ञातुमिच्छता अनुमन्यमानेनेवेत्यर्थः। व्यञ्जकाप्रयोगात् गम्योत्प्रेक्षा। जानातेः सन्नन्ताल्लटः शत्रादेशः॥ "नानोर्ज्ञः" इत्यनुपूर्वस्य सन्नन्तस्य आत्मनेपदप्रतिषेधः। इन्दुना पूर्वस्यां दिशि तमोऽपघ्नन्तीति तमोपहाः॥ "अपे क्लेशतमसोः" इति डप्रत्ययः॥ ते च विमुक्ताश्चांशवो यस्मिन्कर्मणि तत् प्रसारिततमोहरकिरणं यथा तथेत्यर्थः॥ उदैयत उदितम्। इणो भावे लङि तङ्। अजादित्वादाड्वृद्धिः॥

आशुश्रूषन् स मैथिल्या वार्त्तां हर्म्येषु रक्षसाम्।
शीयमानान्धकारेषु समचारीदशङ्कितः[2]॥ ३६॥

३६. आशुश्रूषन्निति॥ स हनूमान् मैथिल्याः वार्त्तां वृत्तान्तमाशुश्रूषन् समन्ताच्छ्रोतुमिच्छन्। आङ्पूर्वाच्छृणोतेः सन्नन्ताल्लटः शत्रादेशः॥ "प्रत्याङ्भ्यां श्रुवः" इति सन्नन्तादात्मनेपदनिषेधः॥ शीयमानान्धकारेषु चन्द्रोदयान्नश्यत्तिमिरेषु। शद्लृ शातने इति धातोः शिद्भाविनः "शदेः शितः" इति लटः शानच्॥ "पाघ्रा—" इत्यादिना शदेः

१ अनुजिज्ञासते तस्मै T., G., Com. °वास्मै T2. T4.

२ समाचारीद° D.

शीयादेशः ॥ रक्षसां हर्म्येषु सौधेषु अशङ्कितोऽभीतः सन्। कर्त्तरि क्तः। समचारीत् संचचार। अतृतीयायोगात् "समस्तृतीयायुक्तात्" इत्यस्य प्रत्युदाहरणम् ॥

शतसाहस्रमारक्षं मध्यगं[1] रक्षसां कपिः।
ददर्श यं कृतान्तोऽपि[2] म्रियेतासाद्य भीषणम् ॥ ३७ ॥

३७. शतेति ॥ कपिर्हनूमान् मध्ये भवं मध्यमं नगरस्य मध्यगतम् ॥ "मध्यान्मः" इति मप्रत्ययः ॥ आ समन्ताद्रक्षतीत्यारक्षं नगरगोपकम्। पचाद्यच्। रक्षसां संबन्धि शतं सहस्राणि परिमाणमस्य शतसाहस्रं लक्षपरिमितं बलमित्यर्थः। 'प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिरलुकि' इति वचनात् "शतमानविंशतिकसहस्रवसनादण्" इति परिमाणार्थे अणि "संख्यायाः संवत्सरसंख्यस्य च" इत्युत्तरपदवृद्धिः। ददर्श। भीषणं यद्बलमासाद्य कृतान्तोऽपि म्रियेत किमुतान्य इति भावः ॥ "म्रियतेर्लुङ्लिङोश्च" इति तङ् ॥

अध्यासिसिषमाणेऽथ वियन्मध्यं निशाकरे[3]।
कासाञ्चक्रे पुरी सौधैरतीवोद्भासिभिः सितैः[4] ॥ ३८ ॥

३८. अधीति ॥ अथ क्षपाकरे चन्द्रे वियन्मध्यं नभोमध्यमध्यासिसिषमाणे अध्यासितुमिच्छति। आसेः सन्नन्तात् "पूर्ववत्सनः" इत्यात्मनेपदम् ॥ "स्तौतिण्योरेव षण्यभ्यासात्" इति नियमान्नाभ्यासादुत्तरस्य षत्वम् ॥ अतीवातिमात्रमुद्भासिभिः दीप्तैः सितैः शुभ्रैः सौधैः साधनैः पुरी लङ्का कासाञ्चक्रे प्रचकाशे ॥ "कास्प्रत्ययादाममन्त्रे लिटि" इत्याम्प्रत्ययः ॥ "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इति कासिवत्कृञस्तङ् ॥

---

१ मध्यमं D., T2, T3, T., G., Com. रक्षसां मध्यगं E2.
२ यत्कृता° T., G., Com. This verse is omitted in T3.
३ दिवाकरे T2. क्षपाकरे T., G., Com.
४ °वोद्भासितैः T2, T3. The 1st half omitted in T3.

इन्दुं चषकसंक्रान्तमुपायुङ्क्त यथामृतम् ।
प्रयुञ्जानः प्रिया वाचः समाजानुरतो जनः ॥ ३९ ॥

३९. इन्दुमिति ॥ समज्या गोष्ठी पानगोष्ठीत्यर्थः । 'समज्या परिषद्गोष्ठी' इत्यमरः ॥ "संज्ञायां समज—" इत्यादिना क्यप् ॥ तस्यामनुरत आसक्तो जनः कामिजनः प्रिया वाचश्चाटूक्तीः प्रयुञ्जानो ब्रुवाणः सन् चषके पानपात्रे । 'चषकोऽस्त्री पानपात्रम्' इत्यमरः । संक्रान्तं प्रतिबिम्बितमिन्दुममृतं यथा अमृतमिवोपायुङ्क्त उपयुक्तवान् पीतवानित्युत्प्रेक्षा । पानात्प्रागिन्दोरेव मद्यमाच्छाद्य लक्ष्यमाणत्वात्पश्चाद्लक्ष्यत्वाच्च स एव नूनं पीत इति भावः ॥ "प्रोपाभ्यां युजेरयज्ञपात्रेषु" इत्युभयत्राप्यात्मनेपदम् ॥

संक्ष्णुवान इवोत्कण्ठामुपाभुङ्क्त सुरामलम् ।
ज्योत्स्नायां विगलन्मानस्तरुणो रक्षसां गणः ॥ ४० ॥

४०. समिति ॥ ज्योत्स्नया हेतुना विगलन्मानो निवर्त्तमानकोपस्तरुणः प्रौढयौवनो रक्षसां रक्षोमिथुनानां गणः उत्कण्ठामन्योन्यानुरागं संक्ष्णुवान इवोत्तेजयन्निव । मधुपानस्य रागवर्धनत्वादिति भावः ॥ "समः क्ष्णुवः" इत्यात्मनेपदम् ॥ शपो लुक्युवङादेशः । सुरामृतमुपाभुङ्क्त उपभुक्तवान् पपावित्यर्थः ॥ "भुजोऽनवने" इत्यात्मनेपदम् ॥

मध्वपाययत स्वच्छं सोत्पलं दयितान्तिके ।
आत्मानं सुरताभोगैर्विस्रम्भोत्पादनं मुहुः ॥ ४१ ॥

४१. मध्विति ॥ स्वच्छं निर्मलं स्वाद्वित्यर्थः सोत्पलमुत्पलवासितं सुरताभोगविस्रम्भोत्पादनं सुरतविहारविस्रम्भकरणम् । करणे ल्युट् । मधु मद्यं कर्तृ । दयितान्तिके प्रियजनसमीपे मुहुरात्मानं स्वात्मानम-

१ समज्यानु° T_3, T., G., Com.
२ °मुपायुङ्क्त T_2, T_4, E_2.
३ सुरामिषम् D.
सुरामृतम् T., G., Com.
४ ज्योत्स्नया T., G., Com.
५ भोगै वि° E_3.
६ विश्रम्भो° N., C.
विश्रम्भोत्पादनक्षमम् D.

पाययत दयितकर्तृकस्वकर्मकं पानं मधु दयितैः स्वयमेवाकारयदित्यर्थः । पिबतेर्ण्यन्ताल्लङ्यणि कर्मणः कर्तृत्वकर्मत्वोभयविवक्षायामकर्त्रभिप्राये "णेरणौ—" इत्यादिना तङ् ॥ अत्र यत्संग्रहणमन्यकर्मनिषेधार्थत्वादणि कर्तृकर्मणोरन्यतरस्य कर्मत्वं न प्रतिषेधतीति कर्मश्रवणेऽपि न विरोधः ॥

अभीषयन्त ये शक्रं राक्षसा रणपण्डिताः ।
अविस्मापयमानस्तान् कपिराटीद्गृहाद्गृहम् ॥ ४२ ॥

४२. अभीषयन्तेति ॥ रणपण्डिताः युद्धविशारदाः ये राक्षसाः शक्रमभीषयन्त भीषितवन्तः ॥ "भियो हेतुभये षुक्" इति षुगागमः ॥ कपिर्हनूमान् तान् राक्षसानविस्मापयमानः गूढचारित्वात्स्वचेष्टितोपलम्भेन विस्मयमलम्भयन्नित्यर्थः ॥ "भीस्म्योर्हेतुभये" इति स्मयस्याप्युपलक्षणत्वादुभयत्रात्मनेपदम् ॥ "नित्यं स्मयतेः" इत्यात्वे पुगागमः ॥ गृहाद्गृहमाटीदटति स्म । अटतेर्लुङि "इट ईटि" इति सलोप आड्वृद्धिश्च ॥

सीतां दिदृक्षुः प्रच्छन्नः सोऽगर्धयत राक्षसान् ।
अवञ्चयत मायाश्च स्वमायाभिर्नरद्विषाम् ॥ ४३ ॥

४३. सीतामिति ॥ सीतां दिदृक्षुः द्रष्टुमिच्छुरत एव प्रच्छन्नो गूढवृत्तिः स हनूमान् राक्षसानगर्धयत विप्रलब्धवान् तथा नरद्विषां राक्षसानां मायाश्च स्वमायाभिरवञ्चयत वञ्चितवान् ॥ "गृधिवञ्च्योः प्रलम्भने" इत्युभयत्रापि तङ् । प्रलम्भनं विमोहनम् ॥

अपलापयमानस्य शत्रूंस्तस्याभवन्मतिः ।
मिथ्या कारयते चारैर्घोषणां राक्षसाधिपः ॥ ४४ ॥

---

१ स विस्मा° D.
२ मायां च D.
३ °याभिः सुरद्विषाम् T2, T4.
४ रक्षसां पतिः C. राक्षसेश्वरः T., G., Com.

४४. अपेति ॥ शत्रूनपलापयमानस्य शालिनीकुर्वाणस्य न्यक्कुर्वाणस्येत्यर्थः । लीङ् श्लेषणे इति धातोर्दैवादिकाण्ण्यन्तात् "लियः संमाननशालिनीकरणयोश्च" इति शालिनीकरणे आत्मनेपदम् ॥ "विभाषा लीयतेः" इति पक्षे आत्वे पुगागमः । तस्य हनूमतः राक्षसेश्वरो रावणश्चारैर्नगररक्षिजनैर्घोषणामन्तः प्रविष्टं ज्ञात्वा सद्यो मारयतेत्येवंरूपां डिण्डिमवाद्यपूर्विकामाघोषणां पुनः पुनः मिथ्या कारयते अर्थशून्यमेवाभ्यासेनावृत्त्या कारयतीत्यर्थः । कृञो ण्यन्तात् "मिथ्योपपदात्कृञोऽभ्यासे" इति तङ् । इति मतिरभूत् । मामेवान्तः प्रविष्टं न जानन्ति किमनया मृषाघोषणयेत्यमन्यतेत्यर्थः ॥

गूहमानः स्वमाहात्म्यमटित्वा मन्त्रिसंसदः ।
नृभ्योऽपवदमानस्य रावणस्य गृहं ययौ ॥ ४५ ॥

४५. गूहमान इति ॥ स्वमाहात्म्यमात्मपौरुषं गूहमानश्छादयन्नेव । स्वरितेत्त्वात् "स्वरितञित—" इत्यादिना कर्त्रभिप्राये आत्मनेपदम्। मन्त्रिसंसदो मन्त्रिगृहानटित्वा तत्राटित्वेत्यर्थः । 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् । देशश्च—' इति वचनाद्देशस्य कर्मत्वम् । नृभ्योऽपवदमानस्य मनुष्येभ्यो द्रुह्यतः ॥ "अपाद्वदः" इत्यात्मनेपदम् ॥ "क्रुधद्रुह—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ रावणस्य गृहं ययौ ॥

दिशो द्योतयमानाभिर्दिव्यनारीभिराकुलम् ।
श्रियमायच्छमानाभिरुत्तमाभिरनुत्तमाम् ॥ ४६ ॥

४६. अथ चतुर्भिस्तद्गृहं वर्णयति ॥ दिश इति ॥ दिशो द्योतयमानाभिः प्रकाशयन्तीभिः ॥ "णिचश्च" इत्यात्मनेपदम् ॥ श्रियं शोभामायच्छमानाभिरादधानाभिः ॥ "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदम् ॥ "इषुगमियमां छः" इति छः ॥ उत्तमाभिरुत्कृष्टाभिर्दिव्यनारीभिः आकुलं संकीर्णमत एवानुत्तमं सर्वोत्तमम् ॥

---

१ °सामर्थ्य° C.
२ दिव्यमानाभि° T_2, T_4.
३ °रनुत्तमम् T_2, T., G., Com.

नित्यमुद्यच्छमानाभिः स्मरसंभोगकर्मसु ।
जानानाभिरलं लीलाकिलेकिञ्चितविभ्रमान् ॥ ४७ ॥

४७. ता एव त्रिभिर्विशिनष्टि नित्यमित्यादिभिः ॥ स्मरसंभोगकर्मसु कामक्रीडासु नित्यमुद्यच्छमानाभिरुद्युञ्जानाभिः तल्लोलुपाभिरित्यर्थः ॥ "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यस्य सकर्मकाधिकारत्वादिह यमेरकर्मकत्वादात्मनेपदं चिन्त्यम् । लीला प्रियानुकरणम् । क्रोधाश्रुहर्षभीत्यादेः संकरः किलिकिञ्चितम् । विभ्रमस्त्वरयाकाले भूषास्थानविपर्ययः । तानलं सम्यग्जानानाभिर्नानाविलासकुशलाभिरित्यर्थः ॥ "अनुपसर्गाज्ज्ञः" इति कर्त्रभिप्राये आत्मनेपदम् ॥

स्वं कर्म कारयन्नास्ते निश्चिन्तो यां झषध्वजः ।
स्वार्थं कारयमाणाभिर्यूनो मदविमोहितान् ॥ ४८ ॥

४८. स्वकर्मेति ॥ झषध्वजो मीनकेतनः कामो निश्चिन्तो निर्विचारः सन् स्वकर्म कारयन् स्वप्रयोजनं रतिकृत्यं कामिजनैः कारयन् यद्गृहमास्ते यत्रास्त इत्यर्थः । गृहस्य देशत्वाद् 'देशकालाध्वगन्तव्याः' इति वचनेन कर्मत्वम् । तद्गृहमिति पूर्वेण परेण वान्वयः । पुनस्त्रिभिरेव विशिनष्टि स्वार्थमिति । मदविमोहितान् युवतयो युवानश्च तान्यूनस्तरुणान् ॥ "पुमान् स्त्रिया" इत्येकशेषः ॥ स्वार्थं स्वप्रयोजनं रतिकर्म कारयमाणाभिः तैः कारयन्तीभिरित्यर्थः ॥ "हृक्रोरन्यतरस्याम्" इत्युभयत्र विकल्पादणि कर्तुः कर्मत्वम् । उभयत्रापि करोतेर्ण्यन्तात् "णिचश्च" इति नित्यतया प्राप्ते स्वशब्दे कर्त्रभिप्रायस्य प्रतीयमानत्वात् "विभाषोपपदेन प्रतीयमाने" इत्युभयत्रापि विकल्पादात्मनेपदम् ॥

कान्तिं स्वां वहमानाभिर्यजन्तीभिः स्वविग्रहान् ।
नेत्रैरिव पिबन्तीभिः पश्यतां चित्तसंहतीः ॥ ४९ ॥

---

१ °किलि T_3, T_4, T., G., Com.
२ स्वकर्म E_3, D., B., T., G., Com.
३ यज्ञ° T., G., Com.

४९. कान्तिमिति ॥ पुनः स्वां स्वाभाविकीमनाहार्यां कान्तिं लावण्यं वहमानाभिः वहन्तीभिः पुनः स्वविग्रहान् स्वाङ्गानि यजन्तीभिः पूजयन्तीभिः परिष्कुर्वतीभिरित्यर्थः । वहियज्योः स्वरितेतोः "विभाषोपपदेन—" इत्यादिना विकल्पादात्मनेपदम् ॥ अथ परस्मैपदाधिकारः ॥ पश्यतां द्रष्टॄणां चित्तसंहतीर्मनोवृन्दानि नेत्रैः स्वदृष्टिभिः पिबन्तीभिरिवेत्युत्प्रेक्षा । दिव्यनारीभिरित्यनेनान्वयः । अत्र पिबतेः "शेषात्कर्त्तरि परस्मैपदम्" इति परस्मैपदम् ॥

तां[१] हनूमान्पराकुर्वन्नगमत् पुष्पकं प्रति ।
विमानं मन्दरस्याद्रेरनुकुर्वदिव श्रियम् ॥ ५० ॥

५०. तदिति ॥ हनूमांस्तद्रावणगृहं पराकुर्वन् परिहरन् मन्दराद्रेः श्रियमनुकुर्वद्विडम्बयदिव स्थितमित्युत्प्रेक्षा । पुष्पकं पुष्पकाख्यं विमानं देवयानं प्रत्यगमत् ॥ "अनुपराभ्यां कृञः" इत्युभयत्रापि करोतेः परस्मैपदम् ॥

तस्मिन्कैलाससङ्काशं[२] शिरःशृङ्गं भुजद्रुमम् ।
अभिक्षिपन्तमैक्षिष्ट[३] रावणं पर्वतश्रियम्[४] ॥ ५१ ॥

५१. तस्मिन्निति ॥ कैलाससङ्काशे तस्मिन्विमाने शिरांस्येव शृङ्गाणि शिखराणि यस्य तं भुजा एव द्रुमाः यस्य तमत एव पर्वतश्रियं शैलशोभामभिक्षिपन्तमभिभवन्तं पर्वतकल्पमित्यर्थः ॥ "अभिप्रत्यतिभ्यः क्षिपः" इति स्वरितेत्त्वात्तङपवादेन परस्मैपदम् ॥ रावणमैक्षिष्ट अद्राक्षीत् । उपमारूपकयोः संकरः ॥

प्रवहन्तं मदामोदं[५] सुप्तं परिजनान्वितम् ।
मघोने परिमृष्यन्तमारमन्तं परं स्मरे ॥ ५२ ॥

---

१ तद्ध° T., G., Com.
तां ह° E2.
२ सङ्काशे T3, T., G., Com.
सङ्कासं c.
३ °अतिक्षिपन्त° T3, T4.
४ °श्रियः D.
५ सदामोदं N., C., B., E2, E3, T.

५२. तमेव विशिनष्टि प्रेति॥ मदामोदं कस्तूरीपरिमलम्। 'मदो रेतसि कस्तूर्याम्' इति विश्वः। प्रवहन्तं प्रकिरन्तमित्यर्थः॥ "प्राद्वहः" इति परस्मैपदम्॥ सुप्तं परिजनान्वितं मघोने इन्द्राय परिमृष्यन्तमसूयन्तम्॥ "परेर्मृषः" इति परस्मैपदम्॥ परमत्यन्तं स्मरे कामे आरमन्तमासजन्तम्॥ "व्याङ्परिभ्यो रमः" इति परस्मैपदम्॥

व्यरमत्प्रधनाद्यस्मात्परित्रस्तः सहस्रदृक्।
क्षणं पर्यरमत्तस्य दर्शनान्मारुतात्मजः॥ ५३॥

५३. वीति॥ यस्माद्रावणात्परित्रस्तो भीतः सन्॥ "भीत्रार्थानाम्—" इत्यादिनैवापादानत्वम्॥ सहस्रदृक् सहस्राक्षः प्रधनाद्युद्धाद्व्यरमद्व्यरंसीत्। "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इत्यपादानत्वम्। तस्य रावणस्य दर्शने मारुतात्मजो हनूमान् क्षणं पर्यरमदभिरतोऽभूत्॥ "व्याङ्परिभ्यो रमः" इत्युभयत्रापि परस्मैपदम्॥

उपारंसीच्च संपश्यन् वानरस्तं चिकीर्षितात्।
रम्यं मेरुमिवाधूतकाननं श्वसनोर्मिभिः॥ ५४॥

५४. उपेति॥ वानरो हनूमान् श्वसनोर्मिभिर्निश्वासमारुतप्रवाहैराधूतकाननं कम्पितोद्यानमत एव रम्यं रमणीयं तं रावणं मेरुमिव संपश्यन् चिकीर्षितात्कर्तुमिष्टात्सीतान्वेषणादुपारंसीद्व्यरंसीच्च। पूर्ववत् "जुगुप्साविराम—" इत्यादिनैव अपादानत्वम्॥ "उपाच्च" इत्यनुवृत्तौ "विभाषाकर्मकात्" इति विकल्पात्परस्मैपदम्॥

दृष्ट्वा दयितया सांकं रहीभूतं दशाननम्।
नात्र सीतेत्युपारंस्त दुर्मना वायुसंभवः॥ ५५॥

५५. दृष्ट्वेति॥ दुर्मनाः सीतादर्शनाभावाद्दुःखितचित्तो वायुसंभवो हनूमान् दयितया स्वकान्तया साकमरहो रहस्यभूतो रहीभूतो

१ पर्यरमच्चास्य B.
२ दर्शने T., G., Com.
३ पवनात्मजः c.
४ पश्यन् स T_3.
५ सार्धं D.
६ °कमभिभूतं T_2, T_4.

रहसि स्थितः । 'रहो रहस्ये सुरते' इति यादवः ॥ "अरुर्मनश्चक्षुः—" इत्यादिना सलोपे "अस्य च्वौ" इतीकारः ॥ तं दशाननं दृष्ट्वा । अत्र सीता नास्तीति मत्वेत्यर्थः । उपारंस्त ततो गृहान्निवृत्त इत्यर्थः । उपपूर्वाद्रमेर्लुङि "विभाषाकर्मकात्" इति पक्षे तङ् ॥

ततः प्राकारमारोहत् क्षपाटानविबोधयन्[1] ।
नायोधयत्[2] समर्थोऽपि सीतादर्शनलालसः[3] ॥ ५६ ॥

५६. तत इति ॥ ततो निर्गमानन्तरं सीतादर्शने लम्पटो लोलुपः स हनूमान् क्षपायामटन्तीति क्षपाटान् निशाचरानविबोधयन्नज्ञापयन् । बुधेर्ण्यन्तात् "णिचश्च" इत्यात्मनेपदे प्राप्ते "बुधयुध—" इत्यादिना परस्मैपदम् । लटः शत्रादेशः । प्राकारमारोहत् । तथा समर्थः योधयितुं शक्तोऽपि तान्नायोधयत् न योधितवान् । युधेर्ण्यन्तात्पूर्ववत्तङि प्राप्ते तस्य अणावकर्मकत्वाच्चित्तवन्निशाटकर्तृकत्वाच्च "अणावकर्मकात्—" इत्यादिना परस्मैपदम् । बुधादिसूत्रे युधिग्रहणं त्वचित्तवत्कर्तृकार्थं यथा योधयति काष्ठानीति द्रष्टव्यम् ॥

अध्यासीद्राघवस्याहं नाशयेयं कथं शुचः[4] ।
वैदेह्या जनयेयं वा[5] कथमानन्दमुत्तमम् ॥ ५७ ॥

५७. अध्यासीदिति ॥ अहं राघवस्य शुचं कथं वा नाशयेयं वैदेह्याः कथं वोत्तमं महान्तमानन्दं संतोषं जनयेयमित्यध्यासीदचिन्तयत् । ध्यायतेर्लुङि च्लेः सिचीट् । अत्रापि नशिजन्योर्णिचि लिङि पूर्ववत्तङि प्राप्ते "अणावकर्मकात्—" इत्यादिनैव परस्मैपदम् । बुधादिसूत्रे तद्ग्रहणं च तद्वदेवाचित्तवत्कर्तृकार्थम् । जनेर्मित्वाद्ध्रस्वत्वम् ॥

दृष्ट्वा राघवकान्तां तां द्रावयिष्यामि राक्षसान् ।
तस्या हि दर्शनात्पूर्वं विक्रमः कार्यनाशकृत् ॥ ५८ ॥

---

१ विरोधयन् c., E2.
२ नाबोधयत् T2.
३ °लम्पटः T2, T3, T4, T., G., Com.
४ शुचम् N., D., B., T., G., Com., T2, T4.
५ च c., B., E3.

५८. दृष्ट्वेति ॥ तां राघवकान्तां सीतां दृष्ट्वा राक्षसान्द्रावयिष्यामि पलाययिष्यामि । अत्रापि द्रवतेर्ण्यन्तात् "अणौ—" इत्यादिनैव परस्मैपदे सर्वं पूर्ववत् । हि यस्मात्तस्याः दर्शनात्पूर्वं विक्रमः पौरुषं कार्यनाशकृत्कार्यहानिकरः ॥

चिन्तयन्नित्थमुत्तुङ्गैः प्रावयन्तीं[1] दिवं वनैः[2] ।
अशोकवनिकामारादपश्यत् स्तबकाचिताम् ॥ ५९ ॥

५९. चिन्तयन्निति ॥ स हनूमानित्थं चिन्तयन्नालोचयन्नुत्तुङ्गैरुन्नतैर्वनैर्वृक्षसमूहैर्दिवमाकाशं प्रावयन्तीं व्याप्नुवन्तीम् । प्रु गताविति धातोर्ण्यन्तात्पूर्ववत्तङि प्राप्ते "बुधयुध—" इत्यादिना परस्मैपदे शतरि ङीप् । स्तबकाचितां गुच्छव्याप्तां अशोकवनिकामशोकवनम् । वनशब्दात्स्वार्थे कप्रत्ययान्ताट्टापि कात्पूर्वस्येत्वम् । आराद्दूरादपश्यत् ॥

तां प्राविशत्कपिव्याघ्रस्तरूनचलयन् शनैः ।
अत्रासयन् वनशयान्[3] सुप्तान् शाखासु पक्षिणः ॥ ६० ॥

६०. तामिति ॥ कपिर्व्याघ्र इव कपिव्याघ्रो हनूमान् । उपमितसमासः । तरूनचलयन् अकम्पयन् ॥ "निगरणचलनार्थेभ्यश्च" इति परस्मैपदम् ॥ वने शेरत इति वनशयान् वनपालान् ॥ "अधिकरणे शेतेः" इत्यच्प्रत्ययः ॥ "शयवास—" इत्यादिना विकल्पात्सप्तम्याः लुक् ॥ तथा शाखासु सुप्तान् पक्षिणश्चात्रासयन् ॥ "अणावकर्मकात्—" इत्यादिना परस्मैपदम् ॥ शनैर्मन्दं तां वनिकां प्राविशत् ॥

अवाद्वायुः शनैर्यस्यां लतां[4] नर्त्तयमानवत् ।
नायासयन्त सन्त्रस्ता ऋतवोऽन्योन्यसंपदः ॥ ६१ ॥

६१. तामेव चतुष्टयेन विशिनष्टि अवादिति ॥ यस्यां वन्यां वायुर्लताः नर्तयमानवत् नृत्यं कारयन्निव शनैरवात् वाति स्म । यस्यामृतवो

[1] प्रापयन्तीं दिवं शनैः T2.
[2] वनम् E2.
[3] वनेशयान् C., T1, T4.
[4] लता D., E2.

वसन्तादयः संत्रस्ताः रावणात् भीताः सन्तः अन्योन्यसंपदः परस्परपुष्पफलविभूतीर्नायासयन्त न बाधयामासुः । अत्र यस्यतेश्चलनार्थत्वात् नृत्यतेश्चित्तवत्कर्तृकत्वाच्च णौ प्राप्तस्य परस्मैपदस्य "न पादमि—" इत्यादिना प्रतिषेधादात्मनेपदम् ॥

ज्योत्स्नामृतं शशी यस्यां वापीर्विकसितोत्पलाः ।
अपाययत संपूर्णः सदा दशमुखाज्ञया ॥ ६२ ॥

६२. ज्योत्स्नेति ॥ यस्यां शशी दशमुखाज्ञया सदा संपूर्णः सन् विदलितानि विकसितान्युत्पलानि यासु ताः वापीः दीर्घिकाः ज्योत्स्नामेवामृतमपाययत पायितवान् । पायतेर्वा पिबतेर्वा प्रत्यवसानार्थत्वात् "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वे निगरणार्थत्वात्प्राप्तस्य "न पादमि—" इत्यादिना प्रतिषेधः ॥

प्रादमयन्त पुष्पेषुं यस्यां वन्द्यः समाहृताः ।
परिमोहयमानाभी राक्षसीभिः समावृताः ॥ ६३ ॥

६३. प्रेति ॥ यस्यां परिमोहयमाणाभिः व्यामोहयन्तीभिः प्रलोभयन्तीभिः इत्यर्थः । मुह्यतेर्ण्यन्ताल्लटः शानजादेशः ॥ "कृत्यचः" ॥ "णेर्विभाषा" इति कृत्नकारस्य विभाषाणत्वम् ॥ राक्षसीभिः समावृताः परिवेष्टिताः समाहृताः स्वर्गादानीताः वन्द्यो बन्दीकृताः स्त्रियः पुष्पेषुं कामं प्रादमयन्त प्रकर्षेण दमयामासुः सुरतपराकाष्ठया कामस्योद्रेकं शमयामासुरित्यर्थः । दमिपरिमुह्योः "अणावकर्मकात्—" इत्यादिना प्राप्तस्य परस्मैपदस्य "न पादमि"—इत्यादिना प्रतिषेधादात्मनेपदम् ॥

यस्यां वासयते सीतां केवलं स्म रिपुः स्मरात् ।
न त्वरोचयतात्मानं चतुरो वृद्धिमानपि ॥ ६४ ॥

---

१ वापीर्विदलितो° T_2, T_3, T_4, T., G., Com.
२ परिमोहयमाणाभिः N., C., T_1, T_2, T_3, E_2, T., G., Com.
३ बुद्धिमानपि C., E_2, E_3, T_1.

६४. यस्यामिति॥ रिपुः रावणः स्मरात्कामान्ध्यात् सीतां यस्यां वन्यां वासयते स्म । केवलं वासितवानेव न तु भुक्तवानित्याह । चतुरोऽपि कृत्यावर्जकुशलोऽपि वृद्धिमानैश्वर्यवानपि आत्मानं तु नारोचयत तस्यै रुचितं कर्तुं न शशाकेत्यर्थः तथा दृढव्रतत्वात्तस्या इति भावः। वसिरुच्योः पूर्ववत्परस्मैपदप्राप्तिप्रतिषेधयोः "णिचश्च" इति तङ् ॥

मन्दायमानगमनो हरितायत्तरूं कपिः ।
द्रुमैः शकशकायद्भिर्मारुतेनाट सर्वतः ॥ ६५ ॥

६५. मन्दायमानेति ॥ अथ कपिर्मन्दायमानगमनः सुप्तजनप्रबोधशङ्कया मन्दीभवद्गतिः सन् । भृशादिक्यङन्ताल्लटः शानच् । हरितायन्तः पलाशवर्णाभवन्तः तरवो यस्यां तां हरितायत्तरूम् । 'पालाशो हरितो हरित्' इत्यमरः । लोहितादिक्यषन्तात् "वा क्यषः" इति लटः परस्मैपदम् । शत्रादेशः । "अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम्" इत्यूङ्प्रत्ययः । मारुतेन शकशकायद्भिः वायुघर्षणाच्छकशकीभवद्भिस्तथा ध्वनद्भिरित्यर्थः ॥ "अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्" इति डाचि "डाचि बहुलं द्वे भवतः" इति द्विर्वचनम् । डाजन्तात् "लोहितादिडाज्भ्यः क्यष्" इति क्यषि "वा क्यषः" इति क्यषन्ताल्लटो वा परस्मैपदम् । शत्रादेशः । तैर्द्रुमैरुपलक्षितां यत्तदोर्नित्यसंबन्धात्तामशोकवनिकां सर्वतः समन्तादाट चचार । अटतेर्लिट् ॥

अस्यंदन्निन्दुमणयो व्यरुचन् कुमुदाकराः ।[1]
अलोठिषत वातेन प्रकीर्णाः स्तबकोच्चयाः ॥ ६६ ॥[2]

६६. अस्यदन्निति ॥ इन्दुमणयश्चन्द्रकान्ता अस्यदन् चन्द्रांशुस्पर्शात्प्रसुस्रुवुः । कुमुदाकराः व्यरुचन् विचकसुरित्यर्थः । स्तबकोच्चयाः

---

१ अस्यन्दन् N., C., D., E_3, c., T_1, T_2, T_3, T_4.

२ आलोचिषत B.

अन्येऽपि कुसुमगुच्छव्रजाः वातेन प्रकीर्णाः विक्षिप्ताः सन्तः अलोठिषत लुठन्ति स्म । सर्वत्र लुङि द्युतादित्वात् "पुषादि—" इत्यादिना च्लेरङादेशः ॥ "द्युद्भ्यो लुङि" इति विकल्पात्परस्मैपदं लुठेस्तङ्च ॥

सीतान्तिके विवृत्सन्तं वर्त्स्यत्सिद्धिं प्लवङ्गमम् ।
पतत्रिणः शुभा मन्द्रमानुवानास्त्वजिह्लदन् ॥ ६७ ॥

६७. सीतेति ॥ सीतान्तिके विवृत्सन्तं वर्त्तितुमिच्छन्तमन्तिकं गन्तुमिच्छन्तमित्यर्थः । वृतु वर्त्तने इति धातोः सनन्ताल्लटः शत्रादेशः । वर्त्स्यत्सिद्धिं वर्त्तिष्यमाणसिद्धिमासन्नकार्यसिद्धिकमित्यर्थः ॥ "वृद्भ्यः स्यसनोः" इत्युभयत्र विकल्पात्परस्मैपदम् ॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधश्च ॥ प्लवङ्गमं हनूमन्तं शुभाः शुभावेदकाः पतत्रिणः पक्षिणः मन्द्रं गम्भीरमानुवाना धन्योऽसीति स्तुवाना इवेत्यर्थः । गम्योत्प्रेक्षा । नु स्तुताविति धातोः "आङि नुप्रच्छ्योः" इत्युपसंख्यानादात्मनेपदम् । अजिह्लदन् आह्लादयन्ति स्म । ह्लादेर्णौ चङ्युपधाह्रस्वः ॥

वर्त्तिष्यमाणमात्मानं सीता पत्युरिवान्तिके ।
उदपश्यत्तदा तथ्यैर्निमित्तैरिष्टदर्शनैः ॥ ६८ ॥

६८. वर्त्तिष्यमाणमिति ॥ तदा तस्मिन्हनुमदागमनकाले सीता तथ्यैरवितथैरिष्टदर्शनैरिष्टावेदकैः । कर्त्तरि ल्युट् । निमित्तैर्वामाक्षिस्पन्दादिहेतुभिरात्मानं पत्युः रामस्यान्तिके वर्त्तिष्यमाणमिव स्थास्यन्तमिव ॥ "वृद्भ्यः स्यसनोः" इति परस्मैपदविकल्पादात्मनेपदम् । उदपश्यत् उत्प्रेक्षितवती । पतिप्राप्तिमतर्कयदित्यर्थः ॥

निरवर्त्स्यन्न चेद्वार्त्ता सीताया वितथैव नः ।
अकल्प्स्यदुद्यतिः सर्वा हनूमानित्यचिन्तयत् ॥ ६९ ॥

६९. निरिति ॥ सीतायाः वार्त्ता वृत्तान्तो न निरवर्त्स्यच्चेन्न निर्वृत्ता न जाता चेदित्यर्थः ॥ "वृद्भ्यः स्यसनोः" इति वृत्तेर्लृङि परस्मैपदम् ।

तद्वा नोऽस्माकं सर्वा समुद्रलङ्घनादिरुद्यतिरुद्यमः । यमेः स्त्रियां क्तिन् ॥ "अनुदात्तोपदेश—" इत्यादिना अनुनासिकलोपः ॥ वितथा व्यर्थैवाकल्प्स्यदभविष्यत् । कृपेर्लृङि "लुटि च कृपः" इति चकाराद्वा परस्मैपदम् । लुटि नोदाहृतम् । इति हनूमानचिन्तयत् । सर्वथा सीता द्रष्टव्येति निष्टङ्कितवानित्यर्थः ॥

अथ कारकाधिकारः ।

वृक्षाद्वृक्षं परिक्रामन् रावणाद्बिभ्यतीं भृशम्[1] ।
शत्रोस्त्राणमपश्यन्तीमदृश्यो जनकात्मजाम् ॥ ७० ॥

७०. अथ कारकाधिकारः ॥ तत्रापादानकारकं त्रिभिः कुलकेनाह वृक्षादित्यादिभिः । अथ कपिकुञ्जरः स हनूमान् । उपमितसमासः । अदृश्योऽलक्ष्यः सन् वृक्षात्सकाशात् ॥ "ध्रुवमपायेऽपादानम्" इत्यपादानत्वात्पञ्चमी ॥ वृक्षं परिक्रामन् तां जनकात्मजां सीतामपश्यदित्यन्वयः । कीदृशीम् । राक्षसाद्रावणाद्बिभ्यतीं त्रस्यन्तीम् । बिभेतेः शतरि ङीप् ॥ "नाभ्यस्ताच्छतुः" इति नुम्प्रतिषेधः ॥ पुनः शत्रोः रावणात् त्राणं रक्षणमपश्यन्तीं त्रातारमलभमानामित्यर्थः ॥ "भीत्रार्थानां भयहेतुः" इति क्रमादुभयत्रापादानसंज्ञा ॥

तां पराजयमानां स प्रीते रक्ष्यां दशाननात् ।
अन्तर्दधानां रक्षोभ्यो मलिनां म्लानमूर्धजाम्[2] ॥ ७१ ॥

७१. तामिति ॥ पुनस्तस्य रावणस्य प्रीतेरनुरागात् पराजयमानां पराङ्मुखीभवन्तीं तामसहमानामित्यर्थः ॥ "पराजेरसोढः" इति प्रीतेरपादानत्वम् । पुनः कीदृशीम् । दशाननात् स्वकान्तादीप्सितात्कान्ताभिः सीताचापलशङ्किनीभिः सापत्न्यार्थं रक्ष्यां वार्यां वारणीयत्वेनाभिमताम् । अन्यथा तस्य तदेकायत्तत्वे स्वसौभाग्यभङ्ग-

---

[1] कपिः T2, T3, T4. | [2] ध्याम° C., E2, E3. रूक्ष C.

प्रसङ्गादिति सीतायाः सौन्दर्यातिशयोक्तिः ॥ "वारणार्थानामीप्सितः" इति रावणस्यापादानत्वम् ॥ तथा रक्षोभ्योऽन्तर्दधानां रक्षांसि मां मा द्राक्षुरिति लीयमानामित्यर्थः ॥ "अन्तर्धौ येनादर्शनमिच्छति" इत्यपादानत्वम् ॥ मलिनां संस्काराभावान्मलिनाङ्गीमत एव म्लानमूर्धजां रूक्षकेशीम् ॥

रामादधीतसंदेशो वायोर्जातश्च्युतस्मिताम् ।
प्रभवन्तीमिवादित्यादपश्यत्कपिकुञ्जरः ॥ ७२ ॥

७२. रामादिति ॥ रामादाख्यातुरधीतसंदेशो भक्त्या गृहीतवाचिकः ॥ "आख्यातोपयोगे" इति रामस्यापादानत्वम् ॥ वायोः प्रकृतिभूताज्जात उत्पन्नः ॥ "जनिकर्तुः प्रकृतिः" इति वायोरपादानत्वम् ॥ च्युतस्मितामिति शोकादस्तमितहासामादित्यात्प्रभवन्तीमिव तेजसा सूर्यात्प्रादुर्भवन्तीमिव स्थिताम् ॥ "भुवः प्रभवः" इत्यादित्यस्यापादानत्वम् ॥

रोचमानः कुदृष्टिभ्यो रक्षोभ्यः प्रत्तवान् श्रियम् ।
श्लाघमानः[1] परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपः[2] ॥ ७३ ॥

७३. अथ पञ्चभिः संप्रदानकारकभेदानुदाहरति । रोचमान इति ॥ कुदृष्टिभ्यः कुबुद्धिभ्यो दुरात्मभ्यो रोचमानो रुचिकरो न तु साधुभ्य इति भावः ॥ "रुच्यर्थानां प्रीयमाणः" इति संप्रदानत्वम् ॥ रक्षोभ्यः श्रियं प्रत्तवान् प्रकर्षेण दत्तवान् । प्रपूर्वाद्ददातेः क्तवतुप्रत्ययः ॥ "अच उपसर्गात्तः" इति दस्तकारः ॥ "कर्मणा यमभिप्रैति—" इत्यादिना रक्षसां संप्रदानत्वम् ॥ परस्त्रीभ्यः श्लाघमानः कत्थमानः । तासां यथाविदितं तथा ताः स्तुवानस्तत्कामुकतयेत्यर्थः ॥ "श्लाघह्नुङ्—" इत्यादिना स्त्रीणां संप्रदानत्वम् ॥ एवंभूतो राक्षसेश्वरो रावणस्तत्र तस्मिन् सीतादर्शनकाल एवागात् । तं देशमागत इत्यर्थः ॥ आङ्पूर्वादिणः "इणो गा लुङि" इति गादेशः ॥

---

१ श्लाघ्यमानः D. | २ °गाद्राक्षसेश्वरः T., G., Com.

अशप्त[1] निह्नुवानोऽसौ सीतायै स्मरमोहितः।
धारयन्निव चैतस्यै[2] वसूनि प्रत्यपद्यत ॥ ७४ ॥

७४. अशप्यदिति ॥ स्मरमोहितः कामान्धोऽसौ रावणः अस्यै सीतायै निह्नुवानः सौजन्यनाटकेन स्वदौर्जन्यमपह्नुवानः अस्यै सीतायै अशप्यत् न कदाचिदपरात्स्यामीति शपथमकार्षीदित्यर्थः। शपेर्दैवादिकाल्लङ् ॥ "श्लाघह्नुङ्स्थाशपाम्—" इत्यादिना सीताया उभयत्र संप्रदानत्वम् ॥ किं चैतस्यै सीतायै धारयन्निवाधमर्ण्ये तिष्ठन्निव ॥ "धारेरुत्तमर्णः" इति सीतायाः संप्रदानत्वम् ॥ वसूनि सर्वस्वानि च प्रत्यपद्यत प्रतिपन्नवान् प्रतिश्रुतवानित्यर्थः ॥

तस्यै स्पृहयमाणोऽसौ बहु प्रियमभाषत[3]।
सानुनीतिश्च सीतायै नाक्रुध्यन्नाभ्यसूयत[4][5][6] ॥ ७५ ॥

७५. तस्या इति ॥ असौ रावणस्तस्यै सीतायै स्पृहयमाणस्तामीप्सन् ॥ "स्पृहेरीप्सितः" इति संप्रदानत्वम् ॥ बहु प्रियमभाषत। किं च सानुनीतिरनुनययुक्तः सन् सीतायै नाक्रुध्यत् अतिप्रातिकूल्येऽपि न चुक्रोध नाभ्यसूयत च असूयां च न चकारेत्यर्थः ॥ "क्रुधद्रुहेर्ष्या—" इत्यादिना उभयत्र सीतायाः संप्रदानत्वम् ॥

संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे।
ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् ॥ ७६ ॥

७६. समिति ॥ हे मृगेक्षणे सीते दिदृक्षुं त्वां द्रष्टुमिच्छुं मां त्वं किं मृषा मुधा संक्रुध्यसि। पूर्वेण संप्रदानत्वे प्राप्ते "क्रुधद्रुहोरुपसृष्टयोः कर्म" इति कर्मत्वम्। किं च परस्त्रीभ्यः ईक्षितव्यं तासां शुभाशुभप्रश्ने तत्परीक्षार्थं यदीक्षणं भवितव्यम् ॥ "राधीक्ष्योर्यस्य विप्रश्नः"

---

१ अशप्यन्नि° D., T_3, T_4, T., G., Com.
२ चैवास्यै T_2, T_3, T_4.
३ °मयाचत T_3.
४ नासूयत न चाक्रुधत् T_2, T_4.
५ नाभ्यसूयत T., G., Com.
६ च T_4.

इति स्त्रीणां संप्रदानत्वम् ॥ अयम् । विधेयप्राधान्यात्पुंल्लिङ्गनिर्देशः । रक्षसां स्वधर्मो जातिप्रयुक्तो धर्मः । अतो नायं दोष इति भावः ॥

शृण्वद्भ्यः प्रतिशृण्वन्ति मध्यमा भीरु नोत्तमाः ।
गृणद्भ्योऽनुगृणन्त्यन्ये कृतार्था नैव मद्विधाः ॥ ७७ ॥

७७. शृण्वद्भ्य इति ॥ हे भीरु त्रस्तो । संज्ञापूर्वकस्य विधेरनित्यत्वान्न गुणः । अन्ये मद्व्यतिरिक्ताः मध्यमाः शृण्वद्भ्यः श्रुतशालिभ्य इदं कार्यमिदमकार्यमिति हिताहितमुपदिशद्भ्य इत्यर्थः । प्रतिशृण्वन्ति अभ्युपगच्छन्ति तथैव कुर्म इति प्रतिजानत इत्यर्थः । 'संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः । अङ्गीकाराऽभ्युपगमप्रतिश्रवसमाधयः' ॥ इत्यमरः ॥ "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता" इति शृण्वतां संप्रदानत्वम् ॥ तेषां प्रतिश्रवापेक्षया पूर्वस्यामुपदेशक्रियायां कर्तृत्वादिति । कृतार्थाः कृतकृत्याः स्वयमेव कार्याकार्यज्ञा मद्विधा उत्तमास्तु नैवं न परोपदेशापेक्षा इत्यर्थः । किं च पूर्वोक्ता मध्यमाः गृणद्भ्यः शंसद्भ्यः स्तावकेभ्यः अनुगृणन्ति दित्सासूचकालापैः प्रोत्साहयन्ति मद्विधास्तूत्तमाः स्तुतिं विनैवार्थिभ्यः प्रयच्छन्तीत्यर्थः । शंसितुः प्रोत्साहनमनुगरः प्रतिगरश्चोच्यते ॥ "अनुप्रतिगृणश्च" इति पूर्वस्य शंसनकर्त्तुः संप्रदानत्वम् ॥

इच्छ स्नेहेन दीव्यन्ती विषयान् भुवनेश्वरम् ।
संभोगाय परिक्रीतः कर्त्तास्मि तव नाप्रियम् ॥ ७८ ॥

७८. इच्छेति ॥ विषयान् दीव्यन्ती शब्दादिविषयैः क्रीडन्ती त्वम् ॥ "दिवः कर्म च" इति देवकरणस्य विकल्पात्कर्मत्वम् ॥ भुवनेश्वरं त्रैलोक्यनाथं मां स्नेहेन करणेनेच्छ प्रतीच्छ ॥ "साधकतमं करणम्" इति करणत्वात्तृतीया ॥ किं च सम्भोगाय परिक्रीतः संभोगेन परिक्रीतः दासीकृतोऽहम् ॥ "परिक्रयणे संप्रदानमन्यतरस्याम्" इति विकल्पा-

१ योगेन T2, T4.

त्यरिक्रयणकरणस्य संभोगस्य संप्रदानत्वम् ॥ तवाप्रियं न कर्त्तास्मि न करिष्यामि । करोतेर्लुटि मिपि तास् ॥

आस्स्व सार्कं मया सौधे माधिष्ठा निर्जनं वनम् ।
माधिवात्सीर्भुवं शय्यामधिशेष्व स्मरोत्सुका ॥ ७९ ॥

७९. आस्स्वेति ॥ मया सार्कं सौधे आस्स्व ॥ "आधारोऽधिकरणम्" इति सौधस्याधिकरणत्वम् ॥ निर्जनं वनं माधिष्ठाः वने न तिष्ठेत्यर्थः ॥ "अधिशीङ्स्थासां कर्म" इति वनस्य कर्मत्वम् ॥ तिष्ठतेर्माङि लुङि सिपि "गातिस्था—" इत्यादिना सिचो लुक् ॥ "न माङ्योगे" इत्यडभावः ॥ भुवं माधिवात्सीः भुवि न वस नाधः शेष्वेत्यर्थः । वसेर्माङि लुङि सिचि वृद्धिः ॥ "उपान्वध्याङ्वसः" इति भुवः कर्मत्वम् ॥ किन्तु स्मरोत्सुका सुरतासक्ता शय्यामधिशेष्व शय्यायां शेष्वेत्यर्थः ॥ "अधिशीङ्—" इत्यादिना कर्मत्वम् ॥

अभिन्यविक्षथास्त्वं मे यथैवाव्याहृता[1] मनः ।
तवाप्यध्यावसन्तं[2] मां मा रौत्सीर्हृदयं तथा ॥ ८० ॥

८०. अभीति ॥ यथैव त्वं मे मनो हृदयं अव्याहतमनिवारितमभिन्यविक्षथाः मनसि निविष्टासीत्यर्थः । अभिनिपूर्वाद्विशेर्लुङि "नेर्विशः" इति तङि थासि "शलइगुपधादनिटः क्सः" इति क्सः ॥ "अभिनिविशश्च" इत्याधारस्य मनसः कर्मत्वम् ॥ तथैव तव हृदयमध्यावसन्तं हृदये वसन्तम् ॥ "उपानु—" इत्यादिना हृदयस्य कर्मत्वम् ॥ मां मा रौत्सीर्मा निवारय । रुधेर्लुङि सिपि सिचि "वदव्रज—" इत्यादिना वृद्धिः ॥ यथा त्वय्यहमनुरक्तस्तथा त्वमपि मय्यनुरक्ता भवेत्यर्थः ॥

मावमंस्था नमस्यन्तमकार्यज्ञे जगत्पतिम् ॥
संदृष्टे मयि काकुत्स्थमधन्यं कामयेत का ॥ ८१ ॥

---

१ °व्याहतं B., T., G., Com. | २ त्वमप्य° T_3, T_8, D.

८१. न च रामो न त्याज्य इत्याह मेति ॥ हे अकार्यज्ञे मूढे नमस्यन्तं प्रणमन्तम् ॥ "नमोवरिवश्चित्रङः क्यच्" इति क्यजन्ताल्लटः शत्रादेशः ॥ जगत्पतिं जगद्वन्द्यं मां मावमंस्थाः मावमन्यस्व । मन्यतेः कर्त्तरि लुङि थास् ॥ "कर्त्तुरीप्सिततमं कर्म" इति जगत्पतेः कर्मत्वम् ॥ मयि संदृष्टे सति अधन्यमभाग्यं काकुत्स्थं रामम् ॥ "तथायुक्तं चानीप्सितम्" इति रामस्यानीप्सितकर्मत्वम् ॥ का स्त्री कामयेत न कापीत्यर्थः ॥

य: पयो दोग्धि पाषाणं स रामाद्भूतिमाप्नुयात् ।
रावणं गमय प्रीतिं बोधयन्तं हिताहितम् ॥ ८२ ॥

८२. य इति ॥ यो जनः पाषाणं पयः क्षीरं दोग्धि ॥ "दुहियाचि—" इति वचनाद्दुहेर्द्विकर्मकत्वम् । तत्र पयस ईप्सितकर्मत्वं पाषाणस्य "अकथितं च" इत्यकथितकर्मत्वम् । स पाषाणपयोदोग्धा रामाद्भूतिं संपदमाप्नुयात् । तद्वदसंभावितमित्यर्थः । अत्रोत्तरवाक्यार्थे पूर्ववाक्यार्थारोपेणौपम्यावगमाद्वाक्यार्थवृत्तिरसंभवद्वस्तुसंबन्धो निदर्शनालङ्कारः । 'असंभवद्वस्तुयोगादुपमानोपमेययोः । प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥ " इति लक्षणात् । हिताहितं हिताहिते ॥ "विप्रतिषिद्धं चानधिकरणवाचि" इति द्वन्द्वैकवद्भावः । बोधयन्तं त्वामिति शेषः । रावणं प्रीतिं गमय । उभयत्रापि "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् ॥

प्रीतोऽहं भोजयिष्यामि भवतीं भुवनत्रयम्[१] ।
किं विलापयसेऽत्यर्थं पार्श्वे शायय रावणम् ॥ ८३ ॥

८३. स्वप्रीतेः फलमाह प्रीत इति ॥ अहं प्रीतः सन् भवतीं भुवनत्रयं भोजयिष्यामि । निगरणार्थत्वात्परस्मैपदम् । किमत्यर्थं विलापयसे विविधं भाषयसे आत्मानमिति शेषः ॥ "णिचश्च" इत्यात्मनेपदम् ॥ रावणं

१ भुवनश्रियम् T2.

पार्श्वे शायय ॥ "अणावकर्मकात्—" इत्यादिना परस्मैपदम् ॥ सर्वत्र "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् ॥

आज्ञां कारय रक्षोभिर्मां प्रियाण्युपहारय ।
कः शक्रेण कृतं नेच्छेदधिमूर्धानमञ्जलिम् ॥ ८४ ॥

८४. आज्ञामिति ॥ रक्षोभिः प्रयोज्यैः आज्ञां त्वद्वाक्यं कारय मां प्रियाण्युपहारय । मम प्रियवस्तून्यानयेत्यर्थः ॥ "हृक्रोरन्यतरस्याम्" इत्यणि कर्त्तुः कर्मत्वे उभयत्र "तत्प्रयोजको हेतुश्च" इति सीतायाः प्रयोजककर्तृत्वमन्येषां प्रयोज्यकर्मत्वम् । किं च शक्रेण कृतम् ॥ "स्वतन्त्रः कर्त्ता" इति कर्तृसंज्ञायां कर्त्तरि तृतीया ॥ अधिगतो मूर्धानमधिमूर्धो मूर्धगतः "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः । तमञ्जलिं को नेच्छेत् । कस्येदं नाशास्यमित्यर्थः । मत्स्वीकारे त्वमिन्द्रवन्द्या भविष्यसीति भावः ॥

अथ कर्मप्रवचनीयाः ।

वचनं रक्षसां पत्युरनु क्रुद्धा पतिप्रिया ।
पापानुवसितं[1] सीता रावणं प्राब्रवीद्वचः ॥ ८५ ॥

८५. वचनमिति ॥ पतिप्रिया पतिव्रता सीता रक्षसां पत्युः रावणस्य वचनमनु क्रुद्धा वचनेन हेतुना क्रुद्धा सतीत्यर्थः ॥ "अनुर्लक्षणे" इति हेत्वर्थे कर्मप्रवचनीयसंज्ञा ॥ अत्र सूत्रे लक्षणशब्दस्य हेत्वर्थत्वात् "लक्षणेत्थंभूत—" आदिसूत्रे चिह्नवचनत्वादिति ॥ "कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया ॥ पापमनु पापानु पापेन सहेत्यर्थः ॥ "तृतीयार्थे" इति तृतीयार्थे द्योत्ये अनोः कर्मप्रवचनीयसंज्ञायां सहार्थतृतीयापवादेन द्वितीयायां कविना स्वातन्त्र्यात् 'द्वितीया' इति योगविभागात् 'सुप्सुपा' इति वा समासः कृतः । अवसितं पापेन संबद्धं पापिष्ठमित्यर्थः । षिञ् बन्धने इति धातोः कर्त्तरि क्तः । रावणं वचः प्राब्रवीत् प्रोवाच । "ब्रुविशासि—" इति द्विकर्मकत्वम् ॥

---

१ पापान्ववसितं D., T., G., Com.

न भवाननु रामं चेदुप शूरेषु वा ततः ।
अपवाह्य छलाद्वीरौ किमर्थं मामिहाहरः ॥ ८६ ॥

८६. नेति ॥ हे पाप त्वं राममनु रामाद्धीनो न चेत् ॥ "हीने" इत्यनोर्हीनार्थे कर्मप्रवचनीयत्वात् द्वितीया । शूरेषु वा उप चेत् शूरेभ्योऽधिकश्चेदित्यर्थः ॥ "उपोऽधिके च" इत्यधिकार्थे कर्मप्रवचनीयसंज्ञायां तद्योगे "यस्मादधिकम्—" इत्यादिना सप्तमी ॥ ततस्तर्हि छलान्मायामृगव्याजाद्वीरौ रामलक्ष्मणौ अपवाह्य वञ्चयित्वा किमर्थं मामिहाहरः आहृतवान् । तस्मात्त्वं चोरो न शूर इत्यर्थः ॥

उप शूरं न ते वृत्तं कथं रात्रिञ्चराधम ।
यत्संप्रत्यप लोकेभ्यो लङ्कायां वसतिर्भयात् ॥ ८७ ॥

८७. उपेति ॥ हे रात्रिञ्चराधम कथं ते तव वृत्तं चरित्रं शूरमुप शूरजनाद्धीनं न ॥ "उपोऽधिके च" इति चकारादुपशब्दस्य हीनार्थे कर्मप्रवचनीयत्वे तद्योगात् द्वितीया । कुतः यद्यस्मात्संप्रतीदानीं भयाल्लोकेभ्योऽप शूरशरणान् लोकान् वर्जयित्वा ॥ "अपपरीवर्जने" इत्यपशब्दस्य वर्जनार्थे कर्मप्रवचनीयत्वे "पञ्चम्यपाङ्परिभिः" इति द्वितीयापवादेन पञ्चमी ॥ लङ्कायां वसतिर्निवासः । वसेरतिप्रत्यय औणादिकः । दुर्गबलजीवी भवान्न भुजबलजीवीति न कथं शूरलोकबाह्य इत्यर्थः ॥

आ रामदर्शनात् पाप विद्योतस्व स्त्रियः प्रति ।
सद्वृत्तानु दुर्वृत्तः परि स्त्रीं जातमन्मथः ॥ ८८ ॥

८८. आरामेति ॥ हे पाप पापाचार आ रामदर्शनाद्रामदर्शनपर्यन्तम् ॥ "आङ् मर्यादावचने" इत्याङः कर्मप्रवचनीयत्वात्तद्योगे "पञ्चम्यपाङ्प-

१ त्वं पापानु T., G., Com.
२ श्रियं T., G., Com.
श्रियं B., E2.
३ परस्त्रीजात° E2, E3, B.

रिभिः" इति पञ्चमी ॥ सद्वृत्तानु साधून्प्रति दुर्वृत्तो दुष्टचरित्रः सन् साधुबाधकः सन्नित्यर्थः ॥ "लक्षणेत्थंभूत—" इत्यादिना अनोरित्थंभूताख्याने कर्मप्रवचनीयत्वम् ॥ तथा परि स्त्रीं स्त्रीं स्त्रीं प्रति । तेनैव परेर्वीप्सायां कर्मप्रवचनीयत्वम् ॥ "वाम्शसोः" इति विकल्पादियङ्भावपक्षे "अमि पूर्वः" इति पूर्वरूपत्वम् ॥ जातमन्मथः सन् श्रियं प्रति लक्ष्मीं लक्षीकृत्य विद्योतस्व श्रीमानयमिति श्रीचिह्नः सन् दीप्यस्व । रामदर्शने सति त्वं सद्यो विनङ्क्ष्यसीति भावः । तेनैव प्रतेर्लक्षणार्थे कर्मप्रवचनीयत्वम् । सर्वत्र तद्योगाद् द्वितीया ॥

अभि द्योतिष्यते रामो भवन्तमचिरादिह ।
उद्गूर्णबाणः संग्रामे यो नारायणतः प्रति ॥ ८९ ॥

८९. अभीति ॥ किं चाचिरात् क्षिप्रमेव रामो भवन्तमभि त्वां लक्षीकृत्य भवन्तं लक्षीकृत्येत्यर्थः द्योतिष्यते भवदाभिमुख्येन स्थास्यत इत्यर्थः ॥ "अभिरभागे" इत्यभेर्लक्षणार्थे कर्मप्रवचनीयत्वं तद्योगाद्द्वितीया ॥ संग्रामे रणे उद्गूर्णबाण उद्यतेषुर्यो रामो नारायणतो नारायणात्प्रति तस्य प्रतिनिधिस्तत्सदृश इत्यर्थः ॥ "प्रतिः प्रतिनिधिप्रतिदानयोः" इति प्रतेः प्रतिनिधौ कर्मप्रवचनीयत्वम् ॥ "प्रतिनिधिप्रतिदाने च यस्मात्" इति द्वितीयापवादिनी पञ्चमी ॥ पञ्चम्यास्तसिः ॥

कुतोऽधि यास्यसि क्रूर निहतस्तेन पत्रिभिः ।
न सूक्तं भवतात्युग्रमति रामं मदोद्धत ॥ ९० ॥

९०. कुत इति ॥ हे क्रूर तेन रामेण पत्रिभिर्बाणैः निहतः प्रहृतः सन् कुतोऽधि यास्यसि क्व यास्यसीत्यर्थः ॥ "अधिपरी अनर्थकौ" इत्यधेरनर्थकत्वाद्धात्वर्थातिरिक्तार्थरहितत्वात्कर्मप्रवचनीयत्वं गत्युपसर्गसंज्ञाबाधनार्थमन्यथा "गतिर्गतौ" इति निघातापातात् ॥ हे मदोद्धत भवता अत्युग्रं यथा तथा अति रामं राममतिक्रम्य ॥ "अतिरतिक्रमणे च" इति कर्मप्रवचनीयत्वे द्वितीया ॥ न सूक्तं साधु नोक्तम् ॥ "सुः

१ °मभिरामं D., B. | °मधिरामं E_3.

पूजायाम्" इति कर्मप्रवचनीयत्वम् ॥ सर्वस्यास्य फलमाशुभावीति भावः ॥

परिशेषं न नामापि स्थापयिष्यति ते विभुः ।
अपि स्थाणुं जयेद्रामो भवतो ग्रहणं कियत् ॥ ९१ ॥

९१. परीति ॥ विभुः प्रभुः रामः ते नाम्नोऽपि परिशेषमवशेषं न स्थापयिष्यति किमुत कायमित्यर्थः । अत्राप्रयुक्तकायपदार्थद्योतकत्वादपेः "अपिः पदार्थ—" इत्यादिना पदार्थे कर्मप्रवचनीयत्वम् । तथाहि रामः स्थाणुं रुद्रमपि जयेद्यस्ते शरणमिति भावः । तेनैव संभावनायां कर्मप्रवचनीयत्वम् । भवतो ग्रहणं बन्धनं कियत् । उभयत्रापि संज्ञाकरणस्योपसर्गसंज्ञानिवृत्त्यर्थत्वात् "उपसर्गात्सुनोति—" इत्यादिना न स्थासकारस्य षत्वम् ॥

अपि स्तुह्यपि सेधास्मांस्तथ्यमुक्तं नराशन ।
अपि सिञ्चेः कृशानौ त्वं दर्पं मय्यपि योऽभिकः ॥ ९२ ॥

९२. अपीति ॥ हे नराशन मनुष्यभक्षक अस्मानपि स्तुहि स्तुहि वा अपि सेध निषेध निन्द वेत्यर्थः । धातूनामनेकार्थत्वात् । अपेरन्ववसर्गे कामचारे तेनैव संज्ञा । तथ्यं 'परिशेषं न नाम्नोऽपि' इति वाक्यं यथार्थमुक्तोऽसि । 'अप्रधाने दुहादीनाम्' इत्यप्रधाने कर्मणि क्तः । किं च मय्यपि चाभीकः कामुकस्त्वम् ॥ "अनुकाभिकाभीकः कमिता" इति निपातनात्साधुः ॥ कृशानावपि दर्पं वीर्यं सिञ्चेः क्षारयेः । अत्र तेनैव गर्हायां संज्ञा । अत्र सर्वत्रोपसर्गसंज्ञानिवृत्त्यर्थत्वात् स्तौतिसेधतिसिञ्चतीनाम् "उपसर्गात्सुनोति—" इत्यादिना न षत्वम् । मत्कामुकस्त्वं कृशानौ वीर्यं सिञ्चेरित्यसंभवद्वस्तुसंबन्धो निदर्शनालङ्कारः ॥

---

१ नाम्नोऽपि D., T., G., Com.
२ प्रभुः E2.
३ ग्रहणे T2.
४ थ्यमुक्तो E2, T., G., Com.
५ रेतो D.

अधि रामे पराक्रान्तमधिकर्त्ता स ते क्षयम् ।
इत्युक्त्वा मैथिली तूष्णीमासाञ्चक्रे दशाननम् ॥ ९३ ॥

९३. अधीति ॥ अधि रामे स्वामिनि पराक्रान्तं पराक्रमः संवर्त्तते इति शेषः । नपुंसके भावे क्तः ॥ "अधिरीश्वरे" इति रामपराक्रमयोः स्वस्वामिभावसंबन्धे द्योत्ये अधेः कर्मप्रवचनीयत्वे "यस्मादधिकं यस्य चेश्वरवचनम्—" इत्यादिना द्वितीयापवादेन सप्तमी ॥ अतः स पराक्रमस्वामी रामः ते तव क्षयं नाशमधिकर्त्ता करिष्यति ॥ "विभाषा कृञि" इति संज्ञाभावपक्षे "कर्मणि द्वितीया" ॥ संज्ञापक्षे उपसर्गसंज्ञाबाधात् "तिङि चोदात्तवति" इति निघाताभावः फलम् । मैथिली दशाननमित्युक्त्वा तूष्णीमासाञ्चक्रे जोषमास्त ॥ "दयायासश्च" इत्याम्प्रत्ययः ॥

ततः खड्गं समुद्यम्य रावणः क्रूरविग्रहः ।
वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिश्वसन् ॥ ९४ ॥

९४. अथानभिहिताधिकारः । तत इति ॥ ततः सीतावचनानन्तरं क्रुद्धः अत एव क्रूरविग्रहो भीषणाकारो रावणः वैदेहीमात्मानं चेति शेषः । अन्तरा उभयोर्मध्य इत्यर्थः । खड्गमुद्यम्य क्षणं विनिश्वसन् रोषाद्दीर्घमुष्णं च निःश्वसन्नित्यर्थः ऊचे वक्ष्यमाणं वाक्यमुवाच । क्रमात्खड्गादिषु "कर्मणि द्वितीया" "अन्तरान्तरेण युक्ते" "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया ॥

चिरेणानुगुणं प्रोक्ता प्रतिपत्तिपराङ्मुखी ।
न मासे प्रतिपत्तासे मां चेन्मर्त्तासि मैथिलि ॥ ९५ ॥

९५. चिरेणेति ॥ मैथिलि चिरेण चिरकालेनानुगुणमनुकूलं प्रियं प्रोक्ता । दुहादित्वादप्रधाने कर्मणि क्तः । तथापि प्रतिपत्तेरङ्गीकारस्य पराङ्मुखी । चिरेणेत्यपवर्गतृतीयार्थेऽव्ययम् । मां मासे मासान्न प्रतिपत्तासे चेत् न प्राप्स्यसे चेत् । पद्यतेर्लुटि "थासः से" इति से

आदेशः। मर्त्तासि मरिष्यसि ॥ "म्रियतेर्लुङ्लिङोश्च" इति नियमाल्लुटि परस्मैपदम् ॥ त्वं मामिति कर्त्तृकर्मकारकमध्यगतत्वात् "सप्तमीपञ्चम्यौ कारकमध्ये" इति मासे इति सप्तमी ॥

प्रायुङ्क्त राक्षसीर्भीमा मन्दिराय प्रतिव्रजन्[1]।
भयानि दत्त[2] सीतायै सर्वा यूयं कृते मम ॥ ९६ ॥

९६. प्रेति ॥ स रावणो मन्दिराय प्रतिव्रजन् मन्दिरं गच्छन् ॥ "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति चतुर्थी ॥ सर्वा यूयं मम कृते मदर्थं सीतायै भयानि दत्त भयान्युत्पादयतेत्यर्थः ॥ "चतुर्थी संप्रदाने" इति चतुर्थी ॥ भीमाः भयङ्करीः राक्षसीः प्रायुङ्क्त नियुक्तवान् ॥

गते तस्मिन् समाजग्मुर्भयाय प्रति मैथिलीम्[3]।
राक्षस्यो रावणप्रीत्यै क्रूरं चोचुरलं[4] मुहुः[5] ॥ ९७ ॥

९७. कर्मप्रवचनीयादिसूत्रचतुष्टयं तदधिकार एवोदाहृतत्वादत्र नोदाहृतम् ॥ गत इति ॥ तस्मिन् रावणे गते सति राक्षस्यः भयाय भयमुत्पादयितुम् ॥ "क्रियार्थोपपदस्य—" इत्यादिना चतुर्थी ॥ मैथिलीं प्रति समाजग्मुः। रावणप्रीत्यै रावणं प्रीणयितुम् ॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी ॥ मुहुर्मुहुः क्रूरं वाक्यमूचुः ॥

रावणाय नमस्कुर्याः[6] स्यात्[7]सीते स्वस्ति ते ध्रुवम्।
अन्यथा प्रातराशाय कुर्याम त्वामलं वयम् ॥ ९८ ॥

९८. रावणाय इति ॥ हे सीते रावणाय नमस्कुर्याः प्रणम। तदा ते तुभ्यं स्वस्ति भद्रं स्यात्। अन्यथा अनमस्कारे वयं त्वां प्रातराशाय

१ परिव्रजन् E2, D.
२ भयं दद्ध्वं T2, T3, T4.
३ मैथिलीं प्रति B.
४ क्रूरमूचु° T2, T3, T4.
५ °चुर्मुहुर्मुहुः T., G., Com.
६ मनः कुर्याः T2, T4.
७ सीते स्यात् E3.

प्रातर्भोजनाय अलं पर्याप्तं कुर्याम। सर्वत्र "नमःस्वस्ति—" इत्यादिना चतुर्थी ॥

तृणाय मत्वा ताः सर्वा वदन्तीस्त्रिजटावदत् ।
आत्मानं हत दुर्वृत्ताः स्वमांसैः कुरुताशनम् ॥ ९९ ॥

९९. तृणायेति ॥ वदन्तीरेवं प्रलपन्तीस्ताः सर्वा राक्षसीः त्रिजटा तृणाय मत्वा तृणं मत्वा अवदत् ॥ "मन्यकर्मण्यनादरे विभाषाप्राणिषु" इति चतुर्थी ॥ हे दुर्वृत्ताः दुराचाराः आत्मानं हत युष्मानेव मारयतेत्यर्थः । हन्तेर्लोटि थस्य तादेशः । स्वमांसैः करणैः ॥ "कर्तृकरणयोस्तृतीया" ॥ अशनं भोजनं कुरुत ॥

अद्य सीता मया दृष्टा[1] सूर्यं चन्द्रमसा सह ।
स्वप्ने[2] स्पृशन्ती मध्येन तनुः श्यामा सुलोचना ॥ १०० ॥

१००. अद्येति ॥ अद्यास्यां रात्रौ स्वप्ने मया । कर्त्तरि तृतीया । सीता चन्द्रमसा सह ॥ "सहयुक्तेऽप्रधाने" इति तृतीया ॥ सूर्यं स्पृशन्ती दृष्टा । लक्ष्मणेन सह रामं द्रक्ष्यतीति भावः । कीदृशी । मध्येनावलग्नेन तन्वी कृशा ॥ "येनाङ्गविकारः" इति तृतीया ॥ श्यामा युवती सुलोचना सुनेत्रा ॥

तास्तया तर्जिताः सर्वा मुखैर्भीमा यथायथम् ।
ययुः सुषुप्सवस्तल्पान् भीमैर्वचनकर्मभिः ॥ १०१ ॥

१०१. आप्तयेति ॥ आप्तया हितया त्रिजटया । कर्त्तरि तृतीया । तर्जिताः भर्त्सिताः मुखैर्भीमाः ॥ "येनाङ्गविकारः" इति तृतीया ॥ भीमैरितिपाठे "इत्थंभूतलक्षणे" इति तृतीया ॥ भीमैः वचनकर्मभिः उपलक्षिताः ॥ "इत्थंभूतलक्षणे" इत्यनेनैव तृतीया ॥ सर्वाः राक्षस्यः सुषुप्सवः स्वप्तुमिच्छवः सत्यः यथायथं यथास्वम् ॥ "यथास्वे यथायथम्" इति निपातः ॥ तल्पान् शय्याः ययुः ॥

---

१ स्वप्ने B., c., T2, T4.
२ दृष्टा c., B., T2, T4.
३ आप्तया T., G., Com.

गतासु तासु मैथिल्या[1] संजानानोऽनिलात्मजः ।
आयातेन[2] दशास्यस्य संस्थितोऽन्तर्हितश्चिरम् ॥ १०२ ॥

१०२. अथ युग्मेनाह गतास्विति ॥ तासु राक्षसीषु गतासु सतीषु अनिलात्मजो हनूमान् मैथिल्या संजानानः एषेति मैथिलीं जानन् ॥ "संप्रतिभ्यामनाध्याने" इत्यात्मनेपदम् ॥ "संज्ञोऽन्यतरस्यां कर्मणि" इति विकल्पात्कर्मणि तृतीया ॥ दशास्यस्यायातेनागमनेन हेतुना ॥ "हेतौ" इति तृतीया ॥ चिरमन्तर्हितस्तिरोहितः सन् संस्थितः ॥

ऋणाद्बद्ध इवोन्मुक्तो वियोगेन क्रतुद्विषः ।
हेतोर्बोधस्य मैथिल्याः प्रास्तावीद्रामसंकथाम्[3] ॥ १०३ ॥

१०३. ऋणादिति ॥ ऋणाद्धेतोर्बद्ध इव रावणसंनिधानात्तदा निर्बद्धः ॥ "अकर्त्तर्यृणे पञ्चमी" इति पञ्चमी ॥ अथ क्रतुद्विषो रावणस्य वियोगेनापगमनेन हेतुना उन्मुक्तो निर्बन्धान्मुक्तः सन् "विभाषा गुणेऽस्त्रियाम्" इति पक्षे तृतीया ॥ मैथिल्याः कर्त्र्याः बोधस्य हेतोः बोधहेतौ सति बोधार्थमित्यर्थः ॥ "षष्ठी हेतुप्रयोगे" इति षष्ठी ॥ रामसंकथाः 'राजा दशरथो नाम रथकुञ्जरवाजिमान्' इत्यादिरामायणोक्ताः प्रास्तावीत् प्रारब्ध । स्तौतेर्लुङि सिचि वृद्धिः ॥ "इट ईटि" इति सलोपः ॥

तं दृष्ट्वाचिन्तयत्सीता हेतोः कस्यैष रावणः ।
अवरुह्य तरोरारादैति[4] वानरविग्रहः ॥ १०४ ॥

१०४. तमिति ॥ सीता तं हनूमन्तं दृष्ट्वा एषः रावणः एव वानरविग्रहो वानराकारः सन् तरोर्वृक्षादवरुह्य कस्य हेतोः केन हेतुना ॥ "सर्वनाम्नस्तृतीया च" इति चकारात्षष्ठी ॥ आरात्समीपमैतीत्यचिन्तयत् ॥

---

१ मैथिल्याः C., c.
Last pâdas omitted in T_3.
२ आयानेन T_4.
३ °संकथाः T., G., Com.
४ °देति T_2, T_4.

पूर्वस्मादन्यवद्भाति भावाद्दाशरथिं स्तुवन्[1] ।
ऋते क्रौर्यात्समायातो मां विश्वासयितुं नु किम्[2] ॥ १०५ ॥

१०५. पूर्वस्मादिति ॥ भावादनुरागाद्दाशरथिं रामं स्तुवन् पूर्वस्मात् क्षणं दृष्टाद्रावणादन्यवद्भाति अन्य इवावभासते । किं तु मां विश्वासयितुं क्रौर्यादृते क्रौर्यं विहाय समायातो नु किम् ॥ "अन्यारादितरर्ते—" इत्यादिनोभयत्र पञ्चमी ॥

इतरो रावणादेष राघवानुचरो[3] यदि ।
सफलानि निमित्तानि प्राक् प्रभातात्ततो मम ॥ १०६ ॥

१०६. इतर इति ॥ एष रावणादितरो रावणप्रतियोगी राघवार्थपरो रामकार्यतत्परो यदि ततस्तर्हि मम प्रभातात्प्राक् दृष्टानीति शेषः निमित्तानि वामाक्षिस्पन्दादीनि सफलानि । तेनैव सूत्रेणेतरपदाञ्चूत्तरपदयोगात्पञ्चम्यौ ॥

उत्तराहि वसन् रामः समुद्राद्रक्षसां पुरम्[4] ।
अवैल्लवणतोयस्य स्थितां दक्षिणतः कथम् ॥ १०७ ॥

१०७. उत्तराहीति ॥ समुद्रादुत्तराहि उत्तरदिग्भागे दूरे ॥ "आहि च दूरे" "उत्तराच्च" इत्याहिप्रत्ययः ॥ तद्योगात् "अन्यारात्—" इत्यादिना पञ्चमी ॥ वसन् रामो लवणतोयस्य लवणोदस्य दक्षिणतो दक्षिणदिग्भागे ॥ "दक्षिणोत्तराभ्यामतसुच्" इत्यतसुच् ॥ तद्योगे "षष्ठ्यतसर्थप्रत्ययेन" इति षष्ठी ॥ स्थितां रक्षसां पुरीं लङ्कां कथमवैत् अवगतवान् ॥

दण्डकां दक्षिणेनाहं सरितोऽद्रीन् वनानि च ।
अतिक्रम्याम्बुधिं[5] चैवं[6] पुंसामगममाहृता ॥ १०८ ॥

---

१ स्मरन् T3.
२ न किम् T2, T4.
३ राघवार्थकरो D.
राघवार्थपरो T2, T4, T., G., Com.
राघवार्थचरो T3.
४ पुरीम् T2, T3, T4, T., G., Com.
५ अतिक्रम्योदधिं T., G., Com.
६ चैवं T3.
चैषा T2, T4.

१०८. दण्डकामिति ॥ किं चाहं दण्डकां दक्षिणेन दण्डकाया दक्षिणतः ॥ "एनबन्यतरस्यामदूरेऽपञ्चम्याः" इत्येनप् ॥ "एनपा द्वितीया" इति द्वितीया ॥ सरितोऽद्रीन्वनानि चोदधिं चैवातिक्रम्य पुंसामगममगम्यं देशम् ॥ "ग्रहवृद्दनिश्चिगमश्च" इति कर्मण्यप्प्रत्ययः ॥ तद्योगात्पुंसामिति कर्मणि षष्ठी । आहृता आनीता ॥

पृथङ्नभस्वतश्चण्डाद्वैनतेयेन वा[1] विना ।
गन्तुमुत्सहते नैवं[2] कश्चित् किमुत वानरः ॥ १०९ ॥

१०९. पृथगिति ॥ चण्डान्नभस्वतश्चण्डमारुतात्पृथक् पृथग्भूतं वैनतेयेन गरुडेन वा विना ॥ "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्" इति विकल्पात्पञ्चमी तृतीया च ॥ कश्चिदिदं दुर्गं गन्तुं नोत्सहते न शक्नोति ॥ "शकधृष—" इत्यादिना तुमुन्प्रत्ययः ॥ वानरः किमुत नोत्सहत इति किमु वक्तव्यमित्यर्थः ॥

इति चिन्तावतीं कृच्छ्रात्समासाद्य कपिद्विपः ।
मुक्तां स्तोकेन रक्षोभिः प्रोचेऽहं रामकिङ्करः ॥ ११० ॥

११०. इतीति ॥ इतीत्थं चिन्तावतीं चिन्ताक्रान्तां रक्षोभिः कर्तृभिः स्तोकेन लेशेनापि मुक्तां सीतां कृच्छ्रात्समासाद्य ॥ "करणे च स्तोकाल्पकृच्छ्र—" इत्यादिना विकल्पात्पञ्चमी तृतीया च ॥ कपिद्विपः कपिश्रेष्ठः अहं रामकिङ्करो रामदूत इति प्रोचे प्रोवाच ॥

विप्रकृष्टं[3] महेन्द्रस्य न दूरं[4] विन्ध्यपर्वतात् ।
नानभ्यासे[5] समुद्रस्य तव माल्यवति[6] प्रियः ॥ १११ ॥

१११. विप्रकृष्टमिति ॥ महेन्द्रस्य समुद्रतीरवर्तिनो महेन्द्रपर्वतस्य न विप्रकृष्टं न दूरं विन्ध्यपर्वताद्दूराद्दूरम् ॥ "दूरान्तिकार्थैः षष्ठ्यन्यतर-

१ वारिणा B.
२ नेदं T., G., Com.
३ न प्रकृष्टं D., T_3, T_4.
४ दूराद्रि° T., G., Com.
५ नानभ्याशे N., T., G., Com. नात्याभ्याशे T_3.
६ माल्यवतः C.

स्याम्" इति विकल्पान्महेन्द्रविन्ध्यपर्वतशब्दाभ्यां षष्ठीपञ्चम्यौ ॥ "दूरान्तिकार्थेभ्यो द्वितीया च" इति विप्रकृष्टदूरशब्दाभ्यामसत्त्ववचनाभ्यां प्रातिपदिकार्थे विकल्पाद्द्वितीयापञ्चम्यौ ॥ समुद्रस्य पूर्ववत् "दूरान्तिकार्थैः—" इत्यादिना वैकल्पिकी षष्ठी ॥ नानभ्याशे अभ्याशे समीप इत्यर्थः । नञ्द्वयप्रयोगस्य प्रकृतार्थगमकत्वात् ॥ "सप्तम्यधिकरणे च" इति चकारात्पूर्ववदसत्त्ववचनादन्तिकार्थात्प्रातिपदिकार्थे सप्तमी ॥ एवंभूतः अत्र माल्यवति पर्वते तव प्रियो रामः वसतीति शेषः ॥

असंप्राप्ते दशग्रीवे प्रविष्टोऽहमिदं वनम् ।
तस्मिन्प्रतिगते द्रष्टुं त्वामुपाक्रंस्यचेतितः[1] ॥ ११२ ॥

११२. असंप्राप्त इति ॥ दशग्रीवे असंप्राप्ते सति ततः प्रागेवेत्यर्थः । अहमचेतितोऽप्रज्ञातः सन्निदं वनं प्रविष्टः । तस्मिन्प्रतिगते सति ॥ "यस्य च भावेन भावलक्षणम्" इत्युभयत्र भावलक्षणसप्तमी ॥ त्वां द्रष्टुमुपाक्रंसि अप्रतिबन्धमुपक्रान्तवानस्मि ॥ "उपपराभ्याम्" इति वृत्तौ क्रमेर्लुङि तङि रूपम् ॥ "स्नुक्रमोः—" इत्यादिना इट्प्रतिषेधः ॥

तस्मिन्वदति[2] रुष्टोऽपि नाकार्षं देवि विक्रमम् ।
अविनाशाय कार्यस्य विचिन्वानः परापरम् ॥ ११३ ॥

११३. तस्मिन्निति ॥ हे देवि तस्मिन् राक्षसे वदति तथा प्रलपति सति रुष्टः क्रुद्धोऽपि अनादृत्येत्यर्थः ॥ "षष्ठी चानादरे" इत्यनादरे सप्तमी ॥ कार्यस्यागमनप्रयोजनस्याविनाशायाविघाताय परापरं पूर्वापरम् । द्वन्द्वैकवद्भावः । विचिन्वानो विचारयन् । चिनोतेर्लटः शानच् । विक्रमं पराक्रमं नाकार्षम् । करोतेर्लुङि मिपि सिचि वृद्धिः मिपश्चामादेशः ॥

वानरेषु कपिः स्वामी नरेष्वधिपतेः सखा ।
जातो रामस्य सुग्रीवस्ततो दूतोऽहमागतः[3] ॥ ११४ ॥

---

१ °मुपाक्रम्य° C.
२ वदतस्तस्य C.
३ ततोऽहं दूत आगतः E.

११४. वानरेष्विति ॥ वानरेषु स्वामी वानराणामीश्वरः सुग्रीवो नाम कपिः नरेष्वधिपतेर्नरेन्द्रस्य रामस्य सखा जातः ॥ "स्वामीश्वर—" इत्यादिना विकल्पादुभयत्र सप्तमी ॥ ततस्तयोः । सार्वविभक्तिकस्तसिः । अहं दूतः आगतः ॥

ईश्वरस्य निशाटानां विलोक्य निखिलां[1] पुरीम्[2] ।
कुशलोऽन्वेषणस्याहमायुक्तो दूतकर्मणि ॥ ११५ ॥

११५. अथ त्रिभिः कुलकेनाह ईश्वरस्येति ॥ अन्वेषणस्य कुशलोऽन्वेषणे निपुणो दूतकर्मण्यायुक्तो व्यापृतोऽहम् ॥ "आयुक्तकुशलाभ्यां चासेवायाम्" इति वैकल्पिकयौ षष्ठीसप्तम्यौ ॥ निशाटानां निशाचराणामीश्वरस्य ॥ "स्वामीश्वर—" इत्यादिना षष्ठी ॥ निखिलां पुरीं विलोक्य ॥

दर्शनीयतमाः पश्यन् स्त्रीषु दिव्यास्वपि स्त्रियः ।
प्राप्तो व्यालतमान् व्यस्यन् भुजङ्गेभ्योऽपि राक्षसान् ॥ ११६ ॥

११६. दर्शनीयेति ॥ दिव्यास्वपि स्त्रीषु तासां मध्येऽपि दर्शनीयतमाः अतिशयेन दर्शनीयाः अतिरमणीयाः ॥ "यतश्च निर्धारणम्" इति विकल्पान्निर्धारणे सप्तमी ॥ स्त्रियः स्त्रीः पश्यन् भुजङ्गेभ्यः सर्पेभ्योऽपि व्यालतमान् क्रूरतमान् ॥ "पञ्चमी विभक्ते" इति निर्धारणावधिविभागाश्रयात् पञ्चमी ॥ राक्षसान् व्यस्यन्निरस्यन् प्राप्तः ॥

भवत्यामुत्सुको रामः प्रसितः सङ्गमेन ते ।
मघासु कृतनिर्वापः[3] पितृभ्यो मां व्यसर्जयत्[4] ॥ ११७ ॥

११७. भवत्यामिति ॥ भवत्यामुत्सुकस्त्वय्युत्कण्ठितस्ते तव सङ्गमेन प्रसितः संगतावासक्तो रामः ॥ "प्रसितोत्सुकाभ्यां तृतीया च" इति विकल्पात्तृतीयासप्तम्यौ ॥ मघासु मघायुक्तकाले ॥ "नक्षत्रेण युक्तः

१ निखिलं पुरम् E_2.
२ पुरम् E_3, D.
३ कृतनिवापः T., G., Com.
४ व्यवर्जयत् T_3.

कालः" इत्यणि "लुबविशेषे" इति तस्य लुपि "लुपि युक्तवद्व्यक्तिवचने" इति प्रकृतिलिङ्गवचनत्वात् स्त्रीलिङ्गबहुत्वे "नक्षत्रे च लुपि" इति लुबन्तान्नक्षत्रवाचकशब्दाद्वैकल्पिकी सप्तमी॥ पितृभ्यः कृतनिवापः कृतपिण्डोदकक्रियः सन्। 'पितृदानं निवापः स्यात्' इत्यमरः। अत्र 'पितृभ्यः कृतनीवापः' इति पाठान्तरम्। तदा "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इत्युपसर्गस्य दीर्घः। मां व्यसर्जयत् इतः प्रेषितवानित्यर्थः॥

इदं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुलीयकम्।
भवत्याः स्मरतात्यर्थमर्पितं सादरं मम॥ ११८॥

११८. इदमिति॥ हे मैथिलि॥ "संबोधने च" इति प्रथमा॥ इदं काकुत्स्थस्य रामस्य संबन्धि॥ "षष्ठी शेषे" इति षष्ठी॥ अङ्गुलौ भवमङ्गुलीयम्॥ "जिह्वामूलाङ्गुलेश्छः" इति छः॥ तदेवाङ्गुलीयकमूर्मिका। स्वार्थे कः। 'अङ्गुलीयकमूर्मिका' इत्यमरः॥ "प्रातिपदिकार्थ—" इत्यादिना प्रथमा॥ प्रत्यभिज्ञायतेऽनेनेति प्रत्यभिज्ञानं चिह्नमत्यर्थं भवत्याः स्मरता भवतीमेव ध्यायता॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी॥ रामेण ममार्पितं मद्धस्ते न्यस्तमित्यर्थः॥ शेषे षष्ठी॥

जानीष्व प्रत्यभिज्ञानस्यातस्त्वमपि देवि ते।
आस्ते भर्त्तेति मां दृष्ट्वा भर्त्तुर्दूतं प्रियं कपिम्॥ ११९॥

११९. जानीष्वेति॥ हे देवि अतः अभिज्ञानाहर्त्तृत्वाद्भर्त्तुः प्रियं दूतं कपिमेनं मां दृष्ट्वा ते तव भर्त्ता राम आस्ते सुखेन तिष्ठतीति विश्वसेत्यर्थः। त्वमपि प्रत्यभिज्ञानस्य प्रत्यायकस्याभिज्ञानस्य अभिज्ञानेने-

---

१ अयं N., C., T1, B., D., E2, c.
२ °स्याङ्गुलीयकः N., C., T1, B., D., E2. °स्याङ्गुरीयकः c.
३ °मर्पितः N., C., T1, B., D., E2, c.
४ मयि E3.

त्यर्थः॥ "ज्ञोऽविदर्थस्य करणे" इति जानातेरवेदनार्थस्य करणे षष्ठी॥ सततं जानीष्व अनन्तरकर्त्तव्येऽभिज्ञानदानादौ प्रवर्त्तस्वेत्यर्थः। प्रवृत्तिवचनो जानातिरविदर्थ इति काशिका॥

रामस्य दयमानोऽसावध्येति तव लक्ष्मणः।
उपास्कृषातां राजेन्द्रावागमस्येह मा त्रसीः॥ १२०॥

१२०. रामस्येति॥ रामस्य दयमानो रामे दयां कुर्वन् तद्दुःखापनोदक इत्यर्थः। असौ लक्ष्मणस्तवाध्येति त्वां स्मारयतीत्यर्थः। इक् स्मरण इत्यस्माल्लट्। उभयत्र "अधीगर्थ—" इत्यादिना कर्मणि षष्ठी। राजेन्द्रौ रामलक्ष्मणौ इहागमस्योपास्कृषातामागमनमुपस्कृतवन्तौ दृढीकृतवन्तावित्यर्थः। "कृञः प्रतियत्ने" इति कर्मणि शेषे षष्ठी। सतो गुणान्तराधानं प्रतियत्नः। दार्ढ्यं च गुणः। कृञो लुङि "गन्धन—" इत्यादिना प्रतियत्ने तङि च्लेः सिच्॥ "उपात्प्रतियत्न—" इत्यादिना सुट् ककारात्पूर्वः॥ ततस्तस्मान्मा त्रसीः मा भैषीः। त्रस्यतेर्लुङि सिचि "नेटि" इति वृद्धिप्रतिषेधः। "इट ईटि" इति सलोपः॥

रावणस्येह[1] रोक्ष्यन्ति कपयो[2] भीमविक्रमाः।
नाथस्व[3] धृत्या वैदेहि मन्योरुज्जासयात्मनः॥ १२१॥

१२१. रावणस्येति॥ हे भीरु कपीनां विक्रमाः पराक्रमाः। क्रमेर्भावे घञ्॥ "नोदात्तोपदेशस्य—" इत्यादिना वृद्धिप्रतिषेधः॥ इह लङ्कायां रावणस्य रोक्ष्यन्ति रावणं भङ्क्ष्यन्तीत्यर्थः। रुजो भङ्ग इत्यस्माल्लृट्॥ "रुजार्थानां भाववचनानामज्वरेः" इति भावकर्तृकरुजार्थयोगाद्रावणस्येति कर्मणि शेषे षष्ठी॥ भाववचनानां भावकर्तृकाणामित्यर्थः। विक्रमाश्चात्र भावाः कर्त्तारः। हे वैदेहि धृत्याः धृतेर्नाथस्व आशास्स्व। धैर्यमवलम्बस्वेत्यर्थः॥ "आशिषि नाथः" इत्युपसंख्यानात्तङ्॥ आत्मनो मन्योः शोकस्योज्जासय मन्युं हिन्धीत्यर्थः॥ "जासिनिप्रहण—" इत्यादिना कर्मणि षष्ठी॥ जसु हिंसायामिति चौरादिको धातुः॥

---

१ रावणस्य च T_3.
२ कपीनां भीरु विक्रमाः T., G., Com.
३ धृत्या नाथस्व N., C., T., G., E_2, E_3, B.

राक्षसानां मयि गते रामः प्रणिहनिष्यति ।
प्राणानामपणिष्टायं[1] रावणस्त्वामिहानयन्[2] ॥ १२२ ॥

१२२. राक्षसानामिति ॥ मयि गते इतो गते सति रामो राक्षसानां प्रणिहनिष्यति राक्षसान् हनिष्यतीत्यर्थः ॥ "जासिनिप्रहण—" इत्यादिना कर्मणि षष्ठी ॥ संघातविगृहीतविपर्यस्तग्रहणादिह विपर्यासः ॥ "नेर्गदनद—" इत्यादिना णत्वम् ॥ त्वामिहानयन्नयं रावणः प्राणानामपणिष्ट प्राणान्विक्रीतवानित्यर्थः । पणेर्व्यवहारार्थाल्लुङि तङ् । अस्तुत्यर्थत्वात् "गुपूधूप—" इत्यादिना नायप्रत्ययः ॥ "व्यवहृपणोः समर्थयोः" इति कर्मणि शेषे षष्ठी ॥

अदेवीद्बन्धुभोगानां प्रादेवीदात्मसंपदम्[3] ।
शतकृत्वस्तवैकस्याः स्मरत्यह्नो[4] रघूत्तमः ॥ १२३ ॥

१२३. अदेवीदिति ॥ किं चायं रावणो बन्धुभोगानामदेवीत् तानपि विक्रीतवानित्यर्थः ॥ "दिवस्तदर्थस्य" इति कर्मणि षष्ठी ॥ आत्मसंपदं स्वलक्ष्मीं प्रादेवीद्विक्रीतवान् ॥ "विभाषोपसर्गे" इति वैकल्पिकी द्वितीया ॥ पुनरपि रामानुरागं वर्णयति । रघूत्तमो राम एकस्याह्न एकस्मिन्नहनि ॥ "कृत्वोऽर्थप्रयोगे कालेऽधिकरणे" इत्यधिकरणार्थे षष्ठी ॥ शतकृत्वः शतवारं तव स्मरति त्वां स्मरति ॥ "अधीगर्थ—" इत्यादिना कर्मणि षष्ठी ॥

तवोपशायिका यावद्राक्षस्यश्चेतयन्ति न[5] ।
प्रतिसंदिश्यतां तावद्भर्तुः शार्ङ्गस्य[6] मैथिलि[7] ॥ १२४ ॥

१२४. तवेति ॥ हे मैथिलि तवोपशायिकाः पर्यायशायिन्यः ॥ "पर्यायार्हणोत्पत्तिषु ण्वुच्" इति पर्यायार्थे ण्वुच् ॥ राक्षस्यो यावन्न चेत-

---

१ °मपनिष्टासौ D., c. °मपणिष्टासौ C., T1, T3. °मपनिष्टायं E2, E3.
२ °हानयत् T3.
३ °वीदर्थसंपदम् E3. °वीदात्मसंपदः c., B. °वीदात्मसंभवम् T3.
४ स्मरत्याह्नि E2.
५ नः T4.
६ मार्गस्य E3.
७ मैथिली c.

यन्ति न प्रबुध्यन्ते. तावदेव शृङ्गस्य विकारः शार्ङ्गं धनुस्तस्य भर्त्तुः धारकस्य धनुर्धरस्य रामस्य प्रतिसंदिश्यताम् । संदेष्टुस्तस्य प्रतिसंदेशः क्रियतामित्यर्थः । भर्त्तुरिति शेषे षष्ठी । अन्यत्र कृद्योगात्कर्मणि षष्ठी ॥

पुरः प्रवेशमाश्चर्यं बुद्ध्वा[1] शाखामृगेण सा ।
चूडामणिमभिज्ञानं ददौ रामस्य संमतम्[2] ॥ १२५ ॥

१२५. पुर इति ॥ सा सीता शाखामृगेण कपिना कर्त्रा पुरो लङ्कानगरस्य प्रवेशम् ॥ "उभयप्राप्तौ कर्मणि" इति कर्मणि षष्ठी ॥ आश्चर्यमद्भुतं बुद्ध्वा रामस्य संमतं रामेण संमन्यमानम् ॥ "मतिबुद्धि—" इत्यादिना वर्त्तमाने क्तः ॥ "क्तस्य च वर्त्तमाने" इति "न लोक—" आदिप्रतिषेधबाधेन षष्ठी ॥ चूडामणिं शिरोमाणिक्यमेवाभिज्ञानं ददौ दत्तवती ॥

रामस्य शयितं भुक्तं जल्पितं हसितं[3] स्थितम्[4] ।
प्रक्रान्तं च मुहुः पृष्ट्वा हनूमन्तं व्यसर्जयत्[5] ॥ १२६ ॥

१२६. रामस्येति ॥ रामस्य शेतेऽस्मिन्निति शयितं शयनस्थानं तथा भुङ्क्तेऽस्मिन्निति भुक्तं भोजनस्थानं जल्पितं जल्पनं हसितं हसनं स्मितं तिष्ठत्यस्मिन्निति स्थितं निवासस्थानं प्रक्रामति गच्छत्यस्मिन्निति प्रक्रान्तं चङ्क्रमणस्थानं च मुहुः पृष्ट्वा हनूमन्तं व्यसर्जयत् । अत्र जल्पितहसितयोः किं जल्पन् हसन् तिष्ठतीति सत्ताप्रश्नः ॥ "नपुंसके भावे क्तः" इति भावे क्तः ॥ तद्योगात् "नपुंसके भाव उपसंख्यानम्" इति षष्ठी । अन्यत्र क्व शेते क्व भुङ्क्ते इत्यादिस्थानप्रश्नः ॥ "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इत्यधिकरणे क्तः ॥ तद्योगात् "अधिकरणवाचिनश्च" इति षष्ठी ॥ ध्रौव्यकर्मत्वम् ॥

१ मत्वा E_3.
 दृष्ट्वा T_2, T_3, T_4.
२ सम्मदम् T_3.
३ हषितं T_3.
४ शयितं T_3.
५ व्यवर्जयत् T_3.

असौ दधदभिज्ञानं चिकीर्षुः कर्म दारुणम्[१] ।
गामुकोऽप्यन्तिकं[२] भर्त्तुर्मनसाचिन्तयत्क्षणम्[३] ॥ १२७ ॥

१२७. असाविति ॥ अभिज्ञानं चिह्नं शिरोरत्नं दधत् दधानः । दधातेर्लटः शत्रादेशः । भर्त्तुः स्वामिनो रामस्यान्तिकं गामुको गमनशीलोऽपि ॥ "लषपत—" इत्यादिना गमेरुकञ् ॥ असौ हनूमान् दारुणं कर्म वनभङ्गादिभीषणकर्म चिकीर्षुः कर्त्तुमिच्छुः । करोतेः सन्नन्तादुप्रत्ययः । क्षणं मनसा अचिन्तयत् वक्ष्यमाणमालोचितवान् । सर्वत्र "न लोक—" इत्यादिना कृद्योगषष्ठीप्रतिषेधात् कर्मणि द्वितीया ॥

कृत्वा कर्म यथादिष्टं[४] पूर्वकार्याविरोधि[५] यः ।
करोत्यभ्यधिकं कृत्यं[६] तमाहुर्दूतमुत्तमम् ॥ १२८ ॥

१२८. अथ त्रिभिश्चिन्ताप्रकारमेवाह कृत्वेति ॥ यो दूतो यथोद्दिष्टं स्वामिना यथोपदिष्टं कर्म कृत्वा । अव्यययोगात् "न लोकाव्यय—" इत्यादिना षष्ठीप्रतिषेधः । पूर्वकार्याविरोधि प्रागनुष्ठितकर्मवैफल्यानापादकमभ्यधिकं स्वाम्यनुक्तं कृत्यं कार्यं करोति तमुत्तमं दूतमाहुः । लयोगात्षष्ठीप्रतिषेधः ॥

वैदेहीं दृष्टवान् कर्म कृत्वान्यैरतिदुष्करम्[७][८] ।
यशो यास्याम्युपादाता वार्त्तामाख्यायकः प्रभोः ॥ १२९ ॥

१२९. वैदेहीमिति ॥ वैदेहीं दृष्टवान् अन्यदपि स्वामिनिर्दिष्टादधिकं च दुष्करं कर्म कृत्वा यशः कीर्त्तिमुपादाता साधु संपादयिता सन् । साधुकारिणि तृन् । प्रभोः रामस्य वार्त्तां सीतादर्शनवृत्तान्तमाख्यायकः आख्यास्यन् ॥ "तुमुन्ण्वुलौ—" इत्यादिना भविष्यदर्थे ण्वुल्-

१ दुष्करम् T2.
२ °प्यन्तिके B.
३ क्षणात् E3.
४ यथोद्दिष्ट T2, T3, T4, Com.
५ पूर्वकर्माविरोधि T2, T3, T4.
६ भृत्यस्त° T3.
७ कृत्वान्यदपि दुष्करम् T., G., Com.
८ °रपि दुष्करम् N., C., T1.

प्रत्ययः ॥ "अकेनोः—" इत्यादिना षष्ठीप्रतिषेधः ॥ यास्यामि गमिष्यामि ॥

राक्षसेन्द्रस्य संरक्ष्यं मया लव्यमिदं वनम् ।
इति संचिन्त्य सदृशं नन्दनस्याभनक् कपिः ॥ १३० ॥

१३०. राक्षसेति ॥ राक्षसेन्द्रस्य रावणस्य संरक्ष्यम् ॥ "कृत्यानां कर्त्तरि वा" इति विकल्पात्कर्त्तरि षष्ठी ॥ नन्दनस्य सदृशं तेन तुल्यमित्यर्थः ॥ "तुल्यार्थैः—" इत्यादिना विकल्पात्षष्ठी ॥ इदं वनं मया लव्यं छेद्यम् ॥ "कृत्यानां कर्त्तरि वा" इति विकल्पात् तृतीया ॥ इति संचिन्त्यालोच्य कपिरभनक् बभञ्ज । भञ्जेर्लङि "हल्ङ्याब्भ्यः—" इत्यादिना तिलोपः । चोः कुत्वम् ॥

राघवाभ्यां शिवं दूतस्तयोरहमिति ब्रुवन् ।
हितो[1] भनज्मि रामस्य कः[2] किं ब्रूतेऽत्र राक्षसः ॥ १३१ ॥

१३१. राघवाभ्यामिति ॥ राघवाभ्यां रामलक्ष्मणाभ्यां शिवं भद्रमस्त्विति शेषः । अहं तयोर्दूतः रामस्य हितः आप्तः इति ब्रुवन् भनज्मि भङ्क्ष्यामीत्यर्थः । भञ्जेः सामीप्ये लटि मिप् । को राक्षसः किं ब्रूते रामकार्यप्रवृत्तस्य मे न कश्चित्प्रतिबन्धक इत्यर्थः । इति निश्चित्य बभञ्जेत्युत्तरेण संबन्धः । अत्र "चतुर्थी चाशिषि—" इत्यादिना शिवादिशब्दयोगे वैकल्पिक्यौ चतुर्थीषष्ठ्यौ ॥

विलुलित[3]पुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमम् ।
कुसुमनिपात[4]विचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ॥
शकुननिनादनादि[5]ककुब्विलोलविपलायमानहरिणम् ।
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥१३२॥

१ हितं हिनस्मि T_3.
२ कं T_3.
३ विगलित T_2.
४ °निपातविभ्रवसुधं T., G., Com.
५ °नादितादिशं T_2, T., G., Com. नादितककु° E_3, C.

१३२. अथ सर्गान्तत्वाद्भिन्नवृत्तं श्लोकमाह । विलुलितेति ॥ विलुलितैर्विक्षिप्तैः पुष्परेणुभिः कपिशं पिशङ्गं प्रशान्तानि प्रसन्नानि कलिकाः कोरकाः पलाशानि पर्णानि कुसुमानि यस्मिन् तत् कुसुमनिपाते चित्रा चित्ररूपा वसुधा यस्मिन् तत् सशब्दाः शब्दायमाना निपतन्तः प्रचरन्तो द्रुमोत्काः निवासवृक्षोत्सुकाश्च शकुनाः पक्षिणो यस्मिन् तत् तथा शकुननिनादैः पक्ष्यारावैः नादिताः प्रतिध्वानिता दिशाः दश दिशो येन तत् । 'टाबन्तत्वं हलन्तानां यथा वाचा निशा दिशा' इति वचनात् टाबन्तस्योपसर्जनह्रस्वत्वम् । विलोलाश्चपलाः विपलायमाना भयात्पलाय्य गच्छन्तो हरिणा मृगाः यस्मिन् तत् हरिणविलोचनायाः सीतायाः अधिवसतिं निवासस्थानं रिपुवनं रावणोद्यानं पवनात्मजो हनूमान् बभञ्ज ॥ वैकृतमश्वललितं वृत्तम् । 'यदिह नजौ भजौ जभलगास्तदाश्वललितं शिवार्कयति तद्' इति लक्षणात् । अत्र विलुलितेत्यादि स्वभावोक्तिः हरिणविलोचनेत्युपमा । यमकविशेषस्तु शब्दालङ्कारः ॥

इति भट्टिकाव्येऽधिकारकाण्डेऽशोकवनिकाभङ्गनामाष्टमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने अष्टमः सर्गः ॥

॥ श्रीः ॥

अथ नवमः सर्गः ।

द्रुभङ्गध्वनिसंविग्नाः कुर्वत्पक्षिकुलाकुलाः[1] ।
अकार्षुः क्षणदाचर्यो रावणस्य निवेदनम् ॥ १ ॥

१. द्रुभङ्गेति ॥ द्रुभङ्गो द्रुमभङ्गः । 'पलाशी द्रुद्रुमागमाः' इत्यमरः । तेन यो ध्वनिस्तेन संविग्नाः संत्रस्ताः रुदद्भिः क्रन्दद्भिः पक्षिकुलैराकुलास्तदारवव्याकुलचित्ता इत्यर्थः क्षणदाचर्यो राक्षस्यो रावणस्य निवेदनं वक्ष्यमाणप्रकारेण विज्ञापनमकार्षुः । रावणस्येति शेषे षष्ठी ॥

यदताप्सीच्छनैर्भानुर्यत्रावासीन्मितं मरुत्[2] ।
यदाप्यानं[3] हिमोस्रेण भनक्त्युपवनं[4] कपिः ॥ २ ॥

२. यदिति ॥ यद्वनं भानुः सूर्यः शनैरताप्सीत् तदाज्ञया स्तोकं तपति स्म । तपेर्लुङि सिचि हलन्तलक्षणा वृद्धिः । यत्र मरुद्वायुर्मितं मन्दमवासीद्वाति स्म । वातेर्लुङि सिचीट् । हिमोस्रेण हिमकिरणेन । 'किरणोस्रमयूख—' इत्यमरः । आप्यानमाप्यायितं वर्धितम् । प्यायः कर्मणि क्तः ॥ "ओदितश्च" इति निष्ठानत्वे "लोपो व्योर्वलि" इति यलोपः । तदुपवनं कपिः कोऽपि भनक्ति रुजति । भञ्जेर्लट् ॥

ततोऽशीतिसहस्राणि किङ्कराणां समादिशत् ।
इन्द्रजित्सूर्विनाशाय मारुतेः क्रोधमूर्च्छितः[5] ॥ ३ ॥

३. तत इति ॥ ततो निवेदनानन्तरमिन्द्रजितं सूत इतीन्द्रजित्सूः रावणः । सूतेः "सत्सूद्विष—" इत्यादिना क्विप् । क्रोधमूर्च्छितः क्रोधान्धः सन् मारुतेर्हनूमतः विनाशाय वधाय किं कुर्वन्तीति

---

१ कूजत्प° D., E3, E2.
रुवत्प° T2, T3, T4.
रुदत्प° T., G., Com.
२ °सीन्मरुन्मितम् D.
३ तदा° T2, T3, T., G., Com.
४ बभञ्जोप° T4.
५ कोप E3.

किङ्कराः भृत्याः ॥ "दिवाविभा—" इत्यादिना करोतेष्टः ॥ तेषां किङ्कराणामष्टौ दश दशकाः परिमाणमेषामशीतिमशीतिसंख्याकानि । "पङ्क्ति—" आदिसूत्रेऽष्टदशशब्दस्याशीति वा भवतीति प्रत्ययनिपातनात्साधुः । 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः' इत्यमरः । सहस्राणि समादिशत् समादिष्टवान् ॥

शक्त्यृष्टिपरिघप्रा[1]सगदामुद्गरपाणयः ।
व्यश्नुवाना दिशः[2] प्रापुर्वनं दृष्टिविषोपमाः ॥ ४ ॥

४. शक्तीति ॥ शक्त्यादयः प्रहरणविशेषाः पाणौ येषां ते तथोक्ताः ॥ "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति सप्तम्याः परनिपातः ॥ दृष्टौ विषं यस्य तेन सर्पविशेषेणोपमा सादृश्यं येषां ते तदुपमाः तद्वद्दृष्ट्यैव परप्राणहारिणस्ते रावणकिङ्कराः दिशो व्यश्नुवानाः व्याप्नुवन्तः वनं प्रापुः ॥

दध्वान मेघवद्भीममादाय परिघं कपिः ।
नेदुर्दीप्ता[3]युधास्तेऽपि तडित्वन्त इवाम्बुदाः ॥ ५ ॥

५. दध्वानेति ॥ तदा कपिर्हनूमान् भीमं परिघमर्गलमादाय । 'परिघोऽर्गलदण्डयोः' इति विश्वः । मेघवन्मेघेन तुल्यं दध्वान जगर्ज । दीप्तायुधास्ते किङ्करा अपि तडित्वन्तो विद्युत्वन्तोऽम्बुदाः मेघा इव नेदुर्जगर्जुः । उपमालङ्कारः ॥

कपिनाम्भोधिधीरेण समगंसत राक्षसाः ।
वर्षास्वुद्धततोयौघाः समुद्रेणे[4]व सिन्धवः ॥ ६ ॥

६. कपिनेति ॥ अथ राक्षसा अम्भोधिधीरेण तद्वद्दुरवगाहेन कपिना हनूमता वर्षासु प्रावृट्सु उद्धततोयौघाः उद्रिक्तजलप्रवाहाः सिन्धवो

---

१ प्राश D.
२ दिशं c.
दिश आपुः D.
३ °दीप्ता यथा तेऽपि T_3, T_4.
४ समुद्रेणैव D., T_2

नद्यः समुद्रेणेव समगंसत संगताः । संपूर्वाद्गमेर्लुङि "समो गम्यृच्छि—" इत्यादिना तङि च्लेः सिच्। उपमालङ्कारः ॥

लाङ्गूलमुद्धतं धुन्वन्[1]नुद्वहन्[2] परिघं गुरुम्[3] ।
तस्थौ तोरणमारुह्य[4] पूर्वं[5] न प्रजहार सः ॥ ७ ॥

७. लाङ्गूलमिति ॥ स हनूमान् उद्धतमुत्क्षिप्तं लाङ्गूलं वालधिं धुन्वंश्चालयन् गुरुं परिघमर्गलमुद्धृत्योद्यम्य तोरणमारुह्य तस्थौ । स्वयं पूर्वं न प्रजहार । वीरधर्मत्वात् 'नायुध्यमानम्' इति निषेधाच्चेति भावः ॥

अथ सिचि वृद्ध्यधिकारः ।

अक्षारिषुः[6] शराम्भांसि तस्मिन् रक्षःपयोधराः[7] ।
न[8] चाह्वालीन्न चात्राजीत्त्रासं कपिमहीधरः ॥ ८ ॥

८. अक्षारिषुरिति ॥ रक्षांस्येव पयोधराः मेघास्तस्मिन् कपिमहीधरे शरानेवाम्भांसि अक्षारिषुः ववृषुरित्यर्थः । क्षरतिरयं सकर्मकोऽपि भवति 'तेषु क्षरत्सु बहुधा मदवारिधाराः' इत्यादिप्रयोगदर्शनात्। कपिरेव महीधरोऽद्रिः नाह्वालीत् न चचाल । ह्वल चलने । उभयत्रापि "अतो हलादेर्लघोः" इति विकल्पे प्राप्ते "अतो ल्रान्तस्य" इति नित्यं सिचि वृद्धिः । त्रासं भयं च नात्राजीन्नागमत् । पूर्ववद्विकल्पापवादेन "वदव्रज—" इत्यादिना नित्यं वृद्धिः । रूपकालङ्कारः । अचलनादिसाधकसद्भावात् ॥

अवादीत्तिष्ठतेत्युच्चैः प्रादेवीत्परिघं ततः[9] ।
तथा[10] यथा रणे प्राणान् बहूनाम्[11]ग्रहीद् द्विषाम् ॥ ९ ॥

---

१ धून्व° T2, T4.
२ °न्नुद्धृत्य T., G., Com.
३ कपिः E2.
४ मासाद्य C.
५ न पूर्वं T3.
६ अक्षाविषुः E2.
७ °पयोमुचः T2, T4.
८ अह्वालीन्नच नात्रा° C., D., T2, T4.
अह्वालीन्नैव चा° E3.
९ कपिः N., C., T1.
१० यथा तथा B.
११ बहूनां न्यग्रहीद् T4.

९. अवादीदिति ॥ कपिर्हनूमान् हे मूर्खास्तिष्ठत क यास्यथेत्युच्चैरवादीत् ॥ "वदव्रज—" इत्यादिना नित्यं वृद्धिः ॥ परिघं परिघेण ॥ "दिवः कर्म च" इति वैकल्पिकी साधकतमस्य कर्मसंज्ञा ॥ तथा तेन प्रकारेण प्रादेवीत् विजिगीषितवान् प्रहृतवानित्यर्थः। दीव्यतेर्लुङि "नेटि" इति वृद्धिप्रतिषेधः। यथा येन प्रकारेण बहूनां द्विषां प्राणानग्रहीत् स्वयं गृहीतवान् परिघेणैव बहूनि जघानेत्यर्थः। ग्रहेर्लुङि "ह्यन्तक्षण—" इत्यादिना वृद्धिप्रतिषेधः ॥

व्रणैरवमिषू रक्तं देहैः[१] प्रौर्णाविषुर्भुवम्।
दिशः प्रौर्णविषुश्चान्ये यातुधाना भवद्भियः[२] ॥ १० ॥

१०. व्रणैरिति ॥ यातुधानाः केचिद्राक्षसाः व्रणैः प्रहारमार्गैः रक्तं रुधिरमवमिषुर्वमन्ति स्म। वमेर्लुङि "ह्यन्त—" इत्यादिना वृद्धिप्रतिषेधः। देहैर्भुवं भूमिं प्रौर्णाविषुराच्छादयन् मम्रुरित्यर्थः। अन्ये भवद्भियो जायमानभयाः सन्तः दिशः प्रौर्णविषुराच्छादयन् पलायिता इत्यर्थः ॥ "विभाषोर्णोः" इतीडादेरङित्वपक्षे "ऊर्णोतेर्विभाषा" इति विभाषावृद्धिप्रतिषेधादेकत्र सिचिवृद्धिरन्यत्र गुणः। उभयत्राड्वृद्धिसहिता वृद्धिः ॥

अराणिषुश्च्युतोत्साहा[३] भिन्नदेहाः प्रियासवः।
कपेर्त्रासिषुर्नादान्[४] मृगाः[५] सिंहध्वनेरिव ॥ ११ ॥

११. अराणिषुरिति ॥ प्रियासवः प्रियप्राणाः केचित् भिन्नदेहा अत एव च्युतोत्साहा नष्टोत्साहाः सन्तः अराणिषुः केवलमाक्रन्दन्। किं च कपेर्नादात्सिंहनादाद्गजाः सिंहध्वनेः सिंहघोषादिव अत्रसिषुरभैषुः। उभयत्रापि "अतो हलादेर्लघोः" इति वैकल्पिकौ वृद्धितदभावौ ॥

---

१ प्राणै° T4.
२ प्रोर्णविषु° B.
३ अक्राणिषुः C., c., E2, E3, B., T1.
४ °त्रासिषु° T., G., Com.
५ गावः T4.
गजाः T., G., Com.

अथेट्प्रतिषेधाधिकारः ।

मायानामीश्वरास्तेऽथ[1] शस्त्रहस्ता रथैः कपिम् ।
प्रत्यावघृतिरे हन्तुं हन्तव्या मारुतेः पुनः ॥ १२ ॥

१२. मायानामिति ॥ अथ मायानां कपटानामीश्वराः प्रभवाः ॥ "स्थेश-भास—" इत्यादिना ईशेर्वरच्चि "नेड्वशि कृति" इतीट्प्रतिषेधः ॥ शस्त्रहस्ताः शस्त्रपाणयः मारुतेर्हनूमतो हन्तव्याः वध्याः ॥ "कृत्यानां कर्त्तरि वा" इति कर्त्तरि षष्ठी ॥ "एकाच उपदेशेऽनुदात्तात्" इति हन्तेरिट्प्रतिषेधः ॥ ते राक्षसाः रथैः साधनैः कपिं मारुतिं हन्तुं पुनः प्रत्यावघृतिरे भूयः प्रतिनिवृत्ताः ॥ "दाम्नीशस—" इत्यादिना शसे-ष्ट्रनि शस्त्रम् ॥ "हसिमृग्—" इत्यादिना हसेरौणादिके तन्प्रत्यये हस्ताः ॥ "हनिकुश—" इत्यादिना क्थन्प्रत्यये रथः ॥ "तितुत्र—" इत्यादिना सर्वत्रेट्प्रतिषेधः ॥

तांश्चेतव्यान् क्षितौ श्रित्वा वानरस्तोरणं युतान् ।
जघानाधूय परिघं विजिघृक्षून् समागतान् ॥ १३ ॥

१३. तानिति ॥ वानरो हनूमान् क्षियन्ति निवसन्त्यस्यामिति क्षितिः क्षोणिः । स्त्रियां क्तिन् ॥ "तितुत्र—" इत्यादिना इट्प्रतिषेधः ॥ तस्यां चेतव्यान् चेतुमर्हान् हत्वा राशीकर्त्तव्यानित्यर्थः । चिनोतेस्तव्यः ॥ "एकाच उपदेशेऽनुदात्तात्" इतीट्प्रतिषेधः ॥ युतानेकार्थतया मिथः संगतान् । यौतेः कर्त्तरि क्तः । विजिघृक्षून् विग्रहीतुमिच्छून् विरुरुत्सून् । ग्रहेः सन्नन्तादुप्रत्ययः ॥ "रुदविद—" इत्यादिना सनः कित्वात्संप्र-सारणादिकार्यम् ॥ "सनि ग्रहगुहोश्च" इतीट्प्रतिषेधः ॥ समागतान् युयुत्सया प्राप्तांस्तान्राक्षसान् तोरणं श्रित्वा आश्रित्य ॥ "श्र्युकः किति" इतीट्प्रतिषेधः ॥ युतानित्युक उदाहरणम् । परिघमाधूय परिभ्राम्य जघान ॥

---

[1] °स्तेऽपि N., C., T1.

संजुघुक्षव आयूंषि ततः प्रतिरुरूषवः ।
रावणान्तिकमाजग्मुर्हतशेषा निशाचराः ॥ १४ ॥

१४. समिति ॥ ततो वधानन्तरं हतेषु शेषाः शिष्टाः निशाचरा आयूंषि जीवितानि संजुघुक्षवः संगूहितुं संगोप्तुमिच्छवः सन्तः । गुहेः सन्नन्तादुप्रत्ययः ॥ "सनि ग्रहगुहोश्च" इतीट्प्रतिषेधः । प्रतिरुरूषवः प्रतिरवितुं प्रत्याख्यातुमिच्छवः । रौतेः सन्नन्तादुप्रत्ययः ॥ "सनि ग्रहगुहोश्च" इति चकारादुगन्तसमुच्चयनादिट्प्रतिषेधः । रावणान्तिकमाजग्मुः ॥

एकेन बहवः शूराः साविष्काराः प्रमत्तवत् ।
वैमुख्यं चकृमेत्युचैरूचुर्दशमुखान्तिके ॥ १५ ॥

१५. एकेनेति ॥ एकेन कपिना निमित्तेन बहवः शूराः साविष्काराः सात्मश्लाघा वयं प्रमत्तवत् प्रमत्तैस्तुल्यं वैमुख्यं युद्धपराङ्मुखत्वं चकृम अकार्ष्म । करोतेर्लिटि मसो मादेशः । क्रादिनियमादिडभावः । अत्र राक्षसानां चित्तविक्षेपात्स्वव्यापारेऽपि व्यामोहात्परोक्षता समस्तीत्युत्तमपुरुषेऽपि न क्षतिः । अत एवोत्तमपुरुषविषयेऽपि चित्तव्याक्षेपात्परोक्षता संभवत्येवेति काशिका । इति दशमुखान्तिके उच्चैरूचुः ॥

मांसोपभोगसंशूनानुद्विग्नांस्तानवेत्य सः ।
उद्वृत्तनयनो मित्रान् मन्त्रिणः स्वान् व्यसर्जयत् ॥ १६ ॥

१६. मांसेति ॥ सः रावणः तान् राक्षसान् उद्विग्नान्भीतानवेत्य ज्ञात्वा उद्वृत्तनयनः क्रोधात्प्रलुठिताक्षितारकः सन् ॥ "यस्य विभाषा" इति वृतेर्निष्ठायामिडागमाभावः ॥ मांसोपभोगेन मांसभक्षणेन संशूनान् सम्यक् पीनान् । श्वयतेः कर्त्तरि क्तः ॥ "ओदितश्च" इति निष्ठानत्वम् ॥ यजादित्वात्संप्रसारणे "संप्रसारणाच्च" इति पूर्वरूपत्वम् ॥ "हलः"

१ प्रतिरुरुत्सवः E_3.
२ °मासेदुर्हु° E_3.
३ °पयोग T_2, T_4.
४ °नुद्विग्नस्ता° D.
५ मन्त्रिणोऽस्मान्व्य E_2.
६ ध्यसर्जयत् T_3.

इति दीर्घः ॥ "श्वीदितो निष्ठायाम्" इतीडभावः ॥ एवमुद्धिन्नेऽपि निष्ठानत्वे इट्प्रतिषेधः । मिन्नान् स्निग्धान् मांसाहारमसृणगात्रानित्यर्थः । ञिमिदा स्नेहन इत्यस्मात्कर्त्तरि क्तः ॥ "रदाभ्याम्—" इत्यादिना निष्ठानत्वम् ॥ "ओदितश्च" इतीट्प्रतिषेधः ॥ स्वान्मन्त्रिणः सचिवान्व्यसर्जयत् ॥

प्रमेदिता:[1] सपुत्रास्ते सुस्वान्ता[2] बाढविक्रमाः ।
अम्लिष्टनादा निरगुः फाण्टचित्रास्त्रपाणयः ॥ १७ ॥

१७. प्रमेदिता इति ॥ प्रागेव मिन्ना अपि तत्कालोचितान्नपानैः पुनः प्रकर्षेण मेदितुं प्रवृत्ताः प्रमेदिताः प्रास्निग्धगात्रा इत्यर्थः ॥ "आदिकर्मणि क्तः कर्त्तरि च" इति क्तः ॥ "विभाषा भावादिकर्मणोः" इति निषेधविकल्पादिडागमः ॥ सुस्वान्ताः समरोत्साहेन शोभनचित्ताः अम्लिष्टनादाः वाग्मित्वाद्विस्पष्टवाचः बाढविक्रमाः भृशपौरुषाः फाण्टेनानायासकृतेन रञ्जकद्रव्यविशेषेण चित्राण्यस्त्राणि पाणिषु येषां ते तथोक्ताः । 'अनायासकृतं फाण्टम्' इत्यमरः । ते मन्त्रिणः सपुत्राः निरगुर्निर्गताः ॥ "क्षुब्धस्वान्त—" इत्यादिना निपातनात्स्वान्तादीनां निष्ठान्तानामनिट्त्वादिकार्यं सिद्धम् ॥

तान् दृष्ट्वातिदृढान्[3] धृष्टान् प्राप्तान् परिवृढाज्ञया ।
कष्टं विनर्दतः[4] क्रूरान् शस्त्रघुष्टकरान्[5] कपिः ॥ १८ ॥

१८. अथ युग्मेनाह तानित्यादिना ॥ धृष्टो वियातः "धृषिशसी वैयात्ये" इति धृषेर्निष्ठायामिट्प्रतिषेधः ॥ कपिर्हनूमान् अतिदृढानतिबलिष्ठान् परिवृढस्य प्रभोः रावणस्य आज्ञया प्राप्तान् ॥ "दृढः स्थूलबलयोः" ॥ "प्रभौ परिवृढः" इति च निपातनादुभयत्रानिट्त्वम् ॥ कष्टं कृच्छ्रं यथा भवति तथा विनर्दतो गर्जतः ॥ "कृच्छ्रगहनयोः कषः" इति

---

१ प्रामेदिताः T_2. प्रमोदिताः E_2.
२ सुस्विन्ना T_2.
३ धृष्टोऽतिदृढान् दृष्ट्वा T_3, T_4, Com.
४ संनर्दतः T_3.
५ शस्त्राघुष्ट° D.

कषेर्निष्ठायामिडभावः ॥ क्रूरान् हिंस्रान् शस्त्रैः शस्त्रघर्षणैर्घुष्टकरान् शब्दायमानपाणीन् ॥ "घुषिरविशब्दने" इति घुषेर्विशब्दनात्स्वाभिप्रायाविष्करणादन्यत्र शब्दनमात्रे निष्ठायामिट्प्रतिषेधः । तान् राक्षसान् दृष्ट्वा आर्दिददित्युत्तरेण संबन्धः ॥

अन्यर्णो[1] गिरिकूटाभानभ्यर्णानार्दिदद्द्रुतम् ।
वृत्तशस्त्रान्[2] महारम्भानदान्तांस्त्रिदशैरपि ॥ १९ ॥

१९. अन्यर्ण इति ॥ नितरामर्दितो न्यर्णः स न भवतीत्यन्यर्णः स्वयं परैरहिंसितः । अर्द हिंसायामिति धातोर्निष्ठा ॥ "अर्देः संनिविभ्यः" इतीट्प्रतिषेधः ॥ "रदाभ्याम्—" इत्यादिना निष्ठानत्वे णत्वम् । वृत्तशस्त्रोऽधीतास्त्रवेदः ॥ "णेरध्ययने वृत्तम्" इति वृतेर्ण्यन्तान्निष्ठायामिडभावणिलोपयोर्निपातः ॥ स हनूमान् अभ्यर्णानविदूरान् ॥ "अभेश्चाविदूर्ये" इति निष्ठायामाविदूर्यार्थे इट्प्रतिषेधः । शेषं न्यर्णवत् । महारम्भान्महोद्योगांस्त्रिदशैर्देवैरप्यदान्तानदमितान् ॥ "वा दान्त—" इत्यादिना दमेर्ण्यन्तान्निष्ठायामिडभावणिलोपनिपातः ॥ गिरिकूटाभान्पर्वतशिखरोपमांस्तान्राक्षसान् द्रुतं शीघ्रमार्दिददवधीत् । अर्दोर्हिंसार्थाण्णौ चङ् ॥

दमितारिः प्रशान्तौजा[3] नादापूरितदिङ्मुखः ।
जघान रुषितो रुष्टांस्त्वरितस्तूर्णमागतान् ॥ २० ॥

२०. दमितारिरिति ॥ दमितारिः शिक्षितारिः प्रशान्तौजाः प्रशमिताखिलः । प्रशान्तोर्जे इति पाठान्तरम् । नादेन सिंहनादेन आपूरितानि दिङ्मुखानि येन सः रुषितः क्रुद्धः स हनूमान् रुष्टान् क्रुद्धान् तूर्णमागतान् मन्त्रिणस्त्वरितस्त्वरावान् जघान । दमिशमिपूरीणां ण्यन्तानां "वा दान्त—" इत्यादिना निष्ठायां विकल्पेनेट्प्रतिषेधनिपातनादुभयरूपता ॥ "रुष्यमत्वरसंघुषास्वनाम्" इति विकल्पाद्रुषेरुभयरूपता ॥

---

१ अभ्यर्णो E_3.
अन्यर्णो T., G., Com.

२ वृत्तशस्त्रो T_4, T., G., Com.

३ प्रशान्तोर्जान् C., D., T_1, T_2, T_3.

तेषां निहन्यमानानां संघुष्टैः कर्णभेदिभिः।
अभूद्भ्यमितत्रासमास्वान्ताशेषदिग्जगत्॥ २१॥

२१. तेषामिति॥ विहन्यमानानां प्रह्रियमाणानां तेषां राक्षसानां संबन्धिभिः कर्णभेदिभिः कर्णविदारिभिः संघुष्टैः संघुषितैः आक्रन्दनैरित्यर्थः। जगत् अभ्यमितत्रासं प्राप्तभयमास्वान्ताः आस्वानिताः प्रतिध्वानिताः ककुभो यस्य तच्चाभूत्॥ "अच् प्रत्यन्ववपूर्वात्सामलोम्नः" इत्यत्र "अच्" इति योगविभागात्पद्मनाभादिवत्समासान्तः॥ "रुष्यमत्वरसंघुषास्वनाम्" इतीट्प्रतिषेधविकल्पात्संघुष्टादिषूभयरूपता। संपूर्वस्य घुषेरविशब्दनेऽपि परत्वाद्विकल्प एव। स्वनतेरनुपसृष्टात् "क्षुब्धस्वान्त—" इत्यादिना निपातनान्मनसि नित्यमनिट्त्वे आङुपसृष्टस्यायं विकल्पः॥

भयसंहृष्टरोमाणस्ततस्तेऽपचितद्विषः।
क्षणेन क्षीणविक्रान्ताः कपिनानेषत क्षयम्॥ २२॥

२२. भयेति॥ ततस्त्रासानन्तरं भयेन संहृष्टरोमाणः पुलकिताङ्गाः। सात्त्विकानां सर्वरससाधारणत्वाद् भयेऽपि रोमहर्षः॥ "हृषेर्लोमसु" इति विकल्पादनिट्त्वम्। अपचितत्विषोऽपचायितत्विषो नष्टतेजस इत्यर्थः॥ "अपचितश्च" इति निपातनाच्चायतेर्निष्ठायां विकल्पादनिट्त्वं चायश्चिभावश्च। क्षीणविक्रान्ता नष्टपराक्रमास्ते सपुत्रा मन्त्रिणः कपिना हनूमता क्षणेन क्षयं नाशमनेषत नीताः। नयतेः कर्मणि लुङि, चिण्वदिडभावपक्षे च्लेः सिचि गुणः झस्यादादेशः॥

अथ इडधिकारः।

हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः।
अशोकवनिकामेव निगृहीतारिशासनः॥ २३॥

---

१ विहन्यमानानां T., G., Com.
२ कण्ठभे° T₈.
३ °मास्वान्तककुभं T., G., Com.
४ संकृष्ट E₂.
५ °त्विषः T₂, T₄, T., G., Com.

२३. हत्वेति ॥ मारुतिर्हनूमान् रक्षांसि हत्वा निगृहीतारिशासनो निरस्तरावणाज्ञः सन् ॥ "ग्रहोऽलिटि दीर्घः" इति दीर्घश्च ॥ पुनरशोकवनिकामेव लवितुं छेत्तुम् ॥ "आर्धधातुकस्येड्वलादेः" इतीडागमः ॥ अक्रमीद्गत इत्यर्थः । क्रमेर्लुङि "स्नुक्रमोरनात्मनेपदनिमित्ते" इतीट् ॥ "ह्म्यन्त—" इत्यादिना सिचि वृद्धिप्रतिषेधः ॥

आवरीतुमिवाकाशं वरितुं[1] वीनिवोत्थितम् ।
वनं प्रभञ्जनसुतो नादयिष्ट विनाशयन् ॥ २४ ॥

२४. आवरीतुमिति ॥ प्रभञ्जनसुतो वायुनन्दनः आकाशमावरीतुमाच्छादयितुमिव वीन् पतत्रीन् । 'विविष्किरपतत्रिणः' इत्यमरः । वरीतुं ग्रहीतुमिव चेत्युभयत्र फलोत्प्रेक्षा ॥ "वृतो वा" इति वृङ्वृञोरिटो दीर्घविकल्पः । उत्थितमुच्छ्रितं वनं विनाशयन्निर्मूलयन्नादयिष्ट न दयामास निर्दयं बभञ्जेत्यर्थः । दयतेर्लुङि तङि सिचीट् ॥

वरिषीष्ट शिवं क्षिप्यन् मैथिल्याः कल्पशाखिनः ।
प्रावारिषुरिव क्षोर्णीं[2] क्षिप्ता वृक्षाः समन्ततः ॥ २५ ॥

२५. वरिषीष्टेति ॥ कल्पशाखिनः कल्पवृक्षान् क्षिप्यन् उत्पाट्य स्वर्गं प्रति प्रेरयन् । क्षिपेर्दैवादिकाल्लटः शत्रादेशः । मैथिल्याः शिवं कल्याणं वरिषीष्ट तेभ्यः सीताकल्याणं वरं वृणोत्वित्यर्थः । अत्रातिप्रभूतार्थे वृतवानिति वक्तव्ये भविष्यत्तोपचारादाशीःप्रयोगः। वृणोतेराशीर्लिङि ञित्वात्तङि सीयुट् ॥ "लिङ्सिचोरात्मनेपदेषु" इति विकल्पादिट् ॥ "न लिङि" इति दीर्घप्रतिषेधः ॥ "सुट्तिथोः" इति सुट् । षत्वष्टुत्वे ॥ किं च समन्ततः क्षिप्ताः वृक्षाः कल्पशाखिनः क्षोर्णीं भूमिं प्रावारिषुरिव प्रावृतामुत्तरासङ्गवतीमिव चक्रुरित्युत्प्रेक्षार्थः । 'द्वौ प्रावारोत्तरासङ्गौ' इत्यमरः । वृणोतेर्लुङि सिचि वृद्धिः । उदात्तत्वाद्वलादीट् ॥ "वृतो वा" इति दीर्घे प्राप्ते "सिचि च परस्मैपदेषु" इति प्रतिषेधः ॥

---

१ वरीतुं E_3, T., G., Com. | क्षोर्णि T_2, T_3, T_4.
२ क्षौर्णीं c.

संवुवूर्षुः स्वमाकूतमाज्ञां विवरिषुर्द्रुतम् ।
अवरिष्टाक्षमक्षम्यं कपिं हन्तुं दशाननः ॥ २६ ॥

२६. समिति ॥ अथ दशाननः स्वमाकूतं विषादलिङ्गमिङ्गितं संवुवूर्षुः संवरीतुमाच्छादयितुमिच्छुः आज्ञां शासकत्वं विवरिषुर्विवरितुं प्रकटयितुमिच्छुः सन् । उभयत्र वृणोतेः सन्नन्तादुप्रत्ययः ॥ "इट् सनि वा" इतीट्पक्षे गुणो रपरः अनिट्पक्षे "उदोष्ठ्यपूर्वस्य" इति उकारो रपरः ॥ "इको झल्" इति सनः कित्वान्न गुणः ॥ कपिं हनूमन्तं हन्तुमक्षम्यं क्षन्तुमशक्यमसह्यविक्रममित्यर्थः ॥ "पोरदुपधात्" इति यत्प्रत्ययः ॥ अक्षमक्षकुमारं द्रुतं क्षिप्रमवरिष्ट वृतवान् नियुक्तवानित्यर्थः । वृञो लुङि कर्त्रभिप्राये तङि "लिङ्सिचोरात्मनेपदेषु" इतीट् ॥

ऊचे संवरिषीष्ठास्त्वं गच्छ शत्रोः पराक्रमम् ।
ह्वृषीष्ठा युधि मायाभिः स्वरिता शत्रुसंमुखम् ॥ २७ ॥

२७. ऊच इति ॥ हे वत्स त्वं गच्छ शत्रोः पराक्रमं संवरिषीष्ठाः संवृणुष्व तिरस्कुरुष्वेत्यर्थः । वृञः संपूर्वादाशीर्लिङि थासि "लिङ्सिचोरात्मनेपदेषु" इति विकल्पादिट् । शत्रुसंमुखं शत्रुसमक्षं स्वरिता क्ष्वेलिता उपतापयिता वा सन् । स्वृशब्दोपतापयोरित्यस्मात्तृच् ॥ "स्वरतिसूति—" इत्यादिना विकल्पाद्वलादीट् ॥ युधि मायाभिः ह्वृषीष्ठाः कुटिलचारी भव । ह्वृ कौटिल्य इत्यस्मादाशीर्लिङि "ऋतश्च संयोगादेः" इति पाक्षिक इडभावः ॥ "उश्च" इति लिङ्सिचोः कित्वान्न गुणः ॥

द्रुतं संस्वरिषीष्ठास्त्वं निर्भयैः प्रधनोत्तमे ।
स मायानामगात्स्रोता कपेर्विधवितुं द्युतिम् ॥ २८ ॥

---

१ विवरिषुं E3.
२ ह्वृषीष्ठा T., G., Com. कृषीष्ठा D.
३ सन्मुखम् E2.
४ संस्वरिषीष्ठाश्च T2, T3, T4, T., G., Com.
५ निर्दयः C., T1, T2.

२८. द्रुतमिति ॥ किं च प्रधनोत्तमे महारणे निर्भयः सन् द्रुतं संस्वरिषीष्ठाश्च सम्यक् शब्दायस्व च। स्वरतेराशीर्लिङ्॥ "समो गम्यृच्छि—" इत्यादिना तङ्॥ "स्वरतिसूति—" इत्यादिना विकल्पादिट्॥ इत्यूचे इति संबन्धः। अथ मायानां सोता प्रसविता। सूतेः सूयतेर्वा तृच्। सोऽक्षः कपेर्द्युतिं तेजो विधवितुं विचालयितुमपनेतुमगाढतः॥ "स्वरतिसूति—" इत्यादिना सूधूञो विकल्पादिट्तदभावौ॥

विगाढारं[1] वनस्यासौ शत्रूणां[2] गाहिता कपिः।
अक्षं रधितुमारेभे रद्धा[3] लङ्कानिवासिनाम्॥ २९॥

२९. विगाढेति॥ वनस्यालं विगाढा विलोडयिता शत्रूणां च गाहिता। उभयत्र गाहेस्तृचि ऊदित्वादिड्विकल्पादिडभावपक्षे ढत्वादिकार्यम्। लङ्कानिवासिनां रक्षसां रद्धा हिंसिता। रध हिंसायां तृचि "रधादिभ्यश्च" इति विकल्पादनिट्पक्षे "झषस्तथोः—" इत्यादिना तस्य धत्वम्। असौ कपिः हनूमान् अक्षं रधितुं हिंसितुम्। रधेस्तुमुनि पक्षे इट्। आरेभे आरब्धवान्॥

निष्कोषितव्यान्निष्कोष्टुं प्राणान् दशमुखात्मजात्।
आदाय परिघं तस्थौ वनान्निष्कुषितद्रुमः॥ ३०॥

३०. निरिति॥ वनान्निष्कुषितद्रुमो निष्कृष्टवृक्षः कपिः॥ "इण्निष्ठायाम्" इति कुषेर्निष्ठायां नित्यमिट्॥ दशमुखात्मजात् अक्षात् निष्कोषितव्यान् निष्कृष्टव्यान् प्राणान् निष्कोष्टुं निष्कष्टुम्॥ "निरः कुषः" इतीड्विकल्पः॥ परिघमादाय तस्थौ स्थितवान्॥

एष्टारमेषिता संख्ये[4] सोढारं सहिता भृशम्।
रेष्टारं रेषितुं[5] व्यास्यद्[6]द्रोष्टाक्षः शस्त्रसंहतीः॥ ३१॥

---

१ विगाढालं T., G., Com.
२ शत्रूणामहितं कपिः T4.
३ रोद्धा T3.
४ रणे T3.
५ वेष्टारं वेषितुं E2.
६ व्यस्य E2.

३१. एष्टारमिति ॥ एषिता प्रतिभटान्वेषणशीलः संख्ये युद्धे भृशं सहिता विमर्दसहः रोष्टा रोषणशीलोऽक्षस्तादृशमेष्टारं सोढारं रेष्टारं हिंसितारं हनूमन्तं रेषितुं शस्त्रसंहतीर्व्यास्यत् क्षिप्तवान् । विपूर्वाद्-स्यतेर्लङ्ग्याङ्वृद्धी । एष्टारमित्यादौ सर्वत्र ताच्छील्ये तृन् ॥ "तीष-सह—" इत्यादिना सर्वत्रेड्विकल्पः ॥

शस्त्रैर्दिदेविषुं संख्ये दुद्यूषुः परिघं कपिः ।
अर्दिधिषुर्यशः कीर्त्तिमीर्त्सुं वृक्षैरताडयत् ॥ ३२ ॥

३२. शस्त्रैरिति ॥ संख्ये युद्धे शस्त्रैर्दिदेविषुं देवितुमिच्छुं विजिगीषु-मित्यर्थः । कीर्त्तिमीर्त्सुमर्धितुमर्धयितुं वर्धयितुमिच्छुम् । अन्तर्भावित-णिजर्थोऽयं निर्देशः । अन्यथा सकर्मकत्वायोगात् । ईदृशमक्षं कपिः स्वयमपि परिघं दुद्यूषुः परिघेण दिदेविषुः ॥ "दिवः कर्म च" इति पक्षे कर्मसंज्ञा । तथा यशांस्यर्दिधिषुः सन् । ईर्त्सुवद्धिग्रहार्थौ । वृक्षै-रताडयत् । स्थितेऽपि परिघे कियच्चिरं वृक्षताडनैः चिक्रीडेत्यर्थः । अत्र दीव्यतेर्ऋध्नोतेश्च सन्नन्तादुप्रत्यये "सनीवन्तर्ध—" इत्यादिना इड्विकल्पात्प्रत्येकं द्वैरूप्यम् । तत्रेट्पक्षे इवन्तस्य दिवो लघूपधगुणः । अनिट्पक्षे "हलन्ताच्च" इति सनः कित्त्वे "च्छ्वोः शूडनुनासिके च" इत्यूडादेशे यणादेशे दुद्यूषुः । ऋधेश्चेट्पक्षे लघूपधगुणे रपरे "न न्द्राः—" इत्यादिना निषेधाद्रेफवर्जितस्य धिशब्दस्य द्विर्वचने अभ्यासस्य जश्त्वे अर्दिधिषुः । अनिट्पक्षे "आप्ज्ञप्यृधामीत्" इत्यका-रस्य रपर ईकारः । ततो द्विर्वचने "अत्र लोपोऽभ्यासस्य" इत्यभ्या-सलोपे ईर्त्सुः ॥

भूयस्तं धिप्सुमाहूय राजपुत्रं दिदम्भिषुः ।
अर्हस्ततः स मूर्च्छावान् संशिश्रीषुरभूद्ध्वजम् ॥ ३३ ॥

३३. भूय इति ॥ भूयस्ताडितोऽपि पुनः धिप्सुं दम्भितुं स्तम्भयितु-मिच्छुम् । दम्भु स्तम्भ इति धातोः सन्नन्तादुप्रत्ययः ॥ "सनी-

१ यशांस्यर्दिधिषुः कीर्ति° T., G., Com. | २ °माहूय D.

वन्त—" इत्यादिना विकल्पादनिट्पक्षे "दम्भ इच्च" इति दम्भेरच्च इकारः । पूर्ववदभ्यासलोपः ॥ "हलन्ताच्च" इत्यत्र हल्ग्रहणस्य जातिवचनत्वात्सनः कित्त्वे "अनिदिताम्—" इत्यादिना उपधानकारलोपः । दकारस्य भष्भावे धकारः ॥ "खरि च" इति चर्त्वे भकारस्य पकारः । तं राजपुत्रमक्षं दिदम्भिषुः स्वयं स्तम्भयितुमिच्छुः । दम्भेरिट्पक्षे रूपम् । आहूय अहन् हतवान् । हन्तेर्लङि हल्ङ्यादिलोपः । ततो घातानन्तरं सोऽक्षो मूर्च्छावान् मूर्च्छितो ध्वजं ध्वजस्तम्भं संशिश्रीषुः संश्रयितुमिच्छुः अभूत् संश्रित इत्यर्थः । श्रयतेः सन्नन्तादुप्रत्ययः ॥ श्रयतेः "सनीवन्त—" इत्यादिना विकल्पादनिट्पक्षे "अज्झनगमां सनि" इति दीर्घः ॥

आश्वस्याक्षः क्षणाल्लोकान् बिभ्रक्षुरिव तेजसा ।
रुषा[१] बिभ्रज्जिषुप्रख्यं कपिं बाणैरवाकिरत् ॥ ३४ ॥

३४. आश्वस्येति ॥ सोऽक्षः क्षणादाश्वस्य पुनरुज्जीव्य तेजसा स्वप्रतापेन लोकान् बिभ्रक्षुः भ्रष्टुं पक्तुमिच्छुरिव दिधक्षुरिवेति यावत् । उत्प्रेक्षालंकारः । रुषा रोषेण बिभ्रज्जिषुः । पूर्ववाद्विग्रहार्थौ । भ्रस्ज पाक इति धातोः सन्नन्तादुप्रत्ययः ॥ "सनीवन्त—" इत्यादिना इट्पक्षे "भ्रस्जो रोपधयोः—" इत्यादिना रमागमाभावपक्षे सकारस्य श्चुत्वजश्त्वे । उभयाभावपक्षे "स्कोः—" इत्यादिना सलोपः ॥ "व्रश्च—" इत्यादिना षत्वम् ॥ "षढोः कः सि" इति कत्वम् ॥ "इण्कोः" इति षत्वे बिभ्रक्षुः । बिभ्रज्जिषुः दिधक्षुरग्निः तत्प्रख्यं तत्कल्पं कपिं बाणैरवाकिरत् अवकीर्णवान् ॥

संयुयूषुं दिशो बाणैरक्षं यियविषुर्द्रुमैः ।
कपिर्मायामिवाकार्षीद्दर्शयन् विक्रमं रणे ॥ ३५ ॥

३५. समिति ॥ बाणैर्दिशः संयुयूषुं संयवितुं मिश्रयितुमिच्छुम् । यातेः सन्नन्तादुप्रत्ययः ॥ "सनीवन्त—" इत्यादिना अनिट्पक्षे

१ क्रोधाद्वि° D.

"अञ्झनगमां सनि" इति दीर्घः ॥ अक्षं द्रुमैर्धियविषुः । इट्पक्षे गुणावादेशौ । कपिः रणे विक्रमं दर्शयन् मायामिन्द्रजालमिवाकार्षीत् । तथा सान्द्रं द्रुमान्ववर्षेत्यर्थः ॥

वानरं प्रोर्णुनविषुः शस्त्रैरक्षो विदिद्युते ।
तं प्रोर्णुनूषुरुपलैः स वृक्षैराबभौ कपिः ॥ ३६ ॥

३६. वानरमिति ॥ अक्षो वानरं शस्त्रैः प्रोर्णुनविषुराच्छादयितुमिच्छुर्विदिद्युते विदिदीपे ॥ "द्युतिस्वाप्योः संप्रसारणम्" इत्यभ्यासस्य संप्रसारणम् ॥ तमक्षमुपलैर्वृक्षैश्च प्रोर्णुनूषुः प्रोर्णवितुमिच्छुः कपिराबभौ । इच्छोक्तेरविरामः सूचितः । उभयत्रोर्णोतेः सन्नन्तादुप्रत्यये पूर्ववदनिट्पक्षे "अञ्झनगमां सनि" इति दीर्घः । इट्पक्षे तु "विभाषोर्णोः" इतीडादिप्रत्ययस्य ङित्वे उवङादेशः । अङित्वे गुणावादेशौ ॥

स्वां जिज्ञापयिषू शक्तिं बुभूर्षू[1] नु जगन्ति किम् ।
शस्त्रैरिसकृषातां तौ पश्यतां[2] बुद्धिमाहवे ॥ ३७ ॥

३७. स्वामिति ॥ तौ कपिराक्षसौ स्वां शक्तिं सामर्थ्यं जिज्ञापयिषू लोके प्रकटीचिकीर्षू नु किं वा जगन्ति शस्त्रैर्बुभूर्षू भर्तुं पूरयितुमिच्छू नु । भरज्ञाप्योः पूर्ववद्विकल्पः । आहवे पश्यतां जनानामिति बुद्धिं वितर्कमकृषातां कृतवन्तौ ॥

मायाभिः सुचिरं क्लिष्ट्वा राक्षसोऽक्लिशितक्रियम् ।
संप्राप्य वानरं भूमौ पपात परिघाहतः ॥ ३८ ॥

३८. मायाभिरिति ॥ राक्षसोऽक्षः सुचिरं मायाभिः क्लिष्ट्वा क्लिशित्वा चिरं युद्ध्वेत्यर्थः अक्लिशितक्रियमक्लिष्टकर्माणमखण्डितपौरुषं वानरं संप्राप्यासाद्य परिघेणाहतो भूमौ पपात ममारेत्यर्थः ॥ "क्लिशः क्त्वानिष्ठयोः" इतीड्विकल्पः ॥

---

१ संबुभूर्षू ज° T3. | २ पश्यतो चित्तमा° D.

पवितोऽनुगुणैर्वातैः शीतैः पूत्वा पयोनिधौ ।
बभञ्जाध्युषितं भूयः क्षुधित्वा पत्रिभिर्वनम् ॥ ३९ ॥

३९. पवित इति ॥ अथ स हनूमान् पयोनिधौ पूत्वा स्नानेन पवित्वा शुद्ध्वा शीतैरनुगुणैर्वातैरनुकूलवातैः पवितः पूतः सन् ॥ "पूङश्च" इति क्त्वानिष्ठयोरिड्विकल्पः ॥ पत्रिभिः पक्षिभिः क्षुधित्वा बुभुक्षित्वा अध्युषितमधिष्ठितं वनम् ॥ "वसतिक्षुधोरिट्" इति क्त्वानिष्ठयोर्नित्यमिडागमः ॥ भूयो बभञ्ज ॥

उच्चैरञ्चितलाङ्गूलः शिरोऽञ्चित्वेव संवहन् ।
दधद्विलुभितं वातैः केशरं वह्निपिङ्गलम् ॥ ४० ॥

४०. उच्चैरिति ॥ उच्चैर्यथा तथा अञ्चितलाङ्गूलः उदञ्चितवालधिः शिरोऽञ्चित्वैव उदञ्चयैव संवहन् । विजयोत्साहादुदञ्चितशिरःपुच्छ इत्यर्थः ॥ "अञ्चेः पूजायाम्" इति पूजार्थे नित्यमिट् । इयमेवानयोः पूजा यदुन्नमनम् । वातैर्विलुभितम् ॥ "लुभो विमोहने" इति विमोहने क्त्वानिष्ठयोर्नित्यमिट् ॥ विमोहनं व्याकुलीकरणमिति काशिका । वह्निपिङ्गलं केसरं किञ्जल्कं दधत्कपिः बभञ्जेति पूर्वेणान्वयः ॥

जरित्वेव जवेनान्ये निपेतुस्तस्य शाखिनः ।
व्रश्चित्वा विवशानन्यान् बलेनापातयत्तरून् ॥ ४१ ॥

४१. जरित्वेति ॥ अन्ये शाखिनस्तरवो जरित्वेव जीर्णा भूत्वेव तस्य कपेः जवेन वेगेनैव निपेतुः । यथा जीर्णा वायुवेगेनेति भावः । अन्याननतिरूढमूलांस्तरूंस्तलेन पाणितलेन व्रश्चित्वा छित्वा विवशान्निरालम्बानपातयत् ॥ "जॄव्रश्च्योः क्त्वि" ॥ इति क्त्वाप्रत्यये नित्यमिट् ॥

---

१ कपिः पूत्वा प° C.
पूत्वा शीतैः प° B., E2.
२ °ञ्चित्वैव T., G., Com.
३ दधद्विलुलितं E2.
४ केसरं B., T., G., Com.
५ पेतुश्चान्येऽस्य शाखिनः T4.
६ तलेना° T., G., Com., D.

दमित्वार्[1]यरिसंघातानश्रान्त्वा कपिकेशरी[2] ।
वनं चचार कर्त्तिष्यन्नर्त्स्यंन्निव निरङ्कुशः ॥ ४२ ॥

४२. दमित्वेति ॥ कपिकेसरी रिपुसंघातान् दमित्वा दान्त्वापि हत्वापीत्यर्थः अश्रान्त्वा अश्रमित्वा ॥ "उदितो वा" इति दमेः श्रमेश्च क्त्वायां विकल्पादिट् ॥ कर्त्तिष्यन् पुनश्छेत्स्यन् नर्त्स्यन् नर्त्तिष्यन्निव ॥ "सेऽसिचि कृतचृतछृदतृदनृतः" इति सकाराद्यार्धधातुके विकल्पादिट् ॥ निरङ्कुशो दुर्वारः सन् वनं चचार । निर्भीको वने बभ्रामेत्यर्थः ॥

पारं जिगमिषन्[3] सोऽथ पुनरावर्त्स्यतां द्विषाम् ।
मत्तद्विरदवद्रेमे वने लङ्कानिवासिनाम् ॥ ४३ ॥

४३. पारमिति ॥ अथ स कपिः पुनरावर्त्स्यतामावर्त्तिष्यमाणानामागमिष्यतामित्यर्थः ॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः ॥ द्विषां पारमन्तं जिगमिषन् गन्तुमिच्छन् ॥ "गमेरिट् परस्मैपदेषु" इतीडागमः ॥ लङ्कानिवासिनां संबन्धिनि वने मत्तद्विरदवत् मत्तगजेन तुल्यं रेमे चिक्रीड ॥

यद्यकल्प्स्यदभिप्रायो योद्धुं रक्षःपतेः स्वयम् ।
तमप्यकर्त्स्यमद्याहं वदन्निसचरत्कपिः ॥ ४४ ॥

४४. यदीति ॥ यदि रक्षःपतेः रावणस्य स्वयं स्वत एव योद्धुमभिप्रायो युयुत्सा अकल्प्स्यत् अकल्पिष्यत स्याच्चेदित्यर्थः । कृपेः क्रियातिपत्तौ लृङि "लुटि च कृपः" इति चकारात्परस्मैपदम् ॥ "तासि च कॢपः" इति चकारात्सकाराद्यार्धधातुकेऽपि परस्मैपदेष्विट्प्रतिषेधः ॥ अद्याहं तमप्यभिप्रायं तं रावणं वा अकर्त्स्यमकर्त्तिष्यम् ॥ कृती छेदने । पूर्ववल्लृङि "सेऽसिचि कृत—" इत्यादिना सकाराद्यार्धधातुकस्य नेट् । इति वदन् कपिरचरत् ॥

---

१ दमित्वा रिपुसं° T., G., Com.
२ °केसरी T., G., Com., E₃.
३ जिगमिषुः D., E₂.

हते तस्मिन् प्रियं श्रुत्वा कल्प्ता प्रीतिं परां प्रभुः।
तोषो॑ऽद्यैव च सीतायाः परश्चेतसि कल्प्स्यति ॥ ४५ ॥

४५. हत इति ॥ किं च तस्मिन् रावणे हते सति प्रियं प्रियोदन्तं श्रुत्वा प्रभुः स्वामी रामः परां प्रीतिं कल्प्ता कल्पयिता संपादयिता । अन्तर्भावितणिजर्थोऽयम्। कृपेरकर्मकत्वात् । अद्यैव च सीतायाश्चेतसि परं भृशं तोषो हर्षः कल्प्स्यति कल्पिष्यते भविष्यतीत्यर्थः ॥ "तासि च कृपः" इतीट्प्रतिषेधः। "लुटि च कृपः" इति परस्मैपदम् ॥

आहूय रावणोऽवोचदथेन्द्रजितमन्तिका॑त्।
वने मत्त इव क्रुद्धो गजेन्द्रः प्रधनेष्वटन् ॥ ४६ ॥

४६. आहूयेति ॥ अथाक्षवधश्रवणानन्तरं रावणः इन्द्रजितमन्तिकादन्तिकं प्रत्याहूय ॥ "दूरान्तिकार्थेभ्यो द्वितीया च" इति चकारात्पञ्चमी ॥ अवोचत्। यदवोचत्तदेव सार्धश्लोकचतुष्टयेनाह। वन इति। वने मत्तो गजेन्द्र इव क्रुद्धः प्रधनेषु युद्धेष्वटन् संचरन् ॥

ययाथ त्वं॑ द्विषामन्तं भूयो यातासि चासकृत्।
शशकथ जेतुं त्वं देवान् मायाः सस्मर्थ संय॑ति ॥ ४७ ॥

४७. ययाथेति ॥ असकृद् द्विषतामन्तं पारं ययाथ अयासीः। यातेस्तासौ नित्यमनिट्त्वात् "अचस्तास्वत्थल्यनिटो नित्यम्" इतीट्प्रतिषेधः। भूयो यातासि यास्यसि च। तासावनिट्त्वं चेदमुदाहृतम्। त्वं देवान् जेतुं शशकथ अशकः। शकेर्लिटि थासि "उपदेशेऽत्वतः" इतीट्प्रतिषेधः। किं च संयति मायाः सस्मर्थ अस्मार्षीः ॥ "ऋतो भारद्वाजस्य" इतीट्प्रतिषेधः ॥

त्वं ससर्जिथ शस्त्राणि दद्रष्ठारीं॑श्च दुःसहान्।
शस्त्रैरादिथ शस्त्राणि त्वमेव महतामपि ॥ ४८ ॥

---

१ तोषश्चाद्यैव सीतायाः C., D.
२ °मन्तिकं D., T_3.
३ द्विषतामन्तं T., G., Com., T_3.
४ संप्रति C., T_3.
५ °रीन्सुदुःसहान् C., D.

४८. त्वमिति ॥ किं च त्वं शस्त्राणि ससर्जिथ सस्रष्ठ दुःसहान् दुर्धर्षानरींश्च दद्रष्ठ ददर्शिथ । अनिदंपूर्वस्ते रणाभियोग इत्यर्थः ॥ "विभाषा सृजिदृशोः" इतीड्विकल्पः ॥ त्वमेव महतां महेन्द्रादीनामपि शस्त्राणि शस्त्रैरादिथ भक्षयसि स्म ॥ "इडत्त्यर्त्तिव्ययतीनाम्" इतीट् ॥

स त्वं हनिष्यन् दुर्बुद्धिं कपिं व्रज ममाज्ञया ।
मा नाञ्जी राक्षसीर्मायाः[1] मस्तावीर्मा न विक्रमम् ॥ ४९ ॥

४९. स इति ॥ स पूर्वोक्तगुणविशिष्टस्त्वं दुर्बुद्धिमनुचितकर्मारम्भित्वादिति भावः कपिं हनिष्यन् ॥ "ऋद्धनोः स्ये" इतीट् ॥ ममाज्ञया व्रज । राक्षसीं मायां मा नाञ्जीः मा न व्यक्तीकुरु । किं तु व्यक्तीकुर्वित्यर्थः ॥ "अञ्जेः सिचि" इतीट् ॥ विक्रमं मा न प्रस्तावीः । किं तु प्रस्तुहीत्यर्थः ॥ "स्तुसुधूञ्भ्यः परस्मैपदेषु" इतीट् ॥ "इट ईटि" इत्युभयत्र सलोपः ॥ "न माङ्योगे" इत्यट्प्रतिषेधः । प्रतिषेधद्वयस्य प्रकृतार्थपरत्वम् ॥

मा न सावीर्महास्त्राणि मा न धावीरररिं[2] रणे ।
वानरं मा न संयंसीर्[3]व्रज तूर्णमशङ्कितः ॥ ५० ॥

५०. मेति ॥ महास्त्राणि मा न सावीः मा न प्रसुहि किं तु प्रसुहि प्रयुङ्क्ष्वेत्यर्थः । षु प्रसवैश्वर्ययोः इति धातोरदादिकाल्लुङ् । रणेऽरीन् मा न धावीर्मा न कम्पय । किं तु कम्पय भीषयस्वेत्यर्थः । धूञो लुङ् । उभयत्र "स्तुसुधूञ्भ्यः—" इत्यादिना इट् । शेषं पूर्ववत् । वानरं मा न संयंसीः मा न संयच्छ किन्तु संयच्छ बधानेत्यर्थः । यमेर्लुङि "यमरमनमातां सक् च" इति सगिडागमौ । शेषं पूर्ववत् । अशङ्कितस्तूर्णम् ॥ "रुष्यमत्वर—" इत्यादिना विकल्पादनिट्पक्षे "ज्वरत्वर—" इत्यादिना ऊठ् ॥ व्रज गच्छ ॥

---

१ राक्षसीं मायां T₃, T., G., Com.
२ °ररीन् रणे D., T., G., Com.
३ संयासी° T₂.

अनंसीच्चरणौ तस्य मन्दिरादिन्द्रजिद्व्रजन् ।
अवाप्य चाशिषस्तस्माद्[२]ययासीत्प्रीतिमुत्तमाम् ॥ ५१ ॥[१]

५१. अनंसीदिति ॥ अथेन्द्रजित् मन्दिराद्व्रजन् निर्गच्छंस्तस्य रावणस्य चरणावनंसीत् ननाम । तस्मात्पितुराशिषश्चावाप्योत्तमां महतीं प्रीतिमयासीत् ॥ नमियात्योर्लुङि "यमरमनमातां सक् च" इति सगिडागमौ । गतमन्यत् ॥

[३]गते तस्मिन्नुपारंसीत् संरम्भाद्रक्षसांपतिः ।
इन्द्रजिद्विक्रमाभिज्ञो मन्वानो वानरं जितम् ॥ ५२ ॥

५२. गत इति ॥ इन्द्रजिद्विक्रमाभिज्ञो रक्षसां पतिः रावणो वानरं जितं मन्वानः तस्मिन्निन्द्रजिति गते सति संरम्भात्कोपात् । 'संरम्भः संभ्रमे कोपे' इति विश्वः । उपारंसीदुपरतः । रमेर्लुङि "उपाच्च" इति परस्मैपदम् । सगिडागमादि ॥

[४]संसिस्मयिषमाणोऽगान्मायां व्यञ्जिजिषुर्द्विषः ।
जगत् पिपविषुर्[६]र्वायुः कल्पान्त इव दुर्धरः ॥ ५३ ॥

५३. स इति ॥ स इन्द्रजित् द्विषः शत्रून् सिस्मयिषमाणः स्मेतुं परिहसितुमिच्छन् । स्मयतेः सन्नन्ताल्लटः शानच् । मायां व्यञ्जिजिषुर्व्यङ्क्तुमिच्छन् । अञ्जेः सन्नन्तादुप्रत्ययः । कल्पान्ते जगत्पिपविषुः पवितुमिच्छुः प्रमार्ष्टुकामः । पूङः सन्नन्तादुप्रत्ययः ॥ "स्मिपूङ्रञ्ज्वशां

१ The latter half of the verse is found only in T., G., Com., T_2, T_3, T_4, D. other Mss., read it thus:—
अनंसी° . . . . ।
गते तस्मि° . . . . ॥

२ °द्यासी° N.

३ All Mss., and books except T_2, T_3, T_4, D., T., G., and Com., read it as under:—
इन्द्रजि° . . . . ।
संसि° . . . . ॥
D. reads it as under:—
इन्द्रजि°
गते त°

४ स सि° T., G., Com.
All Mss., except T_2, T_3, T_4, D., T., G., and Com., read thus:—
जगत्° . . . . ।
लोका° . . . . ॥

५ °र्धुर्तम् D.

६ विपरिषु° E_2.

सनि" इति सर्वत्रेट् ॥ कल्पान्ते वायुः प्रलयकालमारुत इव दुर्धरो दुर्धर्षः समगात् ॥

लोकानशिशिषोस्तुल्यः कृतान्तस्य विपर्यये ।
वने चिकरिषोर्वृक्षान् बलं जिगरिषुः कपेः ॥ ५४ ॥

५४. लोकानिति ॥ विपर्यये कल्पान्ते लोकानशिशिषोरशितुमिच्छोर्बुभुक्षोः । अश्नातेः सन्नन्तादुप्रत्ययः । पूर्वेणैवेट् । कृतान्तस्यान्तकस्य तुल्यः स इन्द्रजिद्वने वृक्षांश्चिकरिषोः विचिक्षिप्सोः कपेः बलं जिगरिषुः जिग्रसिषुः ॥ "किरश्च पञ्चभ्यः" इत्युभयत्रापीट् ॥ अन्यद्गतम् ॥

रोदिति स्मेव चायाति तस्मिन्पक्षिगणः शुचा ।
मुक्तकण्ठं हतान्वृक्षान् बन्धून्बन्धोरिवागमे ॥ ५५ ॥

५५. रोदितीति ॥ तस्मिन्निन्द्रजित्यायात्यागच्छति सति पक्षिगणः शुचा शोकेन हतान् वृक्षान् बन्धोरागमे मृतान्बन्धूनिवेत्युपमा । मुक्तकण्ठं सशब्दं रोदिति स्मेवेत्युत्प्रेक्षा ॥ "रुदादिभ्यः सार्वधातुके" इतीट् ॥

आश्वसीदिव चायाति तद्वेगपवनाहतम् ।
विचित्रस्तबकोद्भासि वन लुलितपल्लवम् ॥ ५६ ॥

५६. आश्वसीदिति ॥ तस्मिन्नायाति सति तस्य वेगपवनेनाहतमाधूतं विचित्रैः स्तबकैः उद्भासि प्रकाशमानं लुलितपल्लवं विक्षिप्तविटपं वनमाश्वसीदिव उज्जीवितमिवेत्युत्प्रेक्षा । श्वसेर्लुङि "रुदश्च पञ्चभ्यः" इतीट् ॥

---

१ लोकानाशि° N., C., T2, T3, T4, E2, E3, B.
All Mss., and books except T2, T3, T4, D., T., G., and Com. read the verse as under :—

वने चि° . . . .
लसद्विचित्रशस्त्रौघः संग्रामो मूर्तिमानिव ॥

२ °पवनाशितम् T2.
३ ललित° T2, T3.

न प्राणिषि दुराचार मायानामीशिषे न[1] च ।
नेडिषे यदि काकुत्स्थं तमूचे[2] वानरो वचः ॥ ५७ ॥

५७. नेति ॥ हे दुराचार न प्राणिषि न जीवसि मरिष्यसीत्यर्थः । अन प्राणन इति धातोः सार्वधातुके लटि सिपि रुदादित्वादिट् । मायानां च नेशिषे न प्रभवसि । मयि मायाश्च न प्रभवन्तीत्यर्थः ॥ "ईशः से" इतीट् ॥ "अधीगर्थ—" इत्यादिना षष्ठी ॥ काकुत्स्थं रामं नेडिषे यदि न स्तौषि चेत् शरणं न गमिष्यसि चेदित्यर्थः ॥ "ईडजनोर्ध्वे च" इति चकारात्सेशब्दस्य इट् ॥ इति वचो वानरस्तमिन्द्रजितमूचे ॥ इतीडधिकारः ॥

अथ सत्वाधिकारः ।

ससैन्यश्छादयन् संख्ये प्रावर्तिष्ट तमिन्द्रजित् ।
शरैः क्षुरप्रैर्[3]मायाभिः[4] शतशः सर्वतो[5] मुहुः ॥ ५८ ॥

५८. ससैन्य इति ॥ इन्द्रजित् संख्ये युद्धे ससैन्यः सेनासमवेतः सन् तं कपीन्द्रं शरैः साधारणैर्बाणैः क्षुरप्रैरर्धचन्द्रैः । 'अर्धचन्द्रः क्षुरप्रः स्यात्' इति यादवः । मायाभिरिन्द्रजालैश्च शतशः सर्वतो मुहुश्छादयन् आच्छादयन् प्रावर्तिष्ट प्रवृत्तः । ससैन्यः इत्यत्र "विसर्जनीयस्य सः" इति सत्वे श्चुत्वम् । शरैः क्षुरप्रैः इत्यत्र "शर्परे विसर्जनीयः" इति विसर्जनीयस्य विसर्जनीयादेशः । अन्यत्र "वा शरि" इति विकल्पात्सत्वे शर्परस्य श्चुत्वम् ॥

वानरः[6] कुलशैलाभः[7] प्रसह्यायुधशीकरम्[8] ।
रक्षस्पाशान् यशस्काम्यंस्तमस्कल्पानदुद्रुवत् ॥ ५९ ॥

५९. वानर इति ॥ कुलशैलाभः तद्वद्रणे स्थिर इत्यर्थः वानरो मारुतिः आयुधानि शीकरा इवेति उपमितसमासः । तद्वदकिञ्चित्कराणीत्यर्थः ।

---

[1] च न C.
[2] काकुत्स्थमूचे तं B., T_2, T_3, T_4.
[3] क्षुरप्रैः E_2.
[4] °भिश्शत° T., G., Com.
[5] °तशस्सर्वे° T., G., Com.
[6] वानरः कु° Com.
[7] °शैलाभः प्र° Com.
[8] शीकरः T_2, T.
शीकरान् T_3, Com.

प्रसह्याभिभूय यश आत्मन इच्छन् यशस्काम्यन् ॥ "काम्यच्च" इति काम्यच्प्रत्यये तदन्तात्सनाद्यन्तधातोर्लटः शत्रादेशः । ईषदसमाप्तानि तमांसि तमस्कल्पान् । ईषदसमाप्तौ कल्पप्प्रत्ययः । कुत्सितानि रक्षांसि रक्षःपाशाः तान् क्षुद्रराक्षसान् ॥ "याप्ये पाशप्" इति याप्यार्थे पाशपप्रत्ययः । याप्यः कुत्सितः । प्रकृत्यर्थविशेषकाश्च स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति नपुंसकत्वे सिद्धे पुलिङ्गता चिन्त्या । अत्र वानरः शैलाभः इत्युभयत्रापि "कुप्वोः ᳵक ᳶपौ च" इति यथाक्रमं विसर्जनीयस्य जिह्वामूलीयोपध्मानीयौ । पाशबादिप्रत्ययस्थयोः कुप्वोरपदादित्वात् "सोऽपदादौ" इति सर्वत्र विसर्जनीयस्य सत्वम् । अदुद्रुवत् तानभिद्रुत इत्यर्थः । द्रुगतावित्यस्माल्लुङि "णिश्रिद्रुस्रुभ्यः—" इत्यादिना चङ्युवङादेशः ॥

धनुष्पाशभृतः संख्ये ज्योतिष्कल्पोरुकेशरः[1][2] ।
दुधाव निर्नमस्कारान् राक्षसेन्द्रपुरस्कृतान् ॥ ६० ॥

६०. धनुरिति ॥ ज्योतिष्कल्पोरुकेसरः ज्वालातुल्यमहासटः कपीन्द्रो धनुष्पाशानि कुत्सितधनूंषि बिभ्रतीति तद्भृतः । पूर्ववत् पाशकल्पपोः "इणः षः" इति विसर्जनीयस्य षत्वम् । निर्नमस्कारान् दर्पात्कस्याप्यकृतनमस्कारान् राक्षसेन्द्रेणेन्द्रजिता पुरस्कृतानग्रतः कृतान् राक्षसान् ॥ "नमस्पुरसोर्गत्योः" इति विसर्जनीयस्य सत्वम् ॥ "साक्षात्प्रभृतीनि च" ॥ "पुरोऽव्ययम्" इति च गतित्वम् । संख्ये रणे दुधाव धुनोति स्म ॥

स्वामिनो निष्क्रयं गन्तुमाविष्कृतबलः कपिः ।
रराज समरे शत्रून् घ्नन् दुष्कृतबहिष्कृतः ॥ ६१ ॥

६१. स्वामिन इति ॥ स्वामिनो रामस्य निष्क्रयमानृण्यं गन्तुं प्राप्तुमाविष्कृतबलः प्रकाशितशक्तिः तथा दुष्कृतबहिष्कृतो बहिष्कृतदुष्कृतः पलायनपापरहित इत्यर्थः । यथाह मनुः । 'यस्तु भीतः परावृत्तः

१ द्योतिष्कल्पो° C. | २ °केसरः B., E3, T., G., Com.

संग्रामे हन्यते परैः । भर्त्तुर्यद् दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितम् । भर्त्ता तत्सर्वमादत्ते परावृत्तहतस्य तु' ॥ इति । आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । कपिः समरे शत्रून् घ्नन् रराज ॥ "इदुदुपधस्य चाप्रत्ययस्य" इति सर्वत्र विसर्जनीयस्य षत्वम् ॥

चतुष्काष्ठं क्षिपन् वृक्षान् तिरस्कुर्वन्नरीन्[1] रणे ।
तिरस्कृत[2]दिगाभोगो[3] बहुधा ददृशे भ्रमन्[4] ॥ ६२ ॥

६२. चतुरिति ॥ वृक्षान् चतस्रः काष्ठाः दिशः समाहृताश्चतुष्काष्ठम् । समाहारद्विगौ "आबन्तो वा" इति विकल्पान्नपुंसकत्वम् ॥ "इदुदुपधस्य—" इत्यादिना विसर्जनीयस्य षत्वम् ॥ चतुष्काष्ठं क्षिपन् तदुद्दिश्य क्षिपन् तत्र क्षिपन्नित्यर्थः । गम्यमानोद्देशक्रियापेक्षया कर्मत्वम् । बहुव्रीहौ क्षेपणक्रियाविशेषणमेतदिति केचित् । रणे रिपूंस्तिरस्कुर्वन्नभिभवन् तिरःकृतदिगाभोगः स्वकायेन वृक्षैश्चाच्छादितदिग्विस्तारः ॥ "तिरसोऽन्यतरस्याम्" इति सत्वविकल्पः । कपिर्भ्रमन् रणे नानाविधं चरन् बहुधा ददृशे । एकोऽप्यनेक इव दृष्ट इत्यर्थः । एकस्य बहुत्वासंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिः ॥

द्विष्कुर्वतां चतुष्कुर्वन्नभिघातं[5] नगैर्द्विषाम् ।
बहिष्करिष्यन् संग्रामादरीन्[6] ज्वलनपिङ्गलः ॥ ६३ ॥

६३. अथ सार्धश्लोकेन मारुतिं वर्णयति ॥ द्विरित्यादिना ॥ ज्वलनपिङ्गलोऽग्निपिशङ्गोऽसौ मारुतिः नगैर्वृक्षैरभिघातं द्विर्द्विर्वारं कुर्वतां द्विषां चतुश्चतुर्वारं कुर्वन् ॥ "द्वित्रिचतुर्भ्यः सुच्" इति कृत्वोऽर्थे सुच् ॥ "द्विस्त्रिश्चतुरिति कृत्वोऽर्थे" इति विसर्जनीयस्य विकल्पात्षत्वम् । संग्रामादरीन् बहिष्करिष्यन् निराकरिष्यन् । इदुदुपधत्वान्नित्यं षत्वम् ॥

१ °कुर्वन्रिपून्रणे T., G., Com.
२ तिरःकृत° T., G., Com.
३ दिशाभोगो T_3.
४ ददृशे बहुधा भ्रमन् c., N., C., T., G. बहुशो ददृशे भ्रमन् T_4.
५ °भिघाते D.
६ संग्रामाद्रिपून् N., C., T_1, T_3, E_2.

ज्योतिष्कुर्वन्निवैकोऽसावाटीत् संख्ये परार्ध्यवत् ।
तमनायुष्करं प्राप शक्रशत्रुर्धनुष्करः ॥ ६४ ॥

६४. ज्योतिरिति ॥ ज्योतिष्कुर्वन्निव तेजः सुवान इवेत्यर्थः । क्रियासामान्यवाचिना विशेषो लक्ष्यते । एकोऽपि परार्धवत् । परार्धशब्दोऽत्र संख्येयवचनः । परार्धसंख्याक इवेत्युत्प्रेक्षा । संख्ये युद्धे आटीदचारीत् ॥ "इट ईटि" इति सलोपः ॥ आयुष्करो न भवतीत्यनायुष्करं जीवितहारिणं मारुतिं धनुः करे यस्य स धनुष्करः ॥ "नित्यं समासेऽनुत्तरपदस्थस्य" इत्युभयत्रापि नित्यं षत्वम् ॥ शक्रशत्रुरिन्द्रजित् प्राप अभियात इत्यर्थः ॥

अस्यन्नरुष्करान् बाणान् ज्योतिष्करसमद्युतिः ।
यशस्करो यशस्कामं कपिं बाणैरवाकिरत् ॥ ६५ ॥

६५. अस्यन्निति ॥ अरुष्करान् व्रणकरान् । 'व्रणोऽस्त्रियामीर्ममरुः' इत्यमरः । बाणानस्यन् क्षिपन् ज्योतिष्करसमद्युतिर्भास्करसमप्रभः । अत्रोभयत्रापि "नित्यं समासे—" इत्यादिना षत्वम् । यशस्करः शत्रुक्षयेनात्मनः कीर्त्तिसम्पादकः स राक्षसो यशस्कामं तद्वत्कीर्त्तिकामम् ॥ "अतः कृकमि—" इत्यादिना सत्वम् ॥ कपिं बाणैरवाकिरद्विक्षेप ॥

चकाराधस्पदं नासौ चरन् वियति मारुतिः ।
मर्माविद्भिस्तमस्काण्डैर्भिद्यमानोऽप्यनेकधा ॥ ६६ ॥

६६. चकारेति ॥ असौ मारुतिः वियति आकाशे चरन् मर्माविद्भिः मर्मभेदिभिः । विध्यतेः क्विप् ॥ "नहिवृति—" इत्यादिना दीर्घः ॥ तमस्काण्डैरयोमयत्वात्तमःसवर्णैः । कस्कादित्वात्सत्वम् । अनेकधा

---

१ ज्योतिःकुर्व° E2.
२ परार्ध T., G., Com.
३ तथानायु° T4.
४ °धनुर्धरः D., E2.
५ द्योतिष्कर° E2.
६ °रताडयत् N., C., T1, E2, E3, B.
७ °विध्यमानो° N., C., T1, T3, T4. वध्यमानो T2.

भिद्यमानोऽप्यधस्पदं भूतले पादविक्षेपं न चकार । मयूरव्यंसकादित्वात्समासे "अधःशिरसी पदे" इति सत्वम् ॥ इति सत्वाधिकारः ॥

अथ मूर्धन्याधिकारे षत्वाधिकारः ।

पुरुहूतद्विषो[1] धूर्षु युक्तान्[2] यानस्य वाजिनः ।
आयूंषि त्वक्षु निर्भिद्य प्राभञ्जनिरमोचयत् ॥ ६७ ॥

६७. पृतनाषाडिति ॥ प्रभञ्जनस्यापत्यं पुमान् प्राभञ्जनिः मारुतिः ॥ "अत इञ्" ॥ पृतनां सहत इति पृतनाषाडिन्द्रः ॥ "सहेः साढः सः" इति षत्वम् ॥ तद्विष इन्द्रजितः । अत्र "छन्दसि सहः" इति ण्विप्रत्ययस्य छन्दसि विधानात् पुरुहूतद्विष इति पाठं भिन्दन्ति । अन्ये तु 'तुरासाहं पुरोधाय' इत्यादि प्रयोगदर्शनाद्भाषायामपीच्छन्ति । यानस्य रथस्य धूर्षु युगाग्रेषु ॥ "आदेशप्रत्यययोः" इति षत्वम् ॥ युक्तान् बद्धान् वाजिनोऽश्वान् त्वक्षु चर्मसु । पूर्ववत् षत्वम् । निर्भिद्य विदार्य आयूंषि जीवितानि ॥ "नुम्विसर्जनीयस्य शर्व्यवायेऽपि" इति षत्वम् ॥ अमोचयदत्याजयत् ॥

सुषुपुस्ते यदा भूमौ रावणिः सारथिं तदा ।
आहर्त्तुमन्यानशिषत् प्रोषितत्रासकर्कशः ॥ ६८ ॥

६८. सुषुपुरिति ॥ ते वाजिनः यदा भूमौ सुषुपुः दीर्घं निद्रुः ॥ "आदेशप्रत्यययोः" इति षत्वम् ॥ तदा प्रोषितत्रासो निर्गतभयोऽत एव कर्कशः कठिनचित्तो रावणिरिन्द्रजित् अन्यानश्वानाहर्त्तुं सारथिमशिषत् आज्ञापयत् ॥ "शासिवसिघसीनां च" इत्युभयत्र षत्वम् ॥

प्रतुष्टूषुः पुनर्युद्धमासिषञ्जयिषुर्भयम्[3] ।
आतस्थौ रथमात्मीयं[4]ानुत्सिसाहयिषन्निव ॥ ६९ ॥

---

१ पृतनाषाड्द्विषो T., G., Com. Noticed also by E_2.

२ युक्तानक्षस्य C., c., T_1, T_2, T_3, T_4.

३ पुनर्यानमा° T_2, T_4.

४ °मात्मीयमुत्सि° B.

६९. प्रतुष्टूषुरिति ॥ पुनः युद्धं प्रतुष्टूषुः प्रस्तोतुं प्रारब्धुमिच्छुः । स्तौतेः सन्नन्तादुप्रत्ययः ॥ "अज्झनगमां सनि" इति दीर्घः । भयमासिषञ्जयिषुः शत्रुचित्ते भयमासञ्जयितुमिच्छुः । सञ्जयतेः सन्नन्तादुप्रत्ययः ॥ "स्तौतिण्योरेव षण्यभ्यासात्" इति धातुसकारस्य षत्वम् ॥ आत्मीयानुत्सिसाहयिषन्नुत्साहयितुमिच्छन्निव । साहयतेः सन्नन्ताल्लटः शत्रादेशः ॥ "सः स्विदिस्वदिसहीनां च" इति धातुसकारस्य षत्वापवादिसकारः । रथमश्वान्तरयुक्तमातस्थौ आरुरोहेत्यर्थः ॥

बलान्यभिषिषिक्षन्तं तरुभिः कपिवारिदम् ।
विजिगीषुः पुनश्चक्रे व्यूहं दुर्जयमिन्द्रजित् ॥ ७० ॥

७०. बलानीति ॥ बलानि सैन्यानि तरुभिर्वृक्षैरभिषिषिक्षन्तमभिषेकुमिच्छन्तम् । अभिपूर्वात् सिञ्चतेः सन्नन्ताल्लटः शत्रादेशः ॥ "स्थादिष्वभ्यासेन चाभ्यासस्य" इति धात्वभ्याससकारयोः षत्वम् ॥ कपिमेव वारिदं विजिगीषुरिन्द्रजित् पुनर्व्यूहं बलानां चक्रगोमूत्रकादिसंस्थानविशेषं चक्रे निर्ममे ॥

अभिष्यन्तः[1] कपिं क्रोधादभ्यषिञ्चन्निवात्मनः[2] ।
संप्रहारसमुद्भूतै रक्तैः कोष्णैररुश्च्युतैः[3] ॥ ७१ ॥

७१. अभीति ॥ अभिष्यन्तमन्तयन्तं मारयन्तमित्यर्थः ॥ षोऽन्तकर्मणीत्यस्माद् दैवादिकाल्लटः शत्रादेशः ॥ "ओतः श्यनि" इत्योकारलोपः ॥ "उपसर्गात्सुनोति—" इत्यादिना षत्वम् ॥ कपिं मारुतिमात्मनः स्वस्य संप्रहारसमुद्भूतैः कपिकृतप्रहारजन्यैररुश्च्युतैः व्रणच्युतैः कोष्णैरीषदुष्णैः रक्तैः क्रोधादभिषुण्वन्निव तस्योपरि क्षिपन्निवेत्यर्थः । इन्द्रजिदिति पूर्वेण संबन्धः ॥ "उपसर्गात्सुनोति—" इत्यादिना षत्वम् । अभ्यषुण्वन्निवेति पाठान्तरे राक्षसा इति शेषः ॥ "प्राक्सितादड्व्यवायेऽपि" इति षत्वम् ॥

---

१ अभिष्यन्तं T_4, T., G., Com. क्रोधादभिषिञ्चन्निवा° T_3.
२ क्रोधादभिषुण्वन्निवात्मनः T., G., Com.
३ °ररुश्च्युतः E_3.

संग्रामे तानधिष्ठास्यन् निषद्य पुरतोरणम्।
अविषीदन्नवष्टब्धान् व्यष्टभ्नान्नरविष्वणान्॥ ७२॥

७२. संग्राम इति॥ संग्रामे रणे अवष्टब्धानविदूरस्थान्॥ "अवाच्चालम्बनाविदूर्ययोः" इति षत्वम्॥ तान्नरविष्वणान्नरभोजनान् राक्षसान्। पचाद्यच्॥ "वेश्च स्वनो भोजने" इति षत्वम्॥ अविषीदन् अखिन्नः सन् निषद्य तोरणे स्थित्वैव॥ "सदिरप्रतेः" इत्युभयत्रापि सदेः षत्वम्॥ अधिष्ठास्यन्नाक्रमिष्यन्॥ "उपसर्गात्सुनोति—" इत्यादिना षत्वम्॥ पुरस्य तोरणं व्यष्टभ्नात् अधिष्ठितवान्॥ "स्तन्भेः" इत्युपसर्गादुत्तरस्य स्तन्भेः सकारस्य षत्वम्॥

विषह्य राक्षसाः क्रुद्धाः शस्त्रजालमवाकिरन्[1]।
यन्न व्यषहतेन्द्रोऽपि[2] कपिः पर्यसहिष्ट[3] तत्॥ ७३॥

७३. विषह्येति॥ अथ राक्षसाः क्रुद्धाः सन्तो विषह्य कपिविग्रहं सोढ्वा॥ "परिनिविभ्यः—" इत्यादिना सहेः षत्वम्॥ शस्त्रजालमवाकिरन् व्यक्षिपन्। यच्छस्त्रजालमिन्द्रोऽपि न व्यषहत न विसोढवान्। सहेर्लङि तङ्। तच्छस्त्रजालं कपिः पर्यसहिष्ट परिसोढवान्। सहेर्लुङि तङि पूर्वसूत्रानुवृत्तौ "सिवादीनां वाड्व्यवायेऽपि" इति सहेः सकारस्य वा षत्वम्॥

विष्यन्दमानरुधिरो[4] रक्तविस्यन्दपाटलान्[5]।
विष्कन्तॄन्[6] परिघेणाहन्[7]नविस्कर्न्ता[8] कपिर्द्विषः॥ ७४॥

७४. निष्यन्दमानेति॥ निष्यन्दमानरुधिरः क्षरद्रक्तः कपिः रक्तनिस्यन्देन रक्तस्रावेण पाटलान्। प्रहारसहः प्रहर्त्ता चेति भावः॥ "अनु-

---

१ °मिवाकिरन् T2.
२ व्यसहते° c.
३ पर्यषहिष्ट N., C., T1, T2, T3.
४ निष्यन्द° T., G., Com., c.
५ निष्यन्द D., T.
विष्यन्द B.
निस्यन्द E2, Com.
परिविष्यन्द T2.
६ विस्कन्तॄन् E3.
विष्कन्दान् E2.
विष्कभीन् B.
७ परितो हन्ता T4.
८ विष्कन्ता E3, D.

विपर्यभिनिभ्यः स्यन्दतेरप्राणिषु" इति वा षत्वम् ॥ विष्कन्तॄन् विष्कन्दनशीलांश्चञ्चलान् । स्कन्देस्ताच्छील्ये तृच् । द्विषः शत्रून् अविस्कन्ता स्वयमचञ्चलः सन् । पूर्ववत्तृच् । अर्दि हर्दि स्कन्दिमिति पाठादनिट्त्वम् ॥ "वेः स्कन्देरनिष्ठायाम्" इत्युभयत्र वा षत्वम् ॥ परिघेणाहन् जघान । हन्तेर्लङ् ॥

मेघनादः परिष्कन्दन्[१] परिस्कन्दन्तमाश्वरिम्[२] ।
अबध्नादपरिस्कन्दं ब्रह्मपाशेन विस्फुरन् ॥ ७५ ॥

७५. मेघनाद इति ॥ मेघनाद इन्द्रजित् परिष्कन्दन् परितो भ्रमन् परिष्कन्दन्तं परितो भ्रमन्तम् ॥ "परेश्च" इत्युभयत्र षत्वम् ॥ 'मेघनादः परिष्कन्ता परिष्कन्तारमाश्वरिम्' इति क्वचित्पाठः । अरिं शत्रुं कपिमपरिस्कन्दमश्लथं यथा तथा ॥ "परिस्कन्दः प्राच्यभरतेषु" इति षत्वाभावनिपातः ॥ ब्रह्मपाशेन ब्रह्मास्त्रेण विस्फुरन् दीप्यमानः ॥ "स्फुरतिस्फुलत्योर्निर्निविभ्यः" इति वा षत्वम् ॥ आशु अबध्नाद्बन्ध ॥

विस्फुलद्भिर्[३]गृहीतोऽसौ निष्फुलः[४] पुरुषाशनैः ।
विष्कम्भितुं[५] समर्थोऽपि नाचलद्ब्रह्मगौरवात् ॥ ७६ ॥

७६. विष्फुलद्भिरिति ॥ विष्फुलद्भिरुत्साहाद्वलद्भिः पुरुषाशनैः राक्षसैर्गृहीतः तथापि विष्फुलतीति विष्फुलः स्फुरन् । पचाद्यच् । संज्ञापूर्वको विधिरनित्य इति गुणाभावः ॥ "स्फुरतिस्फुलत्योः—" इत्यादिना षत्वम् ॥ असौ हनूमान् विष्कम्भितुं विचालितुम् ॥ "वेः स्कभ्नातेर्नित्यम्" इति षत्वम् ॥ समर्थोऽपि ब्रह्मवरादेव शक्तोऽपि ब्रह्मणो गौरवादलङ्घ्यत्वान्नाचलत् न चचाल । बद्ध एव स्थित इत्यर्थः ॥

---

१ परिस्कन्दन् N., D., E2, E3.
२ परिष्कन्दन्त° N., E2, E3, T., G., Com.
३ विस्फुरद्भि° c., B., E2.; विष्फुलद्भि° T., G., Com.
४ विष्फुलः T., G., Com.
विस्फुरः E3.
निष्फुलं D.
निस्फुरः E2.
निष्फलैः T2.
५ विष्कान्दितुं c.

कृषीढ्वं भर्त्तुरानन्दं मा न प्रोढ्वं द्रुतं वियत् ।
वानरं नेतुमित्युच्चैरिन्द्राजित्प्रावदत् स्वकान् ॥ ७७ ॥

७७. कृषीढ्वमिति ॥ हे भटाः भर्त्तुः स्वामिनो रावणस्यानन्दं कृषीढ्वं कुरुध्वम् । जयघोषयेति भावः । करोतेराशीर्लिङि सीयुट् ॥ "इणः षीध्वम्—" इत्यादिना षीध्वमो धकारस्य मूर्धन्यो ढकारः ॥ वानरं नेतुं रावणान्तिके प्रापयितुं वियदाकाशं प्रति द्रुतं न मा प्लोढ्वम् । किन्तु प्लवध्वमित्यर्थः । प्रतिषेधद्वयस्य प्रकृतार्थविधिपरत्वात् । प्लुङ् गताविति धातोर्लुङि तङि ध्वमि "धि च" इति सलोपे गुणः ॥ "इणः षीध्वम्—" इत्यादिनैव लुङ्धकारस्य मूर्धन्यो ढः । इत्युच्चैरिन्द्रजित्स्वकान् स्वकीयान्भटान् प्रावदत् ॥

गतमङ्गुलिषङ्गं[3] त्वां भीरुष्ठानादिहागतम् ।
खादिष्याम इति प्रोचुर्नयन्तो मारुतिं द्विषः ॥ ७८ ॥

७८. गतमिति ॥ अङ्गुलिषु सङ्गो यस्य सोऽङ्गुलिषङ्गः ॥ "समासेऽङ्गुलेः सङ्गः" इति षत्वम् ॥ तस्य भावस्तत्त्वं गतं हस्तगतमित्यर्थः । भीरवो मनुष्याः तेषां स्थानात् भीरुष्ठानात् ॥ "भीरोः स्थानम्" इति षत्वम् ॥ इहागतं लङ्कां प्राप्तं मारुतिं नयन्तो रावणान्तिकं प्रापयन्तो द्विषो राक्षसाः खादिष्याम एनं भक्षयिष्याम इति प्रोचुः ॥

अग्निष्टोमादिसंस्थेषु ज्योतिष्टोमादिषु द्विजान् ।
योऽरक्षीत्तस्य दूतोऽयं मानुषस्येति चावदन् ॥ ७९ ॥

७९. अग्निष्टोमेति ॥ अग्निष्टोमादयः संस्थाः प्रकाराः येषां तेषु अग्निष्टोमादिसंस्थेषु ॥ "अग्नेः स्तुत्स्तोमसोमाः" इति षत्वम् ॥ ज्योतिष्टोमादिषु क्रतुषु यो मानुषो द्विजान्विश्वामित्रादीन् अरक्षीत्तस्य मानुषस्य रामस्यायं दूत इति चावदन् ॥

---

१ मा नो प्लोढ्वं D.
मा न प्लोढ्वं T., G., Com.

२ वियद्द्रुतम् T2.
३ °षङ्गत्वं T., G., Com., D.

नासां मातृष्वसेय्याश्च रावणस्य लुलाव यः ।
मातुःस्वसुश्च तनयान् खरादीन् निजघान[1] यः ॥ ८० ॥

८०. नासामिति ॥ यो मानुषो रावणस्य मातृष्वसुरपत्यं स्त्री मातृष्वसेयी ॥ "मातृष्वसुश्च" इति ढगन्त्यलोपश्च ॥ "मातृपितृभ्यां स्वसा" इति षत्वम् ॥ तस्याः शूर्पणखाया नासां लुलाव चिच्छेद च । मातुःस्वसुर्मातृभगिन्याः ॥ "विभाषा स्वसृपत्योः" इति षष्ठ्या विकल्पादलुक् ॥ "मातुः पितुर्भ्यामन्यतरस्याम्" इति वैकल्पिकषत्वाभावः चस्त्वर्थो भिन्नक्रमः । तस्यास्तनयान् खरादींस्तु जघान च ॥

प्रादुःषन्ति न संत्रासा यस्य रक्षःसमागमे[2] ।
तस्यै[3] क्षत्रियदुःषूतेरयं प्रणिधिरागतः ॥ ८१ ॥

८१. प्रादुरिति ॥ किं च यस्य मनुष्यस्य राक्षसानां समागमे संप्रहारे संत्रासाः भयानि न प्रादुःषन्ति न प्रादुर्भवन्ति ॥ "उपसर्गप्रादुर्भ्यामस्तिर्यच्परः" इति अस्तिसकारस्य षत्वम् ॥ क्षत्रियदुःषूतेः क्षत्रियदुःसन्तानस्य । सूयतेः कर्मणि स्त्रियां क्तिन् ॥ "सुविनिर्दुर्भ्यः सुपिसूतिसमाः" इति षत्वम् ॥ तस्य मानुषस्यायं प्रणिधिश्चार आगतः । 'यथार्हवर्णप्रणिधिरपसर्पश्चरः स्पशः' इत्यमरः ॥

दृष्ट्वा सुषुप्तं राजेन्द्रं पापोऽयं[5] विषमाशयः ।
चारकर्मणि निष्णातः प्रविष्टः[4] प्रमदावनम् ॥ ८२ ॥

८२. दृष्ट्वेति ॥ चारकर्मणि निष्णातः कुशलः ॥ "निनदीभ्यां स्नातेः कौशले" इति षत्वम् ॥ विषमाशयः कपटचित्तोऽत एव पापः क्रूरकर्मायं वानरो राजेन्द्रं रावणं सुषुप्तं सुष्ठु सुप्तम् ॥ "सुविनिर्दुर्भ्यः—" इत्यादिना सुप्तसमयोः षत्वम् ॥ दृष्ट्वा ज्ञात्वा प्रमदावनं प्रविष्टः ॥

१ विजघान N., C., T1, E2.
२ रक्षांसि चापरे E3.
३ तत्र T3.
४ प्रविष्टः प्रमदावनम् D.
५ पापोऽयं विषमाशयः D.

सुप्रतिष्णातसूत्राणां कपिष्ठलसमत्विषाम् ।
स्थितां वृत्ते द्विजातीनां रात्रावैक्षत मैथिलीम् ॥ ८३ ॥

८३. स्वितिं ॥ सुष्ठु प्रतिष्णातं शुद्धं सूत्रं येषां तेषां सूत्रकृताम् ॥ "सूत्रं प्रतिष्णातम्" इति षत्वम् ॥ कपिष्ठलो नाम गोत्रप्रवर्त्तकः कश्चिदृषिः ॥ "कपिष्ठलो गोत्रे" इति निपातनात् षत्वम् ॥ तेन समत्विषां समानतेजसां द्विजातीनां ब्राह्मणानां वृत्ते स्थितां तथापवित्रचरित्रामित्यर्थः । मैथिलीं सीतां रात्रावैक्षत अद्राक्षीत् ॥

सर्वनारीगुणैः प्रष्ठां विष्टरस्थां गविष्ठिराम् ।
शयानां कुष्ठले तारां दिविष्ठामिव निर्मलाम् ॥ ८४ ॥

८४. श्लोकचतुष्टयेन मैथिलीं विशिनष्टि ॥ सर्वेति ॥ सर्वैः नारीगुणैः प्रतिष्ठत इति प्रष्ठां स्त्रीणामग्रगामिनीमुत्तमामित्यर्थः ॥ "आतश्चोपसर्गे" इति कप्रत्ययः ॥ "प्रष्ठोऽग्रगामिनि" इति षत्वनिपातः ॥ विष्टरस्थां पवित्रासनस्थाम् ॥ "वृक्षासनयोर्विष्टरः" इति षत्वनिपातः ॥ गवि वाचि स्थिरां गविष्ठिरां सत्यवाचामित्यर्थः ॥ "गवियुधिभ्यां स्थिरः" इति षत्वम् । एतस्मादेव निपातनात्सप्तम्या अलुक् । कुष्ठले भूतले ॥ "विकुशमिपरिभ्यः स्थलम्" इति षत्वम् ॥ शयानां दिवि तिष्ठतीति दिविष्ठां खस्थाम् ॥ "अम्बाम्ब—" इत्यादिना षत्वम् ॥ अत्र दिवीति निर्देशादलुक् । निर्मलां तारामिव स्थिताम् ॥

सुषाम्नीं सर्वतेजःसु तन्वीं ज्योतिष्टमां शुभाम् ।
निष्टपन्तीमिवात्मानं ज्योतिःसात्कुर्वतीं वनम् ॥ ८५ ॥

८५. सुषाम्नीति ॥ शोभनं साम सान्त्वं यस्यास्तां सुषाम्नीम् ॥ "अन उपधालोपिनोऽन्यतरस्याम्" इति ङीपि "सुषामादिषु च" इति षत्वम् ॥ सर्वतेजःसु सर्वतेजसां मध्ये ज्योतिष्टमामुत्कृष्टतेजोभूताम् ॥ "ह्रस्वात्तादौ तद्धिते" इति षत्वम् ॥ तन्वीं कृशां शुभां कल्याणीमात्मानं शरीरं निष्टपन्तीमिव तपोऽग्नौ संतापयन्तीमिव स्थिताम् ॥ "निसस्त-

१ गणैः T4.

पतावनासेवने" इति षत्वम् ॥ वनं ज्योतिःसात् कार्त्स्न्येन ज्योतिर्मयं कुर्वतीम् ॥ "विभाषा साति कार्त्स्न्ये" इति सातिप्रत्ययः ॥ "नुम्विसर्जनीय—" इत्यादिना षत्वे प्राप्ते "सात्पदाद्योः" इति षत्वनिषेधः ॥

मधुसाद्भूतकिञ्जल्कपिञ्जर[1]भ्रमराकुलाम् ।
उल्लसत्कुसुमां[2] पुण्यां हेमरत्नलतामिव ॥ ८६ ॥

८६. मधुसादिति ॥ मधुसाद्भूताः कार्त्स्न्येन मधुभूताः मकरन्दप्रचुरा इत्यर्थः । पूर्ववत्कार्त्स्न्ये सातिप्रत्यये "आदेशप्रत्यययोः" इति षत्वे प्राप्ते पूर्ववत्प्रतिषेधः । तैः किञ्जल्कैः पिञ्जरैः भ्रमरैराकुलामुल्लसत्कुसुमां पुण्यां पवित्रां हेमरत्नलतां रत्नखचितहेममयकल्पवल्लीमिव स्थिताम् ॥

विलोचनाम्बु मुञ्चन्तीं[3] कुर्वाणां परिसेसिचाम् ।
हृदयस्येव शोकाग्निसंतप्तस्योत्तमव्रताम् ॥ ८७ ॥

८७. विलोचनेति ॥ विलोचनाम्बु बाष्पं सिञ्चन्तीं क्षरन्तीम् । पदादित्वात् "सात्पदाद्योः" इत्यादेशसकारस्य षत्वप्रतिषेधः । अत एव शोकाग्निसन्तप्तस्य हृदयस्य परिसेसिचां परितः पौनःपुन्येन सेचनं कुर्वाणामिव स्थिताम् । सिञ्चतेर्यङन्तात्स्त्रियामप्रत्यये टाप् ॥ "उपसर्गात्सुनोति" इत्यादिना षत्वे प्राप्ते "सिचो यङि" इति प्रतिषेधः ॥ उत्तमव्रतां पतिव्रतामित्यर्थः मैथिलीमैक्षतेति पूर्वेणान्वयः ॥

दृष्ट्वा तामभनग् वृक्षान् द्विषो घ्नन् परिसेधतः ।
परितस्तान्[4] विचिक्षेप क्रुद्धः स्वयमिवानिलः[5] ॥ ८८ ॥

८८. दृष्ट्वेति ॥ तां सीतां दृष्ट्वा परिसेधतः परित आधावतः । षिधु गत्यामिति धातोः "सेधतेर्गतौ" इति षत्वप्रतिषेधः ॥ द्विषो राक्षसान् घ्नन्

---

१ पिङ्गल° D., T2, T4.
२ °त्कुङ्कुमां T3.
३ सिञ्चन्तीं T., G., Com., T2, T4.
४ परितश्चापि चिक्षेप T3. परितश्चोद्विचिक्षेप T4, T., G., Com.
५ °वानलः T2.

वृक्षानभनक् बभञ्ज । भञ्जेर्लङि तिलोपः कुत्वम् । स्वयं साक्षात् क्रुद्धोऽनिलो वायुरिव परित उद्विचिक्षेप च उद्विक्षिप्तवांश्च ॥

अप्रतिस्तब्धविक्रान्तमनिस्तब्धो[1] महाहवे ।
विसोढवन्तमस्त्राणि[2] व्यतस्तम्भद् घनध्वनिः ॥ ८९ ॥

८९. अप्रतीति ॥ घनध्वनिर्मेघनादो महाहवे अनिस्तब्धोऽप्रतिबन्धः सन् । अप्रतिस्तब्धविक्रान्तमप्रतिबन्धविक्रमम् ॥ "प्रतिस्तब्धनिस्तब्धौ च" इति स्तम्भेः षत्वाभावनिपातः । अस्त्राणि निसोढवन्तम् ॥ "परिनिविभ्यः—" इत्यादिना षत्वे प्राप्ते "सोढः" इति प्रतिषेधः ॥ मारुतिं व्यतस्तम्भत् स्तम्भयति स्म । स्तम्भेर्णौ चङि "स्तम्भुसिवुसहां चङि" इति षत्वप्रतिषेधः ॥

तेऽभिज्ञाया[3]भिसोष्यन्तं[4] रक्तै रक्षांसि सव्यथाः ।
अन्यैरप्यायतं[5] मेवुर्[6]वरत्राशृङ्खलादिभिः ॥ ९० ॥

९०. त इति ॥ ते राक्षसाः रक्षांसि रक्तैरस्त्रैर्निसोष्यन्तं प्लावयिष्यन्तम् ॥ "सुनोतेः स्यसनोः" इति षत्वप्रतिषेधः ॥ अभिज्ञाय तत्काले व्यपाचिकीर्षुं बुद्धेत्यर्थः । सव्यथाः सभयाः सन्तः । अन्यैरप्यायतैर्दीर्घिष्ठैर्वरत्राशृङ्खलादिभिः मेवुः बबन्धुः । मव बन्धन इत्यस्माल्लिट् ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ ॥

विषसादेन्द्रजिद्बुद्ध्वा बन्धे[7] बन्धान्तरक्रियाम् ।
दिव्यबन्धो विषहते नापरं[8] बन्धनं[9] यतः ॥ ९१ ॥

९१. विषसादेति ॥ इन्द्रजित् बद्धे दिव्यास्त्रबद्धे बन्धान्तरक्रियां बन्धान्तरकरणं बुद्ध्वा विषसाद ॥ "सदेः परस्य लिटि" इति परस्य षत्व-

१ °मविस्तब्धो B.
२ निसोढ T2, T., G., Com.
३ ते विज्ञाया° N., C., E3, T1, T2, T3, T4.
४ °य निसोष्यन्तं T., G., Com.
५ °प्यायतैर्मे° T., G., Com., T3.
६ नेहुः N., D., B.
७ बद्धे T., G., Com.
८ परं संयममायनः T4.
९ संयमं T3, c., D.

प्रतिषेधः । पूर्वस्य तु "सदिरप्रतेः" इति षत्वम् ॥ यतो यस्माद् दिव्यबन्धोऽपरनियमं नियन्त्रणं बन्धान्तरं न विषहते ॥ "परिनिविभ्यः—" इत्यादिना सहेः षत्वम् ॥

अथ णत्वाधिकारः ॥

मुष्णन्तमिव तेजांसि विस्तीर्णोरस्थलं पुरः[1] ।
उपसेदुर्दशग्रीवं गृहीत्वा राक्षसाः कपिम् ॥ ९२ ॥

९२. मुष्णन्तमिति ॥ अथ राक्षसाः कपिं पुरोऽग्रे गृहीत्वा तेजांसि सूर्यादीनां मुष्णन्तं हरन्तमिवेत्युत्प्रेक्षा । विस्तीर्णोरस्थलम् ॥ "रषाभ्यां नो णः समानपदे" इत्युभयत्र णत्वम् ॥ दशग्रीवमुपसेदुरासेदुः ॥

बहुधा भिन्नमर्माणो[2] भीमाः खरणसादयः[3] ।
अग्रेवणं[4] वर्त्तमाने प्रतीच्यां चन्द्रमण्डले ॥ ९३ ॥

९३. अथ युग्मेनाह बहुधेति ॥ चन्द्रमण्डले प्रतीच्यां पश्चिमदिशि अग्रे वनस्य अग्रेवणं वनाग्रे । राजदन्तादित्वात्परनिपातः ॥ "वनं पुरगा—" इत्यादिना णत्वम् । सूत्रनिर्देशादलुक् ॥ वर्त्तमाने सति प्रभाते सतीत्यर्थः । बहुधा भिन्नमर्माणो विदारितमर्मस्थलाः ॥ "अट्कुपु—" इत्यादिना णत्वम् ॥ भीमाः भयंकराः खरस्येव नासिका येषां ते खरणसाः ॥ "अञ् नासिकायाः संज्ञायां नसं चास्थूलात्" इति बहुव्रीहिसमासान्तोऽच्प्रत्ययो नसादेशश्च ॥ "पूर्वपदात्संज्ञायामगः" इति णत्वम् ॥ तदादयः द्विष इत्युत्तरेण संबन्धः ॥

निर्वणं[5] कृतमुद्यानमनेनाम्रवणादिभिः ।
देवदारुवनामिश्रैरित्यूचुर्वानरद्विषः[6] ॥ ९४ ॥

९४. निर्वाणमिति ॥ द्विषः पूर्वोक्तविशेषणाः राक्षसाः देवदारुवनैरामिश्रैर्मिलितैः ॥ "विभाषौषधिवनस्पतिभ्यः" इत्यत्र "द्व्यक्षरत्र्यक्षरेभ्य

१ वपुः c.
२ भिन्नकर्माणो T_3.
३ खरनसा° c., E_3.
४ अग्रेरणं c.
५ निर्वाणं T., G., Com.
६ वानरं द्विषः T., G., Com.

इति वक्तव्यम्" इति नियमादिह चतुरक्षरात् वननकारस्य णत्वाभावः। आम्रवणादिभिरुपलक्षितम्॥ "प्रनिरन्तर्—" इत्यादिना वननकारस्य णत्वम्। उद्यानमनेन वानरेण निर्वाणं प्रशान्तं लुप्तमिति यावत्। निःपूर्वाद्वातेः कर्त्तरि क्तः॥ "निर्वाणोऽवाते" इति निपातनान्निष्ठानत्वे णत्वम्॥ कृतमिति वानरमूचुः। अपराधित्वेनावोचन्नित्यर्थः॥

उपास्थिषत संप्रीताः पूर्वाह्णे रोषवाहणम्।
राक्षसाः[1] कपिमादाय पतिं रुधिरपायिणाम्॥ ९५॥

९५. उपेति॥ अथ पूर्वाह्णे प्रभाते॥ "अह्नोऽह्न एतेभ्यः" इत्यह्नादेशे "अह्नोऽदन्तात्" इति णत्वम्॥ संप्रीताः राक्षसाः कपिमादाय रोषस्य वाहनं रोषवाहणं रोषाश्रयमतिरुष्टमित्यर्थः॥ "वाहनमाहितात्" इति णत्वम्॥ रुधिरपायिणां रक्तपायिनां राक्षसानाम्। पिबतेस्ताच्छील्ये णिनिः॥ "प्रातिपदिकान्तनुम्विभक्तिषु च" इति णत्वम्॥ पतिं रावणमुपास्थिषतोपस्थिताः तेन संगता इत्यर्थः। उपपूर्वात्तिष्ठतेर्लुङि "उपाद्देवपूजा—" इत्यादिना संगतकरणे तङ्॥

सुरापाण[2]परिक्षीबं रिपुदर्पहरोदयम्।
परस्त्रीवाहिणं[3] प्रापुः साविष्कारं[4] सुरापिणः[5]॥ ९६॥

९६. सुरेति॥ सुरां पिबन्तीति सुरापाः॥ "गापोष्टक्" इति टक्॥ तदन्तः सुरापिणः तत्संसर्गिणो राक्षसाः। मत्वर्थीय इनि प्रत्ययः॥ "एकाजुत्तरपदे णः" इति णत्वम्॥ सुरापाणमिति भावे ल्युट्॥ "वा भावकरणयोः" इति पक्षे णत्वम्॥ तेन पर्याप्तं क्षीबो मत्तः परिक्षीबः तम्। क्षीबृ मद इति धातोः "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति निष्ठातकारस्य लोपनिपातः। अनुपसर्गादिति विशेषणादुप-

---

१ E₂, has असृक्पाणाधिपं तूर्णं कपिमादाय राक्षसाः as the 2nd half.
२ °पान C.
३ °वाहिनं N., T₄, B., E₂, E₃.
४ साविष्काराः C., E₂, B, T₁, T₂, T₃, T₄.
५ सुरापिणम् E₃.

सर्गस्य क्षीबेन समासो नोपसृष्टाल्लोपनिपातः। रिपुदर्पहरः उदयो वृद्धिर्यस्य तं परस्त्रियो वहति प्राप्नोतीति तद्वाहिणम्। प्रातिपदिकान्तनकारत्वात् "प्रातिपदिक—" इत्यादिना णत्वम्। साविष्कारं साविर्भावमास्थाने प्रकाशमानं रावणं प्रापुः॥

संघर्षयोगिणः पादौ प्रणेमुस्त्रिदशद्विषः।
प्रहिण्वन्तो हनूमन्तं प्रमीणन्तं द्विषन्मतीः॥ ९७॥

९७. संघर्षेति॥ द्विषन्मतीः शत्रुबुद्धीः प्रमीणन्तं हिंसन्तं हरन्तमित्यर्थः। मीञ् हिंसायामिति धातोः क्रैयादिकाल्लटः शत्रादेशः। हनूमन्तं प्रहिण्वन्तः प्रापयन्तः। हि गताविति धातोः सौवादिकाल्लटः शत्रादेशः॥ "हिनुमीना" इत्युभयत्र णत्वम्॥ ते राक्षसाः संघर्षयोगिणः स्पर्धायोगिनो नित्यमत्सरिण इत्यर्थः॥ "कुमति च" इति णत्वम्॥ त्रिदशद्विषो रावणस्य पादौ प्रणेमुः प्रणताः॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम्॥

प्रवपाणि शिरो भूमौ वानरस्य वनच्छिदः।
आमन्त्रयत संक्रुद्धः समितिं रक्षसां पतिः॥ ९८॥

९८. प्रेति॥ संक्रुद्धः रक्षसां पतिः रावणो वनच्छिदो वानरस्य शिरो भूमौ प्रवपाणि छित्त्वा भूमौ खनिष्यामि॥ "आनि लोट्" इति नित्यं णत्वम्॥ इति समितिं सभामामन्त्रयत अपृच्छत्॥

प्रण्यगादीत् प्रणिघ्नन्तं घनैः प्रणिनदन्निव।
ततः प्रणिहितैः स्वार्थे राक्षसेन्द्रं विभीषणः॥ ९९॥

९९. प्रणीति॥ तत आमन्त्रणानन्तरं पुनः प्रणिघ्नन्तं जिघांसन्तमित्यर्थः राक्षसेन्द्रं रावणं स्वार्थे स्वकार्ये प्रणिहितो युक्तो विभीषणः प्रणिनदन्निव गर्जन्निव प्रण्यगादीत् प्रणिगदितवान्॥ "नेर्गदनद—" इत्यादिना सर्वत्र णत्वम्॥

---

१ संहर्ष° C., D., E2, E3, C., T1., T2, T3.
२ द्विषां मतीः T2, T3.
३ घनं D. पुनः T., G., Com.
४ प्रणिहितां वाचं D.

प्रणिशाम्य दशग्रीव प्रणियातुमलं रुषम्।
प्रणिजानीहि हन्यन्ते दूता दोषे न सत्यपि ॥ १०० ॥

१००. प्रणिशाम्येति ॥ हे दशग्रीव प्रणिशाम्य प्रशान्तो भव। शाम्यतेर्लोट्। सिपि हिलोपः ॥ "शमामष्टानां दीर्घः श्यनि" इति दीर्घः ॥ रुषं प्रणियातुं प्राप्तुमलं रोषो न कर्त्तव्य इत्यर्थः ॥ "अलंखल्वोः—" इत्यादिना क्त्वाप्रत्ययविषये तुमुन्प्रयोगो देशविभाषानुसारात्कृतः कष्टः। दोषेऽपराधे सत्यपि दूता न हन्यन्त इति प्रणिजानीहि विद्धि॥ "शेषे विभाषाकखादौ—" इत्यादिना नेर्णत्वम् ॥ अन्यत्र "नेर्गद्नद—" इत्यादिनैव ॥

प्राणयन्तमरिं[1] प्रोचे राक्षसेन्द्रो विभीषणम्।
प्राणिणिषुर्न[2] पापोऽयं योऽभाङ्क्षीत्प्रमदावनम् ॥ १०१ ॥

१०१. प्राणयन्तमिति ॥ राक्षसेन्द्रो रावणः हरिं हनूमन्तं प्राणयन्तं जीवयन्तं दूतो न वध्य इति रक्षन्तमित्यर्थः। अन प्राणन इति धातोर्ण्यन्ताल्लटः शत्रादेशः ॥ "अनितेः" इति णत्वम् ॥ विभीषणं प्रोचे। यः प्रमदावनमभाङ्क्षीद्बभञ्ज। भञ्जेर्लुङि सिचि हलन्तलक्षणा वृद्धिः। सोऽयं कपिः प्राणिणिषुः प्राणितुं जीवितुमिच्छुः। न वा नैवेत्यर्थः। एवंविधापराधी कथं न वध्य इति भावः। अनितेः सन्नन्तादुप्रत्ययः ॥ "उभौ साभ्यासस्य" इति द्वयोर्णत्वम् ॥

प्राघानिषत[3] रक्षांसि येनाप्तानि वने[4] मम।
न प्रहण्मः[5] कथं पापं[6] वद पूर्वापकारिणम् १०२ ॥

१०२. प्रेति ॥ किं च येनैतेन वने ममाप्तानि हितकारीणि रक्षांस्यघानिषत हतानि। हन्तेः कर्मणि लुङि चिण्वदिड्वृद्धी ॥ "हो हन्तेः—"

१ यन्तं हरिं T., G., Com.
२ न वा सोऽयं प्राणिणिषुर्योऽभा° T., G., Com.
३ प्रहण्यन्ते स्म C.
४ रणे C.
५ प्रहन्मः E2, E3, B.
६ पापं T., G., Com.

इत्यादिना कुत्वम् ॥ "हन्तेरत्पूर्वस्य" इत्यस्य प्रत्युदाहरणम् ॥ पूर्वोपकारिणं प्रथमद्रोहिणं पापं क्रूरात्मानं कथं न प्रहण्मः वद कथय ॥ "वमोर्वा" इति हन्तेर्णत्वविकल्पः ॥

वेश्मान्तर्हणनं कोपान्मम शत्रोः करिष्यतः ।
मा कार्षीरन्तरयणं[1] प्रयाणार्हमवेह्यमुम् ॥ १०३ ॥

१०३. वेश्मेति ॥ कोपाच्छत्रोः वेश्मान्तर्हणनं गृहाभ्यन्तरे हननम् ॥ "अन्तरदेशे" इति णत्वम् ॥ करिष्यतो ममान्तरयणमन्तरायम् ॥ "अयनं च" इति णत्वम् ॥ मा कार्षीः । अमुं कपिं प्रयाणं दीर्घयात्रा ॥ "कृत्यचः" इति णत्वम् ॥ तदर्हं वध्यमवेहि ॥

प्रहीणजीवितं कुर्युर्ये न शत्रुमुपस्थितम् ।
न्याय्यायां[2] अपि ते लक्ष्म्याः कुर्वन्त्याशु प्रहापणम् ॥ १०४ ॥

१०४. प्रहीणेति ॥ ये उपस्थितं प्राप्तं शत्रुं प्रहीणजीवितं त्यक्तजीवितम् । जहातेः कर्मणि क्तः ॥ "घुमास्था—" इत्यादिना ईकारः ॥ "ओदितश्च" इति निष्ठानत्वम् ॥ "कृत्यचः" इति णत्वम् ॥ न कुर्युः ते न्याय्यायाः न्यायादनपेतायाः कुलागताया अपीत्यर्थः ॥ "धर्मपथ्यर्थ—" इत्यादिना यत्प्रत्ययः ॥ लक्ष्म्याः आशु प्रहापणं त्याजनं कुर्वन्ति । जहातेर्ण्यन्ताल्ल्युटि पुगागमः ॥ "णेर्विभाषा" इति णत्वम् ॥

कः कृत्वा रावणामर्षप्रकोपणमवद्यधीः[3] ।
शक्तो जगति शक्रोऽपि कर्त्तुमायुःप्रगोपणम्[4] ॥ १०५ ॥

१०५. क इति ॥ जगति अवद्यधीर्दुर्बुद्धिः कः शक्रोऽपि रावणस्यामर्षप्रकोपणं कृत्वा आयुषः प्रगोपणं प्रकृष्टं गोपनं रक्षणं कर्त्तुं शक्तः । न कोऽपीत्यर्थः । कुपिगुप्योर्भावे ल्युट् ॥ "हलश्चेजुपधात्" इति णत्वम् ॥

---

१ °रयनं c.
२ न्याय्या अपि च ते° T2, T4.
३ प्रकोपन c., E3.
४ आयुष्प° c.
°प्रगोपनम् E2, E3.

वनान्तप्रेङ्खणः[1] पापः फलानां परिणिंसकः[2] ।
प्रणिक्षिष्यति नो भूयः प्रणिन्द्यास्मान्मधून्ययम्[3] ॥ १०६ ॥

१०६. वनान्तेति ॥ वनान्ते वनप्रान्ते प्रेङ्खति चरतीति प्रेङ्खणः । कर्त्तरि ल्युट् ॥ "इजादेः सनुमः" इति णत्वम् ॥ पापः क्रूरः फलानां परिणिंसकश्चुम्बको भक्षक इत्यर्थः । णिसि चुम्बन इति धातोर्ण्वुल् । अयं कपिर्भूयोऽस्मान्प्रणिन्द्य परिभूय मधूनि मकरन्दान्नो प्रणिक्षिष्यति न चुम्बिष्यति न भक्षयिष्यतीत्यर्थः । णिक्ष चुम्बने लृट् । भूयो भक्षणवारणाय सर्वथायं मारणीय इत्यर्थः ॥ "वा निंसनिक्षनिन्दाम्" इति सर्वत्र णत्वम् ॥

हरेः प्रगमनं नास्ति न[4] प्रभानं[5] हिमद्रुहः ।
नातिप्रवेपनं[6] वायोर्मया गोपायिते वने ॥ १०७ ॥

१०७. हरेरिति ॥ मया गोपायिते गुप्ते ॥ "आयादय आर्धधातुके वा" इति विकल्पादायप्रत्ययः ॥ वने प्रमदावने हरेरिन्द्रस्यापि प्रगमनं प्रचारो नास्ति । हिमद्रुहः सूर्यस्य प्रभानं प्रतापनं नास्ति । भातेर्भावे ल्युट् । वायोरतिप्रवेपनमत्यन्तचलनं नास्ति । किमुतान्येषामित्यर्थः ॥ "न भाभूपूकमिगमिप्यायिवेपाम्" इति सर्वत्र णत्वप्रतिषेधः ॥

दुष्पानः पुनरेतेन कपिना भृङ्गसम्भृतः ।
प्रनष्टविनयेनाग्र्यः[7] स्वादुः पुष्पासवो वने[8] ॥ १०८ ॥

१०८. दुष्पान इति ॥ प्रनष्टविनयेन दुर्विनीतेन ॥ "नशेः षान्तस्य" इति णत्वप्रतिषेधः ॥ एतेन कपिना कर्त्रा वने भृङ्गसंभृतो भ्रमरसञ्चितोऽग्र्यः श्रेष्ठः स्वादुर्मधुरः पुष्पासवस्तद्विकारः क्षौद्रमित्यर्थः पुनर्भूयो दुःखेन पेयो दुष्पानः न पातव्य इत्यर्थः । खलर्थे आतो युच् ॥ "षात्पदान्तात्" इति णत्वप्रतिषेधः ॥

---

१ प्रेङ्खनः B.
२ परिनिंसकः D.
३ मधून्स्वयम् B.
४ प्रभानं न C.
५ प्रतानं B.
६ °वेपणं C.
७ प्रणष्ट B.
८ विजयेनासौ T4.

रोषभीममुखेनैवं क्षुभ्नतोक्ते प्लवङ्गमः।
प्रोचे सानुनयं वाक्यं रावणं स्वार्थसिद्धये॥ १०९॥

१०९. रोषेति॥ रोषाद्भीममुखेन। अत्र भीमपदेन निमित्तनिमित्तिनोर्व्यवायात् "पदव्यवायेऽपि" इति विभक्तिनकारस्य णत्वप्रतिषेधः। क्षुभ्नता क्षुभ्यता॥ "क्षुभ्नादिषु च" इति णत्वप्रतिषेधः॥ रावणेनैवमुक्ते प्लवङ्गमो हनूमान् स्वार्थसिद्धये सीताप्रत्यर्पणकार्यसिद्धये रावणं सानुनयमनुनययुक्तं वाक्यमूचे॥

पुनः प्रकीर्णकाः।

दूतमेकं कपिं बद्धमानीतं वेश्म पश्यतः[1]।
लोकत्रयपतेः क्रोधः कथं तृणलघुस्तव[2]॥ ११०॥

११०. दूतमिति॥ दूतं संध्यादिकार्यकरं न तु साक्षात्प्रतिपक्षमवध्यमित्यर्थः। एकमसहायं तत्रापि बद्धं वेश्म स्वगृहमानीतं तत्रापि कपिं पश्यतः सर्वं साक्षात्कुर्वत इत्यर्थः लोकत्रयपतेः परमाणुपर्वतयोरिवावयोर्महदन्तरमिति भावः। ईदृशस्य तव क्रोधः कथं तृणलघुः तद्वत्तुच्छः अस्थानप्रवृत्तेरित्यर्थः॥

अग्न्याहितजनप्रह्वे विजिगीषापराङ्मुखे।
कस्माद्वा नीतितीक्ष्णस्य[3] संरम्भस्तव तापसे॥ १११॥

१११. अग्नीति॥ अग्न्याहिता आहिताग्नयः॥ "वाहिताग्न्यादिषु" इति निष्ठायाः परनिपातः॥ तेषु जनेषु सज्जनेषु प्रह्वे नम्रे विजिगीषापराङ्मुखे विरक्ते तापसे तपस्विनि॥ "अण्च" इति मत्वर्थीयोऽण्प्रत्ययः॥ ईदृशे रामे नीतौ नितरां स्नातीति निष्णः कुशलः॥ "आतश्चोपसर्गे" इति कर्त्तरि कः॥ "निनदीभ्याम्—" इत्यादिना षत्वम्॥ तस्य तव कस्मात्कारणात् संरम्भः क्रोधः। अकारणवैरमनुचितमिति भावः॥

---

१ पश्य माम् T4.
२ बहुतृणं तव T2, T4.
३ नीतिनिष्णस्य N., C., T1, T3, T., G.,

Com.
नीतिविज्ञस्य B.

न सर्वरात्रकल्याण्यः[1] स्त्रियो नो[2] रत्नभूमयः ।
यं विनिर्जित्य लभ्यन्ते कः[3] कुर्यात्तेन विग्रहम् ॥ ११२ ॥

११२. नेति ॥ किं च यं तापसं विनिर्जित्य सर्वा रात्रयः सर्वरात्राः ॥ "पूर्वकालैकसर्व—" इत्यादिना समासः ॥ "अहःसर्वैकदेश—" इत्यादिना समासान्तोऽच्प्रत्ययः ॥ "रात्राह्नाहाः पुंसि" इति पुंल्लिङ्गता ॥ तान् कल्याण्यः सर्वरात्रकल्याण्यः नित्यमङ्गला इत्यर्थः ॥ अत्यन्तसंयोगे द्वितीया ॥ "अत्यन्तसंयोगे च" इति समासः ॥ ङीप् । ताः स्त्रियो न लभ्यन्ते रत्नानि भूमयश्च ता अपि न लभ्यन्ते तेन तापसेन विग्रहं कः कुर्यात् । न कोऽपि निष्फलत्वादित्यर्थः ॥

सङ्गच्छ रामसुग्रीवौ भुवनस्य समृद्धये ।
रत्नपूर्णाविवाम्भोधी हिमवान् पूर्वपश्चिमौ ॥ ११३ ॥

११३. संधिस्तु सफल इत्याह ॥ संगच्छेति ॥ भुवनस्य समृद्धये अभ्युदयाय रामसुग्रीवौ रत्नपूर्णौ पूर्वपश्चिमावम्भोधी हिमवानिव संगच्छ संधेहि । न लोकान्पीडयेत्यर्थः ॥

सुहृदौ रामसुग्रीवौ किङ्कराः कपियूथपाः ।
परदारार्पणेनैव लभ्यन्ते मुञ्च मैथिलीम् ॥ ११४ ॥

११४. ननु यद्विग्रहो निष्फलस्तत्संधानेऽपि किं फलं तत्राह ॥ सुहृदाविति ॥ रामसुग्रीवौ सुहृदौ मित्रे कपियूथपाः किङ्कराः ते च परदाराणामर्पणेनैव लभ्यन्ते न तु स्वार्थव्ययेनेत्यर्थः । हिरण्यभूमीलब्धेर्मित्रलब्धिर्वरायत इति भावः ॥ अतो मैथिलीं मुञ्च ॥

धर्मं प्रसर्पयन् सीतामर्थं रामेण मित्रताम् ।
कामं विश्वासवासेन सीतां दत्त्वाप्नुहि त्रयम् ॥ ११५ ॥

---

१ कल्याणं T_4.
२ वा N., C., D., T_1, T., G., Com.
३ शक्रोऽपि किं कु° T_4.

११५. नन्वकिञ्चित्करेण मैत्री कुत्रोपयुज्यते तत्राह । धर्ममिति ॥ सीतां प्रत्यर्पयन् धर्मं परस्त्रीपरिहाररूपं रामेण सह मित्रतामेवार्थं विश्वासवासेन विश्रम्भवासेन कामं रतिसुखं चेति त्रयं त्रिवर्गं सीतां दत्त्वा आप्नुहि ॥

विराधताडकावालिकबन्धखरदूषणैः ।
न च ने ज्ञापितो यादृङ् मारीचेनापि ते रिपुः ॥ ११६ ॥

११६. सीतानर्पणे रामः किं कर्तुं शक्त इत्याह ॥ विराधेति ॥ विराधादिभिः मारीचेनापि रिपुः रामो यादृक् यादृक्प्रभावो वा न ज्ञापित इति च न । किं तु ज्ञापित एवेत्यर्थः । सीतानर्पणे विराधादिगतिं गमिष्यसीति भावः ॥

खरादिनिधनं चापि मा मंस्था वैरकारणम् ।
आत्मानं रक्षितुं यस्मात् कृतं तन्न जिगीषया ॥ ११७ ॥

११७. नन्वकारणमेव मद्बन्धुघातिना रामेण कथं मैत्रीत्याशङ्क्याह ॥ खरेति ॥ खरादीनां निधनं वधं चापि वैरकारणं मा मंस्थाः न मन्यस्व । मन्यतेर्लुङि थासि "न माङ्योगे" इत्यडागमप्रतिषेधः । यस्मात्कारणात् आत्मानं रक्षितुं कृतं विजिगीषया न कृतम् । ते हताः स्वापराधादेव हता इत्यर्थः ॥

ततः क्रोधानिलापातकम्प्रास्याम्भोजसंहतिः ।
महाह्रद इव क्षुभ्यन् कपिमाह स्म रावणः ॥ ११८ ॥

११८. तत इति ॥ ततो रावणः क्रोध एवानिलस्तस्यापातेन घातेन कम्प्रा आस्याम्भोजसंहतिर्मुखपद्मपङ्क्तिर्यस्य सोऽत एव महाह्रद इव क्षुभ्यन् व्याकुलीभवन् कपिमाह स्म ॥

हतराक्षसयोधस्य विरुग्णोद्यानशाखिनः ।
दूतोऽस्मीति ब्रुवाणस्य किं दूतसदृशं तव ॥ ११९ ॥

---

१ ताटका T., G., Com.
२ विज्ञापितो D.
३ मारीचेन च T_2, T_4.
४ चैव C., T_1, T_3.
५ न विजिगीषया T_4.
६ कोपानिला° T_3, T_4.

११९. यदुक्तं दूतमेकामिति तत्रोत्तरमाह । हतेति ॥ हताः राक्षसयोधाः येन तस्य विरुग्णाः भग्नाः उद्यानशाखिनो येन तस्य दूतोऽस्मीति ब्रुवाणस्य तव दूतसदृशं दूतानुरूपं किम् । संदेशमात्रहरा दूताः न योद्धार इति भावः ॥

पङ्गुबालस्त्रियो निघ्नन् कबन्धखरताडका[1]: ।
तपस्वी यदि काकुत्स्थः कीदृक् कथय पातकी ॥ १२० ॥

१२०. यदुक्तं संरम्भस्तव तापस इति तत्रोत्तरमाह । पङ्ग्विति ॥ यथाक्रमं पङ्गुबालस्त्रियः कबन्धखरताटकाः निघ्नन् काकुत्स्थः तपस्वी यदि कीदृक् पातकी कथय । स्त्रीबालादिघाती तपस्वी चेति विप्रतिषिद्धमिति भावः ॥

अभिमानफलं जानन् महत्त्वं कथमुक्तवान् ।
रत्नादिलाभशून्यत्वान्निष्फलं रामविग्रहम् ॥ १२१ ॥

१२१. यदुक्तं न सर्वरात्रेत्यादिना रामविग्रहे फलं नास्ति इति तत्रोत्तरमाह । अभिमानेति ॥ महत्त्वं महावीरत्वमभिमानफलमहंकारैकफलं जानन् रामविग्रहं रत्नादिलाभशून्यत्वान्निष्फलं कथमुक्तवान् । मानैकधनाः जिगीषवो न धनान्तरगृध्नव इति भावः ॥

परस्त्रीभोगहरणं[2] धर्म एव नराशिनाम् ।
मुखं[3]मस्तीत्यभाषिष्ठाः कां मे साशङ्कतां त्वयि ॥ १२२ ॥

१२२. यदुक्तं धर्मं प्रत्यर्पयन् सीतामित्यादि तत्रोत्तरमाह । परेति ॥ नराशिनां राक्षसानां परस्त्रीणां भोगश्च हरणं चेति धर्म एव । एवं स्थिते सीताप्रत्यर्पणोपदेशेन मयि रामे रामे विषये साशङ्कतां सशङ्कत्वं मुखमभिवदनसाधनं वदनमस्तीत्यभाषिष्ठाः । न तु विमृश्येत्यर्थः । रावणस्यापि कुतश्चिच्छङ्केत्यशक्यशङ्कत्वादिति भावः ॥

---

१ ताटकाः T., G., Com.
२ हरणे T_2, T_3, T_4.
३ सुख° D., E_3.
४ रामे T., G., Com.
५ साशङ्कतां मयि T., G., Com.

ब्रूहि दूरविभिन्नानां[1]मृद्धिशीलक्रियान्वयैः[2]।
हनूमन् कीदृशं सख्यं नरवानररक्षसाम्॥ १२३॥

१२३. यदुक्तं संगच्छ रामसुग्रीवावित्यादि तत्रोत्तरमाह। ब्रूहीति॥ हे हनूमन् वृद्धिशीलक्रियान्वयैर्भूतिस्वभावसमाचारकुलैः दूरविभिन्नानामत्यन्तविलक्षणानां नरवानररक्षसां सख्यं कीदृशं किंविधं ब्रूहि कथय। प्रत्युत स्पर्धैव वर्धेत इति भावः॥

एको द्वाभ्यां विरोधस्तु[3] जिताभ्यामविवक्षितः।
हतश्छलेन मूढोऽयं तेनापि तव कः[4] स्मयः॥ १२४॥

१२४. यद्गर्जितं विराधताटकेत्यादि तद्दूषयति। एक इति॥ विराधस्त्वविवक्षितः अयं मे वध्य इत्यसंजातविवक्षः मूढः एकोऽहं द्वावेताविति विवेकशून्यः जिताभ्यां द्वाभ्यामेकोऽसहायश्छलेन कपटेन हत इति यत् तेन तादृग्वधेनापि तव ते कः स्मयः। अहो ते मोह इति भावः॥

मन्नियोगाच्च मारीचः पलायनपरायणः।
युयुत्सारहितो रामं ममारापहरन् वने॥ १२५॥

१२५. मारीचवधस्तु विराधवधादपि गर्हित इत्याह। मदिति॥ मन्नियोगान्मम शासनात्पलायनपरायणोऽन्यथा रामकर्षणासिद्धेरिति भावः अत एव युयुत्सा योद्धुमिच्छा तद्रहितः किन्तु वने राममपहरन् दूरमाकर्षन् मारीचो ममार। 'न भीतं न परावृत्तम्' इति निषिद्धपरावृत्तवधेनापि रामस्योत्कर्ष इत्यलं प्रलापेनेति भावः॥

निजघानान्यसंसक्तं[5] सत्यं रामो लतामृगम्।
त्वमेव ब्रूहि संचिन्त्य युक्तं तन्महतां यदि॥ १२६॥

१२६. वालिवधस्तु कष्टादपि कष्ट इत्याह। निजघानेति॥ रामोऽन्यसंसक्तं सुग्रीवेण सह युध्यमानं लतामृगं शाखामृगं वालिनं निजघान।

१ दूत वि° E_3.
२ °नां वृद्धि° T., G., Com.
३ विराधस्तु T., G., Com., T_4.
४ विस्मयः c., D., B., E_2, T_2, T_4.
५ °न्यसंयुक्तं T_3.

सत्यमस्त्येवैतत् किं तु तत्परासक्तहननं महतां वीराणां युक्तं यदि युक्तं किं त्वमेव संचिन्त्य सम्यग्विमृश्य ब्रूहि । 'न परेण समासक्तम्' इति निषेधान्न युक्तमिति भावः ॥

पुंसा भक्ष्येण बन्धूनामात्मानं रक्षितुं वधः[1] ।
क्षमिष्यते दशास्येन क्वत्येयं तव दुर्मतिः ॥ १२७ ॥

१२७. यदुक्तं खरादिनिधनं चापि मा मंस्था वैरकारणमिति तत्तु मया प्रतिविधेयमेवेत्याह । पुंसेति ॥ भक्ष्येणास्माकं खाद्येन पुंसा नराधमेन रामेण कर्त्रा आत्मानं रक्षितुं बन्धूनां खरादीनां वधः ॥ "उभयप्राप्तौ कर्मणि" इति कर्मणि षष्ठी ॥ दशास्येन क्षमिष्यते सहिष्यत इति तव दुर्मतिर्दुर्बुद्धिः क्व भवा क्वत्या कुत्रत्या । वृथा दुराशा न कार्येत्यर्थः ॥ "अव्ययात्त्यप्" इति क्वशब्दात् भवार्थे त्यप्प्रत्ययः । 'अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः' इति परिगणनात् ॥

कपिर्जगाद दूतोऽहमुपायं तव दर्शने[2] ।
द्रुमराक्षसविध्वंसमकार्षं बुद्धिपूर्वकम् ॥ १२८ ॥

१२८. कपिरिति ॥ अथ कपिर्जगाद तत्र यदुक्तं हतराक्षसयोधस्येत्यादिना दूत्यविरुद्धाचरणान्न त्वं दूत इति तत्रोत्तरमाह । अहं दूत एव किं तु द्रुमराक्षसविध्वंसं बुद्धिपूर्वकमेव तव दर्शने उपायं साधनमकार्षमद्राक्षं च त्वामतोऽहं दूत एवेत्यर्थः ॥

आत्रिकूटमकार्षुर्ये[3] त्वत्का निर्जङ्गमं जगत् ।
दशमूर्धन्[4] कथं ब्रूषे तानवध्यान् महीपतेः ॥ १२९ ॥

१२९. यत्तु पङ्गुबालस्त्रियो निघ्नन्नित्यादिना कबन्धादीनामवध्यत्वमुक्तं तत्राह । आत्रिकूटमिति ॥ त्वं ग्रामणीरेषां त्वत्कास्त्वत्प्रधानास्त्वदीया इत्यर्थः ॥ "स एषां ग्रामणीः" इति कन्प्रत्ययः ॥ ये कबन्धादयः आत्रिकूट-

---

१ मित्राणामा° E_3.
२ दर्शने तव T_2, T_3.
३ अत्रिकूट B.
४ दशग्रीव N., C., E_3, E_2, T_1.

मात्त्रिकूटात् । अभिविधावव्ययीभावः । जगन्निर्जङ्गममकार्षुः हे दश- मूर्धन् तान् पापिष्ठान् महीपतेः राज्ञः रामस्य प्रजापालनाधिकृतस्य कथमवध्यान्ब्रूषे ॥

अभिमानफलं[1] प्रोक्तं[2] यत्त्वया रामविग्रहे[3] ।
विनेशुस्तेन शतशः कुलान्यसुररक्षसाम् ॥ १३० ॥

१३०. अन्यदपि रावणोक्तमनूद्य दूषयति । अभिमान इति ॥ त्वया रामविग्रहे योऽभिमानः फलं प्रोक्तस्तेनाकारणविग्रहेणासुररक्षसां कुलानि शतशो विनेशुस्त्वं तु दर्पात्तन्न पश्यसीत्यर्थः ॥

यत्[4]स्वधर्ममधर्मं त्वं दुर्बलं प्रत्यपद्यथाः ।
रिपौ रामे च निःशङ्को नैतत् क्षेमङ्करं चिरम् ॥ १३१ ॥

१३१. अथ परस्त्रीभोगेत्यादिना यदुक्तं तद्दूषयति । यदिति ॥ दुर्बलमधर्मं स्वधर्मं स्वाचारं यत्प्रत्यपद्यथाः रिपौ रामे निःशङ्क इति च यत्प्रत्य- पद्यथाः प्रतिपन्नोऽसि एतदुभयं चिरं क्षेमङ्करं श्रेयस्करं न किन्तु क्षिप्र- मेव फलमनुभविष्यसीति भावः ॥ "क्षेमप्रियमद्रेऽण्च" इति चकारा- त्खचि मुमागमः ॥

अन्वयादिविभिन्नानां[5] यथा सख्यमनीप्सितम् ।
[6]मैषीर्विरोधमप्येवं सार्धं पुरुषवानरैः ॥ १३२ ॥

१३२. अन्यदपि त्वदुक्तं दुरुक्तमित्याह । अन्वयेति ॥ अन्वयादिभिर्विरुद्धानां विलक्षणानां नरवानररक्षसां यथा सख्यमनीप्सितमेवं पुरुषवानरैर्नर- वानरैर्विरोधं विग्रहमपि मैषीर्नेच्छ । असमानसख्यवदसमानविग्रह- स्यापि लघुत्वादिति भावः । एषीरितीच्छतेर्लुङि सिचि "इट ईटि" इति सलोपः ॥ "न माङ्योगे" इत्यडभावः ॥

---

१ अभिमानः T., G., Com.
२ प्रोक्तो T., G., Com.
३ रामविग्रहं D.
रामनिग्रहे B.
मम विग्रहे T2.
४ यदधर्मं स्वधर्मं त्वं E2.
५ विरुद्धानां T., G., Com.
६ नैषीः C., N., D., B., T1, T2, T4.

विराधं तपसां विघ्नं जघान विजितो यदि ।
वैरो[1] धनुर्भृतां रामः स कथं न विवक्षितः ॥ १३३ ॥

१३३. यदुक्तमेको द्वाभ्यामित्यादि तदपि दूषयति । विराधमिति ॥ धनुर्भृतां वरः श्रेष्ठः रामस्तपसां विहन्यतेऽनेनेति विघ्नोऽन्तरायः ॥ 'घञर्थे कविधानम्' इति कप्रत्ययः ॥ "गमहन—" इत्यादिना उपधालोपः ॥ "हो हन्तेः—" इत्यादिना कुत्वम् ॥ तं विघ्नभूतविराधं विजितस्तेन पूर्वं जितो यदि जघान स विजेता विराधः कथं विवक्षितो न किं तु विवक्षित एव । एतेन न पूर्वोक्तदोषावकाश इत्यर्थः ॥

प्रणश्यन्नपि नाशक्नोदॆ[2]त्येतुं बाणगोचरम् ।
त्वयैवोक्तं महामायो मारीचो रामहस्तिनः ॥ १३४ ॥

१३४. प्रेति ॥ महामायो मारीचः प्रणश्यन्नपि पलायमानोऽपि ॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम् ॥ रामो हस्तीवेत्युपमितसमासः । तस्य रामहस्तिनो बाणगोचरं बाणविषयमत्येतुमतिक्रमितुं नाशक्नोत् शक्तो नाभूत् त्वयैवोक्तं ममारेति वदता । पलायमानस्यापि मायाविनो वधेन न कश्चिदपकर्ष इत्यर्थः ॥

अन्यासक्तस्य यद्वीर्यं न त्वं स्मरसि वालिनः ।
मूर्च्छावान् न[3]मतः संध्यां ध्रुवं त[4]द्बाहुपीडितः ॥ १३५ ॥

१३५. यदुक्तं निजघानान्यसंसक्तमिति तत्सोपहासं परिहरति ॥ अन्यासक्तस्येति ॥ संध्यां नमतो वन्दमानस्य अत एव अन्यसंसक्तस्य वालिनो वीर्यं यद्यस्मात्त्वं न स्मरसि तत्तद्बाहुना पीडितः कक्षे निक्षिप्य पीडितो निरुद्धोऽत एव मूर्च्छितो मूर्च्छावान् ध्रुवम् । अन्यथा कथं न स्मरसीत्यर्थः । अन्यसंसक्तवधदोषस्तु नास्त्येव रामस्य अन्यथा वालिना सुग्रीवे हते मित्रवधो विश्वासघातश्च स्यादिति भावः ॥

---

१ वीरो T4.
२ °दत्येतुं E2.
३ वसतः संध्यां तद् ध्रुवं बाहुपीडितः B.
४ तद् ध्रुवं बा° T2, T4,

असद्बन्धुवधोपज्ञं विमुञ्च बलिविग्रहम् ।
सीतामर्पय [1]नन्तव्ये कोश[2]दण्डात्मभूमिभिः ॥ १३६ ॥

१३६. पुंसा भक्ष्येणेत्यादिना खरादिवधो न क्षमिष्यत इति तत्र बलावष्टम्भेनोत्तरं वदन् वाक्यमुपसंहरति । असदिति ॥ उप ज्ञायत इत्युपज्ञा ॥ "आतश्चोपसर्गे" इति कः ॥ असद्बन्धुवधः दुष्टबन्धुवधः । अतः बन्धुवधस्याचेतनस्योपज्ञाने कर्त्तृत्वासंभवात्तेन हतबन्धुश्चेतनो लक्ष्यते । तस्योपज्ञा तदुपज्ञम् । तेन त्वयैवादावुपज्ञातमित्यर्थः । असद्बन्धुवधोपज्ञम् ॥ "उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" इति नपुंसकत्वम् ॥ बलिविग्रहं बलिना रामेण सह विग्रहं विरोधं विमुञ्च । नन्तव्ये वन्द्ये रामेऽधिकरणे कोशदण्डात्मभूमिभिः सह सीतामर्पय निधेहि ॥

स्फुटपरुषमसह्यमि[3]त्थमुच्चैः
सदसि मरुत्तनयेन भाष्यमाणः ।
परिजनमभितो विलोक्य दाहं
दशवदनः प्रदिदेश वानरस्य ॥ १३७ ॥

१३७. स्फुटेति ॥ स्फुटं व्यक्तं तच्च तत्परुषं निष्ठुरं च असह्यं दुःसहं च उच्चैस्तारं सदसि सभायां मरुत्तनयेन हनूमता भाष्यमाणः । वाक्यस्यासह्यत्वादुच्यमान एव न तु समाप्तावित्यर्थः । दशवदनोऽभित उभयतः परिजनं विलोक्य वानरस्य दाहं प्रदिदेश आदिष्टवान् । पुष्पिताग्रावृत्तम् ॥

इति भट्टिकाव्येऽधिकारकाण्डे नवमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने रावणसंदर्शनं नाम नवमः सर्गः ॥

---

१ यत्नेन दण्डकोशार्थभूमिभिः C. यत्नेन कोश° D. नन्तव्ये दण्डकोशात्म° E_2.

२ कोष E_3, B.

३ °मर्थमुच्चै T_2, T_4.

NOTES.

CANTO I.

Stanza 1—

A Mahâkâvya must open with a benedictory stanza, or a salutation-stanza, or one specifying the subject-matter of it. 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' (*vide* Intro.). Premachandra in his commentary on Kâvyâdarśa explains वस्तुनिर्देश as meaning 'narration of the hero or one connected with him.' 'वसति प्रस्तुतवृत्तान्तोऽस्मिन्निति वस्तु प्रबन्धनायकः अपरो वा तत्सम्बन्धी तस्य निर्देश उपन्यासः' But Malli. takes it to mean 'narration of the subject-matter.' 'दशरथस्य सत्तारूपं वस्तु काव्यार्थबीजत्वेन निर्दिशति' (*vide* Com.). S'iśupâlavadha and Kumâra-sambhava also open with वस्तुनिर्देश. In his Sarvaṅkashâ (Com. on Mâgha) Malli. says 'काव्यफलं शिशुपालवधबीजभूतं भगवतः श्रीकृष्णस्य नारददर्शनरूपं वस्तु आदौ श्रीशब्दप्रयोगपूर्वकं निर्दिशन् कथामुपाक्षिपति.' We do not think it necessary to take वस्तु in the sense of नायक or तत्सम्बन्धी.

The word विबुध is formed from the root बुध् by the Sûtra "इगुपध-ज्ञाप्रीकिरः कः" ३।१।१३५॥. Roots having इक् (इ, उ, ऋ, short or long and ऌ) for their penultimate, and ज्ञा, प्री and कॄ take the termination क (*i. e.* अ, क् being इत् by "लशक्वतद्धिते" १।३।८॥) in the sense of the doer. The termination being कित् is weak, *e. g.* क्षिपतीति क्षिपः, लिखतीति लिखः, बुध्यतीति बुधः, कृशयतीति कृशः, जानातीति ज्ञः, प्रीणातीति प्रियः, किरतीति किरः. ण्वुल् (अक) and तृच् (तृ) are also added to these roots as to others in the same sense. They are strong terminations. *e. g.* क्षेपकः, क्षेप्ता; लेखकः, लेखिता; ज्ञायकः, ज्ञाता &c.

द्विषन्तप and **परन्तप.** To तापि, the causal base of तप्, खच् (अ) is affixed in the sense of the doer, when द्विषत् or पर is its उपपद (*i. e.* is prefixed to it). तापि shortens its penultimate and drops इ. अरुष्, द्विषत्, and words ending in a vowel have मुम् (म्) added to them when they are prefixed to a root to which खश् or खच् is to be added. अभ्रंलिह, अरुन्तुद, ललाटन्तप, प्रियंवद, वशंवद, वाचंयम, पुरन्दर, सर्वंसह, सर्वङ्कष, कूलङ्कष, अभ्रङ्कष, भयङ्कर, विश्वम्भर, अरिन्दम, and पतिंवरा are among the words thus formed.

सनातनः. तन is affixed to साय, चिर (changed to सायम् and चिरम्), प्राह्ण, प्रग (changed to प्राह्णे and प्रगे), and to adverbs shewing time, in the

sense of 'pertaining to'. सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ४।३।२३॥ प्राह्णप्रगयोरेदन्तत्वं निपात्यते. अव्ययेभ्य इत्युक्तावपि सायंचिरंशब्दयोः पृथग्ग्रहण-मकारान्तानव्ययसायंचिरशब्दयोर्मान्तत्वनिपातनं द्योतयति. *e. g.* सायन्तन, चिरन्तन, प्राह्णेतन (relating to the forenoon), प्रगेतन (relating to the morning), दोषातन, दिवातन, अद्यतन, इदानीन्तन &c.

स्वयम्=Of his own accord, without being incited by another. 'स्वय-मित्यात्मना न कर्मणान्येन वा प्रेरित इत्यर्थः' (जय०).

There is inconsistency between the two ideas conveyed by सनातनः (primeval, eternal) and पितरमुपागमत् (approached Dasaratha as father, was born of him); but this inconsistency is only apparent, as it can be explained away by the fact that the greatness of Vishṇu is incomprehensible. A figure of speech, in which there is apparent inconsistency which can be reconciled by some circumstance or by construing the passage in another way, is called विरोधाभास, which is defined by Vidyânâtha in Pratâparudra as 'आभासत्वे विरोधस्य विरोधाभास इष्यते.' Mammaṭa calls it विरोध and defines it as 'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः'. In the present case the antithesis may be explained away by the fact that he was born to extricate the world from the thorn of Râvaṇa. (भुवनहितच्छलेन). The Gîtâ says:—

'परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥'

जगण should not be used in the beginning of a composition; but if it is followed by भगण or if the first word be designative of a deity or auspiciousness, it is not objectionable to use it. The S'isupâlavadha also opens with जगण, but Malli. comments upon it as follows:—'तत्रादौ श्रीशब्दप्रयोगात् वर्णगणादिशुद्धेरभ्युच्चयः । तदुक्तम् । "देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥" इति.'

The metre of the verse is रुचिरा, also called प्रभावती, consisting of जगण, भगण, सगण, जगण and a long letter and having the *yati* or cæsura after four and nine letters. (चतुर्ग्रहैः).

Stanza 2—

त्रिदश. In the Sarvaṅkashâ, Malli. thus explains it:—'तिस्रो दशा बाल्यकौमारयौवनानि जन्मसत्तावृद्धयो वा येषां ते (that is, free from old age or destruction) यद्वा त्रिर्दश परिमाणमेषां ते त्रिदशाः' Other ways of explaining the word are as follows:—

'त्रीन् तापान् दशतीति त्रिदशः । घञर्थे संज्ञायां कर्त्तरि कः । अथवा व्यधिकास्त्रिरावृत्ताश्च दश परिमाणमेषां ते त्रिदशाः । डच् समासान्तः । शाकपार्थिवादित्वादधिकावृत्तशब्दलोपः । एकस्यैव त्रिशब्दस्य तन्त्रतयोच्चारणादुभयार्थपरत्वम् । अयमेव पक्षः श्रुत्यनुगुणः । त्री च दश चेति छान्दोग्येऽभिहितत्वात् । व्यधिकावृत्तपरताद्योतनार्थं त्री चेति द्विवचनान्ततया निर्देशः । ते च देवाः । अर्का द्वादश रुद्रा एकादश वसवोऽष्टौ अश्विनौ द्वाविति । अश्विनीकुमारौ विहाय इन्द्रः प्रजापतिश्चेति वा द्वाभ्यां पक्षान्तरे संख्यापूरणम् ॥'

पितॄनपारीत्=Satisfied the Manes. 'पितॄनपारीदाप्यायितवान् । पितरमुद्दिश्य यजनम् । "पॄ पालनपूरणयोः" इत्यस्मात्पूरणार्थाल्लुङि रूपम्' (जय०). अपारीत् and अतार्प्सीत् are synonymous. Mark Malli.'s explanation of अतार्प्सीत् 'gratified the Manes by offerings, and by the progeny which was to result from them'. By studying the Vedas, performing sacrifices to Gods, and gratifying the Manes by generating children, Daśaratha became free from three debts, which all have to pay off, *viz.*, debt to sages, debt to Gods, and debt to the Manes. *cf.* 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः' (आश्व०)

'ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः स पार्थिवः ।
अनृणत्वमुपेयिवान् बभौ परिधेर्मुक्त इवोष्णदीधितिः ॥' Raghu. 8. 30.

Bhaṭṭoji notices पितॄनतार्प्सीत्. On तृप प्रीणने he says 'प्रीणनं तृप्तिस्तर्पणा च । नाग्निस्तृप्यति काष्ठानाम् । पितॄनतार्प्सीदिति भट्टिः । इत्युभयत्र दर्शनात् ।

समंस्त. 'येषां सिच इकार उच्चारणार्थस्तेषां "हनः सिच्" इति कित्करणज्ञापकान्नलोपाभावः । येषां तु इकार इत् तेषामिदित्वान्नकारलोपाभावः' (जय०). Malli. takes the latter view, as also Bha. Dî. who says 'इचाविती' (सिद्धां० कौ०), and 'इचाविति तत्रेदित्वे प्रयोजनममंस्तेत्यत्र "अनिदिताम्—" इत्युपधालोपाभावः' (मनो०).

षड्वर्ग=The collection of six internal enemies of mankind, known as षाड्रिपु. They are 'कामः क्रोधस्तथा लोभो मदमोहौ च मत्सरः' Bhâravi calls them अरिषड्वर्ग. See Kirâ.:—

'कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥' १. ९.

नीतौ=In the adoption of one of the four means of success or one of the six courses of action against an enemy. The *Upâyâs* are सामन् (conciliation), दान (bribery), भेद (sowing dissensions), and दण्ड (attack). The *Guṇas* are संधि (peace), विग्रह (war), यान (march), आसन (halt) संश्रय (taking shelter), and द्वैधीभाव (duplicity).

समूलघातम्. It is used as an adverb. It is formed by adding णमुल् (अम्) to हन् (changed to घात्) with समूल as a prefix as its object. The formation is according to the Sûtra "समूलाकृतजीवेषु हन्कृञ्ग्रहः" (३।४।३६।). णमुल् is affixed to हन्, कृ, and ग्रह् with समूल अकृत, and जीव as *Upapadas* respectively as their objects. समूलघातं हन्ति (समूलं हन्ति), अकृतकारं करोति (अकृतं करोति), जीवग्राहं गृह्णाति (जीवं जीवन्तं गृह्णाति).

Malli. says that in this work one *śabdâlaṅkâra* consisting of प्रयोगवैचित्र्य (variety of peculiar grammatical forms) is to be found in almost each and every verse. In his Sarvaṅkashá also he considers प्रयोगवैचित्र्य as an Alaṅkâra. 'अत्र कर्त्रभिप्राये "णिचश्च" इत्यात्मनेपदे सिद्धेऽपि प्रयोगवैचित्र्यस्याप्यलंकारत्वादकर्त्रभिप्रायेऽपि "णेरणौ यत्कर्मणौ चेत्स कर्त्तानाध्याने" इत्यात्मनेपदं वदन्ति' माघ. १२. ९. In his Ghantâpatha also he takes the same view. 'अत्र तादर्थ्यचतुर्थ्यामपि न दोषः तथापि प्रयोगवैचित्र्यविशेषस्याप्यलंकारत्वादेवं व्याचक्षते' किरा. १. ३. The *arthâlaṅkâra* in this verse is समुच्चय, which is defined by Vidyânâtha as 'गुणक्रियायौगपद्यं समुच्चय उदाहृतः' The simultaneity of properties and actions is called समुच्चय. The following instance is given to illustrate the simultaneousness of properties:—

'प्रतापरुद्रनृपतौ भद्रासनमुपेयुषि ।
सतां प्रसन्नं हृदयमसतां कलुषं मनः ॥'

Here प्रसाद and कालुष्य take place simultaneously. The following verse illustrates the simultaneousness of actions:—

'प्रेक्षते इमां नरेन्द्रो प्रविशति मदनो गलति मानश्च ।
घूर्णति मनश्च शून्यं किमेतत्पश्यत सख्यः ॥'

In the text the simultaneity of actions, studying the Vedas, performing sacrifices to gods &c., is described.

Stanza 3—

व्यकारीत्=दत्तवान् विक्षिप्तवानिति वा.

घनवत्. The student should note that there are two terminations वत् used in two ways. One is the substitute of मत् and is generally a possessive termination. The word to which it is added is used as an adjective. "तदस्यास्त्यस्मिन्निति मतुप्" ५।२।९४॥ गावोऽस्यास्मिन्वा सन्ति गोमान्। 'अस्तीति पुरुषवचनेऽविवक्षिते । कालस्तु विवक्षित एव । इतिशब्दो विषयविशेषलाभार्थः तथाहि

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥'

'अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयेषु भवन्तीति वार्त्तिकार्थः। भूमा बहुत्वं तच्च आपेक्षिकम्। यस्य हि यावदुचितं तावदेव स्वशब्देनापि प्रतीयते यथा पञ्चषाभिरपि गोभिर्देवदत्तस्य बह्वो गाव इति व्यवहारः राज्ञस्तु सहस्रगोभिरपि गावोऽल्पा इति ॥' (मनो॰).

यवमान्, ककुदावर्त्तिनी कन्या, रूपवान्, क्षीरिणो वृक्षाः, उदरिणी, and दण्डी are instances of मत् and other possessive terminations designating भूमन्, निन्दा, प्रशंसा, नित्ययोग, अतिशायन, and संसर्ग respectively.

भूम्नि। यवमान्। प्रचुरयवविशिष्ट इत्यर्थः। 'इह यवमतीभिरद्भिर्यूपं प्रोक्षतीत्यादौ जातिमात्रसंबन्धस्य विवक्षितत्वाद्भूमाभावेऽपि मतुप्। भूमादिग्रहणं हि प्रायेण भूमाद्योऽपि प्रतीयन्त इत्येवंपरम्। निन्दायां ककुदावर्त्तिनी कन्या। प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने उदरिणी कन्या। संसर्गे दण्डी। संसर्गः संयोगः तेन संयुक्त एवोच्यते न तु गृहावस्थिते दण्डेऽपि'। (मनो॰)

Another वत् has three uses. It is used in the sense of 'like'. The word to which it is added is used as an adverb and is connected with a verb. "तेन तुल्यं क्रिया चेद्वतिः" ५।१।११५॥. 'तुल्यमिति सामान्ये नपुंसकं यत्तुल्यं सा चेत्क्रियेत्यर्थः' *e. g.* ब्राह्मणवदधीते ब्राह्मणेन तुल्यमधीते। 'ब्राह्मणशब्दस्त-त्कर्तृकेऽध्ययने लक्षणया वर्त्तते ब्राह्मणकर्तृकाध्ययनतुल्यमध्ययनं वाक्यार्थः'. Thus ब्राह्मणवदधीते means 'his study is like the study of a Brâhmaṇa', the word ब्राह्मण being used not in its primary sense, but in the secondary sense of the study of a Brâhmaṇa.' क्रिया चेदिति किम्। गुणतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः. Here we can not say पुत्रवत् स्थूलः. On गुणतुल्ये मा भूत् Bha. Dî. remarks in the Manoramâ:—'गुणतुल्ये इति अक्रियया तुल्य इत्यर्थः। अत एव महानसवदिति वतेः साधुत्वरक्षणार्थं प्रतिज्ञावाक्ये वह्निमान् भवितुमर्हतीत्यादिक्रियापदं प्रयुञ्जते वृद्धाः। अर्वाचीनास्तु महानससदृशपर्वत इति व्याचक्षाणाः सूत्रविरोधादुपेक्ष्याः'। It is not strictly correct to say पर्वतो वह्निमान् महानसवत्, for here महानसवत् is not connected with a verb. The correct expression is पर्वतो वह्निमान् भवितुमर्हति महानसवत्. Here महानसवत् will be connected with the verb भवितुमर्हति. The objection that the first sentence *viz.*, पर्वतो वह्निमान् महानसवत्, conveys the sense clearly, is thus refuted:—'ननु तद्रीत्या व्युत्पन्नस्य तादृशबोधोऽप्यनुभवसिद्ध इति चेत् सत्यं तादृशेऽर्थे साधुत्वमात्रं निराकुर्मो न तु बोधमपि। तथाहि भेद्य-भेदकसंबन्धोपाधिभेदानियन्त्रितं साधुत्वं तदभावेऽपि बोधो नेह निवार्यते। अव्युत्पन्नस्य साधुभ्योऽप्यबोधात् तत्रैव व्युत्पन्नस्यासाधुभ्योऽपि बोधाच्च कस्मात् किं बुध्यते इति न नियन्तुं शक्यं किं तु किंविशेष्यके किंप्रकारके किंसंसर्गके बोधेऽनुद्देश्ये किं साधु किं नेत्येव शास्त्रीयविचारविषयः। उक्तं हि भगवता। समानायामर्थावगतौ शब्दैश्चापशब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः क्रियत इति ॥'

Another use of वत् is that it is added to a word in the sense of 'like in', or 'like of'. Here also the word ending in वत् is an adverb, but it is not connected with a verb. "तत्र तस्येव" ५।१।११६।। 'मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य गावः ।'

The third sense of वत् is 'in a way befitting some thing.' Here the word ending in वत् is connected with a verb and is used adverbially. "तदर्हम्" ५।१।११७।। 'विधिमर्हति विधिवत्पूज्यते । क्रियाग्रहणं मण्डूकप्लुत्यानुवर्त्तते । तेनेह न । राजानमर्हति छत्रम् ।' It is not correct to say राजवत् छत्रम् as राजवत् is not connected with a verb.

उपास्थित. स्था with उप is Atma. in the sense of 'praising a deity with *Mantrâs*,' 'adoring a deity,' 'uniting,' 'contracting friendship,' 'leading to' (a way leading to some place) and when it is used intransitively. It is optionally Atma. in the sense of 'desiring to obtain.' "उपान्मन्त्रकरणे" १।३।२५।। *e. g.* आग्नेय्याग्नीध्रमुपतिष्ठते. "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" *e. g.* आदित्यमुपतिष्ठते । गङ्गा यमुनामुपतिष्ठते । रथिकानुपतिष्ठते । पन्थाः स्रुघ्नमुपतिष्ठते ।। "अकर्मकाच" १।३।२६।। *e. g.* भोजनकाले उपतिष्ठते ।। "वा लिप्सायामिति वक्तव्यम्" *e. g.* भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा ।

निरास्थत्. अस् to throw and ऊह् are optionally Atma. when they are preceded by a preposition. "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्."

The figures of speech in this verse are उपमा (simile) and समुच्चय (for which see notes on v. 2) Vidyâ. defines उपमा as 'स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः । साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा' ।।. As उपमा and समुच्चय stand independently of each other like oil and sesamum, there is संसृष्टि of them. The combination of two or more figures of speech in one passage independently of one another is called संसृष्टि. 'तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम् । संश्लिष्येयुरलङ्काराः सा संसृष्टिर्निगद्यते ।।' (विद्या०).

Stanza 4—

महाब्रह्मसमूहजुष्टः. ब्रह्मन् drops its final अन् and takes अ at the end of a Tatpurusha compound optionally when preceded by कु or महत्. "कुमहद्भ्यामन्यतरस्याम्" ५।४।१०५।। *e. g.* कुत्सितो ब्रह्मा कुब्रह्मः or कुब्रह्मा. महान्तश्च ते ब्रह्माणश्च महाब्रह्माः or महाब्रह्माणः.

अध्वरे वह्निरभिप्रणीतः=Consecrated in the sacrifice, being brought from the house-hold fire. The three sacred fires are गार्हपत्य, आहवनीय, and दक्षिण. Manu describes them as follows :—

'पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः ।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥' २. २३१.

गार्हपत्य is the sacred fire to be perpetually maintained by a householder. He receives it from his father and transmits it to his descendants. It is from this that sacrificial fires are lighted. आहवनीय is the eastern fire burning at a sacrifice. It is taken from गार्हपत्य. दक्षिण is the southern fire, used in the monthly *S'râdha* sacrifice, performed in the honour of the Manes on the day of the New Moon. *cf.*

'गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत् । पिता वा एषोऽग्नीनां यद्दक्षिणः पुत्रो गार्हपत्यः पौत्र आहवनीयः ।' आश्व० गृ०.

जज्वाल लोकस्थितये. When taken with राजा, it means 'was wide awake for the protection of his subjects.' When taken with अग्नि, it means 'as fire burns for the protection of the world.' *cf.*,

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ (मनु०).

In this verse the king is compared to Âhavanîya fire. पुण्यः, महाब्रह्मसमूहजुष्टः, &c. are adjectives common to both. Thus राजा is उपमेय, अग्नि, उपमान, पुण्यः &c. are साधारणधर्म and यथा is उपमाद्योतक. All the four essentials of उपमा being वाच्य (expressed), it is पूर्णोपमा ; and it is श्रौती, because यथा, इव &c. directly bring out the idea of similarity. 'साक्षात्सादृश्यप्रतिपादकेवादिशब्दानां प्रयोगे श्रौती । धर्मिव्यवधानेन सादृश्यप्रतिपादकानां सदृशसंकाशनीकाशप्रतीकाशादिशब्दानां प्रयोगे आर्थी.' (विद्या०).

Stanza 5—

शतमन्युकल्पः. कल्प, देश्य, and देशीय are terminations added to a word in the sense of 'a little short of'. They shew 'proximity to completion'. "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" ५।३।६७॥. *e. g.* ईषदूनो विद्वान् विद्वत्कल्पः, यशस्कल्पम्, पचतिकल्पम्, विद्वद्देश्यः, अष्टादशवर्षदेशीयः, पटुदेशीयः.

The figure of speech in this verse is सम in which there is a combination of suitable objects. Here the suitability between दशरथ and अयोध्या is described. Daśaratha, who was like Indra, lived in Ayodhyâ, which was like Amarâvatî. As the figure thus depends upon two Upamâs, the combination is called संकर, which means a combination in a passage of two or more figures depending upon one another, being mixed up like milk and water.' 'क्षीरनीरनयाद्यत्र संबन्धः स्यात् परस्परम् । अलंकृतीनामेतासां संकरः स उदाहृतः॥'(विद्या०) These are Vâchyâlaṅkâras (expressed figures.). There is also Alaṅkâradhvani (suggestion

of a figure). As it is suggested that Râma beautified Ayodhyâ and Ayodhyâ beautified Râma, there is अन्योन्यालंकारध्वनि, and this is अलंकारेण अलंकारध्वनि; because it is the *sankara*, of *Sama* and *Upamâ* that suggests *Anyonyâlankâra* which Vidyâ defines thus:—'तदन्योन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत.'

पद्मासनकौशलस्य. 'तस्य (पद्मासनस्य) कौशलं नैपुण्यमिति षष्ठीसमासः। तस्य "पूरणगुण—"इत्यादिना न प्रतिषेधः। तत्र विशिष्टा एव गुणा रूपरसगन्धस्पर्शास्तद्विशेषाश्च शुक्लनीलादयः कटुकाम्लादयः सौरभ्यादयः शीतोष्णादयश्च गृहीताः तत्र रूपादिभिः समासो भवत्येव। "तत्स्थैश्च गुणैः षष्ठी समस्यते न तु तद्विशेषगुणैः" इति वचनात्। अन्यैस्तु समासप्रतिषेधः। एवं च कृत्वा मुनित्रयवचनमर्थवद्भवति। तद्यथा "अधिकरणैतावत्त्वे च" "तदशिष्यं संज्ञाप्रमाणत्वात्" इति पाणिनेः "युगपद्देशपृथक्त्वदर्शनादिति रूपसामान्याद्वेति वचनप्रामाण्यादिति चेल्लोपप्रतिषेधः" इति कात्यायनस्य "नकारग्रहणसामर्थ्याल्लोपो न भविष्यतीति किं पुनरत्रार्थसत्त्वम्" इति भाष्यकारस्येति' (जय०).

Malli.'s view expressed in his commentary on *Kirâtârjunîya* on अर्थगौरवम् is as follows:—

'नन्वर्थगौरवमित्यत्र कथं षष्ठीसमासः। "पूरणगुण—" इत्यादिना प्रतिषेधात्। नैष दोषः। ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्ते यथा पटस्य शुक्लं शुक्लः पट इति च तेषामेवात्र निषेधाद्ये च सदा गुणमात्रवचनाः यथा गौरवं प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयस्तेषामनिषेधात्। तथा "तत्स्थैश्च गुणैः षष्ठी समस्यते" इति वचनाद्बहुलमभियुक्तप्रयोगदर्शनाच्च। बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः। अत एवाह वामनः—"अत्र पीतिमादिषु गुणवचनसमासो बली स्यात्" इति॥'

The Sûtra, which is referred to, is "पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन" २।२।११॥. The instance of गुणार्थ is 'काकस्य कार्ष्ण्यम्। ब्राह्मणस्य शुक्लाः।.' Bha. Dî. says:—'यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदं ('ब्राह्मणस्य शुक्ला' इति) भनुदाहरणम्। अनित्योऽयं गुणेन निषेधः तदशिष्यं संज्ञाप्रमाणत्वादिति निर्देशात्। तेनार्थगौरवं बुद्धिमान्द्यमित्यादि सिद्धम्'।

On this the Manoramâ proceeds as follows:—

'ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसंग एव नास्ति ब्राह्मणशब्दस्य दन्तैरेवान्वयात् ब्राह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थादत आह यदेति। शुक्लशब्द एवेह विशेष्यसमर्पक इति भावः। यत्तु भावप्रत्ययान्तो गुणवाच्यत्र निषिध्यते इति प्राचोक्तं तन्न। उक्तोदाहरणस्य भाष्यरूढस्यासंगतिप्रसंगात्। यदपि सदा गुणवाचिनो न निषेध इति तदपि न। भावप्रत्ययान्तस्य सदा गुणवाचितया पूर्वग्रन्थविरोधात् । . . . . सूत्रे गुणार्थ इत्यनेन केवलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादको गृह्यते व्याप्तिन्यायात्। काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति द्वेधा भाष्ये उदाहरणाच्च। चन्दनगन्ध इत्यादौ तु निषेधे प्राप्ते 'तत्स्थैश्च गुणैः' इति वचनेन समासः प्रतिप्रसूयते। गन्धत्वेन प्रतीयमानो

हि गन्धो न कदापि गुणिसमानाधिकरणः किन्तु स्वप्रधानः । इदमेव तात्स्थ्यम् । ननु 'वहति जलमियं पिनष्टि गन्धान्' इति प्रयोगदर्शनादयुक्तमिदमिति चेन्न । तत्र हि गन्धानिति न गुणशब्दः मालतीकुसुमादिष्वदर्शनात् किन्तु चन्दनत्वादिजातिनिमित्तकोऽन्य एव सः । तस्माच्चन्दनगन्ध इत्यत्र तत्स्थत्वं सुस्थमेव । एवं घटरूपमित्यादावपि । सुरभिशुक्लादयः शब्दास्तु न तत्स्थगुणप्रतिपादकाः एवमपि शौक्ल्यसौरभ्यादिशब्दैः सह समासो दुर्वार इति चेन्मैवं तर्हि शुक्लत्वादिप्रकारक एव गुणबोधः तद्रूपापन्नानां च द्रव्यसामानाधिकरण्यमस्त्येव शुक्लः सुरभिरित्यादाविति दिक् ॥

The Bhâshya on षष्ठी २।२।८॥ runs as follows :—

'तत्स्थैश्च गुणैः ॥

तत्स्थैश्च गुणैः षष्ठीगुणैः षष्ठी समस्यते इति वक्तव्यम् । ब्राह्मणवर्णः चन्दनगन्धः पटहशब्दः नदीघोषः । न तु तद्विशेषणैः ॥

न तु तद्विशेषणैरिति वक्तव्यम् । इह माभूत् । घृतस्य तीव्रः चन्दनस्य मृदुरिति ।

किमर्थमिदमुच्यते । गुणेनेति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः । किं कारणं गुणेन नेत्युच्यते न पुनर्गुणवचनेन नेत्युच्यते । नैवं शक्यम् । इह हि न स्यात् । काकस्य कार्ष्ण्यम् । कण्टकस्य तैक्ष्ण्यम् । बलाकायाः शौक्ल्यमिति । एतदेव तस्मिन्योगे उदाहरणम् । यद्वै ब्राह्मणस्य शुक्लाः वृषलस्य कृष्णा इत्यसामर्थ्यादत्र न भविष्यति । कथमसामर्थ्यम् । सापेक्षमसमर्थं भवतीति । द्रव्यमत्रापेक्ष्यन्ते दन्ताः । तस्माद्गुणेन नेति वक्तव्यम् । गुणेन नेत्युच्यमाने तत्स्थैश्चगुणैरिति वक्तव्यम् । तत्स्थैश्च गुणैरित्युच्यमाने न तु तद्विशेषणैरिति वक्तव्यम्' ॥

Kaiyaṭa's remarks on तत्स्थैः are as follows :—

'तत्स्थैरिति'। तच्छब्देन संनिधानाद्गुण एव परामृश्यते । तेनायमर्थः । स्वात्मनि ये गुणाः अवस्थितास्तैः सह समासो न च स्वात्मन्यवस्थानं गुणानां संभवति भेदनिबन्धनत्वान्मुख्याधाराधेयभावस्य सर्वस्य च गुणस्य द्रव्याश्रयत्वात् । तस्मादभिधानव्यापारापेक्षया तत्स्थत्वमुच्यते । इह केचिद्गुणाः शब्देन द्रव्यान्निष्कृष्टा एव प्रत्याय्यन्ते न तु द्रव्यस्योपरञ्जकत्वेन । यथा चन्दनस्य गन्ध इति । सर्वदा वैयधिकरण्यमेव गुणगुणिनोः न कदाचिच्चन्दनं गन्ध इति सामानाधिकरण्यं भवति । शुक्लादयस्तु गुणाः कदाचिन्निष्कृष्टरूपाः शब्दैरुच्यन्ते पटस्य शुक्ल इति कदाचिद् द्रव्येणैकत्वमापन्नाः शुक्लः पट इति । तस्माद् द्विविधगुणसद्भावात्तत्स्थैरिति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तमिति ।

On बलाकायाः शौक्ल्यम् Kaiyaṭa says as follows:—

'अथ बलाकायाः शौक्ल्यमिति समासः कस्मान्न भवति । तत्स्थं हि शौक्ल्यम् । सर्वदा वैयधिकरण्येन संबन्धात् । नैष दोषः । शौक्ल्यशब्देन शुक्लो गुणोऽभिधीयते । शुक्लशब्दस्य द्रव्ये वर्त्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते भावप्रत्ययविधानात् । न चासौ तत्स्थः । अभेदाध्यवसायेन द्रव्यं प्रत्यनुरञ्जकत्वदर्शनाच्छुक्लः पट इति । अर्थस्य च तत्स्थत्वमाश्रीयते इति शब्दभेदेऽप्यर्थस्याभेदान्नास्ति शुक्लस्य गुणस्य तत्स्थत्वम् ॥'

On the whole Malli. follows Kaiyaṭa's view that the genitive is not compounded with words like शुक्ल which are used as adjectives and also as nouns (गुण and गुणी).

Stanza 7—

सद्रत्नमुक्ताफलवज्रभाञ्जि. रत्न means a precious stone. मुक्ताफल (pearls) and वज्र (diamonds) are included in रत्न, they being special kinds of precious stones. ('नीलकं वज्रकं चेति पद्मरागश्च मौक्तिकम्। प्रवालं चेति विज्ञेयं पञ्चरत्नं मनीषिभिः'); still they are mentioned separately as ब्राह्मण and परिव्राजक in the expression ब्राह्मणपरिव्राजकन्याय, or as गो and बलीवर्द in the expression गोबलीवर्दन्याय. ब्राह्मण and परिव्राजक, गो and बलीवर्द stand in the relation of सामान्य (general) and विशेष (particular). मुक्ताफल and वज्र stand in the same relation with रत्न.

The Jaya. notices सद्रत्नमुक्ताफलवज्रशुञ्जि as another reading.

सद्रत्नमुक्ताफलवज्रभाञ्जि, विचित्रधातूनि, and सकाननानि are adjectives going both with मेरोः शिरांसि and गृहाणि.

Stanza 8—

हिमाद्रिटङ्कात्. The singular is used in the sense of the plural. जातिवाचक names (class-names) are in Sanskrit used either in the singular or in the plural. "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्" । १।२।५८॥ *e.g.* ब्राह्मणाः पूज्याः । ब्राह्मणः पूज्यः । The sense of the verse is that the rays of the brilliant jewels, with which the walls, and the floors of the houses were inlaid, coming out from windows, looked like the currents of the Ganges (they being white) coming out of the slopes of the Himâlayas.

Here houses are compared to the slopes of the Himâlayas and the rays of jewels to the currents of the Ganges. We have here a comparison between two statements and though one इव is used, गङ्गाम्बुपातप्रतिमाः being equal to गङ्गाम्बुपाता इव, the figure is अनेकेवा वाक्यार्थोपमा. Daṇḍî defines वाक्यार्थोपमा as follows:—

'वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते ।
एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥'

The following instances illustrate एकेवा वाक्यार्थोपमा and अनेकेवा वाक्यार्थोपमाः—

'त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥'
'नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥'

Compare also the following verse for अनेकेवा वाक्यार्थोपमाः—

"ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥" (रघु० ४; ६६).

On this Malli. says:—'अनेकेनैव शब्देनेयमुपमा । यथाह दण्डीः—
"एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥" इति ॥'

Stanza 9—

धर्म्यासु=not away from religion, religious, holy, purifying. The word is formed from धर्म by the addition of यत्. "धर्मपथ्यर्थन्यायादनपेते" ४।४।९२॥ *e. g.* धर्मादनपेतं धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम्. The word qualifies both पत्नीषु and विद्यासु. धर्म्यासु (पत्नीषु) pure; because practising religion with their husbands according to the dictates of the *S'rutis* and the *Smritis.* धर्म्यासु (विद्यासु) purifying, teaching religion.

अधिगतासु काले. The time for commencing learning and entering upon family-life for different castes is thus described by Yâjñyavalkya:—

'गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् ।
राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥
उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥' (याज्ञ० १;१४-१५).

'गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।' (याज्ञ० १;५१-५२).

Stanza 10—

पुत्रीयता. A denominative is formed from a noun in the sense of 'wishing it of one's self' by adding to it क्यच् (य). If the base to which is affixed क्यच् ends in अ, अ is changed to ई, and if it ends in any other vowel, it is lengthened. काम्यच् (काम्य) is also added in the same sense. The base so formed is conjugated in all the tenses and takes Para. terminations. आत्मनः पुत्रमिच्छति पुत्रीयति or पुत्रकाम्यति It should be noted that क्यच् can not be added to पुत्र in the sense of राज्ञः पुत्रमिच्छति.

क्यच् has another sense also. It is added to an उपमान in the objective or locative case in the sense of 'behaving.' (उपमानादाचारे ३।१।१०॥ अधिकरणाच्चेति वक्तव्यम्) *e. g.* पुत्रीयति (पुत्रमिवाचरति) छात्रम् (He acts towards a pupil as towards his sons), प्रावारीयति कम्बलम्, विष्णूयति द्विजम्, प्रासादीयति (प्रासादे इवाचरति) कुट्याम्, पर्यङ्कीयति मञ्चके, कुटीयति प्रासादे. काम्यच् is not added in this sense.

If the उपमान is the agent of the action of behaving, क्यङ् (य is) added to it in the sense of 'behaving' (कर्तुः क्यङ् सलोपश्च ३।१।११॥)

The base ending in क्यङ् takes Atma. terminations. Before क्यङ् the preceding vowel is lengthened, and स् dropped necessarily in the case of ओजस् and अप्सरस् and optionally in the case of other words ending in स्. ('ओजसोऽप्सरसो नित्यमितरेषां विभाषया') *e. g.* श्येनायते (श्येन इवाचरति) काकः, कृष्णायते, ओजायते (ओजस् is to be understood in the sense of ओजस्विन्. 'ओजःशब्दो वृत्तिविषये तद्वति'), अप्सरायते, यशायते or यशस्यते, विद्वायते or विद्वस्यते.

क्विप् is added to all nouns in the sense of क्यङ् ('सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः') क्विप् is wholly dropped. The base is to be considered as a root of the 1st conjugation. It takes Para. terminations *e. g.* कृष्णति (कृष्ण इवाचरति), दिनन्ति यामिन्यः (Nights act like days), as in the following verse:—

'सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥'

विपक्त्रिमज्ञानगतिः. 'विपक्त्रिमज्ञानगतिरिति विपाकेन निर्वृत्तं यत्पूर्वजन्मकृतमनिवर्त्तनीयं कर्म तस्येमतपःप्रत्ययाद्विनोपदेशाज्ज्ञानात्प्रवृत्तिर्बुद्धावस्य जातेत्यर्थः' जय०.

This makes the dissolution of the compound complicated. It may be dissolved as follows:—विपक्त्रिमं च तत् ज्ञानं च विपक्त्रिमज्ञानं तस्य गतिराश्रयः that is, he was the resort of perfected knowledge. This will give it the same sense as that of विपक्त्रिमज्ञाननिधिः the reading adopted by मल्लिनाथ.

विपक्त्रिम, and कृत्रिम, and निष्क्रिम (in St. 13) are formed by affixing क्त्रिम. It is added to roots that are mentioned in the Dhâtupâṭha with the initial डु in the sense of तेन (धातुवाच्यभावेन) निर्वृत्तम्. The initial डु is इत् by "आदिर्ञिटुडवः" १।३।५॥. डुपचष् पाके, डुलभष् प्राप्तौ, डुभृञ् धारणपोषणयोः, डुदाञ् दाने, डुधाञ् धारणपोषणयोः, डुकृञ् करणे, and डुक्रीञ् द्रव्यविनिमये are among the roots of this kind.

ऋष्यशृङ्गः. Malli.'s reading is ऋश्यशृङ्गः. ऋश्य and ऋष्य both mean 'a white-footed antilope.' ऋष्यशृङ्ग is the more general form. This is the form of the word used by Malli. himself in Raghu. "ऋष्यशृङ्गादयस्तस्य सन्तः सन्तानकाङ्क्षिणः । आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः ॥" रघु०. १०. ३. On this Malli. says "ऋष्यशृङ्गो नाम कश्चिदृषिः तदादयः."

Stanza 11—

कृतात्मा. Jaya. explains it as वशीकृतात्मेति भावः.

क्रतुम्. क्रतु is here used in the sense of इष्टि. The following verse shews the difference between क्रतु, इष्टि and याग:—

"इष्टिस्तु चरुणा प्रोक्ता यागस्तु पशुना स्मृतः ।
एतच्छेषः क्रतुः प्रोक्तो होमान्यत् पूजनं स्मृतम् ॥"

ज्ञाताशयस्तस्य means ज्ञाततदाशयः. It is like श्रुतदेहविसर्जनः पितुः, which means श्रुतपितृदेहविसर्जनः. When a word is connected with a dependent member of a compound, it should be put in the compound. तस्य and पितुः are connected with आशय and देहविसर्जन, which are both dependent as the compounds are बहुव्रीहि (अन्यपदार्थप्रधानो बहुव्रीहिः). They should therefore have been included in the compounds. In their present forms, the compounds are सापेक्ष, their dependent members being connected with तस्य and पितुः which are not included in them. 'समर्थानां पदविधिः' २।१।१॥ precludes सापेक्ष words from being compounded (सापेक्षमसमर्थं भवति).

'सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन ।
सापेक्षं तद्विजानीयादसमस्तविशेषणम् ॥'

If the सापेक्ष word is the principal word in a compound, the compound is allowed. 'यदि सापेक्षमसमर्थं भवतीत्युच्यते राजपुरुषो दर्शनीयः अत्र वृत्तिर्न प्राप्नोति । नैष दोषः । प्रधानमत्र सापेक्षम् । भवति च प्रधानस्य सापेक्षस्यापि समासः।' But if the सापेक्ष word is a dependent member of a compound, the compound is not allowed. Then how are 'देवदत्तस्य गुरुकुलम्' 'देवदत्तस्य गुरुपुत्रः' 'देवदत्तस्य दासभार्या' (where देवदत्तस्य is connected with गुरु and दास) 'किमोदनः शालीनाम्' (*i. e.* केषां शालीनामोदनः), 'सक्त्वाढकमापणीयानाम्' (*i. e.* आपणीयानां सक्तूनामाढकम्) to be explained? These are to be considered correct; because they are गमक, that is, they convey the sense that is desired to be conveyed by a sentence. 'इह समानार्थेन वाक्येन भवितव्यं समासेन च ।' 'गमकत्वात्समासः' means 'the compound is formed because it clearly conveys the desired sense, the sense that can be conveyed if the compound were not formed and words used uncompounded.'

सुतानुबन्धि. Malli. says it is formed by the addition of इनि (इन्) a possessive affix, to सुतानुबन्ध. सुतस्य अनुबन्धः सुतानुबन्धः सोऽस्य ऽस्मिन्वा अस्तीति सुतानुबन्धि. It is not formed by affixing णिनि (इन्) which shews ताच्छील्य (habit, nature) by the Sûtra 'सुप्यजातौ णिनिस्ताच्छील्ये' ३।२।७८॥ for though the word 'सुपि' can be supplied from a preceding Sûtra, it is mentioned to shew that it can not be added to a root to

which a preposition is prefixed. Malli. follows the view taken by Vrittikára who says: 'सुपीति वर्त्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थम्.' In his commentary on स्वविचारिणः C. 5, St. 13 also, Malli. takes the same view. But this does not seem to be the sound view. In his explanation of the Sûtra Bha. Dî. criticizes the view as follows:—

'इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानमिति पठितम् । हरदत्तमाधवादिभिश्च तदेवानुसृतम् । तच्च भाष्यविरोधादुपेक्ष्यम् । प्रसिद्धश्चोपसर्गेऽपि णिनिः । स बभूवोपजीविनाम् । अनुयायिवर्गः । पतत्यधो धाम विसारि । न वञ्चनीयाः प्रभवोऽनुजीविभिरित्यादौ ॥'

Jaya.'s view is as follows :—

" 'सुतानुबन्धि' इति पाठान्तरम् । सुताननुबन्द्धुं शीलमस्येति । 'सुप्यजातौ णिनिः—' सुपीत्यनुवर्त्तमाने सुब्ग्रहणमुपसर्गनिवृत्त्यर्थमिति केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यम् । अन्यथा 'जाताविति किं ब्राह्मणानामन्त्रयिता' इति न युज्यते । आङित्यस्योपसर्गत्वात् ॥"

Stanza 12—

अङ्गान्ययाक्षीदभितः प्रधानम्=Performed subsidiary sacrificial rites before and after the principal ceremony.

Jaya. runs as under :—

'अङ्गान्ययाक्षीदभितः प्रधानमिति । यद्देवतामयो यागः सा देवता तत्र प्रधानम् । पुत्रफलत्वाद्विष्णुः प्रधानम् । तमिष्ट्वा तस्योभयतः पार्श्वयोरन्यङ्गानि चक्षुरादीनि देवतान्तराणि तान्ययाक्षीत् । अग्नावाहुत्या पूजितवान् । . . . . शेषाण्यह्नोषीदिति स्वाङ्गं विष्णुमिष्ट्वा शेषाणि प्रतिकृतानि पिष्टकमयानि सुतानां संपदर्थमग्नौ हुतवान् ।'

Stanza 13—

हुतोच्छिष्टम्=The remaining portion of the oblation. Malli. says that as it was after the sacrifice that the food consisting of rice boiled in milk was presented to him by a divine person, it is here called हुतशिष्ट. It is described as follows in the Raghu. :—

'अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ।
पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥
हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुम् ।
अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥
प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः । (रघु० १०. ५०–५२).

Stanza 14—

कौशल्यया. This reading is adopted in the text as it is found in the majority of the Mss. collated for settling the text. Both Malli.

and Jaya. read कौसल्यया. Malli.'s note on the word in the Raghu. C.X. St. 55 is as follows :—

"कौ पृथिव्यां सलति गच्छतीति कोसलः। सल गतौ। पचाद्यच्। कुशब्दस्य पृषोदरादित्वाद्गुणः। कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या। "वृद्धेत्कोसलाजादाञ्ञ्यङ्" इति ञ्यङ्। 'यङश्चाप्' इति चाप्। अत एव सूत्रे निर्देशात् कोसलशब्दो दन्त्यसकारमध्यमः॥'

कैकयीतः. केकय—was the name of a country, the name of the king of the place was कैकय or कैकेय and that of his daughter कैकयी, कैकयी or कैकेयी.

शत्रुघ्न. Bha. Dî. explains the formation of the word in a different way from Malli. On "अमनुष्यकर्तृके च" ३।२।५३॥ after having given जायाघ्नस्तिलकालकः, पतिघ्नी पाणिरेखा, and पित्तघ्नं घृतम् as instances where टक् is added to हन्, the agent of the action being other than a man, he says 'अमनुष्येति किम्। आखुघातः शूद्रः। अथ कथं बलभद्रः प्रलम्बघ्नः। शत्रुघ्नः। कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धम्।'. He refers to the Vártika 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' on the Sútra 'तुन्दशोकयोः परिमृजापनुदोः' ३।२।५॥. मूलविभुजादि is an आकृतिगण, that is, it is not a limited list, but any word of a similar form may be considered as belonging to the list.

लक्ष्मणेन सह शत्रुघ्नं प्रासोष्ट. The Sútra "सहयुक्तेऽप्रधाने" २।३।१९॥ teaches that the word in the instrumental case connected with सह is अप्रधान (subordinate). Malli. says that this subordination is only शाब्द (verbal). The word सह shews that words joined by it are to be simultaneously construed with the verb with which they are connected. Thus in the present case सह shews that the प्रसव of लक्ष्मण and शत्रुघ्न was समकालीन. Lakshmaṇa's seniority to S'atrughna is therefore in no way harmed.

Bha. Di.'s remarks on this Sútra are as follows:—

'सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता' (सिद्धा० कौ०)

On this the Manoramâ runs thus:—

'पुत्रेणेति। पितुरत्र क्रियासंबन्धः शाब्दः पुत्रस्य तु आर्थ इति तस्याप्राधान्यम्। अप्रधानग्रहणं शक्यमकर्तुं न चैवं पितुरपि तृतीयापत्तिः। तत्र प्रातिपदिकार्थमात्रे अन्तरङ्गत्वात्प्रथमोपपत्तेः पितुरागमनमित्यादौ कारकविभक्तेः प्राबल्याच्च॥'

Stanza 15—

उपानेष्ट. नी is उभयपदी and so takes Atma. terminations when the result of the action goes to the agent. But even when the result

does not go to the agent, it takes Atma. terminations in the sense of 'respecting a person,' 'throwing up a person or thing,' 'acting as a teacher,' 'ascertaining the right thing,' 'giving wages,' 'paying off a debt,' and 'expending money for righteous purposes.' 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः' १।३।३६॥. On this the Káśikâ runs as follows:—

'णीञ् प्रापणे। अस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः। णीञ् प्रापणे इत्येतस्माद्धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु। सम्माननं पूजनम्। नयते चार्वी लोकायते। चार्वी बुद्धिः तत्संबन्धादाचार्योऽपि चार्वी। स लोकायते शास्त्रे पदार्थान्नयते उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति। ते युक्तिभिः स्थाप्यमानाः संमानिताः पूजिता भवन्ति। उत्सञ्जनमुत्क्षेपणम्। माणवकमुदानयते। उत्क्षिपतीत्यर्थः। आचार्यकरणमाचार्यक्रिया। माणवकमीदृशेन विधिना आत्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमाचार्यीकुर्वन् माणवकमात्मसमीपं प्रापयतीत्यर्थः। ज्ञानं प्रमेयनिश्चयः। नयते चार्वी लोकायते। तत्र तत्र प्रमेयं निश्चिनोतीत्यर्थः। भृतिर्वेतनम्। कर्मकरानुपनयते। भृतिदानेन समीपं करोतीत्यर्थः। विगणनमृणादेर्निर्यातनम्। मद्राः करं विनयन्ते। निर्यातयन्तीत्यर्थः। व्ययो धर्मादिषु विनियोगः। शतं विनयते। सहस्रं विनयते। धर्माद्यर्थं शतं विनियुङ्क्त इत्यर्थः। एतेष्विति किम्। अजां नयति ग्रामम्॥'

यमिनाम्. 'अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषम्।
इति पञ्च यमा येषां सन्तीति यमिनः स्मृताः॥' (जय०).

Yâjñavalkya however mentions 10 *Yamas*.

'ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता।
अहिंसा स्तेयमाधुर्ये दमश्चेति यमाः स्मृताः॥' (याज्ञ० ३; ३१२).

Stanza 16—

वेदोऽङ्गवान्. The supplements of the Vedas are enumerated in the following verse:—

'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु॥'

शस्त्राण्युपायंसत जित्वराणि. उपायंसत may be taken either as an active or a passive form. Malli. takes it actively, Jaya. passively. For uniformity with the 1st line, it is, we believe, better to take it as a passive form. यम् with उप is Atma. in the sense of स्वकरण (उपाद्यमः स्वकरणे १।३।५६). Following Vṛittikâra Malli. says that स्वकरण means marriage. Bha. Dî. criticizes Vṛittikâra as follows:—

"यत्तु वृत्तिकृतोक्तं पाणिग्रहण एवेष्यते तेनेह न परभार्यामुपयच्छाति दासीत्वेन स्वीकरोतीत्यर्थः इति तद्भाष्यविरुद्धम्। तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वात् इति भावः। तथा च भट्टिः प्रायुङ्क्त 'उपायंस्त महास्त्राणि' इति 'शस्त्राण्युपायंसत जित्वराणि' इति" ॥ मनो०.

Stanza 17—

'**मधुपर्कपाणिः**. Jaya. dissolves the compound thus:—मधुपर्कपाणिः। दधिघृतमधून्येकीकृतानि मधुपर्क इत्युच्यते तस्मिन् पात्रे स्थितः पाणिर्यस्येति विग्रहः। "सप्तम्युपमान—" इत्यादिना उत्तरपदलोपी समासः॥'

It may be solved as a मध्यमपदलोपी समास. मधुपर्कयुक्तः पाणिर्यस्य सः or as a व्यधिकरणबहुव्रीहि. मधुपर्कः पाणौ यस्य सः. Malli. solves 'पद्मव्यञ्जनहस्तया' (Raghu. C. X. St. 62) similarly:—'पद्ममेव व्यञ्जनं हस्ते यस्यास्तथा'.

Stanza 18—.

Malli.'s reading of the 1st line seems to be:—ऐषीः पुनर्जन्मजयाय तत्त्वं. He has to supply येन to construe the line. He derives ऐषीः from इष् 4th conj. Para.

रूपादिबोधात्. रूप, रस, गंध, स्पर्श, and शब्द are objects of senses.

तत्त्वानि The twenty-five elements recognised by the Sânkhyas. The following verse enumerates them and shews their nature:—

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥'

मूलप्रकृति or प्रकृति (Nature) is the creator of the world. It is the primary germ out of which all material appearances have been evolved. It is otherwise called प्रधान. It is the creator of the world, but it is not itself created and is therefore called अविकृति. It is inanimate, and consists of the three qualities सत्त्व, रजस्, and तमस्. It creates महत् or the great principle, also known as बुद्धि. or अन्तःकरण. महत् produces अहंकार, which in its turn gives rise to five *Tanmâtras* (शब्द, स्पर्श, रूप, रस, and गन्ध). महत्, अहंकार, and पञ्च तन्मात्र are both creators and created and are therefore प्रकृतिविकृतयः. The five *Tanmâtras* produce पञ्च महाभूत (पृथ्वी, अप्, तेजस्, वायु, and आकाश) and अहंकार produces मनस्, the five ज्ञानेन्द्रिय (organs of perception, श्रोत्रत्वक्चक्षूरसनाघ्राणानि) and the five कर्मेन्द्रिय (organs of action, वाक्पाणिपादपायूपस्थाः). The पञ्च महाभूत, the पञ्च ज्ञानेन्द्रिय, the पञ्च कर्मेन्द्रिय, and मनस् are the sixteen *Vikâras*; because they are created, but themselves create no elements. पुरुष or the soul is the twenty-fifth element. It neither

creates any thing nor is itself created. It is simply the passive looker-on of the actions of *Prakriti*. प्रकृतिः कर्त्री जडा पुरुषस्तु उदासीनः साक्षी पुष्करपलाशवन्निर्लिप्तः. 'महाभूतैः शरीरमुत्पाद्यते तत्संबन्धवशात् प्रकृतिरेव सर्वं करोति । तत्संसर्गवशादात्मनोऽहंकरोमीत्यभिमानो जायते । स एवात्मनो बन्ध इत्युच्यते । तन्निवर्त्तनाच्च मोक्ष इत्याहुः ॥' सिद्धा० चन्द्रो०.

Stanza 19—

द्विषद्वीर्यनिराकरिष्णुः=Habituated to disdain the valour of enemies. इष्णुच् (इष्णु) is added to अलंकृ, निराकृ, प्रजन्, उत्पच्, उत्पत्, उन्मद्, रुच्, अपत्रप्, वृत्, वृध्, सह्, and चर् in the sense of शील (habit, disposition). (अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ३।२।१३६।). As the Sûtra "न लोकाव्ययनिष्ठाखलर्थतृनाम्" २।३।६९। prohibits the use of the genitive case with words, the suffixes of which end in उ (*e. g.* हरिं दिदृक्षुः अलंकरिष्णुर्वा), Malli. takes the compound as द्वितीयातत्पुरुष. ('द्विषद्वीर्यं निराकरिष्णुः'). It should, however, be remembered that the Sûtra prohibits the use of कारकषष्ठी and not of शेषे षष्ठी ('सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः । शेषे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः ।' सिद्धा० कौ०). The Bhâshyakâra comments on शेषे षष्ठी as follows :—

'शेष इत्युच्यते । कः शेषो नाम । कर्मादिभ्यो येऽन्येऽर्थाः स शेषः । यद्येवं शेषो न प्रकल्पते । न हि कर्मादिभ्योऽन्येऽर्थाः सन्ति । इह तावद्राज्ञः पुरुष इति राजा कर्त्ता पुरुषः संप्रदानम् । वृक्षस्य शाखेति वृक्षः शाखाया अधिकरणम् । तथा यदेतत्स्वं नाम चतुर्भिरेतत्प्रकारैर्भवति क्रयणादपहरणाद्याच्ञाया विनिमयादिति । अत्र च सर्वत्र कर्मादयः सन्ति ॥ एवं तर्हि कर्मादीनामविवक्षा शेषः । कथं पुनः सतो नामाविवक्षा स्यात् । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिकैडका । अनुदरा कन्येति । असतश्च विवक्षा भवति । समुद्रः कुण्डिका । विन्ध्यो वर्धितकमिति ॥'

It will thus be seen that in every instance of the genitive case, the word in the genitive case, is connected with some action expressed or understood. The genitive case shews relation (संबन्ध) and Bhartrihari defines it as follows :—

'संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ॥'

On this Kaiyaṭa remarks as under :—

'तत्राश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसंबन्धपूर्वकोऽन्य एव स्वस्वामिभावादिकः संबन्धः प्रतीयते । मातुः स्मरतीत्यादौ श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वमविवक्षित्वा विशेषणभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते ॥'.

Thus शेष simply means the desire of not expressing the relation of कर्म and other Kârakas, even though the relation exists. Kaiyaṭa

says:—'क्रियाकारकसंबन्धोऽपि सर्वत्र वस्तुस्थित्यास्ति तन्निमित्तश्च स्वस्वामिभावादिरपि तत्र स्वस्वामिभावादिविवक्षायां सत्रपि क्रियाकारकसंबन्धो न विवक्ष्यते.'

On असतश्च विवक्षा &c. Kaiyata remarks:—'दृष्टान्तरूपेणेदमुपात्तम् । असतो यथा विवक्षा तथा सतोऽप्यविवक्षेत्यर्थः। समद्रः कुण्डिकेति । कुण्डिकायां बहुपानीयसंभवप्रतिपादनाय समुद्रत्वमारोप्यते । विन्ध्यो वर्धितकमिति । वर्धितकशब्देन मूले स्थूलमग्रे सूक्ष्मं विशिष्टसंस्थानयुक्तं भक्तमुच्यते । तस्य महत्त्वप्रतिपादनाय विन्ध्यत्वमसदारोप्यते ॥'

Taking शेषे षष्ठी the compound द्विषद्वीर्यनिराकरिष्णुः may be taken as षष्ठीतत्पुरुष. Jaya. takes it as such 'द्विषतां वीर्यं सामर्थ्यम् । . . . . तस्य निराकरिष्णुः' जय०.

Stanza 20—

अहंयुना . . . . शुभंयुः युस् (यु) is a possessive termination like मत् and is added to अहम् and शुभम्. 'अहमिति मान्तमव्ययमहङ्कारे शुभमिति शुभे। अहंयुरहङ्कारवान् । शुभंयुः शुभान्वितः ॥' (सिद्धा० कौ०).

Jaya. notices अहंयुनाथः as another reading and comments upon it as follows:—

'अहंयुनाथः इति विसर्गान्तं पाठान्तरम् । तत्र अहंयूनां क्षत्रियाणां नाथ इति योज्यम् ॥' (जय०).

Stanza 21—

धर्मवृद्ध्यै may be taken with the second clause where it is as Jaya. takes it. 'त्वयापि धर्मवृद्ध्यै धर्मोपचयाय वयमाप्स्महि प्राप्ताः' (जय०).

वयम् is used in the sense of अहम्. The plural forms of अस्मद् are optionally used in the sense of the singular or the dual number; but when they are qualified by an adjective, the plural is not used. 'सविशेषणस्य प्रतिषेधः' (वा०). पटुरहं ब्रवीमि ॥' (सिद्धा० कौ०). It should be noted that this adjective should be अनुवाद्य (attributive) and not विधेय (predicative). 'अनुवाद्यविशेषणेऽयं निषेधो न विधेये।. It is for this that पदमञ्जरीकार says:—"कथं 'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः' इति । अत्रोन्नतत्वं विधीयते। न हि विधेयोऽर्थो विशेषणं भवति ॥".

क्षात्रं द्विजत्वं च परस्परार्थम्. The Kshatriya valour and the Brahminic lustre help each other. Their combination is irresistible. *cf.* 'पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा' (रघु० ८. ४).

प्रहिणु. The नु of the conjugational signs of हि 5th conj. Para. and मी 9th conj. Ubha. is changed to णु when preceded by a preposition containing र्. *e. g.* प्रहिणोति, प्रहिणुतः, प्रमीणाति, प्रमीणीतः.

Stanza 23—

विप्रवह्निः. Jaya. takes it as उपमितसमास. 'विप्रो वह्निरिव । "उपमितम्—" इति समासः'. But in this case विप्र becomes the principal word in the compound and it can not be so well connected with धक्ष्यति as वह्नि. वह्नि should therefore be the principal word in the compound and for this the compound should be solved like मयूरव्यंसक. Malli. is therefore more accurate than Jaya. in solving the compound as विप्रः एव वह्निः विप्रवह्निः.

ततोऽनुजज्ञे गमनं सुतस्य. Our commentator's reading is ततोऽनुमेने गमनं सुतस्य. In this case नृपः can be connected actively with अनुमेने, and no विभक्तिविपरिणाम (change of case) is necessary. But the true reading seems to be the one adopted in the text. Malli. notices it and shews how it is discussed in the Siddhantakaumudî. ज्ञा takes Atma. terminations when not preceded by a preposition (अनुपसर्गाज्ज्ञः १।३।७६।). अनुजज्ञे should, therefore, be taken passively, गमनम् in the nominative case, and नृपः changed to नृपेण by विभक्तिविपरिणाम to be construed with अनुजज्ञे. The Siddhântakaumudî on this Sûtra runs as follows:—

'गां जानीते । अनुपसर्गात्किम् । स्वर्गं लोकं न प्रजानाति । कथं तर्हि भट्टिः "इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य" इति । कर्मणि लिट् । नृपेणेति विपरिणामः ॥'

It should be noted that the Sûtra is given to shew that ज्ञा is Atma. even when it is transitive, provided no preposition is prefixed to it. ('अकर्मकाच्च इत्येव सिद्धे वचनमिदं सकर्मकार्थमिति ध्वनयन्नुदाहरति गां जानीते इति' मनो॰). When intransitive ज्ञा takes Atma. terminations even when preceded by a preposition. ("अकर्मकाच्च" १।३।४५।। सर्पिषोऽनुजानीते).

On the reference made by the commentator to Siddhântakaumudî in this place, as well as in St. 16, C. VIII. see the remarks in the Intro.

Stanza 24—

दीप्रास्त्रधनुः. A Bahuvrîhi ending in धनुस् takes the termination अनङ् (धनुषश्च ५।४।१३२।।). In other words धनुस् is changed to धन्वन् at the end of a Bahuvrîhi compound. *e. g.* शार्ङ्गधन्वा, अधिज्यधन्वा. But the terminations added at the end of compounds are optional. धनुस्

is not therefore changed to धन्वन् here. 'अथ कथं "स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत्" इति पुष्पदन्तः। समासान्तविधेरनित्यत्वात्। अनित्यत्वे प्रमाणं तु अंश्वादिगणे राजन्शब्दस्य पाठः। स हि "प्रतेरंश्वादयस्तत्पुरुषे" (६।२।१९३॥) इत्यन्तोदात्तार्थः। "राजाहःसखि—" इति टचो नित्यत्वे तु किं तेनेति दिक्' (मनो०).

The changes which words undergo at the end of compounds are not obligatory, *i.e.* are not to be found in each and every case. (समासान्तविधि is अनित्य). They may be some times dispensed with. The authority for looking upon समासान्तविधि as अनित्य is the fact that the word राजन् is given in the Gaṇa beginning with अंशु. (अंशु, जन, राजन्, उष्ट्र, खेटक, अजिर, आर्द्रा, श्रवण, कृत्तिका, अर्धपुर इत्यंश्वादिः). It is included in the class to show that it is अन्तोदात्त. But if the समासान्तविधि is नित्य and राजन् takes टच् (is changed to राज) necessarily, then it being चित् (च् of टच् being इत्), it is अन्तोदात्त (चितः। ६।१।१६३ ॥), and it should not have been included in the अंश्वादिगण. ('राजशब्दः समासान्तस्यानित्यत्वाद्यदा टच् नास्ति तदा प्रयोजयति। तस्मिन्हि सति चित्स्वरेणैवान्तोदात्तत्वं सिद्धम्।' काशि०).

नम्र, दीप्र, and हिंस्र are formed from नम्, दीप्, and हिंस् by the affix र added to them in the sense of 'agent accustomed to do the action denoted by the verb or doing it as his duty or doing it well' ('नमिकम्पिस्म्यजसकमहिंसदीपो रः। ३।२।१६७॥ नम्रं काष्ठम्। कम्प्रा शाखा। स्मेरं मुखम्। अजस्रं जुहोति। कम्रा युवतिः। हिंस्रं रक्षः। दीप्रं काष्ठम्। अजस्रमिति जसु मोक्षणे नञ्पूर्वो रप्रत्ययान्तः क्रियासातत्ये वर्तते। काशि०. The sense of the termination is shewn in Sûtra आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु। ३।२।१३४॥).

Stanza 25—

St. 19, L. 2. अविना for अथिना.
St. 23, L. 2. प्राविशयद्गृहम् for प्रावेशयद्गृहान्.
St. 45, L. 2. वेष° for वेश°.
St. 58, L. 1. क्रमेन निष्क्राणा for क्रमादनिक्राणा.
St. 66, L. 1. सङ्कुश आगतान् for सङ्कुसमागतान्.
St. 69, L. 2. सृष्टिःपूर्विश्व° for पूःसृष्टिर्विश्व°.
St. 76, L. 2. सालभञ्जिका for शालभञ्जिका.
St. 83, L. 2. स्वर्गारूढो for स्वरारूढो.
St. 86, L. 2. परिम्लानो for परिग्लानो.
St. 88, L. 2. जटायुं संस्तुयाद्दरात् for जटायुं च स्तुयाद्दरात्.
St. 91, L. 1. °महोऽतीतं for °महर्यातं.
St. 93, L. 2. कस्मात् for यस्मात्.
St. 95, L. 1. प्रोर्णुवितुं for प्रोर्णवितुं.
St. 95, L. 2. प्रोर्णवित्रीं for प्रोर्णुवित्रीं.
St. 110, L. 2. वाधः for चाधः

इति भट्टिकाव्ये समुद्रोपकण्ठगमनो नाम सप्तमः सर्गः ।

CANTO VIII.

St. 7, L. 2. एका for सैका.
St. 11, L. 2. न न संस्यास्यते for न तत्संस्थास्यते.
St. 13, L. 2. ते ध्रुवम् for तेऽधुना.
St. 28, L. 2. भयङ्करा for भयंप्रदा.
St. 28, L. 2. संशृण्वन् प्रवरमानाश्रावणस्य गुणान् जनान्.
St. 34, L. 1. नृत्तं for नृत्यं.
St. 38, L. 1. वियन्मध्ये for वियन्मध्यं.
St. 39, L. 1. °मुपायंस्त for °मुपायुङ्क्त.

St. 43, L. 2. मायां च for मायाश्च.
St. 45, L. 2. दशास्यस्य for रावणस्य.
St. 62, L. 1. विदलितो° for विकसितो°.
St. 67, L. 2. नुवाना स्यजिह्वरन् for नुवानास्त्वजिह्वरन्.
St. 70, L. 2. °मदृश्यां for मदृश्यो°.
After St. 72 adds त्रिभिर्विशेषकम्.
St. 80, L. 2. त्वमन्यथा° for तवान्यथा°.
St. 84, L. 1. रक्षांसि मां for रक्षोभिर्मां.
St. 85, L. 1. पतिव्रता for पतिप्रिया.
St. 85, L. 2. पापान्ववसितं for पापानुवसितं.
St. 96, L. 2. दत्त्वं for दत्त.
St. 106, L. 1. राघवार्थकरी for राघवानुचरी.
St. 109, L. 2. नागन्तुमुत्सहेतेह for गन्तुमुत्सहते नैव.
St. 128, L. 1. यथोद्दिष्टं for यथादिष्टं.

इति भट्टिकाव्येऽष्टमः सर्गः ।

CANTO IX.

St. 1, L. 1. दुवत्पक्षी for कुवत्पक्षी.
St. 8, L. 2. अचालीन्न च नाव्राजीत् for न चाह्वालीन्न चाव्राजीत्.
St. 9, L. 2. बहूनां सोऽग्रहीद् for बहूनामग्रहीद्.
St. 10, L. 2. प्रोर्णुविषु° for प्रोर्णविषु°.
St. 16, L. 1. मांसोपयोग for मांसोपभोग.
St. 18, L. 1. धृष्टः for धृष्टान्.
St. 41, L. 2. तलेना° for बलेना°.
St. 42, L. 1. केसरी for केशरी.
St. 46, L. 1. °मन्तिकम् for मन्तिकात्°.
St. 51, L. 2. वानरोत्तमम् for प्रीतिमुत्तमाम्.
St. 56, L. 1. अश्वसीदिव for आश्वसीदिव.
St. „ L. 2. ललित° for लुलित°.
St. 57, L. 2. काकुत्स्थमूचे सं for काकुत्स्थं तमूचे.
St. 60, L. 1. केसरः for केशरः.
St. 63, L. 2. मर्माविद्भिरयस्काण्डै° for मर्माविद्भिस्तमस्काण्डै°.
St. 74, L. 1. निस्यन्द° for विष्यन्द°.
St. „ L. 2. °न्नविष्कन्ता for °न्नविस्कन्ता.
St. 75, L. 2. विष्फुरन् for विस्फुरन्.
St. 76, L. 1. विस्फुरद्भि° for विस्फुलिङ्गि°.

St. 79, L. 2. तापसस्येति for मानुषस्येति.
St. 81, L. 1. समागते for समागमे.
St. 86, L. 1. पिङ्गल° for पिङ्गर°.
After 87 पञ्चभिः कुलकम् ।
After 94 युग्मम्.
St. 98, L. 2. राक्षसाधिपः for रक्षसां पतिः.
St. 111, L. 2. नीतिनिष्ठस्य for नीतितीक्ष्णस्य.
St. 124, L. 2. विस्मयः for कः स्मयः.
St. 130, L. 1. अभिमानः फलं for अभिमानफलं.

इति श्रीभट्टिकाव्ये हनूमद्ग्रहणं नाम नवमः सर्गः ॥

P. A Pâtaṇa Ms. which proceeds up to the Canto. X. It opens with श्रीगणेशाय नमः ॥.

CANTO I.

St. 17, L. 3. क्रतुरक्षणार्थं for परिरक्षणार्थं.
St. 16, L. 2. क्रतूंश्च for क्रतूंस्तु.
St. 24, L. 4. दीप्तास्त्रधरः for दीप्तास्त्रधनुः.

इति भट्टिकाव्ये प्रकीर्णकाण्डे प्रथमः सर्गः ।

CANTO II.

Stanzas marked 10th and 11th in the text are given in the Ms. as 2nd and 3rd.

St. 2, L. 2. सातिशयं for सातिशयां.
St. 3, L. 3. सामर्षतयैव for सामर्षतयेव.
St. 6, L. 2. निर्मीलभृङ्गैः for निलीनभृङ्गैः.
St. 7, L. 4. लक्षे for लक्ष्ये.

Stanzas 8th and 9th in the text are given after the 17th St. of the text.

St. 10, L. 3. सुगन्धि° for सुगन्ध°.
St. 13, L. 1. लोलनीया for लोभनीया.
St. „ L. 3. सस्य° for शस्य°.
St. 16, L. 4. °नृत्य° for °नृत्त°.
explains आरात् as निकटात्.
St. 21, L. 2. °मविक्षितात्मा for °मविक्षतात्मा.

St. 23, L. 3. °भास्वराभ्र° for °भासुराभ्र°.
St. 28, L. 4. संधुक्षतां for संधुक्ष्यतां.
St. 29, L. 3. दाक्षिण्य° for दक्षिण्य°.
St. 30, L. 4. च्चानशेऽभ्रैः for चानशेऽब्दैः
St. 40, L. 3. प्रीतमनाम° for प्रीतमतिर्म°.
St. 43, L. 1. पथकान् for पथिकान्.
St. 44, L. 3. श्रुतसूनुवृद्धि° for श्रुतसूनुवृत्ति°.
St. 48, L. 3. °भूषां for °शोभां.
St. „ L. 4. °वंश्यं° for °वर्ग्यं°.
St. 50, L. 3. °नुपजानुरक्ति° for °नुपजान्वरक्ति°
St. 52, L. 3. °द्विपक्षे for °द्विपक्षं.

इति भट्टिकाव्ये प्रकीर्णकाण्डे द्वितीयः सर्गः।

CANTO III.

St. 4, L. 1. सुपोषं for स्वपोषं.
St. 7, L. 2. विकृतं for विकृतिं.
St. „ L. 3. व्यमृषन्न for व्यमृशन्न.
St. 13, L. 2. सुपोषम् for स्वपोषम्.
St. 17, L. 1. रुदन्तो for रुवन्तो.
St. 23, L. 3. °मानिनीषुः for °मानिनीषून्.
St. 27, L. 4. पणायाः for पणायान्.
St. 48, L. 1. प्रतीयु° for प्रतीषु°.

इति भट्टिकाव्ये प्रकीर्णकाण्डे रामप्रवासो नाम तृतीयः सर्गः।

CANTO IV.

St. 6, L. 2. सुपुण्य° for स्वपुण्य°.
St. 10, L. 1. सर्वाङ्गीने for सर्वाङ्गीणे.
St. 13, L. 1. परेद्युरद्य for परेद्यव्यद्य.
has युग्मकम् after St. 14.
has कुलकम् after St. 19.
St. 20, L. 2. सुभोगीनां for स्वभोगीनां.
St. 33, L. 2. अपिस्फुरच्च for अपिस्फवच्च.
St. 40, L. 2. पारस्वधिक° for पारश्वधिक°.
St. „ „ °प्राशिका° for °प्रासिका°.

इति भट्टिकाव्ये प्रकीर्णकाण्डे चतुर्थः सर्गः।

CANTO V.

St. 2, L. 1. मुषल° for मुशल°.
St. „ „ प्राष° for प्रास°.
St. „ L. 2. °मायुधच्छायरजः° for °मायुधच्छायं रजः°.
St. 4, L. 2. पतिम् for गतिम्.
St. 11, L. 2. माहेन्द्रियं for महेन्द्रियं.
St. „ „ दुश्च्यवनो for दुश्चवनो.
St. 18, L. 1. हंसगामिनी for हंसनादिनी.
St. 22, L. 2. न चाग्रायी for न नाग्रायी.
St. 29, L. 1. साकं for सार्धं.
St. 34, L. 1. वेत्ति ताडका तस्य विक्रमम् for तस्य ताडका वेत्ति विक्रमम्.
St. 44, L. 1. नित्यं च रणकाम्यसि for नित्यं शरणकाम्यसि.
St. „ L 2. विजिघृक्षु° for निजिघृक्षु°.
St. 64, L. 2. समागत्य for समागम्य.
St. 86, L. 2. वक्तुं युक्तं किं for युक्तं किं वक्तुं.
St. 100, L. 1. नराशनम् for नराशिनम्.
St. 102, L. 1. विध्यमानो वा for विध्यमानोऽपि.
St. 107, L. 2. क्रव्याच्छलेन लोलूयांचक्रे पक्षौ पतत्रिणः ॥

इति भट्टिकाव्ये सीताहरणो नाम पञ्चमः सर्गः ।

CANTO VI.

St. 3, L. 2. नाप्यूर्जा चि° for नाप्यूर्जां चि°.
St. 8, L. 2. विह्वलः for विक्लवः.
St. 11, L. 1. हुं for हूं.
St. 13, L. 2. प्रम्लायति for प्रग्लायति.
St. 15, L. 2. अक्षेमपरि° for अक्षेमः परि°.
St. 18, L. 1. ए for ऐ.
St. 19, L. 1. ममाश्वयीत् for तवाश्वयीत्.
St. 21, L. 1. स्राती for स्रान्ती.
St. 28, L. 2. °श्च्युतत्तयोः for च्युतत्तयोः.
St. 29, L. 1. °मश्च्योतीत् for °मच्योतीत्.
St. „ L. 2. एह्येनं for एह्यमुं.
St. 31, L. 2. जिघांसो° for जिघत्सो°.
St. 35, L. 2. सीताविरहदुःखार्त्तः कोपरक्तान्तलोचनः.
St. 36, L. 1. रुणध्मि सवितुर्मार्गं . . . . .
St. „ L. 2. रिणच्मि जलधेस्तोयं . . . . .

St. 37, L. 1. क्षुणाद्मि . . . . .
St. „ L. 2. यमं शुनज्मि . . . . .
St. 38, L. 1. विनज्मि धाम सर्वेषां तृणेह्मि सकलं जगत्.
St. „ L. 2. शुष्कपेषं . . . . .
Sts. 39, and 40 are same as Sts. 38 and 39 in the text.
St. 41, L. 1. न्यवर्त्तयत्तु° . . . . .
St. „ L. 2. ऐक्षेतामा° . . . . . .
St. 42, L. 1. तं सीताघातिनं . . . . . ।
St. „ L. 2. प्रोवाच स तदा पक्षी भयाद्रामेण तर्जितः ॥.

After 42 of the text the Ms. reads—

पप्रच्छ जानकीवार्त्तां संग्रामं च पतत्रिणम् ।
ततो रावणमाचख्यौ द्विषन्तं पततां वरः ॥

Omits विषादमीयिवांसौ . . . . .

St. 45, L. 1. बलापकर्षमघ्नता for वनाकर्षं समघ्नता.
St. 48, L. 1. रिपुः कथम् for कथं रिपुः.
St. 50, L. 2. लङ्कां नीता for नीता लङ्कां.
St. 64, L. 1. °समुन्नये for °समन्वये.
St. „ L. 2. °मवाच्यैः for °मपार्थ्यैः.
St. 66, L. 1. सम्यक् कच्चित् for कच्चित् सम्यक्.
St. 73, L. 2. पम्पानि for पाम्पानि.
St. 74, L. 1. वासनैः for वाशनैः.
St. 98, L. 1. सर्वभोगीन° for सर्वभोगीण°
Omits verses 124 and 125.
St. 126, L. 2. बान्धवाक्रोशिनौ for बान्धवक्रोशिनौ.
St. 133, L. 1. ध्रुवं न त्वां for ध्रुवन्न त्वा.
St. 136, L. 2. दुर्वृत्तं for दुर्वृत्त.

इति भट्टिकाव्ये षष्ठः सर्गः ।

CANTO VII.

St. 2, L. 1. सस्याना° for शस्याना°.
St. 3, L. 2. व्योम तडि° for भान्तस्तडि°.
St. 7, L. 1. परिदेवनम् for परिदेविनम्.
St. 10, L. 1. परिमोहिनम् for परिमोहिणम्.
St. 11, L. 2. °तको व्योम्नि for °तकः पक्षी.

St. 12, L. 1. व्रते for व्येते.
St. „ L. 2. विमुक्तानां for वियुक्तानां.
St. 15, L. 2. चङ्क्रमणात् for चन्द्रमणात्.
St. 16, L. 2. मण्डनं for मण्डना.
St. 17, L. 2. निरुद्ध° for निरस्त°.
St. 25, L. 2. °ईश्वर for °ईश्वरः.
St. 26, L. 1. भासो for भासं.
Omits St. 33.
St. 48, L. 1. प्रार्थयन्ति for प्रार्थयन्ते.
Omits Sts. 60 and 64.
St. 68, L. 1. रक्षं for रक्षणं.
St. 90, L. 1. महाकुलीप्रियाम् for माहाकुलीं प्रियाम्.
St. „ L. 2. महाकुलीनस्य for माहाकुलीनस्य.
St. 91, L. 2. विखिन्दन्तः for विषीदन्तः.
St. 95, L. 1. प्रोर्णुवितुं for प्रोर्णवितुं.
St. „ L. 2. प्रोर्णविचीं for प्रोर्णुवित्रीं.
St. 96, L. 1. लङ्का for लङ्काम्.
St. „ „ पालिता for पालितां.
St. 102, L. 2. स्म for च.

इति भट्टिकाव्येऽधिकारकाण्डे सप्तमः सर्गः ।

CANTO VIII.

St. 5, L. 1. पथि घ्नन्तं for व्यतिघ्नन्त.
St. 7, L. 2. नक्राणामाशितम्भवम् for नक्राणां स्वाशितम्भवम्.
St. 11, L. 2. न च संस्थास्यते for न तत्संस्थास्यते.
St. 19, L. 1. बलैः for वनैः.
St. 26, L. 2. प्रत्यज्ञास्त for प्रत्यज्ञासीत्.
St. 28, L. 2. संशृण्वन्प्रवदमाना° for शृण्वन्संप्रवदमाना°.
St. 34, L. 1. नृत्तं for नृत्यं.
St. 41, L. 2. °विश्रम्भा° for °विस्रम्भो°.
Omits St. 42.
कुलकम् after St. 45.
St. 52, L. 1. सहामोदं for महामोदं.
St. „ L. 1. परिजनावृतम् for परिजनान्वितम्.
St. 57, L. 1. शुचः कथम् for कथं शुचः.
St. 66, L. 1. अस्यन्द° for अस्यद°.
St. „ L. 2. स्तबकोन्नयाः for स्तबकोच्चयाः.

St. 71, L. 2. श्याम° for म्लान°.
St. 85, L. 2. पापान्ववसितं for पापानुवसितं.
St. 91, L. 1. प्रभुः for विभुः.
St. 92, L. 1. °मुक्तो for °मुक्तं.
St. 101, L. 2. °स्तल्पं for °स्तल्पान्.
युग्मकम् after St. 103.
St. 109, L. 1. वारिणा for वा विना.
St. ,, L. 2. नेह for नैव.
St. 110, L. 1. चिन्तावती for चिन्तावतीं.
St. ,, L. 2. मुक्ता for मुक्तां.
St. 111, L. 1. न प्रकृष्टं for विप्रकृष्टं.
St. 112, L. 2. °मुपाक्रम्य° for °मुपाक्रंस्य°.
St. 115, L. 1. पुरम् for पुरीम्.
St. 118, L. 1. अयं for इदं.
St. ,, ,, °कुरीयकः for °कुलीयकम्.
St. ,, L. 2. °मर्पितः for °मर्पितं.
Omits St. 119.
St. 121, L. 2. धृत्या नाथस्व for नाथस्व धृत्या.
St. 132, L. 2. °निपातचित्रवसुधं for °निपातविचित्रवसुधं.
St. ,, L. 3. शकुननिनादनादितककुल्लोल° for शकुननिनादनादिककुब्विलोल°.

इति भट्टिकाव्येऽधिकारकाण्डेऽष्टमः सर्गः ॥

CANTO IX.

St. 1, L. 1. कूजत्प° for कुवत्प°.
St. 4, L. 1. प्राश° for प्रास°.
St. ,, L. 2. दिशं for दिशः.
St. 8, L. 2. अश्वालीश्चेव for न चाह्वालीन्न.
St. 11, L 1. अक्राणिषु° for अराणिषु°.
St. 14, L. 2. °मासेदु° for °माजग्मु°.
St. 18, L. 2. विनिर्गतः for विनर्दतः.
St. 19, L. 1. अभ्यर्णो for अत्यर्णो.
St. ,, L. 2. वृत्तशस्त्रा for वृत्तशस्त्रान्.
St. 22, L. 1. त्विषः for द्विषः.
Omits the 2nd half of St. 51.
St. 54, वने चित्रकरिषोर्वृक्षान्. . . . . . . ।
लसद्विचित्रशस्त्रौघः संग्रामो मूर्त्तिमानिव ॥

St. 58, L. 2. खुरप्रैः for क्षुरप्रैः.
St. 62, L. 2. ददृशे बहुधा for बहुधा ददृशे.
St. 67, L. 1. पृतनाषाड्द्विषो for पुरुहूतद्विषो.
St. 73, L. 2. व्यसहते° for व्यषहते°.
St. 74, L. 1. निष्यन्द for विस्यन्द.
St. ,, L. 2. विस्कन्दीन् for विष्कन्तॄन्.
St. 75, L. 1. परिस्कन्दन् for परिष्कन्दन्.
St. 76, L. 1. विस्फुरङ्गि° for विस्फुलङ्गि°.
St. ,, L. 1. निस्फुरः for निष्फुलः.
St. ,, L. 2. विस्कम्भितुं for विष्कम्भितुं.
St. 78, L. 1. °सङ्ग for °षङ्ग°.
St. 80, L. 2. च for यः
St. 93, L. 1. खरनसा° for खरणसा°.
St. 96, L. 1. सुरापान° for सुरापाण°.
St. 97, L. 1. संहर्षयोगिनः for संघर्षयोगिणः.
St. 102, L. 1. प्रहन्यन्ते स्म for प्राघानिषत.
St. 116, L. 2. मारीचेन च for मारीचेनापि.
St. 118, L. 1. कोपानिला° for क्रोधानिला°.
St. 126, L. 1. °न्यसंयुक्तं for °न्यसंसक्तं.
St. 128, L. 1. दर्शने तव for तव दर्शने.

इति भट्टिकाव्येऽधिकारकाण्डे नवमः सर्गः ॥.

ADDENDA AND CORRIGENDA.

Page.	Line.	Incorrect.	Correct.
2	26	स्तभैयुक्त°	स्तभैर्युक्त°
3	23	for स्यान्नुमर्थम्	Kâsiká-reading is स्यादिनुमर्थम्
8-9	23	विदेः शतुर्वसुः	"विदेः शतुर्वसुः ।"
8	25	५ निधि D.	५ निधि D., Com.
11	2	"दोरद्घोः"	"दो दद् घोः"
„	5	यः	ये
„	16	ततष्टाप्	ततश्चाप्
„	30	ङीप्	ङीष्
14	4	"नन्द्राः संयोगादयः"	"न न्द्राः संयोगादयः"
15	21	शुभयो°	शुभमो°
19	22	ठक्	ठञ्
25	4	शैलकुञ्जे	शैलकुञ्जे
„	19	कित्वान्न	कित्त्वान्न
26	3	गन्धस्येत्वे	गन्धस्येत्त्वे
„	4	°इत्वाभावः	°इत्त्वाभावः
„	23	गम्ये	गम्ये ।
31	2	पूर्वपूर्वं	पूर्वंपूर्वं
„	3	Pratâparudra reads	'विशेषणत्वकथनमसावेकावली मता'
32	15	पूर्वादप्रत्ययः	पूर्वादप्प्रत्ययः
34	3	सुखग्रहण°	सुखग्रहणार्थ°
„	15	"ऋदोरप्"	"ॠदोरप्"
36	20	"बहुव्रीहौ"	"बहुव्रीहौ—"
44	13	नाना मार्गेषु	नानामार्गेषु ।
„	14	after ठक्	add गिरिषु ज्ञान् गिरिज्ञान् गिरिसंचारकुशलानित्यर्थः।
45	6	वृद्ध :—	वृद्धः
„	8	यणादि परलोपः	यणादिपरलोपः
„	16	रूपइत्यर्थः	रूप इत्यर्थः
„	17	"दृग्दृशव	"दृग्दृशव-
„	21	कर्त्ता यान्त°	कर्त्तायं त°
„	22	पश्यन्ति	पश्यति
46	14	मधिगम्येत्यर्थः	मधिगमय्येत्यर्थः

Page.	Line.	Incorrect.	Correct.
46	26	साल T_2, N.	साल T_2, N., Com.
47	7	स्तमात्म . .	स्तामात्म . .
,,	27	आश्वीय D., T., G., Com.	आश्वीय D., T., G.
48	5	आश्वीयम्	अश्वीयम्
,,	6	After इति छप्रत्ययः । add	राजन्यानां समूहो
,,	9	इति यत्प्रत्ययः	इति खप्रत्ययः
56	26	न E_4.	न E_1,
60	19	प्रणष्टो [2]	प्रनष्टो [3]
,,	25	गुरूणा	गुरूणां
,,	27	प्रनष्टो N., C., E_1.	प्रणष्टो C., B., E_2, E_3, T_2, T_3, T_4, D., T., G., Com.
61	14	शोकापनुरः	शोकापनुदः
,,	17	च्लेरङ्गा-	च्लेरङा-
64	15	सचेन्दनो	सै चन्दनो
,,	23	भजानादिभ्य	भाजनादिभ्य
69	5	श्रीवा सिरा	श्रीवासिरा
71	2	दितिभावः	दिति भावः
,,	19	"अप्रत्ययात्"	"अ प्रत्ययात्"
72	5	सविप्रां- [2]	सैविप्रा- [2]
,,	26	२ सविप्राश्चि° T., G., Com.	Strike off this.
73	18	for प्राणायतनेषु हिरण्यशकलं read	प्राणायतनेषु हिरण्यशकलान् प्रत्यस्यतीति शास्त्रात् सहिरण्यशकलं
,,	19	तथाविधानं	यथाविधानं
76	6	व्यसन्तु°	व्यस्यन्तु
82	11	मध्ये जला	मध्येजला
83	7	मागाः	मा गाः
,,	25	वहाशुभार° c.	वहाशु भार° c.
88	23	तंनिचखनतुः	तं निचखनतुः
89	15	स्वधर्माजितां	स्वधर्मार्जितां
91	1	परिच्छेदा°	परिच्छदा°
,,	8	मत्वर्थीयः ष्ठन्.	मत्वर्थीयष्ठन्
92	9	पर्षत्रैविध्य°	पर्षत्त्रैविद्य°
93	23	असका	असुका
,,	25	°सका	°सुका
95	2	मदुनी	मृदुनी
97	2	एतद्रूपा	एतद्रूपा

Page.	Line.	Incorrect.	Correct.
97	19	ऽप्सरसोनि॰	ऽप्सरसो नि॰
110	21	" सभाराजा॰	" सभा राजा॰
112	3	सिञ्चमन्त्र॰	किञ्चिन्मन्त्र॰
119	10	ङीप्	ङीष्
124	4	हेहय॰	हैहय॰
133	10	तेषां नित्य॰	तेषामनित्य॰
„	16	प्यै	प्यैङ्
134	25	ब्रश्चादिनाषत्वे	ब्रश्चादिना षत्वे
140	15	शोभना	शोभनं
„	24	ᳲकपा	ᳵक ᳲपा
150	23	त्यादिनिष्ठुरं	त्यादि निष्ठुरं
158	22	कृशता रतिः	कृशतारतिः
159	17	आराद्दु॰	आराद्दू॰
163	22	प्रत्यद्दुद्रुवत	प्रत्यद्दुद्रुवत्
166	13	ह्लदयति	ह्लादयति
169	23	क्रूद्धो॰	क्रुद्धो॰
170	11	संरभिणो	संरम्भिणो
175	1	बन्धिष्ठा	बधिष्ठा
„	2	दर्ध॰	दर्थ॰
182	6	गुण्यं	कुण्यं
„	24	प्रगृह्य पद	प्रगृह्यपद
184	24	after तक्रः॥	add प्रणाय्यो जनः सतामसंमतश्चोरजनः ॥
189	20	चकारा	चकारा–
190	19	after अस्य add	दुःखस्य
192	15	संपरीवारो	सपरीवारो
194	17	" शमिधातोः	शमि धातोः
„	24	क्रव्याद्भिः रा॰	क्रव्याद्भिरा॰
196	14	बहुन्नाद॰	बहुन्नद॰
201	24	Strike off	६ पाणिघ्नैः Com.
202	5	पाणिघ्नैः	पाणिघैः
209	1	द्रवन्	द्रुवन्
210	12	अक्षत्रियजे क्ष॰	अक्षत्रियजेऽक्ष॰
212	15	विकल्पाङ्गते	विकल्पाङ्गूते
„	24	after अभिजानासि	add T., G., Com.
„	25	after नाविति	add T., G., Com.

Page.	Line.	Incorrect.	Correct.
216	7	हिष्णुवदुन्माद°	हिष्णुरसोढा सन्नुन्मद्दिष्णुवदुन्माद°
„	23	द्रोही	द्रोहि
„	„	जिघांसुः	जिघांसु
222	20	हिंस्रा	हिंस्राः
226	7	कार्यं सार°	कार्यसार°
237	5	लौहो	लौहो[३/]
„		In the foot note	add ३' लोह T., G., Com.
247	10	महाकु°	माहाकु°
„	26	strike off T., G., com.	
259	16	आशितेः	आशिते
271	2	तृताया°	तृतीया°
277	22	भावाद°	भावाद्°
307	11	भजौ जभ°	भजौ ऽजभ°
309	3	ऽष्टदश°	ऽष्टादश°
„	10	तद्वद°	तद्वद्°
314	4	ओदितश्च	आदितश्च
322	13	बद्धि°	बुद्धि°
324	2	निरङ्कुषः	निरङ्कुशः
327	7	द्रक्षसांपतिः	द्रक्षसां पतिः
328	17	वन	वनं
330	2	काम्यच	काम्यच्
„	4	रक्षः पाशाः	रक्षस्पाशाः

NOTES.

3	24	सिद्धां॰	सिद्धा॰
,,	32	*Upâyás*	*Upâyas*
4	34	read	अस्तीति
8	5	भवेत	भवेत्
,,	18	शुक्लं	शुक्लः
,,	21	वलाकायां	वलाकायाः
,,	22	अत्र पीतिमादिषु	पत्रपीतिमादिषु
,,	,,	बलीस्यात्	वालिश्यात्
11	22	is affixed क्यच्	क्यच् is affixed
,,	34	क्यङ	क्यङ्
15	5	कोसलशब्दशोदन्स्य	कोसलशब्दो दन्स्य
19	4	समद्रः	समुद्रः
31	23	Manorama	Manoramâ
35	2	मर्हति	मर्हति
,,	13	strike off comma	after नेदयत् and ददयत्
37	29	अनचरः	अनुचरः
40	33	purânas	Purâṇas
41	18	वाद	वादं
55	28	उत्कृष्ट	उत्कृष्टं
72	23	his	her
73	14	प्रयौगो	प्रयोगो
76	29	गणकीर्त्तनम्	गुणकीर्त्तनम्
77	17	necesarily	necessarily
83	35	अनहारः	अनाहारः
85	18	कर्त्तृणि	कर्त्तृणि
86	24	मूञ्जाना	मुञ्जाना
87	28	गार्हपत्याह्वति	गार्हपत्याह्वेति
99	24	साङे	साङ्गे
,,	27	dependant	dependent
106	12	after 'does not	refer to the' add Vârtika
110	12	read अनाढ्यैरीषदाढ्योऽपि.	
111	31	read प्राप्तुमिच्छा.	
123	35	प्रयोग	प्रयोगे
129	1	a	an
,,	16	regular	regular
132	31	इत्यव	इत्येव
136	27	अङ्गलि	अङ्गुलि

BOMBAY SANSKRIT SERIES.

Edited under the superintendence of Dr. P. Peterson and Dr. R. G. Bhândârkar.

	Rs.	a.	p.
No. I.—Pañchatantra, Books IV. and V. Edited, with Notes, by Dr. G. Bühler	0	4	0
No. II.—Nâgojibhaṭṭa's Paribhâshendusekhara. Edited and explained by Dr. F. Kielhorn. The Sanskrit Text and various Readings, Part I.	0	8	0
No. III.—Pañchatantra, Books II. and III. Edited, with Notes, by Dr. G. Bühler...	0	4	0
No. IV.—Pañchatantra, Book I. Edited, with Notes, by Dr. F. Kielhorn.	0	6	0
No. V.—The Raghuvaṁśa of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A., Part I., Cantos I.—VI.	1	8	0
No. VI.—Mâlavikâgnimitra: a Sanskrit Play by Kâlidâsa. Edited, with Notes, by Shankar P. Pandit, M.A.	2	2	0
No. VII.—Nâgojibhaṭṭa's Paribhâshendusekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs I.—XXXVII.	0	8	0
No. VIII.—The Raghuvaṁśa of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A. Part II., Cantos VII.—XIII.	0	12	0
No. IX.—Nâgojibhaṭṭa's Paribhâshendusekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs XXXVIII.—LXIX.	0	8	0
No. X.—The Daśakumâracharita of Daṇḍin. Part I. Edited, with Critical and explanatory Notes, by Dr. G. Bühler	0	8	0
No. XI.—The Nîtiśataka and Vairâgyaśataka of Bhartṛihari, with extracts from two Sanskrit commentaries. Edited, with Notes, by Kâshinâth Trimbak Telang, M.A. (copies not available.) ...			
No. XII.—Nâgojibhaṭṭa's Paribhâshendusekhara. Edited and explained by Dr. F. Kielhorn. Part II. (Translation and Notes), Paribhâshâs. LXX.—CXXII. ...	0	8	0
No. XIII.—The Raghuvaṁśa of Kâlidâsa, with the Commentary of Mallinâtha. Edited, with Notes, by S. P. Pandit, M. A., Part III., Cantos XIV.—XIX.	0	8	0
No. XIV.—Vikramâṅkadeva-Charita. Life of king Vikramâditya Tribhuvanamalla of Kalyâṇa, com-			

	Rs.	a.	p.
posed by his Vidyâpati Bilhaṇa. Edited, with an Introduction, by Dr. G. Bühler (copies not available.)			
No. XV.—Mâlatî-Mâdhava: a Drama by Bhavabhûti. Edited, with Critical and Explanatory Notes, by Dr. R. G. Bhandarkar, M. A. (Second Edition in the press.)			
No. XVI.—Vikramorvaśî: a Drama by Kâlidâsa. Edited with Notes, by Shankar P. Pandit, M. A. (Under revision.)			
No. XVII.—Hemachandra's Deśînâmamâlâ. Edited, with Critical Notes, a Glossary and a Historical Introduction, by Professor R. Pischel and Dr. G. Bühler, Part I. Text and Critical Notes by Professor Pischel	1	0	0
No. XVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. I. complete. Parts I. II. and III....	9	0	0
No. XIX.— Ditto ditto by ditto. Vol. I. Part II.	1	0	0
No. XX.— Ditto ditto by ditto. Vol. I. Part III.	1	0	0
No. XXI.— Ditto ditto by ditto. Vol. II. Part I.	1	0	0
No. XXII.— Ditto ditto by ditto. Vol. II. Part II.	1	0	0
No. XXIII.—Vâsishṭhadharmaśâstram. Edited, with Notes, by Dr. A. A. Führer	0	8	0
No. XXIV.—Kâdambarî by Bâṇa and his son. Vol. I. Sanskrit Text, complete. Edited by Dr. P. Peterson (copies not available.)			
Ditto Vol. II. Introduction and Notes, by do. ...	2	0	0
No. XXV.—Kîrti-Kaumudî. Edited, with Notes, by Prof. A. V. Kathavate. (copies not available.)			
No. XXVI.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. II. Part III. ...	1	0	0
No. XXVII.—Mudrârâkshasa, by Viśâkhadatta, with the Commentary of Dhuṇḍhirâja. Edited, with Notes, by K. T. Telang. (copies not available.)			
No. XXVIII.—Vyâkaraṇa-Mahâbhâshya of Patañjali. Edited by Dr. F. Kielhorn. Vol. III. Part I. ...	1	0	0
No. XXIX.—Ditto do. of do. by do. Vol. III. Part II.	1	0	0
No. XXX.—Ditto do. of do. by do. Vol. III. Part III.	1	0	0
No. XXXI.—Subhâshitâvali of Vallabhadeva. Edited by Dr. P. Peterson and Pandit Durgâprasâd ...	2	8	0
No. XXXII.—Tarka-Kaumudî of Laugâkshi Bhâskara. Edited by Professor M. N. Dvivedi (copies not in stock)			
No. XXXIII.—Hitopadeśa of Nârâyaṇa. *Edited by* Dr. P. Peterson.	*0*	*14*	*0*
No. XXXIV.—The Gauḍavaho, by *Vâkpati. Edited* by Shankar P. Pandit.	*3*	*0*	*0*
No. XXXV.—Mahânârâyaṇa Upanishad. Edited by Colonel G. A. Jacob.	0	7	0

	Rs.	a.	p.
No. XXXVI.—University Selections of Hymns from the Rigveda. Edited by Dr. P. Peterson. (2nd Editon).	4	0	0
No. XXXVII.—S'ârangadharapaddhati. Edited by Dr. P. Peterson. Vol. I.	3	0	0
No. XXXVIII.—Naishakarmyasiddhi. Edited by Col. G. A. Jacob	2	0	0
No. XXXIX.—A Concordance to the principal Upanishads and Bhagavadgîtâ, by the same author.	8	0	0
No. XL.—Eleven Atharvaṇa Upanishads, with Dîpîkâs, by the same author	2	8	0
No. XLI.—Handbook to the study of the Rigveda, Part I. by Dr. P. Peterson.	3	0	0
No. XLII.—The Daśakumâracharita of Daṇḍin, Part II. (completing Dr. G. Bühler's Edition). Edited with Critical and Explanatory Notes, by Dr. P. Peterson.	0	8	0
No. XLIII.—Handbook to the study of the Rigveda, Part II. comprising the Seventh Maṇḍala with the Commentary of Sâyana by Dr. P. Peterson. ...	5	0	0
No. XLIV.—Aphorisms of the Sacred Law of the Hindus, an Index of the Sûtras and the various Readings of the Hiraṇyakeshî-Dharmasûtra, Part I. by Dr. G. Bühler.	2	12	0
No. XLV.—Râjataranginî. Part I. containing the first 7 (seven) Tarangas. Edited by Pandit Durgâprasâd.	3	0	0
No. XLVI.—Patanjali's Yogasûtras. Edited with the Scholium of Vyâsa and the Commentary of Vâchaspati, by Mahâmahopâdlhyâya Râjârâm Shâstrî Bodas.	3	4	0
No. XLVII.—Pârâśara Dharma Samhitâ with the Commentary of Sâyana Mâdhavâchârya, Vol. I. Part I. Edited by Pandit Vâman Shâstrî Islâmpurkar ...	4	4	0
No. XLVIII.—Ditto do. of do. by do. Vol. I. Part II.	4	0	0
No. XLIX.—Nyâyakośa, 2nd Edition. Edited by Mahâmahopâdhyâya Bhîmâchârya Zalkîkar	12	0	0
No. L.—Apastamba Dharmasûtra, Part II. Edited by Dr. G. Bühler	2	4	0
No. LI.—Râjataranginî. Vol. II. Tarangas VIII: Edited by Pandit Durgâprasâd.	2	8	0
No. LII.—Mrichchhakatika, Vol. I. Edited with two Commentaries & various readings, by Mr. N. B. Godbole	3	8	0
No. LIII.—Navasâhasânkacharita. Part I. Edited by Pandit Vaman Shâstri Islâmpurkar	3	4	0
No. LIV.—Rajatarangiṇi, Vol. III. Edited by Dr. P. Peterson, M. A.	2	4	0
No. LV.—Tarkasangraha of Annambhaṭṭa. Edited with the author's Dipika and Govardhana's Nyâya-Bodhini and Critical and Expanatory Notes, by the late Rao Bahadur Y. V. Athalye	3	4	0

THE

BHAṬṬI-KÂVYA

OR

RÂVAṆAVADHA

COMPOSED BY

ŚRÎ BHAṬṬI

VOLUME II. CANTOS X.—XXII.

EDITED

WITH THE COMMENTARY OF MALLINÂTHA

AND

WITH CRITICAL AND EXPLANATORY NOTES

BY

KAMALÂŚAṄKARA PRÂṆAŚAṄKARA TRIVEDÎ, B. A.,

VICE-PRINCIPAL, GUJARÂTA TRAINING COLLEGE, FORMERLY PROFESSOR OF SANSKRIT, BHÂVANAGARA COLLEGE AND ACTING PROFESSOR OF ORIENTAL LANGUAGES, ELPHINSTONE AND DECCAN COLLEGES.

FIRST EDITION.

Copies 300.

Registered for copy-right under the Government of India's Act XXV of 1867.

Bombay:

GOVERNMENT CENTRAL BOOK DEPÔT.

1898.

[*All rights reserved.*]

Price 6 Rupees.

Bombay Sanskrit Series No. LVII.

BOMBAY:
PRINTED AT THE TATTVA-VIVECHAKA OIL-ENGINE PRESS.

॥ श्रीः ॥

रावणवधं

नाम

भट्टिकाव्यम्

(आ दशमसर्गात् समाप्तिपर्यन्तं)

महाकविश्रीभट्टिप्रणीतं

मल्लिनाथकृतटीकया समवेतं

त्रिवेद्युपपदधारिणा

प्राणशंकरसूनुना कमलाशंकरेण संशोधितं

स्वनिर्मिताङ्ग्लभाषाटिप्पण्योपेतम् ।

तच्च

मुम्बापुरीस्थराजकीयग्रन्थशालाधिकारिणा

शाके १८२० वत्सरे १८९८ ख्रिस्ताब्दे

प्राकाश्यं नीतम् ।

मूल्यं षट् रूपकाः ।

इदं पुस्तकं
मोहमय्यां तत्त्वविवेचकनाम्नि मुद्रणालये मुद्रितम् ।

CONTENTS.

PAGE.

BHAṬṬI-KÂVYA १–३११

NOTES 1–88

INDEX OF S'LOKAS १–२१

APPENDIX I (Proper Names in the Bhaṭṭi-Kâvya)...... २२–२७

APPENDIX II (Authors and works quoted or referred to by Mallinâtha in his commentary) २८

APPENDIX III (Anonymous quotations by Mallinâtha). २९–३८

APPENDIX IV (The reading of the Pâtaṇa Ms. which proceeds up to the Canto X) ३९

ADDENDA AND CORRIGENDA ४०–४३

ABBREVIATIONS.

Bha. Mal.	Bharatamallikâ.
Dhana.	Dhanañjaya.
Jaya.	Jayamaṅgala.
K. Com.	The Ms. of the Commentary procured from Kudalore.
Kirâ.	Kirâtârjunîya.
Kumâra.	Kumârasambhava.
Malli.	Mallinâtha.
Mudrâ.	Mudrârâkshasa.
Pra.	Pratâparudra.
Raghu.	Raghuvaṁs'a.
Subhâ.	Subhâshitâvali.
Th.	The Ms. of the Commentary in charge of the Theosophical Society of Madras.
Vṛitta.	Vṛittaratnâkara.
अग्नि०	अग्निपुराण.
अने० सं०	अनेकार्थसंग्रह.
अभि० शाकु०	अभिज्ञानशाकुन्तला.
अभिज्ञानशाकु०	अभिज्ञानशाकुन्तल.
अम०	अमरकोष.
अलं० स०	अलंकारसर्वस्व.
उद्भ०	उद्भट.
काद० पूर्वा०	कादम्बरी पूर्वार्द्ध.
काव्य० } काव्य० प्र० }	काव्यप्रकाश.
काव्या०	काव्यादर्श.
काम०	कामन्दक.
काशि०	काशिका.
किरा०	किरातार्जुनीय.
छन्दो०	छन्दोमञ्जरी.
जय०	जयमङ्गल.
दश०	दशरूप.

नीति०	नीतिशतक.
प्राकृ० प्र० प्राकृत० प्र०	प्राकृत प्रकाश.
भर०	भरतमल्लिका.
रघु०	रघुवंश.
विद्या०	विद्यानाथ.
सर०	सरस्वतीकण्ठाभरण.
साहि०	साहित्यदर्पण.
सिद्धा० कौ०	सिद्धान्तकौमुदी.
हेम०	हेमचन्द्र.

॥ श्रीः ॥

भट्टिकाव्यम् ।

॥ मल्लिनाथकृतटीकया समेतम् ॥

अथ दशमः सर्गः ।

अनुप्रासवत् ॥

अथ स[1] वल्कदुकूलकुथा[2]दिभिः
परिगतो ज्वलदु[3]द्धतवालधिः ।
उदपतद्दिवमाकुललोचनै-
र्नृरिपुभिः स[4]भयैरभिवीक्षितः ॥ १ ॥

१. शब्दलक्षणप्रधानेऽप्यस्मिन्काव्ये काव्यलक्षणत्वादधिकारकाण्डानन्तरं काण्डान्तरमलङ्कारमाधुर्यभाविकभाषासमाख्यपरिच्छेदचतुष्टयात्मकमारभमाणोऽस्मिन्सर्गे तावदलंकारपरिच्छेदं वदन्नादौ शब्दालंकारान्[1] लेशतो दर्शयति । अथेत्यादि ॥ **अथ रावणाज्ञानन्तरं दुकूलैः सुवल्कैः शोभनवल्कलैः कुशादिभिः आदिशब्दात् मुञ्जादिभिश्च परिगतो वेष्टितः अत एव ज्वलन्नुद्धत उद्यतो वालधिः पुच्छं यस्य स मारुतिः सभयैः अत एवाकुललोचनैश्चञ्चलाक्षैः नृरिपुभिः राक्षसैः अभिवीक्षितः सन् दिवमाकाशं प्रत्युदपतत् उत्पपात[2] । अनियतसंख्याकवर्णवृत्तिलक्षणो वृत्त्यनुप्रासोऽलंकारः ॥**

---

१ दुकूलसुवल्ककुशादिभिः Com.
२ °कुशादिभिः T_3, T_4, D.
३ ज्वलदुज्वल D.
४ सुभयैः E_3.

---

1 °रानेकतो Th.
2 उत्पतितवान् Th.

युक्पादयमकम् ॥

रणपण्डितोऽग्र्यविबुधारिपुरे
कलहं स राममहितः कृतवान् ।
ज्वलदग्नि रावणगृहं च बलात्
कलहंसराममहितः कृतवान् ॥ २ ॥

२. अथैकविंशतिश्लोक्या यमकान्याह । रणेति ॥ रणे पण्डितो युद्धविशारदः राममहितो रामपूजितः अहितः रक्षसां विरोधी स हनूमान् अग्र्यविबुधारेरिन्द्रारेः पुरे लङ्कायां कलहं युद्धं कृतवान् । अथ कलहंसैः राजहंसैः रामं सुन्दरम् । 'सुन्दरं रुचिरं रामम्' इति विश्वः । रावणगृहं च बलात्कारात् ज्वलन्नग्निर्यस्मिन् तत् कृतवान् । ददाहेत्यर्थः । युक्पादयमकम् ॥

पादान्तयमकम् ॥

निखिलाभवन्नसहसा सहसा
ज्वलनेन पूः प्रभवता भवता ।
वनिताजनेन वियता वियता
त्रिपुरापदं नगमिता गमिता ॥ ३ ॥

३. निखिलेति ॥ सहसा हठात् भवता उत्पद्यमानेन प्रभवता प्रवर्धमानेन ज्वलनेन हेतुना सहसा सहासा न भवतीति नसहसा हर्षक्षयात् हासरहिता । नञर्थस्य नशब्दस्य सुप्सुपेति समासः ॥ "स्वनहसोर्वा" इत्यप्प्रत्ययः ॥ वियता वियन्मार्गेण वियता दाहभयाद्विविधं गच्छता । विपूर्वादिणः शतृप्रत्ययः । वनिताजनेन वनिताभिरुपलक्षिता नगं त्रिकूटाद्रिमिताश्रिता निखिला समस्ता पूर्लङ्का त्रिपुरस्य हरदग्धस्य या आपत् तां तादृगापदमिति निदर्शनालंकारः । गमिता प्रापिता अभवदभूत् । पादान्तयमकम् ॥

---

१ ऽग्र C., E3.

पादादियमकम् ॥

सरसां सरसां परिमुच्य तनुं
पततां पततां ककुभो बहुशः ।
सकलैः सकलैः परितः करुणै-
रुदितै रुदितैरिव खं निचितम् ॥ ४ ॥

४. सरसामिति ॥ सरसां कासाराणां सरसां सार्द्रां तनुं स्वरूपं परिमुच्य विहाय ककुभो दिशः पततां धावतां पततां पक्षिणां गणानां सकलैः समस्तैः सकलैः सांशैः सविच्छेदैरित्यर्थः । 'कला स्यान्मूलवृद्धौ च शिल्पादावंशमात्रके' इति विश्वः । करुणैर्दीनैरुदितैरुत्पन्नैः । उत्पूर्वादिणः कर्त्तरि क्तः । यद्वा उदितैरुक्तैः । वदेः कर्मणि क्तः । यजादित्वात्संप्रसारणम् । रुदितैः रोदनैः क्रन्दनैः खमाकाशं विततं व्याप्तमिव । तैरेव व्याप्तमिवेत्यर्थः । पादादियमकम् ॥

पादमध्ययमकम् ॥

न च काञ्चन काञ्चनसद्मचितिं
न कपिः शिखिना शिखिना समयौत् ।
न च न द्रवता द्रवता परितो
हिमहानकृता न कृता क च न ॥ ५ ॥

५. न चेति ॥ कपिः काञ्चन काञ्चिदपि काञ्चनसद्मचितिं सौवर्णगृहरचनां शिखिना ज्वालावता शिखिना अग्निना न न समयौत् किं तु समयौत् मिश्रितवान् । यु मिश्रणे लङ् ॥ "उतो वृद्धिर्लुकि हलि" इति वृद्धिः ॥ परितः सर्वतो न न द्रवता किं तु द्रवता गच्छता संक्रामता हिमहानकृता द्रवत्वप्रतिपन्नशैत्यनाशकारिणा शिखिना द्रवस्य भावो द्रवता द्रवीभावश्च क च न कचिदपि न न कृता कृतैव । अदग्धमद्रुतं च काञ्चनसद्म नासीदित्यर्थः । पादमध्ययमकम् ॥

---

१ विततम् T2, Com. | २ समयात् T4.

चक्रवालयमकम् ॥

अवसितं हसितं प्रसितं[1] मुदा
विलसितं ह्रसितं[2] स्मरभासितम्[3] ।
न[4] समदाः प्रमदा हतसंमदाः
पुरहितं विहितं[5] न समीहितम् ॥ ६ ॥

६. अवसितमिति ॥ हसितं हासः प्रसितं प्रसक्तं मुदा निमित्तेन विलसितं विजृम्भणं तथा स्मरभासितं मदनजनितं लसितं विकारश्चेति सर्वमवसितमवसन्नम् । स्यतेः कर्त्तरि क्तः ॥ "द्यतिस्यतिमास्थामित्ति किति" इतीत्वम् ॥ तथा प्रमदाः स्त्रियः समदा न किं तु नष्टमदा जाता इत्यर्थः । हतसंमदा नष्टहर्षाश्च समीहितं तत्कालापेक्षितं पुरहितमग्निनिर्वापणादिहितकृत्यं च न विहितम् । चक्रवालयमकम् । 'पदानामवसाने तु सर्वेषां तुल्यवर्णता । प्रतिपादं भवेद्यत्र चक्रवालं तदुच्यते' ॥ इति लक्षणात् ॥

समुद्रयमकम् ॥

समिद्धशरणा दीप्ता देहे लङ्का मतेश्वरा ।
समिद्धशरणादीप्ता देहेलङ्कामतेश्वरा ॥ ७ ॥

७. समिद्धेति ॥ समिद्धशरणा दीप्तगृहा अत एव दीप्ता प्रकाशा मतेश्वरा अभिमतस्वामिका समिध्यन्त इति समिद्धा अग्नयस्तेषां शरणैरग्निहोत्रगृहैरादीप्ता उज्वला देहे देहविषये अलंकामतायां पर्याप्तमनोरथत्वे ईश्वरा संपादनसमर्था संकल्पोपनीताखिलशरीरसुखसाधनेत्यर्थः । ईदृशी लङ्का देहे दग्धा । दह भस्मीकरणे इत्यस्मात्कर्मणि लिट् ॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ ॥ समुद्रयमकम् ॥

---

१ प्रसृतं T₂.
२ लसितं Com.
३ °भासितम् T₂, E₂.
४ न समदा प्रमदा हतसंमदा T₃.
५ रहितं T₄.

काञ्चीयमकम् ॥

पिशिताशिनामनुदिशं[1] स्फुटतां[2]
स्फुटतां[3] जगाम परिविह्वलता ।
ह्वलता जनेन बहुधाचरितं
चरितं महत्त्वरहितं महता ॥ ८ ॥

८. पिशितेति ॥ अनुदिशं प्रतिदिशं दिशि दिशीत्यर्थः ॥ "अव्ययीभावे शरत्प्रभृतिभ्यः" इत्यव्ययीभावसमासान्तष्टच्प्रत्ययः ॥ स्फुटतां प्रभ्रश्य धावतां पिशिताशिनां राक्षसानां परिविह्वलता वैक्लव्यं स्फुटतां स्फुटत्वं जगाम । पलायनेन भीरुत्वं व्यक्तं जातमित्यर्थः । तथा महता ह्वलता चलता जनेन बहुधा आचरितं चरितं महत्त्वरहितं भवेत् । महतोऽपि चापले महदपि चारित्रं हीनं स्यादित्यर्थः । काञ्चीयमकम् ॥

यमकावलिः ॥

न गजा नगजा दयिता दयिता
विगतं विगतं वलितं[4] वलितम्[5] ।
प्रमदाप्रमदा महता महता-
मरणं मरणं समयात्समयात् ॥ ९ ॥

९. नेति ॥ नगजा गिरिसंभवा दयिताः प्रिया गजा न दयिता न रक्षिताः । दयतिरत्र रक्षणार्थः । विगतं पक्षिगतिरपि विगतं विरतम् । वलितं प्राणिचेष्टितं च वलितं विगतम् । प्रमदा स्त्री । जातावेकवचनम् । अप्रमदा अविद्यमानहर्षा जाता । महता प्रवृद्धेन अग्निना महतां शूराणामरणं रणरहितं मरणं दुर्मरणं समयात् कालवशात् समयात् संयातं संप्राप्तम् । संपूर्वाद्यातेर्लङ् । यमकावलिः ॥

१ °नुदिनं T_2, T_3, T_4.
२ स्फुरतां T_2, T_4.
३ स्फुरतां T_2, T_4.
४ ललितं C., N., T_1, c., B., E_2, E_3.
५ ललितम् C., N., T_1, c., B., E_2, E_3.

अयुग्मपादयमकम् ॥

न वानरैः पराक्रान्तां महद्भिर्भीमविक्रमैः।
न वा नरैः पराक्रान्तां ददाह नगरीं कपिः ॥ १० ॥

१०. नेति ॥ महद्भिर्भीमविक्रमैर्वानरैः न परिक्रान्तां तादृशैर्नरैर्मानुषैर्वा न परिक्रान्तामनाक्रान्तां नगरीं लङ्कां कपिर्ददाह। नरवानराक्रमणादर्वाक् स्वयमेक एव ददाहेत्यर्थः। अयुक्पादयमकम् ॥

पादाद्यन्तयमकम् ॥

द्रुतं द्रुतं वह्निसमागतं गतं
महीमहीनद्युतिरोचितं चितम्।
समं समन्तादपगोपुरं पुरं
परैः परैरप्यनिराकृतं कृतम् ॥ ११ ॥

११. द्रुतमिति ॥ चितं हिरण्येष्टकचितमत एव वह्निसमागतमग्निसंयुक्तं सद्द्रुतं शीघ्रं द्रुतं विलीनमत एव महीं गतं मह्यां स्रुतमहीनतयान्यूनतया द्युत्या रोचितं दीपितं परैरुत्कृष्टैः परैः शक्रादिशत्रुभिरप्यनिराकृतं पुरं समन्तात्समं समतलमपगोपुरं गोपुरशून्यं कृतम्। पादाद्यन्तयमकम् ॥

मिथुनयमकम् ॥

नश्यन्ति ददर्श वृन्दानि कपीन्द्रः।
हारीण्यबलानां हारीण्यबलानाम् ॥ १२ ॥

१२. नश्यन्तीति ॥ कपीन्द्रो हारीणि मुक्ताहारीणि मनोहारीण्यबलानामनाथानामबलानां स्त्रीणां नश्यन्ति मिथो विश्लिष्यन्ति वृन्दानि ददर्श। मिथुनयमकम्। यत्र षडक्षरपादं तनुमध्यावृत्तं तत्र मिथुनमिति लक्षणात् ॥

---

१ °विग्रहैः B. | २ यूथानि T2, T3, T4.

वृन्तयमकम् ॥

नारीणामपनुनुदुर्न देहखेदा-
नारीणामलसलिला हिरण्यवाप्यः।
नारीणामनलपरीतपत्रपुष्पान्
नारीणामभवदुपेत्य शर्म वृक्षान् ॥ १३ ॥

१३. नारीणामिति ॥ आरीणान्यास्तुतानि। रिणातेः ल्वादित्वान्निष्ठानत्वम्। तान्यमलानि च सलिलानि यासां ता हिरण्यवाप्यो हिरण्मयदीर्घिका नारीणां स्त्रीणां देहेषु खेदान् संतापान्नापनुनुदुस्तासामपि क्वाथत्वादितिभावः। किं चारीणामरिसंबन्धिनीनाम्। अरिशब्दात् "तस्येदम्" इत्यण्प्रत्यये "यस्येति च" इति लोपे "टिड्ढाणञ्—" इत्यादिना ङीप्। नारीणां स्त्रीणामनलपरीतान्यग्निदग्धानि पत्रपुष्पाणि येषां तान् वृक्षानुपेत्य स्थितानामिति शेषः। अन्यथा भिन्नकर्तृकत्वे क्त्वानुत्थानात्। शर्म सुखं नाभवत्। पत्रदाहे छायाभावादिति भावः। वृन्तयमकम् ॥

पुष्पयमकम् ॥

अथ लुलितपतत्रिमालं रुग्णासनबाणकेशरतमालम्[1]।
स वनं विविक्तमालं सीतां द्रष्टुं जगामालम् ॥ १४ ॥

१४. अथेति ॥ अथ नगरदाहानन्तरं स हनूमानलं सीतां द्रष्टुं लुलितपतत्रिमालं विश्लिष्टपक्षिपङ्क्ति रुग्णा भग्ना असनादयो वृक्षविशेषा यस्मिंस्तद्विविक्तमालमसङ्कीर्णपङ्क्ति वनमशोकवनं जगाम। पुष्पयमकम् ॥

पादादिमध्ययमकम् ॥

घनगिरीन्द्रविलङ्घनशालिना
वनगता वनजद्युतिलोचना।
जनमता ददृशे जनकात्मजा
तरुमृगेण तरुस्थलशायिनी ॥ १५ ॥

---

१ केसर B.

१५. घनेति॥ घनगिरीन्द्राणां महाशैलानां विलङ्घने शालत इति तच्छालिना तरुमृगेण हनूमता वनमशोकवनं गता वनजस्य जलजस्येव द्युतिर्ययोस्ते लोचने यस्याः सा॥ "न क्रोडादिबह्वचः" इति ङीष्प्रतिषेधः॥ जनेषु मता विदिता गुणैः प्रथितेत्यर्थः। भूते क्तः। यद्वा जनमता मतजना इष्टस्वजनेति बहुव्रीहिः। आहिताग्न्यादित्वान्निष्ठायाः परनिपातः। अन्यथा "मतिबुद्धि—" इत्यादिना वर्त्तमाने क्तः। पक्षे "क्तस्य च वर्त्तमाने" इति षष्ठ्यां "क्तेन च पूजायाम्" इति समासप्रतिषेधः स्यात्। तरुस्थलशायिनी वृक्षमूलशायिनी जनकात्मजा सीता ददृशे दृष्टा। पादादिमध्ययमकम्॥

विपथयमकम्॥

कान्ता सहमाना दुःखं च्युतभूषा।
रामस्य वियुक्ता कान्ता सहमाना॥ १६॥

१६. सीतामेव विशिनष्टि कान्तेति॥ कान्ता कमनीया दुःखं वियोगदुःखमसहमानाक्षुभ्यमाणा च्युतभूषा त्यक्तभूषणा वियुक्ता विरहिणी मानेन सह वर्त्तत इति सहमाना मानिनी॥ "वोपसर्जनस्य" इति विकल्पान्न सहस्य सभावः। तनुमध्यावृत्तमुक्तम्। विपथयमकम्॥

मध्यान्तयमकम्॥

मितमवददुदारं तां हनूमान्मुदारं
रघुवृषभसकाशं यामि देवि प्रकाशम्।
तव विदितविषादो दृष्टकृत्स्नामिपादः
श्रियमनिशमवन्तं पर्वतं माल्यवन्तम्॥ १७॥

१७. इदमिति॥ हनूमान् मुदा हर्षेणारं द्रुतं तां सीतामुदारं महार्थमिदं वक्ष्यमाणमवदत्। तदेवाह। हे देवि तव विदितविषादो विदितत्वद्दुःख आमिषं मांसमदन्तीत्यामिषादा राक्षसाः॥ "अदोऽनन्ने"

१ इदमव° Com.

इति विट्प्रत्ययस्यासरूपस्य "वासरूपोऽस्त्रियाम्" इत्यबाधपक्षे कर्मण्यण्प्रत्ययः ॥ इष्टाः कृत्स्ना आमिषादा येन स एवं कृतकृत्योऽहं रघुवृषभसकाशं रामसमीपमनिशं श्रियं शोभामवन्तं पुष्णन्तं माल्यवन्तं नाम पर्वतं प्रकाशं व्यक्तं यथा तथा यामि यास्यामि । सामीप्ये लट् । मध्यान्तयमकम् ॥

गर्भयमकम् ॥

उदपतद्वियदप्रगमः परै-
रुचितमुन्नतिमत्पृथुसत्त्ववत् ।
रुचितमुन्नतिमत्पृथुसत्त्वव-
त्मतिविधाय वपुर्भयदं द्विषाम् ॥ १८ ॥

१८. उदिति ॥ रुचितेष्विष्टजनेषु मोदत इति रुचितमुत् । क्विप् । स हनूमान् नतिमत् सीतापादयोः प्रणतिमत् पृथु विशालं[1] सत्त्ववत्सत्त्वसम्पन्नं द्विषां भयदं वपुः प्रतिविधाय कृत्वात एव न प्रगम्यत इत्यप्रगमो दुरासदः सन् ॥ "ग्रहवृदृनिश्चिगमश्च" इति कर्मण्यप्प्रत्ययः ॥ परैरुत्कृष्टैः सिद्धचारणादिभी रुचितं दीप्तमुन्नतिमदुच्छ्रायवत्पृथु महत् सत्त्ववत् खेचरानेकप्राणिमदीदृशं वियदाकाशं प्रत्युदपतदुत्पपात । गर्भयमकम् ॥

सर्वयमकम् ॥

बभौ मरुत्वान्विकृतः समुद्रो
बभौ मरुत्वान्विकृतः समुद्रः ।
बभौ मरुत्वान्विकृतः समुद्रो
बभौ मरुत्वान्विकृतः समुद्रः ॥ १९ ॥

१९. बभाविति ॥ विविधं कृतं करणं वनभङ्गनगरदाहादिकं यस्य स विकृतो विक्रान्त इत्यर्थः । मुद्रयाभिज्ञानरत्नेन सह वर्त्तत इति समुद्रो मरुद्वायुरस्यास्ति जनकत्वेनेति मरुत्वान् मारुतिः ॥ "झयः" इति मतुपो मकारस्य वत्वम् ॥ बभौ बभासे । इति प्रथमपादार्थः ।

---

१ °प्रगतः C.

---

1 विपुलं Th.

अथ विकृतो विप्रकृतो रावणेन परिभूतो मरुतो देवा अस्य सन्तीति मरुत्वानिन्द्रः। 'इन्द्रो मरुत्वान्' इत्यमरः। मुदं रातीति मुद्रो हर्षप्रदो हनूमान्॥ "आतोऽनुपसर्गे कः"॥ तेन सह वर्त्तत इति समुद्रः सन् बभौ। चिराद्रावणावमानार्थकमित्रलाभादिन्द्रोऽप्यमन्दमानन्देत्यर्थः[1]। एष द्वितीयपादार्थः। अथ समुद्रोऽब्धिर्मरुत्वान्वायुमान् हनूमल्लङ्घनवेगवात इत्यर्थः[2]। अत एव विकृतः क्षुभित उद्वेलः सन् बभौ। सोऽपि तेन हृष्ट इत्यर्थः। इति तृतीयपादार्थः। अथारम्भकत्वेन प्रेरकत्वेन वा मरुदस्यास्तीति मरुत्वान्मेघो विकृतः कपिवेगवाताहत्या क्षुभितो विस्तृतः समुद्रः समुद्रकल्पो बभौ। इति चतुर्थपादार्थः। सर्वयमकम्॥

महायमकम्॥

अभियाता[१] वरं तुङ्गं भूभृतं रुचिरं पुरः।
कर्कशं प्रथितं धाम ससत्त्वं पुष्करे क्षणम्॥ २०॥
अभियाता[२] वरं तुङ्गं भूभृतं रुचिरं पुरः।
कर्कशं प्रथितं धाम ससत्त्वं पुष्करेक्षणम्॥ २०॥

२०. अभियात इति॥ वरं श्रेष्ठं तुङ्गं शृङ्गोन्नतं रुचिं रातीति रुचिरं प्रीतिदम्॥ "आतोऽनुपसर्गे कः"॥ कर्कशं सानुमत्त्वात्कठिनं प्रथितं विस्तृतं धाम सिद्धविद्याधरादीनां विहारस्थानं ससत्त्वमनेकप्राणियुक्तं भूभृतं महेन्द्राद्रिं यत्राङ्गदादयः प्रतीक्षमाणाः स्थिता इति भावः। पुरो लङ्कापुरात् पुष्करे व्योम्नि क्षणमभियात आकाशमार्गे क्षणादायात इत्यर्थः॥

अन्यच्च वरमभीष्टं सर्वलोकप्रियं तुङ्गं गुणोन्नतं रुचिरं सुन्दरं पुरः पुरोभागे वक्षसि कर्कशं भाग्यलक्षणत्वादिति भावः प्रथितं प्रख्यातं धाम सर्वाश्रयं तेजोमयं वा ससत्त्वं सत्त्वसंपन्नं सात्त्विकं वा पुष्करेक्षणं पुण्डरीकाक्षं भूभृतं राजानं राममभि रामं प्रति यातः। पादार्धावृत्तिवच्छ्लोकावृत्त्या यमकं महायमकमुच्यते॥

---

१ अभियातो Com.　　२ अभियातो Com.

---

1 °द्रावणमानमर्दकमित्र° Th.　　2 °मानन्दं भेजे इत्यर्थः Th.

आद्यन्तयमकम् ॥

चित्रं चित्रमिवायातो विचित्रं तस्य भूभृतम् ।
हरयो वेगमासाद्य सन्त्रस्ता मुमुहुर्मुहुः ॥ २१ ॥

२१. चित्रमिति ॥ चित्रमद्भुतं विचित्रं गैरिकादिनानावर्णमत एव चित्रमिवालेख्यमिव स्थितम् । 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः । भूभृतं पर्वतं प्रत्यायात आगच्छतः । यावेर्लटः शतरि ङस् । तस्य हनूमतो वेगमासाद्य प्राप्य हरयः कपयः सन्त्रस्ता मुहुः पुनः पुनर्मुमुहुर्मोहं गताः । श्लोकाद्यन्तयमकम् । इति यमकाधिकारः शब्दालंकारभेदः ॥

गच्छन्स वारीण्यकिरत्पयोधेः
कूलस्थितांस्तानि तरूनधुन्वन् ।
पुष्पास्तरांस्तेऽङ्गसुखानतन्वन्
तान्किन्नरा मन्मथिनोऽध्यतिष्ठन् ॥ २२ ॥

२२. अथार्थालंकाराः । गच्छन्निति ॥ स हनूमान् गच्छन् वेगेन पतन् पयोधेर्वारीण्यकिरद्विक्षिप्तवान् तानि विक्षिप्तवारीणि कूले स्थितांस्तरूनधुन्वनकम्पयन् । धूता वृक्षा अङ्गानां सुखयन्तीति सुखान् सुखकरान् । पचाद्यच् । पुष्पास्तरान् कुसुमतल्पान्यतन्वन् । तान्पुष्पास्तरान् मन्मथिनः कामिनः किन्नरा अध्यतिष्ठन्नधिष्ठितवन्तः । अत्र वारिविक्षेपादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति क्रमेण कारणत्वात् कारणमालाख्योऽलंकारः । तथा च सूत्रम् । पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमालेति ॥

स गिरिं तरुषण्डमण्डितं
समवाप्य त्वरया लतामृगः ।
स्मितदर्शितकार्यनिश्चयः
कपिसैन्यैर्मुदितैरमण्डयत् ॥ २३ ॥

१ खण्ड B., N.

२३. स इति॥ स लतामृगो हनूमांस्तरुषण्डमण्डितं गिरिं महेन्द्रं त्वरया समवाप्य स्मितेन हासेन दर्शितकार्यनिश्चयः सूचितकार्यसिद्धिः सन् अत एव मुदितैर्हृष्टैः कपिसैन्यैरमण्डयदात्मानमलंचकार सद्यस्तैः परिवेष्टितोऽभूदित्यर्थः। तत्तस्य मण्डनमिति भावः। अत्र स्मितदर्शितेत्यादिपदार्थस्य विशेषणगत्या चतुर्थपादार्थे हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम्। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति लक्षणात्॥

गरुडानिलतिग्मरश्मयः
पततां यद्यपि सम्मता जवे।
अचिरेण कृतार्थमागतं
तममन्यन्त तथाप्यतीव ते॥ २४॥

२४. गरुडेति॥ पततां गच्छतां मध्ये जवे वेगविषये गरुडानिलतिग्मरश्मयस्तार्क्ष्यवायुसूर्याः संमता यद्यपि प्रसिद्धा एवेत्यर्थः। 'यद्यपीत्यवधारणे' इति केशवः। तथापि ते वानरा अचिरेणाविलम्बेन कृतार्थं कृतकार्यं सन्तमागच्छन्तं हनूमन्तमतीवामन्यन्त तेभ्योऽप्यधिकजवं मेनिर इत्यर्थः। तदधिकजवत्वेऽचिरेण कृतार्थमागतमिति विशेषणेन हेतूक्तेः पूर्ववत्पदार्थहेतुकं काव्यलिङ्गमलंकारः। तन्मूला च तदधिकजवासंबन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिरित्यलंकाराङ्गाङ्गिभावेन सङ्करः। अत्र गच्छन्नित्यादिश्लोकत्रये क्रमादाद्यन्तमध्यावसानेषु क्रियापदप्रयोगादाद्यन्तमध्यदीपकानीत्युक्तं जयमङ्गलाकारेण तत्परममङ्गलं लक्षणापरिज्ञानात्। अत्र 'प्रस्तुताप्रस्तुतानां च सामस्त्यं तुल्यधर्मतः। औपम्यं गम्यते यत्र दीपकं तन्निगद्यते' इति लक्षणगन्धस्याप्यसंभवादित्यलं वृथालापैः॥

व्रणकन्दरलीनशस्त्रसर्पः
पृथुवक्षःस्थलकर्कशोरुभित्तिः।
च्युतशोणितबद्धधातुरागः
शुशुभे वानरभूधरस्तदासौ[1]॥ २५॥

---

१ °स्तदानीम् E2.

२५. व्रणेति ॥ व्रणाः प्रहारमार्गाः तेषु एव कन्दरेषु दरीषु लीनाः शस्त्राणि बाणा एव सर्पा यस्य सः । पृथुवक्षःस्थलमेव कर्कशोरुश्च भित्तिस्तटं यस्य सः । च्युतं स्रुतं शोणितमेव बद्धो घनीभूतो धातुरागो यस्य सः । असौ वानर एव भूधरोऽद्रिस्तदा शुशुभे । सावयवरूपकम् ॥

चलपिङ्ग[1]केसर[2]हिरण्यलताः
स्फुटनेत्रपङ्क्ति[3]मणिसंहतयः ।
कलधौतसानव इवाथ गिरेः[4]
कपयो बभुः पवनजागमने ॥ २६ ॥

२६. चलेति ॥ अथ पवनजागमने हनूमत्समागमे सति चलाः पिङ्गाः पिशङ्गाः केसराः सटा एव हिरण्यलता येषां ते स्फुटानि विकसितानि नेत्राण्येव चारवो मणिसंहतयो येषां ते । कपयोऽङ्गदादयो गिरेर्हनूमानेव गिरिस्तस्यैव कलधौतसानवः कनकप्रस्था इव बभुरित्युत्प्रेक्षा ॥

कपितोयनिधीन्प्लवङ्गमेन्दु-
र्मदयित्वा मधुरेण दर्शनेन ।
वचनामृतदीधितीर्वितन्व-
न्नकृतानन्दपरीतनेत्रवारीन् ॥ २७ ॥

२७. कपीति ॥ प्लवङ्गमो हनूमानेवेन्दुः कपीनङ्गदादीनेव तोयनिधीन् समुद्रान् मधुरेण मनोहरेण दर्शनेन दर्शनदानेन मदयित्वा हर्षयित्वा वचनान्येवामृतदीधितीरमृतकिरणान् वितन्वन् विस्तारयन्नानन्देन परीतानि प्रवृद्धानि नेत्रवारीणि येषां तानुद्भूतानन्दबाष्पान् क्षुभितजलांश्चाकृत कृतवान् । अत्र वारिद्वयस्याभेदाध्यवसायादतिशयोक्तिः । सा च रूपकोपेतेति सङ्करः ॥

---

१ पिङ्गल N., C., c., B., E2, T2, T4.
२ केशर E3, T3, Com.
३ चारु T2, T3, T4, Com.
४ इवेन्द्रगिरेः D. इवाधिगिरेः T3.

परिखेदितविन्ध्यवीरुधः
परिपीतामलनिर्झराम्भसः ।
दुधुवुर्मधुकाननं ततः
कपिनागा मुदिताङ्गदाज्ञया ॥ २८ ॥

२८. परीति ॥ ततो हनूमत्समागमनानन्तरं कपयो नागा इव कपिनागाः कपिश्रेष्ठाः । उपमितसमासः । अत एवोपमालंकारः । परिखादितहृद्यवीरुधः परिपीतामलनिर्झराम्भसो विन्ध्याचले जलविहारफलभक्षणापनुन्नश्रमाः सन्त इत्यर्थः । मुदितस्य हृष्टस्याङ्गदस्याज्ञया मधुकाननं मधुवनाख्यं सुग्रीवोद्यानं दुधुवुरिच्छाविहारेणोपदुद्रुवुरित्यर्थः ॥

विटपिमृगविषादध्वान्तनुद्वानरार्कः
प्रियवचनमयूखैर्बोधितार्थारविन्दः ।
उदयगिरिमिवाद्रिं संप्रमुच्याभ्यगात्खं
नृपहृदयगुहास्थं घ्नन् प्रमोहान्धकारम् ॥ २९ ॥

२९. विटपेति ॥ विटपमृगाणां कपीनां विषादो वैदेह्यदर्शनप्रयुक्तस्तमेव ध्वान्तं नुदतीति तन्नुत् । क्विप् । प्रियवचनैः प्रियसंदेशैरेव मयूखैर्बोधितं ज्ञापितं विकासितं चार्थः कार्यसिद्धिरेवारविन्दं येन स वानरो हनूमानेवार्कोऽद्रिं महेन्द्राद्रिमुदयगिरिमिव संप्रमुच्य नृपस्य रामस्य हृदयमेव गुहा तत्र तिष्ठतीति तत्स्थम् ॥ "सुपि स्थः" इति कः ॥ प्रमोहः शोकमूर्च्छा तमेवान्धकारं घ्नन् हनिष्यन् । सामीप्ये लट् । खमाकाशमभ्यगादुत्पपातेत्यर्थः । उपमागर्भितरूपकम् ॥

रघुतनयमगात्तपोवनस्थं
विधृतजटाजिनवल्कलं हनूमान् ।
परमिव पुरुषं नरेण युक्तं
समशमवेशसमाधिनानुजेन ॥ ३० ॥

---

१ परिखादितहृद्यवीरुधः Com.
२ विटप T_4, E_3, Com.
३ वेष D., Com.

---

1 °णापनुन्नक्लमाः Th.

३०. रधिवति ॥ हनूमांस्तपोवनस्थमन्यत्र बदरीवनस्थं विधूतानि जटाजिनवल्कलानि येन तं समाः शमवेषसमाधयो यस्य तेनानुजेन लक्ष्मणेन युक्तं रघुतनयं रामं नरेण युक्तं रघुतनयं परमपुरुषं नारायणमिवागात् प्रापत् । अत्रोपमानोपमेयसमानधर्मसादृश्यप्रतिपादकशब्दरूपचतुरङ्गयोगात्पूर्णोपमा तत्रापि साक्षात्सादृश्यप्रतिपादकेवशब्दयोगाच्छ्रौती ॥

करपुटनिहितं दधत् स रत्नं[1]
परिविरलाङ्गुलिनिर्गताल्पदीप्ति[2][3] ।
तनुकपिलघनस्थितं यथेन्दुं
नृपमनमत्परिभुग्नजानुमूर्धा ॥ ३१ ॥

३१. करेति ॥ करपुटे निहितं परितो विरलाभ्योऽङ्गुलिभ्यो निर्गता अल्पदीप्तयो यस्य तद्रत्नमभिज्ञानरत्नं दधत् स हनूमान् परिभुग्नमवनतं जानुनी च मूर्धा च जानुमूर्धं यस्य स सन् । तनावल्पे कपिले पिङ्गले घने मेघे स्थितमिन्दुं यथेन्दुमिव स्थितं हनूमत्सन्निधानादिति भावः । नृपं राममनमत्प्रणतः । अत्रापि पूर्ववत्पूर्णोपमा यथाशब्दप्रयोगाच्छ्रौती ॥

रुचिरोन्नतरत्नगौरवः
परिपूर्णामृतरश्मिमण्डलः ।
समदृश्यत जीविताशया
सह रामेण वधूशिरोमणिः ॥ ३२ ॥

३२. रुचिरेति ॥ उन्नतं महद्रत्नेभ्यो गौरवमुत्कर्षो यस्य स रुचिर उज्वलः स चासावुन्नतरत्नगौरवश्चेति वैवक्षिको विशेषणसमासः । आशापक्षे रुचिरा प्रीतिदोन्नतं रत्नेष्विव गौरवमादरो यस्यास्तयेति लिङ्गविभक्तिविपरिणामः । परिपूर्णामृतरश्मेः पूर्णेन्दोरिव मण्डलं यस्य सः । अन्यत्र परिपूर्णममृतममरणमेव रश्मिमण्डलं सारो यस्यास्त-

१ सुरत्नं T2, T3, T4.
२ परिसरला° T2, T4.
३ दीप्तम् T2, T3.
४ वन T2.

येति पूर्ववद्विपरिणामः। एवंविधो वधूशिरोमणी रामेण कर्त्रा जीविताशयेतः परं जीविष्यामीति मनीषया सह समदृश्यत संदृष्टस्तद्वत्संदृष्ट इत्यौपम्यगम्यतायां सहोक्तिभेदोऽलंकारः। 'सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः। कल्पितौपम्यपर्यन्ता सा सहोक्तिरिहेष्यते' इति लक्षणात्॥ अत्र कर्मसाहित्यम्। आशाशिरोमणिसंदर्शनयोः समीक्षाचाक्षुषज्ञानलक्षणयोर्भेदेऽभेदाध्यवसायादतिशयोक्तिर्मूलम्। अनयोरुभयोरपि प्रकृतत्वाद्वस्तुनः समप्राधान्येऽप्याशायाः सहार्थेनान्वयात् प्रस्तरप्रहरणे शाखाया इव शाब्दमप्राधान्यम्। एतच्च षष्ठीचतुर्थीशाबरे सुव्यक्तं प्रस्तरे शाखाश्रयवदित्यत्रेति संक्षेपः॥

अवसन्नरुचिं वनागतं[1]
तमनामृष्टरजोविधूसरम्[2]।
समपश्यदपेतमैथिलिं
दधतं गौरवमात्रमात्मवत्॥ ३३॥

३३. अवसन्नेति॥ अवसन्नरुचिमेकत्र संस्काराभावादन्यत्र विरहदुःखाच्च क्षीणकान्तिमेकत्र वनादशोकवनादागतमन्यत्र वनमागतं प्राप्तम्। अनामृष्टेनानुपनुन्नेन रजसा विधूसरं मलिनम्। अपेता मैथिली यस्मात्तमपेतमैथिलिम्। समासान्तविधेरनित्यत्वात् "नद्यृतश्च" इति कप्रत्ययाभावः॥ "गोस्त्रियोरुपसर्जनस्य" इति ह्रस्वत्वम्॥ गौरवमात्रं गुरुत्वमात्रं बहुमानमात्रं च दधतं मणिमात्मवदात्मना तुल्यम्॥ "तेन तुल्यं—" इति तुल्यार्थे वतिप्रत्ययः। अत एव धर्मिव्यवधानेन सादृश्यप्रतीतेरार्थी तद्धितगा पूर्णोपमा॥

सामर्थ्यसंपादितवाञ्छितार्थ-
श्चिन्तामणिः स्यान्न कथं हनूमान्।
सलक्ष्मणो भूमिपतिस्तदानीं
शाखामृगानीकपतिश्च[3] मेने॥ ३४॥

---

१ समागतं T2, T3.
२ °जराविधूसरम् T2, T4. °रजोऽतिधूसरम् E3.
३ शाखामृगाणामधिपश्च D.

३४. सामर्थ्येति॥सामर्थ्येन स्वशक्त्या संपादितवाञ्छितार्थः संपादितमनोरथो हनूमान् कथं चिन्तामणिर्न स्यादिति सलक्ष्मणो भूमिपती रामस्तदानीं मणिदर्शनकाले मेने। शाखामृगानीकपतिः कपिसेनापतिः सुग्रीवश्च तथा मेने। चिन्तितार्थदानाच्चिन्तामणिरेवायामित्युत्प्रेक्षा॥

युष्मानचेतन् क्षयवायुकल्पान्
सीतास्फुलिङ्गं परिगृह्य जाल्मः।
लङ्कावनं सिंहसमोऽधिशेते
मर्तुं द्विषन्निसवदद्धनूमान्॥ ३५॥

३५. युष्मानिति॥ सिंहसमोऽत एव जाल्मोऽसमीक्ष्यकारी श्वापदचेष्टित इत्यर्थः। द्विषन्नमित्रो रावणः। "द्विषोऽमित्रे" इति शतृप्रत्ययः। युष्मानीषदसमाप्तः क्षयवायुः प्रलयमारुतस्तत्कल्पांस्तद्वदग्निसंधुक्षकानचेतनजानन्। चितेर्भौवादिकाल्लङः शत्रादेशः। सीता स्फुलिङ्गोऽग्निकण इव तं परिगृह्यादाय लङ्कां वनमिवेत्युभयत्रोपमितसमासः स्पष्टोपमान्तरसाहचर्यात्। अत एवात्रानुक्तेवाख्यौ लुप्तोपमाभेदौ। तद्वनं मर्तुमधिशेते। स्वावासवने स्फुलिङ्गक्षेप्ता सिंह इव त्वयैव वायुना संधुक्षिताग्निना तेनैव सह भक्ष्यत इत्यर्थः। इति हनूमानवदत्। अत्र कल्पबादीनां समसदृशादिशब्दानां "तेन तुल्यम्—" इति वतेश्च धर्मिद्वारा सादृश्यप्रतिपादकत्वादार्थ्येवोपमा। "तत्र तस्येव" इवेतीवार्थे वतेरिववायथादिशब्दानां च साक्षात्सादृश्यबोधकत्वात्तत्प्रयोगे श्रौतीति विवेकः॥

अहृत धनेश्वरस्य युधि यः समेतमायो धनं
तमहमितो विलोक्य विबुधैः[२] कृतोत्तमायोधनम्।
विभवमदेन निह्नुतह्रियातिमात्रसंपन्नकं
व्यथयति[३] सत्पथादधिगताथवेह[४] सम्पन्नकम्॥ ३६॥

३६. अहृतेति॥ समेताः संगता माया यं स समेतमायो मायावी यो रावणो युधि युद्धे धनेश्वरस्य कुबेरस्य धनमहृत हृतवान्। हरतेः

१ जातम् T₄.
२ विबुधकृतोत्तमा° D.
३ वलयति E₈.
४ °दतिगताथवेह Com.

कर्त्तरि लुङि तङि "ह्रस्वादङ्गात्" इति सिच्सलोपः । विबुधैर्देवैः सह । 'वृद्धो यूना' इति वत् सहार्थाप्रयोगेऽपि सहार्थे तृतीया । कृतमुत्तमायोधनं महायुद्धं येन तं किं च निह्नुतह्रिया त्याजितलज्जेन विभवमदेन संपद्गर्वेणातिमात्रं भृशं संपन्नमेव संपन्नकं युक्तम् । स्वार्थे कः । संपन्मदात्त्यक्तलज्जामित्यर्थः । तं रावणं विलोक्याहमितः प्राप्तः । इणः कर्त्तरि क्तः । अथवा तथाहीत्यर्थः । इह लोकेऽतिगतातिप्रवृद्धा संपद्विभूतिः कं सत्पथात्सन्मार्गान्न व्यथयति न चलयति । व्यथ भयचलनयोः । संपन्मदान्निर्लज्ज उत्पथप्रवृत्तः सर्वथायमुच्छेत्तव्य इत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । 'कार्यकारणसामान्यविशेषाणां परस्परम् । समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः' ॥ इति लक्षणात् । तस्य यमकेन शब्दालंकारेण संसृष्टिः ॥

ऋद्धिमान्[1]राक्षसो मूढश्चित्रं नासौ यदुद्धतः ।
को वा[2] हेतुरनार्याणां धर्म्ये वर्त्मनि वर्त्तितुम् ॥ ३७ ॥

३७. ऋद्धिमानिति ॥ ऋद्धिमान् संपन्मत्तो राक्षसो जात्या क्रूरो मूढोऽविवेक्यसावीदृग्रावण उद्धतो दुर्विनीत इति यत्तन्न चित्रम् । तथाह्यनार्याणामसाधूनां धर्म्ये धर्मादनपेते वर्त्मनि वर्त्तितुं को वा हेतुर्न कोऽपीत्यर्थः । प्रत्युतार्यादिविपरीतहेतुसद्भावादौद्धत्यमेव युक्तमिति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । ऋद्ध्यादिपदार्थानां विशेषणगत्यौद्धत्यहेतुत्वात् पदार्थहेतुकं काव्यलिङ्गं चेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥

तस्याधिवासे तनुरुत्सुकासौ
दृष्टा मया रामपतिः प्रमन्युः ।
कार्यस्य सारोऽयमुदीरितो वः
प्रोक्तेन शेषेण किमुद्धतेन ॥ ३८ ॥

३८. तस्येति ॥ तस्य रावणस्याधिवासे लङ्कायां तनुः कृशोत्सुका त्वयि सोत्कण्ठा राम एव पतिर्यस्याः सा रामपतिः पतिव्रतेत्यर्थः ॥

---

१ वृद्धिमाना° T₈. | २ कोऽपहेतु° T₂.

"विभाषा सपूर्वस्य" इत्यत्र पत्युः सपूर्वात् उपसर्जनसमास उपसंख्यानमिति विकल्पात्पक्षे ङीब्नकारयोरभावः । प्रमन्युः प्रवृद्धशोकासौ सीता मया दृष्टा । अयं कार्यस्य सारो सारांशो वो युष्मभ्यमुदीरित उक्तः । शेषेणावशिष्टेनोद्धतेन वनभङ्गाद्युद्धतकृत्येन प्रोक्तेन सता किं न किञ्चित् । अतो नोच्यत इत्यर्थः । अत्रांशोक्तौ वक्ष्यमाणांशान्तरोक्तिनिषेधरूप आक्षेपालंकारः । 'विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत् । निषेधाभासकथनमाक्षेपः स उदाहृतः' ॥ इति सामान्यलक्षणात् ॥

समतां शशिलेखयोपयाया-[1]
दवदाता प्रतनुः क्षयेण सीता ।
यदि नाम कलङ्क इन्दुलेखा-[2]
मतिवृत्तो लघयेन्न चापि भावी[3] ॥ ३९ ॥

३९. समतामिति ॥ अवदाता शुद्धा क्षिणोतीति क्षयः शोकोऽन्यत्र राजयक्ष्मा तेन प्रतनुरतिकृशा सीता शशिरेखया समतां सादृश्यं यायाद्गच्छेद्यदि नाम कलङ्कोऽतिवृत्तोऽपक्रान्तः सन्निन्दुरेखां लघयेत् स्वापगमेन लघूकुर्यात् तथा न भावी न पुनरावर्त्ती चेत्यर्थः । अत्रोपमानादिन्दुरेखायाः पुनः कलङ्कदोषिण्या उपमेयस्य मुखस्यावदातत्वादिना साम्येऽपि नित्यनिष्कलङ्कत्वेनाधिक्योक्तेर्व्यतिरेकालंकारः । 'भेदप्रधानसामान्यमुपमानोपमेययोः । आधिक्याल्पत्वकथनाद् व्यतिरेकः स उच्यते' ॥ इति लक्षणात् ॥

अपरीक्षितकारिणा[4] गृहीतां
त्वमनासेवितवृद्धपण्डितेन[5] ।
अविरोधितनिष्ठुरेण[6] साध्वीं
दयितां त्रातुमलं घटस्व राजन्[7] ॥ ४० ॥

१ शशिरेखयो° Com.
२ इन्दुरेखा° Com.
३ लघयेत्तथा न भावी T_2, T_3, Com.
४ अनिरूपित T_2, T_4. अनिरीक्षित T_3.
५ मनसासेवित° T_2.
६ अविबाधित° C., T_1, T_4. अविचारित° E_3.
७ °मरेर्यतस्व राजन् D. °मलं यतस्व राजन् T_2, T_3, Com.

४०. अपरीक्षितेति ॥ अपरीक्षितमनालोचितं तत्कारिणाविमृश्यकारिणेत्यर्थः । अनासेवितवृद्धोऽनुपासितज्ञानवृद्धः स चासौ पण्डितश्च तेन पण्डितंमन्येनेत्यर्थः । अविरोधितोऽनपकृतः सन्नेव निष्ठुरो हिंस्रस्तेनाकारणद्वेषिणेत्यर्थः । अमुना रावणेन हृतामपहृतां साध्वीं पतिव्रतां दयितां प्रेयसीं त्रातुं हे राजन् अलं भृशं यतस्व । अत्र रावणविशेषणैः सीताविशेषणैश्च सीतात्राणस्यावश्यकत्वसमर्थनात्पदार्थहेतुकं काव्यलिङ्गमलंकारः ॥

स च विह्वलसत्त्वसङ्कुलः
परिशुष्यन्नभवन्महाह्रदः ।
परितः परितापमूर्च्छितः
पतितं चाम्बु निरभ्रमीप्सितम् ॥ ४१ ॥

४१. सेति ॥ स राम एव महाह्रद इति व्यस्तरूपकम् । विह्वलेन क्षुभितेन सत्त्वेनान्तःकरणेनान्यत्र सत्त्वैर्जलजन्तुभिश्च संकुलः संकीर्णः परिशुष्यन् परिशुष्यन्मुखोऽन्यत्र शुष्यज्जलः परितः सर्वतः परितापमूर्च्छितश्चाभवत् । अथेप्सितं तत्कालाकाङ्क्षितं निरभ्रमम्बु च पतितम् । अत्र प्रियोदन्तस्यानभ्रवृष्टित्वेनाध्यवसायाद्भेदेऽभेदलक्षणातिशयोक्तिः सा पूर्वोक्तरूपकसापेक्षेति संकरः । विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसायः ॥

अथ लक्ष्मणतुल्यरूपवेशं[1]
गमनादेशविनिर्गताग्रहस्तम् ।
कपयोऽनुययुः समेत्य रामं
नतसुग्रीवंगृहीतसादराज्ञम् ॥ ४२ ॥

४२. अथेति ॥ अथ हनूमद्वाक्यश्रवणानन्तरं कपयो लक्ष्मणेन तुल्यौ रूपवेषावाकारनेपथ्ये यस्य तं गमनादेशे प्रस्थापनाज्ञापने विनिर्गतः

१ रूपतुल्य C., T1, T4, °वेषा T3.
२ °वेषं E2, Com.

प्रसृतोऽग्रहस्तो यस्य तं सुग्रीवेण गृहीता स्वीकृता सादरादरपूर्विकाज्ञार्थिस्य तं रामं समेत्य संभूयानुययुः। अत्र प्रास्थानिकरूपवेषभाषाक्रियावर्णनात्स्वभावोक्तिरलंकारः। 'स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनम्' इति लक्षणात्॥

कपिपृष्ठगतौ ततो नरेन्द्रौ
कपयश्च ज्वलिताग्निपिङ्गलाङ्गाः।
मुमुचुः प्रययुर्द्रुतं समीयु-
र्वसुधां व्योम महीधरं महेन्द्रम्॥ ४३॥

४३. कपीति॥ ततः कपिचलनानन्तरं कप्योर्वायुवालिनन्दनयोः पृष्ठगतौ पृष्ठारूढौ नरेन्द्रौ रामलक्ष्मणौ ज्वलिताग्निपिङ्गलाङ्गाः कपयस्ततो वसुधां मुमुचुर्व्योम प्रययुर्व्योम्नि प्रयाता इत्यर्थः। महेन्द्रं महीधरं महेन्द्राद्रिं समीयुः संजग्मुः। अत्रोद्देशिनामनुद्देशिनां च मोचनादीनां वसुधादीनां च यथासंख्यसंबन्धाद्यथासंख्यालंकारः। 'उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम्। अनुद्देशो भवेद्यत्र तद्यथासंख्यमुच्यते'॥ इति लक्षणात्॥

स्थितमिव परिरक्षितुं समन्ता-
दुदधिजलौघपरिप्लुताद्धरित्रीम्।
गगनतलवसुन्धरान्तराले
जलनिधिवेगसहं प्रसार्य देहम्॥ ४४॥

४४. अथ षड्भिर्महेन्द्राद्रिं वर्णयति। स्थितमित्यादिभिः॥ उदधिजलौघैः समन्तात्परिप्लुतां परिभूतां धरित्रीं परिरक्षितुमिवेति फलोत्प्रेक्षा। गगनतलवसुन्धरान्तराले द्यावापृथिव्योरन्तराले जलनिधेर्वेगं सहत इति

१ °पिङ्गलाभाः E_3, B.
°पिङ्गलाक्षाः N., C., T_1, E_2, c.
(c also notices °पिङ्गलाङ्गाः)
ज्वलदग्निपिङ्गलाङ्गाः D.

२ परिप्लुतां ध° E_3, B., Com.
परिप्लुताद्ध° T_3, T_4.
३ गगण c.

तत्सहं तत्क्षमम् । मूलविभुजादित्वात्कः । देहं प्रसार्य स्थितमन्यथा दुर्धरवेगो वारिधिर्वसुन्धरामाक्रमेदिति भावः ॥

विषधरनिलये[1] निविष्टमूलं
शिखरशतैः परिमृष्टदेवलोकम् ।
घनविपुल[2]नितम्बपूरिताशं
फलकुसुमाचितवृक्ष[3]रम्यकुञ्ज[4]म् ॥ ४५ ॥

४५. विषधरेति ॥ पुनः विषधरनिलये पाताले निविष्टमूलं प्रविष्टतलं शिखरशतैः परिमृष्टदेवलोकमुल्लिखितसुरालयं घनैर्निबिडैर्विपुलैश्च नितम्बैर्मध्यभागैः पूरिताशं व्याप्तदिक्कं फलैः कुसुमैश्चाचितैरावृतैर्वृक्षै रम्यकुञ्जम् । अत्र मूलादीनां पातालाद्यसंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः ॥

मधुकरविरुतैः प्रियाध्वनीनां
सरसिरुहैर्दयितास्यहास्य[5]लक्ष्म्याः ।
स्फुटमनुहरमाणमादधानं
पुरुषपतेः सहसा परं[6] प्रमोदम् ॥ ४६ ॥

४६. मधुकरेति ॥ पुनः मधुकरविरुतैः प्रियाया ध्वनीनामालापानामनुहरमाणं[1]ताननुकुर्वन्तमित्यर्थः । सम्बन्धसामान्ये षष्ठी । तथा सरसीरुहैः पद्मैर्दयितास्यस्य प्रियामुखस्य हास्यलक्ष्म्याः स्मितशोभाया अनुहरमाणमत[2] एव पुरुषपतेः पुरुषोत्तमस्य रामस्य सहसा परं प्रमोदमानन्दं दधानं कुर्वाणम् । अत्र मधुकरविरुतानां सरसीरुहाणां चोपमानानामुपमेयत्वकल्पनाद्द्वितीयप्रतीपालंकारः । 'आक्षेप उपमानस्य कैमर्थक्येन कल्प्यते[3] । यद्वोपमेयभावः स्यात् तत्प्रतीपमुदाहृतम्' ॥ इति लक्षणात् ॥

---

१ विषये T2.
२ तिमिर T2, T4.
३ रम्यवृक्ष T2.
४ कंसम् D.
५ हास T2, T3, T4.
६ भरं T2.

---

1 °मनुसरमाणं Th.
2 अनुसरमाण° Th.
3 कथ्यते Th.

ग्रहमणिरसनं दिवो नितम्बं
विपुलमनुत्तमलब्धकान्तियोगम् ।
च्युतघनवसनं मनोऽभिरामं
शिखरकरैर्मदनादिव स्पृशन्तम् ॥ ४७ ॥

४७. ग्रहेति ॥ ग्रहा नक्षत्राण्येव मणिरशना मणिमेखला यस्य तं विपुलं विस्तृतं नास्त्युत्तमं यस्मात्सोऽनुत्तमः सर्वोत्तमो लब्धः कान्तियोगो येन स कान्तिमानित्यर्थः । तयोर्विशेषणसमासः । तं च्युतं स्रस्तं घनो मेघ इव वसनं यस्मात्तं मनोऽभिरामं मनोज्ञं दिवः कान्ताया इति भावः नितम्बमिव नितम्बमधोभागं मदनात्कामाच्छिखरैरेव करैः स्पृशन्तमिवेति क्रियास्वरूपोत्प्रेक्षा गृहमणीत्यादिरूपकानुप्राणितेति संकरः ॥

प्रचपलमगुरुं भरासहिष्णुं
जनमसमानमनूर्जितं विवर्ज्य ।
कृतवसतिमिवार्णवोपकण्ठे
स्थिरमतुलोन्नतिमूढतुङ्गमेघम् ॥ ४८ ॥

४८. प्रचपलेति ॥ पुनः स्थिरं प्रतिष्ठितमतुलोन्नतिं सर्वोन्नतमूढतुङ्गमेघं परभरणक्षममित्यर्थः । अत एव प्रचपलमस्थिरमगुरुं लघु तुच्छमित्यर्थः । भरमसहिष्णुं भरासहिष्णुं परभरणाक्षममित्यर्थः । अनूर्जितमसमृद्धमत एवासमानं जनं पृथग्जनं विवर्ज्य संसर्गानर्हत्वाद्वर्जयित्वार्णवस्योपकण्ठे समीपे कृतवसतिमिवेत्युत्प्रेक्षा । उक्तदोषाभावात् स्वसमानगुणत्वेन च संसर्गार्हत्वनिश्चयादिति भावः । चपलादिपदार्थानां विशेषणगत्या संसर्गवर्जने स्थिरत्वादिपदार्थानां संसर्गे च हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गं तदनुप्राणिता चार्णवसमीपवासोत्प्रेक्षा इति संकरः ॥

---

१ रशनं T_4, Com.

This verse is given after प्रचपल &c. (st. 48) in E_3.

स्फटिकमणिगृहैः सरत्नदीपैः
प्रतरुणकिन्नरगीतनिस्वनैश्च ।
अमरपुरमतिं सुराङ्गनानां
दधतमदुःखमनल्पकल्पवृक्षम् ॥ ४९ ॥

४९. स्फटिकेति ॥ सरत्नदीपैः स्फटिकमणिगृहैः प्रकृष्टैस्तरुणकिन्नरगीतनिस्वनैश्च सुराङ्गनानाममरपुरमतिं स्वर्गभ्रान्तिं दधतं कुर्वाणं नास्ति दुःखमत्रेत्यदुःखमनल्पकल्पवृक्षमिति च भ्रान्तिकारणान्तरोक्तिः । अत्र भ्रान्तिमदलंकारः । 'कविसंमतसादृश्याद्विषये पिहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः ॥' इति लक्षणात् ॥

अथ ददृशुरुदीर्णधूमधूम्रां
दिशमुदधिव्यवधिं समेतसीताम् ।
सहरघुतनयाः प्लवङ्गसेनाः
पवनसुताङ्गुलिदर्शितामुदक्षाः ॥ ५० ॥

५०. अथेति ॥ अथ महेन्द्राद्रिप्राप्त्यनन्तरं रघुतनयाभ्यां सह वर्त्तन्त इति सहरघुतनयाः ॥ "वोपसर्जनस्य" इति पक्षे न सहस्य सभावः ॥ प्लवङ्गसेनाः पवनसुतेनाङ्गुल्या दर्शितामुदीर्णैर्लङ्कोद्भूतैर्धूमैर्धूम्रां धूम्रवर्णाम् । उदकानि धीयन्तेऽस्मिन्नित्युदधिः ॥ "कर्मण्यधिकरणे च" इत्यधिकरणार्थे कर्मण्युपपदे किप्रत्ययः । स एव व्यवधीयत अनेनेति व्यवधिर्व्यवधायको यस्यास्तामुदधिव्यवहितामित्यर्थः ॥ "उपसर्गे घोः किः" ॥ समेता सीता यस्यास्तां दिशं दक्षिणाशामुदक्षा उदञ्चिताक्षाः ॥ "बहुव्रीहौ—" इत्यादिना षच् ॥ ददृशुः । अत्र स्वभाववर्णनात्स्वभावोक्तिः । 'स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनात्[1]' इति लक्षणात् ॥

जलनिधिमगमन्महेन्द्रकुञ्जात्
प्रचयतिरोहिततिग्मरश्मिभासः ।
सलिलसमुदयैर्महातरङ्गै-
र्भुवनभरक्षममप्यभिन्नवेलम् ॥ ५१ ॥

---

१ गीति C. | चारु T2.

---

1 °वर्णनम् Th.

५१. जलेति ॥ अथ कपिसेनाः प्रचयेनोच्छ्रायेण तिरोहिततिग्मरश्मिभासः पिहितार्कप्रकाशान्महेन्द्रस्य कुञ्जात् गुल्मात्[1] महातरङ्गैः सलिलसमुदयैरुदकलहरिभिर्भुवनस्य भरे भरणे पूरणे क्षमं शक्तमप्यभिन्नवेलमलङ्घितसीमम्। महान्तः शक्ता अपि नाकार्यं कुर्वन्तीति भावः। जलनिधिमगमन्। अत्रापि यथावद्वस्तुवर्णनात्स्वभावोक्तिः॥

पृथुगुरुमणिशुक्तिगर्भभासा
ग्लपितरसातलसंभृतान्धकारम्।
उपहतरविरश्मिवृत्तिमुच्चैः
प्रलघुपरिप्लवमानवज्रजालैः ॥ ५२ ॥

५२. अथ श्लोकत्रयेण समुद्रं वर्णयति। पृथ्वित्यादि ॥ पृथवो विपुला गुरवो गुरुत्वगुणयोगिनश्च ये मणयस्त एव शुक्तीनां गर्भाः शुक्तिगर्भस्थमणय इत्यर्थस्तेषां तलवर्त्तिनां भासा ग्लपितं क्षपितं रसातलसंभृतान्धकारं पातालस्थध्वान्तं येन तमुच्चैरुपरि प्रलघ्वतिलघु यथा तथा परिप्लवमानैर्वज्रजालैर्माणिक्यपुञ्जैरपहता निवारिता रविरश्मीनां वृत्तिः प्रसारो येन तम्। अत्र समृद्धिमद्वस्तुवर्णनादुदात्तालंकारः। 'समृद्धिमद्वस्तुवर्णनमुदात्तम्' इति सौत्रं लक्षणम्॥

समुपचितजलं विवर्धमानै-
रमलसरित्सलिलैर्विभावरीषु।
स्फुटमवगमयन्तमूढवारीन्
शशधररत्नमयान्महेन्द्रसानून् ॥ ५३ ॥

५३. समुपेति ॥ पुनर्विभावरीषु रात्रीषु विवर्धमानैरमलैरवदातैः सरितः सलिलैर्नदीजलैः समुपचितजलं प्रवृद्धोदकमत एव शशधर-

१ उपहत T4.
अपहत Com.
२ वृद्धि E3.
३ °तोयैः E3.
४ स्फुटमुपगमयन्तमू° T3.

[1] कुहरात् Th.

रत्नमयाश्चन्द्रकान्तमयान्महेन्द्रसानूनूढवारीन् धृतोदकान् स्फुटमवगमयन्तं ज्ञापयन्तम् । अन्यथा कथमीदृशी सिन्धोः सलिलवृद्धिरिति भावः । अत्र महेन्द्रस्येदृक्चन्द्रकान्तासंबन्धेऽपि संबन्धोक्तेस्तद्रूपातिशयोक्तिस्तद्वत्था च सिन्धोरपि तादृक्सलिलासंबन्धेऽपि संबन्धोक्तेः सैवातिशयोक्तिस्तदुभयोपजीवनेनोभयत्र सलिलचन्द्रकान्तसमृद्धिवर्णनादुदात्तं चेति संकरः ॥

भुवनभरसहानलङ्घ्यधाम्नः
पुरु[1]रुचिरत्नभृतो गुरूरुदेहान् ।
श्रमविधुरवि[2]लीनकूर्मनक्रान्
दधतमुदूढभुवो गिरीनहींश्च ॥ ५४ ॥

५४. भुवनेति ॥ भुवनभरसहान् स्वमहिम्ना जगद्रक्षणक्षमानित्यर्थः । अलङ्घ्यधाम्नोऽप्रधृष्यतेजस उरु[1]रुचीनि प्रभूतकान्तीनि रत्नानि बिभ्रत्याकरेषु फणासु चेति तद्भृतः । गुरवो दुर्भरा उरवो महान्तश्च देहा येषां तान् । श्रमेण विधुरा विवशा अत एव विलीना विशीर्णाश्च कूर्मा नक्राः कुम्भिलापराख्या गजग्राहिणो मत्स्याश्च येषु तानन्तिकविलीनकूर्मनक्रा इत्यर्थः । उदूढभुवो भूभृत इत्यर्थः । गिरीन् मैनाकाद्रीनहींस्तक्षकवासुकिप्रमुखांश्च दधतम् । अत्र गिरीणामहीनां च प्रकृतानामेव धर्मसाम्येनौपम्यप्रतीतेस्तुल्ययोगिता नामालंकारः । 'प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः । औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥' इति लक्षणात् ॥

प्रददृशुरुरुमुक्तशीकरौघा-
[3]नमलमणिद्युतिसंततेन्द्रचापान् ।
जलमुच इव धीरमन्द्रघोषान्
क्षितिपरितापहृतो महातरङ्गान् ॥ ५५ ॥

१ पृथु° Com. (Th.)
उरु Com.
२ निलीन E_3.
३ न् विमल° N., C., T_1, T_2, B., c.
४ संभृत N., C., T_1, B., E_2, E_3.
५ °नुदो T_3.

1 पृथु° Th.

५५. प्रेति ॥ उरु प्रचुरं यथा तथा मुक्ताः शीकरौघा यैस्तानमला मणिद्युतय एव संतता अविच्छिन्ना इन्द्रचापा येषां तान् धीरा मधुरा मन्द्रा गम्भीराश्च घोषा येषां तान्। 'धीरोऽचे मधुरे बुधे' इति यादवः। क्षितेः परितापहृतः संतापहारिणः। हरतेः क्विप्। महातरङ्गान् प्रदद्दशुः। श्लिष्टविशेषणेयमुपमेति केचित्। प्रकृताप्रकृतविषयः श्लेष एवेत्यन्ये ॥

विद्रुमम[१]णिकृतभूषा मुक्तामणि[२]नि[३]कररञ्जितात्मानः।
बभुरुदकनागरुग्णा[४] वेलातटशिखरिणो यत्र ॥ ५६ ॥

५६. विद्रुमेति ॥ यत्र विद्रुमवनैः कृतभूषाः प्रवालेन भूषिता इत्यर्थः। मुक्तामणिभी रञ्जितात्मानस्तच्छायापन्नमूर्त्तय इत्यर्थः। उदकनागैर्जलगजै रुग्णा भग्ना वेलातटाश्च शिखरिणश्चेति द्वन्द्वः। बभुः। अत्रापि वेलातटानां शिखरिणां च प्रकृतत्वाद्विशेषणसाम्याच्च पूर्ववत्तुल्ययोगिता ॥

भृत[५]निखिलरसातलः सरत्न[६]ः
शिखरिसमोर्मितिरोहितान्त[७]रीक्षः।
कुत इह परमार्थतो जलौघो
जलनिधिमीयुरतः समेत्य मायाम् ॥ ५७ ॥

५७. हृतेति ॥ हृतं निखिलं रसातलं पातालं येन स सरत्नो रत्नाकरः शिखरिसमैः पर्वताकारैरूर्मिभिस्तिरोहितान्तरिक्षश्छादिताकाश एवंभूतः जलौघो जलराशिः परमार्थतः परमार्थः सन् यथार्थभूत इह कुतो नास्त्येवेति समेत्य सर्वे संभूय जलनिधिं मायां कल्पनामीयुरवजग्मुः। द्यावापृथिवीभ्यां सहैकभावेन पारमार्थिकरूपाकलनान्मायेति मेनिर

१ वन T2, T3, T4, Com.
२ फल N., C., T1, c., B.
३ किरण c., Com. drops this word.
४ भग्ना N., C., T1, E3.
५ हृत Com.
६ सरत्नशिखरस° D.
७ °न्तरिक्षः E3, Com.

इत्यर्थः । अत एव विषयापह्नवेन रूपान्तरारोपादपह्नवालंकारः । 'निषिद्धविषयं साम्यादन्यारोपे ह्यपह्नुतिः'[1] इति लक्षणात् ॥

शशिरहितमपि प्रभूतकान्ति
विबुधहृतश्रियमप्यनष्टशोभम् ।
मथितमपि सुरैर्दिवं जलौघैः
समभिभवन्तमविक्षतप्रभावम् ॥ ५८ ॥

५८. शशीति ॥ शशिरहितमप्यद्याप्यनुदितत्वादिति भावः । प्रभूतकान्ति महाप्रकाशं रत्नाकरत्वादिति भावः । विबुधैः सुरैः हृता श्रीः पद्मा शोभा च यस्य तं तथाप्यनष्टशोभं सुरैः पद्मैव हृता न तु शोभेति भावः । 'शोभासंपत्तिपद्मासु श्रीः' इति विश्वः । सुरैर्मथितं विलोडितमपि जलौघैर्दिवमाकाशं समभिभवन्तमावृण्वन्तमक्षय्यजलत्वादिति भावः । सर्वत्रापिर्विरोधे । अविक्षतप्रभावं महाप्रभावत्वान्न कश्चिद्विरोध इत्यर्थः । अत्र विरोधस्याभासीकरणाद्विरोधालंकारः । 'आभासत्वे विरोधस्य विरोधालंकृतिः[2] स्मृता' इति लक्षणात् ॥

क्षितिकुलगिरिशेषदिग्गजेन्द्रान्
सलिलगतामिव[१] नावमुद्वहन्तम् ।
धृतविधुरधरं महावराहं
गिरिगुरुपोत्रमपीहितैर्जयन्तम् ॥ ५९ ॥

५९. क्षितीति ॥ क्षितिं भुवं कुलगिरीन् कुलपर्वतान् शेषं फणिपतिं दिग्गजेन्द्रानैरावणादींश्च सलिलगता नावस्तरीरिवोद्वहन्तं तद्वदनायासेनैतद्देशे वहन्तमित्यहो समुद्रमहत्त्वमिति भावः । उपमालंकारः । किं च धृता विधुरा विजला धरा येन तं गिरिरिव गुरु पोत्रं मुखं यस्य तम् ॥ "हलसूकरयोः पुवः" इति सूकरास्ये पुवष्ट्रन्प्रत्ययः ॥ महावराहमीहितैश्चेष्टितैर्जयन्तं तमप्येकदेशे वहन्तमित्यर्थः । अत्र क्षित्याद्यु-

१ सलिलगता इव नाव उद्वहन्तम् Com.

1 °पह्नवः Th. | 2 °कृतिर्मता Th.

द्वहनासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिस्तदनुप्राणिता चोक्तोपमेति संकरः ॥

गिरिपरिगतचञ्चलापगान्तं
जलनिवहं दधतं मनोऽभिरामम् ।
गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्[1] ॥ ६० ॥

६०. गिरीति ॥ गिरिपरिगतास्तटाद्रिसंबद्धाश्चञ्चला लोला आपगानामन्ता अग्रभागा यस्मिंस्तं मनोऽभिरामं जलनिवहं जलप्रवाहं रामं निजनाथं नारायणावतारं विलोक्य पारवश्यं गताया इति शेषे समानकर्तृकत्वनिर्वाहः । भुवः संबन्धि गलितं स्रस्तं धरणिधरस्यैव स्तनस्य शुक्लं पट्टचीरं पट्टवस्त्रं स्तनदुकूलमिव दधतम् । अत्र गिरिसंबन्धजलप्रवाहे भूस्तनदुकूलतोत्प्रेक्षा सा च धरणिधरस्तनेति रूपकनिर्व्यूढेति संकरः ॥

अपरिमितमहाद्भुतैर्विचित्र-
श्च्युतमलिनः[3] शुचिभिर्महानलङ्घ्यैः ।
तरुमृगपतिलक्ष्मणाक्षितीन्द्रैः[4]
समधिगतो जलधिः परं बभासे ॥ ६१ ॥

६१. अपरिमितेति ॥ विचित्रो महान्च्युतश्च्युतमलिनो निर्मलो महानलङ्घ्यो जलधिरपरिमिता अपरिच्छिन्नरूपाः । एतद्विशेषणं समुद्रेऽपि योज्यम् । ते च ते महाद्भुता अद्भुतचरित्राश्च तैः शुचिभिर्निर्मलैरलङ्घ्यैरलङ्घ्यप्रभावैस्तरुमृगपतिलक्ष्मणक्षितीन्द्रैः सुग्रीवलक्ष्मणरामचन्द्रैः संगतः समेतः सन् परं बभासे । अत्रानुरूपसमागमवर्णनात् समालंकारः । 'सा समालंकृतिर्योगे वस्तुनोरनुरूपयोः' इति लक्षणात् ॥

१ युक्त D.
२ चीनपट्टम् N., पट्टचीरम् Com.
३ सलिलः B.
४ क्षितीन्द्र° B.

न भवति महिमा विना विपत्ते-
रवगमयन्निव पश्यतः पयोधिः[1] ।
अविरतमभवत्क्षणे क्षणेऽसौ
शिखरिपृथुप्रथितप्रशान्तवीचिः ॥ ६२ ॥

६२. नेति ॥ महिमा वृद्धिर्विपत्तेर्विना विपत्तिरहितो न भवत्यविनाशी नास्ति ॥ "पृथग्विना—" इत्यादिना पञ्चमी ॥ इतीत्थं पश्यतो रामादीनवगमयन् बोधयन्निवेत्युत्प्रेक्षा । असौ पयोनिधिरविरतमश्रान्तं क्षणे क्षणे शिखरिवत् पर्वतवत् पृथवः प्रशान्ताः सद्यो विशीर्णाश्च वीचयो यस्य सोऽभवत् । स्वतरङ्गोच्छ्रायक्षणिकत्वेन सर्वोच्छ्रायक्षणिकत्वं कथयतीवेत्युत्प्रेक्षार्थः ॥

मृदुभिरपि बिभेद पुष्पबाणै-
र्जलशिशिरैरपि मारुतैर्ददाह ।
रघुतनयमनर्थपण्डितोऽसौ-
न च मदनः क्षतमाततान नार्चिः ॥ ६३ ॥

६३. अथ समुद्रोपकण्ठे रामस्य मन्मथावस्थां वर्णयति । मृदुभिरित्यादि ॥ अनर्थपण्डितो हिंसाकुशलोऽसौ मदनो रघुतनयं रामं मृदुभिरपि पुष्पबाणैर्बिभेद जलशिशिरैरपि मारुतैर्ददाह तथापि क्षतं व्रणं नाततानार्चिर्ज्वालां च नाततान । अत्र मृदुना भेदो भेदेऽप्यक्षतत्वं शिशिरेण दाहो दाहेऽपि नार्चिरिति विरोधानां मदनस्याचिन्त्यशक्तित्वेन परिहाराद्विरोधालंकारः । 'आभासत्वे विरोधस्य विरोधालंकृतिर्मता' इति लक्षणात् । भेदक्षतयोर्दाहार्चिषोश्च यथासंख्येनान्वयाद्यथासंख्यालंकारः । आदौ क्षते निर्दिष्टस्य नाततानेत्यस्यार्चिषापि संबन्धादादिदीपकं चेति संकरः ॥

---

१ रनुगमयन्निव T3, T4.

अथ मृदुमलिनप्रभौ दिनान्ते
जलधिसमीपगतावतीतलोकौ।
अनुकृतिमितरेतरस्य मूर्त्यो-
र्दिनकरराघवनन्दनावकार्ष्टाम् ॥ ६४ ॥

६४. अथेति ॥ अथ मदनावस्थानन्तरं दिनान्ते मृदुरतीक्ष्णा मलिनानुज्वला च प्रभा ययोस्तौ जलनिधिसमीपगतावेकत्रास्तमयार्थमन्यत्र लङ्कायात्रार्थं चेत्यर्थः। अतीतलोकावेकत्र लोकान्तरगमनादन्यत्र लोकोत्तरत्वादिति भावः। दिनकरराघवनन्दनौ सूर्यदाशरथी मूर्त्योः स्वाकारयोरितरेतरस्यानुकृतिं त्वमिवाहमहमिव च त्वमिति पर्यायेण परस्परमुपमानोपमेयभावमकार्ष्टाम्। अत एवोपमेयोपमालंकारः। 'पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता' इति लक्षणात् ॥

अपहरदिव सर्वतो विनोदान्
दयितगतं दधदेकधा समाधिम्।
घनरुचि ववृधे ततोऽन्धकारं
सह रघुनन्दनमन्मथोदयेन ॥ ६५ ॥

६५. अपेति ॥ ततोऽस्तमयानन्तरं सर्वतः सर्वान्। सार्वविभक्तिकस्तसिः। विनोदानाह्निकान् मनोविनोदनव्यापारानपहरत् संहरदिव तथा दयितगतं प्रियजनविषयं समाधिमेकाग्रतां एकधा एकप्रकारं दधत् कुर्वत् घनरुचि मेघश्याममन्यत्र सान्द्रप्रीतिदमन्धकारं रघुनन्दनस्य यो मन्मथोदयः पूर्वोक्तस्तेन सह ववृधे। अत्रान्धकारमन्मथोदययोः कर्त्रोरेकस्य सहार्थेनान्वयाद्ववृध इति संबन्धिभेदभिन्नयोर्वृद्ध्योरभेदाध्यवसायाच्च श्लिष्टनिमित्तकातिशयोक्तिमूला कर्तृसाहित्यरूपा सहोक्तिरलंकारः। एतच्च सम्यक् शिष्टं शितरुचिरोन्नतमित्यत्र लक्षणं चोक्तम् ॥

१ सलिल B. | २ वनरुचि T_3.

अधिजलधि तमः क्षिपन् हिमांशुः
परिददृशेऽथ दृशां कृतावकाशः[1] ।
विदधदिव जगत्पुनः[2] प्रलीनं
भवति महान् हि परार्थ एव सर्वः[3] ॥ ६६ ॥

६६. अधीति ॥ अथान्धकारवृद्ध्यनन्तरं हिमांशुश्चन्द्रोऽधिजलधि जलधौ । विभक्त्यर्थेऽव्ययीभावः । तमः क्षिपन् निरस्यंस्ततोऽन्यत्र नीलिमादर्शनादिति भावः । अत एव दृशां कृतावकाशो दत्तप्रसरः सन् किं बहुना प्रलीनमस्तमितं जगत्पुनर्भूयोऽपि विदधदिव सृजन्निवेत्युत्प्रेक्षा । परिददृशे । अतो महोपकारित्वमस्येति भावः । अथ सर्वो महान् परस्मै परार्थः परोपकारार्थ एव । 'अर्थेन नित्यसमासः सर्वलिङ्गता च वक्तव्या' इति साधुः । भवति हि । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

अशनिरयमसौ कुतो निरभ्रे
शितशरवर्षमसत्तदप्यशार्ङ्गम्[4] ।
इति मदनवशो मुहुः[5] शशाङ्के[6]
रघुतनयो न च निश्चिकाय चन्द्रम् ॥ ६७ ॥

६७. अशनिरिति ॥ अयं पुरोवर्त्यशनिर्वज्रो निरभ्रे निर्मेघे नभस्यसावशनिः कुतस्तर्हि शितशरवर्षं निशितशरवृष्टिः शृङ्गस्य विकारः शार्ङ्गं धनुस्तद्रहितं तच्छरवर्षमप्यसदविद्यमानमेव । इत्थं मुहुः शशाङ्के विषये संदिहान इति शेषः । मदनपरवशः कामपरवशो रघुतनयो रामश्चन्द्रं न निश्चिकाय चन्द्रोऽयमिति न निश्चितवानित्यर्थः । अत्र निश्चयगर्भाख्यः संदेहभेदोऽलंकारः । आद्यन्तयोः संशयं निबध्य मध्ये

१ कृशाव° T4.
२ तमः प्रलीनं D.
पुनर्विलीनं c.
३ सर्वे एव T2, T4.
४ वर्षमिदं त D., c.
५ वशान्मुहुः E3.
६ शशाङ्कं E2.

कुतोऽशनिरित्यादिनिश्चयनिबन्धनात् । 'विषयो विषयी यत्र साद्दश्यात्कविसंमतात् । संदेहगोचरौ स्यातां संदेहालंकृतिश्च सा' ॥ इति सामान्यलक्षणम् ॥

कुमुदवनचयेषु कीर्णरश्मिः
क्षततिमिरेषु च दिग्वधूमुखेषु ।
वियति च विललास तद्वदिन्दु-
र्विलसति चन्द्रमसो न यद्वदन्यः ॥ ६८ ॥

६८. कुमुदेति ॥ क्षततिमिरेषु निरस्तान्धकारेषु कुमुदवनानां चयेषु समूहेषु दिग्वधूमुखेषु च विकीर्णरश्मिः विक्षिप्तकरः सन्निन्दुर्वियत्याकाशे तद्वदिन्दुवद्विललास चन्द्रमसश्चन्द्रादन्यो यद्वद्यथा न विलसति तथैव विललासेत्यर्थः । अत्रोपमेयस्येन्दोरेवोपमानत्वादनन्वयालंकारः । 'एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः' इति लक्षणात् । एकस्योभयरूपत्वाभिधानमद्वितीयत्वाभिप्रायमित्यविरोधः ॥

शरणमिव गतं तमो निकुञ्जे
विटपिनिराकृतचन्द्ररश्म्यरातौ ।
पृथुविषमशिलान्तरालसंस्थं
सजलघनद्युति भीतवत्ससाद ॥ ६९ ॥

६९. शरणमिति ॥ विटपैर्निराकृताश्चन्द्ररश्मय एवारातयो येन तस्मिन्निकुञ्जे गह्वरे पृथूनां विषमाणां च शिलानां चान्तरालेषु संस्था स्थितिर्यस्य तत् सजलघनस्येव द्युतिर्यस्य तन्मेघश्यामं तमो भीतवत् भीतमिवेत्युत्प्रेक्षा । अत एव शरणं त्रातारं गतमिव शरणागतमिवेत्युत्प्रेक्षा । ससाद लीनमभूत् । अत्र चन्द्ररश्म्यरातीति रूपकस्य भीतवदित्युत्प्रेक्षायाश्च शरणगमनोत्प्रेक्षाङ्गत्वादङ्गाङ्गिभावेन सजातीयविजातीयसंकरः ॥

१ विटप Com.

अथ नयनमनोहरो[1]ऽभिरामः[2]
स्मर इव चित्तभवोऽप्यवामशीलः ।
रघुसुतमनुजो जगाद वाचं[3]
सजलघनस्तनयित्नुतुल्यघोषः ७० ॥

७०. अथेति ॥ अथ रामशोकादनन्तरमभिरामं लोकाभिरामं रघुसुतं रामं नयनानि मनांसि च हरतीति रूपेण गुणैश्चेति नयनमनोहरः स्मर इव चित्ते भवतीति चित्तभवश्चित्तजः कामोऽप्यवामशील इति विरोधश्चित्तानुवर्त्तीत्यविरोधाद्विरोधाभासोऽलंकारः । सजलघनस्य स्तनयित्नुना स्वनितेन तुल्यघोष इत्युपमालंकारः । 'स्तनयित्नुः पयोवाहे तद्ध्वनौ मृत्युरोगयोः' इति विश्वः । अनुजो लक्ष्मणो वाचं जगाद। अत्र विरोधोपमयोः संसृष्टिः ॥

पतिवधपरिलुप्तलोलकेशी-
र्नयनजलापहृताञ्जनौष्ठरागाः ।
कुरु रिपुवनिता जहीहि शोकं
क्व च शरणं जगतां[4] भवान् क्व मोहः ॥ ७१ ॥

७१. पतीति ॥ हे आर्य रिपुवनिताः पतिवधेन भर्तृमरणेन परिलुप्ता लोलाः केशा यासां ताः ॥ "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीप् ॥ नयनजलैरश्रुभिः परिहृतानि परिमृष्टान्यञ्जनान्योष्ठरागाश्च यासां तास्तादृशीः कुरु। शोकं जहीहि त्यज । विधौ लोट्। तथाहि जगतां शरणं त्राता भवान् क्व मोहः क्व भवादृशामिदमज्ञानमयुक्तमन्यथा शत्रूपेक्षायां जगद्विपत्तिः स्यादिति भावः । अनेन वाक्यार्थेन शत्रुवधकर्त्तव्यतासमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः ॥

---

१ मनोरमो T2, T4.
२ °भिरामं c., E2, E3, Com.
३ वाक्यं c.
४ जगतां शरणं B.

अधिगतमहिमा मनुष्यलोके
बत सुतरामवसीदति प्रमादी ।
गजपतिरुरुशैलशृङ्गवर्ष्मा
गुरुरवमज्जति पङ्कभाङ् न दारु[1] ॥ ७२ ॥

७२. अधीति ॥ मनुष्यलोकेऽधिगतो महिमा येन स महानेव प्रमादी मत्तोऽनवहितोऽवसीदति नश्यति । तथाहि । उरुशैलस्य शृङ्गं शिखरमिव वर्ष्म वपुर्यस्य स गुरुर्दुर्भरो गजपतिर्महागजः पङ्कभाक् सन् मज्जति दारु लघुकाष्ठं न मज्जति । महत एव प्रमादाप्रमादौ हानिवृद्धिकरौ लघोः प्रमादेऽपि का हानिरप्रमादे वा का वृद्धिरित्यर्थः । अत्र महात्मनो जगत्पतेश्च वाक्यद्वये प्रमादी पङ्कभागिति च बिम्बप्रतिबिम्बभावेन सामान्यधर्मनिर्देशाद् दृष्टान्तालङ्कारः । 'यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते । सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते' ॥ इति लक्षणात् ॥

बोद्धव्यं किमिव हि यत्त्वया न बुद्धं
किं वा ते निमिषितमप्यबुद्धिपूर्वम् ।
लब्धात्मा तव सुकृतैरनिष्टशङ्की
स्नेहौघो घटयति मां तथापि वक्तुम् ॥ ७३ ॥

७३. बोद्धव्यमिति ॥ हे आर्य यत्त्वया न बुद्धं बोद्धव्यं तत् किमस्ति सर्वज्ञस्य ते न किञ्चिदज्ञातमस्तीत्यर्थः । किं च निमिषितं निमेषकर्माप्यबुद्धिपूर्वमपेक्षापूर्वकं किं वा । नेत्यर्थः । न कुत्रापि प्रमादस्तवास्तीत्यर्थः । तथापि सुकृतैर्मत्पुण्यैर्लब्धात्मा लब्धस्वरूपो जात इत्यर्थः । अनिष्टशङ्की 'प्रेम पश्यति भयान्यपदेऽपि' इति न्यायादनर्थाशङ्की तव त्वद्विषयः स्नेहौघः स्नेहप्रवाहो मां वक्तुं घटयति प्रेरयतीत्यर्थः । सर्वज्ञे प्रेक्षापूर्वकारिणि यन्मयोक्तं तत्प्रेमनिबन्धनं सिद्धसाधनमेवेति भावः । प्रियतराख्यानरूपोऽयं प्रेयोऽलंकारः । यथाह दण्डी 'प्रेयः प्रियतराख्यानम्' इति ॥

[1] दारुः T_2, T_3.

सौमित्रेरिति वचनं निशम्य रामो
जृम्भावान् भुजयुगलं वि[1]भज्य नि[2]द्रान् ।
अध्यष्ठाच्छिशयिषया प्रवालतल्पं
र[3]क्षायै प्रतिदिशमादिशन् [4]प्लवङ्गान् ॥ ७४ ॥

७४. सौमित्रेरिति ॥ रामः सौमित्रेरित्येतद्वचनं निशम्य जृम्भा जृम्भणमस्यास्तीति जृम्भावान् जृम्भमाण इत्यर्थः ॥ "गुरोश्च हलः" इति स्त्रियामकारप्रत्ययः ॥ भुजयुगलं विभुज्य यथायथं वक्रीकृत्य निद्रान् निद्रास्यन्नित्यर्थः । रक्षायां रक्षणे निमित्ते प्रतिदिशं दिशि दिशि । यथार्थे वीप्सायामव्ययीभावः ॥ "अव्ययीभावे शरत्प्रभृतिभ्यः" इति समासान्तष्टच्प्रत्ययः ॥ प्लवंगान् वानरानादिशदाज्ञापयामास । अथ शिशयिषया सुषुप्सया प्रवालतल्पं कुसुमशयनमध्यष्ठादधिष्ठितवान् । तिष्ठतेर्लुङि "गातिस्था—" इत्यादिना सिचो लुक् ॥ "प्राक्सितादड्व्यवायेऽपि" इति षत्वम् । ष्टुत्वम् ॥

इति भट्टिकाव्ये प्रसन्नकाण्डे काव्यालंकारो नाम
दशमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने दशमः सर्गः ॥

---

१ विभुज्य E_3, Com.
२ निद्राम् T_4.
३ रक्षायां T_2, T_3, T_4, Com.
४ कपीन्द्रान् B.

॥ श्रीः ॥

अथैकादशः सर्गः ।

अथास्तमासेदुषि मन्दकान्तौ
पुण्यक्षयेणेव निधौ कलानाम् ।
समाललम्बे रिपुमित्रकल्पैः
पद्मैः प्रहासः कुमुदैर्विषादः ॥ १ ॥

१. अथ माधुर्यगुणस्यापि काव्यशोभाकरत्वादस्मिन्सर्गे तत्प्राधान्येन लङ्कावृत्तान्तं वर्णयिष्यन्नादौ तावत्प्रभातं वर्णयति । अथेति ॥ अथ निशावसानसमये मन्द-कान्तौ क्षीणप्रभे कलानां निधौ चन्द्रे वित्ताढ्ये च । 'काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलनाकले' इति यादवः । पुण्यक्षयेणेव वित्ताढ्ये भोगादृष्टनाशेनेवेत्युपमा । अस्तमस्ताद्रिमवसानं चासे-दुषि प्राप्ते सति ॥ "भाषायां सदवसश्रुवः" इति सदेर्लिटः क्वसुरा-देशः ॥ रिपवश्च मित्राणि च तत्कल्पैस्तत्सदृशैरित्युपमा । क्रमा-त्पद्मैर्विकासः कुमुदैर्विषादश्च समाललम्बे । शत्रुमित्रहान्योस्तद्धेतुत्वा-दित्यर्थः । अत्र रिपुमित्रपदार्थयोः पद्मकुमुदपदार्थाभ्यां तयोर्विकास-विषादाभ्यां च यथासंख्येनान्वयाद्यथासंख्यालंकारः प्रागुक्तोपमाश्ले-षसंकीर्णः । 'श्राव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते' इति माधुर्यलक्षणम् ॥

दूरं समारुह्य दिवः पतन्तं
भृगोरिवेन्दुं विहितोपकारम् ।
बद्धानुरागोऽनुपपात तूर्णं
तारागणः संभृतशुभ्रकीर्त्तिः[1] ॥ २ ॥

---

१ शुद्धकीर्त्तिः T₃. | शुद्धकान्तिः T₂, T₄.

२. दूरमिति ॥ दूरमत्युन्नतमन्तरिक्षं समारुह्य भृगोः पर्वततटादिव दिवोऽन्तरिक्षात्पतन्तं भृग्वग्न्यनशनाम्बुभिरिति शास्त्रादिति भावः। विहितः कृत उपकार इष्टावाप्तिलक्षणो येन तमिन्दुं बद्धोऽनुरागोऽस्तमयकालीनरक्तता भावानुबन्धश्च यस्य स ताराणामुडूनां गणः संभृता शुभ्रा कीर्तिः पतिव्रताख्यातिर्येन स सन्ननुपपात । ताराणां तत्पत्नीत्वादित्युत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या ॥

क ते कटाक्षाः क विलासवन्ति
प्रोक्तानि वा तानि ममेति मत्वा ।
लङ्काङ्गनानामवबोधकाले
तुलामनारुह्य गतोऽस्तमिन्दुः ॥ ३ ॥

३. क्केति ॥ ते सविलासाः कटाक्षा मम क तानि विलासवन्ति प्रोक्तानि सूक्तानि वा[1] मम क सन्तीत्यर्थः । इति मत्वा ज्ञात्वेन्दुर्लङ्काङ्गनानामवबोधकाले तुलामनारुह्य तन्मुखसाम्यमप्राप्यास्तं गतोऽभिमानादिति भावः । पूर्ववद्गम्योत्प्रेक्षा ॥

मानेन तल्पेष्वयथामुखीना
मिथ्याप्रसुप्तैर्गमितत्रियामाः ।
स्त्रीभिर्निशातिक्रमविह्वलाभि-[१]
र्दृष्टेऽपि दोषे पतयोऽनुनीताः ॥ ४ ॥

४. मानेति ॥ मानेन स्त्रीणामीर्ष्यारोषेण हेतुना तल्पेषु शयनीयेषु यथामुखं दर्शनमेष्विति यथामुखीना अभिमुखाः ॥ "यथामुखसंमुखस्य दर्शनः खः" इति खप्रत्ययः ॥ अयथामुखीनाः प्रार्थनावैफल्याद्विमुखाः किं तु मिथ्याप्रसुप्तैरलीकनिद्राभिः । भावे क्तः । गमितत्रियामा नैस्पृह्यनाटितकेन[2] यापितरात्रय इत्यर्थः । पतयो भर्त्तारो निशातिक्रमविक्लवाभिः प्रभातभीरुभिः स्त्रीभिर्दोषेऽपराधे दृष्टेऽप्यनुनीताः । एता

---

१ विक्लवाभिः T2, T4, E3, Com. | विक्रमाभिः C.

1 नाम क न सन्तीत्यर्थः Th. | 2 नैस्पृह्येणानादरेण Th.

नायिकाः कलहान्तरिताः खेदाश्रुसन्तापवत्यः। 'कोपात्कान्तं पराणुद्य पश्चात्तापसमन्विताः। कलहान्तरिता नाम—[1] ॥" इति लक्षणात् ॥

ईर्ष्याविरुग्णाः स्थिरबद्धमूला
निरस्तनिःशेषशुभप्रतानाः[१]।
आप्यायिता नेत्रजलप्रसेकैः
प्रेमद्रुमाः संरुरुहुः प्रियाणाम् ॥ ५ ॥

५. ईर्ष्येति ॥ स्थिरं यथा तथा बद्धमूलाः कारणदार्ढ्यादुच्छेद्यमूला इत्यर्थः। प्रियाणां प्रेयसीनां प्रेमाण एव द्रुमाः प्रेमद्रुमा रागमहीरुहा ईर्ष्यया विरुग्णा मानकुठारेण छिन्ना अत एव निरस्ता लुप्ता निःशेषाः सुखान्येव प्रताना विटपा येषां ते सन्तो नेत्रजलैः प्रसेकाः सेचनानि तैराप्यायिता आह्लादिताः सन्तः संरुरुहुश्छिन्नबदरीवत्पुनः प्ररूढा इत्यर्थः। तैरेव कोपस्य क्षालितत्वादिति भावः। एता अपि कलहान्तरिता एव नायिकाः ॥

ततः समाशङ्कितविप्रयोगैः[२]
पुनर्नवीभूतरसोऽवितृष्णः[३]।
स्मरस्य सन्तं पुनरुक्तभावं
नावर्त्तमानस्य विवेद[४] लोकः ॥ ६ ॥

६. तत इति ॥ ततो मानशान्त्यनन्तरं समाशङ्कितविप्रयोग उत्प्रेक्षित-प्रातरागामिविरहोऽतः पुनर्नवीभूतरसोऽपूर्ववदुद्भूतरागोऽत एवावितृ-ष्णोऽनपेतगर्धो लोकः कामिजनोऽवर्त्तमानस्य पूर्वानुवर्त्तिन एव स्मरस्य मन्मथरागस्य सन्तं भवन्तं पुनरुक्तभावं पुनरुद्भूततां न चिचेत न विवेद किं त्वपूर्ववदरंस्तेत्यर्थः। चिति धातोर्भौवादिका-ल्लिट्। एतेन शृङ्गारावसायिनो[2] रागस्य रसिकभावः सूचितः ॥

---

१ सुख Com.
२ विप्रयोगी T4.
३ °ऽवितृप्तः c.
४ चिचेत T3, Com.

---

1 °नम् Th.
2 शृङ्गारस्थायिनो रागस्य रसो भावः सूचितः Th.

वृत्तौ प्रकाशं हृदये कृतायां[1]
सुखेन[2] सर्वेन्द्रियसंभवेन ।
संकोचमेवासहमानमस्था-[3]
दशक्तवद्वञ्चितमानि[4] चक्षुः ॥ ७ ॥

७. वृत्ताविति ॥ सुरतसुखपारवश्यान्मृगाक्षीणामक्षिनिमीलने सत्यु-त्प्रेक्षते। सर्वेन्द्रियसंभवेन सर्वेन्द्रियाधीनशब्दादिविषयोपलम्भसंभवेने-त्यर्थः। सुखेन कर्त्रा मानसवेद्येन वृत्तौ स्वसंवित्तौ प्रकाशं व्यक्तं यथा तथा हृदयेऽन्तःकरणे गतायां प्राप्तायाम्। हृदयेनैव सुखेऽनुभूते सती-त्यर्थः। वञ्चितं प्रतारितमात्मानं मन्यत इति वञ्चितमानि ॥ "आत्म-माने खश्च" इति चकाराण्णिनिः ॥ चक्षुश्चक्षुरिन्द्रियमसहमानं स्वसु-खस्यान्यगामित्वममृष्यमाणं सदशक्तवदन्यगामिस्वार्थसाधनासमर्थ-जनवत्संकोचो निमीलनमौदासीन्यं च तमेवास्थात् प्रापत्। सुखपारव-श्यनिमित्तस्य निमीलनस्योक्तासहनहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा ॥

पीने भटस्योरसि वीक्ष्य भुग्ना-
स्तनुत्वचः पाणिरुहान् सुमध्या ।
इच्छाविभङ्गाकुलमानसत्वा-
द्भर्त्रे नखेभ्यश्च चिरं जुजूरे ॥ ८ ॥

८. पीन इति ॥ सुमध्या काचित् कृशोदरी भटस्य सुरतशूरस्य प्रियस्य पीने पीवर उरसि भुग्नान्कठिनोरःप्रतिघातेन भुग्नाग्रान् न तु प्रविष्टांस्ततस्तनुत्वचो दुर्बलत्वक्कान् पाणिरुहान् स्वनखान्वीक्ष्येच्छायाः कृतप्रतिचिकीर्षाया भङ्गेनाकुलमानसत्वाद् भर्त्रे स्वाङ्गे नखक्षतकर्त्रे प्रेयसे नखेभ्यश्चाकिंचित्करेभ्यश्चिरं जुजूरे चुकोपेत्यर्थः। जूरी हिंसा-वयोहान्योरिति धातोर्दैवादिकाल्लिटि तङ्। हिंसार्थेन तन्मूलं कोपो लक्ष्यते मुख्यार्थस्यानन्वयात्। क्रियाग्रहणमपि कर्त्तव्यमिति संप्रदा-

---

१ गतायां Com.
२ दुःखेन T2.
३ °मस्थाद° N., C., T1, T3, B.
४ °द्विशक्तिवत् T2.

नत्वाद् भर्त्रे नखेभ्य इति चतुर्थी । "क्रुधद्रुह—" इत्यादिनेति जयमङ्गलादयस्तदसत् कोपस्य लाक्षणिकत्वाद्यं प्रति कोप इति नियमाच्च । नायिका प्रगल्भा ॥

स्रस्ताङ्गचेष्टो विनिमीलिताक्षः[1]
स्वेदाम्बुरोमोद्गमगम्यजीवः[2] ।
अशेषनष्टप्रतिभापटुत्वो[3]
गाढोपगूढो दयितैर्जनोऽभूत्[4] ॥ ९ ॥

९. स्रस्तेति ॥ प्रियैरुपगूढः प्रमदाजनः स्रस्ताङ्गचेष्टो नष्टाङ्गचेष्टः । एतेन स्तम्भाख्यः सात्त्विकभाव उक्तः । 'स्तम्भस्य निष्क्रियाङ्गत्वम्' इति लक्षणात् । निमीलिताक्षः सुखपारवश्यादिति भावः । स्वेदाम्बुरोमोद्गमाभ्यां गम्योऽनुमेयो जीवो जीवनं यस्य सः । आनन्दपारवश्यान्मृतकल्प इत्यर्थः । अशेषं यथा तथा नष्टं प्रतिभामहत्त्वं ज्ञानशक्तिर्यस्य स ईदृगवस्थोऽभूत् । एतेन सात्त्विकोदय उक्तः । तदुक्तम् । 'स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्त्तिताः ॥' इति ॥

तमः[5] प्रसुप्तं[6] मरणं सुखं नु
मूर्च्छा नु माया नु मनोभवस्य ।
किं तत्कथं वेत्त्युपलब्धसंज्ञा[7]
विकल्पयन्तोऽपि न संप्रतीयुः ॥ १० ॥

१०. तम इति ॥ ततस्तादृक्सुखपारवश्यानन्तरमुपलब्धसंज्ञाः प्राप्तबोधाः सन्तः । तमः इति पाठे तमोऽन्धकारं वेति योज्यम् । सुषुप्तं सुषुप्त्यवस्था । भावे क्तः । मरणं वा सुखं नु सुखाद्वैतं वा

१ प्रनिमीलिताक्षः T_2.
२ गम्यसंज्ञः D.
३ पटुत्वं T_3, T_4.
महत्वः Com.
४ प्रियोपगूढःप्रमदाजनोऽभूत् T_2, T_3, Com.
५ ततः Com.
६ सुषुप्तं T_2, T_4, Com.
७ वेत्यु° D., B.

मूर्च्छा नु मूर्च्छावस्था वा मनोभवस्य माया नु व्यामोहनं वेति विकल्पयन्तः सर्वज्ञानोपरमादिदं बहुधा वितर्कयन्तोऽपि तदवस्थास्वरूपं किं किंरूपं कथं कीदृशं वेति न संप्रतीयुः इदमीदृगिति न निश्चिक्युरिति शृङ्गारस्यातिभूमिरुक्ता । अनिश्चयाच्छुद्धसंशयोऽलंकारः ॥

वक्षः स्तनाभ्यां मुखमाननेन
गात्राणि गात्रैर्घटयन्नमन्दम् ।
स्मरातुरो नैव तुतोष लोकः
पर्याप्तता प्रेम्णि कुतो विरुद्धा ॥ ११ ॥

११. वक्ष इति ॥ स्मरातुरः कामार्त्तो लोकः कामुकजनो वक्षः स्वकीयं स्तनाभ्यां मुखं स्वकीयमाननेन कान्तामुखेन गात्राणि स्वकीयानि गात्रैस्तदीयैरमन्दं घटयन् निरन्तरं संश्लेषयन् नैव तुतोष । तथाहि प्रेम्णि प्रेमास्पदे वस्तुनि विरुद्धा व्याहता पर्याप्तता संपूर्णता कुतः । अतिभोगेऽप्यलंबुद्धिर्न जायत एव प्रेमपर्याप्त्यव्याघातादिति भावः । अर्थान्तरन्यासोऽलंकारः ॥

स्रस्ताङ्गयष्टिः[1] परिरभ्यमाणा
संदृश्यमानाप्युपसंहृताक्षी ।
अनूढमाना[2] शयने नवोढा
परोपकारैकरसैव[3] तस्थौ ॥ १२ ॥

१२. स्रस्तेति ॥ नवोढा नायिका परिरभ्यमाणा प्रियेणालिङ्ग्यमाना सती स्रस्तोपेक्षिता न तु प्रत्यालिङ्गनप्रवृत्ताङ्गयष्टिर्यस्याः सा सन्दृश्यमाना सम्यगीक्ष्यमाणाप्युपसंहृताक्षी निमीलितलोचना न तु प्रतिपश्यन्ती । किं कोपात् । नेत्याह । अनूढमानाकृतकोपा । अत्र लज्जाविजितमन्मथत्वादिति भावः । तथापि सा शयन एकशय्यायां परो-

१ मुक्ताङ्गयष्टिः T2, T3, T4.
२ अगूढ° B., D.
अरूढ° E3.
आरूढ° T2, T4.
३ रसेव B., T4.

एकारे प्रियानुरञ्जनरूप एकरसा मुख्यानुरागिण्यभूत् । [1]प्रतिकूलापि प्रियमनोहराभूदित्यर्थः ॥

आलिङ्गितायाः[१] सहसा त्रपावां[२]-
त्रासाभिलाषानुगतो रतादौ ।
विश्वासितायां[३] रमणेन वध्वा
विमर्दरम्यो मदनो बभूव ॥ १३ ॥

१३. आलिङ्गितायामिति ॥ रतादौ सुरतारम्भे रमणेन वध्वां सहसा हठादालिङ्गितायां सत्यां मदनस्त्रपावांस्त्रासाभिलाषाभ्यां साध्वसरागाभ्यामनुगतो बभूव । [2]प्रथमसंगमात् त्रपात्रासौ कामादभिलाषस्तत्संकीर्णोऽभूदित्यर्थः । ततो मदनो रमणेन विश्वासितायां विस्रम्भितायां वैयात्यं गमितायामित्यर्थः । विमर्देन विस्रम्भविहारेण रम्यो बभूव । एषा च मुग्धा नायिका लज्जाविजितमन्मथा कथंचिदुद्बुद्धमन्मथाभूदिति भावः ॥

सामोन्मुखेना[४]च्छुरिता प्रियेण
दत्ते[५]ऽथ काचित्पुलकेन भेदे[६] ।
अन्तः प्रकोपापगमाद्विलोला
वशीकृता केवलविक्रमेण[७] ॥ १४ ॥

१४. अथ काचित्कुपिता प्रियेण सामाद्युपायचतुष्टयेन साधितेत्याह । सामेति ॥ अथ काचित्कुपिता सामोन्मुखेन सान्त्वपूर्वेण प्रियेणाच्छुरिता नखैः परामृष्टा सती दत्तेन पुलकेन पुलकदानेनेत्यर्थः । भेदे रोमभेदे सत्येवं

---

१ आलिङ्गितायां Com.
२ त्रपायां T_3.
३ विश्वासितायां रमणेन वध्वां Com.
४ मासोन्मु° c.
कामोन्मु° E_3.
५ दत्तेन Com.
६ देहे T_2, T_4.
७ विभ्रमेण Noticed by c.
14 and 15 verses are omitted in T_3.

---

1 प्रतिकूलापीयं मनोह° Th.
2 प्रथममभिलाषत्रासौ कामादभिलाषो नूतनत्वात् त्रासस्तत्संकीर्णोऽभूदित्यर्थः Second Com.

सामदानभेदैरन्तर्मनसि प्रकोपस्यापगमाद्विलोला धैर्यच्युता सती केवलेन विक्रमेण बलाद्ग्रहणेन चतुर्थोपायेन वशीकृता वशं गमिता । एतेन विस्रम्भसंभोग उक्तः । प्रस्तुतस्त्रीपुरुषविशेषणैरप्रस्तुतारिजिगीषुनायकप्रतीतेः समासोक्तिरलंकारः । लक्षणं तूक्तम् ॥

गुरुर्दधाना पौरुषत्वमन्या[1]
कान्तापि कान्तेन्दुकराभिमृष्टा[2] ।
प्रह्लादिता चन्द्रशिलेव तूर्णं
क्षोभात्स्रवत्स्वेदजला बभूव ॥ १५ ॥

१५. गुरुरिति ॥ अथ गुरुर्नितम्बगुर्व्यन्या काचित्कान्ता पुरुषत्वं दधाना पुरुषायितमाचरन्ती कान्त इन्दुरिव तस्य करेणांशुनेव करेण हस्तेनाभिमृष्टा । चन्द्रशिलेवेत्युपमालिङ्गादुपमितसमासः । अत एव प्रह्लादिता अन्तराप्यायिता सती चन्द्रशिला चन्द्रकान्तशिलेव तूर्णं क्षोभात् सत्त्वविकारविशेषात् स्रवत्स्नेहजला बभूव । एतेन सुरतातिभूमिरुक्ता । नायिका च प्रगल्भा अत एव स्मरजितव्रीडा । उपमालंकारः ॥

शशाङ्कनाथापगमेन धूम्रां
मूर्च्छापरीतामिव निर्विवेकाम् ।
ततः सखीव[1] प्रथितानुरागा
प्राबोधयद् द्यां मधुरारुणश्रीः ॥ १६ ॥

१६. शशाङ्केति ॥ शशाङ्को नाथ इवेत्युपमितसमासः सखीवेत्युपमालिङ्गात् । तस्यापगमेन वियोगेन धूम्रां धूसरां विवर्णामित्यर्थः । अत एव मूर्च्छापरीतां मूर्च्छाक्रान्तामिव निर्विवेकामविविक्तरूपां विवेकशून्यां च द्यामाकाशं नायिकां चेति गम्यते । ततो मूर्च्छानन्तरं प्रथिता-

१ पुरुषत्वम्° T4, Com.
२ कान्ता च D.
कान्तेन B.

१ सुखन्ती D.
सुखीव E3.

नुरागा व्यक्तरागा प्रकटितस्नेहा च मधुरा रम्या अरुणश्रीररुणोदयलक्ष्मीः सखीव प्राबोधयत् प्रसन्नां विमूर्च्छां चाकरोदित्यर्थः। उपमालंकारः॥

> अवीततृष्णोऽथ परस्परेण
> क्षणादिवायातनिशावसानः[1]।
> दुःखेन लोकः परवानिवागात्
> समुत्सुकः स्वप्ननिकेतनेभ्यः॥ १७॥

१७. अवीतेति॥ अथारुणोदयानन्तरं परस्परेण मिथोऽवीततृष्णोऽनु-[1]पगतान्योन्यसंगमाभिलाषस्तथा सत्येव क्षणादिवायातनिशावसानः क्षणप्रायगतरात्रिक इत्यर्थः। अत एव समुत्सुकः समागमोत्सुको लोकः स्त्रीपुंसलोकः परवानिव परतन्त्र इव स्वप्ननिकेतनेभ्यो निद्रागृहेभ्यो दुःखेनागान्निरगात्॥

> अर्धोत्थितालिङ्गितसन्निमग्नो[2][3]
> रुद्धः पुनर्यान् गमनेऽनभीप्सुः।
> व्याजेन निर्याय पुनर्निवृत्त-
> स्त्यक्तान्यकार्यः स्थित एव कश्चित्॥ १८॥

१८. अर्धेति॥ कश्चित्कामी अर्धं यथा भवति तथोत्थितः शयनादुद्गतः सन्नेवालिङ्गितः प्रियया आश्लिष्टः स चासौ संनिमग्नः सुखमग्नश्च तथापि पुनर्यान् निर्गच्छन् रुद्धः प्रियया निरुद्धगमनो निर्गमनेऽनभीप्सुरनीप्सुस्तथापि निर्याय निर्गत्य। यातेः समासे निःपूर्वे ल्यप्। व्याजेन क्षुतादिमिषेण पुनर्निवृत्तस्त्यक्तान्यकार्यः सन् स्थित एव तथैव स्थितः। अहो कामस्य महिमेति भावः॥

१ °वसानम् T_2.
२ अर्धोत्थितो पिङ्गलसं° T_4.
३ °तालिङ्गन T_3.

1 ऽनव° Th.

तालेन संपादितसाम्यशोभं
शुभावधानं स्वरबद्धरागम् ।
पदैर्गतार्थं नृपमन्दिरेषु
प्रातर्जगुर्मङ्गलवत्तरुण्यः ॥ १९ ॥

१९. तालेनेति ॥ तरुण्यो मङ्गलगायिकाः प्रातः प्रभाते नृपमन्दिरेषु प्रभुगृहेषु तालेन तालक्रियामानेन संपादिता साम्यशोभा लयश्रीर्यस्मिंस्तत् शुभमवधानमेकाग्रता यस्मिंस्तत् स्वरैः षड्जादिभिर्बद्धरागं संपादितरञ्जनं पदैर्वाचकैर्गतार्थमवगतवाच्यं मङ्गलवन्मङ्गलगीतं जगुरगायन् ॥

दुरुत्तरे पङ्क इवान्धकारे
मग्नं जगत्संततरश्मिरज्जुः ।
प्रनष्टमूर्त्तिप्रविभागमुद्यन्
प्रत्युज्जहारेव ततो विवस्वान् ॥ २० ॥

२०. दुरुत्तरेति ॥ ततोऽरुणोदयानन्तरमुद्यन् विवस्वान्सूर्यो दुरुत्तरे दुस्तरे पङ्क इवान्धकारे मग्नमत एव प्रणष्टमूर्त्तिप्रविभागं प्रविलुप्तकुम्भस्तम्भादिस्वरूपभेदं जगल्लोकं संतता विस्तारिता रश्मय एव रज्जवो येन स सन् प्रत्युज्जहारेव रश्मिरज्जुभिः प्रत्युद्धृतवान् किमित्युपमासंकीर्णेयमुत्प्रेक्षा ॥

पीतौष्ठरागाणि हृताञ्जनानि ।
भास्वन्ति लोलैरलकैर्मुखानि ।
प्रातः कृतार्थानि यथा विरेजु-
स्तथा न पूर्वेद्युरलंकृतानि ॥ २१ ॥

१ याम्य D.
२ °धानस्वर° C.
°वधानं स्वर T2, T4.
३ मङ्गलबद्धरङ्गम् T4.
४ प्रणष्ट C., E3.
५ पुनर्विवस्वान् T2, T3.
६ पीतोष्ठ° T2, T3, T4.
वीतोष्ठ D., Com.

२१. वीतेति ॥ वीतोष्ठरागाणि पानविलुप्ताधररागाणि हृताञ्जनान्यक्षिचुम्बनविलुप्तकज्जलानि लोलैः प्रियाकर्षणविलुलितैरलकैरुपलक्षितानि तथापि भास्वन्ति कान्तिमन्ति कृतार्थानि प्रियोपभोगात्सफलानि मुखानि वधूमुखानि प्रातर्यथा विरेजुस्तथा पूर्वेद्युः प्रदोषसमयेऽलंकृतानि न विरेजुरकृतार्थत्वादिति भावः। प्रियसमागमसफलमण्डनानां कामिनीनां लुलितमण्डनतैव मण्डनमिति भावः ॥

प्रजागराताम्रविलोचनान्ता
निरञ्जनालक्तकपत्रलेखाः ।
तुल्या इवासन्परिखेदतन्व्यो
वासच्युताः सेवितमन्मथाभिः ॥ २२ ॥

२२. प्रजागरेति ॥ प्रजागरेण प्रियप्रतीक्षाकृतनिद्राक्षयेण अन्यत्र रतिविहारकृतेन चाताम्रविलोचनान्ता रक्तलोचना निरञ्जनालक्तकपत्रलेखा एकत्र रोदनादन्यत्र विमर्दाच्च निर्मृष्टाञ्जनादिमण्डनाः परिखेदवत्यः एकत्र विप्रलम्भदुःखवत्यः अन्यत्र रतिश्रमवत्यः वासच्युताः प्रियसहवासभ्रष्टा विप्रलब्धनायिकाः सेवितमन्मथाभिः प्रियसंगताभिः सह तुल्या इवासन्। एताश्च नायिका विप्रलब्धाः । 'क्वचित्संकेतमावेद्य दयितेनाथ वञ्चिता। स्मरार्त्ता विप्रलब्धेति कलाविद्भिरुदीरिता'[1] ॥ इति लक्षणात् ॥

आबद्धनेत्राञ्जनपङ्कलेशै-
स्ताम्बूलरागं बहुलं दधानः ।
चकार कान्तोऽप्यधरोऽङ्गनानां
सहोषितानां पतिभिर्लघुत्वम् ॥ २३ ॥

१ परिखेदवत्यो Com.
२ लेखः C., c.
३ बहलं D.
४ पतिभिर्वियुक्तम् T₂.

1 °द्भिः प्रकीर्तिता ॥ Th.

२३. आबद्धेति ॥ आबद्धोऽश्रुपातसंक्रान्तो नेत्राञ्जनपङ्कलेशो यस्मिन्स बहुलं प्रियपानाभावात्सान्द्रं ताम्बूलरागं दधानः पतिभिः सहोषितानां सह शयितानामङ्गनानां कान्तो रम्योऽप्यधरो लघुत्वमल्पत्वं संभोगाभावलाघवं चकार सूचयांचकारेत्यर्थः । अस्याश्च रोषादगृहीतप्रार्थनायाः सहोषिताया एव रुदत्या रात्रिर्गतेत्यनुसंधेयम् ॥

चक्षूंषि कान्तान्यपि साञ्जनानि
ताम्बूलरक्तं च सरागमोष्ठम् ।
कुर्वन् सवासं च सुगन्धि वक्त्रं
चक्रे जनः केवलपक्षपातम् ॥ २४ ॥

२४. चक्षूंषीति ॥ कान्तानि निसर्गसुन्दराण्यपि चक्षूंषि साञ्जनानि सरागं स्वभावरक्तमोष्ठं ताम्बूलरक्तं च सुगन्धि निसर्गसुरभि वक्त्रं च सवासं वासनासमेतं गन्धान्तरवासितं कुर्वन् जनः कामिनीजनः केवलं पक्षपातं ममतां चक्रे । अत्राकिञ्चित्कराञ्जनादीनां करणविरोधस्य पक्षपातनिबन्धनत्वेनाभासीकरणाद्विरोधाभासोऽलंकारः ॥

क्षतैरसंचेतितदन्तलब्धैः
संभोगकालेऽवगतैः प्रभाते ।
अशङ्कतान्योन्यकृतं व्यलीकं
वियोगबाह्योऽपि जनोऽतिरागात् ॥ २५ ॥

२५. क्षतैरिति ॥ संभोगकालेऽसंचेतितै रागान्ध्यादज्ञातैर्दन्तलब्धैर्दन्तकृतैः क्षतैर्निमित्तैर्जनः स्त्रीपुंसजनोऽतिरागाद् वियोगबाह्योऽप्यवियुक्तोऽपि सन्नन्योन्यकृतं व्यलीकं दन्तक्षतापराधमशङ्कत मया न कृतमेतत्कुत आगतमिति क्रियाकालापरिज्ञानात्समशेतेति रागातिरेकोक्तिः ॥

१ संगतानि T4.
२ युक्तं T2, T3, T4.
३ आशङ्कता° D., T2.
४ °कृतव्यलीकं C.
५ °ऽतिरागः E3.

नेत्रेषुभिः संयुतपक्ष्मपत्रैः
कर्णान्तकृष्टैरुरुकेशशूलाः ।
स्तनोरुचक्रास्ततकर्णपाशाः
स्त्रीयोधमुख्या जयिनो विचेरुः ॥ २६ ॥

२६. नेत्रेति ॥ संयतानि बद्धानि पक्ष्माण्येव पत्राणि येषां तैः कर्णान्तकृष्टैः कर्णान्तविश्रान्तैर्नेत्रैरेवेषुभिरुपलक्षिता उरवः केशाः शिरोरुहा एव शूलानि शूलायुधानि येषां ते स्तना एवोरूणि चक्राणि चक्रायुधानि येषां ते ततः कर्णा एव पाशाः पाशायुधानि येषां ते जयिनः जयशीलाः स्त्रिय एव योधमुख्याः सुरतसमरवीरभटश्रेष्ठा विचेरुः विजह्रुः । रूपकालंकारः ॥

पयोधरांश्चन्दनपङ्कदिग्धान्
वासांसि चाम्लिष्टमृजानि दृष्ट्वा ।
स्त्रीणां सपत्न्यो जहृषुः प्रभाते
मन्दायमानानुशयैर्मनोभिः ॥ २७ ॥

२७. पयोधरानिति ॥ स्त्रीणामलब्धसङ्गमानां सपत्नीनां चन्दनपङ्केन दिग्धान् लिप्तान् । अविमर्दादविलुप्तचन्दनानित्यर्थः । पयोधरान् स्तनान् । अम्लिष्टा विस्पष्टा अविमर्दादेव अविपर्यस्ता मृजा शुद्धिर्येषां तानि वासांसि च सपत्न्यो लब्धसंगमा इति भावः । प्रभाते दृष्ट्वा मन्दायमानः क्षीयमाणोऽनुशयोऽक्षमा येषु तैर्मनोभिर्जहृषुः । विफलप्रसाधना एता इति संहृष्टा इत्यर्थः ॥

स्मरातुरे चेतसि लब्धजन्मा
रराज लोलोऽपि गुणापहार्यः ।
कुतूहलान्नेत्रगवाक्षसंस्थः
पश्यन्निवान्योन्यमुखानि रागः ॥ २८ ॥

१ संयत° c., T_3, Com.
२ पक्ष D., E_3, T_4.
३ कण्ठान्त° T_3.
४ °चूडा T_4.
५ कण्ठपाशाः T_3.
६ विरेजुः E_3.
७ चाम्लिष्ट E_3, c., Com.

२८. अथ मानसानुरागस्य नेत्रानुरागभेदेन कामिमुखदर्शित्वमुत्प्रेक्षते । स्मरेति ॥ स्मरातुरे कामार्त्ते चेतसि लब्धजन्मा जातो लोलोऽस्थिरोऽपि गुणापहार्यो गुणप्रलोभनीयो गुणिनि वस्तुनि विषये स्थिर इत्यर्थः । ईदृशो रागोऽनुरागः कुतूहलात्कौतुकात् नेत्रयोरेव गवाक्षयोः संस्था स्थितिर्यस्य सोऽन्योन्यनेत्रगवाक्षगतः सन्नन्योन्यमुखानि स्त्रीपुंसमुखानि पश्यन्निव रराजेति रागद्वयस्याभेदाध्यवसायादतिशयोक्तिमूलेयमुत्प्रेक्षेति संकरः ॥

गतेऽतिभूमिं प्रणये प्रयुक्ता-
नबुद्धिपूर्वं परिलुप्तसंज्ञः ।
आत्मानुभूतानपि नोपचारान्
स्मरातुरः संस्मरति स्म लोकः ॥ २९ ॥

२९. गत इति ॥ स्मरातुरो लोकः कामिजनः प्रणये विस्रम्भेऽतिभूमिं परमां काष्ठां गते सति । 'प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाणः' इत्यमरः । अबुद्धिपूर्वं रागान्ध्याद्विवेकपूर्वं प्रयुक्तानात्मानुभूतानपि तत्कालानुभूतानप्युपचारान् नखदन्तादिकर्माणि परिलुप्तसंज्ञः संप्रति नष्टसंस्कारः सन् न संस्मरति स्म । मूढावस्थानुभूतस्य कुतः स्मृतिरिति भावः ॥

वस्त्रैरनत्युल्वणरम्यवर्णै-[1]
र्विलेपनैः सौरभलक्षणीयैः ।
आस्यैश्च लोकैः[2] परितोषकान्तै-
रसूचयैल्लब्धपदं[3] रहस्यम् ॥ ३० ॥

३०. वस्त्रैरिति ॥ लोकः कामुकलोकोऽनत्युज्ज्वलवर्णैः परिमृदितत्वादनतिविमलैस्तथापि रम्यैर्मनोहरैः वस्त्रैः सौरभलक्षणीयैः परिमलानुमेयैर्विलेपनैः परितोषेण सुरतसंतोषेण कान्तैः प्रसन्नैरास्यैश्च रहसि भवं

१ °रनत्युज्ज्वलवर्णरम्यै° T2, T3, T4, Com.
२ लोकाः D.
३ °रसूचयँल्ल° D.

रहस्यं सुरतं लब्धपदं लब्धास्पदमसूचयत् । तासां संभोगशृङ्गारो लिङ्गानुमेयोऽभूदित्यर्थः ॥

प्रातस्तरां चन्दनलिप्तगात्राः
प्रच्छाद्य[1] हस्तैरधरान्[2] वदन्तः[3] ।
श्राम्यन्निमेषाः सुतरां युवानः
प्रकाशयन्ति स्म निगूहनीयम् ॥ ३१ ॥

३१. प्रातस्तरामिति ॥ प्रातस्तरामत्यन्तप्रातःकाले सूर्योदयात् प्रागेवेत्यर्थः । अव्ययत्वादाम्प्रत्ययः । चन्दनलिप्तगात्रा नखक्षतनिगूहनायेति भावः । हस्तैरधरं प्रच्छाद्य वदन्तः । दन्तक्षतनिगूहनार्थमिति भावः । श्राम्यन्निमेषा रात्रिजागरपिशुननिद्रानिह्नवार्थमकृतनिमेषा इत्यर्थः । युवानो निगूहनीयं गोप्यं सुतरां प्रकाशयन्ति स्म । यन्निगूह्यनिगूहनार्थं चेष्टितं तदेव तत्प्रकाशं जातमिति विरुद्धकार्यस्योत्पत्तिरूपो विषमालंकारः ॥

जितेऽपि[4] लोके मधुरेण वामे
किमुद्यतं भ्रूधनुरप्रसह्यम् ।
हन्तुं क्षमो वा वद लोचनेषु-
र्दिग्धो विषेणेव किमञ्जनेन ॥ ३२ ॥

३२. साम्नेति ॥ हे वामे वक्रशीले साम्नैव येन केनचिदृजुचेष्टितेनैव लोके कामिजने जितेऽप्यप्रसह्यं दुःसहं भ्रूरेव धनुर्भ्रूधनुः किमुद्यतं किमर्थमुत्क्षिप्तं किं च हन्तुं क्षमः केवल एव समर्थो लोचनेषुर्नेत्रबाणो विषेणेवाञ्जनेन किं किमर्थं दिग्धो लिप्तः । कररुहसाध्ये किं परशुनेति भावः ॥

---

१ संछाद्य B.
२ °रधरं Com.
३ वदन्त्यः C.
४ साम्नैव लोके विजितेऽपि वामे N., T₃, T₄, Com.
५ साम्ना D.

दन्तच्छदे प्रज्वलिताग्निकल्पे
ताम्बूलरागस्तृणभारतुल्यः ।
न्यस्तः किमित्यूचुरुपेतभावा
गोष्ठीषु नारीस्तरुणीर्युवानः ॥ ३३ ॥

३३. दन्तेति ॥ उपेतभावा युक्तानुरागा युवानो गोष्ठीषु नर्मगोष्ठीषु तरुणीस्तरुणवयस्का नारीः प्रज्वलिताग्निकल्पे दन्तच्छदेऽधरे तृणभारतुल्यस्ताम्बूलरागः किमिति न्यस्त इत्यूचुः पूर्ववद्भावः ॥

सुखावगाहानि युतानि लक्ष्म्या
शुचीनि संतापहराण्युरूणि ।
प्रबुद्धनारीमुखपङ्कजानि
प्रातः सरांसीव गृहाणि रेजुः ॥ ३४ ॥

३४. सुखेति ॥ सुखावगाहानि सुखकरप्रवेशानि लक्ष्म्या शोभया भृतानि पूर्णानि शुचीनि निर्मलानि संतापहराणि छायया शैत्येन च तापहारीणि उरूणि विपुलानि प्रबुद्धानि विनिद्राणि नारीमुखान्येव नारीमुखानीव च पङ्कजानि येषां तानि गृहाणि प्रातः सरांसीव रेजुः ॥

संमृष्टसिक्तार्चितचारुपुष्पै-
रामोदवद्द्रव्यसुगन्धभागैः ।
लक्ष्मीर्विजिग्ये भवनैः सभृङ्गैः
सेव्यस्य देवैरपि नन्दनस्य ॥ ३५ ॥

३५. संमृष्टेति ॥ संमृष्टानि विरजीकृतानि च तानि सिक्तानि च तानि च तान्यर्पितचारुपुष्पाणि विन्यस्तरम्यकुसुमानि च तैः । उभयत्रापि पूर्वकालसमासः । आमोदवद्भिः कस्तूर्यादिपरिमलद्रव्यैः सुगन्धाः शोभनगन्धा भागाः प्रदेशा येषां ते । गन्धस्येत्वे तदेकान्तग्रहणात्सां-

१ भार° T_3.
२ भृतानि Com.
३ संसृष्ट E_3.
४ °र्पित° Com.
५ सुगन्धि B., T_2.

कामिके तद्भावः । सभृङ्गैः गन्धाकृष्टभृङ्गैर्भवनैर्देवैरपि सेव्यस्य नन्दनस्य लक्ष्मीर्विजिग्ये विजिता ॥

अक्ष्णोः पतन्नीलसरोजलोभा-
द्भृङ्गः करेणाल्पधिया निरस्तः ।
ददंश[1] ताम्राम्बुरुहाभिसन्धि-
स्तृष्णातुरः पाणितलेऽपि[2] धृष्णुः ॥ ३६ ॥

३६. अक्ष्णोरिति ॥ नीलसरोजं नीलोत्पलमिति लोभादक्ष्णोः पतन्नल्पधिया मूढया कयाचित्करेण निरस्तस्तृष्णातुरः पिपासार्त्तो धृष्णुर्धृष्टो भृङ्गस्ताम्राम्बुरुहमित्यभिसन्धिरभिप्रायो यस्य तथा भ्रान्तः पाणितलेऽपि । अक्ष्णोरिवेति भावः । ससञ्ज संसक्तः । ददंशेति पाठे दष्टवानित्यर्थः । उभयत्र भ्रान्तिमानलंकार इति सजातीयसंसृष्टिः ॥

विलोलतां चक्षुषि हस्तवेपथुं
भ्रुवोर्विभङ्गं स्तनयुग्मवल्गितम् ।
विभूषणानां क्वणितं च षट्पदो
गुरुर्यथा नृत्यविधौ[3] समादधे ॥ ३७ ॥

३७. विलोलतामिति ॥ षट्पदो नृत्यविधौ नृत्यकर्मणि गुरुर्यथा गुरुरिव नाट्याचार्य इव चक्षुषि दृष्टौ विलोलतां चाञ्चल्यं हस्तवेपथुं हस्तचलनं भ्रुवोर्विभङ्गं कौटिल्यं स्तनयुग्मे वल्गितमुत्पतनं विभूषणानां क्वणितं च समादधे निदधे । गुरुर्यथेत्युपमालंकारः ॥

अथानुकूलान् कुलधर्मसंपदो[4]
विधाय वेशान्[5] सुदिवः पुरीजनः ।
प्रबोधकाले शतमन्युविद्विषः
प्रचक्रमे राजनिकेतनं प्रति ॥ ३८ ॥

---

१ ससञ्ज Com.
२ ऽतिधृष्णुः T2.
३ नृत्तविधौ T2, T3.
४ कुलधर्मसंपदां T3, T4, Com.
५ वेषान् D., Com.

३८. अथेति ॥ अथ प्रभातानन्तरं शोभनं नित्यमङ्गलं दिवा दिनं यस्य स सुदिवः ॥ "सुप्रातसुश्वसुदिव—" इत्यादिना बहुव्रीहिसमासेऽच्प्रत्ययान्तो निपातः ॥ पुरीजनो लङ्कानिवासिजनः कुलधर्मसंपदां वंशाचारविभूतीनामनुकूलाननुरूपान्वेषान् नेपथ्यानि विधाय शतमन्युविद्विष इन्द्रशत्रो रावणस्य प्रबोधकाले राजनिकेतनं प्रति राजभवनमुद्दिश्य प्रचक्रमे गन्तुं प्रक्रान्त इत्यर्थः ॥ "प्रोपाभ्यां समर्थाभ्याम्" इति तङ् ॥

शैलेन्द्रशृङ्गेभ्य इव प्रवृत्ता
पूरा[1] जलानां पुरमन्दिरेभ्यः[2]।
आपूर्य रथ्याः[3] सरितो[4] जनौघा[5]
राजाङ्गनाम्भोधिमपूरयन्त ॥ ३९ ॥

३९. शैलेति ॥ शैलेन्द्रशृङ्गेभ्यः प्रवृत्ता निसृता जलानां पूरा ओघा इव पुरमन्दिरेभ्यः प्रवृत्ता निर्गता जनौघा जनसमूहा रथ्याः सरित इव रथ्यासरितः। उपमितसमासः। आपूर्य पूरयित्वा राज्ञामङ्गणमम्भोधिमिव राजाङ्गणाम्भोधिमपूरयन्त ॥

संबोधकालात्[7] त्रिदशेन्द्रशत्रोः
प्रागूर्ध्वशोषं परिशुष्यमाणाः[8]।
हीना महान्तश्च समत्वमीयु[9]—
र्द्रागस्थैरवज्ञापरुषाक्षिदृष्टाः[10] ॥ ४० ॥

४०. संबोधेति ॥ त्रिदशेन्द्रशत्रो रावणस्य संबोधकालात्प्रबोधकालात्प्राक् पूर्वमूर्ध्वाः शुषित्वोर्ध्वशोषम् ॥ "ऊर्ध्वे शुषिपूरोः" इति णमुलप्र-

---

१ वेगाज्जलौघाः N., C., T1, T4.
वेगाज्जनौघाः c., D.
२ मन्दिरस्य D.
३ मार्गान् T3, T4.
रथ्यासरितो c., Com.
४ परितो T4.
५ जलौघा c., D.
६ °आङ्गणा° Com.
७ प्रबोध N., C., T1, T4.
८ परिशोष्यमाणाः D., Com.
९ समं समीयुः Com.
१० द्रागस्थैः c., E3, Com.

त्ययः ॥ परिशोष्यमाणा ऊर्ध्वंश्व एव बालातपे स्थाप्यमाना इत्यर्थः । शुषेर्ण्यन्तात्कर्मणि लटः शानजादेशः । हीना अल्पा महान्तोऽधिकाश्च द्वारि तिष्ठन्तीति द्वाःस्था दौवारिकाः ॥ "सुपि स्थः" इति कप्रत्ययः ॥ "खरवसानयोर्विसर्जनीयः" ॥ "विसर्जनीयस्य सः" ॥ तैरवज्ञया अनादरेण परुषेणाक्ष्णा क्रूरचक्षुषा दृष्टाः सन्तः समं तुल्यकक्ष्यया समीयुः संगत्य स्थिता इत्यर्थः । न ह्यधिकारदृप्तानां न्यूनाधिकविचार इति भावः ॥

गुरूरुचञ्चत्करकर्णजिह्वै-
रवज्ञयाग्राङ्गुलिसंगृहीतैः ।
रक्षांस्यनायासहृतैरुपास्थुः
कपोललीनालिकुलैर्गजेन्द्रैः ॥ ४१ ॥

४१. गुर्विति ॥ अथ रक्षांसि राक्षसा गुरु दुर्भरमुरु महच्चञ्चच्चलच्च कराः कर्णा जिह्वाश्च करकर्णजिह्वं येषां तैरवज्ञया अनादरेण अग्राङ्गुल्या अङ्गुल्यग्रेण संगृहीतैरनायासेनाप्रयत्नेन हृतैः प्रचोदितैः[1] कपोलेषु लीनान्यलिकुलानि येषां तैर्मदस्राविभिरित्यर्थः । गजेन्द्रैः साधनैरुपतस्थुः सिषेविरे ॥

निकृत्तमत्ताद्रिपकुम्भमांसैः
संपृक्तमुक्तैर्हरयोऽग्रपादैः ।
आनिन्यिरे श्रेणीकृतास्तथान्यैः
परस्परं वालधिसंनिबद्धाः ॥ ४२ ॥

४२. निकृत्तेति ॥ तथा अन्यै राक्षसैर्निकृत्तानि निलूनानि मत्तद्विपकुम्भमांसानि यैस्तैः । अत एव संपृक्तमुक्तैः संसक्तमुक्ताफलैरग्रपादैः पादाग्रैरुपलक्षिताः । अश्रेणयः श्रेणयःकृताः श्रेणीकृताः पङ्क्तीकृताः ॥ "श्रेण्यादयः कृतादिभिः" इति च्व्यर्थे तत्पुरुषः ॥ परस्परं वालधिषु संनिबद्धा अन्योन्यपुच्छग्रथिता इत्यर्थः । हरयो वाहनभूताः सिंहा आनिन्यिर आनीताः ॥

---

१ कण्ठ T_3. | २ श्रेणिकृता c., D., E_3.

---

1 प्रबोधितैः K. Com.

उपेक्षिता देवगणैस्त्रसद्भि-
निशाचरैर्वीतभयैर्निकृत्ताः ।
तस्मिन्नदृश्यन्त सुरद्रुमाणां
[1]संजालपुष्पस्तबकाः [2]प्रकीर्णाः ॥ ४३ ॥

४३. उपेक्षिता इति ॥ त्रसद्भिरपचेतुं त्रस्यद्भिर्देवगणैरुपेक्षिताः परिहृता वीतभयैर्निर्भीकैर्निशाचरैस्तु निकृत्ताश्छिन्नाः सुरद्रुमाणां प्रफुल्लपुष्पस्तबकाः प्रकीर्णाः सन्तस्तस्मिन् राजाङ्गणेऽदृश्यन्त दृष्टाः । अत्र प्रस्तुतसुरकुसुमप्रक्षेपकार्यवर्णनात् प्रस्तुतमेव स्वर्गजयाख्यकारणं गम्यत इति पर्यायोक्तमलंकारः । 'कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् । प्रस्तुतत्वेन संबद्धं तत्पर्यायोक्तमुच्यते ॥' इति लक्षणात् ॥

निराकरिष्णुर्द्विजकु[3]ञ्जराणां
तृणीकृताशेषगुणोऽतिमोहात् ।
पापाशयानभ्युदयार्थमार्चीत्
प्राग्ब्रह्मरक्षःप्रवरान् दशास्यः ॥ ४४ ॥

४४. निरिति ॥ अतिमोहादतिमौढ्यात् तृणीकृताशेषगुणः पूजाहेतुत्वेनागणितगुणगरिमा अत एव द्विजकुञ्जराणां त्रैलोक्यपूज्यानां वसिष्ठादिद्विजश्रेष्ठानां पूजामिति शेषः । अन्यथा "न लोक—" इत्यादिनिषेधेन षष्ठीविरोधात् । निराकरिष्णुर्निराकर्त्ता । पूज्यपूजाव्यतिक्रमशील इत्यर्थः ॥ "अलंकृञ्—" इत्यादिना इष्णुच् ॥ केचित् सामान्येन निराकरिष्णुर्निराकरणशील इत्युक्त्वा सापेक्षत्वेऽपि गमकत्वात् समासं मत्वा द्विजकुञ्जराणां तृणीकृताशेषगुण इति योजयन्ति । दशास्योऽभ्युदयार्थं श्रेयोऽर्थं पापाशयान् पापचित्तान् ब्रह्मरक्षःप्रवरान् राक्षसब्राह्मणश्रेष्ठान् प्राक् सभाप्रवेशात्पूर्वमार्चीत् । अर्चेर्भौवादिकाल्लुङ् ॥ "इट ईटि" इति सलोपः ॥

---

१ प्रवालपुष्प° E2, T3, T4. प्रफुल्लपुष्प° Com.
२ विकीर्णाः D.
३ गजकु° T3.

मायाविभिस्त्रासकरैर्जनाना-
माप्तैरुपादानपरैरुपेतः।
सतां विघातैकरसैरविक्षत्
सदः परिक्षोभितभूमिभागम्[1] ॥ ४५ ॥

४५. मायाविभिरिति ॥ अथ दशास्यो मायाविभिः परवञ्चकैर्जनानां त्रासकरैर्वेषभाषादिभिर्भयंकरैः उपादानपरैः स्वामिनोऽर्थसंग्रहपरैः सतां साधूनां विघातैकरसैर्हिंसैकस्वभावैराप्तैः श्रद्धेयपुरुषैरुपेतः परिक्षोभितभूमिभागः पादन्यासप्रकम्पितभूतलः सन् सदः सभामविक्षत् विवेश। विशतेर्लुङि "शल इगुपधादनिटः क्सः" ॥

विधृतनिशितशस्त्रैस्तद्युतं यातुधानै-
रुरुजठरमुखीभिः संकुलं राक्षसीभिः।
श्वगणि[2]शतविकीर्णं वागुरावन् मृगीभि-
र्वनमिव सभयाभिर्देवबन्दीभिरासीत् ॥ ४६ ॥

४६. विधृतेति ॥ विधृतनिशितशस्त्रैर्यातुधानै राक्षसैर्युतमुरुजठरमुखीभी राक्षसीभिः संकुलं संकीर्णं तथा सभयाभिर्देवबन्दीभिश्च युतं तत्सदः श्वगण एषामस्तीति श्वगणिनः श्वग्राहिणस्तेषां शतैर्विकीर्णं व्याप्तं वागुरा मृगबन्धनीरज्जवोऽस्मिन्सन्तीति वागुरावत्। 'वागुरा मृगबन्धनी' इत्यमरः। तथा सभयाभिर्मृगीभिश्च युतं वनमिवासीत्। तद्वद् दृष्टमित्यर्थः ॥

जलद इव तडित्वान् प्राज्यरत्नप्रभाभिः
प्रतिककुभमुदस्यन्[3]निस्वनं धीरमन्द्रम्।
शिखरमिव सुमेरोरासनं हैम[4]मुच्चै-
र्विविधमणिविचित्रं प्रोन्नतं सोऽध्यतिष्ठत्[5] ॥४७॥

१ °भागः Com.
२ श्वगणिकशतकीर्णं D.
३ °मुदन्वान् c.
४ हैम c., B.
५ प्रोन्नतात्माध्यतिष्ठत् T2, T3, T4. प्रोन्नतः सो° Com.

४७. जलद इति ॥ प्राज्यरत्नप्रभाभिः प्रभूतमणिकान्तिभिस्तडित्वान् विद्युत्वान् जलद इव स्थितस्तद्वदेव प्रतिककुभं प्रतिदिशम् । शरत्प्रभृतित्वादव्ययीभावे समासान्तष्टच् । धीरं मन्द्रं मधुरं गम्भीरं निस्वनमुदस्यन्नुदीरयन् प्रोन्नतः स रावणः सुमेरोः शिखरमिवोच्चैरुन्नतं विविधमणिविचित्रं हैमं सौवर्णमासनं सिंहासनमध्यतिष्ठत् ॥

इति भट्टिकाव्ये एकादशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचल-

मल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने

सर्वपथीनाख्याने एकादशः सर्गः ॥

॥ श्रीः ॥

अथ द्वादशः सर्गः ।

ततो विनिद्रं कृतदेवतार्चं
दृष्ट्यैव चित्तप्रशमं किरन्तम् ।
आविष्कृताङ्गप्रतिकर्मरम्यं
विभीषणं वाचमुवाच माता ॥ १ ॥

१. भाविकं नामालंकारो वाक्यगत इति केचिल्लक्षयन्ति च 'अतीतानागते यत्र प्रत्यक्ष इव लक्षिते । अत्यद्भुतार्थकथनाद् भाविकं तदुदाहृतम्' ॥ इति । अन्ये तु गुणोऽयं प्रबन्धगतश्चरित्रादिप्रवृत्तिहेतुकश्चेति मन्यन्ते संपादयन्ति च । 'भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् । प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः ॥ उदात्तार्थाद्भुतार्थत्वे कथायास्त्वभिनीतता । शब्दानुकूलता चेति तस्य हेतुं प्रचक्षते' ॥ इति । एतत्पक्षाश्रयणेनास्मिन्सर्गे भाविकं दर्शयन् लङ्कावृत्तान्तमाह ॥ तत इति ॥ **ततो रावणस्यास्थानप्राप्त्यनन्तरं विनिद्रं प्रबुद्धं कृतदेवकार्यमनुष्ठितेष्टदेवताराधनं दृष्ट्या शान्तदृष्ट्यैव चित्तप्रशमं किरन्तमन्तः शान्तिं च दर्शयन्तं प्रतिकर्मणा प्रसाधनेन रम्यमाविष्कृताङ्गमग्रे प्रदर्शिताकारं संमुखमागतमित्यर्थः । विभीषणं माता कैकसी वाचमुवाच ॥**

प्रबाधमानस्य जगन्ति धीमं-
स्त्वं सोदरस्यातिबलोद्धतस्य ।
आनन्दनो नाकसदां प्रशान्तिं
तूर्णं विषस्यामृतवत्कुरुष्व ॥ २ ॥

२. प्रेति ॥ **हे धीमन् त्वं नाकसदां देवानामानन्दन आनन्दयिता सन् । नन्दयतेः कर्त्तरि ल्युट् । जगन्ति लोकानि प्रबाधमानस्यातिपी-**

१ देवकार्य T_3, T_4, Com.
२ °ताङ्ग Com.
३ धीमांस्त्वं T_2.
४ स्वसोदर° T_2, T_4.
५ मदो° N., C., T_1, T_2, T_3.
६ विषाया° T_2.

ऽयतोऽत्यन्तं बलोद्धतस्य बलद्दप्तस्य समानमुदरं यस्य तस्य सोदरस्य एकमातृकत्वादेकोदरस्य अन्यत्रोभयोः समुद्रसंभूतत्वादिति द्रष्टव्यम् । विषस्य कालकूटस्यामृतवदमृतमिव तूर्णं प्रशान्तिं निवारणं कुरुष्व । उपमेयद्वयविशेषणान्युपमानयोरपि योज्यानि ॥

कुर्यास्तथा येन जहाति सीतां
विषादनीहारपरीतमूर्त्तिम्[1] ।
स्थितां[2] क्षितौ शान्तशिखाप्रतानां
तारामिव त्रासकरीं जनस्य ॥ ३ ॥

३. कुर्या इति ॥ विषादेनैव नीहारेण परीतमूर्त्तिं छन्नरूपां क्षितौ स्थितामुत्पातकाले पतितां शान्तशिखाप्रतानां नष्टप्रभापटलामनुज्ज्वलवेणि[1]बन्धां च जनस्य लोकस्य लङ्काजनस्य च त्रासकरीमनर्थकर[2]त्वाद् भयंकरां तारां तारकामिव स्थितामित्युत्प्रेक्षा । सीतां येन येनोपायेन जहाति त्यजति तथा तादृगुपायं कुर्याः कुरु । विधौ लिङ् ॥

यावन्न संत्रासितदेवसङ्घः
पिण्डो वि[3]षस्येव हरेण भीष्मः ।
संग्रस्यतेऽसौ पुरुषाधिपेन
द्रुतं कुलानन्द यतस्व तावत् ॥ ४ ॥

४. यावदिति ॥ कुलमानन्दयतीति कुलानन्द कुलानन्दकर । नन्दयतेः "कर्मण्यण्" । संत्रासितदेवसङ्घो विषस्य कालकूटविषस्य पिण्डो हरेणेव लोकभयंकरोऽसौ रावणः पुरुषाधिपेन रामेण यावन्न संग्रस्यते तावद् द्रुतं यतस्व सीतात्यागे यत्नं कुरु ॥

---

१ °मूर्त्तिः T2.
२ स्थितः T2.
३ हरस्येव विषेण T2.

---

1 णी Th.
2 सूचक Th.

हृता जनस्थानसदोनिकायाः
कृता जितोत्खातभटद्रुमा पूः ।
सदांसि दग्धानि विधेयमस्मिन्
[1]यद्बन्धुना तद् घटयस्व तस्मिन् ॥ ५ ॥

५. हृता इति ॥ जनस्थानसदां तद्वासिनां राक्षसानां निकायाः सङ्घाः ॥ "सङ्घे चानौत्तराधर्ये" इति चिनोतेः सङ्घार्थे घञ्प्रत्ययश्चकारस्य च कादेशः ॥ हृताः पूर्लङ्का च यथासंख्यं जिता उत्खाता भटा द्रुमाश्च यस्याः सा कृतेति यथासंख्यालंकारः । सदांसि सभागृहाणि दग्धान्यस्मिन्समये तस्मिन् रावणे विषये बन्धुना यद्विधेयं कर्त्तव्यं तद् घटयस्व कुरुष्वेत्यर्थः ॥

चिकीर्षिते पूर्वतरं स तस्मिन्
क्षेमङ्करेऽर्थे मुहुरीर्यमाणः ।
मात्रातिमात्रं शुभयैव[2] बुद्ध्या
[3]चिरं सुधीरभ्यधिकं समाधात् ॥ ६ ॥

६. चिकीर्षित इति ॥ सुधीः स विभीषणः पूर्वतरं मात्रुपदेशात्पूर्वमेव । स्वार्थे तरप् । चिकीर्षिते कर्त्तुमिष्टे क्षेमङ्करे श्रेयस्करे ॥ "क्षेमप्रियमद्रेऽण् च" इति खचि मुमागमः ॥ अस्मिन्नर्थे सीतामोचनकार्ये मात्रा जनन्या शुभया बुद्ध्येव मूर्त्तया सद्बुद्ध्येवेत्युत्प्रेक्षा । मुहुरीर्यमाणः सन् प्रेर्यमाणः सन् धियं कर्त्तव्यताबुद्धिमधिकं समाधात् समाहितवान् दृढीकृतवानित्यर्थः । दधातेर्लुङि "गातिस्था—" इत्यादिना सिचो लुक् ॥

दौवारिकाभ्याहतशक्रदूतं
सोपायनोपस्थितलोकपालम् ।
साशङ्कभीष्मा[4]प्रविशन्निशाटं
द्वारं ययौ रावणमन्दिरस्य ॥ ७ ॥

---

१ यद्बन्धुना यद्घटयस्व सर्वम् T_2, T_3, T_4.
२ शुभयेव Com.
३ चित्तं T_4.
• सिद्धं T_2.
४ भीमा° T_2, T_3.
भीष्मप्र° Com.

७. दौवारिकेति ॥ द्वारे नियुक्ता दौवारिकाः ॥ "तत्र नियुक्तः" इति ठक् ॥ "द्वारादीनां च" इत्यैजागमः ॥ तैरभ्याहतास्ताडिताः शक्रदूता यस्मिंस्तत् सोपायना उपायनवन्त एवोपस्थिता लोकपाला यस्मिंस्तत् साशङ्काः सभया भीष्मा भयङ्कराः प्रविशन्तो निशाटा निशाचरा यस्मिंस्तद् रावणस्य मन्दिरस्य द्वारं ययौ ॥

दूरात् प्रतीहारनतः स वार्त्तां
पृच्छन्ननावेदित[1]संप्रविष्टः[2] ।
सगौरवं दत्तपथो निशाटै-
रैक्षिष्ट शैलाग्र[3]मिवेन्द्रशत्रुम् ॥ ८ ॥

८. दूरादिति ॥ स विभीषणो दूरादेव प्रतीहारेण दौवारिकेण नतः स्वाम्यनुजस्यापि स्वामितुल्यत्वात्प्रणतो वार्त्तां राजावसरवृत्तान्तं पृच्छन्ननावेदितो राज्ञेऽयमागत इत्यनिवेदित एव संप्रविष्टो निशाटैः निशाचरैः सगौरवं दत्तपथो दूरापसरणेन दत्तमार्गः ॥ "ऋक्पूर्—" इत्यादिना समासान्तः ॥ शैलेन्द्रमिव स्थितमिन्द्रशत्रुं रावणमैक्षिष्टाद्राक्षीत् ॥

कृशानुवर्ष्मण्यधिरूढमुच्चैः
सिंहासने संक्षयमेघभीमम् ।
निसर्गतीक्ष्णं न[4]यनस्फुलिङ्गं
युगान्तवह्नेरिव धूमराशिम् ॥ ९ ॥

९. पुनस्तमेव श्लोकद्वयेन विशिनष्टि । कृशान्वित्यादि ॥ कृशानोरिव वर्ष्म शरीरं यस्य तस्मिन्नग्निकल्पे दीप्ते उच्चैरुन्नते सिंहासनेऽधिरूढमुपविष्टं संक्षयमेघभीमं प्रलयकालमेघवद् भयंकरं निसर्गतीक्ष्णं स्वभावतः क्रूरं नयनान्येव स्फुलिङ्गा यस्य तं युगान्तवह्नेः प्रलयकालाग्नेर्धूमराशिमिव स्थितम् । सिंहासनस्याग्निवर्णत्वात् स्वयं श्यामाङ्गत्वाच्चेति भावः ॥

१ °नाख्यापित T_2, T_4.
२ संप्रहृष्टः T_3.
३ शैलेन्द्र T_3, Com.
४ जनयन्स्फु° D.

प्रीत्यापि दत्तेक्षणसंनिपातं
भयं भुजङ्गाधिपवद्दधानम्।
तमःसमूहाकृतिमप्यशेषा-[1]
नूर्जा जयन्तं प्रथितप्रकाशान्॥ १० ॥

१०. प्रीत्येति॥ प्रीत्या स्नेहेन दत्तेक्षणसंनिपातं दत्तदृष्टिपातमपि भुजङ्गाधिपवद् भयं दधानं कुर्वाणम्। प्रीतिदशायामपि स्वरूपतो भीषणत्वादिति भावः। तमःसमूहाकृतिमपि तद्वत्कृष्णवर्णमपि अदोषान् नीहारादिदोषरहितान् प्रथितप्रकाशानर्कादीन् ऊर्जा बलेन॥ "भ्राजभास—" इत्यादिना क्विप्॥ जयन्तं तिरस्कुर्वन्तम्। उभयत्रापि विरोधाभासोऽलंकार इति सजातीयसंसृष्टिः॥

तं रत्नदायं जितमृत्युलोका
रात्रिश्चराः कान्तिभृतोऽन्वसर्पन्।
प्रमुक्तमुक्ताफलमम्बुवाहं[2]
संजाततृष्णा इव देवमुख्याः॥ ११ ॥

११. तमिति॥ रत्नानि दयते ददातीति रत्नदायः। दयतेर्दानार्थात् "कर्मण्यण्"। तं विभीषणं जितमृत्युलोका जितयमलोका कान्तिभृतः कान्तिमन्तो रात्रिश्चराः निशाचराः प्रमुक्तमुक्ताफलं प्रवृष्टमौक्तिकमम्बुवाहं मेघं संजाततृष्णा मुक्ताफलगृध्नवो देवमुख्या सुरश्रेष्ठा इव अन्वसर्पनन्वगमन्॥

स किङ्करैः कल्पितमिङ्गितज्ञैः[3]
संबाधकं[4] पूर्वसमागतानाम्।
सिंहासनोपाश्रितचारुबाहु-
रध्यास्त पीठं विहितप्रणामः॥ १२ ॥

---

१ °कृतिशेषलेशान्° E3. कृतिमप्यदोषान्° Com.
२ प्रयुक्त C., D., E3, T1, T2, T4.
३ °मिङ्गितज्ञः T3.
४ संबाधनं T3. The 2nd half of this verse is not found in T2.

१२. स इति ॥ स विभीषणः विहितप्रणामः कृतप्रणामः सन्निङ्गितज्ञैः स्वामिचित्तज्ञैः किङ्करैः परिजनैः कल्पितं स्थापितं पूर्वसमागतानां प्रथमोपविष्टानां संबाधकं संमर्दकम् । ण्वुल् । पीठमासनं सिंहासनोपाश्रितचारुबाहू राजासनन्यस्तैकहस्तः सन् अध्यास्त । आसेर्लङि तङ् ॥ "अधिशीङ्—" इत्यादिना कर्मत्वम् ॥

ततो[१] दशास्यः क्षुभिताहिकल्पं
दीप्ता[२]ङ्गुलीयोपलमूढ[३]रत्नम् ।
अनेकचञ्चन्नखकान्तिजिह्वं
प्रसार्य पाणिं समितिं बभाषे ॥ १३ ॥

१३. तत इति ॥ ततो विभीषणागमनानन्तरं दशास्यः क्षुभिताहिकल्पं क्रुद्धसर्पकल्पं दीप्ता अङ्गुलीयानामुपला मणयो यस्मिंस्तम् । 'उपलः प्रस्तरे मणौ' इति विश्वः। अत एवोढरत्नं धृतफणामणिमनेकाश्चञ्चन्त्यश्चलन्त्यो नखकान्तयो जिह्वा यस्य तं पाणिं प्रसार्य समितिं सभां बभाषे ॥

शक्तैः सुहृद्भिः परिदृष्टकार्यै-
राम्नातिभिर्नीतिषु बुद्धिमद्भिः ।
युष्मद्विधैः सार्धमुपायविद्भिः[४]
सिध्यन्ति कार्याणि[५] सुमन्त्रितानि ॥ १४ ॥

१४. शक्तैरिति ॥ शक्तैः कार्यसमर्थैः । अशक्तस्याकिञ्चित्करत्वादिति भावः । सुहृद्भिर्मित्रैः । अमित्राणां कार्यविघातकत्वादिति भावः । परिदृष्टकार्यैर्दृष्टसंवादैरित्यर्थः । काकतालीयबुद्धीनामश्रद्धेयत्वादिति भावः। नीतिषु नीतिशास्त्रेषु आम्नातमेभिराम्नातिभिर्नीतिशास्त्राण्याम्नातवद्भिरित्यर्थः । अन्यथा केवलशौर्यस्य श्वापदचेष्टितत्वादिति भावः॥ "इष्टादिभ्यश्च" इतीनिप्रत्ययः ॥ "क्तस्येन्विषयस्य" इति कर्मणि सप्तमी । बुद्धिमद्भिरनन्तरकार्यज्ञैः । शास्त्रज्ञस्यापीतिकर्त्तव्यतामूढ-

---

१ The first half is not found in T2.
२ दीप्रा° N., D., B., T3.
३ °पलं मूर्धरत्नम् T4.
४ °मुपेयिवद्भिः Com.
५ कार्याणि सिध्यन्ति C., T2, T4, E3.

स्याप्रयोजकत्वादिति भावः । उपेयिवद्भिः स्वामिकार्ये मिथः समेतैः । अन्यथा कार्यविघातादिति भावः । युष्मद्विधैः सार्धमीदृशैर्युष्माभिः सहेत्यर्थः । सुमन्त्रितानि सुष्ठु विचारितानि कार्याणि सिध्यन्ति फलन्ति । अन्यथाविमृश्यकृतानि विनश्यन्तीत्यर्थः । अत्र विशेषणानां साभिप्रायत्वात् तदर्थहेतुकत्वोक्त्या च कार्यसिद्धेः परिकरपदार्थहेतुककाव्यलिङ्गयोः संकरः ॥

उपेक्षिते वालिखरादिनाशे
  दग्धे पुरेऽक्षे निहते सभृत्ये ।
सैन्ये द्विषां सागरमुत्तितीर्षा-
  वनन्तरं ब्रूत यदत्र युक्तम् ॥ १५ ॥

१५. एवं मन्त्रिणो बहूकृत्य स्वोपेक्षोद्घटनपूर्वकं मन्त्रं पृच्छति ॥ उपेक्षित इति ॥ वालिखरादिनाशे उपेक्षिते सति । वालिग्रहणं तस्यापि स्वपक्ष्यत्वाभिप्रायत्वादिति द्रष्टव्यम् । पुरे दग्धे सति सभृत्येऽक्षेऽक्षकुमारे निहते सति किं च द्विषां सैन्ये रामबले सागरमुत्तितीर्षावुत्तरीतुमिच्छौ सति ॥ "तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य" इति विभाषा पुंवद्भावान्न "इकोऽचि विभक्तौ" इति नपुंसको नुमागमः । अनन्तरमत्र प्रस्तावे यत्कार्यं युक्तं तद् ब्रूत ॥

भुजांस[१]वक्षःस्थलकार्मुकासीन्[२]
  गदां[३]श्च शूलानि च यातुधानाः ।
परामृशन्तः[४] प्रथिताभिमानाः
  प्रोचुः प्रहस्तप्रमुखा दशास्यम् ॥ १६ ॥

१६. भुजेति ॥ अथ प्रथिताभिमानाः प्रसिद्धाहंकाराः प्रहस्तप्रमुखा यातुधाना राक्षसा भुजादीन्यङ्गानि कार्मुकादीन्यायुधानि च परामृशन्तो रणकण्डूत्या स्पृशन्तो दशास्यं प्रोचुः ॥

---

१ भुजांश° C., E_3.
२ कार्मुकादीन् D.
३ शरांश्च T_2, T_3.
४ परामृषन्तः C.

अखण्ड्यमानं[1] परिखण्ड्य शक्रं
त्वं पण्डितम्मन्यमुदीर्णदण्डः ।
नराभियोगं नृभुजां प्रधानं[2]
मन्त्रोन्मुखः किं नयसे गुरुत्वम् ॥ १७ ॥

१७. अखण्ड्येति ॥ हे स्वामिन् उदीर्णदण्ड उदग्रशासनो नृभुजां नराशिनां प्रधानः प्रधानभूतस्त्वमखण्ड्यमानमच्छेद्याहंकारं पण्डितम्मन्यं रणपण्डितमानिनं शक्रं परिखण्ड्य मन्त्रोन्मुखो विचारप्रवणः सन् नराभियोगं मानुषविग्रहं किं किमर्थं गुरुत्वमाधिक्यं नयसे प्रापयसि । इन्द्रजयिनस्ते कियानयं नराधम इति भावः । अधमगुरूकरणफ[1]लस्य लाघवस्य कर्तृगामित्वान्नयतेः कर्त्रभिप्राये तङ् ॥

निर्यत्स्फुलिङ्गाकुलधूमराशिं
किं ब्रूहि भूमौ पिनषाम भानुम् ।
आ दन्तनिष्पीडितपीतमिन्दुं
ष्ठीवाम शुष्केक्षुलतास्थिकल्पम्[3] ॥ १८ ॥

१८. निर्यदिति ॥ निर्यद्भिः स्फुलिङ्गैराकुलो धूमराशिर्यस्य तं भानुं भूमौ पिनषाम चूर्णयाम किम् । पिषेः संप्रश्ने लोट् । "रुधादिभ्यः श्नम्" ॥ "आडुत्तमस्य पिच्च" ॥ आः इति कोपे । 'आस्तु स्यात्कोपपीडयोः' इत्यमरः । दन्तनिष्पीडितश्चासौ पीतश्च । पूर्वकालसमासः । तमत एव शुष्केक्षुलतास्थिकल्पं शुष्केक्षुकाण्डकल्पप्रायमिन्दुं ष्ठीवाम निःसारं कृत्वोद्गिराम किं ब्रूहि । यथोक्तं करवामेत्यर्थः । मनुष्यमारणं तु कियदिति भावः ॥

---

१ असह्यमानं D.
२ प्रधानो Com.
३ तुल्यम् D.

---

1 अधमगुरूकरणस्य फलस्य रामकर्तृगामि° K. Com.

सराघवैः किं बत वानरैस्तै-
यैंः प्रातराशोऽपि न कस्यचिन्नः ।
सस्थाणुकैलासधराभिधत्स्व
किं द्यौरधोऽस्तु क्षितिरन्तरीक्षे ॥ १९ ॥

१९. सराघवैरिति ॥ सराघवैः सरामलक्ष्मणैस्तैर्वानरैः किं बतेति खेदे यैर्नोऽस्माकं मध्ये कस्यचिदेकस्यापि प्रातराशः प्रातर्भोजनमपि न किं तैरित्यर्थः । किं तु सस्थाणोः सेश्वरस्य कैलासस्य धरतीति धर उद्धर्ता । पचाद्यच् । तस्य संबुद्धिः हे सस्थाणुकैलासधर किं द्यौरन्तरीक्षमधोऽस्तु क्षितिर्वान्तरिक्षमस्तु । अभिधत्स्व वद । द्यावापृथिव्योर्विपर्यासे शक्तास्ते भटाः का कथा नराधमे । अत्र राक्षसानां द्यावापृथिव्योर्विपर्यासनासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः ॥

चापल्ययुक्तस्य हरेः कृशानुः
समेधितो वालधिभाक् त्वदीयैः ।
शस्त्रेण वध्यस्य गलन्नधाक्षी-
द्राजन् प्रमादेन निजेन लङ्काम् ॥ २० ॥

२०. ईदृग्वीरैर्लङ्कादाहे किं कृतमित्याशङ्क्य स तु प्रामादिको न लाघवायेति प्रलपन्ति ॥ चापल्येति ॥ चापल्ययुक्तस्य चापलयुक्तस्य । ब्राह्मणादिपाठात् ष्यञ् युवादिपाठादण् च । चपलत्वाच्छस्त्रेण वध्यस्य कपेर्वालधिभाक् पुच्छगतस्त्वदीयैर्जनैर्मूढैः समेधितः संदीपितः कृशानुरग्निर्गलन् पुच्छादधः क्षरन् हे राजन् निजेनास्माकेन प्रमादेन लङ्कामधाक्षीत् ददाह । दहतेर्लुङि सिचि हलन्तलक्षणा वृद्धिः ॥ "हो ढः" ॥ "षढोः कः सि" ॥

१ वानैरेर्वा T_2, T_3, T_4.
२ कैलाश E_3.
३ ऽन्तरीक्षम् Com.
४ कपेः T_2, T_3, T_4, Com.
५ बद्धस्य c., E_3.

अथाश्चितोरस्कमुदीर्णदृष्टिः
कृत्वा विवक्षाप्रवणं शरीरम् ।
विवृत्तपाणिर्विहितोत्तरार्धं[1]
विभीषणोऽभाषत यातुधानान् ॥ २१ ॥

२१. अथेति ॥ अथ विभीषणोऽञ्चितोरस्कं रम्योरस्कम् । "अञ्चेः पूजायाम्" इतीडागमः ॥ "नाञ्चेः पूजायाम्" इत्यनुनासिकलोपप्रतिषेधः ॥ "उरःप्रभृतिभ्यः कप्" ॥ शरीरं विवक्षया वक्तुमिच्छया प्रवणं श्रोतृजनोन्मुखं विवृतोत्तरार्धं विस्तारितोत्तरकायं च कृत्वा उदीर्णदृष्टिरुदञ्चितदृष्टिर्विवृत्तपाणिस्तदभिमुखीकृतपाणिश्च सन् यातुधानान् प्रहस्तादीनभाषत ॥

युद्धाय राज्ञा सुभृतैर्भवद्भिः[2]
संभावनायाः सदृशं यदुक्तम् ।
तत्प्राणपण्यैर्वचनीयमेव
प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम् ॥ २२ ॥

२२. युद्धायेति ॥ राज्ञा युद्धाय युद्धार्थमेव सुभृतैः सुष्ठु पुष्टैर्भवद्भिर्यदुक्तं भूमौ पिनषाम भानुमित्यादि तत्संभावनायाः स्वामिकृतसंमानस्य सदृशमनुरूपम् । प्राणा एव पण्यं येषां तैः प्राणविक्रेतृभिस्तद्वाक्यं वचनीयमेव वीरधर्मत्वादिति भावः । किं तु मन्त्रे स्वामिपृष्टे कार्यविचारे प्रज्ञा बुद्धिरधिकृता नियुक्ता न शौर्यम् । कार्योपदेशस्यायमवसरो न शूरालापानामित्यर्थः ॥

यत्रापि यत्नादृतमन्त्रवृत्ति-
र्गुरुत्वमायाति नराभियोगः ।
वशीकृतेन्द्रस्य कृतोत्तरोऽस्मिन्
विध्वंसिताशेषपुरो हनूमान् ॥ २३ ॥

---

१ °र्विवृतोत्तरार्धं Com. | २ निभृतै° T_2, T_3, T_4.

२३. यद्येति ॥ यद्याप्युक्तं वशीकृतेन्द्रस्य निर्जितशक्रस्य राज्ञो यत्नाहृता मन्त्रवृत्तिर्यस्य स यत्नेन विचार्यमाणो नराभियोगो नरप्रातिपक्ष्यं गुरुत्वमायाति इत्यस्मिन्नर्थे विध्वंसिताशेषपुरो मोटितलङ्कानगरो हनूमानेव कृतोत्तरो दत्तोत्तरः । नराभियोगस्य गुरुत्वं तद्भृत्यभृत्येन हनूमतैवोक्तमित्यर्थः ॥

अग्निः प्रमादेन ददाह लङ्कां
वध्यस्य देहे[1] स्वयमेधितश्चेत् ।
विमृश्य[2] तद्देवधियाभिधत्त[3]
ब्रह्मास्त्रबन्धोऽपि यदि प्रमादः ॥ २४ ॥

२४. प्रामादिको लङ्कादाह इत्यत्रोत्तरमाह । अग्निरिति ॥ वध्यस्य वधार्हस्य कपेर्देहे देहैकदेशे पुच्छे स्वयमेधितोऽस्मदीयैरेव दीपितोऽग्निः प्रमादेन लङ्कां ददाह चेत् । अस्तु । ब्रह्मास्त्रस्य बन्धः प्रतिबन्धो विश्लेष इति यावत् । सोऽपि प्रामादिको यदि तद्देवधिया मध्यस्थबुद्ध्या विमृश्याभिधद्ध्वं ब्रूत । अतः प्रमादवचनं प्रलाप इति भावः । दधातेर्लोटि तङि ध्वमि "श्नाभ्यस्तयोरातः" इत्याल्लोपः ॥ "दधस्तथोश्च" इत्यभ्यासस्य भष्भावः ॥

जगन्त्यमेयाद्भुतभावभाञ्जि
जिताभिमानाश्च जना विचित्राः ।
कार्ये तु यत्नं कुरुत प्रकृष्टं
मा नीतिगर्भान्[4] सुधियोऽवमन्ध्वम् ॥ २५ ॥

२५. न च नरवानरेषु अनास्था युक्तेत्याह । जगन्तीति ॥ जगन्ति लोका अमेयानपरिमितानद्भुतांश्च भावान् पदार्थान् भजन्तीति तद्भाञ्जि । जनास्तत्रत्याः प्राणिनश्च जिताभिमानाः परिखण्डिताहंकारा विचित्रा

---

१ देहं T₂.
२ विमृष्य E₂.
३ °भिधद्ध्वं T₂, T₃, Com.
४ मार्गान् E₂.

विचित्रशक्तयश्च जिता जेतारश्च सन्तीत्यर्थः। अतो जयपराजयौ शक्तितन्त्रौ न जातितन्त्राविति भावः। तत्रापि कार्येऽनन्तरकृत्ये प्रकृष्टं यत्नं कुरुत। नीतिगर्भान् नीतिपुरःसरान् सुधियो धीरान् मावमन्ध्वं नावजानीध्वम्। सर्वत्र बलाबलचिन्ता कार्या न जातिमात्रादवमन्तव्या इति भावः। मन्यतेर्लुङि तङि ध्वमि माङ्योगादडभावः। सिचोऽकित्त्वान्नानुनासिकलोपः॥ "धि च" इति सलोपः॥

वृद्धिक्षयस्थानगतामजस्रं
वृत्तिं[1] जिगीषुः प्रसमीक्षमाणः।
घटेत[2] सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं मुञ्चति चञ्चलापि॥ २६॥

२६. संप्रति नीतिमुपदिशति। वृद्धीति॥ यो विजिगीषुर्विजेतुमिच्छुः पञ्चाङ्गसंपन्नो राजा वृद्धिक्षयस्थानानि स्वस्य शत्रोश्च उपचयापचयसाम्यावस्थास्तद्गतां वृत्तिं तेषां प्रवृत्तिमजस्रं नित्यं प्रसमीक्षमाणः परामृशन् सन्ध्यादिषु गुणेषु घटेत षाड्गुण्यं प्रयुञ्जीत तं विजिगीषुं चञ्चलापि लक्ष्मीर्न मुञ्चति॥

उपेक्षणीयैव परस्य वृद्धिः
प्रनष्टनीतेरजितेन्द्रियस्य।
मदादियुक्तस्य विरागहेतुः
समूलघातं विनिहन्ति यान्ते॥ २७॥

२७. संप्रति वृद्ध्यादिप्रतीक्षाप्रकारमेवाह। उपेक्षणीयेति॥ प्रनष्टनीते उत्पथप्रवृत्तेः अजितेन्द्रियस्य इन्द्रियपरतन्त्रस्य अत एव मदादियुक्तस्य पानादिव्यसनासक्तस्येत्यर्थः। ईदृशस्य शत्रोर्वृद्धिरुपेक्षणीया प्रतीकारप्रयासो न कार्य इत्यर्थः। कुतः अपरागहेतुर्विशङ्कटत्वाज्जनापरागमूलं या वृद्धिरन्ते ईषत्कालापगमे समूलं हत्वा समूलघातं हन्ति

1 वृत्तिं E₂. | 2 यतेत D.

निर्मूलयतीत्यर्थः ॥ "समूलाकृतजीवेषु हन्कृञ्ग्रहः" इति हन्तेर्णमुल्प्रत्यये "कषादिषु यथाविध्यनुप्रयोगः"। अत्र मनुः। 'व्यसनस्य च मृत्योश्च कष्टं व्यसनमुच्यते। व्यसन्यधोधो व्रजति स्वर्यात्यव्यसनी मृतः॥' इति ॥

जनानुरागेण युतोऽवसादः
फलानुबन्धः[1] सुधियात्मनोऽपि ।
उपेक्षणीयोऽभ्युपगम्य[2] सन्धिं
कामादिषड्वर्गजिताधिपेन ॥ २८ ॥

२८. व्यसनावसक्तस्य शत्रोर्वृद्धिरुपेक्षणीयेत्युक्तमेवमव्यसनिनः स्वस्य क्षयोऽप्युपेक्षणीय इत्याह। जनेति॥ कामादिषड्वर्गजिता जितारिषड्वर्गेण। जयतेः "सत्—" आदिना क्विप्। सुधिया बुद्धिसंपन्नेनाधिपेन विजिगीषुणा राज्ञा जनानुरागेण युतो जनानुरागसंभिन्नः अत एव फलेनानुबन्धः संबन्धो यस्य सः स्वन्तः आत्मनोऽवसादः क्षयोऽपि सन्धिमभ्युपगम्य आ समयलाभात् परं संधायोपेक्षणीयः। असंधाने स्वयं क्षीणः परेणाभियुज्यते इति भावः॥

यदा विगृह्णन्[3] च संदधानो
वृद्धिं क्षयं[4] चानुगुणं प्रपश्येत्।
आसीत राजावसरप्रतीक्ष-
स्तदा प्रयासं[5] वितथं न कुर्यात् ॥ २९ ॥

२९. यदा संधौ विग्रहे वा फलं न दृश्यते तदा विजिगीषुरासनमाश्रयेदित्याह। यदेति॥ यदा विजिगीषुर्विगृह्णन् परं विरुन्धान उत संदधानः स्निह्यन्वा

---

१ °नुबन्धी D.
°नुबन्धश्च धिया T4.
२ °योऽभ्युपगम्य B.
३ °न्नुत सं° T2, T3, Com.
४ क्षयं वा° E3.
क्षयं वानुगुणं न पश्येत् T2, T3, Com.
५ प्रयाणं c., E3.

वृद्धिमात्मन उच्छ्रयमनुगुणमात्मनोऽनुकूलं क्षयं परस्य नाशं वा न पश्येत्तदा राजा विजिगीषुर्नृपोऽवसरं कार्यकालं प्रतीक्षत इत्यवसरप्रतीक्षः सन् ॥ "कर्मण्यण्" ॥ आसीत न रुन्ध्यान्नापि सन्दध्यात् किंतूदासीत वितथं व्यर्थं प्रयासं न कुर्यात् करणे वा स्वयमेव क्षीयेतेति भावः ॥

संधौ स्थितो वा जनयेत् स्ववृद्धिं
हन्यात्परं वोपनिषत्प्रयोगैः ।
आश्रावयेदस्य[1] जनं परैर्वा[2]
विग्राह्य कुर्यादवहीनसन्धिम्[3] ॥ ३० ॥

३०. तस्यैव पक्षान्तराण्याह । संधाविति ॥ अथवा संधौ स्थितः संधिं कृत्वा वृद्धिं जनयेत् संपादयेत् । वृद्धः परं साधयेदित्यर्थः । परं शत्रुमुपनिषत्प्रयोगै रहस्योपायैर्विषशस्त्रादिभिर्हन्यात् । अस्य शत्रोर्जनममात्यादिकं चरैर्गूढपुरुषैरास्रावयेत् दानमानादिना प्रलोभ्य निर्गमयेद्वा अथवा विग्राह्य प्रबलंविग्रहं कारयित्वा तदवस्थं परं हीनसंधिं कुर्यात् निकृष्टसंधिना वशीकुर्यादित्यर्थः ॥

संदर्शितस्नेहगुणैः[5] स्वशत्रून्[6]
विद्वेषयन्मण्डलमस्य भिन्द्यात् ।
इत्येवमादि प्रविधाय[7] संधि-
वृद्धेर्विधेयोऽधिगमाभ्युपायः[8] ॥ ३१ ॥

३१. पक्षान्तरमाह । संदर्शितेति ॥ अथवा संदर्शितस्नेहगुणः प्रकटितस्नेहधर्मकः सन् स्वशत्रुं विद्वेषयन् कपटमार्गेणामात्यादि विद्विष्टं कुर्वन्नस्य शत्रोर्मण्डलं भिन्द्यादित्येवमादि संधिं प्रविधाय वृद्धेरधिगमाभ्युपायो वृद्धिप्राप्त्युपायो विधेयः ॥

---

१ आस्रावयेद° Com., D.
२ चरैर्वा Com.
३ °दपि हीन D.
४ शान्तिम् E_3.
५ गुणस्य शत्रोः T_3, T_4.
६ स्वशत्रुं E_3, Com.
७ प्रणिधाय T_2.
८ °धिगताभ्यु° T_2.

मत्वा सहिष्णूनपरोपजल्प्यान्[1]
स्वकानधिष्ठाय जलान्तदुर्गान्[2] ।
द्रुमाद्रिदुर्लङ्घ्यजलाप्रधृष्यान्
वर्धेत राजा रिपुविग्रहेण ॥ ३२ ॥

३२. एवं संधिरेव साधीयानित्युक्त्वा तदलाभे विग्रहेऽपि वृत्तिविशेषमाह । मत्वेति ॥ राजा विजिगीषुर्नृपः स्वकान् स्वकीयान् पुरुषान् सहिष्णून् सहनशीलान् अपरोपजाप्यान् परेषामभेद्यांश्च मत्वा ज्ञात्वा द्रुमैरद्रिभिश्च दुर्लङ्घ्या दुष्प्रापाश्च ते जलैरप्रधृष्याश्च तान् वनान्ते दुर्गान् दुर्गदेशानधिष्ठाय रिपुविग्रहेणापि वर्धेत ॥

शक्नोति यो न द्विषतो[3] निहन्तुं
विहन्यते[4] नाप्यबलै[5]र्द्विषद्भिः ।
स श्वावराहं कलहं विदध्या-
दासीत दुर्गादि विवर्धयंश्च ॥ ३३ ॥

३३. अरिजिगीषोः परस्परविघातसामर्थ्ये जिगीषोः कृत्यमाह । शक्नोतीति ॥ यो जिगीषुर्द्विषतः शत्रून् निहन्तुं न शक्नोति अबलैर्द्विषद्भिर्न विहन्यतेऽपि स विजिगीषुः श्ववराहयोरिमं श्वावराहम् ॥ "तस्येदम्" इत्यण्प्रत्ययः ॥ कलहमरेरन्यस्य च मिथः कलहं विदध्यात् । यथा कश्चित् श्वपचः श्वानं वराहे विमुच्यान्यतरनाशमीक्षते उभयोरपि भक्ष्यत्वात्तद्वदन्यतरनाशार्थी कलहमुत्पादयेदित्यर्थः । तथा दुर्गादि दुर्गराष्ट्रादिकं च विवर्धयन्नासीत न तु यायादित्यर्थः ॥

१ °जाप्यान् Com.
२ वनान्त Com.
जलादि E_3.
In T_2, T_3, T_4 and E_3, the 2nd and 3rd pâdas are interchanged.
३ °ऽभिहन्तुं c., D., E_3.
४ निहन्यते D.
५ वाप्यबलैः D.
नाप्यलसै° T_3.

प्रयाणमात्रेण परे[1] प्रसाध्ये
वर्त्तेत यानेन[2] कृताभिरक्षः।
अशक्नुवन् कर्त्तुमरेर्विघातं
स्वकर्म[3]रक्षां[4] च परं श्रयेत ॥ ३४ ॥

३४. किं तर्हि यात्रा न कार्यैव। नेत्याह। प्रयाणेति ॥ परे शत्रौ प्रयाणमात्रेण प्रसाध्ये सति कृताभिरक्षः कृतदुर्गाभिरक्षः सन् यानेन यात्रया वर्त्तेत यात्रां कुर्यादित्यर्थः। अरेर्विघातं स्वकर्मरक्षां स्वारम्भनिर्वाहं च कर्त्तुमशक्नुवन् परं प्रबलमन्यं धार्मिकं संश्रयेत ॥

एकेन सन्धिः कलहोऽपरेण
कार्योऽभितो वा प्रसमीक्ष्य वृद्धिम्।
एवं प्रयुञ्जीत जिगीषुरेतां[5]
नीतीर्विजानन्नहिता[6]त्मसारम् ॥ ३५ ॥

३५. विग्रहे विशेषान्तरमाह। एकेनेति ॥ एकेनारिणा संधिः कार्योऽपरेण कलहो विग्रहः कार्यो न युगपदुभाभ्यामित्यर्थः। अथवा वृद्धिमात्मनो बलाधिक्यं प्रसमीक्ष्याभित उभयतो वा कलहः कार्यः। एवं जिगीषुरहितस्य शत्रोरात्मनश्च सारं शक्तिं विजानन् विमृशन्नेतां पूर्वोक्तां नीतिं प्रयुञ्जीत ॥

त्वया तु[7] लोके जनितो विरागः
प्रकोपितं[8] मण्डलमिन्द्रमुख्यम्।
रामे तु राजन् विपरीतमेतत्
पश्यामि तेनाभ्यधिकं विपक्षम् ॥ ३६ ॥

१ परैः C.
२ यत्नेन T_4.
३ धर्म T_2, T_3, T_4.
४ रक्ष्यं E_3.
५ °रेतां नीतिं T_2, T_3, Com.
६ जानन्विहिता° E_3.
७ नु T_2, T_4.
८ प्रगोपितं T_2. प्रकल्पितं C.

३६. त्वयि तु सर्वं विरुद्धमित्याह । त्वयेति ॥ त्वया तु लोके विरागोऽपरागो जनितः । इन्द्रमुख्यमिन्द्रप्रधानं मण्डलं प्रकोपितं प्रक्षोभितं हे राजन् रामे तु एतत् पूर्वोक्तं विपरीतं लोकानुरक्तो मण्डलं तु संतुष्टमित्यर्थः । तेन कारणेन विपक्षं शत्रुमभ्यधिकं प्रबलं पश्यामि जानामि ॥

एकेन[1] वाली निहतः शरेण
सुहृत्तमस्ते रचितश्च राजा ।
यदैव सुग्रीवकपिः परेण
तदैव कार्यं भवतो विनष्टम् ॥ ३७ ॥

३७. एकेनेति ॥ किं च यदा परेणारिणा रामेण ते तव सुहृत्तमो वाली एकेन शरेण निहतः सुग्रीवकपिः सुग्रीवनामा वानरो राजा रचितः कृतश्च तदैव भवतः कार्यं प्रयोजनं विनष्टम् ॥

प्राकार[2]मात्रावरणः[3] प्रभावैः[4]
खरादिभिर्यो निहतैस्तवाभूत्[5] ।
लङ्काप्रदाहाक्षवधद्रुमभङ्गैः
क्लाम्यत्य[6]सावप्यधुनातिमात्रम् ॥ ३८ ॥

३८. कार्यनाशमेव व्यनक्ति । प्राकारेति ॥ यस्त्रैलोक्यव्यापी तव प्रतापो निहतैः प्राकाराद्बहिरेव मारितैः खरादिभिः प्राकारमात्रावरणोऽभूद्- सावपि प्राकारमात्रान्तर्गतोऽप्यधुना लङ्कादाहादिभिरतिमात्रं क्लाम्यति संकुचति । रामप्रताप एव लङ्काया बहिरन्तश्च दीप्यमाने त्वत्प्रतापस्य नामापि नश्यतीत्यर्थः ॥

षड्वर्गवश्यः[7] परिमूढबन्धु-
रुच्छिन्नमित्रोऽरिगणै[8]रुपेतः ।
मा पादयुद्धं द्विरदेन कार्षी-
र्नम क्षितीन्द्रं प्रणतोपभोग्यम्[9] ॥ ३९ ॥

---

१ एतेन T2, T4.
२ प्रकार T3, T4.
३ वरणं T2.
४ प्रतापः D., Com.
५ °स्तवासीत् D.
६ ग्लायत्य T3.
७ पण्यः T3.
वर्ण्यैः T4.
८ मित्रो विगु° N., C., T1, B.
मित्रोऽरिगु° E3, D., c.
(c. notices मित्रोऽरिग° also.)
९ भोगम् E3.

३९. फलितमाह । षडिति ॥ हे राजन् त्वं षड्वर्गवश्यः कामादिजितः परिमूढबन्धुर्मूर्खामात्य उच्छिन्नमित्रो वालिप्रभृतीनामपि हतत्वात् । अरिगणैरुपेत आक्रान्तो द्विरदेन पादयुद्धं मा कार्षीर्मा कुरु प्रणतानामुपभोग्यमुपजीव्यं क्षितीन्द्रं रामं नम प्रणम ॥

रामोऽपि[1] दाराहरणेन तप्तो
वयं हतैर्बन्धुभिरात्मतुल्यैः ।
तप्तेन[2] तप्तस्य यथायसो[3] नः
संधिः परेणास्तु विमुञ्च सीताम् ॥ ४० ॥

४०. राम इति ॥ किं च रामो दाराहरणेन तप्तो वयं चात्मतुल्यैर्बन्धुभिर्हतैस्तप्ताः । तप्तस्यायसस्तप्तेनायसा यथा तद्वन्नोऽस्माकं परेण रामेण संधिरस्तु । सीतां च विमुञ्च । संधिस्तद्दारप्रत्यर्पणमात्रसुलभ इत्यर्थः ॥

संधुक्षितं[4] मण्डलचण्डवातै-
रमर्षतीक्ष्णं क्षितिपालतेजः ।
सामाम्भसा शान्तिमुपैतु राजन्
प्रसीद जीवाम सबन्धुभृत्याः ॥ ४१ ॥

४१. संप्रति संधिं प्रार्थयते । संधुक्षितेति ॥ हे राजन् मण्डलानि इन्द्रादीनि तैरेव चण्डवातैः संधुक्षितं संदीपितममर्षेण रोषेण तीक्ष्णं क्रोधाग्नियोगादतिदीप्तमित्यर्थः । क्षितिपालतेजो रामप्रतापाग्निः सामाम्भसा सान्त्ववादोदकेन शान्तिमुपैतु । प्रसीद प्रसन्नो भव । सबन्धुभृत्या जीवाम । सर्वत्र प्रार्थनायां लोट् । अन्यथा कुलक्षयो भविष्यतीति भावः ॥

---

१ रामो हि C.
२ तप्तस्य तप्तेन N., C., B.
३ यथायथेन T2.
४ संधुक्षतां C.

अपक्वकुम्भाविव भङ्गभाजौ
राजन्नियातां मरणं समानौ ।
वीर्ये स्थितः किं तु कृतानुरागो
रामो भवांश्चोत्तमभूरिवैरी ॥ ४२ ॥

४२. किं च समेनापि संधातव्यं किं पुनर्बलीयसेत्याह । अपक्वेति ॥ हे राजन् समानावरिजिगीषू अपक्वकुम्भौ घटाविव भङ्गभाजौ परस्पराभियोगाद् भग्नौ सन्तौ मरणमियाताम् । इणो लिङि यासुटि तसस्तामादेशः । किं तु रामः कृतानुरागोऽनुरक्तमण्डलो वीर्ये महासत्त्वे स्थितो भवांस्तु उत्तमा महान्तो भूरयो भूयांसश्च वैरिण इन्द्रादयो यस्य सः । अतो रामरावणयोर्जयपराजयौ यथाक्रमं व्यवस्थिताविति भावः ॥

दण्डेन कोशेन[1] च[2] मन्यसे चेत्
प्रकृष्टमात्मानमरेस्तथापि ।
रिक्तस्य पूर्णेन वृथा विनाशः
पूर्णस्य भङ्गे बहु हीयते तु ॥ ४३ ॥

४३. ननु बलिना दुर्बलो विग्राह्य एव न संधेयो बली चाहं रामात् प्रभुशक्तेरित्याशङ्क्याह । दण्डेनेति ॥ दण्डेन चतुरङ्गबलेन कोशेन धनेनात्मानमरेर्विपक्षाद्रामात्प्रकृष्टं बलिष्ठं मन्यसे चेत् । अङ्गीकृत्य वादेनोत्तरमाह । तथापि पूर्णेन समृद्धेन त्वया रिक्तस्य[1] निःस्वस्य रामस्य विनाशो भङ्गो वृथा । उभयोरपि नष्टितुष्टयोरभावादिति भावः । पूर्णस्य ते तव भङ्गे तु बहु हीयते प्राणैः सह सर्वैश्वर्यहानेरिति भावः ॥

क्लिष्टात्मभृत्यः परिमृग्यसंप-
न्मानी यतेतापि स संशयेऽर्थे ।
संदेहमारोहति यः कृतार्थो
नूनं रतिं तस्य[3] करोति न श्रीः ॥ ४४ ॥

---

१ कोषेण c., E_3, B.
२ स T_3.
३ तत्र T_2, T_3, T_4, Com.

---

1 न्यूनस्य Th.

४४. ननु रिक्तभञ्जने विजय एव फलं किं फलान्तरेणेत्याशङ्क्य सत्यं संदिग्धफलत्वात न तत्र प्रेक्षावतां प्रवृत्तिरित्याह । क्लिष्टेति ॥ क्लिष्टा आत्मा भृत्याश्च यस्य स परिमृग्यसंपत्प्रार्थ्यभूतिः । मृगयतेः स्वार्थण्यन्तात् "अचो यत्" । मान्यभिमानी संशये संदिग्धेऽर्थे यतेतापि । प्रवर्त्तेतापि पाक्षिकफलस्यापि श्रेयस्त्वात् तस्याकिञ्चनस्येति भावः । यस्तु कृतार्थः पूर्णकामोऽपि संदेहमारोहति संदिग्धे प्रवर्त्तते नूनं श्रीस्तत्र पुरुषे रतिं न करोति स श्रिया मुक्त इत्यर्थः । 'सुहृद् धनं तथा राज्यमात्मानं कीर्त्तिमेव च । युधि संदेहदोलार्थं को हि कुर्यादबालिशः ॥ ईषत्फलं निष्फलं च संदिग्धफलमेव च । न कुर्यात्—॥' इति च कामन्दकः ॥

शक्यान्यदोषाणि महाफलानि
समारभेतोपनयन् समाप्तिम् ।
कर्माणि राजा[1] विहितानुरागो
विपर्यये स्याद्वितथः[2] प्रयासः[3] ॥ ४५ ॥

४५. [1]तर्हि कुत्र प्रवर्त्तेतेत्याकाङ्क्षायामाह । शक्यानीति ॥ राजा शक्यानि । अशक्यारम्भस्य विनाशहेतुत्वादिति भावः । अदोषाणि तत्काले उत्तरकाले वेत्यर्थः । 'तदा त्वदोषजननमायत्यां चैव निष्फलम्' इति शास्त्रनिषेधादित्यर्थः । महाफलानि बृहत्फलानि कर्माणि समाप्तिं फलपर्यन्ततामुपनयन् विहितानुरागोऽनुरक्तजनः सन् समारभेत । विपर्यये उक्तवैपरीत्येनारम्भे वितथप्रयासो निष्फलारम्भः स्यात् ॥

जेतुं न शक्यो[4] नृपतिः सुनीति-
र्दोषः क्षयादिः कलहे ध्रुवश्च ।
फलं न किञ्चिन्न शुभा समाप्तिः
कृतानुरागं भुवि संसजारिम्[5] ॥ ४६ ॥

१ राजन् D.
२ वितथप्रयासः Com.
विफलप्रयासः E₂.
३ प्रवासः T₂.
४ शक्यो T₂.
५ संभजा° Com.

1 तर्हि कुत्र श्रीः प्रवृत्तेत्याकाङ्क्षायामाह Th.

४६. विपर्यये वैपरीत्यमेव दर्शयति । जेतुमिति ॥ सुनीतिर्नीतिसंपन्नो नृपतिर्जेतुं शक्यो न । कलहे विग्रहे क्षयादिः । आदिशब्दाद् व्ययप्रयासादिः । दोषश्च ध्रुवोऽवश्यंभावी । फलं च किंचिदपि नास्ति । न समाप्तिः क्रियासमाप्तिः शुभा कुलक्षयात् स्वन्ता न भवति । ततो भुवि कृतानुरागमनुरक्तलोकमरिं रामं संभज संसेवस्व ॥

त्वन्मित्रनाशो निजमित्रलाभः
समेतसैन्यः स च मित्रकृच्छ्रे[1] ।
भोग्यो वशः पश्य शरेण[2] शत्रोः
प्रसाधितो वालिवधे न कोऽर्थः ॥ ४७ ॥

४७. किं चायं वालिवधादेव सर्वसामग्रीसंपन्नो जात इत्याह । त्वदिति ॥ शरेणैकबाणेन वालिवधे सति शत्रोस्तद्विपक्षस्य रामस्य कोऽर्थो न प्रसाधितः सर्वोऽपि साधित एवेत्यर्थः । तथाहि पश्य । त्वन्मित्रस्य नाशो निज आत्मीयो मित्रमेव लाभः सुग्रीवाख्यः । स च एकाकी न भवतीत्याह । समेतसैन्यः सेनासमेतः स च मित्रलाभो मित्रकृच्छ्रे जातः । कृच्छ्रोपकृतो नोपकारिणं जहातीति भावः । भोग्यः कार्यसिद्ध्याद्युपजीव्यो वशोऽनुकूलो विधेय इत्यर्थः । अतोऽपि न रामस्ते विग्राह्य इति भावः ॥

लोभाद्भयाद्वाभिगतः कपीन्द्रो
न राघवं येन भवेद्विभेद्यः ।
स्थितः सतां वर्त्मनि लब्धराज्यः
प्रतिप्रियं सोऽभ्यगमच्चिकीर्षुः[3] ॥ ४८ ॥

४८. न च तं भित्त्वा रामं जेष्यामीत्याशङ्का कार्येत्याह । लोभादिति ॥ कपीन्द्रः सुग्रीवो लोभाद्भयाद्वा राघवं नाभिगत आश्रितो येनार्थदानेनाभयदानेन वा विभेद्यः स्यात् । किं तु स कपीन्द्रो रामाल्लब्धराज्योऽत एव

---

१ बन्धु° D.
२ रणे तु शत्रोः T₃.
३ सोऽभ्यधिकं चिकीर्षुः T₂, T₃, Com.

सतां वर्त्मनि धर्ममार्गे स्थितः सन्नभ्यधिकं रामकृतादधिकं प्रतिप्रियं प्रत्युपकारं चिकीर्षुरभिगतोऽतो न भेद्य इति भावः ॥

फलाशिनो निर्झरकुञ्जभाजो
दिव्याङ्गना[1]नङ्गरसानभिज्ञाः ।
न्यग्जातयो रत्नवरै[2]रलभ्या
मुख्याः कपीनामपि नोप[3]जप्याः ॥ ४९ ॥

४९. तदनुजीविनो न भेद्या इत्याह ॥ फलेति ॥ फलाशिनो नान्नाकाङ्क्षिणो निर्झरान् कुञ्जांश्च भजन्ति पानार्थं निवासार्थं चेति तद्भाजो न संभृतोदकगृहार्थिन इत्यर्थः । दिव्याङ्गनानामालिङ्ग आलिङ्गनम् । भावे घञ् । तद्रसस्य तत्सुखस्यानभिज्ञा अतो न स्त्रीप्रलोभ्या इत्यर्थः । कुतः । यतो नीची जातिर्येषां ते न्यग्जातयस्तिर्यञ्चोऽत एव रत्नवरैरन्यैरपि श्रेष्ठवस्तुभिरलोभ्या नाकर्षणीयाः कपीनां मुख्याः कपियूथपा अपि नोपजाप्या न भेद्याः । अतस्तद्द्वारापि सुग्रीवो न भेद्य इति भावः । अत्र साभिप्रायविशेषणत्वात्परिकरालंकारः । 'साभिप्रायविशेषणत्वं परिकरः' इति लक्षणात् ॥

कृताभिषेको युवराजराज्ये
सुग्रीवराजेन सुता[4]विशेषम् ।
ताराविधेयेन कथं विकारं
तारासुतो यास्यति राक्षसार्थम् ॥ ५० ॥

५०. अङ्गदभेदस्तु दूरापास्त इत्याह । कृतेति ॥ ताराविधेयेन सुग्रीवराजेन सुतनिर्विशेषं युवराजराज्ये कृताभिषेकस्तारासुतोऽङ्गदः कथं राक्षसार्थं विकारं भेदं यास्यति । न हि स्वर्गस्थो नरकमिच्छतीति भावः ॥

---

१ °नालिङ्ग° Com.
२ °रलोभ्या D., E_3, T_3, T_4, Com.
३ नोपजाप्याः Com.
नोविजप्याः T_3.
४ सुतनिर्विशेषम् Com.

पश्यामि रामादधिकं समं वा
नान्यं विरोधे[1] यमुपाश्रयेम[2]।
दत्त्वा वरं सानुशयः स्वयम्भू-
रिन्द्रादयः पूर्वतरं विरुद्धाः ॥ ५१ ॥

५१. न च रामे क्रुद्धे कश्चिदस्माकं शरणमित्याह । पश्यामीति ॥ रामादधिकं समं वान्यं पुरुषधौरेयं न पश्यामि विरोधे रामविग्रहे यमुपाश्रयेम। संभावनायां संप्रश्ने लिङ्। स्वयंभूर्ब्रह्मा तव वरं दत्त्वा सानुशयोऽकार्यं कृतं मयेति पश्चात्तप्तः । इन्द्रादयस्तु पूर्वतरं ततः प्रागेव विरुद्धाः। अतो रामविरोधे सर्वलोकविरोधिनामस्माकं मरणमेव शरणमिति भावः ॥

दुर्गाश्रितानां बहुनापि[3] राजन्
कालेन पार्ष्णिग्रहणादिहेतुः ।
दुर्गोपरोधं न च कुर्वतोऽस्ति
शत्रोश्चिरेणापि दशास्य हानिः ॥ ५२ ॥

५२. दुर्गबलं च न किंचिदत्रोपयुज्यत इत्याह । दुर्गेति ॥ दुर्गाश्रितानामस्माकं परोपरोधे बहुनापि कालेन पार्ष्णिग्रहादिहेतुस्तत्कारी नास्ति। रामस्य कः पार्ष्णिग्रह इति भावः । तन्मा भूत्। अत्र दुर्गोपरोधं कुर्वतः शत्रो रामस्य चिरेणापि हानिरुपघातश्च हे दशास्य नास्त्येव। रामस्य दुर्गोपरोद्धुः को वा वारयितेति भावः ॥

शस्त्रं तरूर्वीधरमम्बु पानं
वृत्तिः फलैर्नो गजवाजिनार्यः।
राष्ट्रं न[4] पश्चान्न जनोऽभिरक्ष्यः
किं दुःस्थमाचक्ष्व भवेत्परेषाम् ॥ ५३ ॥

---

[1] विरोधे समुपा° C.
[2] °मुपाश्रयामि T2. °मुपाश्रयामः T4.
[3] बहुनापि नास्ति T2, T3, T4, Com.
[4] नु T3.
[5] नरो° T2.

५३. हान्यभावमेवाह । शस्त्रमिति ॥ तरवश्चौर्वीधराश्च । "जातिरप्राणिनाम्" इति द्वन्द्वैकवद्भावः । तदेव शस्त्रं न धनुःखड्गादि । अम्बु जलमेव पीयत इति पानं पेयं न क्षीरादि । फलैरेव वृत्तिर्जीवनं न व्रीहियवादि । गजवाजिनार्यस्तु नो न सन्त्येव । पश्चाद्राष्ट्रं न अत एवाभिरक्ष्यो जनोऽपि न । परेषामस्मद्द्विषां दुःस्थं दुःखस्थं किमस्ति । आचक्ष्व ॥

[1]सन्धानमेवास्तु परेण तस्मा-
न्नान्योऽभ्युपायोऽस्ति निरूप्यमाणः ।
नूनं विसन्धौ त्वयि सर्वमेत-
न्नेष्यन्ति नाशं कपयोऽचिरेण ॥ ५४ ॥

विभीषणोक्तं बहु मन्यमानः
प्रोन्नम्य देहं परिणामनम्रम् ।
स्खलद्वलिर्वार्धककम्प्रमूर्धा
मातामहो रावणमित्युवाच ॥ ५५ ॥

५५. विभीषणेति ॥ अथ विभीषणोक्तं बहु मन्यमानो गुरूकुर्वन् परिणामनम्रं जरावनतं देहं प्रोन्नम्य प्रयत्नेनोन्नम्य स्खलद्वलिश्चलद्वलीको वार्धकं वृद्धत्वम् । मनोज्ञादित्वात् वुञ् । तेन कम्प्रमूर्धा मातामहो मातुःपिता माल्यवान् ॥ "पितृव्यमातुलमातामहपितामहाः" इति निपातनात्साधुः ॥ इति वक्ष्यमाणमुवाच ॥

एकः पदातिः पुरुषो धनुष्मान्
योऽनेकमायानि वियद्गतानि ।
रक्षःसहस्राणि चतुर्दशार्दीत्[2]
का तत्र वो मानुषमात्रशङ्का[3] ॥ ५६ ॥

---

१ This verse is not found in T$_2$, T$_3$, and T$_4$, and Com.

२ चतुर्दशार्दत् T$_3$.

चतुर्दशाहन् T$_2$.

३ वार्त्ता Com.

५६. एक इति ॥ यो राम एक एकाकी पदातिः पादचारी भूमिष्ठ इत्यर्थः । धनुष्मान् धनुरेकायुधः सन् । अनेका माया येषां तानि वियद्गतानि खेचराणि चतुर्दश रक्षःसहस्राण्यार्दीद्वधीत् । अर्द हिंसायाम् । लुङि सिचि "इट ईटि" इति सलोपः । अजादित्वादाड्वृद्धिः । तत्तस्मादत्र रामे वो युष्माकं मानुषमात्रवार्त्ता का मनुष्यत्वशङ्कापि कुत इत्यर्थः ॥

ब्रह्मर्षिभिर्नूनमयं सदेवैः
सन्तापितै रात्रिचरक्षयाय ।
नराकृतिर्वानरसैन्यशाली
जगत्यजय्यो विहितोऽभ्युपायः ॥ ५७ ॥

५७. तर्हि कोऽसावत आह ॥ ब्रह्मेति ॥ अयं संतापितैः सदेवैर्ब्रह्मर्षिभिर्वसिष्ठादिभी रात्रिचरक्षयाय राक्षसनाशाय जगति विहितः कल्पितो नराकृतिर्मानुषाकारो वानरसैन्यशाल्यजय्यो जेतुमशक्यः ॥ "क्षय्यजय्यौ शक्यार्थे" इति निपातनात् साधुः ॥ अभ्युपायः कोऽपि दिव्यः साधनविशेषो नूनम् ॥

वज्राभिघातै[1]रविरुग्णमूर्त्तेः[2]
फेणै[3]र्जलानामसुरस्य मूर्ध्नः ।
चकार भेदं मृदुभिर्महेन्द्रो
यथा तथैतत्किमपीति[4] बोध्यम् ॥ ५८ ॥

५८. पुनर्दिव्यत्वमेवाह । वज्रेति ॥ महेन्द्रो वज्रावपातैर्वज्रायुधप्रहारैरविरुग्णमूर्त्तेरभिन्नरूपस्य असुरस्य नमुचेर्मूर्ध्नो मृदुभिर्जलानां घनैर्[1]डिण्डीरैर्भेदं यथा चकार तथैतदपि किमपि दिव्यमवाच्यं वस्त्विति बोध्यं ज्ञेयम् ॥

१ वज्रावपातै° Com., T_3.
२ रविभग्न D.
रविकीर्ण T_4.
३ फेनै E_3, D.
घनै° Com.
सेकै° Com., Th.
४ तथेदं E_3.

1 सेकै Th.

क स्त्रीविसह्याः[1] करजाः क वक्षो
दैत्यस्य शैलेन्द्रशिलाविशालम् ।
संपश्यतैतद् द्युषदां[2] सुनीतं[3]
बिभेद तैस्तन्नरसिंहमूर्त्तिः ॥ ५९ ॥

५९. क्वेति ॥ किं च स्त्रीभिर्विषह्याः सुसहाः सुखकराः करजा नखाः क । शैलेन्द्रशिलाविशालं तद्वत्कठोरमित्यर्थः । दैत्यस्य हिरण्यकशिपोर्वक्षः क । नरसिंहमूर्त्तिर्भगवांस्तैर्नखैस्तद्वक्षो बिभेद विदारयामास । एतद् द्युसदां देवानां सुनीतं सुनयम् । भावे क्तः । संपश्यत तस्माद्रामेऽपि न मानुषबुद्धिः कार्येति भावः ॥

प्रमादवांस्त्वं क्षतधर्मवर्त्मा
गतो मुनीनामपि शत्रुभावम् ।
कुलस्य शान्तिं बहु मन्यसे चेत्
कुरुष्व राजेन्द्र विभीषणोक्तम् ॥ ६० ॥

६०. फलितमाह । प्रमादेति ॥ हे राजेन्द्र त्वं प्रमादवान् प्रमत्तोऽत एव क्षतधर्मवर्त्मा हतधर्ममार्गोऽत एव मुनीनामपि शत्रुभावं गतः । कुलस्य शान्तिं क्षेमं बहु मन्यसे चेद् विभीषणोक्तं कुरुष्व ॥

घोषेण तेन प्रतिलब्धसंज्ञो[4]
निद्राविलाक्षः श्रुतकार्यसारः[5] ।
स्फुरद्[6]घनः साम्बुरिवान्तरीक्षे
वाक्यं ततोऽभाषत कुम्भकर्णः ॥ ६१ ॥

६१. घोषेणेति ॥ ततो माल्यवद्वाक्यानन्तरं तेन घोषेण विभीषणादिकण्ठघोषेण प्रतिलब्धसंज्ञः प्राप्तबोधो निद्राविलाक्षः कुम्भकर्णः श्रुतकार्यसारो माल्यवदादिमुखेन ज्ञातवृत्तान्तः सन्नन्तरिक्षे साम्बुर्घनो मेघ इव स्फूर्जन् गर्जन् वाक्यमभाषत ॥

---

१ °विषह्याः Com., E_3, D., T_3.
२ द्युसदां Com., D.
३ सुनीतिं C.
४ प्रतिबद्ध° T_2.
५ स्तुतका° D.
६ स्फूर्जन् Com.

क्रियासमारम्भगतोऽभ्युपायो[1]
नृद्रव्यसंपत्सहदेशकाला
विपत्प्रतीकारयुतार्थसिद्धि-
र्मन्त्राङ्गमेतानि[2] वदन्ति पञ्च ॥ ६२ ॥

६२. क्रियेति ॥ क्रियासमारम्भं गतोऽभ्युपायः कर्मणामारम्भोपायः सहदेशकाला नृद्रव्यसंपत् पुरुषद्रव्यसंपत्तिर्देशकालौ चेत्यर्थः । विपत्प्रतीकारयुता अर्थसिद्धिः विनिपातप्रतीकारः कार्यसिद्धिश्चेत्यर्थः । एतानि पञ्च मन्त्राङ्गं वदन्ति ॥

विनिश्चितार्थं[3] समयं न[4] देशं
क्रियाभ्युपायादिषु योऽतियायात्[5] ।
स[6] प्राप्नुयान्मन्त्रफलं न मानी
काले विपन्ने क्षणदाचरेन्द्र ॥ ६३ ॥

६३. एवं मन्त्राङ्गान्युक्त्वा मन्त्रमाह । विनिश्चितेत्यादि ॥ यो राजा क्रियाभ्युपायादिषु चतुर्ष्वङ्गेषु विषये विनिश्चितः सर्वथा भविष्यतीति निर्णीतोऽर्थः प्रयोजनं यस्मिंस्तं समयं कालं देशं च नातियायात् योग्यदेशकालाख्याङ्गानतिक्रमेण कर्मारम्भादिकं कुर्यादित्यर्थः स मन्त्रफलं कार्यसिद्धिं प्राप्नुयात् हे क्षणदाचरेन्द्र मानी अहंकारी काले विपन्नेऽतिपन्ने सति न प्राप्नोति ॥

औष्ण्यं[7] त्यजेन्मध्यगतोऽपि भानुः
शैत्यं निशायामथवा हिमांशुः ।
अनर्थमूलं भुवनार्चमानी[8]
मन्ये न मानं पिशिताशिनाथ ॥ ६४ ॥

---

१ ऽभ्युपायो T2.
२ मेतत्प्र° E3.
३ न नि° N., C., T1, B., E3.
४ च N., C., T1, D., B.
५ °ऽभियायात् c.
६ संप्राप्नु° c., T2, T3, T4.
७ तैक्ष्ण्यं c.
औष्णं T4.
८ °नाभिमानी E3.

६४. मानी मानमेवेच्छति न फलमिति चेत् सत्यमित्याह । औष्ण्यमिति ॥ मध्यगतो मध्याह्नगतो भानुरौष्ण्यं त्यजेदथवा हिमांशुर्निशायां शैत्यं त्यजेत् । हे पिशिताशिनाथ राक्षसेन्द्र भुवनावमानी लोकतिरस्कारी मानी अनर्थमूलं सर्वानर्थबीजमपि मानं न त्यजेदिति मन्ये जानामि ॥

तथापि[1] वक्तुं प्रसभं यतन्ते
यन्माद्विधाः सिद्धिमभीप्सवस्त्वाम् ।
विलोम[2]चेष्टं विहिताव[3]हासाः
परैर्हि तत्स्नेहमयै[4]स्तमोभिः ॥ ६५ ॥

६५. तर्हि तूष्णीं भूयतां किमनेन कण्ठशोषणेनेत्याशङ्क्याह । तथापीति ॥ तथापि ज्ञात्वापि सिद्धिमभ्युदयमभीप्सवः प्रेप्सवो मद्विधा मादृशा आप्ताः परैर्मूर्खैर्विहितापहासा अपहास्यमाना अपि विलोमचेष्टं विरुद्धप्रवृत्तिमनर्थप्रवृत्तं त्वां वक्तुं हितमुपदेष्टुं प्रसभं बलाद्यतन्ते इति यत् तत् स्नेहमयैस्तमोभिर्वृता इति हेतोरित्यर्थः । न स्निग्धाः स्वजनहानिं सहन्त इति भावः ॥

क्रूरा[5]ः क्रिया ग्राम्यसुखेषु सङ्गः
पुण्यस्य यः संक्षयहेतुरुक्तः ।
निषेवितोऽसौ भवतातिमात्रं
फल[6]त्यवल्गु ध्रुवमेव[7] राजन् ॥ ६६ ॥

६६. यदुक्तं विलोमचेष्टितमिति तद्दर्शयन्ननर्थोदर्कतां तस्याह । क्रूरेति ॥ क्रिया चेष्टा क्रूरा हिंस्रा न कुत्रापि शान्ता । सङ्ग आसक्तिर्ग्राम्यसुखेषु न-

---

१ D., reads it as under:—
तथापि यत्सिद्धिमभीप्सवस्त्वां
विलोमचेष्टं प्रसभं यतन्ते ।
वक्तुं जनैस्तद्विहितावहासा
धिङ् मद्विधाः स्नेहमयैस्तमोभिः ॥
२ विलोल° E_3.
३ विहितापहासाः Com.
४ स्नेहमयैर्मनोभिः c.
५ क्रूरा Com.
६ भवत्यवल्गु T_3.
फलत्यफल्गु Com., T_2, T_4.
७ °मेष T_2.

धर्म्येषु कर्मसु । व्यापारो ब्रह्मवधपरस्त्रीहरणादिः पुण्यसंक्षये हेतुरुक्तः शास्त्रे प्रतिपादितो हे राजन् भवतातिमात्रं निषेवितोऽसौ व्यापारोऽफल्गु अनर्थं फलत्येव ध्रुवम् ॥

दत्तं न किं के विषया न भुक्ताः
स्थितोऽस्मि कं[1] वा परिभूय नोच्चैः ।
इत्थं कृतार्थस्य मम ध्रुवं स्या-
न्मृत्युस्त्वदर्थे यदि किं न लब्धम् ॥ ६७ ॥

६७. सर्वं त्वदर्थमुक्तं मम तु त्वदर्थं प्राणत्याग एव पुरुषार्थ इत्याह । दत्तमिति ॥ त्वत्प्रसादादर्थिभ्यः किं न दत्तं के वा विषया न भुक्ताः कं वा परिभूयोच्चैः पदे न स्थितोऽस्मि । इत्थं कृतार्थस्य लब्धसर्वपुरुषार्थस्य मम त्वदर्थे मृत्युर्मरणं स्याद्यदि किं न लब्धं सर्वमेव लब्धं ध्रुवम् । स्वाम्यर्थे युद्धमरणं वीराणां जन्मजीवनयोः फलमिति भावः ॥

किं दुर्नयैस्त्वय्युदितैर्मृषार्थै-
र्वीर्येण वक्तास्मि रणे समाधिम्
तस्मिन्प्रसुप्ते पुनरित्थमुक्त्वा
विभीषणोऽभाषत राक्षसेन्द्रम् ॥ ६८ ॥

६८. किमिति ॥ हे राजन् त्वयि विषये उदितैः प्रहस्ताद्यैः । वदेः कर्मणि क्तः । यजादित्वात्संप्रसारणम् । मृषार्थैर्निरर्थकैर्दुर्नयैर्भानुं पिनषामेत्यादिकैः शूरालापैः किं किं तु तेषां रणे वीर्येण पराक्रमेण समाधिं समाधानं वक्तास्मि वक्ष्यामि । वचेर्लुटि मिपि तास् । किमिह सभामध्ये शूरालापैः सर्वेषां रामरण एव निकषस्थानं तत्र कर्मणैव व्यक्तिर्भविष्यतीति भावः । इत्थमुक्त्वा तस्मिन्कुम्भकर्णे प्रसुप्ते सति पुनर्विभीषणो राक्षसेन्द्रमभाषत ॥

---

१ वा कं N., C., T1, B.

निमित्तशून्यैः स्थगिता रजोभि-
र्दिशो मरुद्भिर्विकृतैर्विलोलैः ।
स्वभावहीनैर्मृगपक्षिघोषैः
क्रन्दन्ति भर्त्तारमिवाभिपन्नम् ॥ ६९ ॥

६९. अथोत्पाता अनर्थसूचका दृश्यन्त इत्याह पञ्चभिः श्लोकैर्निमित्तेत्यादिभिः ॥ निमित्तशून्यैराकस्मिकै रजोभिर्धूलिभिः स्थगिताश्छन्ना विलोलैः क्षुभितैर्मरुद्भिर्विकृता भयंकरा दिशः स्वभावहीनैः प्रकृतिविपरीतैर्मृगपक्षिघोषैरतिपन्नं मृतं भर्त्तारं स्वपतिं क्रन्दन्तीव क्रोशन्तीव ॥

उत्पातजं छिद्रमसौ विवस्वान्
व्यादाय वक्राकृति लोकभीष्मम् ।
अत्तुं जनान् धूसररश्मिराशिः
सिंहो यथा कीर्णसटोऽभ्युदेति ॥ ७० ॥

७०. उत्पातेति ॥ असौ विवस्वान् वक्राकृतिं मुखाकारं लोकभीष्मं लोकभयंकरं भीषणमुत्पातजमुत्पातप्रयुक्तं छिद्रं रन्ध्रं व्यादाय विवृत्य धूसररश्मिराशिः सन् जनानत्तुं भक्षयितुं कीर्णसटो विक्षिप्तकेसरः सिंहो यथा सिंह इवाभ्युदेति ॥

मार्गं गतो गोत्रगुरुर्भृगूणा-
मगस्तिनाध्यासितविन्ध्यशृङ्गम् ।
संदृश्यते शक्रपुरोहितोऽह्नि
क्ष्मां कम्पयन्त्यो निपतन्ति चोल्काः ॥ ७१ ॥

७१. मार्गमिति ॥ किं च भृगूणां गोत्रगुरुर्भार्गवः शुक्रोऽगस्तिनागस्त्येन । 'अगस्तिर्विन्ध्यकूटकः' इत्यगस्त्यपर्यायेषु यादवः । अध्या-

१ निवृत्त° T2.
२ मृदु° T3.
३ °वातिपन्नम् Com.
४ छिन्न° T4.
५ आदाय T3.
६ हन्तुं T2.
७ ऽभ्युपैति C.

सितं विन्ध्यशृङ्गं यस्मिंस्तं मार्गं दक्षिणमार्गं गतः शक्रपुरोहितो बृहस्पतिरपि संदृश्यते । उल्काश्च क्ष्मां कम्पयन्त्यो निपतन्ति ॥

मांसं हतानामिव राक्षसाना–
माशंसवः क्रूरगिरो रुवन्तः[1] ।
क्रव्याशिनो[2] दीप्त[3]कृशानुवक्त्रा
भ्राम्यन्त्यभीता[4]: परितः पुरं नः ॥ ७२ ॥

७२. मांसमिति ॥ किं च हतानां राक्षसानां मांसमाशंसवो भिक्षव इव ॥ "सनाशंसभिक्ष उः" ॥ क्रूरगिरः परुषारावा रुवन्तः क्रोशन्तो दीप्तः कृशानुर्येषु तानि वक्त्राणि येषां ते अग्निगर्भमुखाः क्रव्याशनाः[1] शृगालादयो नोऽस्माकं पुरं परितः सर्वतोऽभीका निर्भीकाश्चरन्ति ॥

पयो घटोध्नीरपि गा दुहन्ति
मन्दं विवर्णं विरसं च गोपाः ।
हव्येषु कीटोपजनः सकेशो
न दीप्यतेऽग्निः सुसमिन्धनोऽपि ॥ ७३ ॥

७३. पय इति ॥ गोपा गोपालका घटा इवोधांस्यापीनानि यासां ता घटोध्नीरपि गा धेनूः । 'ऊधस्तु क्लीबमापीनम्' इत्यमरः ॥ "ऊधसोऽनङ्" इत्यनङ् समासान्तः ॥ "बहुव्रीहेरूधसो ङीष्" ॥ मन्दमल्पं विवर्णं विरसं च रूपरसान्तरमापन्नमित्यर्थः । पयः क्षीरं दुहन्ति । 'दुहियाचि—' इत्यादिना द्विकर्मकत्वम् । हव्येष्वोदनादिषु सकेशः कीटोपजनः कीटजन्म । जनेर्भावे घञ् ॥ "जनिवध्योश्च" इति वृद्धिप्रतिषेधः ॥ सर्वत्रौदनादिकं केशकीटावसन्नं दृश्यत इत्यर्थः । सुसमिन्धनोऽप्यग्निर्न दीप्यते ॥

---

१ भ्रुवन्तः C.
२ क्रव्याशना Com.
क्रव्याशिनो Com., Th.
३ दीप्र D.
४ °न्त्यभीकाः Com.

---

1 क्रव्याशिनो Th.

तस्मात्कुरु त्वं प्रतिकारमस्मिन्
स्नेहान्मया रावण भाष्यमाणः ।
वदन्ति दुःखं ह्यनुजीविवृत्ते[1]
स्थिताः पदस्थं परिणामपथ्यम् ॥ ७४ ॥

७४. तस्मादिति ॥ हे रावण तस्माद् दुर्निमित्तदर्शनान्मया स्नेहाद् भ्रातृस्नेहाद् भाष्यमाणो हितमुच्यमानस्त्वमस्मिन्ननर्थे प्रतिकारं परिहारम् । बहुलग्रहणात् "उपसर्गस्य घञि—" इति न दीर्घः । कुरु । तथा हि । अनुजीविवृत्ते सेवकवृत्तौ स्थिताः सेवका इत्यर्थः । पदस्थं स्वामिपदस्थं स्वामिनं दुःखयतीति दुःखं तत्कालासह्यं परिणामे उत्तरकाले पथ्यं हितं वदन्ति उपदिशन्ति । अतो मयोच्यत इत्यर्थः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

विरुग्णसंकीर्णविपन्नभिन्नैः
प्रक्षुण्णसंह्रीणशितास्त्रवृक्णैः ।
यावन्नराशैर्न रिपुः शवाशान्
संतर्पयत्यानम तावदस्मै[2] ॥ ७५ ॥

७५. विरुग्णेति ॥ हे रावण रिपू रामो विरुग्णैर्भग्नैः । रुजो भङ्गे ॥ "ओदितश्च" इति निष्ठानत्वे णत्वम् ॥ संकीर्णैः संश्लिष्टैर्विपन्नैर्मृतैर्भिन्नैर्विदारितैः प्रक्षुण्णैः संचूर्णितैः । यथायोगं रदाभ्यां निष्ठानत्वम् । संह्रीणैः पराजयलज्जितैः ॥ "नुदविद—" इत्यादिना पक्षे निष्ठानत्वम् ॥ शितास्त्रवृक्णैः शितशरच्छिन्नैः । ओव्रश्चू छेदने । ओदित्वान्निष्ठानत्वम् ॥ "स्कोः—" इति संयोगादिसकारलोपः ॥ "चोः कुः" ॥ नराशैर्नरभक्षकैः राक्षसैः शवानश्नन्तीति शवाशान् कुणपाशिनो गृध्रगोमायुप्रमुखान् । उभयत्र अश्नातेः "कर्मण्यण्" । यावन्न संतर्पयति तावदस्य रामस्य नम रामं प्रणमेत्यर्थः । संबन्धसामान्ये षष्ठी ॥

[1] वृत्तस्थिताः E₃.
[2] तावदस्य T₂, T₃, T₄, Com.

भ्रूभङ्गमाधाय विहाय धैर्यं
विभीषणं भीषणरूक्षचक्षुः।
गिरं जगादोग्रपदामुदग्रः
स्वं स्फावयन् शक्ररिपुः प्रभावम्॥ ७६॥

७६. भ्रूभङ्गमिति॥ अथ शक्ररिपुर्दशास्यो भ्रूभङ्गमाधाय भ्रूकुटीं कृत्वा धैर्यं निर्विकारतां विहाय भीषणानि भयंकराणि रूक्षाणि क्रूराणि चक्षूंषि यस्य स तथा उदग्र उन्नमितोर्ध्वकायः सन् प्रभावं सामर्थ्यं संस्फावयन् संवर्ध्य प्रकटयन्नित्यर्थः॥ "स्फायो वः" इति णिचि वकारादेशः। विभीषणमुग्रपदां परुषाक्षरां गिरं जगाद॥

शिला तरिष्यत्युदके न पर्णं
ध्वान्तं रवेः स्यन्त्स्यति वह्निरिन्दोः।
जेता परोऽहं युधि जेष्यमाण-
स्तुल्यानि मन्यस्व पुलस्त्यनप्तः॥ ७७॥

७७. शिलेति॥ पुलस्त्यनप्तः पुलस्त्यस्य पौत्र। क्षात्रगन्धहीनोऽसीति भावः। 'नप्तारौ पौत्रदौहित्रौ' इति यादवः। शिला उदके तरिष्यति प्लविष्यते पर्णं न तरिष्यति किं तु मङ्क्ष्यतीति भावः। रवेरर्काद् ध्वान्तं स्यन्त्स्यति स्यन्दिष्यते स्रविष्यतीत्यर्थः। स्यन्दू प्रस्रवणे॥ "वृद्भ्यः स्यसनोः" इति पक्षे परस्मैपदम्॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः॥ इन्दोश्चन्द्राद् वह्निः स्यन्त्स्यतीत्यनुषङ्गः। युधि परो जेताहं जेष्यमाणस्तुल्यान्येतानि मन्यस्व। शिलाप्रतरणादिकल्पो मे पराजय इति भावः। अत्र शिलाप्रतरणपर्णमज्जनादिवाक्यार्थानां पराजयवाक्यार्थेन सामानाधिकरण्याभावात् सादृश्याक्षेपाद्बहूनां मालया निबन्धनाच्चासंभवद्वस्तुसंबन्धा वाक्यार्थनिष्ठा मालानिदर्शना।'असं-

१ विधाय T_4.
२ रूक्ष c., D., Com.
३ संस्फावयन् Com., D, संस्थापयन् T_2, T_3.

भवद्धर्मयोगादुपमानोपमेययोः । प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना" ॥ इति लक्षणात् ॥

अनिर्वृतं भूतिषु गूढवैरं
सत्कारकालेऽपि कृताभ्यसूयम् ।
विभिन्नकर्माशयवाक् कुले नो
मा ज्ञातिचेलं भुवि कस्यचिद्भूत् ॥ ७८ ॥

७८. अनिर्वृतमिति ॥ भूतिषु संपत्सु अनिर्वृतं बहु गृहीत्वाप्यसंतुष्टं गूढवैरं बहिः प्रसन्नमपि अन्तः संभृतमत्सरं सत्कारकालेऽपि कृताभ्यसूयं सत्कुर्वत्स्वपि दोषदृष्टिपरं विभिन्नानि विपरीतानि कर्माण्याशया अभिप्राया वाचश्च यस्य तत् । 'वचस्यन्यन्मनस्यन्यत्कर्मण्यन्यद् दुरात्मनाम्' इति भावः । कुलस्य एनः जन्मान्तरसंचितपापस्वरूपं ज्ञातिचेलं गर्हितज्ञातिर्भुवि कस्यचिदपि मा भूत् । गर्हितो ज्ञातिः ज्ञातिचेलम् । 'चेलो नीचेऽन्यवच्चेलमंशुके गर्हितेऽन्यवत्' इति विश्वः । अत्र विशेषणसमासे प्राप्ते विशेष्यस्य पूर्वनिपातार्थः "कुत्सितानि कुत्सनैः" इति समासः ॥ अत्र विशेषणस्य चेलशब्दस्य वैयाकरणखसूचीत्यादिवत् विशेष्यलिङ्गत्वे न्याय्ये नपुंसकत्वं चिन्त्यम् । अथवा नपुंसकपाठः प्रामादिको लेखकहस्तागतः । अनिर्वृतो भूतिषु गूढवैर इत्यादि सर्वत्र पुल्लिङ्गान्तरपाठ एव साधीयान् द्रष्टव्यः । कुलैन इति नियतालिङ्गत्वात् उभयत्राप्यविरुद्धमिति सर्वं सुस्थम् ॥

इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि
न ज्ञातयस्तुल्यकुलस्य लक्ष्मीम् ।
नमन्ति शत्रून् न च बन्धुवृद्धिं
सन्तप्यमानैर्हृदयैः सहन्ते ॥ ७९ ॥

१ कुलैनो Com.
२ ज्ञातिवैरं T2, T4.
३ शत्रूं c.
४ वृत्तिं T3.

1 इस्तु Th.

७९. इच्छन्तीति ॥ किं च ज्ञातयोऽभीक्ष्णमात्मनोऽपि क्षयमिच्छन्ति । तत्क्षये स्वस्यापि क्षयोऽस्तु । तथापि तुल्यकुलस्य सगोत्रस्य लक्ष्मीं नेच्छन्ति न सहन्ते । शत्रूंश्च नमन्ति मानहानिं न पश्यन्तीति भावः । किं तु संतप्यमानैरीर्ष्याग्निना दह्यमानैर्हृदयैरुपलक्षिता बन्धुवृद्धिं न सहन्ते । मानहान्यात्मनाशावपि सह्यौ न बन्धुवृद्धिरित्यर्थः ॥

त्वयाद्य लङ्काभिभवेऽतिहर्षाद्
दुष्टोऽ[1]तिमात्रं विवृ[2]तोऽन्तरात्मा ।
धिक् त्वां मृषा ते मयि दुःस्थबुद्धि-
र्वदन्निदं तस्य ददौ स पार्ष्णिम् ॥ ८० ॥

८०. किमपराद्धं मया येनायमुपालम्भ इत्याह ॥ त्वयेति ॥ अद्य त्वया लङ्काया अभिभवे उपप्लवे सत्यपि अतिमात्रं हृष्टोऽन्तरात्मा अन्तर्यामी अतिहर्षाद्विवृतः जेतुं न शक्य इत्यादिना प्रकाशितः । मयि विषये तव दुःस्था दुःखतप्ता बुद्धिः मृषा मिथ्या । अतस्त्वां धिगितीदं वदन् स रावणस्तस्य विभीषणस्य पार्ष्णिं गुल्फाधोङ्घ्रिभागम् । 'स्त्रियां पार्ष्णिस्तयोरधः' इत्यमरः । ददौ पादेन प्रजहारेत्यर्थः ॥

ततः स कोपं क्षमया निगृह्णन्
धैर्येण मन्युं विनयेन गर्वम् ।
मो[3]हं धियोत्साहवशादशक्तिं
समं चतुर्भिः सचिवैरुदस्थात् ॥ ८१ ॥

८१. तत इति ॥ ततः पादप्रहारानन्तरं स विभीषणः कोपं पादप्रहारप्रयुक्तं क्रोधं क्षमया क्षान्त्या निगृह्णन् निरुन्धन् मन्युं सभामध्येऽवमानप्रयुक्तं शोकं धैर्येण मनःसमाधिना गर्वं प्रतीकारप्रवर्त्तकं दर्पं विनयेन दमेन मानमहंकारं सामर्थ्याभिमानं धिया विवेकबुद्ध्या अशक्तिं प्रहारप्रयुक्तं शक्तिह्रासमुत्साहवशात्प्रयत्नदार्ढ्याच्च निगृह्णन् चतुर्भिः

---

१ हृष्टोऽति° Com., D.
२ विवृतान्त° E_2.
३ मानं Com.

सचिवैः समं सार्धं उदस्थात् आसनादुत्थितः । उत्पूर्वात्तिष्ठतेर्लुङि ऊर्ध्वकर्मत्वान्न तङ् । अत्र क्षान्त्यादिगुणयौगपद्यात् गुणसमुच्चयोऽलंकारः । कोपादिनिग्रहक्रियायौगपद्यात् क्रियासमुच्चयश्च । 'गुणक्रियायौगपद्यं समुच्चयः' इति लक्षणात् ॥

उवाच चैनं[1] क्षणदाचरेन्द्रं
सुखं महाराज विना मयास्स्व ।
मूर्खातुरः पथ्यकटूननश्नन्
यत्सामयोऽसौ भिषजां न दोषः ॥ ८२ ॥

८२. उवाचेति ॥ अथोत्थानानन्तरं क्षणदाचरेन्द्रं रावणमुवाच । किमित्यपेक्षिते चतुर्भिराह । हे महाराज मया विना सुखं यथा तथा आस्स्व तिष्ठ । न चात्रोपेक्षादोषो ममेति दृष्टान्तेनाह । मूर्खातुरो मूर्खरोगी पथ्यानि हितानि कटूनि तीक्ष्णान्यौषधान्यनश्नन् न सेवमानोऽतः सामयो रोगीति यत् असौ रोगो भिषजां दोषो न भवति । किं तु मन्त्रिणां भिषजामिवानुपदेशो दोषस्तदश्रवणं रोगिण इव राज्ञो दोषो नोपदेष्टुरिति दृष्टान्तालंकारः ॥

करोति वैरं स्फुटमुच्यमानः
[2]प्रतुष्यति श्रोत्रसुखैरपथ्यैः ।
विवेकशून्यः प्रभुरात्ममानी[3]
महाननर्थः सुहृदां बतायम् ॥ ८३ ॥

८३. करोतीति ॥ किं च यः प्रभुः स्फुटं व्यक्तमुच्यमानो हितमुपदिश्यमानो वैरमुपदेष्टरि द्वेषं करोति तथा श्रोत्रसुखैस्तत्कालश्राव्यैरपथ्यैरन्तर्विरसैर्दुरुपदेशैस्तुष्यति विवेकशून्यो मूढ आत्ममानी पण्डितंमन्योऽयं प्रभुः स्वामी सुहृदामाश्रितानां महाननर्थोऽनर्थहेतुरित्यर्थः ॥

---

१ वाचां D.
चाथ T2, T3, Com.
२ प्रहृष्यति E2.
यस्तुष्यति T2, T3, T4, Com.
विनश्यति D.
३ °त्ममानो C.

क्रीडन् भुजङ्गेन गृहानुपातं
कश्चिद्यथा जीवति संशयस्थः ।
संसेवमानो[1] नृपतिं प्रमूढं
तथैव य[2]ज्जीवति सोऽस्य लाभः ॥ ८४ ॥

८४. क्रीडन्निति ॥ यथा कश्चिद् व्यालग्राही गृहं गृहमनुपत्य गृहानुपातम् ॥ "विशिपति—" इत्यादिना व्यापमाने णमुल् ॥ भुजङ्गेन सर्पेण क्रीडन् संशयस्थः प्राणसंशये तिष्ठन्नेव जीवति तथैव प्रमूढमविवेकिनं पतिं स्वामिनं सेवमानोऽपि यज्जीवति यावतः क्षणान् जीवति स एवास्य लाभः । न त्वागामिक्षणाशा । उपमालंकारः ॥

दत्तः स्वदोषैर्भवता प्रहारः
पा[3]देन धर्म्ये पथि मे स्थितस्य ।
स[4] चिन्तनीयः सह[5] मन्त्रिमु[6]ख्यैः
कस्यावयोर्लाघवमा[7]दधातु ॥ ८५ ॥

८५. दत्त इति ॥ धर्म्ये पथि स्थितस्य मे मम भवता स्वदोषैर्दर्परोषादिभिर्निमित्तैर्दत्तः कृतः पादेन प्रहारस्तव मन्त्रिमुख्यैः सह चिन्तनीयो विचारणीय आवयोर्मध्ये कस्य लाघवमाददातीति[1] ॥ 'आकेशग्रहणान्मित्रमकार्यात्सन्निवर्त्तयेत्' इति शास्त्रात्तवैवायं दोषो न मे धर्म्ये पथि स्थितस्येत्यर्थः ॥

इति वचनमसौ रजनिचरपतिं
बहुगुणमसकृत्प्रसभमभिदधत् ।
निरगमदभयः पुरुषरिपुपुरा-
न्नरपतिचरणौ नवितुमरिनुतौ ॥ ८६ ॥

१ °नोऽधिपतिं D., T2, T3, T4.
२ यो जीवति T3, T4.
३ पदेन T2, T3.
४ संचिन्त्यमानः T2.
५ स च म° T2.
६ वर्गैः T2, T3.
७ माददाति Com.
मादधाति Th., Com.

1 मादधा° Th.

८६. इतीति ॥ असौ विभीषणो रजनिचरपतिं रावणम् ॥ "कृदिकारादक्तिनः" इति विकल्पादनीकारः ॥ बहुगुणं शुभोदर्कमिति पूर्वोक्तं वचनमसकृद्बहुकृत्वः प्रसभं बलादभिदधदभिदधानः ॥ "नाभ्यस्ताच्छतुः" इति नुमभावः ॥ अरिभिर्नुतौ रिपुस्तुतौ किमुत भक्तैः सर्वशरणत्वादिति भावः ॥ "श्र्युकः किति" इतीट्प्रतिषेधः ॥ नरपतिचरणौ रामपादौ नवितुं स्तोतुं सेवितुमित्यर्थः । णुस्तुतौ इति धातोः तुमुनि इडागमः । युणुक्ष्णुव इति वचनात् । पुरुषरिपुपुरात् लङ्कानगरात् निर्भयो निरगमत् । गमेर्लुङि लृदित्वादङ् । शाक्करं प्रहरणकलिकावृत्तम् । 'ननभनलगिति प्रहरणकलिका' इति लक्षणात् ॥

अथ तमुपगतं विदितसुचरितं
पवनसुतगिरा गिरिगुरुहृदयः ।
नृपतिरमदयन्मुदितपरिजनं
स्वपुरपतिकरैः सलिलसमुदयैः ॥ ८७ ॥

८७. अथेति । अथ विभीषणगमनानन्तरं गिरिगुरुहृदयः स्थिरचित्त इत्यर्थः ॥ नृपती राम उपगतं रावणादागतं पवनसुतगिरा हनूमद्वाक्येन विदितसुचरितं ज्ञातशुद्धिं स्वपुरपतिं कुर्वन्तीति तत्करैः स्वस्वामिनो लङ्काधिपत्ये हेतुभिरित्यर्थः ॥ "कृञो हेतु—" इत्यादिना हेत्वर्थे टप्रत्ययः॥ सलिलसमुदयैरभिषेकोदपूरैर्मुदितपरिजनं संतुष्टभृत्यं विभीषणममदयत् समतोषयत् अत्यन्तमादृतवानित्यर्थः । पूर्वकमेव वृत्तम् ॥

इति भट्टिकाव्ये प्रसन्नकाण्डे भाविकत्वप्रदर्शनस्तृतीयः
काव्यस्य द्वादशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने द्वादशः सर्गः ॥

॥ श्रीः ॥

अथ त्रयोदशः सर्गः

चारुसमीरणरमणे हरिणकलङ्ककिरणावलीसविलासा ।
आबद्धराममोहा वेलामूले[1] विभावरी परिहीणा ॥ १ ॥

१. अथास्मिन्सर्गे भाषासंकरस्यापि चमत्कारकारितया काव्येऽलंकारत्वेन तन्निबध्नन् अपभ्रंशादीनां तथा प्राकृतभेदेषु च देश्यितद्भवयोश्च संस्कृते समावेशासंभवात् तत्समाख्यभेदाश्रयणेन भाषासमाख्यं शब्दचित्रमार्यागीत्याख्येन मात्रावृत्तेनाह । चार्वित्यादि ॥ चारुणा शैत्यादिगुणमनोहरेण समीरणेन रमयतीति रमणे मनोरमे । नन्द्यादित्वाल्ल्युः । वेलामूले समुद्रतीरप्रान्ते । 'वेलाकाले समुद्रस्य तीरनीरविकारयोः' इति विश्वः । हरिणकलङ्कस्य मृगाङ्कस्येन्दोः किरणावलीभिः सविलासा विलासवती चन्द्रेण सह विहारिणीत्यर्थः । एवंभूता विभावरी रात्रिः आरब्धराममोहा स्वयमुद्दीपकत्वात् रामस्य जनितमूर्च्छा सतीत्यर्थः । परिहीणा परिक्षीणा विभातेत्यर्थः । एतेन समुद्रप्रार्थनार्थं तत्कूले सनियमं कुशशयनसन्निविष्टैकरात्रिर्नीता । तावतैव समुद्रो न प्रत्यक्ष इत्युक्तं वेदितव्यम् । अत्र सर्वेषां शब्दानां संस्कृतप्राकृतयोरेकरूपत्वात् भाषासमत्वम् । एवमुत्तरत्रापि द्रष्टव्यम् । रमणे मूले इत्यत्रापि "ङेरेम्मी" इति पक्षे ङेरेकारः प्राकृते संस्कृते गुण इत्यैकरूप्यादविरोधः । अस्मिन्सर्गे मात्रावृत्तमार्यागीतिः इति । 'आर्यापूर्वार्धे यदि गुरुणैकेनाधिकेन निधने युक्तम् । इतरत्तद्वन्निखिलं भवति यदीयमुदितेयमार्यागीतिः ॥' इति लक्षणम् । आर्या सप्तगणा इयमष्टगणेति एतावाननयोर्भेद इत्यर्थः ॥

बद्धो वासरसङ्गे भीमो रामेण लवणसलिलावासे ।
सहसा संरम्भरसो दूरारूढरविमण्डलसमो लोले ॥ २ ॥

---

[1] वेलातटे E3.

२. अथ प्रार्थनामनाद्रियमाणाय समुद्राय रामश्चुक्रोधेत्याह । बद्ध इति ॥ अथ वासरसङ्गे प्रभाते लोले क्षुभिते लवणसलिलावासे लवणजलनिधौ विषये रामेण सहसा सद्यो भीमो भयंकरो दूरारूढरविमण्डलसमो मध्याह्नस्थितमार्तण्डमण्डलप्रचण्डः संरम्भरसो रौद्ररस इति यावत्। 'संरम्भः संभ्रमे कोपे' इति विश्वः। बद्धः स्थापितः। अत्राप्यावासे लोल इति ङौ पूर्ववदैकरूप्यम् । बद्धो भीमो इत्यादौ "अत ओत्सोः" इति सोरोकार इति प्राकृते संस्कृते तु "हशि च" इति रोरुत्वे गुण इत्युभयत्रैकरूप्यम् ॥

गाढगुरुपुङ्खपीडासधूमसलिलारिसम्भवमहाबाणे ।
आरूढा संदेहं रामे समहीधरा मही सफणिसभा ॥ ३ ॥

३. अथ समुद्राय क्रुद्धो रामः साक्षेपमस्त्रं प्रजिघायेत्याह । गाढेति ॥ रामे गाढया निबिडया गुरोः पुङ्खस्य कर्त्तर्याख्यस्य मूलप्रदेशस्य 'कर्त्तरी पुङ्खे' इति यादवः। पीडया अङ्गुलिपीडनेन सधूमस्य सलिलारेरग्नेः संभवो यस्मात्स महाबाणो यस्य तस्मिन् सति आग्नेयास्त्रं प्रयुञ्जाने सतीत्यर्थः। समहीधरा सपर्वता सफणिसभा सनागलोका मही संदेहमारूढा तद्विनाशशङ्का जातेत्यर्थः। अत्र धूमेति धरेति धकारस्य पदादित्वात् "खघथधभां हः" इति हकारो न भवति। "अनादौ" इत्यधिकारात्। सभेति भकारस्यानादित्वेऽपि प्रायग्रहणान्न भवतीति साम्यस्थितिः। सप्तमी तु पूर्ववत् ॥

घोरजलदन्तिसङ्कुलमट्टमहापङ्ककाहलजलावासम् ।
आरीणं लवणजलं समिद्धफलबाणविद्धघोरफणिवरम् ॥ ४ ॥

४. घोरेति ॥ घोरैर्भीमैर्जलदन्तिभिर्गजयादोभिः संकुलं संकीर्णमट्ट-तीत्यट्टं शुष्कमित्यर्थः । अनेकार्थत्वाद् धातूनामट्टहिंसातिक्रमयो-रिति धातोर्भौवादिकात् पचाद्यच् । तस्मिन्महापङ्के काहलाः शुष्का जलावासा जलग्रहा यस्मिंस्तत्। 'काहलं भृशशुष्कयोः' इति विश्वः।

समिद्धफलेन प्रज्वलिताग्रेण बाणेन विद्धाः प्रहता घोरा भीमा फणिधरा महासर्पा यस्मिंस्तत् । लवणं च तज्जलं च तत् आरीणं समन्तात्क्षुण्णकम् । री गतिशोषणयोः इति धातोः कर्त्तरि क्तः । "ल्वादिभ्यः" इति निष्ठानत्वे णत्वम् ॥

सभयं परिहरमाणो महाहिसंचारभासुरं सलिलगणम् ।
आरूढो लवणजलो जल[1]तीरं हरिबलागमविलोलगुहम् ॥ ५ ॥

५. अथ समुद्रः प्रादुरभूदित्याह । सभयमिति ॥ लवणजलो मूर्त्तिमान् लवणसमुद्रो महतामहीनां संचारेण भासुरं तच्छिरोरत्नैर्भास्वरं सलिलगणं जलपूरं परिहरमाणोऽपसारयन् हरिबलागमेन कपिसैन्यसंचारेण विलोलगुहं व्याकुलगह्वरं जलतीरं रामाधिष्ठितं तटं सभयं यथा तथा अपराधित्वादिति भावः । आरूढ आरुरोह । रुहेः कर्त्तरि क्तः । सावोत्वं प्राकृते संस्कृते तूत्वगुणौ च पूर्ववत् ॥

च[2]ञ्चलतरुहरिणगणं बहुकुसुमाबन्धबद्धरामावासम् ।
हरिपल्लवतरुजालं तुङ्गोरुसमिद्धतरुवरहिमच्छायम् ॥ ६ ॥

६. तदेव तीरं श्लोकद्वयेन विशिनष्टि । चञ्चदिति ॥ चञ्चन्तो वल्गन्तस्तरुहारिणगणाः शाखामृगसमूहा यस्मिंस्तत् । बहुकुसुमानां बहुकुसुमवृक्षाणामाबन्धः परस्परसङ्गस्तत्र बद्धो रचितो रामावासो यस्मिंस्तत् । हरिपल्लवानि हरितकिसलयानि तरुजालानि यस्मिंस्तत् । 'हरिर्वाच्यवदाख्यातो हरित्कपिलवर्णयोः' इति विश्वः । तुङ्गा उन्नता उरवो विपुलाः समिद्धा उज्वलाश्च ये तरुवरास्तैर्हिमशीतला छाया यस्मिंस्तत् ।

वरवारणं सलिलभरेण गिरिमहीमण्डलसंवरवारणम् ।
वसुधारयं तुङ्गतरङ्गसङ्गपरिहीणलोलवसुधारयम् ॥ ७ ॥

७. वरेति ॥ पुनः वरवारणं श्रेष्ठगजाढ्यं तथा सलिलभरेण समुद्रजलौघेन गिरीणां महीमण्डलस्य च यः संवरः संवरणमाक्रमणम् ॥ "ग्रह-

१ जलनीलं T2. | २ चञ्चत्तरु° Com.

वृद्दनिश्चिगमश्च" इत्यप्प्रत्ययः ॥ तस्य वारणं निवारकं समुद्रस्य वेलानतिक्रमत्वादिति भावः । वसूनां धनानां धारयतीति धारयम् ॥ "अनुपसर्गाल्लिम्प—" इत्यादिना धारेः शप्रत्ययः ॥ तुङ्गतरङ्गाणां सङ्गः संबन्धस्तस्मात्परिहीणो भ्रष्टो लोलो वसुधायां तत्संबन्धिन्यां रयो यस्य तत् तीव्रतरङ्गाघातमित्यर्थः । तीरं प्राप । एतानि सप्त साकल्येन भाषाद्वयसमानि वृत्तानि ॥

प्रणिपत्य ततो वचनं जगाद हितमायतौ पतिर्वारीणाम् ।
गङ्गावलम्बिबाहू रामं बहलोरुहरितमालच्छायम् ॥ ८ ॥

८. प्रणिपत्येति ॥ ततस्तीरप्राप्त्यनन्तरं वारीणां पतिः समुद्रो गङ्गावलम्बी सव्रणत्वाद् दयादाक्षिण्यहेतुत्वाच्च भार्याहस्तावलम्बी बाहुर्यस्य स सन् ॥ "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति संस्कृते दीर्घः ॥ "सुभिस्सुप्सु दीर्घः" इति प्राकृते सुलोपश्च ॥ बहुलः सान्द्र उरुर्महान् हरिर्हरितश्च यस्तमालस्तस्येव छाया कान्तिर्यस्य तं रामं प्रणिपत्य आयतौ उत्तरकाले । 'उत्तरः काल आयतिः' इत्यमरः । हितमुभयोरपि पथ्यं वचनं जगाद । अत्र पूर्वार्धे शुद्धसंस्कृतमुत्तरार्धे तु पूर्ववत् ॥

तुङ्गा गिरिवरदेहा अगमं सलिलं समीरणो रसहारी ।
अहिमो रविकिरणगणो माया संसारकारणं ते परमा ॥ ९ ॥

९. वचनमेवाह । तुङ्गा इत्यादि ॥ गिरिवरदेहाः पर्वतशरीराणि तुङ्गा उन्नता दुरारोहाः कृता इत्यर्थः । सलिलं समुद्रादिकं न गम्यत इत्यगमं दुरवगाहम् ॥ "ग्रहवृद्दनिश्चिगमश्च" इति गमेरप्प्रत्ययः ॥ समीरणो वायुः रसहारी जलशोषकः रविकिरणगणः अहिमः उष्णः परमा महती ते मायाशक्तिः संसारकारणम् । त्वत्कृते जगद्वैचित्र्ये मम दुरवगाहित्वे कोऽपराध इत्यर्थः । अत्र मायारूपकारणेन गिरितुङ्गत्वादिकार्यसमर्थनात् कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासः । तुङ्गा देहा इत्यत्र

१ बहुलो° T₂.

संस्कृते जसि सर्वदीर्घे संहितायां यलोपः । प्राकृते "जस्ङस्यांसु दीर्घः" इति दीर्घे जसो लोपः । गतमन्यत् ॥

आयाससंभवारुण संहर संहाराहिमहर[1]रसमच्छायम् ।
बाणं वारिसमूहं संगच्छ पुराणचारुदेहावासम् ॥ १० ॥

१०. आयासेति ॥ आयाससंभवेन रोषोदयेनारुणेति संबुद्धिः । संहारे प्रलये हिमहरोऽग्निरादित्यो वा तत्समच्छायं कालाग्निकल्पं बाणं संहर । पुराणस्यानादेः चारोस्त्रैलोक्यसुन्दरस्य देहस्यावासमाधारं वारिसमूहं वारिराशिं संगच्छ संभज । अन्यथा कल्पान्ते कुत्र ते शयनमिति भावः ॥

असुलभहरिसंचारं जलमूलं बहलपङ्करुद्धा[3]यामम् ।
भण किं जलपरिहीणं सुगमं तिमिकम्बुवारिवारणभीमम् ॥११॥

११. असुलभेति ॥ किं च असुलभहरिसंचारं दुर्लभकपिप्रचारं कुतः । बहलपङ्केन रुद्धायाममाक्रान्तविस्तारं कुतो जलपरिहीणमग्निदाहशुष्कजलम् ॥ "कृत्यचः" इति निष्ठादेशस्य णत्वम् । प्राकृते "नो णः" इति णत्वम् ॥ किं च तिमिभिर्मत्स्यविशेषैः कम्बुभिः शङ्खैर्वारिवारणैर्जलचरैश्च भीमं जलानां मूलं तलं सुगमं किं भणेत्यर्थः । अत्र तलदुर्गमत्वस्य पङ्करोधादिपदार्थहेतुकत्वात् तद्धेतुकं काव्यलिङ्गमलंकारः ॥

गन्तुं लङ्कातीरं बद्धमहासलिलसंचरेण सहेलम् ।
तरुहरिणा गिरिजालं वहन्तु गि[4]रिभारसंसहा गुरुदेहम् ॥१२॥

१२. तर्हि का गतिरत आह । गन्तुमिति ॥ गुरुभारस्य महाभारस्य सुसहन्त इति सुसहाः क्षमाः । पचाद्यच् । तरुहारिणाः कपयः संचरन्त्यस्मिन्निति

---

१ संहरणसंहारभीमभरसमच्छायम् T_4.
२ कर E_3.
३ रुद्धविगमम् T_2, T_4. The 2nd half of this is not found in T_2 and T_4.
४ गुरु° T_3, Com. The 1st half of this is not found in T_2. The verse is not found in T_4.

संचरः संचारभूमिः ॥ "गोचरसंचर" इत्यादिना घप्रत्ययान्तो निपातः ॥ बद्धेन संघट्टितेन महता सलिलेन सलिलोपरि संचरेण मार्गेण सेतुमार्गेणेत्यर्थः । लङ्कातीरं लङ्कासमीपं सहेलं सविनोदं गन्तुं गुरुदेहमधिकरूपं गिरिजालं वहन्तु प्रापयन्तु ॥

हरहासरुद्धविगमं परकण्ठगणं महाहवसमारम्भे ।
छिन्दन्तु रामबाणा गम्भीरे मे जले महागिरिबद्धे ॥ १३ ॥

१३. हरेति ॥ गम्भीरे अगाधे मे मम जले महागिरिभिर्बद्धे सति रामबाणा हरहासेनेश्वरप्रसादेन रुद्धविगमं पुनः प्ररोहवरप्रसादेन[1] निरुद्धविच्छेदं परस्य शत्रोर्दशकण्ठस्य[2] कण्ठगणं महाहवसमारम्भे महायुद्धोपक्रमे छिन्दन्तु । विधौ लोट् । गतमन्यत् ॥

गच्छन्तु चारुहासा वीररसाबन्धरुद्धभयसम्बन्धम् ।
हन्तुं बहुबाहुबलं हरिकारिणो गिरिवरोरुदेहं सहसा ॥ १४ ॥

१४. गच्छन्त्विति ॥ हरिकारिणः कपिश्रेष्ठाः । उपमितसमासः । चारुहासा महाट्टहासाः सन्तो वीररसस्याबन्धेनाविच्छेदेन रुद्धभयसंबन्धं निरुद्धभयसंस्पर्शं निर्भीकं गिरिवरोरवः पर्वताधिका देहा यस्य तद् बहुबाहोर्विंशतिभुजस्य दशास्यस्य बलं सैन्यं हन्तुं सहसा गच्छन्तु । 'दशास्यो विंशतिभुजश्चतुष्मान्पानमन्दिरः' इति यादवः ॥ षडेतानि संकीर्णानि ॥

जिगमिषया संयुक्ता बभूव कपिवाहिनी[१] मते[२] दाशरथेः ।
बुद्धजलालयचित्ता गिरिहरणारम्भसंभवसमालोला[३] ॥ १५ ॥

१५. जिगमिषयेति ॥ अथ दाशरथे रामस्य मते सम्मतौ सति बुद्धजलालयचित्ता विदितसमुद्राभिप्राया कपिवाहिनी कपिसेना जिगमिषया गन्तुमिच्छया संयुक्ता सती गिरिहरणारम्भस्य पर्वतानयनोपक्र-

१ हरि T_4.
२ मतौ T_3, T_4.
३ महालोला Com.

1 दानेन Th.
2 कन्धरस्य Th.

मस्य संभवे संपत्तौ महालोला अतिसतृष्णा बभूव। पर्वतानानेतुं प्रक्रान्ता इत्यर्थः। 'लोलश्चलसतृष्णयोः' इत्यमरः। अत्र द्वितीयार्धमेव संकीर्णं पूर्वार्धं तु संस्कृतमेव॥

गुरुगिरिवरहरणसहं संहारहिमारिपिङ्गलं[1] रामबलम्।
आरूढं सहसा खं वरुणालयविमलसलिलगणगम्भीरम्॥ १६॥

१६. गुर्विति॥ गुरुगिरिवरहरणस्य महापर्वतानयनस्य सहं क्षमम्। पचाद्यच्। संहारहिमारिवत् कालाग्निवत् पिङ्गलं[1] रामबलं वरुणालयस्य समुद्रस्य विमलसलिलानां गणो राशिस्तद्वद् गम्भीरं खमाकाशं सहसा द्रुतमारूढं पर्वताहरणार्थं समुत्पपातेत्यर्थः॥

अवगाढं गिरिजालं तुङ्गमहाभित्तिरुद्धसुरसंचारम्।
अभयहरिरासभीमं[2] करिपरिमलचारुबहल[3]कन्दरसलिलम्॥ १७॥

१७. अवगाढमिति॥ तुङ्गाभिर्महाभित्तिभिर्महातटैर्निरुद्धः सुरसंचारो येन तत् तथोन्नतमित्यर्थः। अभयानां हरीणां सिंहानां रासैर्नादैर्भीमं करिपरिमलेन परितो मिलनेन मदगन्धेन वा चारूणि बहुलानि कन्दरीषु दरीषु सलिलानि यस्मिंस्तद् गिरिजालमवगाढमुत्पाटयितुमवष्टब्धम्॥

अलिगणविलोलकुसुमं सकमलजलमत्तकुररकारण्डवगणम्।
फणिसङ्कुलभीमगुहं करिदन्तसमूढसरसवसुधाखण्डम्॥ १८॥

१८. अथ गिरिजालमेव त्रिभिर्विशिनष्टि। अलीत्यादिना॥ अलिगणैर्विलोलानि कुसुमानि यस्मिंस्तत् सकमलेषु जलेषु मत्ताः कुरराणामुत्क्रोशानां कारण्डवानां जलकुक्कुटानां च गणा यस्मिंस्तत् फणिसङ्कुला भीमा

१ पिङ्गलराम° E3.
२ हास C.
वास E3.
३ चारुबहलं C.
४ बहुल Com.
५ अभिनव T2.
६ सकुसुम E3.
७ कारण्डगणम् T3, T3.

1 पिशङ्ग Th.

गुहा यस्मिंस्तत् करिदन्तैः समूढानि प्रहृतानि सरसानि सार्द्राणि वसुधाखण्डानि यस्मिंस्तत् ॥

अरविन्दरेणुपिञ्जरसारसरवहारिविमलबहुचारुजलम् ।
रविमणिसंभवहिमहरसमागमाबद्धबहुलसुरतरुधूपम्[1][2] ॥ १९ ॥

१९. अरविन्देति ॥ अरविन्दरेणुपिञ्जराणि सारसरवहारीणि विमलबहुचारुजलानि यस्मिंस्तत् रविमणिसंभवस्य सूर्यकान्तोद्भवस्य हिमहरस्याग्नेः समागमेनाबद्धा उत्पादिता बहुलाः सुरतरूणां देवदारूणां धूमा यस्मिंस्तत् ॥

हरिरवैविलोलवारणगम्भीरावद्धसरसपुरुसंरावम्[3] ।
घोणासङ्गमपङ्काविलसुबलभरसहोरुवराहम्[4][5] ॥ २० ॥

२०. हरीति ॥ हरीणां सिंहानां रवैर्विलोला वित्रस्ता वारणास्तैर्गम्भीरमाबद्धा जनिताः सरसा मधुराः पुरवः प्रभूताः संरावा बृंहणानि यस्मिंस्तत् घोणासङ्गमसंभवेन पोत्राघातसंक्रान्तेन पङ्केनाविला मलिनाः सुबलाः प्रबला भरसहा रणभरणक्षमा उरुवराहा यस्मिंस्तत् ॥ एतानि पञ्च संकीर्णानि ॥

उच्चख्नुः परिरब्धान्[6] कपिसंघा बाहुभिस्ततो भूमिभृतः ।
निष्पिष्टशेषमूर्ध्नः[7] शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान् ॥ २१ ॥

२१. उच्चख्नुरिति ॥ ततोऽवष्टम्भानन्तरं कपिसिंहाः कपिश्रेष्ठा बाहुभिः परिरब्धान् आश्लिष्य गृहीतान् निष्पिष्टशेषमूर्ध्नः पातालप्रविष्टमूलत्वात् संचूर्णितशेषमस्तकानित्यर्थः । शृङ्गैः शिखरैर्विकीर्णा विक्षिप्ता उष्णरश्मिर्नक्षत्रगणाश्च यैस्तानभ्रङ्कषानित्यर्थः । भूमिभृतः पर्वतानुच्च-

१ सुरभिसुरतरुधूमम् T2, T3, T4. बहुलसुरतरुधूमम् E3.
२ °धूमम् Com.
३ रस T2.
४ सङ्गमसंभवपङ्क E3.
५ भरोरुवराहम् E3.
६ कपिसिंहाःपरिरब्धान् D. परिरब्धान् कपिसिंहा E3.
७ मूर्ध्नि T4.

च्चुरुत्खातवन्त उत्पाटयामासुरित्यर्थः । खनतेर्लिटि "गमहन—" इत्यादिनोपधालोपः ॥

तुङ्गमहागिरिसुभरा बाहुसमारुद्धभिदुरटङ्का[1] बहुधा[2] ।
लवणजलबन्धकामा आरूढा अम्बरं महापरिणाहम् ॥ २२ ॥

२२. तुङ्गेति ॥ तुङ्गैर्महागिरिभिः सुखेन भ्रियन्ते समुद्रतरण इति तत्सुभरा बाहुसमारम्भेण भुजाश्लेषेण भिदुरा विदारणशीलाष्टङ्कास्तटभित्तयो येषां ते । 'अस्त्री पर्वतभित्तौ च' इति टङ्कशब्दार्थेषु विश्वः । बहुधा बहुप्रकारेण लवणजलस्य लवणाम्बुधेर्बन्धे कामो येषां ते कपयो महापरिणाहमधिकविस्तारमम्बरमारूढाः ॥

बहुधवलवारिवाहं विमलायसगुरुमहासिदेहच्छायम् ।
बद्धविहङ्गममालं हिमगिरिमिव मत्तकुररवसम्बद्धम् ॥ २३ ॥

२३. अम्बरमेव द्वाभ्यां विशिनष्टि । बह्विति ॥ बहवो धवलाश्च वारिवाहा यस्मिंस्तत् विमल आयसोऽयोविकारो गुरुर्यो महासिर्महाखड्गस्तद्देहस्येव छाया कान्तिर्यस्य तत् । असिश्याममित्यर्थः । बद्धा विहङ्गममालाः पक्षिपङ्क्तयो यस्मिंस्तत् मत्तानां कुरराणां रवेण संबद्धं हिमगिरिमिवोन्नतमित्यर्थः ॥

चारुकलहंससङ्कुलमचण्डसंचारसारसाबद्धरवम् ।
सकुसुमकणगन्धवहं समयागमवारिसङ्गविमलायामम् ॥ २४ ॥

२४. चार्विति ॥ चारुभिः कलहंसैः संकुलमचण्डसंचारैर्मन्दसंचारैः सारसैराबद्धरवं कृतनादं सकुसुमकणः सपुष्परेणुर्गन्धस्य वहो गन्धवहो वायुर्यस्मिंस्तत् । वहेः पचाद्यच् । समयागमे प्रावृट्काले वारिसङ्गेन जलसेकेन विमलायामं निर्मलविस्तारम् ॥

सहसा[3] ते तरुहरिणा गिरिसुभरा लवणसलिलबन्धारम्भे ।
तीरगिरिमारूढा रामागमरुद्धसभयपरसंचारम् ॥ २५ ॥

---

१ समारम्भभिदुर Com.
२ कटका T_3.
३ E_3 drops this verse.

२५. सहसेति ॥ सहसा सद्यस्ते तरुहरिणास्तरुमृगा गिरिभिः सुभरा गिरिभिर्धृताः सन्त इत्यर्थः । लवणसलिलस्य लवणाम्बुराशेर्बन्धारम्भे बन्धनप्रवृत्तौ रामागमेन रुद्धः सभयानां परेषां शत्रूणां संचारो यस्मिंस्तं रामप्रतापादकुतोभयं तीरगिरिं तटाद्रिमारूढाः । संस्कृतपक्षे गिरिमारूढाः इति संहिता न विवक्षितेत्याहुः । एतानि चत्वारि संकीर्णानि ॥

ततः प्रणीता[1]: कपियूथमुख्यै-
न्यस्ताः कृशानोस्तनयेन सम्यक् ।
अकम्प्रबध्नाग्र[2]नितम्बभागा
महार्णवं भूमिभृतोऽवगाढाः ॥ २६ ॥

२६. तत इति ॥ ततोऽनन्तरं कपियूथमुख्यैः प्रणीता नलस्य हस्ते दत्ताः कृशानोस्तनयेन नीलेन सम्यक् दृढं न्यस्ता विन्यस्ता अत एव अकम्प्रा निश्चला बुध्नाग्रनितम्बभागा मूलशिखरमध्यप्रदेशा येषां ते भूमिभृतः पर्वता महार्णवमवगाढाः प्रविष्टा निखातमूलाः स्थिता इत्यर्थः ॥ इदं निराख्यातमसंकीर्णम् ॥

तेनेऽद्रिबन्धो ववृधे पयोधि-
स्तुतोष रामो मुमुदे कपीन्द्रः ।
तत्रास शत्रुर्ददृशे सुवेलः
प्रापे[3] जलान्तो जहृषुः प्लवङ्गाः ॥ २७ ॥

२७. तेन इति ॥ अद्रिबन्धोऽद्रिमयः सेतुबन्धस्तेने विस्तारितः पयोधिर्ववृधे अद्रिपूरणादुद्गजलो जात इत्यर्थः । रामस्तुतोष सिद्धप्रायं कार्यमिति संतुष्टः कपीन्द्रः सुग्रीवोऽपि मुमुदे मित्रकार्यं निर्व्यूढकल्पमिति हृष्ट इत्यर्थः । शत्रुर्दशास्योऽपि तत्रास स्वदुश्चेष्टितमित्थमन-

---

१ प्रकीर्णाः T_2.
२ बुध्नाग्र E_3, D., Com. मूर्धोरु T_3.
३ प्राप्तो N., E_3.

र्थाय प्रकल्पत इति अत्यन्तं त्रस्तोऽभूदित्यर्थः। सुवेलो लङ्काद्वारवर्त्ती सुवेलाद्रिर्ददृशे। आसन्ना लङ्केति मेनिर इत्यर्थः। जलान्तो जलपारं प्रापे प्राप्तः। अर्णवो वितीर्ण इत्यर्थः। प्लवङ्गा जहृषुः। स्वप्रयासः सफल इति हृष्टा इत्यर्थः॥ "असंयोगाल्लिट् कित्" इति अपितो लिटः कित्त्वान्न गुणः। एकान्तराख्यातविचित्रमसंकीर्णम्॥

भ्रेमुर्ववल्गुर्ननृतुर्जजक्षु-
जगुः समुत्पुप्लुविरे निषेदुः।
आस्फोटयांचक्रुरभिप्रणेदू
रेजुर्ननन्दुर्वियुयुः समीयुः॥ २८॥

२८. अथ कपीनां हर्षचेष्टितान्याह। भ्रेमुरिति॥ भ्रेमुर्बभ्रमुः॥ "वाजॄभ्रमुत्रसाम्" इति विकल्पादेत्वाभ्यासलोपौ॥ ववल्गुरुत्पेतुः। वल्गु गतौ। ननृतुर्नृत्यन्ति स्म। लिटः कित्त्वान्न गुणः। जजक्षुर्भक्षयामासुर्जहसुर्वा। जक्ष भक्षहसनयोः। जगुरगायन्। कै गै शब्दे। समुत्पुप्लुविरे ललङ्घिरे। प्लुङ् गतौ। उवङादेशः। निषेदुरुपविष्टाः॥ "अत एकहल्—" इत्यादिना एत्वाभ्यासलोपौ॥ आस्फोटयांचक्रुरहो महत्कर्म कृतमस्माभिरिति जगर्जुः। ण्यन्ताल्लिट्याम्प्रत्ययः। अभिप्रणेदुः क्ष्वेडितवन्तः॥ "अत एकहल्—" इत्येव॥ रेजुः रराजुश्चकाशिरे॥ "फणां च सप्तानाम्" इति विकल्पादेत्वाभ्यासलोपौ॥ ननन्दुर्नन्दन्ति स्म वियुयुर्वियाता धृष्टाः प्रजगल्भिर इत्यर्थः। 'धृष्टे धृष्णौ वियातः' इत्यमरः। यातेर्लिट्। झेरुसादेशः। समीयुर्हर्षादेकत्र समेता इत्यर्थः। इणो लिटि झेरुसादेशः॥ "दीर्घ इणः किति" इत्यभ्यासदीर्घः। केवलाख्यातचित्रमसंकीर्णम्॥

गिरिपङ्कचारुदेहं कक्कोललवङ्गबद्धसुरभिपरिमलम्।
बहुबहलोरुतरङ्गं परिसरमारूढमुद्धरं लवणजलम्॥ २९॥

---

१ तक्कोल T_3. | २ पारिमल T_2, T_4.

२९. गिरीति ॥ गिरीणां पङ्कैश्चारुदेहं रम्यरूपं कक्कोलैर्लवङ्गैश्च बद्धो जनितः सुरभिपरिमलः सुगन्धो यस्य तत्। बहुबहलोरुतरङ्गमुद्धरमनर्गलं लवणजलं कर्त्तृ परिसरमारूढं प्रक्षिप्यमाणपर्वतनोदनात् तटमारुरोहेत्यर्थः। कर्त्तरि क्तः। ढत्वादिकार्यम् ॥

लोलं कूलाभिगमे खे तुङ्गामलनिबद्धपुरुपरिणाहम्।
सुरगङ्गाभरणसहं गिरिबन्धवरेण लवणसलिलं रुद्धम् ॥ ३० ॥

३०. लोलमिति ॥ कूलाभिगमे तटारोहणे लोलं स्खलत् खे आकाशे तुङ्गं च तदमलं च तन्निबद्धपुरुपरिणाहं कृतमहाविस्तारं चेति विशेषणसमासः। सुरगङ्गाभरणे मन्दाकिनीपूरणे सहं क्षमम्। पचाद्यच्। लवणसलिलं गिरिबन्धवरेण गिरिमयमहासेतुना रुद्धं निवारितम् ॥

आरूढं च सुवेलं तरुमालाबन्धहारिगिरिवरजालम्।
रावणचित्तभयंकरमापिङ्गललोलकेसरं रामबलम् ॥ ३१ ॥

३१. आरूढमिति ॥ रावणचित्तस्य भयंकरं भयजनकमापिङ्गला लोलाश्च केसरा यस्य तद् रामबलं कर्त्तृ तरूणां मालाबन्धेन पङ्क्तिसंनिवेशेन हारीणि मनोहारीणि गिरिवरजालानि प्रत्यन्तपर्वतसमूहा यस्य तं सुवेलं सुवेलाद्रिमारूढमारुरोह ॥

लङ्कालयतुमुलारवसुभरगभीरोरुकुञ्जकन्दरविवरम्।
वीणारवरससङ्गमसुरगणसङ्कुलमहातमालच्छायम् ॥ ३२ ॥

३२. अथैकादशभिः सुवेलाचलं वर्णयति ॥ लङ्केत्यादि ॥ लङ्कालयानां लङ्कानिवासिनां तुमुलैः संकुलैरारवैः सुष्ठु भ्रियन्त इति सुभराणि सुपूर्णानि गम्भीराण्युरूणि च कुञ्जानां कन्दराणां च विवराणि यस्य तम्। वीणारवस्य रसेनास्वादेन सङ्गमो येषां तैः सुरगणैः सङ्कुलो महातमालानां छाया यस्य तम् ॥

---

१ गुरु D.
२ भरेण C.
३ केशरं D.

सरसबहुपल्लवाविलकेसरहिन्तालबद्धबहलच्छायम् ।
ऐरावणमदपरिमलगन्धवहाबद्धदन्तिसंरम्भरसम् ॥ ३३ ॥

३३. सरसेति ॥ सरसा बहवश्च पल्लवा येषां तैराविलकेसरै रजःकलुषकेसरैश्च हिन्तालैस्तालविशेषैर्बद्धाः संघट्टिता बहुलाः सान्द्राश्छाया यस्य[1] तम् । ऐरावणमदपरिमलस्य संबन्धी यो गन्धवहो वायुस्तेनाबद्धा दन्तिनां वनगजानां संरम्भरसः क्रोधरसो यत्र तम् ॥

तुङ्गतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालम् ।
हरिणभयंकरसकुसुमदावसमच्छविविलोलदाडिमकुञ्जम् ॥ ३४ ॥

३४. तुङ्गेति ॥ तुङ्गतरूणां छायाः एकैकस्य तरोरेकैकछाया ता बह्वयः अन्यथा पूर्वपदार्थबाहुल्ये "छायाबाहुल्ये" इति नपुंसकत्वं स्यात् । तासु रोहन्तीति रुहाणि । इगुपधलक्षणः कः । तानि कोमलानि हरीणि हरितानि हारीणि च लोलपल्लवजालानि यत्र तम् । हरिणभयंकराणि सकुसुमानि अत एव दावसमच्छवीनि विलोलानि दाडिमकुञ्जानि यत्र तम् ॥

कलहरिकण्ठविरावं सलिलमहाबन्धसङ्कुलमहासालम्
चलकिसलयसम्बद्धं मणिजालं सलिलकणमयं विवहन्तम् ॥ ३५ ॥

३५. कलेति ॥ कला मधुरा हरिकण्ठविरावाः सिंहकण्ठनादा यत्र तं सलिलानां महता बन्धेन सेतुना संकुलाः संक्लिष्टा महासाला महावृक्षा यत्र तं चलकिसलयैः सम्बद्धं संगतं सलिलकणमयं जलबिन्दुरूपं मणिजालं निवहन्तं[2] बिभ्राणम् । प्राकृतेऽप्येवम् ॥

१ केशर D.
२ बहुल Com.
३ ऐरावत T_2, T_3, T_4.
४ डाडिम T_2, T_3.
५ शालम् D.
६ किशलय D.
७ निवहन्तम् Com. Th. has विवहन्तम्.

1 यत्र Th.
2 विवहन्तं Th.

तुङ्गमणिकिरणजालं गिरिजलसंघट्टबद्धगम्भीररवम्।
चारुगुहाविवरसभं सुरपुरसमममरचारणसुसंरावम्॥ ३६॥

३६. तुङ्गेति॥ तुङ्गानि मणिकिरणजालानि यत्र तम्। गिरिजलानां निर्झराणां संघट्टेन आघातेन बद्धो गम्भीररवो यत्र तम्। चारूणि गुहाविवराण्येव सभाः सदांसि यत्र तम्। अमराणां चारणानां च शोभनः संरावो यत्र तम्। अत एवामरपुरसमम्॥

विमलमहामणिटङ्कं सिन्दूरकलङ्कपिञ्जरमहाभित्तिम्।
वीरहरिदन्तिसङ्गम[1]भयरुद्धविभावरीविहारसमीहम्॥ ३७॥

३७. विमलेति॥ विमला महामणिटङ्का महारत्नभित्तयो यत्र तम्। सिन्दूरस्य कलङ्केनाङ्केन पिञ्जरा महाभित्तयो यत्र तम्। हरयो दन्तिनश्च हरिदन्ति॥ "येषां च विरोधः शाश्वतिकः" इति द्वन्द्वैकवद्भावः॥ वीरस्य तस्य समागमाद् भयेन रुद्धा त्यक्ता विभावरीविहारसमीहा रात्रिविहाराकाङ्क्षा यत्र तम्॥

समहाफणिभीमबिलं भूरिविहङ्ग[2]मतुमुलोरुघोरविरावम्।
वार[3]णवराहहरिवरगोगणसारङ्गसङ्कुलमहासाल[4]म्॥ ३८॥
चलकि[5]सलयसविलासं चारुमही[6]कमलरेणुपिञ्जरवसुधम्।
सकुसुमके[7]सरबाणं लवङ्गतरुतरुणवल्लरीवरहासम्॥ ३९॥

३९. चलेति॥ चलैः किसलयैः सविलासं विलासवन्तं चारुभिर्महीकमलानां स्थलाब्जानां रेणुभिः पिञ्जरा वसुधा यत्र तं सह कुसुमकेस-

---

१ समागमभय Com.
This verse is dropped in T_2 and T_4.
२ विहङ्ग D., E_3.
३ रावण c., D.
४ शालम् D.

* This verse is dropped in T_2 and T_4.
५ किशलय D.
६ महाकमल T_3.
७ केशर D.

रवाणैर्यस्तं लवङ्गतरूणां तरुणवल्लर्यो बालमञ्जर्यस्तासां वरो हासो विकास एव हासो हास्यं यस्य तम् ॥

अमलमणिहेमटङ्कं तुङ्गमहाभित्तिरुद्धरुरुपङ्कगमम् ।
अमरारूढपरिसरं मेरुमिवाविरलसरसमन्दारतरुम् ॥ ४० ॥

४०. अमलेति ॥ अमलानां मणीनां हेम्नां च टङ्कास्तटभित्तयो यत्र तम् । तुङ्गाभिर्महाभित्तिभिर्महातटै रुद्धो रुरूणां मृगाणां पङ्कगमः पङ्क-प्राप्तिर्यत्र तम् । वङ्कगम इति पाठे वक्रगमनमित्यर्थः । अमरैरारूढप-रिसरम् । अविरलसरसमन्दारतरुम् । अत एव मेरुमिव स्थितम् ॥

फलभरमन्[1]थरतरुवरमविदूरविरूढहारिकुसुमापीडम् ।
हरिणकलङ्[2]कमणिसंभवबहुवारि[3]भिरसुगम्भीरगु[4]हम् ॥ ४१ ॥

४१. फलेति ॥ फलभरैर्मन्थरास्तरुवरा यस्य तम् । अविदूरविरूढा हस्तापचेया हारिणः कुसुमापीडा यत्र तम् । हरिणकलङ्कमहामणिसंभ-वैश्चन्द्रकान्तसंभूतैर्बहुवारिभिः सुभराः संपूर्णा गम्भीरगुहा यत्र तम् ॥

जलकामदन्तिसङ्कुलसहेमरसचारुधवलकन्दरदेहम् ।
अङ्कुररोहसमच्छविरुरुगणसंलीढतरलहरि[5]मणिकिरणम् ॥ ४२ ॥

४२. जलेति ॥ जलकामैर्जलार्थिभिर्दन्तिभिः संकुला जलभ्रान्त्या संकीर्णाः सहेमरसा हेमद्रवलिप्ताश्चारवो धवलाः कन्दरदेहाः कन्द-रस्वरूपाणि यत्र तम् । हिरण्मयकन्दरच्छायासु तोयभ्रान्त्या संचरमा-णमातङ्गमित्यर्थः । अत एव भ्रान्तिमदलंकारः । रोहन्तीति रोहाः । पचाद्यच् । लघूपधगुणः । अङ्कुरा एव रोहा नवप्ररूढाङ्कुरा बालतृ-णानीत्यर्थः । तैः समच्छवयस्तुल्यकान्तयः अत एव रुरुगणैर्मृगव्रजैः संलीढाः शष्पभ्रान्त्या लिह्यमाना हरिन्मणीनां मरकतमणीनां किरणा यत्र तम् । अत एवात्रापि भ्रान्तिमदलंकारः ॥

---

१ मण्डित T_2.
२ कलङ्कमहामणि T_2.
३ वारिसुभरगम्भीर T_2, Com.
४ रसम् E_3.
५ हरिन्मणि Com.

गाढसमीरणसुसहं[1] भीमरवोत्तुङ्गवारिधरसंघट्टम्[2] ।
धवलजलवाहमालासंबन्धाबद्धहिमधराधरलीलम्[3][4][5] ॥ ४३ ॥

४३. गाढेति ॥ गाढसमीरणेन स्थिरवायुना निमित्तेन सुसहं सुष्ठु सह्यं सेव्यमित्यर्थः । सहेः खल्प्रत्ययः । भीमरवास्तुङ्गाश्च ये वारिधरास्तेषां संघट्टो यस्य तम् । धवलजलवाहमालासंबन्धेनाबद्धाः प्राप्ता हिमधराधरस्य हिमाद्रेर्लीलेव लीला यस्य तम् । इति निदर्शनालंकारः ॥

लवणजलबन्धसरसं तरुफलसंपत्तिरुद्धदेहायासम्[6] ।
लङ्कातोरणवारणमारूढं[7] समरलालसं रामबलम् ॥ ४४ ॥

४४. लवणेति लवणजलबन्धाद्धेतोः सरसं सरागं सोत्साहमित्यर्थः । तरुफलसंपत्त्या रुद्धो निवर्त्तितो देहायासः क्षुद्बाधा यस्य तत् । लङ्कातोरणानां वारणं[1] निवारकं निरोधकमालोलं समन्तात्परिभ्रमद् रामबलं रामसैन्यं समरलालसं समरोत्सुकं संवृत्तमिति शेषः । उत्तरश्लोकाद्वा आकृष्टव्यम् ॥

गुरुपणववेणुगुञ्जाभेरीपेलोरुझल्लरीभीमरवम्[8][9] ।
ढक्काघण्टातुमुलं सन्नद्धं[10] परबलं रणायाससहम् ॥ ४५ ॥

४५. गुर्विति ॥ अथ गुरुभिः पणवादिवाद्यघोषैरुरवो झल्लरीणां भीमरवा यत्र तत् । ढक्काघण्टादिभिस्तुमुलं तद्घोषभीषणमित्यर्थः । परबलं रावणसेना सैन्यमपि रणायाससहं रणकर्मोत्सुकं संवृत्तम् । रणप्रवृत्तं रामबलं दृष्ट्वा रावणबलमपि तथा प्रवृत्तमित्यर्थः ॥

---

१ संवाहं c.
संभवसुभीम° T_3.
२ रवतुङ्ग T_3, Com.
३ महासंबद्ध T_2.
४ संबन्धारुद्ध E_3.
५ हिमवसुधाधरलीलम् D.
६ देहायामम् E_3.
७ वारणमालोलं D., Com.
वारकमालोलं Th., Com.
८ उरु c., Com.
९ पेरोरु c., Com.
° पेवोरु E_3.
भेरीविफलषा E_3.
१० संवृत्तं Com.

---

1 वारकं K, Com.

आरूढबाणघोरं विमलायसजालगूढपीवरदेहम् ।
चञ्चलतुरङ्गवारणसंघट्टाबद्धचारुपरिणाहगुणम् ॥ ४६ ॥

४६. परबलमेव श्लोकद्वयेन विशिनष्टि ॥ आरूढेत्यादि ॥ आरूढैरारोपितैर्बाणै-र्घोरं भीमं विमलैरायसजालैर्लोहकञ्चुकसमूहैर्गूढाः संवृत्ताः पीवरा देहा यस्य तत् वर्मितसर्वाङ्गमित्यर्थः । चञ्चलं प्रचलं यत्तुरङ्गवारणम् । सेनाङ्गत्वाद् द्वन्द्वैकवद्भावः । तस्य संघट्टेनाबद्धः कृतश्चारुः परिणाहो विस्तार एव गुणो येन तत् । गजाश्वसंबाधे मिथो विश्लिष्यदित्यर्थः ॥

असितोमरकुन्तमहापट्टिशभल्लवरबाणगुरुपुरुमुसलम् ।
वीररसालंकारं गुरुसंचारहयदन्तिसमहीकम्पम् ॥ ४७ ॥

४७. असीति ॥ अस्यादिभिर्गुरूणि दुष्प्रवेशानि पुरूणि प्रभूतानि मुस-लानि यस्मिंस्तत् । वीररस एवालंकारो यस्य तत् । पौरुषभूषणमि-त्यर्थः । गुरुसंरावेण महाघोषेण हयदन्तिना समहीकम्पं गजाश्वक्रम-णेन कृतभूकम्पमित्यर्थः ॥

ते रामेण सरभसं परितरला हरिगणा रणसमारम्भे ।
रुद्धा लङ्कापरिसरभूधरपरिभङ्गलालसा धीररवम् ॥ ४८ ॥

४८. त इति ॥ रणसमारम्भे युद्धकर्मणि परितरलाः परिचलिताः सन्तो लङ्कापरिसरेषु तरुवनानां परिभङ्गे परिभञ्जने लालसा लोलास्ते हरिगणाः कपिसङ्घाः । 'लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि च' इति यादवः । रामेण सरभसं सत्वरं धीररवमुच्चैःस्वरं यथा तथा रुद्धा निवारिताः रक्षोभयात् पलाय्य कापेया वनभङ्गप्रवृत्तास्ते मा पलायिषतेति निर्वासिता इत्यर्थः ॥

---

१ °घट्टपरिचार° E₃.
२ पट्टिस C., D., E₃.
पट्टस T₂, T₄.
३ मुषलम् C.
मुशलम् D.
४ संराव Com.
५ तरुवन T₃, T₄, Com.

जलतीरतुङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवरावासम्[1] ।
भीमं तरुहरिणबलं सुसमिद्धहिमारिकिरणमालालोलम् ॥ ४९ ॥

४९. अथ युग्मेनाह । जलेति ॥ जलतीरेषु तुङ्गतरुषु वरकन्दरेषु गुरिभित्तिषु कुञ्जविवरेषु चावासो यस्य तत् । तत्र तत्र लीनमित्यर्थः । भीमं भयंकरं तरुहरिणबलं कपिसैन्यं कर्तृ रामप्रोत्साहनात् सुसमिद्धस्य हिमारेरग्नेः किरणा इव किरणास्तेषां मालाभिर्लोलं जाज्वल्यमानं सत्॥

रावणबलमवगन्तुं जलभरगुरुसलिलवाहगणसमच्छायम्[2][3] ।
अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढम्[4] ॥ ५० ॥

५०. रावणेति ॥ जलभरगुरवो ये सलिलवाहा मेघास्तेषां गणेन सच्छायं सवर्णं मेघश्यामं रावणस्य बलं सैन्यमवगन्तुमिदमीदृगिति ज्ञातुमट्टादिषु समारूढमट्टादिकमारुह्य रक्षोबलमद्राक्षीदित्यर्थः। एतानि द्वादश संकीर्णानि । प्रसन्नकाण्डश्च समाप्तः ॥

इति भट्टिकाव्ये प्रसन्नकाण्डे भाषासमावेशो नाम चतुर्थः
काव्यस्य त्रयोदशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने भाषासमो नाम त्रयोदशोऽध्यायः ॥

---

१ गुरु Com.
२ गण dropped in c.
३ सच्छायम् Com.
४ सहसारूढम् Ts.

॥ श्रीः ॥

अथ चतुर्दशः सर्गः ।

ततो दशास्यः स्मरविह्वलात्मा
चारै॑प्रकाशीकृतशत्रुशक्तिः ।
विमोह्य मायामयराममूर्ध्ना
सीतामनीकं प्रजिघाय योद्धुम् ॥ १ ॥

१ इह सौशब्द्यं नाम काव्यशोभाकरो गुणः । स च 'सुपां तिङां च व्युत्पत्तिः सौशब्द्यं परिकीर्तितम्' इति द्विविध उक्तः । तत्र सुबन्ता व्युत्पादिताः । अथेदानीं तिङां लादेशत्वात् तत्रापि लेटश्छान्दसत्वादन्यान् नव लडादिविलासान् नवभिरुत्तरैः सर्गैर्व्युत्पादयिष्यन्नस्मिन्सर्गे लिड्विलासमुत्पादयति । तत इत्यादि ॥ ततः स्वपरबलाभियोगानन्तरं चारैः प्रणिधिभिः प्रकाशीकृतशत्रुशक्तिरजय्य इति ख्यात्वा तरामप्रभावो दशास्यस्तथापि स्मरविह्वलात्मा सीतां मोक्तुमसहः सन्नित्यर्थः । मायामयेन मायाविनिर्मितेन राममूर्ध्ना सीतां विमोह्य रामस्येदं शिरश्छित्वानीतमिति मोहयित्वैवं चात्मानमनाथा वरिष्यतीत्याशया भ्रामयित्वेत्यर्थः । तेनापि विफलः सन्निति शेषः । योद्धुमनीकं सैन्यम् । 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' इत्यमरः । प्रजिघाय प्रहितवान् न तु सीतामित्यर्थः । हिनोतेर्लिटि णलि वृद्ध्यायादेशौ ॥ "हेरचङि" इति कुत्वम् ॥

कम्बूनथ समादध्मुः कोणैर्भेर्यो निजघ्निरे ।
वेणून् पुपूरिरे गुञ्जा जुगुञ्जुः करघट्टिताः ॥ २ ॥

२. युद्धमेव वर्णयति । कम्बूनित्यादि ॥ अथानीकप्रेषणानन्तरं कम्बून् शङ्खान् समादध्मुरधमन् मुखमारुतपूरणेनाध्वनयन्नित्यर्थः । ध्मा शब्दे । भूतानद्यतने परोक्षे लिट् । झेरुसादेशः ॥ "आतो लोप इटि च" इत्या-

---

१ चारं T_2, T_3.

कारलोपः ॥ कोणैर्वादनदण्डैः । 'कोणो वीणादिवादनम्' इत्यमरः । भेर्यो निजघ्निरे निहताः । हन्तेः कर्मणि लिट् ॥ "गमहन—" इत्यादिनोपधालोपः । वेणून् वंशान् पुपूरिरे मुखमारुतपूरणेनाध्वनयन्नित्यर्थः । पूरी आप्यायने इति धातोः कर्त्तरि लिट् । तङ् । गुञ्जा वाद्यविशेषाः । 'गुञ्जापि पटहे प्रोक्ता' इति विश्वः । करैर्घट्टिता वादिता जुगुञ्जुर्दध्वनुः । गुजि अव्यक्ते शब्दे ॥

वादयांचक्रिरे ढक्काः पणवा[1] दध्वनुर्हताः ।
काहलाः[2] पूरयांचक्रुः पूर्णाः[3] पेराश्च[4] सस्वनुः ॥ ३ ॥

३. वादयामिति ॥ ढक्का वादयांचक्रिरे वादिताः । पणवा उपरि पाणिवृत्तयो वाद्यविशेषास्ते हताः पाणिताडिता दध्वनुः । काहलाः सुषिरवाद्यविशेषाः पूरयांचक्रुः पूर्णाश्चक्रुर्मुखमारुतपूरणेनानादयन्नित्यर्थः । पेराः खरमुखाकाराः सुषिरवाद्यविशेषास्तेऽपि पूर्णे सस्वनुर्दध्वनुः ॥

मृदङ्गा धीरमास्वेनुर्हतैः स्वेने[5] च गोमुखैः ।
घण्टाः शिशिञ्जिरे[6] दीर्घं जह्रादे पटहैर्भृशम् ॥ ४ ॥

४. मृदङ्गा इति ॥ मृदङ्गा मर्दला धीरं गम्भीरमास्वेनुः सस्वनुः ॥ "फणां च सप्तानाम्" इति विकल्पादेत्वाभ्यासलोपौ ॥ हतैस्ताडितैर्गोमुखैर्वाद्यविशेषैर्नेदे नादितम् । नदेर्भावे लिट् । घण्टा दीर्घं शिशिञ्जिरे दध्वनुः । शिजि अव्यक्ते शब्दे । कर्त्तरि लिट् । तङ् । पणवैर्भृशं जह्रादे ह्रादितम् । ह्राद अव्यक्ते शब्दे । भावे लिट् ॥

हयाः[7] जिहेषिरे हर्षाद्गम्भीरं जगर्जुर्गजाः ।
संत्रस्ताः[8] करभा रेटुश्चुकुवुः[9] पत्तिपङ्क्तयः[10] ॥ ५ ॥

---

१ पटवा T_3, T_4.
२ काहलान् T_3, T_4.
३ पूर्णं Com.
४ पेवाश्च E_3.
५ नेदे Com., T_3, T_4.
६ सिसिञ्जिरे D.
७ अश्वा D.
८ सन्त्रस्तं T_3.
९ रेसु° Com.
रेदुः T_3.
१० पाक्षि E_3.

५. हया इति॥ हया हर्षात् जिहेषिरे हेषितवन्तः। हेषृ शब्दे। गजा गम्भीरं जगर्जुः। गर्ज अव्यक्ते शब्दे। अत्र यतिभङ्गः सोढव्यः। करभाः क्रमेलकाः सन्त्रस्ता गजगर्जनाद्भीता रेसुश्चक्रन्दुः। पत्तिपङ्क्तयः पक्षिसंघाश्च सन्त्रस्ताश्चुकुवुः रुरुवुः। कु शब्दे। झेरुस्युवङादेशः॥

तुरङ्गाः[1] पुस्फुटुर्भीताः पुस्फुरुर्वृषभाः[2] परम्।
नार्यश्चुक्षुभिरे मम्लुर्मुमुहुः शुशुचुः पतीन्॥ ६॥

६. कुरङ्गा इति॥ कुरङ्गा मृगा भीताः पुस्फुटुर्भयान्मिथो विश्लिष्टा इत्यर्थः। वृषभाः परिपुस्फुरुर्हृष्टा नेदुरित्यर्थः। नार्यश्चुक्षुभिरे प्रियविप्रयोगभयात् क्षुभिताः। मम्लुर्म्लानाः। मुमुहुर्मूर्च्छिताः। पतीन् शुशुचुरशोचन्॥

जगर्जुर्जहृषुः शूरा रेजुस्तुष्टुविरे परैः[3]।
बबन्धुरङ्गुलित्राणि सन्नेहुः परिनिर्ययुः॥ ७॥

७. जगर्जुरिति॥ शूरा वीरभटा जगर्जुः समरभयात् सिंहनादांश्चक्रुः। जहृषुर्हृष्टा रेजू रराजुः॥ "फणां च सप्तानाम्" इति विकल्पादेत्वम्। वरैर्बन्दिभिस्तुष्टुविरे स्तुताः। कर्मणि लिट्। उवङादेशः। अङ्गुलीस्त्रायन्त इत्यङ्गुलित्राणि अङ्गुलित्राणानि॥ "आतोऽनुपसर्गे कः"॥ बबन्धुः। सन्नेहुः संवर्मयांचक्रुः। णह बन्धने॥ "अत एकहल्—" इत्येत्वाभ्यासलोपौ॥ परिनिर्ययुः परितो निर्याताः॥

धनूंष्यारोपयांचक्रुरारुरुहू[4] रथादिषु।
असीनुद्ववृहुर्दीप्तान् गुर्वीरुच्चिक्षिपुर्गदाः॥ ८॥

८. धनूंषीति॥ धनूंष्यारोपयांचक्रुरारोपयामासुरधिज्यानि चक्रुरित्यर्थः॥ "रुहः पोऽन्यतरस्याम्" इति विकल्पात् पकारादेशः॥ ते

१ कुरङ्गाः Com.
२ वृषभाः परिपुस्फुरुः Com.
३ वरैः Com.
४ रुरुहुस्ते रथादिषु Com. °रारुरोह T₂.

वीरा रथादिषु रुरुहुः रथादीन् रुरुहुरित्यर्थः। कर्मण्यधिकरणविवक्षायां सप्तमी। दीप्तानसीनुद्ववृहुरुद्येमुः। वृहु उद्यमने। गुर्वीर्गदा उच्चिक्षिपुः उत्क्षिप्तवन्तः ॥

शूलानि भ्रमयांचक्रुर्बाणानाददिरे शुभान्।
भ्रेमुश्चुकुर्दिरे रेसुर्ववल्गुश्च पदातयः ॥ ९ ॥

९. शूलानीति ॥ पदातयः शूलानि भ्रमयांचक्रुः । भ्रमेरमन्तत्वान्मित्वे ह्रस्वत्वम्। शुभान् योग्यान् बाणान् आददिरे आत्तवन्तः ॥ "आङो दो नास्यविहरणे" इत्यात्मनेपदम्॥ भ्रेमुर्युद्धे बभ्रमुः॥ "वा जॄभ्रमुत्रसाम्" इत्येत्वादिविकल्पः॥ चुकुर्दिरे चिक्रीडुः। कुर्द खुर्द क्रीडायाम्। लिटि तङ्। रेसुर्नेदुः । रस शब्दे ॥ "अत एकहल्—" इत्येत्वम् ॥ ववल्गुर्वल्गितवन्तः ॥

समुत्पेतुः कशाघातै रश्म्याकर्षैर्ममङ्क्रिरे।
अश्वाः प्रदुद्रुवुर्मोक्षे रक्तं निजगरुः श्रमे ॥ १० ॥

१०. समिति ॥ अश्वाः कशाघातैश्चर्मताडनीप्रहारैः। 'कशा स्याच्चर्मताडनी' इति विश्वः । समुत्पेतुः समुत्पुप्लुविरे प्लुतगतानि चक्रुरित्यर्थः। रश्म्याकर्षैः प्रग्राहकर्षणैर्ममङ्क्रिरे आकुञ्चितघोणतया विरेजुरित्यर्थः। मकि मण्डने। तङ्। मोक्षे प्रग्रहमोचने प्रदुद्रुवुर्द्रुतगतिं चक्रुरित्यर्थः। श्रमे द्रुतगत्या श्रमे जाते सति रक्तं निजगरुः खलीनघर्षणात् अस्रं पसुस्रुवुरित्यर्थः। गॄ निगरणे॥ "ऋच्छत्यॄताम्" इति गुणः॥

गजानां ममृदुः शारीन् कम्बलान् परितस्तरुः।
तेनुः कक्षां ध्वजांश्चैव समुच्छिश्रियुरुच्छ्रितान् ॥ ११ ॥

१ भ्रामयां T2.
२ रेशुः E2.
३ कषाघातैः N., C., T1, T4, B.
कशापातैः T2.
४ ममङ्क्रिरे c., Com., E2.
५ भ्रमैः E2.
६ प्रदधुः Com.
प्रददुः Th, Com.
७ शालीन् Com.
८ कक्ष्या T3, T2, E3, Com.

११. गजानामिति ॥ गजानां शालीन् युद्धयोग्यपर्याणानि। 'शाली रक्षोपकरणे तथा शकुनिकान्तरे युद्धार्थगजपर्याणे' इति विश्वः। प्रदधुर्निदधुः[1]। कम्बलानास्तराणि परितस्तरुः परिस्तीर्णवन्तः॥ "ऋच्छत्यृताम्" इति गुणः॥ कक्ष्या मध्यबन्धनानि तेनुर्वितेनुः। उच्छ्रितान् ध्वजांश्च समुच्छिश्रियुः समुच्छ्रितवन्तः। श्रयतेर्ङेरुसि इयङादेशः॥

विशिश्वासयिषांचक्रुरालिलिङ्गुश्च योषितः।
आजघ्रुर्[1]मूर्ध्नि बालांश्च चुचुम्बुश्च सुतप्रियाः॥ १२॥

१२. वीति ॥ वीराः प्रयाणसमये योषितः स्वकान्ता विशिश्वासयिषांचक्रुः सर्वथा निर्जित्यागमिष्याम इति विश्वासयितुमीषुरिच्छापूर्वकं विश्वासयामासुरित्यर्थः। श्वसेर्ण्यन्तात् सनि लिटि "कास्प्रत्ययादाम्—" इत्याम्प्रत्यये कृञोऽनुप्रयोगः सनादिकार्यं च। आलिलिङ्गुराशिश्लिषुश्च। गत्यर्थो लिगिराङ्पूर्व आश्लेषार्थः। इदित्वान्नुम्। सुतप्रियाः प्रियसुताः। 'बहुव्रीहौ वा प्रियस्य' इति पूर्वनिपातविकल्पः। बालान्मूर्ध्नि आजघ्रुराघ्रातवन्तश्च। विहितत्वादिति भावः। घ्रा गन्धोपादाने। झेरुस्यातोलोपः। चुचुम्बुश्च प्रेम्णेति भावः॥

गम्भीरवेदिनः संज्ञां[2] गजा जगृहुरक्षताः[3]।
ववृधे शुशुभे चैषां मदो ह्रष्टैश्च[4] पुप्लुवे॥ १३॥

१३. गम्भीरेति ॥ गम्भीरवेदिनो मदान्धा गजाः। 'त्वग्भेदाच्छोणितस्रावान्मांसस्य च्यवनादपि। आत्मानं यो न जानाति तस्य गम्भीरवेदिता' ॥ इति राजपुत्रीये। तेऽप्यक्षता अकृताङ्कुशा एव संज्ञां तत्तत्सङ्केतं जगृहुर्जज्ञुः। लिटःकित्त्वात् "ग्रहिज्यावयि—" इति संप्रसारणम्। एषां गजानां मदश्च ववृधे शुशुभे च हृष्टैस्तैः पुप्लुवे प्लुतं च। भावे लिट्॥

---

१ प्रजघ्रुः T₂.
२ संज्ञा N., B.
३ °रक्षिताः T₂, T₄.
४ कृष्टैश्च D.

1 प्रदधु° Th.

मृगाः प्रदक्षिणं सस्रुः शिवाः सव्यग्ववाशिरे ।
अवामैः पुस्फुरे देहैः प्रसेदे चित्तवृत्तिभिः ॥ १४ ॥

१४. मृगा इति ॥ ततः प्रचलतां तेषां मृगा हरिणादयः प्रदक्षिणं यथा तथा सस्रुर्जग्मुः । शिवाः क्रोष्टारश्च सव्यक् ववाशिरे वामभागे चुकुशुरित्यर्थः । वाशृ शब्दकुत्सायाम् । अवामैर्दक्षिणैर्देहैर्देहावयवैरक्षिभुजादिभिः पुस्फुरे पस्पन्दे । भावे लिट् । चित्तवृत्तिभिः प्रसेदे प्रसन्नम् । भावे लिट् । मरिष्यतामप्येषां तादात्मिकविजयसूचितान्येतानि निमित्तानीति द्रष्टव्यम् ॥

प्राच्यमाञ्जिहिषांचक्रे[1] प्रहस्तो रावणाज्ञया ।
द्वारं ररंहतुर्याम्यं[2] महापार्श्वमहोदरौ ॥ १५ ॥

१५. प्राच्यमिति ॥ ततः प्रहस्तो रावणाज्ञया प्राचि भवं प्राच्यं द्वारं प्राग्द्वारम् ॥ "द्युप्राग्—" इत्यादिना यत् । अञ्जिहिषांचक्रे अंहितुं गन्तुमियेष । तत्रासक्तोऽभूदित्यर्थः । अहि गतौ इति धातोरनुदात्तेतः सन्नन्ताल्लिट्याम्प्रत्यये कृञोऽनुप्रयोगः । इदित्वान्नुमागमः ॥ "अजादेर्द्वितीयस्य" इति हेर्द्विर्वचनम् । "न न्द्राः—" इति निषेधात् नकारस्य निषेधः ॥ "पूर्ववत्सनः" ॥ "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इति तङ् ॥ महापार्श्वमहोदरौ नाम राक्षसौ याम्यं दक्षिणं द्वारम् ॥ "दित्यदित्यादित्य—" इत्यत्र 'यमाच्चेति वक्तव्यम्' इति ण्यप्रत्ययः । ररंहतुर्जग्मतुः । रहि गतौ । इदित्वान्नुम् ॥

प्रययाविन्द्रजित्प्रत्यगियाय स्वयमुत्तरम् ।
समध्यासिसिषांचक्रे विरूपाक्षः पुरोदरम् ॥ १६ ॥

१६. प्रेति ॥ अथेन्द्राजित् प्रत्यक् पश्चिमं द्वारं प्रययौ । स्वयं रावण उत्तरं द्वारमियाय । विरूपाक्षो नाम राक्षसः पुरोदरं पुरमध्यं समध्या-

१ °माञ्जिहिषां c., E₃, T₃, Com. | २ ररहतुं Com., c., T₃.

सिसिषांचक्रे तदध्यासनासक्तोऽभूदित्यर्थः। आसेः सन्नन्ताल्लिट्याम्प्रत्यये कृञोऽनुप्रयोगः। पूर्ववत् तङ्॥

शुश्राव रामस्तत्सर्वं प्रतस्थे च ससैनिकः।
विस्फारयांचकारास्त्रं बबन्धाथ च बाणधी[1]॥ १७॥

१७. शुश्रावेति॥ रामस्तत्सर्वं शत्रुचेष्टितं शुश्राव। ससैनिकः प्रतस्थे च। अस्त्रं धनुर्विस्फारयांचकार अधिज्यमाचकर्षेत्यर्थः॥ "चिस्फुरोर्णौ" इति वैभाषिकमात्वम्। गतमन्यत्। अथ बाणा धीयन्ते अनयोरिति बाणधी इषुधी॥ "कर्मण्यधिकरणे च" इति घोः किप्रत्ययः॥ बबन्ध च पृष्ठे बद्धवांश्च॥

ईक्षांचक्रे[2]ऽथ सौमित्रिमनुजज्ञे बलानि च।
नमश्चकार देवेभ्यः पर्णतल्पं मुमोच च॥ १८॥

१८. ईक्षामिति॥ स रामः सौमित्रिं लक्ष्मणमीक्षांचक्रे ईक्षितवान् इशैव योद्धुमनुज्ञातवानित्यर्थः। ईक्षतेर्लिटि "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्ययः। गतमन्यत्। बलानि चानुजज्ञे योद्धुमिति शेषः। देवेभ्यो नमश्चकार अप्रतिबन्धेन जयसिद्ध्यर्थमिति भावः। पर्णतल्पं मुमोच तत्स्थानात्प्रचलित इत्यर्थः॥

चकासांचक्रुरुत्तस्थुर्नेदुरानशिरे दिशः।
वानरा भूधरान् रेधुर्बभञ्जुश्च ततस्तरून्॥ १९॥

१९. चकासांचक्रुरिति॥ ततोऽनुज्ञानानन्तरं वानराश्चकासांचक्रुः रणरागाद्रेजुरित्यर्थः। चकासृ दीप्तौ। लिटि 'कास्यनेकाच इति वक्तव्यम्' इत्याम्प्रत्ययः। उत्तस्थुरुत्थिताः। ऊर्ध्वकर्मत्वान्न तङ्। नेदुश्चिक्ष्वेडिरे दिश आनशिरे व्यापुः। अशू व्याप्तौ॥ "अश्नोतेश्च" इति दीर्घाभ्यासादुत्तरस्य नुडागमः॥ भूधरान् रेधुरुच्चख्नुरित्यर्थः॥ "राधो हिंसायाम्" इत्येत्वाभ्यासलोपौ॥ तरून् बभञ्जुश्च॥

---

१ बाणधिम् T_3, T_4. | २ ईहांचक्रे C.

दृदाल[1] भूर्नभो रक्तं गोष्पदप्रं[2] ववर्ष च ।
मृगाः प्रसस्रुपुर्वामं[3] खगाश्चुकुविरेऽशुभम्[4] ॥ २० ॥

२०. अथास्य दुर्निमित्तान्याह । ददालेति ॥ भूर्ददाल दलिता नभश्च गोष्पदं पूरयित्वा गोष्पदप्रम् ॥ "वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्" इति पूरेर्णमुल्प्रत्ययः ऊकारलोपश्च । रक्तं ववर्ष । मृगा हरिणा वामं प्रदक्षिणं प्रसुस्रुवुर्जग्मुः । झेरुस्युवङ् । खगाः पक्षिणोऽशुभाः प्रतिकूलाश्चुकुविरे चुकुजुः । कु शब्दे । पूर्ववदादेशः ॥

उल्का ददृशिरे दीप्ता[5] रुरुवुश्चाशिवं[6] शिवाः ।
चक्ष्माये च मही रामः शशङ्के चाशुभागमम् ॥ २१ ॥

२१. उल्का इति ॥ दीप्ता उल्का ददृशिरे दृष्टाः । अशिवाः अशुभाः शिवाः क्रोष्टारश्च रुरुवुश्चुक्रुशुः । मही चक्ष्माये चकम्पे । क्ष्मायी विधूनने । रामश्चाशुभागममनिष्टागमं शशङ्के ॥

रावणः शुश्रुवान् शत्रून् राक्षसानभ्युपेयुषः ।
स्वयं युयुत्सयांचक्रे प्राकाराग्रे[7] निषेदिवान् ॥ २२ ॥

२२. रावण इति ॥ रावणो राक्षसानभ्युपेयुषो योद्धुमभ्युपगतान् शत्रून् शुश्रुवान् श्रुतवान् प्राकाराग्रे निषेदिवान् प्राकारोपरि स्थितः । क्वसोरपि लिडादेशत्वात् तदन्तानां प्रयोगः । स्वयं युयुत्सयांचक्रे योद्धुमिच्छावतश्चक्रे । प्रोत्साहयन् योधयामासेत्यर्थः । युधेः सन्नन्ताल्लिटि आम्प्रत्यये पूर्ववत्तङ् ॥

निरास्थ राक्षसा[8] बाणान् प्रजहुः शूलपट्टिशान्[9] ।
असींश्च वाहयांचक्रुः[10] पाशैश्चाचकृषुस्ततैः[11] ॥ २३ ॥

---

१ ददार E₃.
२ गोष्पदं प्रवव° T₄.
३ प्रसुस्रुवुः T₂, Com.
४ ऽशुभाः T₂, T₃, T₄, Com.
५ दीप्रा E₃.
६ श्चाशिवाः C., E₃, T₃, T₄, Com.
७ प्रकाराग्रे T₃, D.
८ राक्षसान् बाणान् T₂, T₄.
९ पट्टसान् Com., T₄.
पट्टिसान् C., T₁, T₃, T₂, B.
१० भावयांचक्रुः T₃.
११ पाशैराचकृ° D.

२३. निरासुरिति ॥ अथ राक्षसा बाणान् निरासुः परेषु चिक्षिपुः ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ शूलपट्टसान् प्रजह्नुः प्रायुञ्जतेत्यर्थः। अनेकार्थत्वाद् धातूनाम् ॥ "जातिरप्राणिनाम्" इत्येकवद्भावाकरणं चिन्त्यम् ॥ असीन् खड्गांश्च वाहयांचक्रुः प्रवर्त्तयामासुः प्रायुञ्जतेत्यर्थः। ततैः प्रसारितैः पाशैराचकृषुराकृष्टवन्तश्च। असंयोगाल्लिट् कित्त्वान्न गुणः॥

भल्लैश्च बिभिदुस्तीक्ष्णैर्विविधुस्तोमरैस्तथा।
गदाभिश्चूर्णयांचक्रुः शितैश्चक्रैश्च चिच्छिदुः॥ २४॥

२४. भल्लैरिति ॥ तीक्ष्णैर्भल्लैः स्नुहिदलफलैर्बाणैर्विविधुः प्रजह्नुरित्यर्थः। व्यधेर्लिटि "ग्रहिज्यावयि—" इत्यादिना संप्रसारणम्। तथा तोमरैर्बिभिदुर्विदारयामासुः। गदाभिश्चूर्णयांचक्रुः। सत्यापादिण्यन्तात् लिट्याम्प्रत्ययः। चक्रैः शिरश्चिच्छिदुः॥

वानरा मुष्टिभिर्जघ्नुर्ददंशुर्दशनैस्तथा।
निरासुश्च गिरींस्तुङ्गान् द्रुमान् विचकरुस्तथा॥ २५॥

२५. राक्षसयुद्धप्रकारमुक्त्वा वानरयुद्धप्रकारमाह। वानरा इति ॥ वानरा मुष्टिभिर्जघ्नुः राक्षसानिति शेषः ॥ "गमहन—" इत्युपधालोपः ॥ तथा दशनैर्दन्तैर्ददंशुर्दष्टवन्तः। तुङ्गान् गिरीन् निरासुः चिक्षिपुः। असु क्षेपणे। श्नुरुस् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ तथा द्रुमान् विचकरुर्विचिक्षिपुः॥ "ऋच्छत्यॄताम्" इति गुणः॥

लाङ्गूलैर्लोठयांचक्रुस्तलैर्निन्युश्च संक्षयम्।
नखैश्च चक्रतुः क्रुद्धाः पिपिषुश्च क्षितौ बलात्॥ २६॥

२६. लाङ्गूलैरिति ॥ ते वानराः क्रुद्धा लाङ्गूलैः पुच्छैर्लोडयांचक्रुः पुच्छैरावेष्ट्य ममन्थुरित्यर्थः। ण्यन्तादाम्प्रत्ययः। तलैः करतलाघा-

१ विविधुस्तीक्ष्णैर्बिभिदु° Com.
२ शिरश्चक्रैश्च चिच्छिदुः Com. शिरः चक्रोश्च चिच्छिदुः T₃.
३ दशनैरपि c.
४ लोडयांचक्रु° Com.
५ पिपिषुश्चकिता बलात् T₃.

तैश्च संक्षयं निन्युरनैषुः। नखैश्च चकृतुश्चिच्छिदुः। कृती छेदने। लिटः कित्त्वाद्गुणप्रतिषेधः। बलात् क्षितौ पिपिषुश्चूर्णयामासुः॥

संबभूवुः कबन्धानि प्रोहुः शोणिततोयगाः।
तेरुर्भटास्यपद्मानि ध्वजैः फेणै[1]रिवाबभे[2]॥ २७॥

२७. समिति॥ कबन्धान्यपमूर्धकलेवराणि संबभूवुः संभूतानि। भवतेर्लिटि झेरुसि "भुवो वुग्लुङ्लिटोः" इति वुगागमः। शोणिततोयगा रक्तापगाः प्रोहुः प्रावहन्॥ "प्राद्वहः" इति परस्मैपदम्॥ वहेर्यजादित्वात् संप्रसारणे द्विर्भावः॥ "संप्रसारणाच्च" इति पूर्वरूपत्वे सवर्णदीर्घः॥ भटानामास्यपद्मानि तेरुस्तत्र प्लवन्ते स्म॥ "तॄफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ। ध्वजैः फेनैरिवाबभे भातम्। भातेर्भावे लिट्॥

रक्तपङ्के गजाः सेदुर्न प्रचक्रमिरे रथाः।
निममज्जुस्तुरङ्गाश्च गन्तुं नोत्सहिरे भटाः॥ २८॥

२८. रक्तेति॥ रक्तपङ्के पङ्कीभूतरक्ते गजाः सेदुः सन्ना मग्ना इत्यर्थः। रथा न प्रचक्रमिरे गन्तुं न शक्ताः॥ "प्रोपाभ्यां समर्थाभ्याम्" इति तङ्॥ तुरङ्गाश्च निममज्जुर्निमग्नाः। भटाः पदातयश्च गन्तुं नोत्सेहिरे न शेकुरित्यर्थः॥ "अत एकहल्—" इत्येत्वाभ्यासलोपौ॥ "शकधृष—" इत्यादिना तुमुन्॥

कोट्या कोट्या पुरद्वारमेकैकं रुरुधे द्विषाम्।
षट्त्रिंशद्धरिकोट्य[3]श्च निंवव्रु[4]र्वानराधिपम्॥ २९॥

२९. कोट्येति। द्विषां संबन्धि एकैकं पुरद्वारम्॥ "एकं बहुव्रीहिवत्" इति द्विर्भावः सुलोपश्च॥ कोट्या कोट्या हरीणामेकैकया कोट्या इत्यर्थः। वीप्सायां द्विरुक्तिः। रुरुधे रुद्धम्। अवशिष्टाः षडुत्तरास्त्रिंशत्

१ फेनै° Com., E_3.
२ °वाबभौ T_2, T_3, T_4.
३ कोटयस्तु T_2, T_3, T_4, Com.
४ विवव्रु° D., T_4, E_3.

षट्त्रिंशत् हरिकोट्यस्तु वानराधिपं सुग्रीवं विवव्रुः परिवव्रुः। वृणोतेर्लिटि झेरुसि यणादेशः॥

तस्तनुर्जज्वलुर्मम्लुर्जग्लुर्लुलुठिरे क्षताः।
मुमूर्च्छुर्ववमू रक्तं ततृषुश्चोभये भटाः॥ ३०॥

३०. तस्तनुरिति॥ उभये भटाः कपिराक्षसवीराः क्षताः परस्पराहताः सन्तः तस्तनुर्वेदनया चुक्रुशुः। स्तन शब्दे। जज्वलुः क्रोधाज्ज्वलिताः। मम्लुरङ्गशैथिल्यं गताः। जग्लुर्हर्षक्षयं गताः। लुलुठिरे क्षितौ लुठिताः। मुमुहुर्मूर्च्छिताः। रक्तं ववमुर्वमन्ति स्म उद्गिरन्ति स्म। वमु उद्गिरणे॥ "न शसददवादिगुणानाम्" इत्येत्वाभ्यासलोपप्रतिषेधः। ततृषुस्तृषिताश्च। गुणप्रतिषेधः॥

संपातिना प्रजङ्घस्तु युयुधेऽसौ द्रुमाहतः।
चकम्पेऽतीव चुक्रोश जीवनाशं ननाश च॥ ३१॥

३१. एवं तुमुलयुद्धमुक्त्वा द्वन्द्वयुद्धमाह। संपातिनेति॥ अथ संकुलयुद्धानन्तरं प्रजङ्घो नाम राक्षसः संपातिना नाम वानरेण सह युयुधे युध्यते स्म। असौ प्रजङ्घो द्रुमाहतोऽतीव चकम्पे चुक्रोश चक्रन्द जीवो नष्टो जीवनाशं ननाश॥ "कर्त्रोर्जीवपुरुषयोर्नशिवहोः" इति णमुल्प्रत्ययः॥ गतमन्यत्॥

उच्चखनाते नलेनाजौ स्फुरत्प्रतपनाक्षिणी।
जम्बुमाली जहौ प्राणान् ग्राव्णा मारुतिना हतः॥ ३२॥

३२. उदिति॥ अथ नलेन वानरेण आजौ रणे स्फुरती ये प्रतपनस्य राक्षसस्य अक्षिणी नेत्रे ते उच्चख्नाते उत्खाते उत्पाटिते। खनतेः कर्मणि लिट्॥ "गमहन—" इत्यादिनोपधालोपः॥ जम्बुमाली नाम राक्षसो

---

१ जह्लु° N., E3, B.
२ क्षितौ T2, T3, T4.
३ तत्रसु° T3, T4.
४ प्रजङ्घोऽथ T2, T3.
५ चुक्रोध T2.

मारुतिना हनूमता कर्त्रा ग्राव्णा करणेन हतः सन् प्राणान् जहौ तत्याज । जहातेर्लिट् ॥ "आत औ णलः" इत्यौकारादेशः ॥

मित्रघ्नस्य प्रचुक्षोद गदयाङ्गं विभीषणः ।
सुग्रीवः प्रघसं[1] नेभे बहून् रामस्ततर्द च ॥ ३३ ॥

३३. मित्रेति ॥ विभीषणो मित्रघ्नस्य नाम राक्षसस्याङ्गं शरीरं गदया प्रचुक्षोद संचूर्णयामास । सुग्रीवः प्रघणं नाम राक्षसं नेहे जघान । णह हिंसायाम् । अनुदात्तेत्वात्तङ् । रामश्च बहूंस्ततर्द जघान । तर्द हिंसायाम् ॥

वज्रमुष्टेर्विशिश्लेष मैन्देनाभिहतं शिरः ।
नीलश्चकर्त्त चक्रेण निकुम्भस्य शिरः स्फुरत् ॥ ३४ ॥

३४. वज्रेति ॥ मैन्देन वानरेणाभिहतं वज्रमुष्टेर्नाम राक्षसस्य शिरो विशिश्लेष विश्लिष्टम् । नीलो नाम वानरो निकुम्भस्य स्फुरच्चलत् शिरश्चक्रेण चकर्त्त चिच्छेद ॥

विरूपाक्षो जहे प्राणैस्तृढः सौमित्रिपत्रिभिः ।
प्रमोचयांचकारासून्[2] द्विविदस्त्वशनिप्रभम् ॥ ३५ ॥

३५. विरूपेति ॥ विरूपाक्षो नाम राक्षसः सौमित्रिपत्रिभिर्लक्ष्मणबाणैस्तृढः हिंसितः । तृह्ङ हिंसायामिति तौदादिकात्कर्मणि क्तः । ऊदित्वात् "यस्य विभाषा" इति निष्ठायामिट्प्रतिषेधः । ढत्वष्टुत्वढलोपाः । प्राणैः कर्तृभिर्जहे त्यक्तः । जहातेः कर्मणि लिट् । द्विविदस्तु अशनिप्रभं नाम राक्षसमसून् विमोचयांचकार तं जघानेत्यर्थः । अत्र अणि कर्त्तुः कर्मत्वं चिन्त्यम् ॥

गदा शक्रजिता जिघ्ये तां प्रतीयेष वालिजः ।
रथं ममन्थ सहयं शाखिनास्य ततोऽङ्गदः ॥ ३६ ॥

---

१ प्रघणं नेहे Com. विमोचयां° Com.
२ प्रमोदयां° T2, T4.

३६. गदेति ॥ शक्राजिता इन्द्रजिता गदा जिघ्ये प्रजिघ्ये प्रहिता प्रयुक्तेत्यर्थः । हिनोतेः कर्मणि लिट् ॥ "हेरचङि" इति कुत्वम् ॥ "एरनेकाचः—" इति यणादेशः ॥ तां गदां वालिजोऽङ्गदः प्रतीयेष प्रतिजग्राह । इषेर्लिटि "अभ्यासस्यासवर्णे" इतीयङादेशः । ततो गदाप्रत्येषणानन्तरमङ्गदोऽस्येन्द्रजितः सहयं साश्वं रथं शाखिना वृक्षेण ममन्थ पिपेषेत्यर्थः । मन्थेः क्रैयादिकाल्लिट् ॥

तत्कर्म वालिपुत्रस्य दृष्ट्वा विश्वं विसिष्मिये ।
संत्रेसू राक्षसाः सर्वे बहु मेने च राघवः ॥ ३७ ॥

३७. तदिति ॥ वालिपुत्रस्याङ्गदस्य तत् कर्म दृष्ट्वा विश्वं विसिष्मिये । अशक्यकरणादिति भावः । सर्वे राक्षसाः संत्रेसुः संत्रस्ताः । स्वनाशस्य कैमुत्यन्यायसिद्धत्वादिति भावः । राघवश्च बहु मेने । कृतज्ञत्वादिति भावः ॥

सुग्रीवो मुमुदे देवाः साध्वित्यूचुः सविस्मयाः ।
विभीषणोऽभितुष्टाव प्रशशंसुः प्लवङ्गमाः ॥ ३८ ॥

३८. सुग्रीव इति ॥ सुग्रीवो मुमुदे पुत्रपौरुषोत्कर्षादिति भावः । देवाः सविस्मयाः सन्तश्चित्रमिन्द्रजितमपि जिगायेति विस्मिताः सन्तः साध्वित्यूचुः । वचेर्यजादित्वात्संप्रसारणं दीर्घश्च । विभीषणोऽभितुष्टाव स्वयमिन्द्रजिच्छक्त्यभिज्ञत्वादिति भावः । प्लवङ्गमाः प्रशशंसुः स्ववर्गोत्कर्षादिति भावः । साभिप्रायविशेषणत्वात्परिकरः ॥

ही[१] चित्रं लक्ष्मणेनोचे[२] रावणिश्च तिरोदधे ।
विचकार ततो रामः शरान् संतत्रसुर्द्विषः ॥ ३९ ॥

३९. हीति ॥ लक्ष्मणेन हि चित्रमिति । 'चित्रं हि विस्मयविषादयोः' इति विश्वः । आभीक्ष्ण्यविवक्षया समानार्थयोः सह प्रयोगः । इत्यूचे[1]

---

१ हि Com. | २ °नोदे N., E3, T2, T3, Th., Com.

---

1 °नोदे Th., Com.

उदितम् । वचेः[1] कर्मणि लिट् । यजादित्वात्संप्रसारणं दीर्घः । रावणिरिन्द्रजिच्च तिरोदधे तिरोहितः । गूढं प्रहर्तुमिति भावः । दधातेः कर्त्तरि लिट् । तङ् । ततो रामः शरान् विचकार विचिक्षेप । कॄ विक्षेपे । लिटि णलि वृद्धिः । द्विषो राक्षसाः संतत्रसुः त्रेसुः ॥ "वा जॄभ्रमुत्रसाम्" इति विकल्पादेत्वाभ्यासलोपौ ॥

विभिन्ना जुघुरुर्घोरं जक्षुः क्रव्याशिनो हतान् ।
चुश्च्योत[१] व्रणिनां[२] रक्तं छिन्नाश्चेलुः क्षणं भुजाः ॥ ४० ॥

४०. विभिन्ना इति ॥ विभिन्ना विदारिता राक्षसा घोरं भीमं जुघुरुश्चुक्रुशुः । घुर भीमार्थशब्दयोः ॥ "कुहोश्चुः" ॥ क्रव्याशिनः शवमांसभक्षका गृध्रगोमाय्वादयो हतान् राक्षसान् जक्षुर्भक्षयामासुः ॥ "लिट्यन्यतरस्याम्" इत्यदेर्घस्लादेशः[2] ॥ "गमहन—" इत्यादिनोपधालोपः ॥ "खरि च" इति चर्त्वम् ॥ प्राणिनां रक्तं चुश्च्युते । श्च्युतिर् क्षरणे । कर्त्तरि लिट् । स्वरितेत्त्वात्तङ् । छिन्ना भुजाः क्षणं चेलुः द्विस्त्रिश्छिन्नगोधापुच्छवत् कम्पिता इत्यर्थः ॥

कृत्तैरपि दृढक्रोधो वीरवक्त्रैर्न तत्यजे ।
पलायांचक्रिरे शेषा जिह्रियुः शूरमानिनः ॥ ४१ ॥

४१. कृत्तैरिति ॥ कृत्तैश्छिन्नैरपि वीरवक्त्रैर्दृढोऽनुवृत्तः क्रोधो न तत्यजे न त्यक्तः । तथाप्योष्ठदष्टभ्रुकुट्याद्यनुवृत्तेरिति भावः । त्यजेः कर्मणि लिट् । शेषा हतशेषाः पलायांचक्रिरे पलायिताः । अयतेः कर्त्तरि लिटि तङ् ॥ "दयायासश्च" इत्याम्प्रत्ययः ॥ "उपसर्गस्यायतौ" इति लत्वम् ॥ शूरमानिनः तत्रापि शूराभिमानिनः ॥ "मनः" इति णिनिः ॥ जिह्रियुर्ह्रीणाः । ह्री लज्जायाम् । श्लेरुसीयङादेशः ॥

---

१ चुश्च्युते Com.
चुश्चेत E_3, D.

२ प्राणिनां T_2, T_4.

---

1 वदे° Th., Com.

2 घसा° Th., Com.

राघवो न दयांचक्रे दधुर्धैर्यं न केचन ।
मम्रे पतङ्गवद्वीरैर्हाहेति च विचुक्रुशे ॥ ४२ ॥

४२. राघव इति ॥ राघवो रामो न दयांचक्रे न दयते स्म । निर्दयो ममर्देत्यर्थः । दयतेः कर्तरि लिटि तङि "दयायासश्च" इत्याम्प्रत्यये कृञोऽनुप्रयोगः । केचन केचिदपि धैर्यं न दधुः न केऽपि तस्याग्रे स्थातुं शेकुरित्यर्थः । वीरैः पतङ्गवत् शलभवत् मम्रे मृतं न तु केनापि जीवितमित्यर्थः । म्रियतेर्भावे लिट् । हाहेति विचुक्रुशे च दुःखादुच्चै-र्विक्रुष्टं च । क्रोशतेर्भावे लिट् ॥

तिरोबभूवे सूर्येण प्रापे च निशयास्पदम् ।
जग्रसे कालरात्रीव वानरान् राक्षसांश्च सा ॥ ४३ ॥

४३. तिर इति ॥ सूर्येण तिरोबभूवेऽन्तर्दधेऽस्तमितमित्यर्थः। भुवो भावे लिट् । निशया रात्र्या आस्पदं प्रतिष्ठा स्थितिः । "आस्पदं प्रतिष्ठायाम्" इति निपातनात् सुडागमः ॥ प्रापे प्राप्तम् । निशाप्युपस्थितेत्यर्थः । कर्मणि लिट् । सा निशा कालरात्रीव प्रलयकालरात्रिरिव ॥ "रात्रेश्चाजसौ" इति संज्ञायां ङीप्प्रत्ययः । वानरान् राक्षसांश्च जग्रसे जग्रास । तस्यां रात्र्यामुभयबलसंहारी महारणः प्रवृत्त इत्यर्थः ॥

चुकोपेन्द्रजिदत्युग्रं सर्पास्त्रं चाजुहाव सः ।
आजुहुवे तिरोभूतः परानीकं जहासे च ॥ ४४ ॥

४४. चुकोपेति ॥ अथ स इन्द्रजिच्चुकोप । अत्युग्रं सर्पास्त्रमाजुहाव चाहूतवांश्च ॥ "अभ्यस्तस्य च" इति संप्रसारणे द्विर्वचनं णलि वृद्धिरावादेशश्च ॥ तिरोभूतोऽन्तर्हित एव परानीकं परबलमाजुहुवे मया सह युध्यस्वेति सस्पर्धमाहूतवान् ॥ "स्पर्धायामाङः" इति तङ् ॥ पूर्ववत्संप्रसारणम् ॥ "लिटस्तझयोरेशिरेच्" इत्येशादेशे उवङादेशः ॥

---

१ 'वीरै' T2.
२ विचुक्रुशुः E3.
३ जग्रासे T4.
४ च जुहाव T2.
५ जहास T2, T4.

अत्र छन्दोभङ्गः सोढव्यः। जहास च मन्मायया हताः स्थेति जहास च ॥

बबाधे च बलं कृत्स्नं निंजग्राह[2] च सायकैः।
उत्ससर्ज शरांस्ते[3]ऽस्य सर्पसाच्च प्रपेदिरे[4] ॥ ४५ ॥

४५. बबाध इति ॥ कृत्स्नं बलं बबाधे विलोडयामास च। बाधृ विलोडने। सायकैर्विजग्राह[1] च तुतोदेत्यर्थः। शरानुत्ससर्ज। ते उत्सृष्टाः शराः परस्य बलस्य सर्पसात् कार्त्स्न्येन सर्पीभूताः ॥ "विभाषा साति कार्त्स्न्ये" इति सातिप्रत्ययः ॥ संप्रपेदिरे संप्राप्ताः ॥

आचिचाय[5] स तैः[6] सेनामाचिकाय[7] च राघवौ।
बभाण च न मे मायां जिगायेन्द्रोऽपि[8] किं नृभिः ॥ ४६ ॥

४६. आचिचायेति ॥ स इन्द्रजित् सेनां कपिसेनां तैः सर्पैराचिचाय आचितवान् राघवौ च आचिकाय आचितवान्। चिनोतेर्लिटि णलि वृद्ध्यायादेशौ ॥ "विभाषा चेः" इति कुत्वविकल्पः ॥ मे मायामिन्द्रोऽपि न जिगाय ॥ "सन्लिटोर्जेः" इति कुत्वम् ॥ नृभिर्नरैः किं क्रियत इति शेषः। इति बभाण ॥

आचिक्याते[7] च भूयोऽपि राघवौ तेन पन्नगैः।
तौ मुमुहतुरुद्विग्नौ[9] वसुधायां च[10] पेततुः ॥ ४७ ॥

४७. आचिक्यात इति ॥ तेनेन्द्रजितापि भूयोऽपि राघवौ पन्नगैराचिक्याते आचितौ। चिनोतेः कर्मणि लिटि पूर्ववत्कुत्वम्। तौ राघवावु-

१ सर्वं D.
२ विजग्राह Com.
Th. Com. has निजग्राह.
३ °स्तेभ्यः T_2.
४ सर्पसात् प्रतिपेदिरे c.
सर्पसात् संप्रपेदिरे D., E_3, T_2, T_3, Com.
५ आचिकाय c.
६ सेनास्तैराचि° c., D.
७ °चिचाय c.
T_2 omits the 2nd half.
८ °तेऽस्य D.
९ राविग्नौ T_3.
१० निपेततुः T_3.
The verse is omitted in T_2.

1 निजग्राह Th. Com.

द्रुम्रौ चकितौ मुमुहतुः । मुह वैचित्ये । वसुधायां पेततुः पतितौ च ॥ "अत एकहल्—" आदिकार्यम् ॥

ततो रामेति[1] चक्रन्दुस्त्रेसुः परिदिदेविरे ।
निशश्वसुश्च सेनान्यः प्रोचुर्धिगिति चात्मनः ॥ ४८ ॥

४८. तत इति ॥ ततः पातानन्तरं सेनान्यः सुग्रीवादिसेनापतयः ॥ "एरनेकाचः—" इति यणादेशः ॥ रामेति चक्रन्दुश्चुक्रुशुः । त्रेसुः त्रस्ताः । गतमेतत् । परिदिदेविरे विलेपुः । देवृ देवने । देवनमत्र परिदेवनम् । निशश्वसुर्दीर्घमुष्णं च निश्वसितवन्तः । आत्मनो धिगिति प्रोचुश्च । आत्मनिन्दां चक्रुरित्यर्थः ॥

मन्युं शेकुर्न ते रोद्धुं नास्रं संरुरुधुः पतत् ।
विविदुर्नेन्द्रजिन्मार्गं[2] परीयुश्च प्लवंगमाः ॥ ४९ ॥

४९. मन्युमिति ॥ ते कपीन्द्रा मन्युं कोपं[1] रोद्धुं निवारयितुं न शेकुः । पतत् स्रवत् अस्रमश्रु न संरुरुधुः संरोद्धुं न शेकुरित्यर्थः । इन्द्रजितो मार्गं न विविदुः । अनेन मार्गेण गत इति न निश्चिक्युरित्यर्थः ॥

दधावाद्भिस्ततश्चक्षुः सुग्रीवस्य विभीषणः ।
विदांचकार धौताक्षः स रिपुं खे ननर्द च ॥ ५० ॥

५०. दधावेति ॥ तत उक्तोपद्रवानन्तरं विभीषणः सुग्रीवस्य चक्षुः अद्भिरभिमन्त्रितोदकैर्दधाव परिममार्ज । धावु गतिशुद्ध्योः । अथ धौताक्षः क्षालिताक्षः स सुग्रीवः खे रिपुं विदांचकार विवेद ददर्शेत्यर्थः । ननर्द जगर्ज च ॥

उज्जुगूरे ततः शैलं[3] हन्तुमिन्द्रजितं कपिः ।
विहाय[4] रावणिस्तस्मादानंहे[5] चान्तिकं पितुः ॥ ५१ ॥

१ रामं विचक्रन्दु T4
२ °मार्गान् T4.
३ शूलं c., E3, T3, Com.
४ विभाय Com.
५ °नंहेऽथान्ति° T2.
°नंहे पितुरन्तिकम् c.

1 शोकं Th. Com.

५१. उदिति ॥ तत इन्द्रजिद्दर्शनानन्तरं कपिः सुग्रीव इन्द्रजितं हन्तुं शूलमुज्जुगूरे उच्चिक्षेप । गुरी हिंसागत्योरिति दैवादिकाल्लिट् । रावणिरिन्द्रजित् तस्मात्कपेर्बिभाय पितू रावणस्यान्तिकमानंहे जगाम । अहि गतौ । लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ "तस्मान्नुड् द्विहलः" इति नुडागमः ॥

आचचक्षे[1] च वृत्तान्तं प्रजहर्ष च रावणः ।
गाढं चोपजुगूहैनं[2] शिरस्युपशिशिङ्घ च ॥ ५२ ॥

५२. आचचक्ष इति ॥ वृत्तान्तं नागपाशवृत्तान्तमाचचक्षे आख्यातवान् । रावणः प्रजहर्ष प्रहृष्टश्च । एनं पुत्रं गाढमुपजुगूह चालिलिङ्ग च ॥ "ऊदुपधाया गोहः" इत्यूत्वम् ॥ शिरस्युपशिशिङ्घ आघ्रातवांश्च । शिघि आघ्राणे । इदित्वान्नुम् ॥

ध्वजानुद्दुधुवुस्तुङ्गान् मांसं चेमुर्जगुः[3] पपुः ।
कामयांचक्रिरे कान्तास्ततस्तुष्टा[4] निशाचराः ॥ ५३ ॥

५३. ध्वजानिति ॥ ततो नागपाशबन्धश्रवणानन्तरं निशाचरास्तुष्टाः सन्तस्तुङ्गान् ध्वजानुद्दुधुवुः उच्चिक्षिपुः । धू विधूनने । मांसं चेमुर्जक्षुः । चमु अदने ॥ "अत एकहल्—" इत्येत्वादि ॥ जगुर्गायन्ति स्म । पपुर्मधून्यपिबन् । कान्ताः कामिनीः कामयांचक्रिरे रेमिर इत्यर्थः । कर्मणिङन्तात्लिट्याम्प्रत्यये कृञोऽनुप्रयोगे तङ् ॥

दर्शयांचक्रिरे रामं सीतां राज्ञश्च[5] शासनात् ।
तस्या मिमीलतुर्नेत्रे लुलुठे पुष्पकोदरे ॥ ५४ ॥

५४. दर्शयामिति ॥ राज्ञो रावणस्य शासनात् सीतां सीतया रामं दर्शयांचक्रिरे । सीतां पुष्पकमारोप्य रणे पतितं रामं दर्शितवन्त-

१ आचचक्षेऽथ T_3.
आचचक्षे स D., E_3.
२ °जुगूहेतं T_3.
३ चेमुः पपुर्जगुः T_2, T_4.
४ ततस्तुता T_2, T_3, T_4.
५ राज्ञोऽस्य C.

श्लेत्यर्थः। तद्दर्शनात् सा रामनिराशा स्ववशमेष्यतीति दुराशयेति भावः। अभिवादिदृशोरात्मनेपद उपसंख्यानाद्णिकर्त्तुर्वा कर्मत्वम्। तदेतदस्माभिर्घण्टापथे 'स सन्ततं दर्शयते गतस्मयः' इत्यत्र यथाभाष्यं सम्यग्विवेचितमिति नात्र भरः कृतः। तस्या नेत्रे मिमीलतुर्मीलिते। पुष्पकस्योदरेऽभ्यन्तरे लुलुठे लुठितवती॥

प्राणा दध्वंसिरे गात्रं तस्तम्भे च प्रिये हते।
उच्छश्वास चिराद्दीना रुरोदासौ ररास च॥ ५५॥

५५. प्राणा इति॥ प्रिये हते सति प्राणा दध्वंसिरे ध्वस्ताः। गात्रं तस्तम्भे स्तब्धं च। निष्पन्दं जातं चेत्यर्थः। स्तम्भु प्रतिबन्धे। तङ्। चिरादुच्छश्वास उज्जिजीव। अथासौ दीना अनाथा सती रुरोद अश्रूणि मुमोच ररास विललाप च॥

लोहैर्बन्धैर्बबन्धे नु वज्रेण किं विनिर्ममे।
मनो मे न विना रामाद्यत्पुस्फोट सहस्रधा॥ ५६॥

५६. लोहैरिति॥ मे मनो लोहैरायसैर्बन्धैर्बबन्धे बद्धम्। कर्मणि लिट्। वज्रेणाशनिना विनिर्ममे नु विनिर्मितं किम्। माङः कर्मणि लिट्। यद्यस्माद्रामात् विना रामेण विनाभूतमपि॥ "पृथग्विना—" इत्यादिना पक्षे पञ्चमी॥ सहस्रधा न पुस्फोट न विदद्रे। अतो लोहबद्धं वज्रमयं वा नूनमन्यथा विदीर्येतेत्यर्थः॥

उत्तेरिथ समुद्रं त्वं मदर्थेऽरीन् जिहिंसिथ।
ममर्थे चातिघोरां मां धिग्जीवितलघूकृताम्॥ ५७॥

---

१ लोहैर्बन्धे T₂, Com.
२ वज्रेणेव वि° c.
  वज्रेणोत वि° E₂, D.
  वज्रेण नु वि° T₃, T₄.
  वज्रैर्वा नु T₂.
३ निजघ्निथ E₃, D., T₄, Com.
४ ममर्थे योऽति° E₃.
५ धिग्जीवन° E₃, D.
  This verse is omitted in T₂.

५७. उदिति ॥ मदर्थे मम कृते त्वं समुद्रमुत्तेरिथ उत्तीर्णोऽसि । तरतेर्लिटि थसि इडागमे "थलि च सेटि" "तृफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ ॥ अरीन् निजघ्निथ जिहिंसिथ । हन्तेर्लिटि थलि "गमहन—" इत्यादिनोपधालोपः । ममार च मृतश्चासि । मृङ् प्राणत्यागे । लुङ्लिङ्विषयादन्यत्र "शेषात्कर्त्तरि परस्मैपदम्" । तथापि जीवितेन जीवनेन लघूकृतां तुच्छीकृतामत एवातिघोरामतिक्रूरां मां धिक् गर्हे ॥

न जिजीवा[1]सुखी तातः प्राणता रहितस्त्वया ।
मृतेऽपि त्वयि जीवन्त्या किं मयाणक[2]भार्यया ॥ ५८ ॥

५८. नेति ॥ तातो दशरथः प्राणता जीवता त्वया रहितो न तु मृतेन । अन प्राणने । लटः शत्रादेशः । तथापि न जिजीव । अतः सुखी । त्वयि मृतेऽपि जीवन्त्या अत एव अणकभार्यया कुत्सितकलत्रेण । 'कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इत्यमरः ॥ "पापाणके कुत्सितैः" इति समासः ॥ मया किं प्रयोजनम् । त्वां विना जीवतोऽपि मृत एव धन्य इति भावः ॥

सा जुगुप्सां[3]प्रचक्रेऽसून् जगर्हे लक्षणानि च ।
देहभाञ्जि तर्तैः केशान् लुलुञ्च लुलुठे[5] मुहुः[4] ॥ ५९ ॥

५९. सेति ॥ सा सीता असून् प्राणान् जुगुप्सांप्रचक्रे जुगुप्सितवती । गुपेः सन्नन्ताल्लिट्याम्प्रत्यये कृञोऽनुप्रयोगः । प्रोपसर्गव्यवधानं तु उपसर्गस्य धात्वर्थाभिव्यञ्जकस्य धातुशरीरान्तःपतितत्वान्न दोष इत्युक्तं प्राक् उक्षांप्रचक्र इत्यत्र ॥ केचित् जुगुप्सन्त इति जुगुप्सान् गर्ह्यानिति जुगुप्सधातोर्घञ्ञ शसन्तपाठं कल्पयन्ति । देहभाञ्जि देहस्थानि लक्षणानि भाग्यचिह्नानि च मुहुर्जगर्हे वैयर्थ्याद्धिगिति निनिन्द । केशान् शिरोरुहान् लुलुञ्च लुलाव । अवनौ लुलुठे परिवृत्ता ॥

---

[1] जिजीव सुखी Com., c., E₃.
[2] मयानकभा° C.
[3] जुगुप्सान्प्रचक्रे D., E₃, N., B.
[4] मुहुः D., E₃, T₂, T₃.
[5] °ठेऽवनौ Com.
°ठे तथा D., E₃, T₄.

जग्लौ दध्यौ वितस्तान क्षणं प्राण न विव्यथे ।
दैवं निनिन्द चक्रन्द देहे चातीव मन्युना ॥ ६० ॥

६०. जग्लाविति ॥ जग्लौ शोकाद् ग्लाना । दध्यौ चिन्तयामास । वितस्तान दुःखात्कमपि कण्ठध्वनिं संततान । स्तन शब्दे । क्षणं न प्राण न जिजीव मुहुर्मुमूर्च्छेत्यर्थः । अन प्राणने । लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ विव्यथे लब्धसंज्ञापि व्यथितवती । व्यथेर्लिट् ॥ "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य संप्रसारणम् ॥ दैवं निनिन्द । चक्रन्द विललाप । मन्युना शोकाग्निना अतीवात्यन्तं देहे दग्धा । दहेः कर्मणि लिट् ॥ "अत एकहल्—" इत्येत्वादिकार्यम् ॥

आश्वासयांचकाराथ त्रिजटा तां निनाय च ।
ततः प्रजागरांचक्रुर्वानराः सविभीषणाः ॥ ६१ ॥

६१. आश्वासयामिति ॥ अथ सीताविलापानन्तरं त्रिजटा नाम काचित्तां सीतामाश्वासयांचकार तामाश्वस्य निनायान्यतो नीतवती । ततः सविभीषणा वानराः प्रजागरांचक्रुः जजागरुः । जागृ निद्राक्षये । लिट् ॥ "उषविदजागृभ्योऽन्यतरस्याम्" इत्याम्प्रत्ययः ॥

चिचेत रामस्तत्कृच्छ्रमोषांचक्रे शुचाथ सः ।
मन्युश्चास्य समापिप्ये विरुराव च लक्ष्मणम् ॥ ६२ ॥

६२. चिचेतेति ॥ रामस्तत्कृच्छ्रं पाशबन्धदुःखं चिचेत जज्ञौ । अथ ज्ञानानन्तरं स रामः शुचा शोकाग्निना ओषांचक्रे दग्धः । उष दाहे । कर्मणि लिट् ॥ "उषविद—" इत्यादिना विकल्पादाम्प्रत्ययः ॥ अस्य रामस्य मन्युः शोकः समापिप्ये ववृधे । ओप्यायी वृद्धौ । लिट् ॥ "प्यायः पी" इति पीभावे द्विर्भावः ॥ "एरनेकाच—" इति यणादेशः ॥ लक्ष्मणं प्रति रुराव विललापेत्यर्थः ॥

---

१ वितस्तान T₂, D., E₃.
२ न क्षणं प्राण T₂.
क्षणं न प्राण E₃, D., T₃.

समीहे[1] मर्त्तुमानर्चे तेन वाचाखिलं बलम् ।
आपपृच्छे[2] च सुग्रीवं स्वं[3] देशं विससर्ज च ॥ ६३ ॥

६३. समिति ॥ तेन रामेण मर्त्तुं प्राणांस्त्यक्तुं समीषे इष्यते स्म । इषेरविवक्षिते कर्मणि भावे लिट् । अखिलं बलं वाचा प्रियोक्त्या आनर्चे अर्चितम् । अर्चेर्भौवादिकात्कर्मणि लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घे "तस्मान्नुड् द्विहलः" इति नुडागमः ॥ सुग्रीवमापपृच्छे आपृष्टवान् परलोकयात्रां निश्चित्य आमन्त्रितवानित्यर्थः । पृच्छतेः कर्त्तरि लिट् ॥ आङि नुप्रच्छयोरुपसंख्यानात्तङ् । स्वदेशं प्रति विससर्ज किष्किन्धां गच्छेत्यादिष्टवानित्यर्थः ॥

आदिदेश[4] स किष्किन्धां राघवौ[5] नेतुमङ्गदम् ।
प्रतिजज्ञे स्वयं चैव सुग्रीवो रक्षसां वधम् ॥ ६४ ॥

६४. आदिदेशेति ॥ रामेणैवमुक्तः सुग्रीवः राघवौ किष्किन्धां नेतुमङ्गदमादिदेश । एतौ किष्किन्धां नयेत्यादिष्टवानित्यर्थः । रक्षसां वधं च स्वयमेव प्रतिजज्ञे च । अहमेव वैरिवधं करिष्यामीति प्रतिज्ञातवांश्च ॥ "संप्रतिभ्यामनाध्याने" इति प्रतिपूर्वाज्जानातेः सकर्मकात्तङ् ॥

नागास्त्रमिदमेतस्य[6] विपक्षस्तार्क्ष्यसंस्मृतिः[7] ।
विभीषणादिति[8] श्रुत्वा तं[9] निदध्यौ रघूत्तमः ॥ ६५ ॥

६५. नागेति ॥ इदं नागास्त्रं शरा बाणा न तस्य नागास्त्रस्य विपक्षः प्रतीकारस्तार्क्ष्यसंस्मृतिः गरुडसंस्मरणम् । इत्थं विभीषणाच्छ्रुत्वा राघवस्तं तार्क्ष्यं प्रदध्यौ सस्मार ॥

---

१ समीषे Com., E_3.
२ आपपृच्छेऽथ T_3.
३ स्वदेशं Com., D.
  संदेशं T_2.
४ आदिदेशाथ D.
५ राघवं T_2.
६ नागास्त्रं न शरास्तस्य c., Com.
७ स्तार्क्ष C, D.
८ इत्थं विभीषणाच्छ्रुत्वा T_2, T_3, T_4, Com.
  इति विभीषणाच्छ्रुत्वा D.
९ तं प्रदध्यौ Com.
  प्रदध्यौ च D.

ततो विजघटे शैलैरुद्वेलं पुप्लुवेऽम्बुधिः।
वृक्षेभ्यश्चुच्युते[1] पुष्पैर्विरेजुर्भासुरा[2] दिशः॥ ६६॥

६६. तत इति॥ ततो ध्यानानन्तरं शैलैर्विजघटे विघटितम्। घटेर्भावे लिट्। अम्बुधिरुद्वेलमुल्लङ्घितवेलं यथा तथा पुप्लुवे चुक्षुभे इत्यर्थः। कर्त्तरि लिट्। वृक्षेभ्यः॥ "अपादाने पञ्चमी"॥ पुष्पैश्चुच्युते च्युतम्। च्यवतेर्भावे लिट्। एतत्सर्वं तार्क्ष्यपक्षपवनवेगादित्यवधेयम्। दिशो भासुरा भास्वराः[3] सत्यस्तत्पक्षभासेति भावः॥ "भञ्जभासमिदो घुरच्"॥ रराजुर्विरेजुः। फणादिविकल्पादेत्वाद्यभावः॥

जगाहिरेऽम्बुधिं नागा ववौ वायुर्मनोरमः[4]।
तेजांसि शंशमांचक्रुः[5] शरबन्धा[6] विशिश्लिषुः॥ ६७॥

६७. जगाहिर इति॥ नागाः सर्पा अम्बुधिं जगाहिरे प्रविष्टाः। तार्क्ष्यत्रासादिति भावः। मनोहरः शैत्यमान्द्यादियोगात्सुखस्पर्श इत्यर्थः। वायुर्ववौ वाति स्म। तेजांसि चन्द्रतारकादिप्रकाशाः शाशमांचक्रुस्तार्क्ष्यतेजोऽभिभवाद्भृशं शेमुरित्यर्थः। शमेर्यङन्ताल्लिट्याम्प्रत्यये अल्लोपयलोपौ। शरपाशा नागपाशा विशिश्लिषुर्निवृत्ताः॥

भ्रेजिरेऽक्षतवद्योधा लेभे संज्ञां च लक्ष्मणः।
विभीषणोऽपि[7] बभ्राजे गरुत्मान् प्राप चान्तिकम्॥ ६८॥

६८. भ्रेजिर इति॥ योधा अक्षतवदक्षतैस्तुल्यं भ्रेजिरे। फणादिविकल्पादेत्वादि। लक्ष्मणश्च संज्ञां लेभे। विभीषणोऽतिबभ्राजेऽतिरराजे। भ्राजृ दीप्तौ। फणादिविकल्पादेत्वाद्यभावः। गरुत्मांश्चान्तिकं रामसमीपं प्राप॥

---

१ श्चुश्रुते D., E_3.
२ रराजु° Com., T_2, T_3.
  °रारेजु° D.
३ भास्वरा° c.
४ मनोहरः Com.
५ शाशमांचक्रुः Com.
६ बन्धाश्च चिच्छिदुः D.
७ °तिबभ्राजे Com., D., T_2, T_3.

संपस्पर्शाथ काकुत्स्थौ जज्ञाते तौ गतव्यथौ ।
तयोरात्मानमाचख्यौ ययौ चाथ यथागतम् ॥ ६९ ॥

६९. स इति ॥ अथ स गरुत्मान् काकुत्स्थौ रामलक्ष्मणौ पस्पर्श । तौ गतव्यथौ निर्व्यथौ जज्ञाते जातौ । जनी प्रादुर्भावे । कर्त्तरि लिट् ॥ "गमहन—" इत्युपधालोपः ॥ तयो राघवयोरात्मानमाचख्यौ गरुत्मानहमिति कथयामास । ख्या प्रकथने । लिट् । यथागतं ययौ चापि । आगमनमार्गेणैव जगामेत्यर्थः ॥

स्वेनुस्तित्विषुरुद्येमुरुच्चख्नुः पर्वतांस्तरून् ।
वानरा दद्रमुश्चाथ संग्रामं चाशशंसिरे ॥ ७० ॥

७०. स्वेनुरिति ॥ अथ वानराः स्वेनुः सस्वनुः । स्वन शब्दे । फणादिविकल्पादेत्वादि । तित्विषुर्दिदीपिरे । त्विष दीप्तौ । उद्येमुरुद्यताः ॥ "अत एकहल्—" इत्येत्वम् ॥ पर्वतांस्तरूंश्च उच्चख्नुरुत्खातवन्त इत्यर्थः । खनतेः "गमहन—" इत्यादिनोपधालोपः । दद्रमुरितस्ततो जग्मुः । द्रम गतौ । संग्रामं युद्धमाशशंसिरे आचकाङ्क्षुः । आङ्पूर्वाच्छंसतेरिच्छार्थे तङ् ॥ आङः शासु इच्छायाम् । शंसतेश्चेति वचनात् ॥

डुढौकिरे पुनर्लङ्कां बुबुधे तान् दशाननः ।
जीवतश्च विवेदारीन् बभ्रंशेऽसौ धृतेस्ततः ॥ ७१ ॥

७१. डुढौकिर इति ॥ वानराः पुनर्लङ्कां डुढौकिरे जग्मुः । दशाननस्तान् लङ्कां गतान् बुबुधे । अरीन् जीवतः प्राणतो विवेद । ततः शत्रुजीवनादसौ दशास्यो धृतेर्धैर्याद्बभ्रंश भ्रष्टश्च्युतः । भ्रंशु अधःपतने ॥

सस्रंसे शरबन्धेन दिव्येनेति बुबुन्द सः ।
बभाजाथ परं मोहमूहाश्चक्रे जयं न च ॥ ७२ ॥

---

१ स पस्प° Com., D., E_3, T_3.
२ तौ जज्ञाते E_3, T_2, T_3, T_4.
३ तथा चात्मा° D.
४ चापि D., E_3, Com.
५ °मुः शिश्रियुः E_3.
६ दद्रमू रेमुः T_2, T_3.
७ चाशशासिरे N.
८ बभ्रंशा° Com.

७२. सस्रंस इति ॥ स रावणो दिव्येन शरबन्धेन नागपाशबन्धेन सस्रंसे स्रस्तम्। स्रंसु गतौ। भावे लिट्। इति बुबुन्द शुश्राव। उबुन्दिर् निशामने। अथ श्रवणानन्तरं मोहं बभाज प्राप। इतिकर्त्तव्यतामूढोऽभूदित्यर्थः। अत एव जयं जयोपायं च नोहांचक्रे न तर्कयामास। ऊह वितर्के। लिट्॥ "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्ययः॥

धूम्राक्षोऽथ प्रतिष्ठासांचक्रे रावणसंमतः।
सिंहास्यैर्युयुजे तस्य वृकास्यैश्च रथः खगैः॥ ७३॥

७३. धूम्रेति॥ अथ मोहानन्तरं धूम्राक्षो नाम राक्षसो रावणेन संमतोऽनुज्ञातः सन्। इति तृतीयासमासः। मन्यतेः संपूर्वादनुज्ञानार्थत्वाद्भूते क्तः। न तु "मतिबुद्धि—" इत्यादिना वर्त्तमाने क्तः। अतो न समासाद्यनुपपत्तिः। प्रतिष्ठासांचक्रे युद्धाय प्रस्थातुमियेष। प्रपूर्वात्तिष्ठतेः सन्नन्ताल्लिटि "कास्प्रत्ययात्—" इत्याम्प्रत्ययः। प्रपूर्वस्य तिष्ठतेरात्मनेपदित्वात् "पूर्ववत् सनः" "आम्प्रत्ययवत्—" इति सर्वत्र तङ्। तस्य रथः सिंहास्यैः सिंहमुखैर्वृकास्यैर्वृकमुखैश्च खगैः खेचरैर्वाहनैरिति शेषः। युयुजे योजितः। युजेः कर्मणि लिटि तङ्॥

त्वक्त्रैः संविव्युर्देहान् वाहनान्यधिशिश्यिरे।
आनर्जुर्नृभुजोऽस्त्राणि ववञ्चुश्चाहवक्षितिम्॥ ७४॥

७४. त्वक्त्रैरिति॥ नृभुजो राक्षसास्त्वचं त्रायन्त इति त्वक्त्राणि तनुत्राणि॥ "आतोऽनुपसर्गे कः"॥ तैरङ्गानि गात्राणि संविव्युः संवव्रुः। व्येञ् संवरणे। लिटि झेरुसि किति यजादित्वात्संप्रसारणे द्विर्भावे च सति "एरनेकाचः—" इति यणादेशः। संविव्यिर इति पाठे "लिटस्तझयोरेशिरेच्"। शेषं समानम्। वाहनानि गजादीनि अधिशिश्यिरे अधिष्ठितवन्तः॥ "एरनेकाचः—" इति यणादेशः॥ "अधिशीङ्—"

१ संविव्युरङ्गानि T_2, T_3, T_4, Com.

इति कर्मत्वम् ॥ अस्त्राणि धनुरादीनि आनर्जुर्जगृहुः । अर्ज प्रतियत्ने । लिट् ॥ "अत आदेः" इत्यभ्यासदीर्घः ॥ "तस्मान्नुड् द्विहलः" ॥ आहवक्षितिं रणभूमिं वव्रज्जुर्जग्मुः । वव्रज्जु गतौ ॥

अध्युवास रथं तेये पुराच्चुक्षाव चाशुभम् ।
संश्रावयांचकाराख्यां धूम्राक्षस्तत्वरे तथा ॥ ७५ ॥

७५. अधीति ॥ धूम्राक्षो रथमध्युवास । रथे उवासेत्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ पुराल्लङ्कातस्तेये निर्गतः । तय गतौ । कर्त्तरि लिट् । अनुदात्तेत्त्वात्तङ् ॥ "अत एकहल्—" इत्येत्वाभ्यासलोपौ ॥ अशुभं यथा तथा चुक्षाव क्षुतवान् । स्वक्षुतमत्यशुभमिति भावः । क्षु शब्दे । आख्यां स्वनाम संवादयांचकार[1] श्रावितवान् । बन्दिभिः स्तावयामासेत्यर्थः । तथा तत्वरे युद्धाय त्वरितवानित्यर्थः । त्वरतेर्लिट् ॥

निलिल्ये मूर्ध्नि गृध्रोऽस्य क्रूरा ध्वाङ्क्षा ववाशिरे ।
शिशीके शोणितं व्योम चचाल क्ष्मातलं तथा ॥ ७६ ॥

७६. अथास्य दुर्निमित्तान्याह । विलिल्य इति ॥ अस्य धूम्राक्षस्य मूर्ध्नि गृध्रो विलिल्ये तस्थावित्यर्थः । लीङ् श्लेषणे ॥ "एरनेकाचः—" इति यण् ॥ ध्वाङ्क्षाः काकाः क्रूरं ववाशिरे चुक्रुशुः । वाशृ शब्दकुत्सायाम् । लिट् । व्योम आकाशं शोणितं शिशीके क्षरितं ववर्षेत्यर्थः । शीकृ सेचने । तथा क्ष्मातलं चचाल चकम्पे ॥

ततः प्रजघटे युद्धं शस्त्राण्यासुः परस्परम् ।
वव्रश्चुराजुघूर्णुश्च स्येमुश्चुकूर्दिरे तथा ॥ ७७ ॥

१ संवादयांचकार Com.
Th. Com. has संश्रावयांचकार.
२ विलिल्ये Com.
३ क्रूरं Com.

४ प्रववृते T_3.
५ जुघूर्णिरे च वव्रश्चुः E_2.
६ चुक्षुभिरे Com.

1 संश्रावयांचकार Th. Com.

७७. तत इति ॥ ततो दुर्निमित्तानन्तरं युद्धं प्रजघटे प्रववृते । परस्परं शस्त्राण्यासुश्चिक्षिपुः । असु क्षेपणे । लिट् ॥ "अत आदेः" ॥ वव्रश्चुः परस्परं विच्छिदुः । आजुघूर्णुर्भ्रेमुश्च । घूर्णिरुभयपदी । 'घोणते घूर्णते घोणति घूर्णति' इति भट्टमल्लः । स्येमुः सस्वनुः । स्यमु शब्दे । फणादित्वादेत्वम् । तथा चुक्षुभिरे क्षुभिताः ॥

रुरुजुर्भ्रेजिरे फेणुर्बहुधा हरिराक्षसाः ।
वीरा[1] न बिभयांचक्रुर्भीषयांचक्रिरे परान् ॥ ७८ ॥

७८. रुरुजुरिति ॥ वीरा हरिराक्षसा रुरुजुः परस्परं बभञ्जुः । रुजो भङ्गे । भ्रेजिरे रेजुः बहुधा फेणुर्नानाविधा गतीश्चक्रुरित्यर्थः । फण गतौ । फणादित्वादुभयत्र पाक्षिकमेत्वम् । न तु बिभयांचक्रुर्न बिभ्युः ॥ "भीह्रीभृहुवां श्लुवच्च" इति विकल्पादाम्प्रत्ययः । किं तु परान् भीषयांचक्रिरे भीषितवन्तः । बिभेतेर्ण्यन्ताल्लिटि "भीस्म्योर्हेतुभये" इति तङ् । तद्वदनुप्रयोगेऽपि तङ् ॥ "भियो हेतुभये षुक्" इति षुगागमः ॥

रक्तं प्रचुश्चुतुः क्षुण्णाः शिश्वियुः शर[2]विक्षताः ।
अस्यतां शुशुवुर्बाणान् भुजाः साङ्गुष्ठमुष्टयः ॥ ७९ ॥

७९. रक्तमिति ॥ क्षुण्णाः प्रहृता रक्तं प्रचुश्चुतुश्चक्षरुः । क्षुरविक्षताः शस्त्रहताः केचन शिश्वियुरुच्छूनाः ॥ "विभाषा श्वेः" इत्यसंप्रसारणपक्षे इयङादेशः । बाणानस्यतां क्षिपतां धन्विनां संबन्धिनः शरविक्षताः साङ्गुष्ठमुष्टयस्तथैव बद्धमुष्टयो भुजाः शुशुवुरुच्छूनाः । संप्रसारणपक्षे उवङादेशः ॥

रणे चिक्रीड धूम्राक्षस्तं ततर्जानिलात्मजः ।
आददे च शिलां[3] साश्वं पिपेषास्य रथं तया[4] ॥ ८० ॥

---

१ धीरा T2, T3, T4.
२ क्षुर° T3, Com.
बाण° N., C., T1, B.
३ गुर्वी Com.
४ रथमस्य पिपेष च D.

८०. रण इति ॥ धूम्राक्षो रणे चिक्रीड । तं धूम्राक्षमनिलात्मजो हनूमान् ततर्ज तर्जितवान् । तर्जभौवादिकाल्लिट् । गुर्वी शिलां चाददे जग्राहे । तया शिलया अस्य धूम्राक्षस्य रथं पिपेष चूर्णितवान् ॥

पपात राक्षसो भूमौ [1]रराट च भयंकरम्[2] ।
तुतोद गदया चारिं तं [3]दुध्राविाद्रिणा [4]कपिः ॥ ८१ ॥

८१. पपातेति ॥ भयंकरो राक्षसो धूम्राक्षो भूमौ पपात ततोऽरिं पपाट अभिजगाम च गदया तुतोद च । कपिस्तं धूम्राक्षमद्रिणा दुधाव जघानेत्यर्थः । धूञ् कम्पने ॥

अकम्पनस्ततो [5]योद्धुं चकमे रावणाज्ञया ।
स रथेना[6]भिदुद्राव जुघुरे चातिभैरवम् ॥ ८२ ॥

८२. अकम्पन इति ॥ ततो धूम्राक्षवधानन्तरमकम्पनो नाम राक्षसो रावणाज्ञया योद्धुं चकमे कामयांचक्रे ॥ "आयादय आर्धधातुके वा" इति विकल्पात् कर्मेणिङभावः ॥ सोऽकम्पनो रथेनाभिदुद्राव अरीनभिजगाम । अतिभैरवमतिभयंकरं यथा तथा जुघुरे जुघोष । घुर भीमार्थशब्दयोः ॥

पस्पन्दे तस्य वामाक्षि सस्यमु[7]श्चाशिवाः खगाः ।
तान् वव्राजावमत्यासौ [8]बभासे च रणे शरैः ॥ ८३ ॥

८३. पस्पन्द इति ॥ तस्याकम्पनस्य वामाक्षि वामनेत्रं पस्पन्दे पुस्फोर । अशिवा अमङ्गलाः खगा उलूकादयः सस्यमुश्चुकूजुः । स्यमु शब्दे । फणादिविकल्पादेत्वाभावः । असावकम्पनस्तानुत्पातानवमत्यानादृत्य वव्राज योद्धुं जगाम । रणे शरैर्बभासे दिदीपे च ॥

---

१ पपाट Com.
२ भयंकरः T_3, Com.
३ दुधाव Com.
४ हरिः E_3.
५ युद्धं c.
६ °नापि दु° T_4.
७ सस्वनुश्चा° E_3.
८ बभाषे c.

खमूयुर्वसुधामूवुः सायका रज्जुवत्तताः।
तस्माद्बलैरपत्रेपे पुप्रोथास्मै न कश्चन ॥ ८४ ॥

८४. खमिति ॥ रज्जुवत् तन्तुवत् तता विस्तृताः प्रसारिताः सायकाः खमाकाशमूयुर्वयन्ति स्म वसुधामूवुर्वयन्ति स्म। तन्तुभिरिव सायकैर्द्यावापृथिव्यौ प्रोते इत्यर्थः। वेञ् तन्तुसन्ताने। लिट् ॥ "वेञो वयिः" इति वयिरादेशः ॥ "लिटि वयो यः" इति यकारस्य संप्रसारणप्रतिषेधे "ग्रहिज्यावयि—" इति वकारस्य संप्रसारणम् ॥ "वश्चान्यतरस्यां किति" इति यकारस्य वैकल्पिके वकारे द्वैरूप्यम्। तस्मात् तं वीक्ष्य ॥ "ल्यब्लोपे पञ्चमी" ॥ बलैर्वानरबलैरपत्रेपे अपत्रपितम्। भावे लिट् ॥ "तॄफलभजत्रपश्च" इत्येत्वम् ॥ अस्मै अकम्पनाय कश्चन कोऽपि न पुप्रोथ न प्रबभूवेत्यर्थः। प्रोथृ पर्याप्तौ ॥ "नमः स्वस्ति—" इत्यत्रालंशब्देन पर्याप्त्यर्थग्रहणात् तद्योगे चतुर्थी ॥

स भस्मसाच्चकारारीन् दुद्राव च कृतान्तवत्।
चुक्रोध मारुतिस्तालमुच्चखने च महाशिखम् ॥ ८५ ॥

८५. स इति ॥ सोऽकम्पनोऽरीन् भस्मसाच्चकार कात्स्न्र्येन भस्मीचकार ॥ "विभाषा साति कात्स्न्र्ये" इति कात्स्न्र्ये सातिप्रत्ययः। कृतान्तवद्दुधाव कम्पयामास। अन्तकवत्सर्वानयं संहरिष्यतीति भयमजनयदित्यर्थः। अथ मारुतिर्हनूमान् चुक्रोध क्रुद्धश्च महाशिखमुदग्रतालं तालवृक्षमुच्चखान उत्पाटयामास ॥

यमायाकम्पनं तेन निरुवाप महापशुम्।
बभ्रज्ज निहते तस्मिन् शोको रावणमग्निवत् ॥ ८६ ॥

८६. यमायेति ॥ स मारुतिस्तेन तालेन करणेन अकम्पनमेव पशुं यमाय देवतायै निरुवाप निरुप्तवान् दत्तवानित्यर्थः। यद्यपि चरुपुरोडाशादीनां निर्वापः पशूनामालम्भस्तथाप्यत्र उभयानुगते दानमात्रे

१ खमूवुर्वसुधामूयुः c., E₃.
२ दुधाव Com.

३ °मुच्चखानमहा° Com.

प्रयोगः । तालेन तं जघानेति फलितार्थः । अत्र वपेर्यजादित्वेऽपि लिटोऽकित्त्वान्न धातोः संप्रसारणम् । अभ्यासस्य तु "लिट्यभ्यासस्य" इति भवत्येव ॥ तस्मिन्नकम्पने हते शोको रावणमग्निवदग्निना तुल्यं बभ्रज्ज पपाच ददाहेत्यर्थः । भ्रस्ज पाके । लिटि णलि "झलां जश् झशि" इति सकारस्य जश्त्वम् । दकारः । तस्य चुत्वे जकारः ॥ "भ्रस्जो रोपधयोरमन्यतरस्याम्" इति रमागमपक्षे बभर्जेति रूपम् ॥

स बिभेष[1] प्रचुक्षोद दन्तैरोष्ठं चखाद च ।
प्रगोपायांचकाराशु[2] यत्नेन परितः पुरम् ॥ ८७ ॥

८७. स इति ॥ स रावणो बिभेष चचाल चकितोऽभूदित्यर्थः । भेषृ चलने । प्रचुक्षोद रोषाद्यत्किञ्चित्पुरोवर्त्ति हस्तलग्नं वस्तु चूर्णयामास । क्षुद संचूर्णने । दन्तैरोष्ठं चखाद च । ददंश चेत्यर्थः । आशु यत्नेन पुरं लङ्कां परितः सर्वतः प्रगोपायांचकार ररक्ष । सर्वत्र रक्षिणो निहितवानित्यर्थः । गुपू रक्षणे । लिट् ॥ "आयादय आर्धधातुके वा" इति विकल्पादायप्रत्ययः । ततः "कास्प्रत्ययाद्—" इत्याम्प्रत्ययः ॥

प्रहस्तमर्थयांचक्रे योद्धुमद्भुतविक्रमम् ।
किं विचारेण राजेन्द्र युद्धार्था वयमित्यसौ ॥ ८८ ॥

८८. प्रहस्तमिति ॥ अद्भुतविक्रमं प्रहस्तं प्रहस्ताख्यं प्रधानामात्यं योद्धुमर्थयांचक्रे प्रार्थितवान् । अर्थयतेः स्वार्थण्यन्तादात्मनेपदिनो लिटयाम्प्रत्यये तङ् । असावित्थं प्रार्थितः प्रहस्तः हे राजेन्द्र वयं युद्धार्था युद्धप्रयोजनका योद्धुमेव संवर्धिताः तद्विचारेण किमिति बभाणेत्युत्तरेण संबन्धः ॥

[3]चक्राणाशङ्कितो योद्धुमुत्सेहे[4] च महारथः ।
नियेमिरेऽस्य योद्धारश्चक्लृपे चाश्वकुञ्जरम् ॥ ८९ ॥

---

१ बिभेष Com.
२ चकाराथ T2.
३ बभाण° T2, T4, Com.
४ °त्सेहेऽथ T2, T4.
°त्सेहे स E3.
T3, omits verses from 89—93.

८९. बभाणेति ॥ बभाणेति पूर्वशेषः । महारथः प्रहस्तोऽशङ्कितः सन् योद्धुमुत्सेहे उत्साहवानासीत् । स्थेयान् प्रयत्न उत्साहः स च वीररसस्य स्थायी । ते तत्संपन्ना जाता इत्यर्थः ॥ अस्य प्रहस्तस्य योद्धारः सहायभूता योधा नियेमिरे नियमिताः । यमेः कर्मणि लिट् । उभयत्रापि "अत एकहल्—" इत्येत्वम् । अश्वकुञ्जरम् । सेनाङ्गत्वाद् द्वन्द्वैकवद्भावः । चक्लृपे एतावदिति क्लृप्तं जातम् ॥ कर्त्तरि लिट् ॥

युयुजुः स्यन्दनानश्वैरीजुर्देवान् पुरोहिताः ।
आनर्चुर्ब्राह्मणान् सम्यगाशिषश्चाशशंसिरे ॥ ९० ॥

९०. युयुजुरिति ॥ स्यन्दनान् रथानश्वैः सह युयुजुर्युज्यन्ति स्म सारथय इति शेषः । पुरोहिता देवान् ईजुः पूजयामासुः । यज देवपूजादौ । लिट् ॥ यजादीनां किति संप्रसारणम् ॥ ब्राह्मणान् सम्यगानर्चुरर्चयामासुः । अर्चेर्भौवादिकाल्लिट् ॥ "अत आदेः" ॥ "तस्मान्नुड् द्विहलः" इति नुट् ॥ ते ब्राह्मणा आशिषो मनोरथान् आशशासिरे सत्याः सन्तु यजमानस्य कामा इत्याशशंसिरे इत्यर्थः । 'आङः शासु इच्छायाम्' इति तङ् ॥

ऊहिरे मूर्ध्नि सिद्धार्था गावश्चालेभिरे भटैः ।
प्रचुक्ष्णुवुर्महास्त्राणि जिज्ञासांचक्रिरे हयान् ॥ ९१ ॥

९१. ऊहिर इति ॥ भटैर्योधैर्मूर्ध्नि सिद्धार्थाः श्वेतसर्षपा ऊहिरे ऊढाः । वहेः कर्मणि लिट् । यजादित्वात्संप्रसारणम् । गावश्चालेभिरे स्पृष्टाः । लभेः कर्मणि लिट् ॥ "अत एकहल—" इत्येत्वम् ॥ महास्त्राणि प्रचुक्ष्णुवुः उत्तेजयामासुः । क्ष्णु तेजने । हयान् जिज्ञासांचक्रिरे ज्ञातुमीषुः । शक्तिविषये परीक्षांचक्रिर इत्यर्थः । जानातेः सन्नन्तात्कर्त्तरि लिट्याम्प्रत्ययः ॥ "ज्ञाश्रुस्मृदृशां सनः" इति लिट्यनुप्रयोगेऽपि तङ् ॥

---

१ °आशशासिरे Com. | प्रचिक्षिपु° T₂.
२ प्रचुक्षुवु° D., E₃.

ललुः खड्गान् ममार्जुश्च ममृजुश्च परश्वधान्[1]।
अलंचक्रे समालेभे ववसे बुभुजे पपे[2] ॥ ९२ ॥

९२. ललुरिति ॥ खड्गान् ललुः आदधिरे । ला आदाने । ममार्जुश्च शोधयामासुः । तथा परश्वधान् परशूंश्च ममृजुः शोधितवन्तः । उभयत्र मृजूष् शुद्धौ । लिट् । झेरुसि "मृजेरजादौ संक्रमे विभाषा वृद्धिर्वक्तव्या" इति वृद्धिविकल्पाद् द्वैरूप्यम् । तथा तैरलंचक्रेऽलंकृतम् । समालेभे समालब्धम् । समालम्भोऽनुलेपनम् । ववसे वसितम् । वस आच्छादने । बुभुजे भुक्तम् । पपे पीतम् । पा पाने । सर्वत्राविवक्षितकर्मत्वाद् भावे लिट् ॥

जहसे च क्षणं यानैर्निजग्मे योद्धृभिस्ततः ।
विप्रान् प्रहस्त आनर्च जुहाव च विभावसुम् ॥ ९३ ॥

९३. जहस इति ॥ ततो योद्धृभिः क्षणं जहसे हसितं विनोदितमित्यर्थः । ततो यानैर्वाहनैः करणैर्निजग्मे निर्गतम् । उभयत्र भावे लिट् ॥ "गमहन—" इत्यादिना गमेरुपधालोपः ॥ अथ प्रहस्तो विप्रानानर्च पूजयामास । गतमेतत् । विभावसुमग्निं जुहाव च जयार्थमित्यर्थः ॥

संवर्गयांचकाराप्तान्[3] चन्दनेन लिलेप च ।
चचाम मधु मार्द्वीकं त्वक्त्रं चाचकचे[4] वरम् ॥ ९४ ॥

९४. समिति ॥ आप्तान् हितान् संवर्गयांचकार सम्यग्वर्गीचकार ॥ "तत्करोति—" इति ण्यन्ताल्लिट् ॥ चन्दनेन लिलेप । मृद्वीकाया विकारो मार्द्वीकं मधु द्राक्षामद्यं चचाम पपावित्यर्थः । चमु अदने । वरं श्रेष्ठं त्वचं त्रायत इति त्वक्त्रं कवचं च ॥ "आतोऽनुपसर्गे कः" ॥ आचकचे आबबन्ध । कच बन्धने । कर्त्तरि लिटि तङ् ॥

---

१ परस्वधान् D.
२ बुभुजे ववसे T₂, T₄.
३ संसर्गयांचका° D.
४ त्वक्त्रमाचकचे C.

उष्णीषं मुमुचे चारु रथं च जुजुषे शुभम्[2]।
आललम्बे महास्त्राणि गन्तुं प्रववृते ततः ॥ ९५ ॥

९५. उष्णीषमिति ॥ अथोष्णीषं शिरस्त्राणं व्यामुमोच आमुक्तवान्[1]। शुभं रथं च जुजुषे सिषेवे आरुरोहेत्यर्थः। जुषी प्रीतिसेवनयोः। महास्त्राण्याललम्बे दधारेत्यर्थः। ततो गन्तुं प्रववृते प्रवृत्त इत्यर्थः ॥

आजघ्नुस्तूर्यजातानि तुष्टुवुश्चानुजीविनः।
रजः प्रववृधे[3] घोरं घोषश्च व्यानशे दिशः ॥ ९६ ॥

९६. आजघ्नुरिति ॥ तूर्यजातानि पटहादिवाद्यजातानि आजघ्नुस्ताडयामासुः। अनुजीविनः सेवका बन्द्यादयस्तुष्टुवुरस्तुवंश्च। घोरं भीमं रजो धूलिः प्रववृते प्रवृत्तम्। घोषो दिशो व्यानशे व्याप च ॥ "अश्नोतेश्च" इति नुडागमः ॥

तं यान्तं दुद्रुवुर्गृध्राः क्रव्यादाश्च सिषेविरे।
आववुर्वायवो घोरा खादुल्काश्च प्रचक्षरुः ॥ ९७ ॥

९७. अथ सार्धत्रयेणास्य दुर्निमित्तान्याह। तमित्यादि ॥ यान्तं महारणाय गच्छन्तं प्रहस्तं गृध्रा दुद्रुवुरभिद्रुताः। क्रव्यमदन्तीति क्रव्यादाः शृगालादयः। अदेः "क्रव्ये च" इति विट्प्रत्ययः। ते च सिषेविरे। घोरा भीमा वायव आववुः समन्ताद्वान्ति स्म। खादाकाशादुल्काश्च प्रचक्षरुः प्रपेतुरित्यर्थः। क्षर संचलने ॥

सस्यन्दे शोणितं व्योम रणाङ्गानि प्रजज्वलुः।
रथाः प्रचस्खलुः साश्वा न रेंहाश्वकुञ्जरम्[4] ॥ ९८ ॥

९८. सस्यन्द इति ॥ व्योम आकाशं शोणितं सस्यन्दे प्रसुस्राव ववर्षेत्यर्थः। स्यन्दू प्रस्रवणे। रणाङ्गान्यायुधानि प्रजज्वलुः प्रज्वलितानि।

---

१ व्यामुमोचाथ रथं Com.
२ भृशम् D.
३ प्रववृते Com.
४ नेहांचक्रेऽश्व° T2, T3, T4, Com.

साश्वा रथाः प्रचस्खलुः प्रस्खलिताः । अश्वकुञ्जरं नेहांचक्रे न चेष्टते स्म । ईह चेष्टायाम् ॥ "इजादेश्च गुरुमतोऽनृच्छः" इत्याम्प्रत्ययः ॥

प्रतोदा जगलुर्वाममानर्जुर्यज्ञिया मृगाः ।[1]
ददाल भूः पुपूरे द्यौः कपीनामपि निःस्वनैः ॥ ९९ ॥[2]

९९. प्रेति ॥ प्रतोदाः प्राजनदण्डा जगलुः सारथिहस्तेभ्यो गलिताः । यज्ञिया यज्ञार्हा मृगाः कृष्णसाराः ॥ "यज्ञर्त्विग्भ्यां घखञौ" इति घप्रत्ययः ॥ वाममप्रदक्षिणमानर्जुर्जग्मुः । अर्जे गतौ । लिट् ॥ "अत आदेः" ॥ "तस्मान्नुड् द्विहलः" ॥ भूर्ददाल दलिता । कपीनां निस्वनैः सिंहनादैर्द्यौरपि पुपूरे पूरिता । पूरी आप्यायने । कर्मणि लिट् । स्वोत्साहक्षयवत् परोत्साहवृद्धिरपि स्वस्य दुर्निमित्तमिति भावः ॥

मिमेह रक्तं हस्त्यश्वं राक्षसाश्च नितिष्ठिवुः ।[3]
ततः शुशुभतुः सेने निर्दयं च प्रजह्रतुः ॥ १०० ॥

१००. मिमेहेति ॥ हस्त्यश्वं रक्तं मिमेह मूत्रयामास । मिह सेचने । राक्षसाश्च रक्तं निटिष्ठिवुर्निष्ठयूतवन्तः । ष्ठिवु निरसने ॥ "शर्पूर्वाः खयः" इत्यभ्यासे टकारः शेषः ॥ ततो दुर्निमित्तानन्तरं सेने कपिराक्षससेने शुशुभतुः रेजतुः । निर्दयं यथा तथा प्रजह्रतुर्युयुधाते ॥

दिद्विषुर्दुद्युवुश्चच्छुश्चक्रमुः सुषुपुर्हताः ।[4]
चखादिरे चखादुश्च विलेपुश्च रणे भटाः ॥ १०१ ॥

१०१. दिद्विषुरिति ॥ रणे भटा दिद्विषुर्द्वेषं चक्रुः । दुद्युवुरभिजग्मुः । द्यु अभिगमने । चच्छुश्चिच्छिदुः । छो छेदने । लिट् ॥ "आदेचः—" इत्यात्वे द्विर्भावादिकार्ये "आतो लोपः" ॥ चक्रमुः क्रान्ताः । हताः

१ मानर्जुर्ये° Com.
२ निस्वनैः E_3, D., Com.
३ निटिष्ठिवुः E_3, Com.
T_3, has the following line between the two halves of this verse.
तरूनुन्मूलयांचकुरुच्चखनुर्भूधरान् गुरून् ।
४ दुद्युवुर्दिद्विषु° D.

सुषुपुर्दीर्घे सुप्ताः । ञिष्वप शये । लिटि झेरुसि कित्त्वात्संप्रसारणे द्विर्भावादिकार्यम् । चखादिरे परैः खादिताः । कर्मणि लिट् । चखादुः परानखादंश्च । विलेपुः परिदिदेविरे च ॥ "अत एकहल्—" इत्येत्वम् ॥

प्रहस्तस्य पुरोऽमात्यान् जिहिंसुर्दधृषुस्तथा ।
वानराः कर्म सेनानी रक्षसां चक्षमे न तत् ॥ १०२ ॥

१०२. प्रहस्तस्येति ॥ वानराः प्रहस्तस्य पुरोऽग्रेऽमात्यान् जिहिंसुर्जघ्नुः । हिंसेर्लिटि "झेरुस्" । तथा दधृषुः प्रजगल्भिरे । धृषेरपितो लिटः कित्त्वान्न गुणः । रक्षसां सेनां नयतीति सेनानीः सेनापतिः प्रहस्तः । नयतेः संपदादिना क्विप् । तत्कर्म वानरपौरुषं न चक्षमे न सेहे ॥

ऊर्णुनाव स शस्त्रौघैर्वानराणामनीकिनीम् ।
शशास च बहून् योधान् जीवितेन विवेच च ॥ १०३ ॥

१०३. ऊर्णुनावेति ॥ स प्रहस्तो वानराणामनीकिनीं सेनां शस्त्रौघैः शरजालैरूर्णुनावाच्छादयामास । ऊर्णुञ् आच्छादने । लिट् ॥ "अजादेर्द्वितीयस्य" इति "न न्द्राः संयोगादयः" इति नुशब्दस्य द्विर्भावः । णलि वृद्ध्यावादेशो णुवद्भावात् "इजादेश्च—" इत्याम्प्रत्ययो न भवति । 'वाच्य ऊर्णोर्णुवद्भावो यत्प्रसिद्धिः प्रयोजनम् । आमश्च प्रतिषेधार्थम्' इति वचनात् । बहून् योधान् शशास प्रजहार च । शसु हिंसायाम् । जीवितेन विवेच पृथक्चकार च । प्राणैर्वियोजयामासेत्यर्थः । विचिर् पृथग्भावे ॥

आससञ्ज भयं तेषां दिद्युते च यथा रविः ।
नाययास द्विषद्देहैर्जगाहे च दिशो दश ॥ १०४ ॥

१०४. आससञ्जेति ॥ प्रहस्तस्तेषां कपीनां भयमाससञ्ज आसञ्जितवान् । रविर्यथा रविरिव दिद्युते दिदीपे । द्विषद्देहैर्वानरशरीरैर्दश

१ च T₃.
२ द्विषां देहै॰ C., c., T1.
३ जुगूहे Com.

दिशो जुगूहे संववार । गुहू संवरणे । नाययास आयासं न गत इत्यर्थः । यसु प्रयत्ने ।

केचित्संचुकुटुर्भीता लेजिरेऽन्ये पराजिताः ।
संग्रामाद्बभ्रशुः[1] केचिद्ययाचुश्चापरे भयम् ॥ १०५ ॥

१०५. केचिदिति ॥ केचिद्वानरा भीताः सन्तः संचुकुटुः संचुकुचुरित्यर्थः । कुट कौटिल्ये । अन्ये पराजिता लेजिरे ललज्जिरे । लज्ज व्रीडायाम् । अनुदात्तेत्त्वात्तङ् ॥ "अत एकहल्—" इत्येत्वम् ॥ केचित् समराद् बभ्रंशुर्भ्रष्टाः । अपरेऽभयं ययाचुः । याचिरुभयपदी ॥

एवं[2] विजिग्ये तां सेनां प्रहस्तोऽतिददर्प च ।
शशाम न च संक्रुद्धो निर्जुगोप[3] निशाचरान् ॥ १०६ ॥

१०६. एवमिति ॥ प्रहस्त एवं तां सेनां कपिबलं विजिग्ये जितवान् । लिटि "विपराभ्यां जेः" इति तङ् ॥ "सन्लिटोर्जेः" इति कुत्वम् ॥ "एरनेकाचः—" इति यणादेशः ॥ अतिददर्प च अत्यन्तं विजयदृप्तश्चाभूत् । संक्रुद्धो न शशाम च । न क्रोधाद्विरराम चेत्यर्थः । निशाचरान् निजुगोप नितरां ररक्ष । गुपू रक्षणे । आर्धधातुके विकल्पादायादेशाभावः ॥

चुक्रुधे तत्र नीलेन तरुश्चोच्चिक्षिपे महान् ॥
प्रहस्तोऽभिहतस्तेन बाणान् विससृजे बहून्[4] ॥ १०७ ॥

१०७. चुक्रुध इति ॥ तत्र कपिसेनायां नीलेन कपिना चुक्रुधे क्रुद्धम् । भावे लिट् । महांस्तरुरुच्चिक्षिपे च तस्योपरि उत्क्षिप्तश्च । कर्मणि लिट् । प्रहस्तो वृक्षेणाभिहतः सन् बहून् बाणान् विससृजे नीलस्योपरि मुमुचे । सृजेर्दैवादिकाल्लिटि तङ् ॥

---

१ बभ्रंशुः समरात् केचित् Com.
२ एवं स जिग्ये T_3.
३ निजुगोप T_2, T_4. Com.
४ भृशम् D.

सेहे[1] कपी रथाश्वांश्च रिपोस्ततर्द[2] शाखिना ।
धरित्रीं मुसली[3] तेये प्रहस्तश्चिखिदे न च ॥ १०८ ॥

१०८. सेह इति ॥ कपिर्नीलः सेहे तान् बाणान् सोढवान् । सहेर्भौवादिकात्कर्त्तरि लिट् । तङ् ॥ "अत एकहल्—" इत्येत्वम् ॥ अथ रिपोरश्वान् रथाश्वान् तरुणा वृक्षेण ततर्द हिंसितवान् । उतृदिर् हिंसानादरयोः । ततर्हेति पाठे तृहि हिंसायाम् । ततः प्रहस्तो मुसलमस्यास्तीति मुसली मुसलायुधः सन् धरित्रीं तेये जगाम । पदातिरेव सन् युयुध इत्यर्थः । तय गतौ ॥ "अत एकहल्—" इत्येत्वम् । न चिखिदे च तथापि न खिन्नश्चेत्यर्थः । खिद दैन्ये । तौदादिकाद्रौधादिकाद्वा लिटि तङ् ॥

संदुधुक्षे तयोः कोपः पस्फाये चास्त्रलाघवम्[4] ।
नुनोद शाखिनं नील आवव्रे मुसली[5] तरुम् ॥ १०९ ॥

१०९. समिति ॥ तयोः कपिराक्षसयोः कोपः संदुधुक्षे संदिदीपे । धुक्ष संदीपने । अस्त्रलाघवमस्त्रपाटवं च पस्फाये । स्फायी ओप्यायी वृद्धौ । अथ नीलः शाखिनं वृक्षं नुनोद चिक्षेपेत्यर्थः । णुद प्रेरणे । मुसली मुसलपाणिः प्रहस्तस्तरुमावव्रे वारयामास । वृञ् संवरणे ॥

वियत्यानभ्रतुर्भूमौ[6] मण्डलानि विचेरतुः ।
प्रदुद्रुवतुरन्योन्यं वीरौ शश्रमतुर्न च ॥ ११० ॥

११०. वियतीति ॥ वीरौ तौ नीलप्रहस्तौ वियत्याकाशे आनभ्रतुर्जग्मतुश्चेरतुरित्यर्थः । अभ्र गतौ । द्विर्भावादिकार्ये "अत आदेः" ॥ "तस्मान्नुड् द्विहलः" ॥ आनच्छतुरिति पाठे ऋच्छ गतौ लिट् ॥ "इजादेश्च गुरुमतः—" इत्याम्प्रत्ययो न भवति । "अनृच्छ" इति प्रतिषे-

---

१ सेहे कपी रिपोरश्वांस्तरुणाथ ततर्द च Com.
२ रथानश्वान् T3.
३ मुषली B., C., T1, B., c.
मुशली D.
४ पस्फाये शस्त्र° N., C., T1, B.
५ मुषली C., c., T1, B.
मुशली D.
६ °भ्रतुर्वीरौ T3.

धात् ॥ "ऋच्छत्यॄताम्" इति गुणः ॥ "द्विर्वचनेऽचि" इति स्थानिवद्भावाद् द्विर्वचनम् ॥ "हलादिः शेषः" ॥ "उरत्" ॥ "अत आदेः" इत्यादि । भूमौ मण्डलानि मण्डलाकारविधानि विचेरतुः ॥ "अत एकहल्—" इत्येत्वम् ॥ अन्योन्यं प्रदुद्रुवतुरभिद्रुतावित्यर्थः । द्रु गतौ । लिट्यतुस् ॥ "अचि श्नुधातुभ्रुवाम्—" इत्युवङादेशः ॥ तथापि न शश्रमतुर्न श्रान्तौ च ॥

समीरयांचकाराथ राक्षसस्य कपिः शिलाम् ।
क्षतस्तया ममारासावाशिश्राय च भूतलम् ॥ १११ ॥

१११. समिति ॥ अथ कपिर्नीलो राक्षसस्य शिलां समीरयांचकार । असौ प्रहस्तस्तया शिलया क्षतो ममार मृतः । भूतलमाशिश्राय च भुवि पपातेत्यर्थः ॥

तुतुषुर्वानराः सर्वे नेशुश्चित्रा निशाचराः[1] ।
जेरुराशा दशास्यस्य सैन्यं[2] नीलं नुनाव च ॥ ११२ ॥

११२. तुतुषुरिति ॥ सर्वे वानरास्तुतुषुस्तुष्टाः । चित्राश्चित्रचरित्रा मायाविनः क्षपाचरा राक्षसा नेशुर्नष्टाः । णश अदर्शने ॥ "अत एकहल्—" इत्येत्वम् ॥ दशास्यस्य आशा विजयाशंसा जेरुर्जीर्णाः । जॄष् वयोहानौ । लिटि ॥ "वा जॄभ्रमुत्रसाम्" इत्येत्वाभ्यासलोपौ । सैन्यं वानरसेना नीलं नुनाव तुष्टाव च । णु स्तुतौ । लिटि णलि वृद्ध्यावादेशौ ॥

यदा न फेलुः क्षणदाचराणां
मनोरथा रामबलाभियोगे ।
लङ्कां तदा भेजुरुदीर्णदैन्या
व्याचख्युरुच्चैश्च हतं प्रहस्तम् ॥ ११३ ॥

१ क्षपाचराः T2, Com. | २ सेना T2, T3.

११३. यदेति ॥ यदा रामबलस्याभियोगेऽभियाने सति क्षणदाचराणां मनोरथा न फेलुर्न फलिताः । फल निष्पत्तौ । लिटि झेरुसि "तॄफलभजत्रपश्च" इत्येत्वाभ्यासलोपौ । तदा तस्मिन् काले उदीर्णदैन्या उदितदैन्याः सन्तो लङ्कां भेजुः । पूर्ववदेत्वादि । हतं प्रहस्तमुच्चैराचख्युः रावणाय कथयामासुः । ख्या प्रकथने । झेरुस्यातो लोपः ॥

इति भट्टिकाव्ये तिङ्काण्डे लिड्विलसितो नाम प्रथमः काव्यस्य चतुर्दशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने लिड्विलासो नाम चतुर्दशः सर्गः ॥

॥ श्रीः ॥

अथ पञ्चदशः सर्गः ।

राक्षसेन्द्रस्ततोऽभैषीदैक्षिष्ट परितः पुरम्[1] ।
प्रातिष्ठिपच्च बोधार्थं कुम्भकर्णस्य राक्षसान् ॥ १ ॥

१. अथास्मिन्सर्गे लुङ्विलासमधिकृत्याह । राक्षसेन्द्र इति ॥ ततः प्रहस्तवधानन्तरं राक्षसेन्द्रो रावणोऽभैषीद भीतः । ञिभी भये । लुङि सिचि वृद्धिः ॥ "अस्तिसिचोऽपृक्ते" इतीट् ॥ पुरं लङ्कां परितः सर्वत ऐक्षिष्ट ईक्षितवान् । ईक्ष दर्शने । लुङि तङि सिच् ॥ "आडजादीनाम्" इत्याटो वृद्धिः ॥ कुम्भकर्णस्य बोधार्थं राक्षसान् प्रातिष्ठिपत् प्रस्थापयामास च । प्रपूर्वात्तिष्ठतेर्णौ चङि द्विर्वचनम् ॥ "शर्पूर्वाः खयः" इति चर्त्वम् ॥ सन्वद्भावे "सन्यतः" इत्यभ्यासस्य इत्वम् ॥ "तिष्ठतेरित्" इति धातोरिकारः ॥

तेऽभ्यगुर्[2] भवनं तस्य सुप्तं चैक्षिषताथ तम् ।
व्याहार्षुस्तुमुलान् शब्दान्[3] दण्डैश्चावधिषुर्भृशम्[4] ॥ २ ॥

२. त इति ॥ ते राक्षसास्तस्य कुम्भकर्णस्य भवनमभ्यगुरभिगताः ॥ "इणो गा लुङि" इति गादेशः ॥ "गातिस्था—" इति सिचो लुक् ॥ "उस्यपदान्तात्" इति पररूपत्वम् ॥ अथ सुप्तं तं कुम्भकर्णमैक्षिषताद्राक्षुः । ईक्ष दर्शने । लुङि सिचीडागमः । तुमुलान् संकुलान् शब्दान् व्याहार्षुरूचुः । 'व्याहार उक्तिर्लपितम्' इत्यमरः । भृशं दण्डैरवधिषुरताडयंश्च ॥ "लुङि च" इति हनो वधादेशः ॥ तस्यादन्तत्वादिडागमः । अतो लोपस्य स्थानिवद्भावान्न हलन्तलक्षणा वृद्धिः ॥ "इट ईटि" इति सलोपः ॥

---

१ पुरीम् T3.
२ तेऽभ्यगुः T2.
३ नादान् D.
४ भृशम् T2, T4, Com.

केशानलुञ्चिषुस्तस्य गजान् गात्रेष्वचिक्रमन्[1]।
शीतैरभ्यषिचंस्तोयैरलातैश्चाप्यदम्भिषुः[2] ॥ ३ ॥

३. केशानिति ॥ तस्य कुम्भकर्णस्य केशानलुञ्चिषुरुत्पाटयामासुः। लुञ्चेः सिचीट्। गात्रेष्वङ्गेषु गजान् अचिक्रमन् क्रमयन्ति स्म। क्रमेर्णौ चङि "सन्यतः" इत्यभ्यासस्येत्वे मित्वाद्ध्रस्वः। शीतैस्तोयैरभ्यषिञ्चन् सिषिचुः। षिचिर् क्षरणे॥ "लिपिसिचिह्वश्च" इत्यङ्॥ अलातैरुल्मुकैरदम्भिषुरचालयन्। दम्भु चलने॥

नखैरकर्त्तिषुस्तीक्ष्णैरदाङ्क्षुर्दशनैस्तथा।
शितैरतौत्सुः शूलैश्च भेरीश्चावीवदन्[3] शुभाः[4] ॥ ४ ॥

४. नखैरिति ॥ तीक्ष्णैर्नखैरकर्त्तिषुः कृत्तवन्तः। कृती छेदने। सिचीट्। लघूपधगुणः। तथा दशनैरदाङ्क्षुर्दष्टवन्तः। दंश दशने। सिचि हलन्तलक्षणा वृद्धिः॥ "व्रश्च—" आदिना षत्वम्॥ "षढोः कः सि" इति कत्वम्॥ शितैः शूलैरतौत्सुः। तुद व्यथने। हलन्तलक्षणा वृद्धिः। दृढा भेरीश्च अनीनदन् अनादयन्। अवीवदन्निति पाठे अवादयन्नित्यर्थः। उभयत्रापि णौचङ्युपधाया ह्रस्वः॥

स तान्नाजीगणत्सर्वानिच्छयाबुद्ध च स्वयम्।
अबूबुधत मां[5] कस्मादप्राक्षीच्च[6] निशाचरान्॥ ५ ॥

५. स इति ॥ स कुम्भकर्णः सर्वांस्तान् कलकलकेशलुञ्चनादिबाधान् नाजीगणत् न गणयति स्म। गण संख्याने। णौ चङि "ई च गणः" इत्यभ्यासस्य वैभाषिक ईकारः। किं तु स्वयमेवेच्छया कालप्राप्तया अबुद्ध बुद्धवान्। बुध अवगमने॥ "झलो झलि" इति सलोपः॥ "झषस्तथोर्धोऽधः" इति तकारस्य धत्वम्॥ मां कस्मादबूबुधत बोधित-

१ °ष्वचक्रमन् T_3.
°ष्वबिभ्रमन् c., B., Com., C., T_1, T_4.
२ °भ्यसिचं° c.
३ आनीनदन् Com.
४ दृढाः T_3.
५ कस्मान्मां N., C., T_1, B.
६ °क्षीत् स D.

वन्तः। बुधेर्णौचङ्युपधाया ह्रस्वः॥ "दीर्घो लघोः" इत्यभ्यासदीर्घः॥ "तस्थस्थमिपाम्—" इति थस्य तादेशः॥ इति निशाचरान् अप्राक्षीत्पप्रच्छ। प्रच्छ ज्ञीप्सायाम्। हलन्तलक्षणा वृद्धिः॥ "व्रश्च—" इत्यादिना "षढोः—" इति षत्वकत्वे॥

तेऽभाषिषत राजा त्वां दिदृक्षुः क्षणदाचर।
सोऽस्नासीद्व्यलिपन्मांसमप्सासीद्वारुणीमपात्॥ ६॥

६. त इति॥ ते पृष्टा राक्षसा हे क्षणदाचर कुम्भकर्ण राजा रावणस्त्वां दिदृक्षुर्द्रष्टुमिच्छुरित्यभाषिषत प्रत्यवोचन्। भाषेर्लुङि तङि सिचीट्। स एवमुक्तः कुम्भकर्णोऽस्नासीत् स्नातः। ष्णा शौचे॥ "यमरम—" इति सगिडागमौ॥ वारुणीं सुरामपात् पीतवान् "गातिस्था—" इत्यादिना सिचो लुक्॥

न्यवसिष्ट[1] ततो द्रष्टुं रावणं प्रावृतद् गृहात्।
राजा यान्तं तमद्राक्षीदुदस्थाच्चेषदासनात्॥ ७॥

७. न्यवसिष्टेति॥ न्यवसिष्ट निवसितवान्। वस आच्छादने। लुङि तङि सिचीट्। ततः प्रसादनानन्तरं रावणं द्रष्टुं गृहात् प्रावृतत् प्रवृत्तो निर्गत इत्यर्थः। वृतु वर्त्तने॥ "द्युद्भ्यो लुङि" इति परस्मैपदम्॥ द्युतादित्वादङ्। राजा रावण आयान्तमागच्छन्तं कुम्भकर्णमद्राक्षीत् दृष्टवान्। दृशिर् प्रेक्षणे॥ "इरितो वा" इति विकल्पादङभावपक्षे हलन्तलक्षणा वृद्धिः॥ "सृजिदृशोर्झल्यमकिति" इत्यमागमः॥ "व्रश्च—" आदिना षत्वादिकार्यम्॥ आसनादीषदुदस्थात् उत्थितश्च। ष्ठा गतिनिवृत्तौ॥ "गातिस्था—" इत्यादिना सिचो लुक्॥

अतुषत्पीठमासन्ने निरदिक्षच्च काञ्चनम्।
अस्मेष्ट कुम्भकर्णोऽल्पमुपाविक्षदथान्तिके॥ ८॥

८. अतुषदिति॥ अतुषत् दृष्ट्वा तुष्टः। पुषादित्वादङ्। आसन्नेऽन्तिके काञ्चनं सौवर्णं पीठं निरदिक्षत् निर्दिष्टवांश्च। दिश अतिसर्जने॥ "शल

[1] न्यवसिष्ट C., Es.

इगुपधाद्निटः क्सः" ॥ अथ कुम्भकर्णोऽल्पमस्मेष्ट अत्यादराद्धसन् गाम्भीर्यादत्यल्पं हसितवानिति न धात्वर्थनिर्देशेन पुनरुक्तिः । ष्मिङ् ईषद्धसने । सिचि गुणः । षत्वष्टुत्वे । अन्तिके उपाविक्षत् उपविष्टः न तु काञ्चनपीठे इति भावः । विशेः पूर्ववत् क्सः ॥

अवादीन्मां किमित्याह्वो राज्ञा च प्रत्यवादि सः ।
मा[1]ज्ञासीस्त्वं सुखी रामो यद[2]कार्षीत् स रक्षसाम् ॥ ९ ॥

९. अवादीदिति ॥ मां किमित्याह्व आहूतवानसि ॥ "लिपिसिचिह्वश्च" इत्यङ् ॥ आतो लोपः । इति स कुम्भकर्णोऽवादीदप्राक्षीदित्यर्थः ॥ "वदव्रज—" इति वृद्धिः ॥ राज्ञा प्रत्यवादि प्रत्युक्तश्च । वदेः कर्मणि लुङि चिणि वृद्धिः । सुखी निद्रासुखासक्तस्त्वं रामो रक्षसां यदकार्षीत् । सिचि वृद्धिः । चस्तदर्थः । तन्नाज्ञासीर्न ज्ञातवानसि । जानाते र्लुङ् ॥ "यमरम—"इति सगिटौ ॥

उदतारीदुदन्वन्तं पुरं नः परितोऽरुधत् ।
व्य[3]द्योतिष्ट रणे शस्त्रैरनैषीद्राक्षसान् क्षयम् ॥ १० ॥

१०. रामकृतमेवाह । उदिति ॥ उदन्वन्तमुदधिम् ॥ "उदन्वानुदधौ च" इति निपातनात्साधुः । उदतारीदुत्तीर्णवान् । सिचि वृद्धिः ॥ "इट ईटि" इति सलोपः । नोऽस्माकं पुरं परितोऽरुधत् अरौत्सीत् । रुधिर् आवरणे ॥ "इरितो वा" इति विकल्पादङ् ॥ रणे शस्त्रैर्व्योतिष्ट दिदीपे ॥ "द्युद्भ्यो लुङि" इति विकल्पात्पक्षे तङ् । राक्षसान् क्षयमनैषीत् नीतवान् । नयतेः सिचि वृद्धिः ॥

न प्रा[4]वोचमहं किञ्चित्प्रियं यावदजीविषम् ।
बन्धुस्त्वमर्चि[5]तः स्नेहान्मा द्विषो न वधीर्मम ॥ ११ ॥

---

१ ना° T_3, T_4, Com.
२ यदकार्षीत्तु र° T_2, T_4.
 यदकार्षीच्च T_3, Com.
 यदकार्षीन्निशाचरान् E_3.
३ अद्योतिष्ट D., T_2, T_4, Com.
४ न चावोचमहं T_2.
५ °मर्थितः E_3, T_4, Com.

११. न च साम्ना संधिरित्याह । नेति ॥ अहं यावद्जीविषं जीवितोऽस्मि तावत्तस्यापि किंचित् प्रियं न प्रावोचं नोक्तवानस्मि । तच्च त्वं जानास्येवेति भावः ॥ "वच उम्" इत्युमागमः ॥ किं तु बन्धुस्त्वं स्नेहादर्थितः सन् मम द्विषः शत्रून् न मा वधीः किं तु जहीत्यर्थः । प्रतिषेधद्वयस्य विध्यर्थत्वात् ॥ माङि "लुङि च" इति हनो वधादेशः ॥ "न माङ्योगे" इत्यडभावः ॥

वीर्यं मा न ददर्शस्त्वं मा न त्रास्थाः क्षतां पुरम्[1] ।
तवाद्राक्ष्म[2] वयं वीर्यं त्वमजैषीः पुरा सुरान् ॥ १२ ॥

१२. वीर्यमिति ॥ हे वीर त्वं वीर्यं पराक्रमं न मा ददर्शः किं तु दर्शयेत्यर्थः । दृशेर्णौ चङि सिपि रूपम् । सन्वद्भावात् सनीवकार्यम् । क्षतां वानरोपहतां पुरीं न मा त्रास्थाः किन्तु त्रायस्वेत्यर्थः । त्रैङ् पालने ॥ "आदेचः—" इत्यात्वम् ॥ लुङि थासि च्लेः सिजादेशः । प्रतिषेधद्वयादि पूर्ववद् व्याख्येयम् । न चाशक्तिशङ्का त्वयि कार्येत्याह । वयं तव वीर्यं पराक्रममद्राक्ष्म अपश्यामैवेत्यर्थः ॥ "न दृशः" इति क्सादेशनिषेधः ॥ "इरितो वा" इति विकल्पादङभावपक्षे च्लेः सिचि "सृजिदृशोः—" इत्यमागमे हलन्तलक्षणा वृद्धिः । व्रश्चादिकार्यम् । वीर्यमेवाह । त्वं पुरा सुरान् देवानजैषीः । जेर्लुङि सिचि वृद्धिः ॥

अवोचत्कुम्भकर्णस्तं वयं मन्त्रेऽभ्यधाम यत् ।
न त्वं सर्वं तदश्रौषीः फलं तस्येदमागमत् ॥ १३ ॥

१३. अवोचदिति ॥ अथ कुम्भकर्णस्तं रावणमवोचत् ॥ "वच उम्" ॥ षड्भिस्तदेवाह । वयं मन्त्रे पूर्वं विचारकाले यदभ्यधाम अवोचाम ॥ "गातिस्था—" इत्यादिना सिचो लुक् ॥ त्वं तत्सर्वं नाश्रौषीः किमपि नाश्रौषीरित्यर्थः । श्रु श्रवणे । लुङि सिपि सिचि वृद्धिः । तस्याश्रवणस्येदं त्वदुक्तं फलमागमत् । गमेर्लृदित्वादङ् ॥

---

१ पुरीम् T2, T3, T4, Com. | २ न माद्राक्ष्म T4.

प्राज्ञवाक्यान्यवामंस्था मूर्खवाक्येष्ववास्थिथाः ।
अध्यगीष्ठाश्च शास्त्राणि प्रापत्था हितं न च ॥ १४ ॥

१४. प्राज्ञेति ॥ प्राज्ञानां विभीषणादीनां वाक्यान्यवामंस्थास्तिरश्चकर्थ । मन ज्ञाने । थासि सिच् । मूर्खवाक्येषु प्रहस्तादिप्रलापेषु अवास्थिथा अवस्थितोऽसि ॥ "समवप्रविभ्यः स्थः" इति तङ् ॥ "स्थाघ्वोरिच्च" इतीत्वं सिचः कित्त्वं च ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥ शास्त्राणि चाध्यगीष्ठा अधीतवानसि । इङ् अध्ययने ॥ "विभाषा लुङ्लृङोः" इति गाङादेशः ॥ "घुमास्था—" इत्यादिना ईकारादेशः । हितं न प्रत्यपद्यथाः न प्रतिपन्नोऽसि । निष्फलं ते श्रुतमपीत्यर्थः । पद् गतौ । लुङि थासि "झलो झलि" इति सलोपः ॥ "खरि च" इति चर्त्वम् ॥

मूर्खास्त्वामववञ्चन्त ये विग्रहमचीकरन् ।
अभाणीन्माल्यवान् युक्तमक्षंस्थास्त्वं न तन्मदात् ॥ १५ ॥

१५. मूर्खा इति ॥ मूर्खा मूढास्त्वामववञ्चन्त वञ्चयामासुः । वञ्चु प्रलम्भने ॥ "गृधिवञ्च्योः प्रलम्भने" इति ताङि णौ चङ् । वञ्चनमेवाह । ये मूर्खा विग्रहं विरोधमचीकरन् त्वया अकारयन् । इदमेव वञ्चनमित्यर्थः । करोतेर्णौ चङ् । अभ्यासककारस्य चुत्वम् ॥ "सन्यतः" ॥ "दीर्घो लघोः" ॥ माल्यवान् युक्तमभाणीद् बभाण ॥ "इट ईटि" इति सलोपः ॥ त्वं मदात्तन्मातामहेनोक्तं नाक्षंस्था नासहिष्ठाः । क्षमूष् सहने । ऊदित्वात् "स्वरतिसूति—" इत्यादिना विकल्पादिडभावः ॥

राघवस्यामुषः कान्तामाप्तैरुक्तो न चार्पिपः ।
मा नानुभूः स्वकान् दोषान् मा मुहो मा रुषोऽधुना ॥ १६ ॥

१६. राघवस्येति ॥ राघवस्य कान्ताममुषः खण्डितवानसि । मुष खण्डने । इष्टवियोजनमेव खण्डनम् । दैवादिकः । अस्यैव पुषादित्वादङ् । दिवाद्यन्तर्गणपुषादिरिति काशिका । अतो नात्र मुष स्तेये इति भौवादिकस्य क्र्यादिकस्य वा ग्रहणम् । आप्तैर्मातामहादिभिरुक्तो

नार्पिपः न प्रत्यर्पितवांश्च । अर्त्तेर्णौ चङ् ॥ "अर्त्तिह्री—" इत्यादिना पुगागमे "पुगन्तस्य—" इति गुणः ॥ "द्विर्वचनेऽचि" इति णिलोपस्य स्थानिवद्भावात् "अजादेर्द्वितीयस्य" इति पिशब्दस्य द्विरुक्तिः। स्वकान् दोषान् मा नानुभूः अनुभव । गतमेतत् । अधुना मा मुहः न मुह्य । मा रुषः न रुष्य । किं तु मोहरोषौ विहाय प्राप्तमनुभवेत्यर्थः । मुह वैचित्त्ये । रुष कोपे । माङि लुङि उभयत्र पुषादित्वादङ्॥

तस्याप्यत्यक्रमीत् कालो यत्तदाहमवादिषम् ।
अघानिषत रक्षांसि परैः कोशांस्त्वमव्ययीः ॥ १७ ॥

१७. तस्येति ॥ अहं तव यद्वादिषं रामः संधेय इति तस्य संधेरपि कालोऽत्यक्रमीत् अतिक्रान्तः ॥ "स्नुक्रमोरनात्मनेपदनिमित्ते" इतीट् ॥ "ह्म्यन्त—" इति वृद्धिप्रतिषेधः ॥ "इट ईटि" इति सलोपः ॥ तथा हि रक्षांसि राक्षसाः परैः शत्रुभिरघानिषत हताः ॥ "स्यसिच्सीयुट्—" इत्यादिना हन्तेश्चिण्वदिटि वृद्धिः ॥ "हो हन्तेः—" इति कुत्वम् ॥ कोशं धनं त्वमव्ययीः व्ययमकार्षीः । लङ्कादाहे उपेक्षणात् । व्यय गतौ इति धातुर्भौवादिकः । धातूनामनेकार्थत्वात् व्यय वित्तविसर्गमाचष्टे ॥ "ह्म्यन्त—" इति वृद्धिप्रतिषेधः ॥ "इट ईटि" इति सलोपः ॥ व्यय वित्तसमुत्सर्गे इति चौरादिकात् "आधृषाद्वा" इति विकल्पात् णिजभावपक्षे वा रूपमिति केचित् ॥

संधानकारणं तेजो न्यगभूत्तेऽकृथास्तथा ।
यस्त्वं वैराणि कोशं च सहदण्डमजिग्लपः ॥ १८ ॥

१८. संधानेति ॥ किं च संधाने कारणं कारणभूतं तेजः प्रभावो न्यङ् नीचमभूत् ॥ "गातिस्था—" इत्यादिना सिचो लुक् ॥ तथा अकृथाः न्यग्भूतमकार्षीः ॥ "तनादिभ्यस्तथासोः" इति सिचो लुक् । यस्त्वं वैरेण शत्रुभावेन सहदण्डं ससैन्यं कोशं चाजिग्लपोऽनीनशः । ग्लाय-

१ कोषांस्त्व° C., B., E3.
कोशं त्व° D., Com.
२ न्यगभूदकृथाः T3.
३ वैरेण T2, T3, Com.
४ कोषं C., B., E3.

तेर्णिचि पुगागमे "ग्लास्नावनुवमां च" इति मित्वाद्ध्रस्वत्वम् । ततो लुङि चङि णिलोपः । कोशदण्डक्षयात् क्षीणतेजसस्ते यातव्यपक्षस्य कुतः सन्धानमित्यर्थः ॥

अक्रुधच्चाभ्यधाद्वाक्यं[1] कुम्भकर्णं दशाननः ।
किं त्वं मामजुगुप्सिष्ठा नैदिधः स्वंपराक्रमम्[2] ॥ १९ ॥

१९. अक्रुधदिति ॥ अथ दशाननः कुम्भकर्णमक्रुधत् क्रुद्धवान् । क्रुध क्रोधे । पुषादित्वादङ् । अत्र कोपस्य नात्यन्तिकत्वात् भार्यां क्रुध्यतीतिवत् कर्मत्वमेव न संप्रदानत्वम् । यं प्रति कोप इति विशेषणादिति । अभ्यधादवादीच्च ॥ "गातिस्था—" इत्यादिना सिचो लुक् ॥ तदेवाह । त्वं मां किमर्थं अजुगुप्सिष्ठा अगर्हिष्ठाः । गुपेः सन्नन्ताल्लुङि थासि सिचीट् । पराक्रमं किमर्थं त्वं नैदिधः नैधितवान् । एध वृद्धौ । णौ चङि णिलोपस्य स्थानिवत्त्वात् "अजादेर्द्वितीयस्य" इति धिशब्दस्य द्वित्वम् ॥

मोज्जिग्रहः[3] सुनीतानि मा स्म क्रंस्था न संयुगे ।
मोपालब्धाः[4] कृतैर्दोषैर्मा न वाक्षीर्हितं भरम्[5] ॥ २० ॥

२०. मेति ॥ सुनीतानि सुनीतीर्मा जिग्रहः मा ग्राहय नोपदिशेत्यर्थः । ग्रहेर्णौ चङ् । संयुगे युद्धे न मा क्रंस्थाः किन्तु क्रमस्व उत्साहयस्वेत्यर्थः ॥ "वृत्तिसर्गतायनेषु क्रमः" इति क्रमेर्लुङि सर्गे तङ् । सर्ग उत्साहः । माङ्योगादि पूर्ववत् । कृतैर्दोषैरपराधैर्मोपालब्धाः नोपालभस्व । लभेर्लुङि थासि "झलो झलि" इति सलोपः ॥ "झषस्तथोः—" इति धत्वम् ॥ हितं पथ्यं भरं कार्यभारं मा न वाक्षीर्मा न वह । वहेत्यर्थः । वह प्रापणे । हलन्तलक्षणा वृद्धिः । गतमन्यत् ॥

कुम्भकर्णस्ततोऽगर्जीद्दूटांश्चान्यान् न्यवीवृतत् ।
उपायंस्त महास्त्राणि निरगाच्च द्रुतं पुरः ॥ २१ ॥

---

१ अक्रुधत्सोऽभ्यधाचाथ D.
२ स्वं पराक्रमम् B.
३ मा जिग्रहः D., Com.
४ मोपलब्धाः B., C., T1, T2.
५ भरम् D., Com.
६ परम् T2.

२१. कुम्भेति ॥ ततो रावणक्रोधोक्त्यनन्तरं कुम्भकर्णोऽगर्जीत् स्वामिचित्तानुसाराद्योद्धुं निश्चित्य जगर्जेत्यर्थः । अन्यान् भटान् न्यवीवृतत् एकवीरत्वाभिमानात् निवर्त्तितवानित्यर्थः । वृतु वर्त्तने । णौ चङि "उर्ऋत्"इत्युपधाऋकारस्य विकल्पेन ऋकारः ॥ "उरत्" इत्यभ्यासऋकारस्य अकारः । ततः सन्वत्कार्यम् । महास्त्राण्युपायंस्त जग्राह । उपशब्दः पादपूरणार्थः । आङ्पूर्वाद्यमेर्लुङि "समुदाङ्भ्यो यमोऽग्रन्थे" इति तङ् । द्रुतं पुरः पुरान्निरगाच्च ॥

मूर्ध्ना दिवमिवालेखीत् खं व्यापद्वपुषोरुणा ।
पादाभ्यां क्ष्मामिवाभैत्सीत् दृष्ट्याधाक्षीदिव द्विषः ॥२२॥

२२. मूर्ध्नेति ॥ पुरान्निर्गच्छन् स कुम्भकर्णो मूर्ध्ना दिवमलेखीदिव अस्प्राक्षीदिव । अभ्रङ्कषमूर्धेत्यर्थः ॥ "इट ईटि" इति सलोपः ॥ उरुणा महता वपुषा खमाकाशं व्यापत् व्याप्तवान् ॥ आपेर्लुङि लृदित्वादङ् । पादाभ्यां क्ष्मां भूमिमभैत्सीदिव व्यदारयदिव । भिदिर् विदारणे । सिचि वृद्धिः । दृष्ट्या द्विषः शत्रूनधाक्षीदिव ददाहेव । दह भस्मीकरणे । सिचि हलन्तलक्षणा वृद्धिः । अनिट्त्वात् न "ह्म्यन्त—" इति निषेधः । भष्भावादिकार्यम् ॥

दग्धशैल इवाभासीत् प्राक्रंस्त क्षयमेघवत् ।
मोचकम्पदुदन्वन्तं राक्षसानप्यतित्रसत् ॥ २३ ॥

२३. दग्धेति ॥ महत्त्वात् कृष्णवर्णत्वाच्च दग्धशैल इवाभासीत् बभौ । भा दीप्तौ ॥ "यमरमनम—" इति सगिटौ ॥ क्षयमेघवत् कल्पान्तमेघेन तुल्यं प्राक्रंस्त गन्तुं प्रक्रान्त इत्यर्थः ॥ "प्रोपाभ्यां समर्थाभ्याम्" इति क्रमेर्लुङि तङि सिचि "स्नुक्रमोरनात्मनेपदनिमित्ते" इति निषेधान्नेडागमः ॥ उदन्वन्तमुदधिम् ॥ "उदन्वानुदधौ च" इति निपातः ॥ अचकम्पत् पादन्यासभरात् कम्पयामास । कपि चलने । णौ चङ् ।

१ शैलवद्° T₂, T₃, T₄.

१ अचकम्प° D., Com. आचकम्प° T₂.

राक्षसानपि किमुत कपीनिति भावः । अतित्रसत् त्रासयामास । त्रसेर्णौ चङ्युपधाया ह्रस्वः ॥

सपक्षोऽद्रिरिवाचालीन्न्यश्वसीत् कल्पवायुवत् ।
अभार्षीद् ध्वनिना लोकानभ्राजिष्ट क्षयाग्निवत् ॥ २४ ॥

२४. सपक्ष इति ॥ सपक्षो बाहुधूननात् पक्षवानद्रिरिव अचालीत् चलितः ॥ "अतो ल्रान्तस्य" इति वृद्धिः ॥ कल्पवायुवत् न्यश्वसीत् । तत्तुल्योऽस्य निश्वास इत्यर्थः ॥ "ह्मयन्त—" इति वृद्धिप्रतिषेधः ॥ ध्वनिना सिंहनादेन लोकानभार्षीद् भृतवान् । पूरितवानित्यर्थः । भृञ् भरणे । सिचि वृद्धिः । क्षयाग्निवत् कल्पान्तवह्निवत् अभ्राजिष्ट । लोहिताशिरोरुहत्वात् तद्वद्दीपिष्टेत्यर्थः ॥ भ्राजृ दीप्तौ । लुङि सिचीट् ॥

अनंसीद्भूर्भरेणास्य रंहसा शाखिनोऽलुठन् ।
सिंहाः प्रादुद्रुवन् भीताः प्राक्षुभन् कुलपर्वताः ॥ २५ ॥

२५. अनंसीदिति ॥ अस्य रक्षसो भरेण देहगौरवेण भूरनंसीत् ननाम ॥ "यमरमनम—" इति सगिटौ ॥ रंहसा वेगेन शाखिनो वृक्षा अलुठन् पतित्वा लुठिताः । लुठ प्रतिघाते । द्युतादित्वादङ् ॥ "द्युद्भ्यो लुङि" इति पक्षे परस्मैपदम् ॥ सिंहा भीताः प्रादुद्रुवन् प्रद्रुताः । द्रु गतौ ॥ "णिश्रि—" इत्यादिना चङ् ॥ उवङादेशः । कुलपर्वताः प्राक्षुभन् प्रक्षुभिताश्चलिता इत्यर्थः । क्षुभ संचलने । द्युतादित्वादङ् परस्मैपदं च पूर्ववत् ॥

उत्पाताः प्रावृतंस्तस्य द्यौरशीकिष्ट शोणितम् ।
वायवोऽवासिषुर्भीमाः क्रूराश्चाकुषत द्विजाः ॥ २६ ॥

२६. उत्पाता इति ॥ तस्य गच्छतोऽग्रे उत्पाता दुर्निमित्तानि प्रावृतन् प्रावर्त्तिषत । वृतु वर्त्तने । द्युतादित्वादङ् वा परस्मैपदं च । तानेवाह ॥

---

१ सपक्षाद्रि° T₂,
2nd half omitted in T₂.

१ Not found in T₂.
२ °श्चारुरुषन् द्विजाः D.

घोराकाशः शोणितमशीकिष्ट असिचत् ववर्षेत्यर्थः । शीकृ सेचने । लुङि तङि सिचीट् । भीमा वायवोऽवासिषुः वान्ति स्म । वा गतिगन्धनयोः ॥ "यमरम—" इति सगिटौ ॥ क्रूरा द्विजाः पक्षिणश्चोलूकादयोऽकुषत शब्दायन्ते स्म । कुङ् शब्दे । भौवादिकोऽनिट् । लुङि तङि कुटादित्वेन सिचः कित्वान्न गुणः ॥

अस्पन्दिष्टाक्षि[1] वामं च घोराश्चाराटिषुः शिवाः[2] ।
न्यपप्तन् मुसले[3] गृध्रा दीप्तयापाति चोल्कया ॥ २७ ॥

२७. अस्पन्दिष्टेति ॥ किं चास्य वाममक्षि चास्पन्दिष्टास्फुरत् । घोराः शिवाः क्रोष्टारश्च अराटिषुरराविषुः । रट शब्दे ॥ "अतो हलादेः" इति पक्षे वृद्धिः ॥ मुसले मुसलायुधे गृध्रा न्यपप्तन् निपतिताः । पत्लृ गतौ । लृदित्वादङ् ॥ "पतः पुम्" इति पुमागमः ॥ दीप्तया ज्वलितया चोल्कया अपाति । भावे लुङ् ॥

आंहिष्ट तानसंमान्य दर्पात्स प्रधनक्षितिम् ।
ततोऽनर्दीदनन्दीच्च शत्रूनाह्वास्त चाहवे ॥ २८ ॥

२८. आंहिष्टेति ॥ स कुम्भकर्णो दर्पात्तानुत्पातानसंमान्यानादृत्य प्रधनक्षितिं युद्धभूमिम् । 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्' इत्यमरः । आंहिष्टागमत् । अहि गतौ । सिचीट् । इदित्वान्नुम् । अजादित्वादाड्वृद्धिः । ततोऽनर्दीत् ननर्द । नर्द कुत्सिते शब्दे ॥ "इट ईटि" इति सलोपः ॥ अनन्दीत् ननन्द च । नदि समृद्धौ । पूर्ववत् सलोपः । नुमागमश्च । आहवे रणे निमित्ते शत्रूनाह्वास्त सस्पर्धमाहूतवांश्च । ह्वयतेः "स्पर्धायामाङः" इति तङ् ॥ "लिपिसिचिह्वश्च" ॥ "आत्मनेपदेष्वन्यतरस्याम्" इत्यङभावपक्षे सिच् ॥

माशीश्च चातृपत् क्रूरः क्षुच्चास्यावृधदश्नतः ।
अघाद्वसामधासीच्च रुधिरं वनवासिनाम् ॥ २९ ॥

---

१ अस्पन्दिष्ट च वामाक्षि T₂.
२ शिवा घोरा अराटिषुः T₂.
३ मुशले D. मुषले C., E₂.

२९. प्राशीदिति ॥ क्रूरो हिंस्रः स राक्षसः प्राशीदशितवान् कपिमांसमिति शेषः। अश भोजने ॥ "इट ईटि" इति सलोपः। आड्वृद्धिः। नातृपन्न तृतश्च। तृप प्रीणने। पुषादित्वादङ्। अश्नतो भुञ्जानस्यास्य क्षुदवृधत् अवर्धिष्ट। वृधु वर्धने। द्युतादित्वादङ् ॥ "द्युद्भ्यो लुङि" इति परस्मैपदम् ॥ वनवासिनां कपीनां वसां हृन्मेदः। 'हृन्मेदस्तु वसा' इत्यमरः। अधात् अपात्। धेट् पाने ॥ "विभाषा धेट्श्व्योः" इति चङभावपक्षे "विभाषा घ्राधेट्शाच्छासः" इति पक्षे सिचो लुक् ॥ रुधिरं चाधासीत्। लुक्चङोरभावे "यमरमनम—" इति सगिटोः "इट ईटि" इति सलोपः। चङ्पक्षे द्विर्भावे आतो लोपे च अदधत्। 'एवं च लुङि सिज्लोपचङ्विकल्पविधानतः। अधादधासीददधदिति धेटस्त्रिरूपता' ॥

मांसेनास्याश्वतां कुक्षी जठरं चाप्यशिश्वियत्।
बहूनामग्लुचत् प्राणानग्लोचीच्च[1] रणे यशः ॥ ३० ॥

३०. मांसेनेति ॥ अस्य कुम्भकर्णस्य कुक्षी जठरपार्श्वे मांसेन कपिमांसेनाश्वतां शूनौ। ओश्वि गतिवृद्ध्योः। लुङि तसस्तामादेशः ॥ "श्वयतेरः" इत्यत्वे पररूपत्वम्। जठरमुदरं चापि अशिश्वियदुच्छूनम् ॥ "विभाषा धेट्श्व्योः" इति चङि द्विर्वचनमियङादेशश्च। रणे बहूनां द्विषां प्राणानग्लुचदपाहरत्। ग्लुचु स्तेयकरणे ॥ "जृस्तम्भु—" इत्यादिना विकल्पाच्लेरङादेशः। किं च तेषां यशश्च अग्लोचीत्। अङभावपक्षे सिचि "इट ईटि" इति सलोपः ॥

सामर्थ्यं चापि[2] सोऽस्तम्भीद्विक्रमं[3] चास्य[4] नास्तभन्।
शाखिनः केचिदध्यष्ठुर्न्यमाङ्क्षुरपरेऽम्बुधौ ॥ ३१ ॥

३१. सामर्थ्यमिति ॥ स कुम्भकर्णः सामर्थ्यं कपीनां प्रभावं चास्तम्भीत् स्तम्भितवान्। स्तम्भेरङभावपक्षे सिचि "इट ईटि" इति

१ अम्लोचीच T₄.
२ चास्य T₃.
३ विक्रमश्चास्य नास्तभत् T₃.
४ तस्य Com.

सलोपः । ते तस्य विक्रमं नास्तभन् स्तम्भितुं न शेकुरित्यर्थः ॥ "जृस्तम्भु—" इति च्लेरङादेशः ॥ अङो ङित्वादनुनासिकलोपः । किं तु केचित् कपयः शाखिनो वृक्षान् अध्यष्ठुरधिष्ठितवन्तः । तिष्ठतेर्लुङि झेरुसि "गातिस्था—" इत्यादिना सिचो लुक् ॥ "उस्यपदान्तात्" इति पररूपत्वम् ॥ "अड्भ्यासव्यवायेऽपि" इति षत्वे ष्टुत्वम् ॥ "अधिशीङ्स्थासां कर्म" ॥ अपरेऽम्बुधौ न्यमाङ्क्षुर्निमग्नाः । टुमस्जो शुद्धौ । लुङि सिचि "मस्जिनशोर्झलि" इति मस्जेरन्त्यात्पूर्वो नुमागमः ॥ "स्कोः—" इति सकारलोपः ॥ हलन्तलक्षणा वृद्धिः । कुत्वषत्वादि ॥

अन्ये[1] त्वलङ्घिषुः शैलान् गुहास्वन्ये न्यलेषत ।
केचिदासिषत स्तब्धा भयात्केचिदघूर्णिषुः ॥ ३२ ॥

३२. अन्य इति ॥ किं चेति चार्थः । अन्ये वानराः शैलानलङ्घिषुरारूढा इत्यर्थः । लघेर्गत्यर्थाल्लुङि सिचि "नेटि" इति वृद्धिप्रतिषेधः । इदित्वान्नुम् । अन्ये गुहासु न्यलेषत निलीनाः । लीङ् श्लेषणे । लुङि तङि सिचि गुणः । केचिद् भयात् स्तब्धा निश्चला आसिषत पाषाणवत् स्थिता इत्यर्थः । केचिद् भयादाघूर्णिषुर्भ्रान्ताः । घूर्ण भ्रमणे ॥

उदतारिषुरम्भोधिं वानराः सेतुनापरे ।
अलज्जिष्टाङ्गदस्तत्र प्रत्यवास्थित चोर्जितम् ॥ ३३ ॥

३३. उदिति ॥ अपरे वानराः सेतुना सेतुमार्गेणाम्भोधिमुदतारिषुरुत्तीर्णाः । तरतेः सिचि वृद्धिः । तत्र तेषां मध्येऽङ्गदोऽलज्जिष्ट हा कष्टं पलायन्त इति लज्जितवान् । अथोर्जितं प्रगल्भं यथा तथा प्रत्यवास्थित प्रातिपक्ष्येण स्थितश्चेत्यर्थः । तिष्ठतेर्लुङि "समवप्रविभ्यः स्थः" इति तङ् ॥ "स्थाघ्वोरिच्च" इतीत्त्वं कित्त्वं च । कित्त्वान्न गुणः ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥

---

१ अन्ये चा° T_3, T_4, Com., T_3.

सत्वं समदुधुक्षच्च वानराणामयुद्ध च ।
ततः शैलानुदक्षैप्सुरुदगूरिषत द्रुमान् ॥ ३४ ॥

३४. सत्वमिति ॥ वानराणां सत्वं बलं समदुधुक्षत्संधुक्षितवांश्च । धुक्ष संदीपने । णौ चङ् । स्वयमयुद्ध च युद्धं कृतवांश्च । युध संप्रहारे । लुङि तङ् ॥ "झलो झलि" इति सलोपः ॥ "झषस्तथोः—" इति धत्वम् ॥ ततो वानराः शैलानुदक्षैप्सुरुत्क्षिप्तवन्तः । क्षिप प्रेरणे । हलन्तलक्षणा वृद्धिः । द्रुमानुदगूरिषत उद्गूर्णवन्तः । गूरी उद्यमने । सिचीट् ॥

अनर्दिषुः कपिव्याघ्राः सम्यक् चायुत्सताहवे ।
तानमर्दीदखादीच्च निरास्थच्च तलाहतान् ॥ ३५ ॥

३५. अनर्दिषुरिति ॥ अथ कपिव्याघ्राः कपिश्रेष्ठाः । उपमितसमासः । अनर्दिषुः अगर्जिषुः । नर्द कुत्सिते शब्दे । सिचीट् ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ आहवे सम्यगयुत्सत युद्धं कृतवन्तश्च । युध संप्रहारे । लुङि तङि सिच् ॥ "लिङ्सिचावात्मनेपदेषु" इति सिचः कित्त्वात् न लघूपधगुणः । अथ कुम्भकर्णस्तान् कपीनमर्दीत् ममर्द । मृद क्षोदे । क्रैयादिः ॥ "इट ईटि" इति सलोपः ॥ अखादीदभक्षयच्च । खाद्द भक्षणे । पूर्ववत् सलोपः । तलैराहतान्निरास्थत् निरस्तवांश्च । असु क्षेपणे ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ "अस्यतेस्थुक्" ॥ भाद्वृद्धिः ॥

प्राचुचूर्णच्च पादाभ्यामबिभीषत च द्रुतम्[1] ।
अतर्दीच्चैव[2] शूलेन कुम्भकर्णः प्लवङ्गमान् ॥ ३६ ॥

३६. प्रेति ॥ कुम्भकर्णः प्लवङ्गमान् पादाभ्यां प्राचुचूर्णत् प्रकर्षेण चूर्णितवान् । चूर्णयतेः "सत्यापपाश—" इति ण्यन्तात् लुङि चङि द्विर्भावेऽभ्यासह्रस्वः । द्रुतमबिभीषत च भीषितवांश्च । ञिभी भये ।

१ Omitted in T_3.

२ अतर्हीच्चैव D., Com. omitted in T_2.

ण्यन्ताल्लुङि "भीस्म्योर्हेतुभये" इति तङि "भियो हेतुभये षुक्"। चङि द्विर्भावेऽभ्यासह्रस्वः । शूलेन शूलायुधेन अतर्हीत् अहिंसीदेव च। तृहु हिंसायाम् ॥ "ह्म्यन्त—" इति वृद्धिप्रतिषेधः ॥

अतौत्सीद्[1]दया गाढमपिषच्चोपगूहनैः ।
जानुभ्यामदमी[2]च्चान्यान् हस्तवर्त्तमवीवृतत् ॥ ३७ ॥

३७. अतौत्सीदिति ॥ कांश्चिद्दया अतौत्सीत् तुतोद । तुद व्यथने। हलन्तलक्षणा वृद्धिः । कांश्चिद् गाढं यथा तथा उपगूहनैराश्लेषणैरपिषच्च। पिष्लृ संचूर्णने। लृदित्वादङ् । कांश्चिज्जानुभ्यामदमत् जानुभ्यामवष्टभ्याहतवानित्यर्थः। दमु उपशमे । दैवादिकः। पुषादित्वादङ्। कैश्चिददमीदिति पठित्वा "ह्म्यन्त—" इति वृद्धिप्रतिषेध इति व्याख्यातम् । अन्यान् हस्तेन वर्त्तयित्वा हस्तवर्त्तम् । वृतेर्ण्यन्तात् "हस्ते वर्त्तिग्रहोः" इति णमुल्। अवीवृतत् वर्त्तयति स्म हस्ते कृत्वा अपिषदित्यर्थः। वृतु वर्त्तने। णौ चङ्। "उ ऋत्" इत्युपधाऋकारस्य विकल्पेन ऋकारः॥ "उरत्" इत्यभ्यासऋकारस्याकारे सन्वत्कार्यम्॥

अदालिषुः शिला देहे चूर्ण्यभूवन् महाद्रुमाः ।
क्षिप्तां[3]स्तस्य न चाचेतीत्तानसौ नापि चाक्षुभत् ॥ ३८ ॥

३८. अदालिषुरिति ॥ तस्य कुम्भकर्णस्य देहे वानरैः क्षिप्ताः शिला अदालिषुर्दीर्णाः। दल विशरणे। भौवादिकः॥ "अतो ल्रान्तस्य" इति वृद्धिः॥ महाद्रुमाश्चूर्ण्यभूवन् चूर्णीभूताः। अभूततद्भावे च्विः॥ असौ कुम्भकर्णस्तान् द्रुमान् नाचेतीत् नाज्ञासीच्च । चिती संज्ञाने। भौवादिकः॥ "नेटि" इति वृद्धिप्रतिषेधः॥ नाक्षुभत् नाचालीत्। क्षुभ्यतेः पुषादित्वादङ्॥

अद्राष्टां[4] तं रघुव्याघ्रौ आख्यच्चैनं[5] विभीषणः ।
एष व्यजेष्ट देवेन्द्रं नाशङ्किष्ट विवस्वतः ॥ ३९ ॥

---

१ अक्षौत्सीद्र° C.
२ °मदमच्चा° Com.
३ क्षिप्तानसौ च नाचेतीत् T₄.
४ तमद्राष्टां T₂.
५ व्याख्यच्चैनं Com.

३९. अद्राष्टामिति ॥ रघुव्याघ्रौ रामलक्ष्मणौ तं कुम्भकर्णमद्राष्टां दृष्टवन्तौ । दृशिर् प्रेक्षणे । लुङि "इरितो वा" इत्यङभावपक्षे "न दृशः" इति क्सप्रतिषेधे "सृजिदृशोः—" इत्यमागमे हलन्तलक्षणा वृद्धिः ॥ "व्रश्च—" इत्यादिना षत्वे ष्टुत्वम् ॥ एनं विभीषणो व्याख्यत् कुम्भकर्णोऽयमित्याचष्टेत्यर्थः । ख्या प्रकथने ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ आल्लोपः । एष देवेन्द्रं व्यजेष्ट विजितवान् ॥ "विपराभ्यां जेः" इति तङ् ॥ सिचि गुणे षत्वष्टुत्वे । विवस्वतः सूर्यान्नाशङ्किष्ट नाभैषीदित्यर्थः ॥

यक्षेन्द्रशक्तिमच्छासीन्नाप्रोथीदस्य कश्चन[1] ।
कुम्भकर्णान्न[2] भैष्टं[3] मा युवामस्मान्नृपात्मजौ ॥ ४० ॥

४०. यक्षेति ॥ एष यक्षेन्द्रस्य कुबेरस्य शक्तिं शक्त्यायुधमच्छासीदच्छैत्सीत् । छो छेदने ॥ "आदेच—" इत्यात्वे सगिटौ । अस्य कश्चन नाप्रोथीत् न पर्याप्तः । संबन्धसामान्ये षष्ठी । प्रोथृ पर्याप्तौ ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ हे नृपात्मजौ युवामस्मात्कुम्भकर्णाद् मा भैष्टं मा बिभीतं च । ञिभी भये । सिचि वृद्धिः ॥

घ्नन्तं मोपेक्षिषाथां च मा न कार्ष्टमिहादरम् ।
अमुं मा न वधिष्टेति रामोऽवादीत्ततः कपीन् ॥ ४१ ॥

४१. घ्नन्तमिति ॥ किं च घ्नन्तमेनं मोपेक्षिषाथामुपेक्षां न कुरुतामित्यर्थः। इह अस्मिन् कुम्भकर्णे आदरं मा न कार्ष्टं किं तु कुरुतम् । ततो विभीषणवाक्यानन्तरं रामोऽमुं राक्षसं मा न वधिष्ट किं तु हत ॥ "लुङि च" इति हनो वधादेशः ॥ इति कपीनवादीत् ॥

ते[4] व्यैरासिषुराहन्त राक्षसं चाप्यपिप्लवन् ।
व्यवभासन्[5] स्वकाः शक्तीर्द्रुमशैलं व्यकारिषुः ॥ ४२ ॥

---

१ माच्छासी° C., E_2.
२ कुम्भकर्णाच्च Com.
३ मा भैष्ट D., T_2, T_3.
४ तेऽप्यरासिषु° T_2.
५ न्यवभासन् Com.

४२. त इति ॥ ते कपयो व्यरासिषुरनादिषुः । राक्षसमाह्वन्त सस्पर्धमाहूतवन्तः ॥ "स्पर्धायामाङः" इति तङ् ॥ "लिपिसिचिह्वश्च" ॥ "आत्मनेपदेष्वन्यतरस्याम्" इत्यङ् ॥ अपिप्लवन् वानराब्धौ प्लवनं चाप्यकारयन् । प्लुवतेर्णौ चङि सन्वत्कार्ये "स्रवतिशृणोति—" इत्यादिना विकल्पादभ्यासस्येत्वम् । स्वकाः शक्तीः स्वसामर्थ्यानि व्यबभासन् अभासयन् प्रकाशयन्ति स्मेत्यर्थः । भासेर्णौ चङि "भ्राजभास—" आदिना विकल्पात् उपधाह्रस्वाभावः । द्रुमांश्च शैलांश्च द्रुमशैलम् ॥ "जातिरप्राणिनाम्" इति द्वन्द्वैकवद्भावः ॥ व्यकारिषुर्विचिक्षिपुः । कॄ विक्षेपे । सिचि वृद्धिः ॥

ते तं व्याशिषताक्षौत्सुः पादैर्दन्तैस्तथाच्छिदन् ।
आर्जिजत् शरभो वृक्षं नीलस्त्वादित पर्वतम् ॥ ४३ ॥

४३. त इति ॥ ते वानरास्तं कुम्भकर्णं व्याशिषत व्यापुः । अशू व्याप्तौ । सिचीट् । आड्वृद्धिः । पादैरक्षौत्सुरपिषन् । क्षुदिर् संपेषणे । हलन्तलक्षणा वृद्धिः । तथा दन्तैरच्छिदन् चिच्छिदुः । छिदिर् द्वैधीकरणे ॥ "इरितो वा" इत्यङ् ॥ शरभो नाम वानरो वृक्षमार्जिजत् अर्जितवान् गृहीतवान् । अर्ज प्रतियत्ने । स्वार्थण्यन्ताच्चङ् । रेफवर्जितस्य जिशब्दस्य द्विर्वचने सन्वत्कार्यम् । नीलश्च पर्वतमादित आत्तवान् । डुदाञ् दाने ॥ "स्थाघ्वोरिच्च" इतीत्त्वं कित्त्वं च ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥

ऋषभोऽद्रीनुदक्षैप्सीत्तैरैररिमतर्दिषुः[1] ।
अस्फूर्जीद्[2] द्रिरिशृङ्गं[3] च व्यस्राक्षीद्[4] गन्धमादनः ॥ ४४ ॥

४४. ऋषभ इति ॥ ऋषभोऽद्रिमुदक्षैप्सीदुत्क्षिप्तवान् । क्षिप प्रेरणे । सिचि हलन्तलक्षणा वृद्धिः । ते वानरास्तैरद्र्यादिभिररिं कुम्भकर्णम-

१ तैस्तैरमुमत° T4.
शरैररिमत° T2.
२ प्रास्फूर्जी° D.
३ गिरिशृङ्गाणि T2.
४ व्यास्राक्षीत् T2.

तर्दिषुर्जिहिंसुः। तर्द हिंसायाम्। गन्धमादनोऽस्फूर्जीद्वज्रवज्जुघोष ॥ "इट ईटि" इति सलोपः ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ गिरिशृङ्गं च व्यस्राक्षीद्विससर्ज ॥ "सृजिदृशोः—" इत्यमागमे हलन्तलक्षणा वृद्धिः॥ "व्रश्च—" इत्यादिना षत्वे कत्वषत्वे ॥

अकूर्दिष्ट व्यकारीच्च[1] गवाक्षो भूधरान् बहून्।
स[2] तान्नाजीगणद्वीरः[3] कुम्भकर्णोऽव्यथिष्ट न ॥ ४५ ॥

४५. अकूर्दिष्टेति ॥ गवाक्षो नाम कपिः अकूर्दिष्ट रणे चिक्रीड। कुर्द खुर्द क्रीडायाम्। बहून् भूधरान् व्यकारीत् विक्षिप्तवान्। कॄ विक्षेपे। सिचि वृद्धिः ॥ "इट ईटि" इति सलोपः ॥ वीरः कुम्भकर्णस्तान् भूधरान् नाजीगणत्। गण संख्याने। णौ चङ् ॥ "ई च गणः" इत्यभ्यासस्य विभाषा ईकारः ॥ नाव्यथिष्ट न चचाल। व्यथ भयचलनयोः ॥

अमन्थीच्च परानीकमप्लोष्ट च निरङ्कुशः।
निहन्तुं चात्वरिष्टारीनजक्षीच्चाङ्कमागतान् ॥ ४६ ॥

४६. अमन्थीदिति ॥ परानीकममन्थीत् विलोडितवांश्च। मन्थ विलोडने। क्रैयादिकः ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ निरङ्कुशोऽप्रतिघातः सन् अप्लोष्ट चचार। प्लुङ् गतौ। लुङि तङि सिचि गुणः। अरीन् निहन्तुमत्वरिष्ट संभ्रान्तवान्। ञित्वरा संभ्रमे। अङ्के समीपमागतानजक्षीद् भक्षितवांश्च। जक्ष भक्षहसनयोः ॥ "नेटि" इति वृद्धिप्रतिषेधः॥

व्यक्रुक्षद्वानरानीकं[4] संपलायिष्ट चायति।
हस्ताभ्यां नश्यदक्राक्षीद्भीमे चोपाधितानने ॥ ४७ ॥

४७. व्याक्रुक्षदिति ॥ तस्मिन् कुम्भकर्णे आयति आगच्छति सति। इणो लटः शत्रादेशः ॥ वानरानीकं कर्तृ व्याक्रुक्षत् व्याचुक्रोश। क्रुश

---

१ व्यकार्षीच्च T4.
२ न तानजीगणद्वीरः T3, T4.
३ °द्धीरः D.
४ व्याक्रुक्षद्वा° Com.

आह्वाने रोदने च ॥ "शल इगुपधादनिटः क्सः" ॥ संपलायिष्ट पलायितं च ॥ "उपसर्गस्यायतौ" इति रेफस्य लत्वम्। नश्यत् पलायमानं तद्वानरानीकं कर्म हस्ताभ्यामकाक्षीदाकृष्टवान् ॥ कृष विलेखने। सिच् ॥ "अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" इत्यमागमे हलन्तलक्षणा वृद्धिः। कत्वादिकार्यम्। ओमे आनने उपाधित उपहितवांश्च। डुधाञ् ॥ "स्थाघ्वोरिच्च" इत्यादि गतम् ॥

रक्तेनाचिक्लिदद्भूमिं[1] सैन्यैश्चातस्तरद्धतैः।

नातार्प्सीद्भक्षयन् क्रूरो नाश्रमद् घ्नन् प्लवङ्गमान् ॥ ४८ ॥

४८. रक्तेनेति ॥ रक्तेन भूमिमचिक्लिदत् क्लिन्नामकरोत्। क्लिदू आर्द्रीभावे ॥ "णौचङ्युपधाया ह्रस्वः"॥ हतैः सैन्यैरतस्तरत् आच्छादयच्च। स्तृञ् आच्छादने। णौ चङि "अत् स्मृदृत्वरप्रथमदस्तृस्पशाम्" इत्यभ्यासस्य अकारः। क्रूरो वानरान् भक्षयन् नातार्प्सीत् न तृप्तः। तृप प्रीणने। सिच्पक्षे रूपं 'पितॄनतार्प्सीत्' इत्यत्रैव गतम्। प्लवङ्गमान् घ्नन् नाश्रमत् न श्रान्तः। पुषादित्वादङ् ॥

न योद्धुमशकन् केचिन्नाढौकिषत केचन।

प्राणशन्नासिकाभ्यां च वक्त्रेण च वनौकसः ॥ ४९ ॥

४९. नेति ॥ केचिदपि वनौकसो वानरा योद्धुं नाशकन् न शक्ताः। लृदित्वादङ्। केचन नाढौकिषत नाचेष्टिषत। आनने क्षिप्तास्तु नासिकाभ्यां नासारन्ध्राभ्यां च वक्त्रेण वक्त्रविवरेण च प्राणशन् प्रणष्टाः प्रभ्रष्टा निर्गता इत्यर्थः। णश अदर्शने। पुषादित्वादङ् ॥ "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम् ॥

उदरे चाजरन्नन्ये[2] तस्य पातालसन्निभे।

आक्रान्दिषुः सखीनाह्वन् प्रपलायिषतास्विदन् ॥ ५० ॥

१ रक्तैराचि° C., B. | २ चाक्षरन्नन्ये D.

५०. उदर इति ॥ अन्ये वानरास्तस्य रक्षसः पातालसन्निभे उदरेऽज-रन् जीर्णाः। जॄ वयोहानौ ॥ "जॄस्तम्भु—" इत्यादिना वा च्लेरङा-देशः ॥ "ऋदृशोऽङि गुणः" ॥ केचिदाक्रन्दिषुरक्रुक्षन्। क्रदि आक्र-न्दने ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ सखीन् मित्राण्याह्वन्नाहूतवन्तः ॥ "लिपिसिचिह्वश्च" इति ह्वयतेरङ् ॥ प्रपलायिषत प्रकर्षेण पलायिताः। अय गतौ। गतमन्यत्। अस्विदन् स्विन्नाः। ञिष्विदा गात्रप्रक्ष-रणे। पुषादित्वादङ् ॥

रक्तमश्च्योतिषुः क्षुण्णाः क्षताश्च कपयोऽतृषन्।
उपास्थायि नृपो भग्नैरसौ सुग्रीवमैजिहत् ॥ ५१ ॥

५१. रक्तमिति ॥ क्षुण्णाः संचूर्णिताः कपयो रक्तमश्च्योतिषुरक्षरन्। श्चुतिर् क्षरणे ॥ "इरितो वा" इत्यङभावपक्षे सिचीट् ॥ क्षताः प्रहृता अतृषन् तृषिताः। तृष पिपासायाम्। पुषादित्वादङ्। अथ भग्नैर्वानरै-र्नृपो राम उपास्थायि उपस्थितः प्राप्त इत्यर्थः। उपपूर्वात्तिष्ठतेः प्राप्त्य-र्थात् कर्मणि लुङि चिण्। असौ रामः सुग्रीवं योद्धुमित्युत्तरश्लोकस्थ-मिह योज्यम्। ऐजिहत् योद्धुमीहयति स्म। योद्धुमादिशदित्यर्थः। ईह चेष्टायाम्। णौ चङि णिलोपस्य "द्विर्वचनेऽचि" इति स्थानिवद्भा-वात् "अजादेर्द्वितीयस्य" इति हिशब्दस्य द्विरुक्तौ "कुहोश्चुः" ॥

योद्धुं सोऽप्यरुषच्छत्रोरैरिरच्च महाद्रुमम्।
तं प्राप्तं[2] प्रासहिष्टारिः शक्तिं चोग्रामुदग्रहीत् ॥ ५२ ॥

५२. योद्धुमिति ॥ स सुग्रीवोऽप्यरुषत् अक्रुध्यत्। रुष कोपे। पुषादि-त्वादङ्। शत्रोर्महाद्रुममैरिरत् ईरितवांश्च। ईर क्षेपे। अदादेः स्वार्थ-ण्यन्ताच्चङ्। अरिः कुम्भकर्णः प्राप्तं तं द्रुमं प्रासहिष्ट अभ्यभूत्। 'प्रसहनमभिभवः' इति काशिका। उग्रां शक्तिं शक्त्यायुधमुदग्रहीच्च उद्यम्य गृहीतवानित्यर्थः ॥

---

१ °मश्चोतिषुः C., D., Com. | २ प्राप्तमसहिष्टारिः T3, T4.

स तामबिभ्रमद्भीमां वानरेन्द्रस्य चामुचत् ।
प्रापप्तन्मारुतिस्तत्र तां चालासीद्वियद्गताम् ॥ ५३ ॥

५३. स इति ॥ स कुम्भकर्णो भीमां तां शक्तिमबिभ्रमत् भ्रमयति स्म । भ्रमेर्णौ चङ् । वानरेन्द्रस्य सुग्रीवस्यामुचच्च । मुच्लृ मोक्षणे । लृदित्वादङ् । तत्र शक्तिमार्गे मारुतिर्हनूमानपप्तत् पतितः । पत्लृ गतौ । लृदित्वादङ् ॥ "पतः पुम्" इति पुमागमः ॥ वियद्गतामाकाशगतामेव तां शक्तिमलासीत् आत्तवांश्च । ला आदाने ॥ "यमरमनम—" इति सगिटौ ॥

अशोभिष्टाचखण्डच्च शक्तिं वीरो न चायसत् ।
लौहैर्भारसहस्रेण निर्मिता निरकारि मे ॥ ५४ ॥

५४. अशोभिष्टेति ॥ धीरो वीरो हनूमानशोभिष्ट शक्तिहस्तः शुशुभे । शक्तिमचखण्डत् अखण्डयच्च । खडि भेदने इति चौरादिकाण्णौ चङ् । नायसत् नायस्तश्च । यसु प्रयत्ने । पुषादित्वादङ् । उत्तरार्धमुत्तरश्लोकेनैकवाक्यतया योज्यम् ॥

शक्तिरित्यकुपद्रक्षो गिरिं चोदखनीद्गुरुम् ।
व्यसृष्ट तं कपीन्द्रस्य तेनामूर्च्छीदसौ क्षतः ॥ ५५ ॥

५५. शक्तिरिति ॥ लोहभाराणां सहस्रेण निर्मिता । 'भारः स्याद्विंशतिस्तुला' । मे शक्तिर्निरकारि निरर्थीकृतेति रक्षः कुम्भकर्णोऽकुपच्चुकोप । पुषादित्वादङ् । गुरुं महान्तं गिरिमुदखनीत् उत्खातवांश्च ॥ "अतो हलादेः—" इति वृद्धिविकल्पः । तं गिरिं कपीन्द्रस्य सुग्रीवस्य व्यसृष्ट विसृष्टवान् । सृजेर्दैवादिकादनिटो लुङि तङि सिचि षत्वष्टुत्वे । तेन गिरिणा हतोऽसौ सुग्रीवोऽमूर्च्छीत् मूर्च्छितः ॥

अलोठिष्ट च भूपृष्ठे शोणितं चाप्यसुस्रुवत् ।
तमादाय पलायिष्ट व्यरोचिष्ट च राक्षसः ॥ ५६ ॥

---

१ अपप्तन्मा° T3, Com.
२ धीरो T3, T4, T2, Com.
३ लोह° D., T3, T4, T2, Com.
४ तेनामूर्च्छदसौ हतः T2.
५ हतः Com.

५६. अलोठिष्टेति ॥ भूपृष्ठे भूतलेऽलोठिष्ट लुठितश्च। शोणितं चाप्यसुस्रुवत् स्रुतवान्। स्रु स्रवणे ॥ "णिश्रि—" इति चङ्युवङादेशः ॥ राक्षसः कुम्भकर्णस्तं मूर्च्छितं सुग्रीवमादाय पलायिष्ट रणरङ्गान्निर्जगाम। व्यरोचिष्ट विजयेन व्यरुचच्च ॥ "द्युद्भ्यो लुङि" इति विकल्पेन तङ् ॥

अभैषुः कपयोऽन्वारत् कुम्भकर्णं मरुत्सुतः ।
शनैरबोधि सुग्रीवः सोऽलुञ्छीत् कर्णनासिकम् ॥ ५७ ॥

५७. अभैषुरिति ॥ कपयोऽभैषुः सुग्रीवग्रहणाद्बिभ्युः । मरुत्सुतो हनूमांस्तं कुम्भकर्णमन्वारदन्वगमत्। ऋ गतौ ॥ "सर्त्तिशास्त्यर्त्तिभ्यश्च" इत्यङ् ॥ "ऋदृशोऽङि गुणः" ॥ आडागमः। स सुग्रीवः शनैः क्रमात् अबोधि अबुद्ध लब्धसंज्ञोऽभूदित्यर्थः। बुध अवगमने । कर्त्तरि लुङि तङि "दीपजन—" इत्यादिना च्लेश्चिणादेशः। अथ राक्षसस्येत्युत्तरश्लोकादाकृष्टव्यम्। राक्षसस्य कर्णनासिकम्। प्राण्यङ्गत्वात् द्वन्द्वैकवद्भावः। अलुञ्छीदपनीतवान् छिन्नवानित्यर्थः। लुञ्छ अपनयने ॥

राक्षसस्य[1] न चात्रासीत् प्रनंष्टुमयतिष्ट च ।
अक्रोधि कुम्भकर्णेन पेष्टुमारम्भि च[2][3] क्षितौ ॥ ५८ ॥

५८. राक्षसस्येति ॥ नात्रासीन्नाभैषीत् प्रनंष्टुमपसर्त्तुम्। नशेस्तुमुन् ॥ "मस्जिनशोर्झलि" इति नुम् ॥ अयतिष्ट। यती प्रयत्ने। प्रवृत्त इत्यर्थः। अथ कुम्भकर्णेनाक्रोधि क्रुद्धम्। भावे लुङ्। स सुग्रीवः क्षितौ पेष्टुं भूमौ निहत्य चूर्णयितुमारम्भि आरब्धश्च। रभेः कर्मणि लुङ् ॥ "रभेरशब्लिटोः" इति नुमागमः ॥

सुग्रीवोऽस्याभ्रशद्धस्तात्[4] समगाहिष्ट चाम्बरम् ।
तूर्णमन्वसृपद्राममानन्दच्च वानरान् ॥ ५९ ॥

---

१ राक्षसाच्च न चा° D.
२ पेष्टुं चारम्भि स क्षितौ T_4.
३ स T_3.
४ °स्तादवगाहिष्ट चा° D., Com. स्तादगाहिष्ट स चा° T_3.

५९. सुग्रीव इति ॥ सुग्रीवोऽस्य रक्षसो हस्तादभ्रशत् भ्रष्टः । भ्रंशु भ्रंशु अधःपतने । पुषादित्वादङ् । अम्बरमवगाहिष्ट आक्रान्तश्च । गाहू विलोडने । तूर्णं राममन्वसृपदनुसृतः । सृप्लृ गतौ । लृदित्वादङ् । वानरानाननन्ददानन्दयच्च । नदि समृद्धौ । णौ चङ् । इदित्वान्नुम् ॥

अतत्वरच्च[1] तान् योद्धुमचिचेष्टच्च[2] राघवौ ।
कुम्भकर्णो न्यवर्त्तिष्ट रणेऽयुत्सत वानराः ॥ ६० ॥

६०. अतत्वरदिति ॥ स सुग्रीवस्तान् वानरान् योद्धुमतत्वरत् त्वरयति स्म । ञित्वरा संभ्रमे । णौ चङ् ॥ "अत्स्मृदृत्वर—" इत्यभ्यासस्याकारः ॥ राघवौ च अचचेष्टत् चेष्टयति स्म । योद्धुं प्रावर्त्तयदित्यर्थः । चेष्ट चेष्टायाम् । णौ चङ् ॥ "विभाषा वेष्टिचेष्ट्योः" इत्यत्वमभ्यासस्य ॥ कुम्भकर्णोऽपि न्यवर्त्तिष्ट मरणनिश्चयादिति भावः । सेटः सिचोऽकित्त्वाद्गुणः । वानरा रणेऽयुत्सत अयुध्यन्त । युध संप्रहारे । लुङि तङि सिच् । झस्यादादेशः ॥

अविवेष्टन्नृपादेशादारुक्षंश्चाशु राक्षसम् ।
तानधावीत्समारूढांस्तेऽप्यस्रंसिषताकुलाः ॥ ६१ ॥

६१. अविवेष्टन्निति ॥ वानरा नृपादेशाद्रामाज्ञया आशु राक्षसमविवेष्टन् अवेष्टन्तेत्यर्थः । वेष्टतेर्णौ चङ् ॥ "विभाषा वेष्टिचेष्ट्योः" इत्यत्वाभावपक्षेऽभ्यासस्य ह्रस्व इकारः । अत्र णिजर्थस्यानन्वयादविवक्षेति द्रष्टव्यम् । आरुक्षन्नारूढाश्च । रुहेर्लुङि "शल इगुपधादनिटः क्सः" । समारूढांस्तान् वानरानधावीत् अधुनोत् । धूञ् कम्पने । सिचि वृद्धिः ॥ "स्वरतिसूति—" इत्यादिना विकल्पाद् "इट ईटि" इति सलोपः ॥ तेऽप्याकुला विह्वलाः सन्तोऽस्रंसिषत स्रस्ताः ।

अग्रसिष्ट व्यधाविष्ट[3] समाश्लिक्षच्च निर्दयम् ।
ते[4] चाप्यघोरिषुर्घोरं रक्तं चावमिषुर्मुखैः ॥ ६२ ॥

---

१ अतत्वरत्स तान् T₃, T₄, T₂.
२ °मचचेष्टच्च Com.
३ न्यधाविष्ट Com., T₃.
४ तेऽघोरिषुर्महाघोरं T₃.

६२. अग्रसिष्टेति ॥ कांश्चिदग्रसिष्ट अघसत् । ग्रसु अदने । न्यधाविष्ट कांश्चिद्धस्तादेवाधो निपात्य धौतवान् । धावु गतिशुद्ध्योः । कांश्चिन्निर्दयं समाश्लिक्षत् यथा म्रियेरन् तथालिङ्गदित्यर्थः ॥ "श्लिष आलिङ्गने" इति क्सादेशः । ते तथा पीडिता वानरा महाघोरमतिभयंकरमघोरिषुश्चुक्रुशुः । घुर भीमार्थशब्दयोः । मुखै रक्तमवमिषुरवमन् । टुवम उद्गिरणे ॥

स[१] चापि रुधिरैर्मत्तः स्वेषामप्यदयिष्ट न ।
अग्रहीच्चायुरन्येषामरुद्ध[३] च पराक्रमम् ॥ ६३ ॥

६३. स इति ॥ स कुम्भकर्णो रुधिरैर्मत्तः सन् स्वेषां स्वकीयानामपि नादयिष्ट न दयते स्म । किमुत परेषामित्यर्थः ॥ "अधीगर्थदयेशाम्" इति कर्मणि शेषे षष्ठी ॥ दयतेर्लुङि तङि सिचीट् । अन्येषामायुर्जीवितमग्रहीत् । ग्रहेः "ह्यन्त—" इति वृद्धिप्रतिषेधः । केषांचित्पराक्रमम-रुधद्रुद्धवान् । रुधिर् आवरणे ॥ "इरितो वा" इति विकल्पादङ् ॥

संत्रस्तानामपाहारि सत्त्वं च वनवासिनाम् ।
अच्छेदि लक्ष्मणेनास्य किरीटं कवचं तथा ॥ ६४ ॥

६४. समिति ॥ संत्रस्तानां वनवासिनां वानराणां सत्त्वं बलं चापाहारि अपहृतं रक्षसेति शेषः । हरतेः कर्मणि लुङि चिण् । अथ लक्ष्मणेनास्य रक्षसः किरीटं तथा कवचं च अच्छेदि छिन्नम् । छिदेः पूर्ववल्लुकारः ॥

अभेदि च शरैर्देहः[४] प्राशंसीत्तं[५] निशाचरः ।
अस्पर्धिष्ट च रामेण तेनास्याक्षिप्सतेषवः ॥ ६५ ॥

६५. अभेदीति ॥ शरैर्देहश्चाभेदि भिन्नः । पूर्ववल्लुकारः । तं विक्रान्तं लक्ष्मणं निशाचरः कुम्भकर्णः प्राशंसीत् तुष्टाव । रामेणास्पर्धिष्ट च

१ Verses 63-65 are omitted in T2.
२ अग्रहीदायु° T4.
३ °मरुधच्च प° Com.
४ शनै° T3.
५ प्राशंसीच T3, T4.

बालत्वाल्लक्ष्मणमगणयित्वेति भावः । तेन रामेणास्य रक्षस इषवोऽक्षि-प्सत क्षिप्ताः । क्षिपेः कर्मणि लुङि सिच् । सिचः किन्त्वान्न लघूपधगुणः ॥

यैरघानि खरो वाली मारीचो दूषणस्तथा ।
अवामंस्त स तान् दर्पात् प्रोदयंसीच्च मुद्गरम् ॥ ६६ ॥

६६. यैरिति ॥ यैरिषुभिः खरोऽघानि तथा वाली मारीचो दूषणश्चाघानि । हन्तेः कर्मणि लुङि चिणि वृद्धिः ॥ "हो हन्तेः—" इति कुत्वम् ॥ तानिषून् स राक्षसो दर्पादवामंस्त अवमेने । मन ज्ञाने । कर्त्तरि लुङि सिच् । तस्याकित्त्वान्नानुनासिकलोपः । मुद्गरं च प्रोदयंसीत् उद्यतवान् ॥ "यमरम—" इति सगिटौ ॥ अत्र परस्मैपदं चिन्त्यम् ॥ "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदविधानात् ॥

वायव्यास्त्रेण [1]तं पाणिं [2]रामोऽच्छैत्सीत् स[3]हायुधम् ।
अदीपि तरुहस्तोऽसावधावीच्चारिसंमुखम् ॥ ६७ ॥

६७. वायव्येति ॥ सहायुधं समुद्गरं तमुद्यतपाणिं वायव्यास्त्रेणाच्छैत्सीत् चिच्छेद । छिदिर् द्वैधीकरणे ॥ "इरितो वा" इत्यङभावपक्षे सिचि हलन्तलक्षणा वृद्धिः ॥ तरुहस्तस्तरुयुक्तहस्तो राक्षसोऽदीपि दिदीपे । कर्त्तरि लुङि तङि "दीपजन—" इत्यादिना च्लेश्चिणादेशः । अरेः संमुखमभिमुखमधावीदभिद्रुतश्च । धावु गतिशुद्ध्योः ॥ "इट ईटि" इति सलोपः ॥

सवृक्षमच्छिदत्तस्य [4]शक्रास्त्रेण करं नृपः ।
जङ्घे चाशीशतद्बाणैरमासीदिषुभिर्मुखम् ॥ ६८ ॥

६८. सवृक्षमिति ॥ नृपो रामस्तस्य रक्षसः सवृक्षं करं महास्त्रेण महेषुणाच्छिदच्चिच्छेद ॥ "इरितो वा" इति विकल्पादङ् ॥ बाणैर्जङ्घे

१ पाणिं तं D.
२ अच्छैत्सीच्च सहायुधम् T₃, T₄.
३ महायुधम् D.
४ महास्त्रेण T₃, T₄, Com.

चाशीशतत् शातितवान् चिच्छेदेत्यर्थः । शद्लृ शातने । णौ चङ् ॥ "शदेरगतौ तः" इति णौ दकारस्य तकारः । सन्वत्कार्यम् । इषुभिर्मुखं वक्त्रकुहरमप्रासीत् पूरयामास । प्रा पूरणे । सगिटौ ॥

ऐन्द्रेण हृदयेऽव्यात्सीत्[1] सोऽध्यवात्सीच्च गां हतः ।
अपिक्षातां सहस्रे द्वे तद्देहेन वनौकसाम् ॥ ६९ ॥

६९. ऐन्द्रेणेति ॥ ऐन्द्रेण ऐन्द्रास्त्रेण हृदयेऽव्यात्सीत् विव्याध[2] । व्यध ताडने । सिचि हलन्तलक्षणा वृद्धिः । स राक्षसो हतः सन् गां भूमिमध्यवात्सीत् अध्युवास । भुवि पतित इत्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ वस निवासे । लुङि सिचि हलन्तलक्षणा वृद्धिः ॥ "सः स्यार्धधातुके" इति तत्वम् ॥ तस्य पतता देहेन वनौकसां कपीनां द्वे सहस्रे अपिक्षातां पिष्टे । पिष्लृ संचूर्णने । कर्मणि लुङ्यातां सिचि कत्वषत्वे । सिचः कित्त्वान्न गुणः ॥

अस्ताविषुः सुरा रामं दिशः प्रापन्निशाचराः ।
भूरकम्पिष्ट साद्रीन्द्रा व्यचालीदम्भसां पतिः[3] ॥ ७० ॥

७०. अस्ताविषुरिति ॥ सुरा देवा राममस्ताविषुस्तुष्टुवुः । ष्टुञ् स्तुतौ । लुङि सिचि "स्तुसुधूञ्भ्यः परस्मैपदेषु" इति इट् ॥ "इट ईटि" इति सलोपः ॥ निशाचरा दिशः प्रापन् प्राप्ताः । लृदित्वादङ् । साद्रीन्द्रा सकुलशैला भूरकम्पिष्ट । अम्भसां पतिरब्धिर्व्यचालीत् विचचाल क्षुभित इत्यर्थः ॥ "अतो ल्रान्तस्य" इति वृद्धिः ॥

हतं रक्षांसि राजानं कुम्भकर्णमशिश्रवन् ।
अरोदीद्रावणोऽशोचीन्मोहं[4] चाशिश्रियत्[5] परम् ॥ ७१ ॥

७१. हतमिति ॥ रक्षांसि हतशेषा राक्षसा राजानं रावणं हतं कुम्भकर्णमशिश्रवन् अश्रावयन् । शृणोतेर्बुद्ध्यर्थत्वात् "गतिबुद्धि—" इत्या-

१ °दध्यवात्सीत्स गां T_2.
२ °व्यात्सीत्तथागतः T_3, T_4.
३ निधिः T_2.
४ अशोचीद्रावणोऽरोदीन्मो° T_2.
५ चाशिश्रयत् T_4.

दिना अणि कर्त्तुः कर्मत्वम् ॥ "णौ चङ्युपधाया ह्रस्वः" ॥ सन्वत्कार्यं च ॥ "स्रवतिशृणोति—" इत्यादिना अभ्यासस्य विकल्पादित्वम् । रावणोऽरोदीदश्रूणि मुमोच । रुदिर् अश्रुविमोचने ॥ "इरितो वा" इत्यङभावपक्षे सिचीट् ॥ "इट ईटि" इति सलोपः ॥ "नेटि" इति वृद्धिप्रतिषेधाल्लघूपधगुणः ॥ अशोचीत् शोचति स्म । शुच शोके । सर्वं पूर्ववत् । परं मोहं मूर्च्छां चाशिश्रियत् श्रितः । श्रयतेः "णिश्रि—" इति चङ् । इयङादेशः ॥

अपप्रथद्गुणान्भ्रातुरचिकीर्त्तच्च[1] विक्रमम् ।
क्रुद्धेन कुम्भकर्णेन येऽदर्शिषत शत्रवः ॥ ७२ ॥

७२. अपप्रथदिति ॥ भ्रातुर्गुणानपप्रथत् प्रथयति स्म । वर्णितवानित्यर्थः । प्रथ प्रख्याने । घटादिः । तस्माण्णौ चङि "अत्स्मृदृत्वर—" इत्यभ्यासस्यात्वम् । विक्रमं चाचकीर्त्तत् कीर्त्तितवान् । कृत संशब्दने । चौरादिकः । णौ चङि "उर्ऋत्" इति ऋकाराभावपक्षे "उपधायाश्च" इति ऋकारस्येत्वे "र्वोरुपधायाः—" इति दीर्घे "उरत्" इत्यभ्यासऋकारस्यात्त्वम् । क्रुद्धेन कुम्भकर्णेन ये शत्रवोऽदर्शिषत दृष्टाः । दृशेः कर्मणि लुङि सिचि "स्यसिच्सीयुट्—" इत्यादिना चिण्वदिटि गुणः ॥

कथं न्वजीविषुस्ते[2] च स चामृत महाबलः ।
प्रा[3]युयुत्सिषताश्वास्य[4] कुमारा रावणं ततः ॥ ७३ ॥

७३. कथमिति ॥ अल्पास्ते तद्दृष्टाः शत्रवः कथमजीविषुर्जीवितवन्तः कथं नु महाबलः कुम्भकर्णोऽमृत ॥ "म्रियतेर्लुङ्लिङोश्च" इति तङ् ॥ "ह्रस्वादङ्गात्" इति सलोपः ॥ सिचः कित्वान्न गुणः ॥ ततः शोकानन्तरं कुमारा रावणात्मजा रावणमाश्वास्य प्रायुयुत्सिषत प्रकर्षेण योद्धुमैच्छन् । युद्धोत्साहप्रकाशनेन रावणमुत्साहयामासुरित्यर्थः । युधेः सन्नन्ताल्लुङि "पूर्ववत् सनः" इति तङि सिचीट् । झस्य चादादेशः ॥

---

१ अचकीर्त्तच Com.
२ स्तेऽल्पाः T₃, T₄, Com.
३ प्रायुयु° D., T₃, Com., T₂.
४ °ताश्वस्य E.

देवान्तकोऽतिकायश्च त्रिशिरोः स नरान्तकः ।
ते चांहिषत संग्रामं बलिनो रावणात्मजाः ॥ ७४ ॥

७४. देवेति ॥ देवान्तकादयो बलिनस्ते रावणात्मजा रावणाज्ञया संग्राममांहिषत अगमंश्च । अहि गतौ । इदित्त्वान्नुम् । सिचीट् । आड्वृद्धिः ॥

युद्धोन्मत्तं च मत्तं च राजा रक्षार्थमांजिहत् ।
सुतानां निरगातां तौ राक्षसौ रणपण्डितौ ॥ ७५ ॥

७५. युद्धेति ॥ राजा रावणः सुतानां रक्षार्थं युद्धोन्मत्तं च मत्तं च आञ्जिहत् अजीगमत् प्रस्थापयामासेत्यर्थः । अहि गतौ । णौ चङि द्वितीयैकाचो हिशब्दस्य द्विर्वचनम् । चुत्वम् । आड्वृद्धिश्च । रणपण्डितौ तौ राक्षसौ मत्तोन्मत्तौ निरगातां निर्गतौ ॥ "इणो गा लुङि" इति गादेशे तसस्तामादेशः ॥

तैरजेषत सैन्यानि द्विषोऽकारिषताकुलाः ।
पर्वतानिव ते भूमावचैषुर्वानरोत्तमान् ॥ ७६ ॥

७६. तैरिति ॥ तैः कुमारैः सैन्यानि कपिबलानि अजेषत जितानि । जेः कर्मणि लुङ् । चिण्वदिडभावपक्षे सिचि गुणः । द्विषः शत्रव आकुला व्यग्रा अकारिषत कृताः । करोतेः कर्मणि लुङि चिण्वदिटि वृद्धिः । ते राक्षसा वानरोत्तमान् पर्वतानिवाचैषुः । चिचीषन्तो राशीचक्रुरित्यर्थः । चिनोतेः कर्त्तरि लुङि सिचि वृद्धिः ॥

अङ्गदेन समं योद्धुमघटिष्ट नरान्तकः ।
प्रैषिषद्राक्षसः प्रासं सोऽस्फोटीदङ्गदोरसि ॥ ७७ ॥

७७. अङ्गदेनेति ॥ तत्र नरान्तको नाम राक्षसोऽङ्गदेन समं योद्धुमघटिष्ट घटितः प्रवृत्त इत्यर्थः । प्रासं कुन्तं प्रैषिषत् प्रजिघाय । इष गतौ । चङि

१ त्रिशिराश्च न° T4.
२ रक्षार्थमादिशत् T2.
३ प्राशं E.

आड्वृद्धिः । स प्रासोऽङ्गदोरस्यस्फोटीत् स्फुटितो भग्न इत्यर्थः । स्फुटिर् विशरणे ॥ "नेटि" ॥ "इट ईटि" ॥ गुणः ॥

अश्वान् वालिसुतोऽहिंसीदतताडच्च मुष्टिना ।
रावणिश्चाव्यथो[1] योद्धुमारब्ध[2] च महीं गतः[3] ॥ ७८ ॥

७८. अश्वानिति ॥ वालिसुतोऽङ्गदोऽश्वानहिंसीदवधीत् । हिसि हिंसायाम् ॥ "नेटि" इत्यादि । मुष्टिना अतताडत् अताडयच्च । ताडस्ताडनम् । भावे घञ् । ततः "तत्करोति—" इति णिच् । णाविष्टवद्भावात् टिलोपः ॥ "नाग्लोपि—" इत्युपधाह्रस्वनिषेधः । तड आघात इति चौरादिकात् णौ चङ्युपधाह्रस्वे सन्वत्कार्ये च अतीतडदित्येव स्यात् । अथ महीं गतो रथभङ्गात्पदातिः रावणिर्नरान्तकः ॥ "अत इञ्" ॥ निर्व्यथ एव योद्धुं प्रारब्ध प्रावर्त्तिष्ट । रभेर्लुङि "झलो झलि" इति सलोपः ॥ "झषस्तथोः—" इति धत्वम् । जश्त्वं च ॥

तस्याहारिषत प्राणा मुष्टिना वालिसूनुना ।
प्राद्रुद्रुवंस्ततः क्रुद्धाः सर्वे रावणयोऽङ्गदम् ॥ ७९ ॥

७९. तस्येति ॥ वालिसूनुनाङ्गदेन कर्त्रा मुष्टिना करणेन तस्य नरान्तकस्य प्राणा अहारिषत हृताः । हरतेः कर्मणि लुङि चिण्वदिटि वृद्धिः । ततो नरान्तकवधात् क्रुद्धाः सर्वे रावणयो रावणपुत्राः ॥ "अत इञ्" ॥ अङ्गदं प्रति प्रादुद्रुवन् प्रद्रुताः । द्रु गतौ । लुङि "णिश्रि—" इति चङ्युवङ् ॥

ततो नीलहनूमन्तौ रावणीनववेष्टताम् ।
अकारिष्टां गिरींस्तुङ्गान्[4] नैरौत्सीत् त्रिशिराः शरैः ॥ ८० ॥

८०. तत इति ॥ रावणिप्रद्रवानन्तरं नीलहनूमन्तौ रावणीनववेष्टताम् वेष्टिषाताम् । णिजर्थो न विवक्षितः । वेष्ट वेष्टने । णौ चङि "विभाषा

१ रावणिः सोऽव्यथो T3., T4.
२ योद्धुं प्रारब्ध च T2, Com.
३ महीगतः E3.
४ °ङ्गान् न्यरौ° Com., D.

वेष्टिचेष्ट्योः" इत्यभ्यासस्यात्वम्। गिरीनकारिष्टां निक्षिप्तवन्तौ। कॄ विक्षेपे। सिचि वृद्धिः। तान् गिरीन् त्रिशिराः शरैर्न्यरौत्सीत् निवारितवान्। रुधिर् आवरणे॥ "इरितो वा" इत्यङभावपक्षे सिचि वृद्धिः॥

परिघेणावधिष्टाथ रणे देवान्तको बली।
मुष्टिनाददरत्तस्य मूर्धानं मारुतात्मजः॥ ८१॥

८१. परिघेणेति॥ अथ बली देवान्तकः परिघेणावधिष्ट आजघ्ने। अविवक्षितकर्मत्वेनाकर्मकत्वात् "आङो यमहनः" इति तङ्॥ "आत्मनेपदेष्वन्यतरस्याम्" इति हनो वधादेशः॥ तस्य देवान्तकस्य मूर्धानं मारुतात्मजो मुष्टिनाददरत् दारितवान्। दृ विदारणे॥ "णौ चङ्युपधाया ह्रस्वः"॥ "अत्स्मृदृत्वर—" इत्यभ्यासस्यात्वम्॥

अदीदिपत्ततो[1] वीर्यं नीलं चापीपिडच्छरैः।
युद्धोन्मत्तस्तु[2] नीलेन गिरिणानायि संक्षयम्॥ ८२॥

८२. अदिदीपदिति॥ ततो देवान्तकवधानन्तरं युद्धोन्मत्तो वीर्यं विक्रममदिदीपद्दीपितवान्। शरैर्नीलमपीपिडत् पीडितवांश्च॥ "भ्राजभास—" इत्यादिना विकल्पादुपधाह्रस्वः पूर्वत्र तदभावश्च॥ स युद्धोन्मत्तो नीलेन कर्त्रा गिरिणा करणेन संक्षयमानायि नीतः। नयतेर्द्विकर्मकत्वात् प्रधानकर्मणि लुङ्। 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्। अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः'॥ इति वचनात्॥

अबभ्राजत्ततः शक्तिं त्रिशिराः पवनात्मजे।
हनूमता क्षतास्तस्य रणे[3]ऽमृषत वाजिनः॥ ८३॥

८३. अबभ्राजदिति॥ ततो युद्धोन्मत्तवधानन्तरं त्रिशिराः पवनात्मजे विषये शक्तिं सामर्थ्यमबभ्राजत् प्रकाशितवान्। भ्राजृ दीप्तौ। णौ चङि "भ्राजभास—" इत्यादिना विकल्पादुपधाह्रस्वाभावः। हनूमता

१ अदिदीप° Com.
२ युद्धोन्मत्तश्च T_3.
३ रथे T_4.

रणे क्षताः प्रहतास्त्रिशिरसो वाजिनो रथाश्वा अमृषत मृताः ॥
"म्रियतेर्लुङ्लिङोश्च" इति तङ् ॥

अस्रसच्चाहतो मूर्ध्नि खड्गं चाजीहरद्द्विषा[1] ।
प्राणानौज्झीच्च खड्गेन छिन्नैस्तेनैव[2] मूर्धभिः ॥ ८४ ॥

८४. अस्रसदिति ॥ अथ हनूमता मूर्ध्न्याहतो मुष्टिहतस्त्रिशिरा अस्रसद्रथाद् भ्रष्टश्च । स्रंसु अवस्रंसने ॥ "द्युद्भ्यो लुङि" इति तिप् ॥ द्युतादित्वादङ् । ङिति अनुनासिकलोपः । द्विषा हनूमता खड्गमजीहरच्च हारितवांश्च । हृञ् हरणे । णौ चङ्युपधाह्रस्वः । सन्वत्कार्यं च । तेनैव खड्गेन छिन्नैर्मूर्धभिर्हेतुभिः प्राणानौज्झीदत्याक्षीच्च । उज्झ उत्सर्गे ॥ "इट ईटि" ॥ आड्वृद्धिः ॥

मत्तेनामारि संप्राप्य शरभास्तां महागदाम् ।
सहस्रहरिणाक्रीडीदतिकायस्ततो[3] रणे ॥ ८५ ॥

८५ मत्तेनेति ॥ अथ मत्तेन कुमाररक्षार्थमागतेन राक्षसेन शरभेण शरभाख्येन वानरेणास्तां क्षिप्तां महागदां संप्राप्यामारि मृतम् । भावे लुङ् । ततो मत्तमरणानन्तरमतिकायो नाम रावणपुत्रः सहस्रहरिणा सहस्राश्वेन रथेन रणे आक्रीडीद्विजहार ॥

रथेनाविव्यथच्चारीन् व्यचारीच्च निरङ्कुशः ।
विभीषणेन सोऽख्यायि राघवस्य महारथः ॥ ८६ ॥

८६. रथेनेति ॥ रथेन पूर्वोक्तेन सहस्राश्वेन अरीनविव्यथत् व्यथयामास च । व्यथेर्णितो णौ चङि "ग्रहिज्या—" इत्यादिना संप्रसारणम् । निरङ्कुशो निरर्गलो व्यचारीत् विचचार च । अथ महारथः सोऽतिकायो विभीषणेन राघवस्याख्यायि कथितः । ख्या प्रकथने । कर्मणि लुङि चिणि युगागमः ॥

---

१ द्विषाम् T₄.
२ तेनैव छिन्नैः खड्गेन T₃.
३ °किरणा T₃.

अतस्तम्भदयं वज्रं स्वयम्भुवमतूतुषत् ।
अशिक्षिष्ट महास्त्राणि रणेऽरक्षीच्च राक्षसान् ॥ ८७ ॥

८७. अतस्तम्भदिति ॥ अयमतिकायो रणे वज्रं वज्रायुधमतस्तम्भत् स्तम्भितवान् । स्तम्भु प्रतिबन्धे । णौ चङ् । स्वयंभुवं ब्रह्माणमतूतुषदुग्रेण तपसा प्रसादितवान् । तुष्यतेर्णौ चङ्युपधाह्रस्वः । तपःफलमाह । महास्त्राण्यशिक्षिष्टाभ्यस्तवान् । रणे राक्षसानरक्षीत् देवेभ्यस्त्रातवानित्यर्थः ॥

अध्यगीष्टार्थशास्त्राणि[1] यमस्याह्नोष्ट विक्रमम् ।
देवाहवेष्वदीपिष्ट नाजनिष्टास्य साध्वसम् ॥ ८८ ॥

८८. अथेति ॥ अथ शास्त्राण्यध्यगीष्ट अध्यैष्ट । इङ् अध्ययने ॥ "विभाषा लुङ्लृङोः" इति गाङादेशः ॥ यमस्य विक्रममह्नोष्ट अपह्नुतवान् निरस्तवानित्यर्थः । ह्नुङ् अपह्नवे । सिचोऽकित्त्वाद्गुणः । देवाहवेषु देवयुद्धेषु अदीपिष्ट अप्रतिहतो दिदीपे । अस्य साध्वसं नाजनिष्ट । न कुतश्चिद्बिभेतीत्यर्थः ॥ "दीपजन—" इत्यादिना चिणभावपक्षे रूपम् ॥

एष रावणिरापादि वानराणां भयङ्करः[2] ।
आह्वताथ स काकुत्स्थं धनुश्चापुस्फुरद्गुरु[3] ॥ ८९ ॥

८९. एष इति ॥ एष रावणिरतिकाय आपादि आपन्नः प्राप्तः ॥ "चिण् ते पदः" इति चिणि वृद्धिः ॥ "चिणो लुक्" ॥ यतो यस्माद्वानराणां भयम् । अथ सोऽतिकायः काकुत्स्थं राममाह्वत सस्पर्धमाहूतवान् ॥ "स्पर्धायामाङः" इति तङ् ॥ "आत्मनेपदेष्वन्यतरस्याम्" इति च्लेरङादेशः ॥ गुरु महद्धनुरपिस्फुरत् स्फुरितवान् ॥ "चिस्फुरोर्णौ" इत्यात्वपक्षे णौ चङ्युपधाह्रस्वः । सन्वत्कार्यम् ॥

---

[1] अथाध्यगीष्ट शास्त्राणि Com. अध्यगीष्टाथ शास्त्राणि Th. Com.

[2] भयं यतः T_3. यतो भयम् Com.

[3] °श्चापिस्फु° Com., T_3, D.

सौमित्रिः सर्पवत्सिंहमार्दिदत्तं महाहवे ।
तौ प्रावीवृततां जेतुं शरजालान्यनेकशः ॥ ९० ॥

९०. सौमित्रिरिति ॥ अथ सौमित्रिर्लक्ष्मणः सिंहं सर्पवत् सर्प इव । अत्र साटोपत्वात् सिंहसाम्यं शत्रोरवन्ध्यकोपत्वेन सर्पसाम्यं सौमित्रेरित्यनुसंधेयम् । महाहवे तमतिकायमार्दिददहिंसीत् अभियुक्तवानित्यर्थः । अर्द हिंसायाम् । चुरादिः । चङि णिलोपस्य स्थानिवद्भावात् रेफवर्जितस्य दिशब्दस्य द्विर्वचनम् । तौ लक्ष्मणातिकायौ जेतुं परस्परजिगीषयेत्यर्थः । अनेकशः शरजालानि प्रावीवृततां प्रवर्त्तितवन्तौ । वृतु वर्त्तने । णौ चङ् ॥ "उर्ऋत्" ॥ "उरत्" ॥ सन्वत्कार्यम् ॥

अच्छैत्तां च महात्मानौ चिरमश्रमतां न च ।
तथा तावास्थतां बाणानतानिष्टां[1] तमो यथा ॥ ९१ ॥

९१. अच्छैत्तामिति ॥ महात्मानौ महामनसौ तौ चिरमच्छैत्तामन्योन्यशरजालानि छिन्नवन्तौ । छिदिर् द्वैधीकरणे ॥ "इरितो वा" इत्यङभावपक्षे सिचि वृद्धिः ॥ "झलो झलि" इति सलोपः ॥ नाश्रमतां न श्रान्तौ च । श्रमेः पुषादित्वादङ् । तौ तथा बाणानास्थतां क्षिप्तवन्तौ । असु क्षेपणे ॥ "अस्यतिवक्तिख्यातिभ्योऽङ्" ॥ "अस्यतेस्थुक्" ॥ यथा येन प्रकारेण तमोऽन्धकारमतनिष्टां विस्तारितवन्तौ । तनु विस्तारे ॥ "अतो हलादेः" इति वृद्धिविकल्पः ॥

सौर्याग्नेये व्यकारिष्टामस्त्रे राक्षसलक्ष्मणौ ।
ते[2] चोपागमतां नाशं समासाद्य परस्परम् ॥ ९२ ॥

९२. सौर्येति ॥ राक्षसलक्ष्मणौ यथाक्रमं सौर्याग्नेये अस्त्रे व्यकारिष्टां प्रयुक्तवन्तावित्यर्थः । कॄ विक्षेपे । सिचि वृद्धिः । यथासंख्यालंकारः । ते अस्त्रे परस्परं समासाद्य नाशमदर्शनमभ्युपागमतां प्राप्ते । गमेर्लुङ् । लृदित्वादङ् ॥

---

१ °मतानिष्टां D., Com.

२ तेऽभ्युपागमतां Com., T3. तेऽप्युपागमतां T2.

अविभ्रजत्ततः शस्त्रमैषीकं राक्षसो रणे ।
तदप्यध्वसदासाद्य माहेन्द्रं लक्ष्मणेरितम् ॥ ९३ ॥

९३. अविभ्रजदिति ॥ ततोऽस्त्रद्वयनाशानन्तरं राक्षसो रणे ऐषीकं नाम शस्त्रमस्त्रमविभ्रजत् प्रकाशयामास प्रयुक्तवानित्यर्थः । भ्राजादिना विकल्पादुपधाह्रस्वत्वम् । तदैषीकमपि लक्ष्मणेरितं लक्ष्मणप्रयुक्तं माहेन्द्रं महेन्द्रदेवताकमस्त्रमासाद्याध्वसत् ध्वस्तम् । ध्वंसे द्युतादित्वाद्‌ङ् ॥ "द्युद्‌भ्यो लुङि" इति वा परस्मैपदम् ॥

ततः सौमित्रिरस्मार्षीददेविष्ट च दुर्जयम् ।
ब्रह्मास्त्रं तेन मूर्धानमदध्वंसन्नरद्विषः ॥ ९४ ॥

९४. तत इति ॥ ततोऽस्त्रनाशानन्तरं सौमित्रिर्दुर्जयममोघं ब्रह्मास्त्रमस्मार्षीत् सस्मार । सिचि वृद्धिः । अदेविष्ट च तत्सान्निध्याद् भृशं दिद्युते । देवृ देवने । देवनमत्र द्योतनम् । तेनास्त्रेण करणेन नृविद्विषो राक्षसस्य मूर्धानमदध्वंसत् ध्वंसयामास नाशयामासेत्यर्थः । 'सम्प्रध्वंसतेऽभ्येति विनश्यति विलीयते' इति भट्टमल्लः ॥

ततोऽक्रन्दीद्दशग्रीवस्तमशिश्वसदिन्द्रजित् ।
निरयासीच्च संक्रुद्धः प्रार्चिचच्च स्वयम्भुवम् ॥ ९५ ॥

९५. तत इति ॥ ततः कुमारमरणानन्तरं दशग्रीवोऽक्रन्दीदरोदीत् । इन्द्रजित्तं दशग्रीवमाशिश्वसदाश्वासयामास । श्वसेः णौ चङ्युपधाह्रस्वः । सन्वत्कार्यं च । संक्रुद्धो निरयासीद्योद्धुं निर्यातश्च । यातेः लुङि सगिटौ । स्वयम्भुवं ब्रह्माणमार्चिचदर्चयामास । अर्चेश्चौरादिकाण्णौ चङ् ॥ "अजादेर्द्वितीयस्य" ॥ आड्वृद्धिः ।

१ °मैषिकं C.
२ °नृविद्विषः Com.
३ °माशि° Com., E.
४ संक्रुद्ध आर्चि° Com.

अहौषीत्कृष्णवर्त्मानं समयष्टास्त्रमण्डलम् ।
सोऽलब्ध ब्रह्मणः शस्त्रं स्यन्दनं च जयावहम् ॥ ९६ ॥

९६. अहौषीदिति ॥ स इन्द्रजित् कृष्णवर्त्मानमग्निमहौषीत् जुहाव । आहुतिभिः प्रीणितवानित्यर्थः । हु दानादानयोः । सिचि वृद्धिः । आयुधमण्डलमस्त्रजातमयष्ट पूजितवान् । यज देवपूजादौ । लुङि सिचि "व्रश्च—" इत्यादिना षत्वे ष्टुत्वम् । ब्रह्मणः सकाशाज्जयावहं शस्त्रमायुधं स्यन्दनं रथं चालब्ध लब्धवान् । लभेर्लुङि तङि "झलो झलि" इति सलोपः । धत्वजश्त्वे ॥

तमध्यासिष्ट दीप्राग्रममोदिष्ट च रावणिः ।
छन्नरूपस्ततोऽकर्त्तीद्देहान् रावणविद्विषाम् ॥ ९७ ॥

९७. तमिति ॥ स रावणिरिन्द्रजित् दीप्राग्रं स्वकान्तिरञ्जितोपरिभागमित्यर्थः । तं रथमध्यासिष्टाधिष्ठितवान् ॥ "अधिशीङ्—" इति कर्मत्वम् ॥ अमोदिष्ट मुदितश्च । ततोऽनन्तरं छन्नरूपोऽन्तर्हित एव रावणविद्विषां कपीनां देहानकर्त्तीत् चकर्त्त । कृती छेदने ॥ "सेऽसिचि कृत—" इत्यत्र इड्विकल्पे "असिचि" इति पर्युदासात् सिचि नित्यमिट् ॥

सप्तषष्टिं प्लवङ्गानां कोटीर्बाणैरसूषुपत्[२] ।
निशान्ते रावणिः क्रुद्धो राघवौ च व्यमूमुहत् ॥ ९८ ॥

९८. सप्तेति ॥ रावणिः क्रुद्धो निशान्तेऽर्धरात्रे सप्तषष्टिं सप्तोत्तरषष्टिसंख्याकाः प्लवङ्गमानां कोटीर्बाणैरसूषुपत् स्वापितवान्[1] मोहितवानित्यर्थः । स्वपेर्णौ चङ् । "स्वापेश्चङि" इति संप्रसारणे पश्चात् द्विर्वचनमभ्यासदीर्घः । राघवौ च व्यमूमुहत् अमुमूर्च्छत् । मुहेः णौ चङ्युपधाह्रस्वः । अभ्यासदीर्घः ॥

१ °र्त्मानमयष्टायुधम° Com. | २ कोटीं T_3, T_4.

1 मारितवा° Th.

अपिस्फवत् स्वैसामर्थ्यमगूहीत्सायकैर्दिशः ।
अघोरीच्च महाघोरं गत्वा प्रैषीच्च रावणम् ॥ ९९ ॥

९९. अपिस्फवदिति ॥ स्वसामर्थ्यमपिस्फवत् स्फावयति स्म अत्यन्तं पराक्रमीदित्यर्थः । स्फायी वृद्धौ । णिचि "स्फायो वः" इति वत्वम् । चङ्युपधाह्रस्वः । सन्वत्कार्यम् । सायकैर्दिशोऽगूहीत् संवृतवान् । गुहू संवरणे । लुङि सिचि "ह्यन्त—" इति वृद्धिप्रतिषेधे "ऊदुपधाया गोहः" इति गुणापवादोकारः । महाघोरमतिभयङ्करमघोरीदगर्जीत् गत्वा गृहं गत्वा रावणं प्रैषीत् स्वपौरुषं द्रष्टुं प्रेषितवान् । इषु गतौ । सिचीटि "नेटि" इति वृद्धिप्रतिषेधादिगुपधगुणे आद्वृद्धिः ॥

विभीषणस्ततोऽबोधि सस्फुरौ रामलक्ष्मणौ ।
अपारीत् स गृहीतोल्को हतशेषान् प्लवङ्गमान् ॥ १०० ॥

१००. विभीषण इति ॥ ततस्तस्मिन् काले विभीषणो रामलक्ष्मणौ स्फुरणं स्फूः । संपदादिक्विप् । तत्सहितौ सस्फुरौ स्फुरन्तौ जीवन्तावित्यर्थः । अबोधि बुद्धवान् । बुध अवगमने । कर्त्तरि लुङ् ॥ "दीपजन—" इत्यादिना च्लेश्चिणादेशः ॥ स विभीषणो गृहीतोल्को गृहीतोल्मुकः सन् हतशेषान् प्लवङ्गमान् अवादीदवोचत् ॥

मा शोचिष्ट रघुव्याघ्रौ नामृषातामिति ब्रुवन् ।
अबाबुद्ध स नीलादीन् निहतान् कपियूथपान् ॥ १०१ ॥

१०१. यदवादीत्तदेवाह । मेति ॥ हे वानरा मा शोचिष्ट शोकं मा कुरुत । रघुव्याघ्रौ नामृषातां न मृतौ । मृङ् प्राणत्यागे ॥ "म्रियतेर्लुङ्लिङोश्च" इति तङ् ॥ सिचः कित्वान्न गुणः । इति ब्रुवन् नीलादीन् कपियूथपान् निहतानवाबुद्धावबुद्धवान् ॥ "दीपजन—" इत्यादिना चिणभावपक्षे "झलो झलि" इति सलोपः । धत्वजश्त्वे ॥

---

१ सुसाम° D.
२ स्फुरन्तौ T_2.
३ अवादीत् Com.

तत्रेषज्जाम्बवान् प्राणीदुदमीलीच्च लोचने ।
पौलस्त्यं चागदीत् कच्चिदजीवीन्मारुतात्मजः ॥ १०२ ॥

१०२. जाम्बवानिति ॥ तत्र जाम्बवानीषदुत्प्राणीदुदजनीत् । अन प्राणने ॥ "इट ईटि" इति सलोपः ॥ "अनितेः" इति णत्वम् ॥ लोचने उदमीलीच्च उन्मिषितवांश्च । मील निमेषणे । अथ मारुतात्मजो हनूमानजीवीत् जीवितः कच्चित् किमिति पौलस्त्यं विभीषणमगदीदगादीच्च ॥ "अतो हलादेः—" इति वृद्धिविकल्पः ॥

तस्य क्षेमे महाराज नामृष्महाखिला वयम् ।
पौलस्त्योऽशिश्रवत्तं च जीवन्तं पवनात्मजम् ॥ १०३ ॥

१०३. हनूमज्जीवनप्रश्नस्य प्रयोजनमाह । तस्येति ॥ महाराज विभीषण तस्य हनूमत एकस्य क्षेमे जीवने सति वयमखिला नामृष्महि मृषीमहीत्यर्थः ॥ "आशंसायां भूतवच्च" इति लुङ् ॥ पौलस्त्यो विभीषणः पवनात्मजं जीवन्तं तस्याशुश्रवत्तमश्रावयदित्यर्थः । सम्बन्धसामान्ये षष्ठी । शृणोतेः णौ चङ्युपधाह्रस्वः ॥ "स्रवतिशृणोति—" इत्यादिनाभ्यासस्येत्वाभावपक्षे प्राकृतमुत्वम् ॥

आयिष्ट मारुतिस्तत्र तौ चाप्यहृषतां ततः ।
प्राहैष्टां हिमवत्पृष्ठे सर्वौषधिगिरिं ततः ॥ १०४ ॥

१०४. आयिष्टेति ॥ मारुतिस्तत्रायिष्ट । सोऽप्यन्विष्यन्नागतः । अय गतौ । आङ्पूर्वाल्लुङि तङ् । ततो हनूमदागमनात् जाम्बवद्विभीषणावहृषतां हृष्टौ । हृष तोषे । पुषादित्वादङ् । उत्तरार्धमुत्तरश्लोकशेषः ॥

तौ हनूमन्तमानेतुमोषधिं मृतजीविनीम् ।
सन्धानकरणीं चान्यां विशल्यकरणीं तथा ॥ १०५ ॥

१ जाम्बवानीषदुत्प्राणीत् T₃, T₄, T₂, D., Com.
२ पौलस्त्योऽशुश्रवत्तस्य Com. पौलस्त्योऽशुश्रवत्तं च D.
३ तं तु T₂.
४ चाप्याभाषतां ततः T₃.
५ प्रति T₃.
६ क्षतसंधानकरणीं विश॰ Com., T₂.

१०५. ताविति ॥ तौ जाम्बवद्विभीषणौ मृतजीविनीं मृतसंजीविनीं क्षतसन्धानकरणीं भग्नाङ्गानां पुनः सन्धात्रीं तथा विशल्यकरणीमन्तर्निलीनशल्याङ्गानां निःशल्यत्वसंपादिनीं चौषधिमानेतुं हनूमन्तं हिमवत्पृष्ठे स्थितं सर्वौषधीनां गिरिं प्रति प्राहैष्टां प्रहितवन्तौ । हिनोतेः प्रपूर्वात् लुङि सिचि वृद्धिः ॥

प्रोदपाति नभस्तेन स च प्रापि महागिरिः ।
यस्मिन्नज्वालिषू[१]रात्रौ महौषध्यः सहस्रशः ॥ १०६ ॥

१०६. प्रेति ॥ तेन हनूमता नभः प्रोदपाति खं प्रत्युत्पतितं स महागिरिश्च प्रापि प्राप्तः "चिण् भावकर्मणोः" ॥ यस्मिन्गिरौ रात्रौ महौषध्यः सहस्रशोऽज्वालिषुः प्रज्वलिताः । लान्तत्वाद्वृद्धिः ॥

निरचायि यदा भेदो नौषधीनां हनूमता ।
स[२]र्व एव समाहारि तदा शैलः सहौषधिः ॥ १०७ ॥

१०७. निरिति ॥ यदा हनूमता ओषधीनां भेदः औषध्यन्तराद्विशेषो न निरचायि न निश्चितस्तदा सहौषधिरोषधिसहितः कृत्स्न एव शैलः समाहारि समाहृतः आनीत इत्यर्थः ॥

[३]प्राणिषुर्निहताः केचित् केचि[४]च्च प्रोदमीलिषुः ।
तमोऽन्येऽहासिषुर्योधा व्यजृम्भिषत चापरे ॥ १०८ ॥

१०८. सुप्रेति ॥ ततस्तदोषधिसन्निधानादेव केचित् सुष्ठु प्राणिषुरजीविषुः । अन प्राणने । सिच इट् ॥ "झेर्जुस्" ॥ केचित् प्रोदमीलिषुर्नेत्रे उन्मीलितवन्तः । मीलतेः सिजादि पूर्ववत् । अन्ये योधास्तमो मोहमहासिषुरत्याक्षुः । ओहाक् त्यागे सगिटौ । अपरे व्यजृम्भिषत गात्रविनामं चक्रुः । जृभि गात्रविनामे । लुङि तङि सिच इट् ॥

१ °न्नज्वालिषुर्दीप्ता D., T_2, T_3.
२ कृत्स्न C., D., T_3, Com., T_2.
३ प्राणिषुस्ते ततः T_3. सुप्राणिषुस्ततः केचित् Com. उत्प्राणिषुस्ततः T_2.
४ केचिच्च T_3.

अजिघ्रपंस्तथैवान्यानोषधीरालिपंस्तथा ।
एवं तेऽचेतिषुः सर्वे वीर्यं चाधिषताधिकम् ॥ १०९ ॥

१०९. अजिघ्रपन्निति ॥ तथैवान्यान्योधानोषधीरजिघ्रपन्नाघ्रापयन् प्राणेन तद्गन्धमग्राहयन्नित्यर्थः । अत एव बुद्ध्यर्थत्वात् "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् । घ्रा गन्धोपादाने ॥ "अर्त्तिह्री—" इत्यादिना पुगागमः ॥ णौ चङि "जिघ्रतेर्वा" इति विकल्पादुपधाया इकारः । तथा ओषधीरलिम्पन् । लिप उपदेहे ॥ "लिपिसिचिह्वश्च" इत्यङ् ॥ एवं ते सर्वे योधा अचेतिषुः संज्ञां लेभिर इत्यर्थः ॥ चिती संज्ञाने । अधिकं वीर्यं बलं चाधिषत दधिरे । दधातेर्लुङि तङि "स्थाघ्वोरिच्च" इतीत्वे "ह्रस्वादङ्गात्" इति सलोपः । सिचः कित्त्वान्न गुणः ॥

अजिह्लदत् स काकुत्स्थौ शेषांश्चाजीजिवत् कपीन् ।
हनूमानथ ते लङ्कामग्निनादीदिपन् द्रुतम् ॥ ११० ॥

११०. अजिह्लददिति ॥ हनूमान् काकुत्स्थौ चाजिह्लदद्दाह्लादयति स्म । ह्लादी सुखे च । णौ चङ्युपधाह्रस्वः । अभ्यासकार्यं च । शेषान् कपींश्चाजीजिवत् जीवयति स्म । अथ जीवितास्ते कपयो द्रुतं लङ्कां वह्निनादीदिपनजिज्वलन् । उभयत्र णौ चङि "भ्राज—" इति विकल्पादुपधाह्रस्वः ॥

समनात्सीत्ततः सैन्यममार्जीद्भल्लतोमरम् ।
अमार्क्षीच्चासिपत्रादीनवेभासत् परश्वधान् ॥ १११ ॥

१११. समिति ॥ ततो लङ्कादाहानन्तरं सैन्यं कर्त्तृ समनात्सीत् संनह्यति स्म । णह बन्धने ॥ "नहो धः" ॥ चर्त्वम् । हलन्तलक्षणा वृद्धिः । भल्लतोमरं कर्म अमार्जीन्ममार्जोत्तेजयामास । मृजूष् शुद्धौ । ऊदित्वादिट्पक्षे "इट ईटि" इति सलोपः । असिपुत्र्यादींश्च । 'स्याच्छस्त्री चासि-

१ °रालिपंस्तथा D., T_3, Com.
२ अजिह्लदच्च T_3, T_2.
३ लङ्कां वह्निना T_3, T_4, D., Com.
४ °पुत्र्यादी° Com.
५ °दीनहासीच्च T_2.
६ परश्वधम् D.

पुत्री च छुरिका चासिधेनुका' इत्यमरः। अमार्क्षीत् । इडभावपक्षे "व्रश्च—" इत्यादिना षत्वम्। कत्वादि। उभयत्रापि "मृजेर्वृद्धिः"। परश्वधान् परशूंश्चावभासद्भासयामास । भ्राजादिविकल्पादुपधाह्रस्वः ॥

कुम्भकर्णसुतौ तत्र समनाद्धां[1] महाबलौ ।
निकुम्भश्चैव कुम्भश्च[2] प्रापतां तौ प्लवङ्गमान् ॥ ११२ ॥

११२. कुम्भेति ॥ तत्र सैन्ये महाबलौ कुम्भकर्णसुतौ कुम्भश्चैव निकुम्भश्च समनाद्धां संनद्धौ। पूर्ववद्धत्वं वृद्धिश्च ॥ "झषस्तथोर्धोऽधः" ॥ तौ कुम्भनिकुम्भौ प्लवङ्गमान् प्रापतां प्राप्तौ ॥ लृदित्वादङ् ॥

अगोपिष्टां पुरीं लङ्कामगौप्तां रक्षसां बलम् ।
असा[3]क्तामायुधानीकमनैष्टां च क्षयं द्विषः ॥ ११३ ॥

११३. अगोपिष्टामिति ॥ तौ लङ्कां पुरीमगोपिष्टां गुप्तवन्तौ। गुपू रक्षणे। ऊदित्वाद्विकल्पादिट् ॥ "नेटि" इति वृद्धिप्रतिषेधः ॥ रक्षसां बलमगौप्ताम्। इडभावपक्षे "झलो झलि" इति सलोपः। आयुधानीकमायुधसमूहमत्याक्तां त्यक्तवन्तौ च। त्यज विसर्गे। हलन्तलक्षणा वृद्धिः ॥ "झलो झलि" इति सलोपः ॥ द्विषः शत्रून् क्षयमनैष्टां नीतवन्तौ च। णीञ् प्रापणे। सिचि वृद्धिः ॥

अकोकूयिष्ट तत्सैन्यं प्रपलायिष्ट चा[4]कुलम् ।
अ[5]च्युतच्च क्षतं[6] रक्तं हतं चाध्यशयिष्ट[7] गाम् ॥ ११४ ॥

११४. अकोकूयिष्टेति ॥ तत्सैन्यं कपिबलमकोकूयिष्ट भृशं चुक्रोश। कु शब्दे ॥ "धातोरेकाचः—" इति भृशार्थे यङ् ॥ "सन्यङोः" इति द्विर्वचनम् ॥ "गुणो यङ्लुकोः" इत्यभ्यासस्य गुणः ॥ "न कवतेर्यङि"

१ समनद्धां N., E., T1, T2, T3, B. E3.
२ कुम्भश्चैव निकुम्भश्च T2.
३ अत्याक्तां चायु° T2.
४ वाकुलम् D.
५ अश्च्युतच्च D., Com.
६ क्षताद्रक्तं D.
७ चाध्याशयिष्ट T2.

इति चुत्वप्रतिषेधः ॥ "अकृत्सार्वधातुकयोर्दीर्घः" ॥ यङन्ताल्लुङि तङि सिच इट् ॥ "उपसर्गस्यायतौ" इति लत्वम् ॥ क्षतं प्रहृतं सत् रक्तमश्चुतत् क्षरितं च । श्चुतिर् क्षरणे ॥ "इरितो वा" इति विकल्पादङ् ॥ हतं सत् गां भुवमध्यशयिष्ट भुवि शयितमित्यर्थः ॥ "अधिशीङ्—" इति कर्मत्वम् ॥

अङ्गदेनाहसातां तौ[1] युध्यकम्पनकम्पनौ ।
अभ्यार्दीद्[2]वालिनः पुत्रं प्रजङ्घोऽपि[3] समत्सरः ॥ ११५ ॥

११५. अङ्गदेनेति ॥ तौ प्रसिद्धावकम्पनकम्पनौ युध्यङ्गदेनाहसातां हतौ । हन्तेः कर्मणि लुङि तङि सिचः कित्त्वादनुनासिकलोपः । विकल्पाद्वधादेशाभावः । अथ समत्सरः सवैरः प्रजङ्घो वालिनः पुत्रमङ्गदमभ्यार्दीत् प्रजहार । अर्द हिंसायाम् ॥

तस्याप्यबेभिदिष्टासौ मूर्धानं मुष्टिनाङ्गदः ।
अहार्षीच्च[4] शिरः क्षिप्रं यूपाक्षस्य निराकुलः ॥ ११६ ॥

११६. तस्येति ॥ तस्य प्रजङ्घस्यापि मूर्धानमसावङ्गदो मुष्टिनाबेभिदिष्टात्यर्थं भिन्नवान् । भिदेर्यङन्ताल्लुङि तङि सिचि इट् । अल्लोपयलोपौ । तथा निराकुलः सन् क्षिप्रं यूपाक्षस्य शिरश्चाहार्षीत् जहार । हरतेर्लुङि सिचि वृद्धिः ॥

शरीरं लोहिताक्षस्य न्यभाङ्क्षीद्[5] द्विविदस्तदा[6] ।
क्रुद्धः कुम्भस्ततोऽभैत्सीन्मैन्दं सद्विविदं शरैः ॥ ११७ ॥

११७. शरीरमिति ॥ द्विविदो नाम वानरो लोहिताक्षस्य नाम राक्षसस्य शरीरं क्षितौ न्यभाङ्क्षीत् क्षितौ निपात्य बभञ्जेत्यर्थः । ततोऽनन्तरं कुम्भः क्रुद्धः सन् सद्विविदं मैन्दं मैन्दद्विविदौ वानरौ भ्रातरौ शरैरभैत्सीद्बिभेद । अङ्भावपक्षे हलन्तलक्षणा वृद्धिः ॥

---

१ द्वौ T_4.
२ अत्यार्दी° C.
३ प्रजङ्घोऽथ T_2, T_4.
४ अहासीच्च E_3.
५ न्यभाङ्क्षीत् T_3.
६ क्षितौ T_2, T_3, D., Com.

आघूर्णिष्टां क्षतौ क्ष्मां च तावाशिश्रियतामुभौ।
मातुलौ विह्वलौ दृष्ट्वा कुम्भं वालिसुतो नगैः॥ ११८॥

११८. अघूर्णिष्टामिति॥ तावुभौ मैन्दद्विविदौ क्षतौ शरक्षतौ सन्तौ अघूर्णिष्टां भ्रान्तवन्तौ क्ष्मामशिश्रियतां श्रितौ। श्रयतेः "णिश्रि—" इत्यादिना चङि इयङादेशः। अथ वालिसुतोऽङ्गदो विह्वलौ मूढौ मातुलौ मातृभ्रातरौ। 'मातुर्भ्राता तु मातुलः' इत्यमरः॥ "पितृव्यमातुल—" इत्यादिना निपातः॥ दृष्ट्वा कुम्भं नगैर्वृक्षैः प्रोर्णावीत् इत्युत्तरश्लोकादाकृष्य योज्यम्। आच्छादयामासेत्यर्थः। ऊर्णुञ् आच्छादने॥ "विभाषोर्णोः" इति ङित्वाभावपक्षे "ऊर्णोतेर्विभाषा" इति पाक्षिकवृद्धिः॥

प्रौर्णावीच्छरवर्षेण तानपौहीन्निशाचरः।
वानरानैजिहद्रामस्तूर्णं रक्षितुमङ्गदम्॥ ११९॥

११९. प्रौर्णावीदिति॥ निशाचरः शरवर्षेण तान् नगानपौहीदपोहितवान् निरस्तवानित्यर्थः। 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति वा वचनात् परस्मैपदम्। अथ रामोऽङ्गदं रक्षितुं तूर्णं वानरानैजिहत्। ईहेर्णौ चङ्। गतमेतत्॥

द्रुतमत्रास्त सुग्रीवो भ्रातृव्यं शत्रुसंकटात्।
मुष्टिना कौम्भकर्णिं च क्रुद्धः प्राणैरतित्यजत्॥ १२०॥

१२०. द्रुतमिति॥ भ्रातुरपत्यं पुमान् भ्रातृव्यस्तमङ्गदम्॥ "भ्रातुर्व्यच्च" इति व्यत्प्रत्ययः॥ शत्रुसंकटात् शत्रुसंबाधात् द्रुतमत्रास्त अरक्षीत्। त्रैङ् पालने। "आदेचः—" इत्यात्वम्॥ सिच्। किं च क्रुद्धः सन्

१ अघूर्णिष्टां Com.
२ तावशिश्रयता॰ T_3.
३ विकलौ D.

कौम्भकर्णिं कुम्भं मुष्टिना करणेन प्राणैः प्रयोज्यैरातित्यजत् त्याजयामास । मुष्टिघातेन जघानेत्यर्थः । त्यज विसर्गे । णौ चङ्युपधाह्रस्वः ॥

निकुम्भो वानरेन्द्रस्य प्राहैषीत् परिघं ततः ।
हनू[1]मांश्चापतन्तं तमभाङ्क्षीद्भो[2]गिभीषणम् ॥ १२१ ॥

१२१. निकुम्भ इति ॥ ततः कुम्भमरणानन्तरं निकुम्भो वानरेन्द्रस्य परिघं प्राहैषीत् प्रजिघाय । हि गतौ । सिचि वृद्धिः । हनूमानापतन्तं भोगिभीषणं तं परिघमभाङ्क्षीद्बभञ्ज । भञ्जो आमर्दने । सिचि हलन्तलक्षणा वृद्धिः । कुत्वषत्वे ॥

प्रौ[3]र्णुवी[4]त्तेजसारातिमरा[5]सीच्च भ[6]यंकरम् ।
ग्रीवां चास्य तथाक्रा[7]क्षीदजिजीवद्यथा न [8]तम् ॥ १२२ ॥

१२२. प्रौर्णवीदिति ॥ तेजसा प्रतापेनारिं निकुम्भं प्रौर्णवीत् प्रावृणोच्च । ऊर्णोतेर्लुङि इटो ङित्वाभावपक्षे वृद्धिविकल्पात्पक्षे गुणः । अत्रायं विवेकः । 'अङित्वे गुणवृद्धी स्तः और्णावीदौर्णवीदिति । ङित्वे तु तदभावे स्यात् उवङे और्णुवीदिति ॥ इति त्रैरूप्यमूर्णोतेर्वर्ण्यते शाब्दिकैरिति' ॥ भयंकरं यथा भवति तथा अरसीद्नादीच्च । अस्य निकुम्भस्य ग्रीवां तथा तेन प्रकारेणाक्राक्षीदाकृष्टवांश्च । कृष विलेखने ॥ "अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्" इति पक्षे अमागमः ॥ हलन्तलक्षणा वृद्धिः । स राक्षसो यथा येन प्रकारेण नाजिजीवत् नाजीवदित्यर्थः । ग्रीवां भङ्क्त्वा हतवानित्यर्थः । णिजर्थोऽत्र न विवक्षितः । जीवेर्णौ चङि भ्राजादिना विकल्पान्नोपधाह्रस्वः ॥

---

१ हनूमाना° T_3, T_4.
२ °भङ्क्षीदतिभीषणम् T_2.
°भाङ्क्षीद्भोगिभूषणम् T_3.
३ प्रौणावीद्रक्षसा चारिनरा° T_3, T_4.
प्रौर्णवीत्ते° Com.
४ तेजसा चारिमरा° T_2, D.
५ °मरसीच्च Com.
६ भयंकरः T_2.
७ तथाक्रामीद° T_3.
८ सः D., T_2, T_3, T_4, Com.

समगत कपिसैन्यं[1] संमदेनातिमात्रं[2]
विटपिहरिणनाथः[3] सिद्धिमौहिष्ट नित्याम्।
नृपतिमतिररंस्त प्राप्तकामेव हर्षा-
द्रजनिचरपतीनां संततोऽतायि[4] शोकः॥ १२३॥

१२३. समगतेति॥ हरिसैन्यं कपिसेना अतिमात्रं संमदेन संतोषेण सह समगत दुर्जयविजयादिति भावः॥ "समो गम्यृच्छि—" इत्यादिना संपूर्वादकर्मकाल्लुङि "वा गमः" इति पक्षे सिचः कित्त्वादनुनासिकलोपः॥ "ह्रस्वादङ्गात्" इति सिचो लुक्॥ विटपिहरिणनाथः शाखामृगपतिः सुग्रीवः सिद्धिं कार्यसिद्धिं नित्यामवश्यंभाविनीमौहिष्ट वितर्कितवान्। 'वितर्कयत्यूहयति' इति भट्टमल्लः। ऊह वितर्के। लुङि तङि सिच इट्। आड्वृद्धिः। नृपतिमतिः रामचित्तवृत्तिः प्राप्तकामेव संपन्नमनोरथेव हर्षादुत्साहादरंस्त समतोषीत्। रमेः सिचः कित्त्वाभावान्नानुनासिकलोपः। रजनिचरपतीनां रावणादीनां शोकः संततोऽविच्छिन्नः सन्नतायि ववृधे। तायृ संतानपालनयोः। संतानोऽत्र वृद्धिः। अन्यथा संततशब्देन पौनरुक्त्यात्॥ "दीपजन—" इत्यादिना कर्त्तरि लुङि तङि च्लेश्चिणादेशः॥

इति भट्टिकाव्ये तिङ्काण्डे लुङ्विलसितो नाम पञ्चदशः सर्गः॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने लुङ्विलासो नाम पञ्चदशः सर्गः॥

---

१ हरिसैन्यं Com.
२ स्यन्दनेना° T2.
३ विटपि D., Com.
४ ऽथायि C., E3, B., T2.

॥ श्रीः ॥

अथ षोडशः सर्गः ।

ततः प्ररुदितो राजा रक्षसां हतबान्धवः ।
किं करिष्यामि राज्येन सीतया किं करिष्यते ॥ १ ॥

१. अथ लृड्विलासमधिकृत्याह । तत इत्यादि ॥ ततो निकुम्भवधानन्तरं हतबान्धवो रक्षसां राजा रावणः प्ररुदितः प्रकर्षेण रोदितुं प्रारब्धवानित्यर्थः । आदिकर्मणि क्तः ॥ "कर्त्तरि च" इति कर्त्तरि क्तः । प्रागिन्द्रजिद्विजयाद्रोदनप्रकारमेवाह । अद्य राज्येन किं करिष्यामि सीतया वा किं करिष्यते । करोतेः कर्मणि लृट् । उभयत्र न किञ्चिदित्यभिप्रायः । सामान्येन सर्वत्र "लृट् शेषे च" इति लृट् । क्वचिदन्यत्रापि वक्ष्यते । सर्वत्र "स्यतासी लृलुटोः" इति स्यप्रत्ययः ॥

अतिकाये हते वीरे प्रोत्सहिष्ये न जीवितुम् ।
ह्रेपयिष्यति कः शत्रून् केन जायिष्यते यमः ॥ २ ॥

२. अतीति ॥ वीरेऽतिकाये हते सति जीवितुं न प्रोत्सहिष्ये न शक्ष्यामि ॥ "शकधृष—" इत्यादिना तुमुन् ॥ तथा हि कः शक्रं ह्रेपयिष्यति व्रीडयिष्यति । ह्री लज्जायाम् ॥ "अर्त्तिह्री—" इत्यादिना पुगागमः । पुगन्तगुणः । अद्य केन यमोऽन्तको जायिष्यते जेष्यते । जि जये । कर्मणि लृट् ॥ "स्यसिच्सीयुट्—" इत्यादिना चिण्वदिटि वृद्धिः ॥

अतिकायादृिना पाशं को वा छेत्स्यति वारुणम् ।
रावणं मंस्यते को वा स्वयंभूः कस्य तोक्ष्यति ॥ ३ ॥

---

१ शत्रुं T4. शक्रं Com.

३. अतीति ॥ अतिकायाद्विना तं विनेत्यर्थः ॥ "पृथग्विना—" इत्यादिना पक्षे पञ्चमी ॥ वरुणस्येमं वारुणं पाशं पाशायुधं को वा छेत्स्यति त्रोटयिष्यति। को वा रावणं मंस्यते ज्ञास्यते गणयिष्यतीत्यर्थः। मन ज्ञाने। स्वयंभूर्ब्रह्मा कस्य तोक्ष्यति प्रसत्स्यति। स्वयंभूसंतोषणसमर्थः क इत्यर्थः। तुष तुष्टौ। लृटि स्य ॥ "षढोः कः सि" इति कत्वम्॥ "इण्कोः" इति षत्वम् ॥

श्लाघिष्ये केन को बन्धून्नेष्यत्युन्नतिमुन्नतः ।
कः प्रेष्यति पितॄन् काले कृत्वा कत्थिष्यते न कः ॥ ४ ॥

४. श्लाघिष्य इति ॥ अद्याहं केन श्लाघिष्ये केन सता श्लाघ्यो भविष्यामि। उन्नतो गुणोन्नतः को बन्धूनुन्नतिं नेष्यति। कुलकीर्त्तिकरः क इत्यर्थः। काले परोक्षकाले कः पितॄन् प्रेष्यति तर्पयिष्यति। प्रीञ् तर्पणे। लृटि स्यप्रत्यये गुणः। कृत्वा को न कत्थिष्यते कत्थनं न करिष्यति। महत्कर्म कृत्वापि अविकत्थन इत्यर्थः ॥

उद्यंस्यति[1] हरिर्वज्रं विचरिष्यति निर्भयः[2] ।
भोक्ष्यते यज्ञभागांश्च शूरमानं[3] न[4] वक्ष्यति ॥ ५ ॥

५. उदिति ॥ हरिरिन्द्रो वज्रमुद्यंस्यते उद्यमयिष्यति ॥ "समुदाङ्भ्यो यमोऽग्रन्थे" इति तङ्। कचित्पुस्तकेषु परस्मैपदपाठः प्रामादिकः। अद्य निर्भयो विचरिष्यति। यज्ञभागांश्च भोक्ष्यते अभ्यवहरिष्यति ॥ "भुजोऽनवने" इति तङ् ॥ शूरमानं शूराभिमानं च वक्ष्यति वोढा ॥

रविस्तप्स्यति निःशङ्कं[5] वास्यत्यनियतं मरुत् ।
निर्वर्त्स्यर्त्यृतुसंघातः[6] स्वेच्छयेन्दुरुदेष्यति ॥ ६ ॥

६. रविरिति ॥ रविर्निःशङ्कस्तप्स्यति तीव्रं द्योतिष्यते न तु पूर्ववन्मन्दमित्यर्थः। तप संतापे। मरुत् वायुरप्यनियतं स्वच्छन्दं वास्यति

१ उद्यंस्यते Com.
२ निर्भयम् T2.
३ शूरमानश्च T2.
४ च C., Com.
५ निःशङ्को C., Com.
६ न वर्त्स्यं° Com.

संचरिष्यति न तु पूर्ववन्मन्दमेवेत्यर्थः । ऋतूनां संघातः सदा संभूयवृत्तिर्न वर्त्स्यति न वर्त्तिष्यते । क्रमवृत्तिर्भविष्यतीत्यर्थः ॥ "वृद्भ्यः स्यसनोः" इति वा परस्मैपदम् ॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः ॥ इन्दुश्च स्वेच्छयोदेष्यति न तु सदा संपूर्ण इत्यर्थः ॥

तीव्रं स्यन्दिष्यते मेघैरुग्रं वर्त्तिष्यते यमः ।
अतिकायस्य मरणे किं भविष्यति नान्यथा ॥ ७ ॥

७. तीव्रमिति ॥ मेघैस्तीव्रं स्यन्दिष्यते वर्षिष्यते न तु रजःशमनमात्रमित्यर्थः । स्यन्दू प्रस्रवणे । भावे लृट् । यमोऽन्तकश्चोग्रं वर्त्तिष्यते सर्वान्मारयिष्यतीत्यर्थः । तथा हि अतिकायस्य मरणे सर्वसाकल्ये सतीति भावः । किं नामान्यथा न भविष्यति सर्वं भविष्यत्येव नियन्तुरभावादित्यर्थः ॥

उन्मीलिष्यति चक्षुर्मे वृथा यद्विनयागतम् ।
आज्ञालाभोन्मुखं नम्रं न द्रक्ष्यति नरान्तकम् ॥ ८ ॥

८. उदिति ॥ किं च वृथा मे चक्षुरुन्मीलिष्यति यद्यस्माद्विनयेनागतमाज्ञालाभोन्मुखं कैंकर्योत्सुकमित्यर्थः । नम्रं प्रणतं नरान्तकं न द्रक्ष्यति । अतो मे निष्फलं चक्षुरुन्मेषणमिति भावः ॥

धिङ् मां त्रिशिरसा नाहं संदर्शिष्येऽद्य यत्पुनः ।
घानिष्यन्ते द्विपः केन तस्मिन्पञ्चत्वमागते ॥ ९ ॥

९. धिगिति ॥ मामभाग्यं धिक् योऽहमद्य त्रिशिरसा पुनर्न संदर्शिष्ये न संद्रक्ष्ये । दृशेः कर्मणि लृटि चिण्वदिटि टेरेत्वम् । तस्मिन् त्रिशिरसि पञ्चत्वमागते मृते सति केन द्विषो घानिष्यन्ते हनिष्यन्ते । अत्रापि चिण्वदिट् ॥

शत्रुभिर्निहते मत्ते द्रक्ष्येऽहं संयुगे सुखम् ।
युद्धोन्मत्ताद्विना शत्रून् समास्कन्त्स्यति को रणे ॥ १० ॥

१ करिष्यन्ति N., D., E3.

१०. शत्रुभिरिति ॥ मत्ते मत्ताख्ये राक्षसे निहते सति अहं संयुगे शत्रुभिः सुखं निःशङ्कं द्रक्ष्ये ईक्षिष्ये । दृशेः कर्मणि लृटि चिण्वदिड्भावपक्षे रूपम् । युद्धोन्मत्ताह्विना रणे कः शत्रून् समास्कन्त्स्यति अभियोक्ष्यत इत्यर्थः । स्कन्दिर् गतिशोषणयोः । दकारस्य चर्त्वम् ॥

आह्वास्यते विशङ्को मां योत्स्यमानः शतक्रतुः ।
प्रकल्प्स्यति च तस्यार्थो निकुम्भे दुर्हणे हते ॥ ११ ॥

११. आह्वास्यत इति ॥ दुःखेन हन्यत इति दुर्हणो दुर्निबर्हणः ॥ "ईषद्—" इत्यादिना खल्प्रत्ययः ॥ "हन्तेः" इति णत्वम् ॥ तस्मिन् निकुम्भे हते शतक्रतुरिन्द्रो योत्स्यमानो युद्धं करिष्यमाणो विशङ्को मामाह्वास्यते ॥ "स्पर्धायामाङः" इति तङ् ॥ तस्येन्द्रस्यार्थः प्रयोजनं प्रकल्प्स्यति सेत्स्यतीत्यर्थः ॥ "लृटि च क्लृपः" इति वा तिप् ॥ "तासि च क्लृपः" इतीट्प्रतिषेधः ॥

कल्पिष्यते हरेः प्रीतिर्लङ्का चोपहनिष्यते ।
देवान्तक त्वया सक्तो रिपोर्यास्यामि वश्यताम् ॥ १२ ॥

१२. कल्पिष्यत इति ॥ किं च कुम्भं निपातितं श्रुत्वा हरेरिन्द्रस्य प्रीतिः कल्पिष्यते । तिपो विकल्पात्तङ् । अत एव नेड्भावः । लङ्का चोपहनिष्यते उपप्लोष्यते । हन्तेः कर्मणि लृटि "ऋद्धनोः स्ये" इतीट् । इह सुरैरागंस्यते आयास्यते च । गमेर्भावे लृट् ॥ "गमेरिट् परस्मैपदेषु" इति नियमान्न तङ् ॥

मरिष्यामि विजेष्ये वा हताश्चेत्तनया मम ।
हनिष्यामि रिपूंस्तूर्णं न जीविष्यामि दुःखितः ॥ १३ ॥

१३. मरिष्यामीति ॥ मम तनया मृताश्चेदहमपि मरिष्यामि ॥ "म्रियतेर्लुङ्लिङोश्च" इति नियमान्न तङ् ॥ विजेष्ये वा ॥ "विपराभ्यां जेः" इति तङ् ॥ तूर्णं रिपून् हनिष्यामि दुःखितो न जीविष्यामि ॥

---

१ सुरैरागंस्यते चेह श्रुत्वा कुम्भं निपातितम् T₃, T₄, Com.
२ मृता° Com.
३ हरिष्यामि T₃.
४ रिपून् सर्वान् D.

स्मेष्यन्ते मुनयो देवाः कथयिष्यन्ति चानिशम् ।
दशग्रीवस्य दुर्नीतैर्[1]विनष्टं रक्षसां कुलम् ॥ १४ ॥

१४. स्मेष्यन्त इति ॥ दशग्रीवस्य दुर्नीतैर्दुर्नयैः रक्षसां कुलं विनष्टमिति मुनयो महर्षयो देवाश्च स्मेष्यन्ते हसिष्यन्ति । ष्मिङ् ईषद्धसने । ङित्वात्तङ् । अनिशं कथयिष्यन्ति च कथात्वेन वर्णयिष्यन्ति चेत्यर्थः ॥

केन संभावितं तात कुम्भकर्णस्य राघवः ।
रणे[2] कर्त्स्यति गात्राणि मर्माणि च वि[3]तर्त्स्यति ॥ १५ ॥

१५. केनेति ॥ हे तात कुम्भकर्ण राघवः कुम्भकर्णस्य गात्राणि रणे कर्त्स्यति कर्त्तिष्यति । कृती छेदने । मर्माणि च विचर्त्स्यति विचर्त्तिष्यति । चृती छेदने । वितर्त्स्यतीति पाठे तृद् हिंसायां सर्वत्र "सेऽसिचि कृत—" इत्यादिविकल्पादिडभावः । इतीदं केन संभावितं वितर्कितम् । केनापि योग्यताबुद्धिं नारोपितमित्यर्थः ॥

पतिष्यति क्षितौ भानुः पृथिवी तोलयिष्यते ।
नभस्वान् भङ्क्ष्यते व्योम मुष्टिभिस्ताडयिष्यते ॥ १६ ॥

१६. असंभावितत्वमेव श्लोकत्रयेण सनिदर्शनमाह । पतिष्यतीत्यादि ॥ भानुः क्षितौ पतिष्यति अधो गमिष्यतीत्यर्थः । पृथिवी तोलयिष्यते उन्मास्यते हस्ताभ्यामुत्क्षेप्स्यते इत्यर्थः । तुल उन्माने । चुरादिः । कर्मणि लृट् । नभस्वान् वायुः भङ्क्ष्यते स्वयं प्रभञ्जनोऽन्यैर्भज्यते चेदित्यर्थः । भञ्जो आमर्दने । कर्मणि लृट् । कुत्वषत्वे । व्योम मुष्टिभिस्ताडयिष्यते । कर्मण्येव लृट् ॥

इन्दोः स्यन्दिष्यते वह्निः समुच्छोक्ष्यति सागरः ।
जलं धक्ष्यति तिग्मांशोः स्यन्त्स्यन्ति तमसां चयाः ॥ १७ ॥

---

१ दुर्नीतेर्वि॰ D., N.
२ वने T₂.
३ विचर्त्स्यति Com.

१७. इन्दोरिति ॥ इन्दोर्वह्निः स्यन्दिष्यते स्राविष्यति । स्यन्दू प्रस्रवणे ॥ "वृद्भ्यः स्यसनोः" इति विकल्पात्तङ् ॥ सागरः समुच्छोक्ष्यति शोषं गमिष्यति । शुष शोषणे । अनिट् । स्यप्रत्यये लघूपधगुणः "षढोः—" इति कत्वे षत्वम् ॥ जलं धक्ष्यति भस्मीकरिष्यति । दह भस्मीकरणे । लृटि स्यप्रत्यये घत्वकत्वषत्वभष्भावाः । तिग्मांशोः सूर्यात् तमसां चयाः स्यन्त्स्यन्ति स्यन्दिष्यन्ते ॥ "वृद्भ्यः स्यसनोः" इति स्यन्देर्वा तिप् ॥ "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः । चर्त्वम् ॥

कुम्भकर्णो रणे पुंसा क्रुद्धः परिभविष्यते ।
संभावितानि नैतानि कदाचित् केनचिज्जने ॥ १८ ॥

१८. कुम्भेति ॥ रणे क्रुद्धः कुम्भकर्णः पुंसा केनचित्पुरुषेण परिभविष्यते । कर्मणि लृट् । एतानि भानुपतनादीनि कुम्भकर्णपरिभवान्तानि जने लोके कदाचित् केनचिदपि जनेन न संभावितानि न वितर्कितानि न प्रमितानीति किमु वक्तव्यमित्यर्थः । अत्र भानुपतनादिकल्पः कुम्भकर्णपरिभव इति सादृश्याक्षेपान्निदर्शनालंकारः ॥

कुम्भकर्णे हते लङ्कामारोक्ष्यन्ति प्लवङ्गमाः ।
दङ्क्ष्यन्ति राक्षसान्[१] दृप्ता भङ्क्ष्यन्ति च समाश्रमान्[२] ॥ १९ ॥

१९. कुम्भकर्ण इति ॥ कुम्भकर्णे हते सति दृप्ताः प्लवङ्गमा लङ्कामारोक्ष्यन्ति आक्रमिष्यन्तीत्यर्थः । रुह बीजजन्मनि । ढत्वकत्वादि । राक्षसान् दङ्क्ष्यन्ति दन्तैर्दारयिष्यन्ति । दंश दशने । व्रश्चादिषत्वे कत्वषत्वे । समाश्रयान् गृहान् भङ्क्ष्यन्ति च । भञ्जो आमर्दने । कुत्वषत्वे ॥

चर्त्स्यन्ति[३] बालवृद्धांश्च नर्त्स्यन्ति च मुदा युताः ।
तेन राक्षसमुख्येन[४] विना तान्[५] को निरोत्स्यति[६] ॥ २० ॥

---

१ °दृप्तान् T4. °सानासान् T3.
२ समाश्रयान् T4, D., Com.
३ नर्त्स्यन्ति K., Com. Th. has चर्त्स्यन्ति.
४ राक्षसवीरेण D.
५ कस्तान् D.
६ विरोत्स्यति Com.

२०. तत्स्यन्तीति[1] ॥ बालवृद्धांस्तत्स्यन्ति[2] हिंसिष्यन्तीत्यर्थः । तृह[3] हिंसायाम् । मुदा युताः सन्तो नर्त्स्यन्ति नर्तिष्यन्ति । नृती गात्रविक्षेपे । लघूपधगुणः । राक्षसमुख्येन तेन कुम्भकर्णेन विना तान् वानरान् को विरोत्स्यति निवारयिष्यति । रुधिर् आवरणे । गुणश्चर्त्वं ॥

अमर्षो मे परः सीतां राघवः कामयिष्यते ।
च्युतराज्यात्सुखं तस्मात् किङ्किलासाववाप्स्यति ॥ २१ ॥

२१. अमर्ष इति ॥ राघवः सीतां कामयिष्यते संतोक्ष्यते । कमेर्णिङन्ता-ल्लृट् । तत्र मे परो महानमर्षः क्रोधः ॥ "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि" इत्यमर्षे लृट् ॥ च्युतं राज्यं यस्मात्तस्माच्च्युतराज्यात् राज्यभ्रष्टा-त्तस्माद्रामादसौ सीता किं किल सुखमवाप्स्यति । न किञ्चित् संभा-वितमित्यर्थः ॥ "किङ्किलास्त्यर्थेषु लृट्" इत्यनवक्लृप्तौ किंकिलशब्द उपपदे लृट् ॥ अनवक्लृप्तिरसंभावना ॥

मारयिष्यामि वैदेहीं खादयिष्यामि राक्षसैः ।
भूमौ वा निखनिष्यामि विध्वंसस्यास्य कारणम् ॥ २२ ॥

२२. मारयिष्यामीति ॥ यद्वा विध्वंसस्य नाशस्य कारणं वैदेहीं मार-यिष्यामि यद्वा राक्षसैः खादयिष्यामि आदयिष्यामि । 'आदिखाद्योः प्रतिषेधो वक्तव्यः' इति प्रतिषेधात् "गतिबुद्धि—" इत्यादिना अणि कर्तुर्न कर्मत्वम् । वा यद्वा भूमौ निखनिष्यामि गर्त्तं कृत्वा निक्षे-प्स्यामीत्यर्थः ॥

नानुरोत्स्ये जगल्लक्ष्मीं घटिष्ये जीवितुं न वा[3] ।
न रंस्ये विषयैः शून्ये भवने बान्धवैरहम् ॥ २३ ॥

२३. नेति ॥ सीता तावदास्तां जगल्लक्ष्मीं जगदैश्वर्यं च नानुरोत्स्ये नानुवर्त्तिष्ये नेच्छामीत्यर्थः । रुधिर् आवरणे । स्वरितेत्त्वात्तङ् ।

---

१ सीता राघवं T₂.
२ यतिष्ये T₄.
३ च Com.

---

1 चत्स्यन्तीति Th. Com.
2 °चत्स्यन्ति Th. Com.
3 चृत Th. Com.

गुणचर्स्वे । जीवितुं च न घटिष्ये न चेष्टिष्ये नोत्सहिष्य इत्यर्थः । घट चेष्टायाम् ॥ "शकधृष—" इत्यादिना तुमुन् । बान्धवैः शून्ये भवनेऽहं विषयैः शब्दादिभिर्न रंस्ये न क्रीडिष्यामि । रमु क्रीडायाम् ॥

मोदिष्ये कस्य सौख्येऽहं को मे मोदिष्यते सुखे ।
आदेयाः किंकृते भोगाः कुम्भकर्ण त्वया विना ॥ २४ ॥

२४. मोदिष्य इति ॥ हे कुम्भकर्ण त्वया विना कस्येष्टजनस्य सौख्ये सति मोदिष्ये संतोक्ष्यामि । मे मम सुखे सति को मोदिष्यते अन्योन्यसुखसाक्षित्वादावयोरिति भावः । किंकृते कस्य कृते भुज्यन्त इति भोगा विषया आदेया उपादेयाः । भोक्तुरभावादिति भावः ॥

याः सुहृत्सु विपन्नेषु मामुपैष्यन्ति[1] संपदः ।
ताः किं मन्युक्षताभोगा न विपत्सु विपत्तयः ॥ २५ ॥

२५. तद्वैयर्थ्यमेवाह । या इति ॥ सुहृत्सु बन्धुषु विपन्नेषु सत्सु याः सम्पदः समुदेष्यन्ति उद्भविष्यन्ति मन्युक्षतः शोकोपहत आभोग उपभोगो यासां तास्तादृशास्ताः संपदो विपत्सु विपत्तयो विपदनुबद्धा विपदो न किम् । ताः संपदः संपदो न किं तु कष्टतमा विपद एवेत्यर्थः ॥

विनङ्क्ष्यति पुरी क्षिप्रं तूर्णमेष्यन्ति वानराः ।
असंधित्सोस्तवेयमेतद्विभीषणसुभाषितम्[2] ॥ २६ ॥

२६. विनङ्क्ष्यतीति ॥ असंधित्सो रामेण संधातुमनिच्छतः । दधातेः सन्नन्तादुप्रत्ययः ॥ "सनि मीमा—" इत्यादिना इसादेशोऽभ्यासलोपश्च ॥ तवेयं पुरी लङ्का विनङ्क्ष्यति लोप्स्यति ॥ "व्रश्च—" आदिना षत्वादि ॥ वानराश्च तूर्णमेष्यन्ति । भविष्यन्मात्रे लृट् । केचित् क्षिप्रवचने लृडिति व्याचक्षते । आशंसानुवृत्तेस्तु का गतिश्चिन्त्या । इति यद्विभीषणभाषितं तदेतदापन्नमित्यर्थः ॥

---

१ समुदेष्यन्ति D., T₃, Com.

२ °स्तवेत्येतद्विभीषणभाषितम् Com.

°स्तवेत्येतत्तद्विभीषणभाषितम् T₃, T₄.

अर्थेन संभृता राज्ञा न भाषिष्यामहे वयम् ।
संयोत्स्यामह इत्येतत्प्रहस्तेन च भाषितम् ॥ २७ ॥

२७. अर्थेनेति ॥ हे राजन् अर्थेन धनेन संभृताः प्राणदानायैव सुष्ठु पुष्टा वयं परं मन्त्रकृत्यं परं न भाषिष्यामहे तत्रानधिकारात् । किं तु संयोत्स्यामहे सम्यक् प्रहरिष्याम इति यत्तदेतत् प्रहस्तेनापि भाषितं कृतं चेत्यर्थः ॥

मानुषो नाम पत्काषी राजानं पुरुषाशिनाम् ।
योधयिष्यति संग्रामे दिव्यास्त्ररथदुर्जयम् ॥ २८ ॥

२८. मानुष इति ॥ पादाभ्यां गच्छतीति पत्काषी पादचारी । ताच्छील्ये णिनिः ॥ "हिमकाषिहतिषु च" इति पादशब्दस्य पदादेशः ॥ मानुषो दिव्यै रथैर्दुर्मदमुद्धतं दुर्धर्षमित्यर्थः ॥ पुरुषाशिनां राजानं राक्षसेश्वरं संग्रामे योधयिष्यति नाम योधयिष्यति किल । दुर्घटमेतदिति भावः ॥ योध्यव्यापारस्येतरेतरप्रेरकत्वात् णिजन्तप्रयोगः ॥

सन्नत्स्याम्यथवा योद्धुं न कोष्ये सत्वहीनवत् ।
अद्य तप्स्यन्ति मांसादा भूः पास्यत्यरिशोणितम् ॥ २९ ॥

२९. समिति ॥ अथवा योद्धुं संनत्स्यामि संनद्धो भविष्यामि । नहेरमर्षे ऌटि स्ये धत्वचर्त्वे । सत्त्वहीनवत् दुर्बलवत् न कोष्ये न रोदिष्यामि । कुङ् शब्दे । पूर्ववल्लुटि गुणः षत्वं च । अद्य मांसमदन्तीति मांसादा गृध्रादयः ॥ "अदोऽनन्ने" इति विट्प्रत्यये प्राप्ते वासरूपविधिना तद्बाधेन अण्प्रत्ययः ॥ तप्स्यन्ति तृप्ता भविष्यन्ति । तृप प्रीणने ॥ "रधादिभ्यश्च" इतीडभावपक्षे "अनुदात्तस्य चर्दुपधस्य—" इत्यमभावे च गुणः ॥ भूश्चारिशोणितं पास्यति । पा पाने ॥

---

१ राजन् T3, T4, Com.
२ भाविष्यामहे C., T1, T2, T3, T4.
३ परम् T3, T4, Com.
४ °त्येतत्तत्प्रहस्तेन भाषितम् T3, T4.
५ दुर्दमम् D, T4.
दुर्मदम् Com.
६ अथ संयोद्धुं T3.
७ रोष्ये D.
८ हीनसत्त्व° c., E2.
९ °त्यपि को° T4.

आकर्क्ष्यामि[1] यशः शत्रूनपनेष्यामि[2] कर्मणा।
अनुभाविष्यते शोको मैथिल्याद्य पतिक्षयात्॥ ३०॥

३०. आक्रक्ष्यामीति॥ यशः शत्रुकीर्त्तिमाक्रक्ष्यामि आहरिष्यामि। कृषेरमागमे कत्वषत्वे। कर्मणा रणकर्मणा शत्रूनवचेष्यामि क्षपयिष्यामि। अद्य मैथिल्या पतिक्षयाद्भर्त्तृनाशात् शोकोऽनुभाविष्यतेऽनुभविष्यते। चिण्वदिटि वृद्धिः॥

मन्तूयिष्यति यक्षेन्द्रो वल्गूयिष्यति नो यमः।
ग्लास्यन्त्यपतिपुत्राश्च वने वानरयोषितः॥ ३१॥

३१. मन्तूयिष्यतीति॥ अद्य रामे हते यक्षेन्द्रः कुबेरो मन्तूयिष्यति कोपिष्यति। कण्ड्वादियक्॥ "अकृत्सार्वधातुकयोः" इति दीर्घः॥ यगन्ताल्लृट्। यमोऽपि नो वल्गूयिष्यति न पूजयिष्यति। वल्गु पूजामाधुर्ययोः। कण्ड्वादियगन्ताल्लृट्। अपतिपुत्रा वानरयोषितश्च वने ग्लास्यन्ति क्षीणहर्षा भविष्यन्ति। ग्लै हर्षक्षये॥ "आदेच—" इत्यात्वम्॥

सुखं स्वप्स्यन्ति रक्षांसि भ्रमिष्यन्ति च निर्भयम्।
न विक्रोक्ष्यन्ति राक्षस्यो नरांश्चात्स्यन्ति[3] हर्षिताः॥ ३२॥

३२. सुखमिति॥ अद्य रक्षांसि सुखं स्वप्स्यन्ति निर्भयं निःशङ्कं भ्रमिष्यन्ति संचरिष्यन्ति। राक्षस्यो न विक्रोक्ष्यन्ति न रोदिष्यन्ति। क्रुश आह्वाने रोदने च। लृटि स्ये गुणः॥ "व्रश्च—" आदिना षत्वे कत्वषत्वे। हर्षिताः सन्तोषिताः सत्यः। हृषेर्ण्यन्तात् कर्मणि क्तः। नरान्मानुषानत्स्यन्ति खादिष्यन्ति। अद् भक्षणे। दकारस्य चर्त्वम्।

प्राङ्मुहूर्त्तात् प्रभातेऽहं भविष्यामि ध्रुवं सुखी।
आगामिनि ततः काले यो[4] द्वितीयः क्षणोऽपरः॥ ३३॥

---

१ आक्रक्ष्यामि Com.
२ शत्रूनवचेष्यामि Com.
शत्रूनपचेष्यामि D., T_3, T_4.
३ नरानत्स्य° T_3, T_4.
४ यो द्वितीयः परक्षणः D.
यो द्वितीयात् क्षणोऽपरः Com.
यत्क्षणादपरो द्रुतम् T_3, T_4.

३३. अथ युग्मेनाह । प्रागित्यादि ॥ अहमस्मिन्नागामिनि प्रभाते मुहूर्त्तद्वयात्मके प्रभातकाले मुहूर्त्ताद् द्वितीयमुहूर्त्तात्प्राक् प्रथममुहूर्त्ते ध्रुवमवश्यं सुखी शत्रुवधसुखवत्सुर्भविष्यामि ॥ "कालाविभागेचानहोरात्राणाम्" इति अनद्यतनवत्प्रत्ययस्य लुटः प्रतिषेधाल्लृट् । ततः शत्रुवधसुखलाभानन्तरमागामिनि काले प्रभाते द्वितीयार्धयोः द्वितीयादपरो द्वितीयक्षणादन्यः प्रथमक्षणस्तत्रेत्युत्तरश्लोकेन संबन्धः । अत्र क्षणशब्दो मुहूर्त्तार्धवचनः । यः क्षणादपरो द्रुतमिति पाठे द्वितीयक्षणादपरः प्रथम इत्येवार्थः ॥

तत्र जेतुं गमिष्यामि त्रिदशेन्द्रं सहामरम् ।
ततः परेण भूयोऽपि लङ्कामेष्याम्यमत्सरः ॥ ३४ ॥

३४. तत्रेति ॥ तत्र पूर्वोक्तप्रथमक्षणे सहामरं सदेवं त्रिदशेन्द्रं देवेन्द्रं जेतुं गमिष्यामि । तत इन्द्रविजयानन्तरं निर्मत्सरो निर्वैरः सन् परेण क्षणेन भूयोऽपि लङ्कामेष्यामि ॥ "परस्मिन्विभाषा" इति विभाषानद्यतनवत्प्रत्ययनिषेधात् विभाषाल्लृट् ॥ अस्मिन्नागामिनि मुहूर्त्तद्वयमित्यत्र प्रभात एव पूर्वमुहूर्त्ते राममनन्तरमुहूर्त्तार्धेन देवेन्द्रं जित्वा अनन्तरार्धेन पुनर्लङ्कामधिष्ठास्यामीति श्लोकद्वयस्यार्थः । प्रभातपूर्वापरकालविभागविषयत्वेन सूत्रद्वयमुदाहृतं वेदितव्यम् ॥

तमेवंवादिनं मूढमिन्द्रजित् समुपागतः ।
युयुत्सिष्येऽहमित्येवं वदन् रिपुभयङ्करः ॥ ३५ ॥

३५. तमिति ॥ मूढमज्ञमत एवैवंवादिनमित्थंप्रलापिनं तं रावणं रिपुभयंकर इन्द्रजिदहं युयुत्सिष्ये योद्धुमेषिष्यामीच्छापूर्वकं योत्स्ये । युधेः सन्नन्ताल्लृट् । इत्येवं वदन् समुपागमत्[1]

नाभिज्ञा[2] ते महाराज जेष्यावः शक्रपालितम् ।
इमं देवगणाकीर्णमावां सह सुरालयम् ॥ ३६ ॥

१ समुपागमत् Com.
This verse is omitted in T_3.

२ The first half of this verse is not found in T_3.

1 समुपागतः Th. Com.

३६. नेति ॥ हे महाराज त्वं चाहं चावाम् ॥ "त्यदादीनि सर्वैर्नित्यम्" ॥ 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' इति वचनादस्मदेव शेषः। शक्रपालितं इतदेवगणाकीर्णं सुरालयं स्वर्गं सह जेष्यावः। ते तवाभिज्ञा स्मृतिः ॥ "आतश्चोपसर्गे" इति जानातेः स्त्रियामङ्प्रत्यये टाप् ॥ नेति काकुः । अजैष्व किं न स्मरसीत्यर्थः ॥ "अभिज्ञावचने लृट्" इति भूतानद्यतने लृट् ॥

नाभिज्ञा ते सयक्षेन्द्रं भङ्क्ष्यावो[1] यद्यमं बलात् ।
रत्नानि चाहरिष्यावः प्राप्स्यावश्च पुरीमिमाम् ॥ ३७ ॥

३७. नेति ॥ हे राजन् सयक्षेन्द्रं कुबेरसहितं यमं बलाद्भङ्क्ष्यावोऽभाङ्क्ष्वेत्यर्थः। भञ्जो आमर्दने। कुत्वषत्वे। रत्नानि हरिष्याव अहार्ष्वेत्यर्थः। इमां पुरीं प्राप्स्यावश्च प्राप्तौ च। यमकुबेरभञ्जनेन रत्नाहरणं कृतमित्यर्थः। तत्र ते तवाभिज्ञा स्मृतिः नेति काकुः ॥ "विभाषा साकाङ्क्षे" इति विभाषा भूतानद्यतने लृट् ॥ रत्नाहरणकुबेरभञ्जनयोर्लक्ष्यलक्षणयोः प्रयोगः। साध्यसाधनसंबन्धविवक्षा आकाङ्क्षा ॥

एष पेक्ष्याम्यरीन् भूयो न शोचिष्यसि रावण ।
जगद्द्रक्ष्यसि नीराममवगाहिष्यसे दिशः ॥ ३८ ॥

३८. एष इति ॥ हे रावण एषोऽहं भूयोऽप्यरीन् पेक्ष्यामि चूर्णयिष्यामि हनिष्यामीत्यर्थः। कत्वषत्वे ॥ "जासिनिप्रहण—" इत्यत्र शेषाधिकारात्तदविवक्षायां कर्मणि द्वितीयैव ॥ न शोचिष्यसि विशोकश्च भविष्यसीत्यर्थः। नीराममरामं च जगद् द्रक्ष्यसि तं च हनिष्यामीत्यर्थः। दिशोऽवगाहिष्यस आक्रमिष्यसि। सर्वत्र वर्त्तमानसामीप्ये वर्त्तमानवत् प्रत्ययविकल्पात् पक्षे लृट् ॥

सहभृत्यः[2] सुरावासे भयं भूयो विधास्यसि ।
प्रणंस्यत्यद्य देवेन्द्रस्त्वां वक्ष्यति स सन्नतिम् ॥ ३९ ॥

---

१ भङ्क्ष्यामो T_3. | २ भृत्यैः सह Com.

३९. सहेति ॥ भृत्यैः सह सपरिवारः सन्नित्यर्थः । भूयः सुरावासे स्वर्गे भयं विधास्यसि । अद्य देवेन्द्रस्त्वां प्रणंस्यति प्रणतो भविष्यति । सन्नतिं सन्नामं च वक्ष्यति तवाहमिति वदिष्यतीत्यर्थः ॥

भेष्यते मुनिभिस्त्वत्तस्त्वमधिष्ठास्यसि द्विषः ।
ज्ञास्येऽहमद्य संग्रामे समस्तैः शूरमानिभिः ॥ ४० ॥

४०. भेष्यत इति ॥ मुनिभिस्त्वत्तो भेष्यते त्रसिष्यते । ञिभी भये । भावे लृट् । गुणः । त्वं द्विषः शत्रूनधिष्ठास्यसि आक्रमिष्यसीत्यर्थः । अद्याहं संग्रामे समस्तैः शूरान्मन्यन्त इति शूरमानिनः ॥ "मनः" इति णिनिः । तैर्ज्ञास्ये । अद्य मद्बलं द्रक्ष्यन्तीत्यर्थः । कर्मणि लृट् ॥

ज्ञायिष्यन्ते मया चाद्य[1] वीरम्मन्या[2] द्विषद्गणाः[3] ।
गूहिष्यामि क्षितिं कृत्तैरद्य गात्रैर्वनौकसाम् ॥ ४१ ॥

४१. ज्ञायिष्यन्त इति ॥ अन्ये वीरमात्मानं मन्यन्त इति वीरंमन्याः शूराभिमानिनः ॥ "आत्ममाने खश् च" इति खशि मुमागमः ॥ द्विषां गणा मया ज्ञायिष्यन्ते ज्ञास्यन्ते । तानप्यहं द्रक्ष्यामीत्यर्थः । जानातेः कर्मणि चिण्वदिटि युगागमः । अद्य कृत्तैश्छिन्नैर्वनौकसां वानराणां गात्रैः क्षितिं गूहिष्यामि संवरिष्यामि । छादयिष्यामीत्यर्थः । गुहू संवरणे ॥

आरोक्ष्यामि युगान्तवारिदघटासंघट्टधीरध्वनिं[4]
निर्यास्यन् रथमुच्छ्रितध्वज[5]धनुःखड्गप्रभाभासुरम्[6] ।
श्रोष्यंस्यद्य[7] विकीर्णदृक्णविमुखव्यापन्नशत्रौ रणे
तृप्ताञ्छोणित[8]शोणभीषणमुखान् क्रव्याशिनः क्रोशतः[9] ॥४२॥

---

१ चैते T_3, Com.
चान्ये Com.
२ शूरम्मन्या T_4, D.
३ द्विषां गणाः D., T_4,
४ वीर D.
५ रथमूर्जितध्वज° Com.
६ भास्वरम् T_3, T_4.
७ श्रोष्याम्यद्य T_4.
८ दृप्ताञ्छो° c., D., Com.
९ क्रोशिनः T_3, T_4.

४१. आरोक्ष्यामीति ॥ निर्यास्यन् रणाय निर्गमिष्यन् युगान्तवारिदानां घटाः समूहास्तासां संघट्टः संघर्षस्तस्येव धीरो गम्भीरो ध्वनिर्यस्य तम् । ऊर्जितानां महतां ध्वजधनुःखड्गानां प्रभाभिर्भासुरं दीप्तं रथमारोक्ष्यामि ॥ "लृट् शेषे च" इति चकारात् क्रियार्थक्रियायां लृट् ॥ अद्य विकीर्णाः सर्वतो विकीर्णा वृक्णाश्छिन्ना विमुखव्यापन्नाः पराङ्मुखमृताः शत्रवो यत्र तस्मिन्रणे दृप्तान् मृष्टभोजनोद्धतान् शोणितेन शोणानि रक्तवर्णानि अत एव भीषणानि मुखानि तुण्डानि येषां तान् क्रोशतो वाश्यमानान् क्रव्याशिनो मांसादिनः शृगालादीन् श्रोष्यसि तत्क्रोशनानि श्रोष्यसीत्यर्थः । शङ्खः श्रूयते इतिवत् तद्वति तद्धर्मोपचारः । शार्दूलविक्रीडितं वृत्तम् । 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लृड्विलसितो नाम षोडशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने लृड्विलासो नाम षोडशः सर्गः ॥

॥ श्रीः ॥

अथ सप्तदशः सर्गः ।

आशासत ततः शान्तिमस्नुरग्नीनहावयन् ।
विप्रानवाचयन् योधाः प्राकुर्वन् मङ्गलानि च ॥ १ ॥

१. अथ लङ्विलासमधिकृत्याह । आशासत इति ॥ तत इन्द्रजिद्वाक्यानन्तरं योधा ऐन्द्रजिता योद्धारः शान्तिमरिष्टप्रतिबन्धमाशासत ऐच्छन् । शासु अनुशिष्टौ । भूतानद्यतने लङि "आङः शासु इच्छायाम्" इति तङ् । अदादित्वाच्छपो लुक् ॥ "आत्मनेपदेष्वनतः" इति झस्य अत् ॥ "लुङ्लङ्—" इत्यादिना अडागमः ॥ आङटोः सवर्णदीर्घः । शान्तिकमेवाह । अस्नुः स्नाताः । ष्णा शौचे ॥ "आतः" ॥ "लङः शाकटायनस्यैव" इति झेर्जुसादेशः ॥ "उस्यपदान्तात्" इति पररूपत्वम् ॥ अग्नीनहावयन् । ऋत्विग्भिरग्निकार्यमकारयन्नित्यर्थः । जुहोतेर्ण्यन्ताल्लङ् । विप्रानवाचयन् स्वस्तिवाचनमिति शेषः । वचेर्ण्यन्ताल्लङ् ॥ "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वम् ॥ मङ्गलानि चान्यान्यपि मङ्गलकृत्यानि प्राकुर्वन् ॥ "अनद्यतने लङ्" इति सामान्यतः सर्वत्र भूतानद्यतने लङ् ॥ अर्थान्तरेऽपि तत्र तत्र वक्ष्यति । प्रायेणात्र क्रियासमुच्चयः शब्दालंकारो द्रष्टव्यः ॥

अपूजयन्[१] कुलज्येष्ठानुपागूहन्त बालकान् ।
स्त्रीः समावर्धयन्[२] सास्राः कार्याणि प्रादिशंस्तथा[३] ॥ २ ॥

२. अपूजयन्निति ॥ कुलश्रेष्ठान् कुलवृद्धानपूजयन् । अथ तत्कालप्राप्तचेष्टितान्याह । बालकानुपागूहन्त आलिङ्गन् । सास्रा वियोगदुःखाद्रुदतीः स्त्रीः स्त्रियः ॥ "वाम्शसोः" इति विकल्पादियङभावपक्षे शसि

१ आपूजयन् T_3, T_4.
२ समावर्जयन् D., T_3, T_4, Com.
३ न्यादिशं॰ D.

पूर्वसवर्णदीर्घः॥ समावर्जयन्नाश्वासयन्नित्यर्थः। समावर्गयन्निति पाठेऽप्ययमेवार्थः। 'तत्करोति—' इति ण्यन्ताल्लुङ्। तथा कार्याणि गृहकृत्यानि प्रादिशन्नुपदिष्टवन्तः॥

आच्छादयन् व्यलिम्पंश्च प्राश्नन्नथ सुरामिषम्।
प्रापिबन्मधु मार्द्वीकं भक्ष्यांश्चादन् यथेप्सितान्॥ ३॥

३. आच्छादयन्निति॥ आच्छादयन् वस्त्राण्यवसत। छद संवरणे। चुरादिः। व्यलिम्पन् चन्दनादिकं लिप्तवन्तः। लिप उपदेहे। मुचादित्वात् नुम्। अथ सुरामिषं सुरामिषे मद्यमांसे॥ "विभाषा वृक्षमृगतृण—" इत्यादिना वैभाषिको व्यञ्जनद्वन्द्वैकवद्भावः॥ प्राश्नन् प्राशितवन्तः। अश भोजने॥ "श्नाभ्यस्तयोरातः" इत्याल्लोपः॥ मृद्वीकाया द्राक्षाया विकारो मार्द्वीकम्। 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः। मधु मद्यमपिबन् पीतवन्तः। पा पाने॥ "पाघ्रा—" इत्यादिना पिबादेशः॥ यथेप्सितं यथेष्टं भक्ष्यान् खाद्यांश्च खण्डमोदकादीनादन् अभक्षयन्॥ "अदः सर्वेषाम्" इत्यडागमः॥

न्यश्यन् शस्त्राण्यभीष्टानि समनह्यंश्च वर्मभिः।
अध्यासत सुयानानि द्विषद्भ्यश्चाशपंस्तथा॥ ४॥

४. न्यश्यन्निति॥ अभीष्टान्यपेक्षितानि शस्त्राणि न्यश्यन् निशितीचक्रुः। शो तनूकरणे॥ "ओतः श्यनि" इत्योकारलोपः॥ वर्मभिः समनह्यंश्च। गात्राण्यबध्नन् वर्माण्यामुञ्चन्नित्यर्थः। सुयानानि शोभनवाहनान्यध्यासत आरोहन्नित्यर्थः। आसेर्लङि शपो लुकि झस्यादादेशः। तथा द्विषद्भ्योऽशपंश्च पापिष्ठाः क्व यास्यथ मृताः स्थेत्याक्रोशन्नित्यर्थः। शप आक्रोशे॥ "श्लाघह्नुङ्—" इत्यादिना संप्रदानत्वाच्चतुर्थी॥

अपूजयंश्चतुर्वक्त्रं विप्रानार्चंस्तथास्तुवन्।
समालिपत शक्रारिर्यानं चाभ्यलषद्द्रुतम्॥ ५॥

---

१ °यन्नलिम्पंश्च T_2.
२ अपिब° D.
३ मार्द्वीकं Com., D.
४ यथेप्सितम् Com.
५ आपूजयंश्च T_2.
६ समालभत Com.

५. अपूजयन्निति ॥ चतुर्वक्त्रं चतुर्मुखं ब्रह्माणमपूजयन् तथा विप्रांश्चार्चन्नर्चयामासुः । अर्चेर्भौवादिकाल्लङि आड्वृद्धिः । तथा अस्तुवन् ब्रह्माणं विप्रांश्चेत्यर्थः । अथ शक्रारिरिन्द्रजिदपि समालभत चन्दनादिकमलिपत् वरं श्रेष्ठं यानं वाहनं चाभ्यलषदभिलषितवान् ॥

आमुञ्चद्वर्म रत्नाढ्यमबध्नात्खड्गमुज्ज्वलम् ।
अध्यास्त स्यन्दनं घोरं प्रावर्त्तत ततः पुरः ॥ ६ ॥

६. आमुञ्चदिति ॥ रत्नाढ्यं रत्नचणं वर्म कवचमामुञ्चदामुक्तवान् । उज्ज्वलं दीप्तं खड्गमबध्नात् कटिदेशे बबन्ध । घोरं भीमं स्यन्दनमध्यास्त । ततो रथारोहणानन्तरं पुरः पुरात्प्रावर्त्तत निरगादित्यर्थः ॥

आघ्नन् भेरीर्महास्वानाः कम्बूंश्चाप्यधमन् शुभान्[१] ।
अताडयन्मृदङ्गांश्च पेराश्चापूरयन् कलाः[३] ॥ ७ ॥

७. आघ्नन्निति ॥ महास्वाना महाघोषाः ॥ "स्वनहसोर्वा" इति घञ् प्रत्ययः ॥ भेरीराघ्नन्नताडयन् ॥ "गमहन—" इत्यादिनोपधालोपः ॥ सकर्मकत्वात् "आङो यमहनः" इति न तङ् । शुभान् मङ्गलान् कम्बूंश्चाधमन्नध्वनयन्नित्यर्थः । ध्मा शब्दाग्निसंयोगयोः ॥ "पाघ्रा—" इत्यादिना धमादेशः ॥ मृदङ्गांश्चाताडयन्नघ्नन् । तड आघाते । चुरादिः । कला मधुरस्वनाः पेराः काहलाश्चापूरयन् मुखमारुतपूरणेनानादयन् ॥

अस्तुवन् बन्दिनः शब्दानन्योन्यं चोदभावयन् ।
अनदन् सिंहनादांश्च प्राद्रेकैत[४] हयद्विपम् ॥ ८ ॥

८. अस्तुवन्निति ॥ बन्दिनः स्तुतिपाठका अस्तुवन् । ष्टुञ् स्तुतौ । शपो लुक् । उवङादेशः । अन्योन्यस्य संबन्धिनः शब्दान् विरुदावलिप्रमुखान् प्रबन्धानन्योन्यश्रवणानन्तरं बन्दिमुखेनोच्चैरपाठयन्नित्यर्थः । सिंहनादांश्चानदन्नकुर्वन्नित्यर्थः । हयाश्च द्विपाश्च हयद्विपम् । सेनाङ्ग-

१ °कम्बूनप्य° T_3, T_4.
२ वेणूंश्चा° T_3, T_4.
३ कलान् T_3, T_4.
४ प्राभ्रेकत K., Com.

न्द्वाद् द्वन्द्वैकवद्भावः । प्राभ्रेकत[1] प्रकर्षेण शब्दायन्ते स्म । हया जिहे-षिरे द्विपाश्च ववृंहिर इत्यर्थः । भ्रेकृ भ्रेकृ शब्दोत्साहयोः । लङि तङ् ॥

अनिमित्तान्यथापश्यन्नस्फुटद्रविमण्डलम् ।
औक्षन् शोणितमम्भोदा वायवोऽवान् सुदुःसहाः[1] ॥ ९ ॥

९. अनिमित्तानीति ॥ अथानिमित्तानि निमित्तविरुद्धानि दुर्निमित्तान्यपश्यन् ॥ "पाघ्रा—" इत्यादिना पश्यादेशः ॥ तान्येवाह । रविमण्डलमस्फुटत् स्फुटितं दीर्णमित्यर्थः । अम्भोदाः शोणितमौक्षन्नसिञ्चन्नवर्षन्नित्यर्थः । उक्ष सेचने । आड्वृद्धिः । वायवः सुदुःसहा अतितीव्राः सन्तोऽवान् ववुः । वा गतिगन्धनयोः । शपो लुक् ॥ "लङः शाकटायनस्यैव" इति विकल्पाज्जुसभावपक्षे "झोऽन्तः" "अतो गुणे" इति पररूपम् ॥ "इतश्च" लोपसंयोगान्तलोपौ ॥

आर्च्छन् वामं मृगाः कृष्णाः शस्त्राणां व्यस्मरन् भटाः ।
रक्तं[2] न्यष्ठीवदक्राम्यदखिन्न[3] द्वाजिकुञ्जरम् ॥ १० ॥

१०. आर्च्छन्निति ॥ कृष्णा मृगाः कृष्णसारा वामं सव्यमार्च्छन्नागच्छन् । ऋच्छ गतौ । अर्तेर्वा "पाघ्रा—" इत्यादिना ऋच्छादेशः । भटाः शस्त्राणां व्यस्मरन् शस्त्राणि व्यस्मरन्नित्यर्थः ॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी ॥ वाजिकुञ्जरम् । सेनाङ्गद्वन्द्वैकवद्भावः । अखिन्नमरोगमपि रक्तान्यष्ठीवत् ष्ठीवति स्म । ष्ठिवु निरसने । भौवादिकः । अक्राम्यत् क्लान्तम् । क्रमेः श्यनि "ष्ठिवुक्लमुचमां शिति" इति दीर्घः ॥

न तानगणयन् सर्वानार्स्कन्दंश्च[4] रिपून् द्विषः ।
अच्छिन्दन्नसिभिस्तीक्ष्णैरभिन्दंस्तोमरैस्तथा ॥ ११ ॥

१ वायवोऽसुः सु° T_4.
२ रक्तान्यष्ठी° Com.
३ °दखिन्नं वाजि° T_4, Com.
This verse is omitted in T_3.
४ सर्वान् प्रास्कन्दंश्च D.
This verse is omitted in T_3.

1 प्राभ्रेकत Th, Com.

११. नेति ॥ द्विषो राक्षसास्तानि सर्वाण्यपि दुर्निमित्तानि नागणयन् नाद्रियन्त । रिपून् वानरानास्कन्दनभ्यगच्छंश्च । तीक्ष्णैरसिभिरच्छिन्दन् । तथा तोमरैरभिन्दन् व्यदारयंश्च ॥

न्यकृन्तंश्चक्रधाराभिरतुदन् शक्तिभिर्दृढम् ।
भल्लैरविध्यन्नुग्राग्रैरतृंहंस्तोमरैरलम् ॥ १२ ॥

१२. नीति ॥ चक्राणां धाराभिरश्रिभिर्न्यकृन्तन् चिच्छिदुः । कृती छेदने । तौदादिकः ॥ "शे मुचादीनाम्" इति नुम् ॥ शक्तिभिः कासूभिः 'कासूसामर्थ्ययोः शक्तिः' इत्यमरः । दृढमतुदन्नव्यथयन् । उग्राग्रैस्तीक्ष्णमुखैर्भल्लैर्बाणविशेषैः । 'स्नुहिदलफलो भल्लः' इति यादवः । अविध्यन्नताडयन् । व्यध ताडने । लङि श्यनो ङित्वात् "ग्रहिज्यावयि—" इत्यादिना संप्रसारणम् ॥ तोमरैरलमतृंहनहिंसन् । तृह हिंसायाम् ॥ "रुधादिभ्यः श्नम्" ॥ "श्नसोरल्लोपः" ॥ "नश्च—" इत्यनुस्वारः ॥

आस्यन् प्लवङ्गमा वृक्षानधुन्वन् भूधरैर्भृशम् ।
अहिंसन् मुष्टिभिः क्रोधाददशन् दशनैरपि ॥ १३ ॥

१३. आस्यन्निति ॥ प्लवङ्गमाः कपयोऽपि वृक्षानास्यन्नाक्षिपन् । असु क्षेपणे । लङि श्यन् । आडृद्धिः । तथा भूधरैश्चाधूर्वन्नहिंसन् । धुर्वी हिंसायाम् । भ्वादिः ॥ "उपधायाश्च" इति दीर्घः ॥ क्रोधान्मुष्टिभिरहिंसन्नघ्नन् । हिसि हिंसायाम् ॥ "श्नसोरल्लोपः" ॥ "श्नान्नलोपः" ॥ दशनैर्दन्तैरलमदशन् दष्टवन्तः । दंश दशने ॥ "दंशसञ्जस्वञ्जां शपि" इत्यनुनासिकलोपः ॥

प्रादुन्वन् जानुभिस्तूर्णमतुदंस्तलकूर्परैः ।
प्राहिण्वन्नारिमुक्तानि शस्त्राणि विविधानि च ॥ १४ ॥

---

१ °ध्यंस्तीक्ष्णाग्रै° D.
२ °नधूर्वन् Com.
°नधून्वन् T1, T2, T3, T4.
३ भूधरैस्तथा D., T3, T4, Com.
४ दशनैस्तथा D.
दशनैरलम् Com.

१४. प्रेति ॥ तूर्णं जानुभिरष्ठीवद्भिः प्रादुन्वन्नतापयन्। दुञ् परितापे। स्वादिः। तलैः करतलैः कूर्परैः कपोणिभिश्चातुदन्नव्यथयन्। किं चारि-मुक्तानि राक्षसप्रयुक्तानि विविधानि शस्त्राणि प्राहिण्वन् प्रायुञ्जत। तैरेव तान् प्रजघ्नुरित्यर्थः। हि गतौ ॥ "स्वादिभ्यः श्नुः" ॥ श्नोऽन्तादेशे यणादेशः ॥

अतृणेट्[1] शक्रजिच्छत्रूनभ्राम्यच्च समन्ततः।
अध्वनच्च महाघोरं न च कंचन नादुनोत् ॥ १५ ॥

१५. अतृणेडिति ॥ अथेन्द्रजित् शत्रूनतृणेट् हिंसितवान्। तृह हिंसायाम्। श्नमि "तृणह इम्" ॥ "हल्ङ्याब्—" इत्यादिना तिलोपः ॥ "हो ढः" ॥ जश्त्वचर्त्वे। समन्ततो रणे सर्वत्राभ्राम्यत् समचरत्। महाघोरमतिभयंकरमध्वनत् ननाद च। कञ्चन कमपि न नादुनोत् किं तु सर्वं चादुनोत् दुनोति स्म। दुञ् परितापे ॥ "स्वादिभ्यः श्नुः" ॥

नाजानन् संदधानं तं[2] धनुर्नैक्षन्त बिभ्रतम्।
नेषूनचेतन्नस्यन्तं हतास्तेनाविदुर्द्विषः[3] ॥ १६ ॥

१६. नेति ॥ तेनेन्द्रजिता हताः प्रहृता द्विषः कपयस्तमिन्द्रजितं संदधानं धनुषि शरं योजयन्तं नाजानन्। धनुर्बिभ्रतं च नैक्षन्त नापश्यन्। इषूनस्यन्तं क्षिपन्तं च नाचेतन्नाजानन्। चिती संज्ञाने। नाविदुः किं बहुना स्वप्रहरणं विना न किञ्चिदजानन्नित्यर्थः। विद ज्ञाने। शपो लुक् ॥ "सिजभ्यस्तविदिभ्यश्च" इति झेर्जुसादेशः ॥

अशृण्वन्नन्यतः शब्दं प्रपलायन्त चान्यतः[4]।
आक्रन्दमन्यतोऽकुर्वस्तेनाहन्यन्त चान्यतः[5] ॥ १७ ॥

१७. अशृण्वन्निति ॥ अन्यतोऽन्यत्र शब्दं सिंहनादमशृण्वन्। अन्यतः शब्ददेशादन्यत्र प्रपलायन्त प्रपलायिताः। एकत्र शब्दं कृत्वान्यत्र

---

[1] अतृणेट् चेन्द्रजिच्छ' T_3, Com.
[2] च T_3, T_4.
[3] हतास्ते D.
[4] पलायन्तान्यतो भयात् T_3, T_4.
[5] वान्यतः D.

प्रहारादन्ये शब्दं शृण्वन्ति अन्ये पलायन्तेत्यर्थः । प्रपरापूर्वोदयतेर्लङ् ॥ "उपसर्गस्यायतौ" इति लत्वम् ॥ अजादित्वादाट् ॥ अन्यतोऽन्यत्राक्रन्दमाक्रोशमकुर्वन्नन्यत्राक्रन्ददेशादन्यत्र तेनेन्द्रजिताहन्यन्त हताः । एकत्र कलकलमुत्पाद्यान्यत्र प्रहृता इत्यर्थः ॥

आलोठन्त व्यभिद्यन्त परितो[1] रक्तमस्रवन् ।
पर्यश्राम्यन्नतृष्यंश्च क्षतास्तेनाम्रियन्त च ॥ १८ ॥

१८. प्रेति ॥ तेनेन्द्रजिता क्षताः प्रहृताः प्रालोठन्त भुवि विलुठिताः । व्यभिद्यन्त विदारिताः ॥ भिदेः कर्मणि लङ् । परितो रक्तं चास्रवन्नक्षरन् । पर्यश्राम्यन् परिश्रान्ताः । अतृष्यंस्तृषिताश्च । तृष पिपासायाम् । अम्रियन्त मृताश्च ॥

सौमित्रिराकुलस्तस्मिन् ब्रह्मास्त्रं सर्वरक्षसाम् ।
निधनायाजुहूषत्तं व्यष्टभ्नाद्रघुनन्दनः ॥ १९ ॥

१९. सौमित्रिरिति ॥ अथ सौमित्रिर्लक्ष्मण आकुलः क्षुभितः सन् सर्वरक्षसां निधनाय तस्मिन्निन्द्रजिति ब्रह्मास्त्रमाजुहूषदाह्वातुमैच्छत् । ह्वयतेः सन्नन्तादाङ्पूर्वाल्लङ् । यजादित्वात्संप्रसारणम् । ततो द्विर्वचनम् । दीर्घः । तं सौमित्रिं रघुनन्दनो व्यष्टभ्नात् प्रत्यबध्नात् । विभीषणत्राणायेति भावः ॥ "स्तन्भुस्तुन्भु—" इत्यादिना श्नाप्रत्ययः ॥

ततो मायामयीं सीतां घ्नन् खड्गेन वियद्गतः ।
अदृश्यतेन्द्रजिद्वाक्यमवदत्तं मरुत्सुतः ॥ २० ॥

२०. तत इति ॥ ततः सेनाविजयानन्तरमिन्द्रजिद्वियद्गतो मायामयीं सीतां खड्गेन घ्नन् प्रहरन्नदृश्यत । तमिन्द्रजितं मरुत्सुतो हनूमान् वाक्यमवदत् ॥

मांपराध्नोदियं[1] किंचिदभ्रश्यत्पत्युरन्तिकात् ।
सीतां राक्षस मा स्मैनां निगृह्णाः पाप दुःखिताम् ॥ २१ ॥

१ रक्तं च परितोऽस्रवन् T₃, T₄, D.
२ पर्यश्राम्यन् T₄.

१ नापराध्नो° Com., T₃, T₄.

२१. नेति ॥ इयं सीता किंचिदपि नापराध्नोऽनापराद्धा । राधे सौवादिकाल्लुङ् । पत्युरन्तिकादभ्रश्यद् भ्रष्टा पतिवियुक्तेत्यर्थः । अत एव दुःखितामेनामनपराधिनीं सीतां हे पाप क्रूर राक्षस मा स्म निगृह्णा मा वधीरित्यर्थः । "स्मोत्तरे लङ् च" ॥

पीडाकरममित्राणां कर्त्तव्यमिति शक्रजित् ।
अब्रवीत् खड्गकृष्टश्च[1] तस्या मूर्धानमच्छिनत् ॥ २२ ॥

२२. पीडेति ॥ अथ शक्रजिदमित्राणां शत्रूणां पीडाकरं दुःखकरं कर्म कर्त्तव्यमित्यब्रवीत् । अथ खड्गमाकृष्य तस्याः सीताया मूर्धानमच्छिनच्चिच्छेद ॥

यत्कृतेऽरीन् व्यगृह्णीम[2] समुद्रमतराम च ।
सा हतेति वदन्राममुपातिष्ठन्मरुत्सुतः ॥ २३ ॥

२३. यदिति ॥ यत्कृते यदर्थमरीन् राक्षसान् न्यगृह्णीम न्यरुन्ध्म ॥ "ई हल्यघोः" इतीत्वम् ॥ समुद्रमतराम च ॥ "दीर्घो अतो यञि" ॥ सा सीता हतेति वदन् मरुत्सुतो हनूमान् राममुपातिष्ठत्प्राप्तः । अत्र रामहनूमतोर्गङ्गामुपतिष्ठते यमुनेति वत् परस्परोपश्लेषाभावान्न 'उपाद्देवपूजासंगतिकरण—' इति तङ् ॥

ततः प्रामुह्यतां वीरौ राघवावरुतां तथा ।
[.]र्णं च प्राणितां दीर्घमुच्चैर्व्याक्रोशतां[3] तथा ॥ २४ ॥

२४. तत इति ॥ ततो हनूमद्वाक्यश्रवणानन्तरं वीरौ राघवौ प्रामुह्यतां मोहं गतौ । मुह वैचित्त्ये । तथारुतामाक्रन्दताम् । रु शब्दे । लङि तसस्तामादेशः । अपित्त्वान्न "उतो वृद्धिर्लुकि हलि" इति वृद्धिः । दीर्घमुष्णं च प्राणितां न्यश्वसितां च । अन प्राणने । लङि तसस्तामादेशः ॥ "रुदादिभ्यः सार्वधातुके" इतीडागमः ॥ तथोच्चैस्तारं व्याक्रोशतामरुदिताम् आक्रन्दताम् । क्रुश [आ]ह्वाने रोदने च ॥

---

१ खड्गमाकृष्य Com., T_3, T_4.
२ न्यगृह्णीम Com.
३ उच्चैश्चाक्रोशतां T_4.

तावभाषत पौलस्त्यो मा स्म प्ररुदितं युवाम् ।
ध्रुवं स मोहयित्वास्मान् पापोऽगच्छन्निकुम्भिलाम् ॥ २५ ॥

२५. ताविति ॥ पौलस्त्यो विभीषणस्तौ राघवावभाषत । किमिति । युवां मा स्म प्ररुदितं रोदनं मा कुरुतम् । रुदिर् अश्रुविमोचने ॥ "स्मोत्तरे लङ् च" ॥ "तस्थस्थ—" इति थसस्तमादेशः ॥ "न माङ्योगे" ॥ स पापोऽस्मान् मोहयित्वा भ्रामयित्वा निकुम्भिलां नाम स्थानमगच्छत् ध्रुवम् ॥

मा स्म तिष्ठत तत्रस्थो वध्योऽसावहुतानलः[1] ।
अस्त्रे ब्रह्मशिरस्युग्रे स्यन्दने चानुपार्जिते ॥ २६ ॥

२६. ततः किमत आह । मा स्मेति ॥ मा स्म तिष्ठत किं त्वतिशीघ्रं गच्छतेति ॥ "स्मोत्तरे लङ् च" ॥ "न माङ्योगे" ॥ तथा हि तत्रस्थो निकुम्भिलास्थोऽसाविन्द्रजिदहुतानलोऽनर्चिताग्निरसमाप्तकर्मैवेत्यर्थः । ब्रह्मशिरसि ब्रह्मशिरोनामक उग्रे दारुणेऽस्त्रे स्यन्दने चानुपार्जितेऽग्नेः सकाशादलब्धे सत्येव वध्यो हन्तुं शक्यः । अन्यथा न शक्य इत्यर्थः ॥ "शकि लिङ् च" इति चकारात्कृत्यप्रत्यये "हनो वधश्च" इत्युपसंख्यानाद् वधादेशो तस्यादन्तत्वात् "अचो यत्" ॥ "अतो लोपः" ॥

ब्रह्मादधाद्वधं तस्य[2] तस्मिन्कर्मण्यसंस्थिते ।
प्रायच्छदाज्ञां सौमित्रेर्यूथपानां च राघवः ॥ २७ ॥

२७. कुत एतदिति वदन्तं प्रत्याह ॥ ब्रह्मेति ॥ ब्रह्मा कर्मणि होमकर्मण्यसंस्थितेऽसमाप्ते मध्ये विच्छिन्ने सतीत्यर्थः । तस्येन्द्रजितस्तस्यां निकुम्भिलायामेव वधं मरणमदधाद्वाचि धृतवानुक्तवानित्यर्थः । दधातेर्लङि "श्लौ" इति द्विर्भावः । अथ राघवः सौमित्रेर्यूथपानां चाज्ञां प्रायच्छददात् । द्रुतं गच्छतेत्याज्ञापयदित्यर्थः ॥ "पाघ्रा—" इत्यादिना दाणो यच्छादेशः ॥

---

१ वध्य एवाहुता° T4. तस्य तत्र कर्म° T3, T4.
२ तस्मिंस्तस्यां कर्म° D. तस्य तस्यां क° Com.

तां प्रत्यैच्छन् सुसंप्रीतास्ततस्ते सविभीषणाः।
निकुम्भिलां समभ्यायन्न्यरुध्यन्त च राक्षसैः॥ २८॥

२८. तामिति॥ तामाज्ञां सुसंप्रीताः सुसंतुष्टाः सन्तः प्रत्यैच्छन् प्रत्यगृह्णन्। इषेर्लङि "इषुगमियमां छः" इति छादेशः। आड्वृद्धिः। तत आज्ञानन्तरं ते लक्ष्मणप्रमुखाः सविभीषणाः सन्तो निकुम्भिलां समभ्यायन् संप्राप्ताः। इणो लङि झोऽन्तादिकार्यम्॥ "असिद्धवदत्राभात्" इति यणादेशस्यासिद्धत्वादाडागमः॥ दिक्पालैरित्युत्तरश्लोकस्थमिह राक्षसविशेषणत्वेन योज्यम्। निकुम्भिलास्थानपालैरित्यर्थः। ते राक्षसैर्न्यरुध्यन्त। रुधेः कर्मणि लङ्।

दिक्पालैः कदनं तत्र सेने प्राकुरुतां महत्।
ऐतां रक्षांसि निर्जित्य द्रुतं पौलस्त्यलक्ष्मणौ॥ २९॥

२९. दिगिति॥ दिक्पालैरिति गतम्। तत्र निकुम्भिलाद्वारे सेने कपिराक्षससेने महत्कदनं युद्धं प्राकुरुताम्। पौलस्त्यलक्ष्मणौ रक्षांसि निर्जित्य द्रुतं शीघ्रमैतां प्रविष्टामित्यर्थः। एतेर्लङि तसस्तामादेशः। आड्वृद्धिः॥

तत्रेन्द्रजितमैक्षेतां कृतधिष्ण्यं समाहितम्।
सोऽजुहोत् कृष्णवर्त्मानमामनन्मन्त्रमुत्तमम्॥ ३०॥

३०. तत्रेति॥ तत्र निकुम्भिलायां कृतधिष्ण्यं कृतायतनं समाहितमेकाग्रचित्तमिन्द्रजितमैक्षेतामपश्यताम्। स इन्द्रजिदुत्तमं मन्त्रमामनन्नावर्त्तयन्। म्ना अभ्यासे॥ "पाघ्रा—" इत्यादिना मनादेशो लटः शत्रादेशः॥ कृष्णवर्त्मानमग्निमजुहोत्॥

अध्यायच्छक्रजिद्ब्रह्म समाधेरचलन्न च।
तमाह्वयत सौमित्रिरगर्जच्च भयंकरम्॥ ३१॥

---

१ न्यरुध्यन्त T_4.
२ राक्षसाः T_4.
३ निर्जित्य रक्षांसि T_4, T_8.
४ द्रुतं Com.
५ °मैक्षिष्टां c.

३१. अध्यायदिति ॥ शक्रजिदिन्द्रजिद् ब्रह्म परमात्मानमध्यायदचिन्तयत् । ध्यै चिन्तायाम् । शध्यायादेशः । समाधेर्ध्यानाच्चाचलच्च । तमिन्द्रजितं सौमित्रिराह्वयत सस्पर्धमाहूतवान् ॥ "स्पर्धायामाङः" इति ह्वयतेस्तङ् ॥ भयंकरमगर्जच्च ॥

अकुप्यदिन्द्रजित्तत्र पितृव्यं चागदद्वचः[1] ।
त्वमत्राजायथा देहं[2] इहापुष्यः सुरामिषैः ॥ ३२ ॥

३२. अकुप्यदिति ॥ तत्र तस्मिन्विषये इन्द्रजिदकुप्यत् । पितृव्यं पितृभ्रातरं विभीषणम् । 'पितृभ्राता पितृव्यः स्यात्' इत्यमरः ॥ "पितृव्यमातुल—" इति निपातः ॥ वचोऽगदच्च । तदेवाह । त्वमत्रास्मिन् वंशेऽजायथा जातोऽसि । जनी प्रादुर्भावे । दिवादित्वात् श्यन् ॥ "ज्ञाजनोर्जा" इति जादेशः ॥ इहैव सुरामिषैर्मद्यमांसैर्देहमपुष्यः पुष्टवान् । पुष पुष्टौ । दिवादिः ॥

इहाजीव इहैव त्वं क्रूरमारभथाः कथम् ।
नापश्यः पाणिमार्द्रं त्वं[3] बन्धुत्वं नाप्यपैक्षथाः[4] ॥ ३३ ॥

३३. इहेति ॥ त्वमिहाजीवो जीवितोऽसि । इहैवास्मिन्नेव विषये कथं क्रूरं हिंस्रं कर्मारभथाः प्राक्रमथाः । आर्द्रं भोजनार्द्रमद्याप्यशुष्कं च पाणिं नापश्यो नाद्राक्षीः । शुनकादपि कष्टोऽसीति भावः । बन्धुत्वमपि नावैक्षथा न व्यचारयः । ईक्ष दर्शने । भौवादिकाल्लुङि थास्याड्वृद्धिः ॥

अधर्मान्नात्रसः पाप लोकवादान्न चाबिभेः ।
धर्मदूषण नूनं त्वं[5] नाजाना नाशृणोरिदम्[6] ॥ ३४ ॥

३४. अधर्मादिति ॥ हे पाप पापाचार अधर्मात्पापान्नात्रसो न त्रस्तोऽसि । लोकवादाल्लोकापवादाच्च नाबिभेर्न भीतोऽसि । ञिभी भये ।

---

१ चावदद्वचः D.
२ देहमिहा° D., C., B., Com.
३ °मार्द्रं च T_3, T_4.
४ नाप्यवैक्षथाः D., Com.
५ च T_3, T_4.
६ °णोरपि D.

लङि सिपि "श्लौ" इति द्विर्भावः। गुणः। उभयत्र "भीत्रार्थानाम्—" इत्यपादानत्वात् पञ्चमी। हे धर्मदूषण धर्मविकारक। दुष वैकृत्ये। ततो ण्यन्तात्कर्त्तरि ल्युट्। न तु नन्द्यादिल्युर्दूषयतेः। तस्य संज्ञाविषयत्वादिति॥ "दोषो णौ" इत्यूकारः॥ नूनं त्वमिदं वक्ष्यमाणं नाजानाः स्वतो नाज्ञासीः। जानातेः क्रैयादिकाल्लङि सिप्॥ "ज्ञाजनोर्जा" इति जादेशः॥ नाशृणोर्नाश्रौषीः परतोऽपि नाबुद्धा इत्यर्थः। श्रु श्रवणे॥ "स्वादिभ्यः श्नुः" "श्रुवः शृ च"॥

निराकृत्य यथा बन्धूँल्लघुर्त्व यातसंशयम्।
पितृव्येण ततो वाक्यमभ्यधीयत शक्रजित्॥ ३५॥

३५. इदं यदुक्तं तदाह। निराकृयेति॥ यथा यदसंशयं निःशङ्कं बन्धून् निराकृत्य परित्यज्य लघु क्षिप्रं याता गन्ता गमनशील इतीदं नाजानाः पाप। इति नाज्ञासीरित्यर्थः। ततोऽनन्तरं शक्रजिदिन्द्रजित् पितृव्येण विभीषणेन वाक्यमभ्यधीयताभिहितः। 'अप्रधाने दुहादीनाम्' इति वचनादप्रधाने कर्मणि लङ्। "घुमास्था—" इतीत्वम्॥

मिथ्या मा स्म व्यतिक्रामो मच्छीलं मा न बुध्यथाः।
सत्यं समभवं वंशे पापानां रक्षसामहम्॥ ३६॥

३६. मिथ्येति॥ मिथ्या वृथैव मा स्म व्यतिक्रामो व्यतिक्रमं मा कुरु। मा प्रलपेत्यर्थः॥ "स्मोत्तरे लङ् च" इति लङ्॥ "न माङ्योगे"॥ "क्रमः परस्मैपदेषु" इति शिति दीर्घः॥ शीलं न मा स्म बुध्यथाः। किं तु बुध्यस्वेत्यर्थः। बुधेर्दैवादिकात्पूर्ववल्लङडभावश्च। सत्यमहं पापानां पापात्मनां रक्षसां वंशे समभवं संभूतोऽस्मि। अस्त्येतदित्यर्थः॥

न त्वजायत मे शीलं तादृग्यादृक् पितुस्तव।
क्षयावहेषु दोषेषु वार्यमाणो मयारमत्॥ ३७॥

---

१ न शीलं मास्मबु T₄.

३७. नेति ॥ किं तु मे शीलं तव पितुर्यादृक् तादृग्नाजायत न जातम्। तथा हि दशग्रीवो मया वार्यमाणोऽपि क्षयावहेषु विनाशहेतुषु। आङ्पूर्वाद्वहेः पचाद्यचि षष्ठीसमासः। दोषेषु निकृष्टकर्मसु आरमदारतो निरतः॥ "व्याङ्परिभ्योरमः" इति परस्मैपदम्॥

दशग्रीवोऽहमेतस्मादत्यजं ने तु विद्विषन्।
परस्वान्यार्जयन्नारीरन्यदीयाः परामृशत्॥ ३८॥

३८. दशेति॥ अहमेतस्मात्कारणात्त्वं दशग्रीवमत्यजम्। विद्विषंस्तु न। संसर्गात् स्वानर्हत्वादत्यजं न तु द्वेषादित्यर्थः॥ "द्विषोऽमित्रे" इति शतृप्रत्ययः॥ परस्वान्यार्जयन्नाहरन्नन्यदीया नारीः पराङ्गनाः परामृशद्गमदित्यर्थः॥

व्यजिघृक्षत्सुरान्नित्यं प्रामाद्यद्गुणिनां हिते[3]।
आशङ्कत सुहृद्बन्धूनैवृद्धान् बह्वमन्यत॥ ३९॥

३९. वीति॥ नित्यं सुरान् देवान् व्यजिघृक्षद्विग्रहीतुमैच्छत्। ग्रहेः सन्नन्ताल्लङ्॥ "रुदविद—" इत्यादिना सनः कित्त्वात् "ग्रहिज्या—" इत्यादिना संप्रसारणम्॥ गुणिनां गुणवृद्धानां मते पक्षे विषये प्रामाद्यत् प्रमत्तः। सुहृदो मित्राणि बन्धून् मातामहादींश्चाशङ्कत शङ्कितवान्। न व्यश्वसीदित्यर्थः। वृद्धान् गुणवृद्धान् माल्यवदादीन् न बह्वमन्यत नाद्रियत॥

दोषैररमतैभिस्ते पितासज्यत यैर्मया।
ततोऽरुष्यदनर्दच्च द्विंशतिभिरेवं च॥ ४०॥

४०. दोषैरिति॥ एभिर्दोषैस्ते पितारमतारंस्तेत्यर्थः। यैर्दोषैर्मयात्यज्यत त्यक्तः। ततो विभीषणवाक्याद्रावणिरिन्द्रजिदरुष्यदकुप्यदगर्जच्च। शेषमुत्तरश्लोके योज्यम्॥

---

१ दशग्रीवमहं तस्माद° c.
२ तं न T3, T4.
३ मते Com., D.
४ बन्धून् बालकान् बह्व D.
५ दगर्जच्च Com., T3, T4.
६ द्वाविंश D.

शरैरताडयद्बन्धुं पञ्चविंशतिभिर्नृपम् ।
रावणिस्तस्य सौमित्रिरमथ्नाच्चतुरो हयान् ॥ ४१ ॥

४१. शरैरिति ॥ द्वे विंशती संख्या येषामिति बहुव्रीहिः । द्वौ च विंशतिश्चेति द्वन्द्वसमासे "द्व्यष्टनः संख्यायाम्" इत्यात्वं द्वाविंशतीत्येकत्वं च स्यात् । तत्पुरुषाद्द्विगुकार्ये पुनर्बहुवचनानुपपत्तिरिति । तैर्द्विविंशतिभिश्चत्वारिंशता शरैर्बन्धुं पितृव्यमताडयत् प्राहरत् । पञ्च विंशतयो येषु तैः पञ्चविंशतिभिः शतेन शरैः । आत्ववर्जं सर्वं पूर्ववत् । नृपं लक्ष्मणमताडयत् । सौमित्रिस्तु तस्य रावणेश्चतुरो हयान् रथाश्वान् बाणैरमथ्नान्मारयामास । मन्थ विलोडने । क्र्यादिः ॥

सारथिं चालुनाद्बाणैरभनक् स्यन्दनं तथा ।
सौमित्रिमकिरद्बाणैः परितो रावणिस्ततः ॥ ४२ ॥

४२. सारथिमिति ॥ सारथिं च बाणैरलुनाच्चिच्छेद । क्र्यादिः ॥ "प्वादीनां ह्रस्वः ॥" ततः स्यन्दनं रथं चाभनक् बभञ्ज । भञ्जो आमर्दने । रुधादिः ॥ "हल्ङ्याब—" इत्यादिना तिलोपः ॥ कुत्वचर्त्वे । ततो रावणिः सौमित्रिं परितो बाणैरकिरदक्षिपत् । कॄ विक्षेपे । तौदादिकाल्लङ् ॥ "ॠत इद्धातोः" इति रपर इकारः ॥

तावस्फावयतां शक्तीर्बाणांश्चाकिरतां मुहुः ।
वारुणं लक्ष्मणोऽक्षिप्यदक्षिपद्रौद्रमिन्द्रजित् ॥ ४३ ॥

४३. ताविति ॥ ताविन्द्रजिल्लक्ष्मणौ शक्ती परस्परसामर्थ्येऽस्फावयतामवर्धयताम् । स्फायी वृद्धौ । ण्यन्ताल्लङ् ॥ "स्फायो वः" इति यकारस्य वकारः ॥ मुहुर्बाणानकिरतां परस्परस्योपर्यक्षिपताम् । लक्ष्मणो वारुणमस्त्रमक्षिप्यत् । क्षिपेर्दैवादिकाल्लङ् । इन्द्रजिद्रौद्रमक्षिपत् । क्षिप प्रेरणे । तौदादिकः ॥

---

१ रावणेस्तस्य T_3, T_4, Com.
२ ततः Com.
३ °वास्फाव° T_4.
४ शक्ति बा° T_3.
शक्ती Com.

ते परस्परमासाद्य शस्त्रे नाशमगच्छताम् ।
आसुरं राक्षसः शस्त्रं[1] ततो घोरं व्यसर्जयत् ॥ ४४ ॥

४४. त इति ॥ ते रौद्रवारुणे शस्त्रे परस्परमासाद्य प्राप्य नाशमदर्शनमगच्छताम् । ततो राक्षस इन्द्रजिद् भीषणमासुरं शस्त्रं व्यसृजत् । सृजिरयं तौदादिकः ॥

तस्मान्निरपतद्[2]भूरि शिलाशूलेष्टि[3]मुद्गरम् ।
माहेश्वरेण सौमित्रिरस्तभ्नात्तत्सुदुर्जयम् ॥ ४५ ॥

४५. तस्मादिति ॥ तस्मादासुरास्त्राद् भूरि भूयिष्ठं शिलाः प्रसिद्धाः शूलादयः प्रहरणविशेषास्ते । द्वन्द्वैकवद्भावः । निरपतन्निष्पतितम् । सौमित्रिः सुदुर्जयं तदासुरमस्त्रं माहेश्वरेणास्त्रेणास्तभ्नात् तस्तम्भ ॥ "क्र्यादिभ्यः श्ना" ॥ अस्तभ्नोदिति पाठे "स्तन्भुस्तुन्भु—" इत्यादिना श्नुः ॥

ततो रौद्रसमायुक्तं माहेन्द्रं लक्ष्मणोऽस्मरत् ।
तेनागम्यत घोरेण शिरश्चाह्रियत द्विषः ॥ ४६ ॥

४६. तत इति ॥ ततो लक्ष्मणो रौद्रसमायुक्तं रौद्रास्त्रसहितं माहेन्द्रमस्त्रमस्मरत् । तेन स्मृतेन घोरेणास्त्रेणागम्यतागतम् । गमेराङ्पूर्वाद्भावे लङ् । द्विषः शत्रोः शिर आह्रियत हृतं च । कर्मणि लङ् ॥

अतुष्यन्नमराः सर्वे प्राहृष्यन् कपि[4]यूथपाः ।
पर्यष्वजत[5] सौमित्रिं मूर्ध्न्यजिघ्रच्च राघवः ॥ ४७ ॥

४७. अतुष्यन्निति ॥ सर्वे अमरा अतुष्यन् तुष्टाः । अरियूथपाः कपिसेनापतयः प्राहृष्यन् प्रहृष्टाः । राघवो रामः सौमित्रिं लक्ष्मणं पर्यष्वजतालिङ्गितवान् । ष्वञ्ज परिष्वङ्गे ॥ "दंशसञ्जस्वञ्जां शपि" इत्यनुना-

१ भीषणं व्यसृजत्ततः T_3, Com.
२ °निरगमद्भू° D.
३ शूलर्ष्टि° E_3, c.
४ हरियू° Com.
५ पर्यस्वजत C., T_1, T_4, B., E_3, c.

सिकलोपः ॥ "सिवादीनां वाड्व्यवायेऽपि" इति वैकल्पिकं षत्वम् । मूर्ध्न्यजिघ्रच्च । प्रवासादेत्य मूर्धन्यवघ्राणमिति स्मरणादिति भावः । घ्रा गन्धोपादाने ॥ "पाघ्रा—" इत्यादिना जिघ्रादेशः ॥

अरोदीद्राक्षसानीकमरोदन्नृभुजां पतिः ।
मैथिल्यै चाशपद्धन्तुं तां प्राक्रमत चातुरः ॥ ४८ ॥

४८. अरोदीदिति ॥ राक्षसानीकमरोदीत् ॥ "रुदश्च पञ्चभ्यः" इतीट् ॥ नृभुजां पती रावणश्चारोदत् ॥ "अड्गार्ग्यगालवयोः" इति पक्षे अडागमः ॥ मैथिल्यै सीतायै अशपच्च । सर्वानर्थमूलामेनां धिगिति शप्तवान् ॥ "श्लाघह्नुङ्—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ आतुरः शोकातुरः सन् तां हन्तुं प्राक्रमत प्रावर्त्तत ॥ "प्रोपाभ्यां समर्थाभ्याम्" इति क्रमेस्तङ् ॥

अयुक्तमिदमित्यन्ये तमाप्ताः प्रर्यवारयन् ।
न्यरुन्धंश्चास्य पन्थानं बन्धुता शुचमारुणत् ॥ ४९ ॥

४९. अयुक्तमिति ॥ एतत् स्त्रीहननमयुक्तमित्यन्ये आप्ता हितास्तं रावणं पर्यवारयन् परिवृत्य स्थिताः । वृञ् वरणे । चुरादिः । अरुन्धंश्च कथंचिन्न्यवारयंश्च । अथ बन्धुता बन्धुसमूहः ॥ "ग्रामजन—" इत्यादिना समूहार्थे तल्प्रत्ययः ॥ अस्य रावणस्य शुचं शनैरारुणदशमयच्च ॥ "रुधादिभ्यः श्नम्" ॥ "हल्ङ्याब्—" इत्यादिना तिलोपः ॥ चर्त्वम् ॥

अस्फायतास्य वीरत्वममर्षश्चाप्यतायत ।
रावणस्य ततः सैन्यं समस्तमयुयुत्सयत् ॥ ५० ॥

१ आरोदी° D.
२ तामारभत D.
३ अयुक्तमेतदित्यन्ये Com., D., T3, T4.
४ पर्यवारयन् Com.
५ अथारुन्धन् शनैश्चास्य Com., T4. न्यरुन्धंश्च शनैरस्य D.
६ अस्फाय° D., T3, T4, c.
७ धीरत्वं T4.
८ °श्चाप्यपातयत् c.
९ रावणस्तु ततः T3, T4.
१० समस्तं सोऽयुयुत्सयत् T3.

५०. आस्फायतेति ॥ अथैवं निरुद्धशोकस्य रावणस्य वीरत्वमुत्साह आस्फायतावर्धत । अमर्षः कोपश्चाप्यातायतावर्धत । स्फायी ओप्यायी वृद्धौ भौवादिकौ । ततः स रावणः समस्तं सैन्यमयुयुत्सयद् योद्धुमैषयद् योद्धुमुत्साहयामासेत्यर्थः । युधेः सन्नन्ताण्णिचि लङ् ॥

अग्नीनवरिवस्यंश्च तेऽनमस्यंश्च शंकरम् ।
द्विजानप्रीणयन् शान्त्यै यातुधाना भवद्भियः ॥ ५१ ॥

५१. अग्नीनिति ॥ भवद्भियो जायमानभीतयोऽन्ये यातुधाना राक्षसा अग्नीनवरिवस्यन् होमैः पर्यचरन् । शंकरमीश्वरमनमस्यन्नपूजयंश्च ॥ "नमोवरिवश्चित्रङः क्यच्" ॥ तदन्ताल्लङ् । वरिवसः परिचर्यायां नमसः पूजायामित्यर्थनियमः । द्विजानप्रीणयंश्च ॥ 'धूञ्प्रीञोर्नुग्वक्तव्यः' ॥

परितः[1] पर्यवाद्वायुराज्यगन्धिर्[2]मनोरमः ।
अश्रूयत सपुण्याहः स्वस्तिघोषः समुच्चरन् ॥ ५२ ॥

५२. परित इति ॥ आज्यगन्धोऽस्यास्तीत्याज्यगन्धस्तद्वान् ॥ "अर्श आदिभ्योऽच्" ॥ अत एव मनोरमो वायुः परितः समन्तात्पर्यवात् वाति स्म । समुच्चरन् समन्तादुज्जिहानः सपुण्याहः पुण्याहघोषसहितः स्वस्तिघोषः स्वस्तिवादनादोऽश्रूयत । श्रुवः कर्मणि लङ् ॥

योद्धारो[4]ऽबिभरुः शान्त्यै साक्षतं वारि मूर्धभिः ।
रत्नानि चाददुर्गाश्च समवाञ्छन्[5]थाशिषः[6] ॥ ५३ ॥

५३. योद्धार इति ॥ योद्धारो योधाः शान्त्यै अरिष्टनिवृत्त्यै साक्षतं सतण्डुलम् । 'अक्षतं तण्डुले धान्ये नानालाजेष्वनामये' इति यादवः । वारि पूर्णपात्रोदकं मूर्धभिः शिरोभिरबिभरुरधारयंश्च । भृञ् भरणे ।

---

१ omitted in T₃.
२ omitted in T₃.
३ आज्यगन्धो T₄., Com.
४ omitted in T₃.
५ °वाञ्छंस्तथाशिषः D.
६ °न्नथाशिषम् Com.

लङि "श्लौ" इति द्विर्वचनम् ॥ "सिजभ्यस्तविदिभ्यश्च" इति झेर्जुस् ॥ "जुसि च" इति धातोर्गुणो रपरः ॥ "भृञामित्" इत्यभ्यासस्येत्वम् ॥ रत्नानि च गा धेनूश्चाददुर्ब्राह्मणेभ्यो दत्तवन्तः । पूर्ववदभ्यस्ताज्झेर्जुस् ॥ "उस्यपदान्तात्" इति पररूपत्वम् ॥ अथाशिषं ब्राह्मणाशीर्वादं समवाञ्छन्नाकाङ्क्षन् । प्रार्थनापूर्वमाशिषः स्वीचक्रुरित्यर्थः । वाञ्छि इच्छायाम् । इदित्वान्नुम् ॥

आदिहंश्चन्दनैः शुभ्रैर्विचित्रं समवस्त्रयन् ।
अधारयन् स्रजः कान्ता वर्म चान्ये दधुर्द्रुतम् ॥ ५४ ॥

५४. आदिहन्निति ॥ शुभ्रैश्चन्दनैरादिहन् गात्राण्यलिम्पन् । दिह उपचये । शपो लुक् । झोऽन्तादिकार्यम् । विचित्रं चित्रवस्तुजातं समवस्त्रयन्नाच्छादयन् ॥ "मुण्डमिश्र—" इत्यादिना 'वस्त्रात् समाच्छादने' इति णिच् ॥ कान्ता मनोहराः स्रजो माल्यान्यधारयन् । द्रुतं वर्माण्यदधत दधुः । दधातेर्लङि तङि "अदभ्यस्तात्" इत्यदादेशः ॥

समक्ष्णुवत शस्त्राणि प्रामृजन् खड्गसंहतीः ।
गजादीनि समारोहन् प्रातिष्ठन्तार्थं सत्वराः ॥ ५५ ॥

५५. समिति ॥ शस्त्राणि समक्ष्णुवत समतेजयन् । क्ष्णु तेजने । लङि "समः क्ष्णुवः" इति तङ् । शपो लुक् । झस्यादादेशे उवङादेशः । खड्गसंहतीः प्रामृजन्नशोधयन् । मृजूष् शुद्धौ । मृजोऽजादौ वृद्ध्यभावे झोन्तादिकार्यम् । गजादीनि समारोहन्नारूढाः । गजादिष्विति पाठे आधारत्वविवक्षायां सप्तमी । सत्वराः प्रातिष्ठन्त प्रस्थिताश्च ॥ "समवप्रविभ्यः स्थः" इति तङ् ॥

---

१ आदिहं° Com., T_3
२ आधारय° E_3.
३ वर्माण्यदधत द्रुतम् T_3, T_4, Com. कवचानदधुर्द्रुतम् D.
४ समक्ष्णुवंश्च D.
५ खड्गमुत्तमम् D.
६ गजादिषु D.
७ प्रातिष्ठन्त च सत्वराः T_3, T_4, Com.

अपूरयन्नभः शब्दो बलसंवर्त्तसंभवः ।
अपूर्यन्त च दिग्भागास्तुमुलैस्तूर्यनिस्वनैः ॥ ५६ ॥

५६. अपूरयदिति ॥ बलसंवर्त्तसंभवः सेनासंभेदसंभूतः । पचाद्यच् । शब्दः कलकलो नभः खमपूरयत् । तुमुलैः संकुलैस्तूर्यनिस्वनैर्वाद्यनिर्घोषैर्दिग्भागा अपूर्यन्त पूरिताश्च ॥

आसीद् द्वारेषु संघट्टो रथाश्वद्विपरक्षसाम् ।
सुमहाननिमित्तैश्च समभूयत भीषणैः ॥ ५७ ॥

५७. आसीदिति ॥ द्वारेषु नगरद्वारेषु सुमहानतिप्रभूतो रथाश्वद्विपरक्षसां संमर्दः संबाध आसीत् ॥ "अस्तिसिचोऽपृक्ते" इतीट् ॥ अथ भीषणैर्भयंकरैरनिमित्तैर्दुर्निमित्तैश्च समभूयत संभूतम् । भावे लङ् ॥

कपयोऽबिभयुस्तस्मिन्नभञ्जंश्च महाद्रुमान् ।
प्रोदखायन् गिरींस्तूर्णमगृह्णंश्च महाशिलाः ॥ ५८ ॥

५८. कपय इति ॥ कपयः । रावणे आगते सतीति शेषः । अबिभयुर्भीताः ॥ "सिजभ्यस्त—" इति झेर्जुसि "जुसि च" इति गुणे अयादेशः ॥ अथ तूर्णं महाद्रुमानभञ्जन् बभञ्जुश्च । गिरीन् प्रोदखायन् प्रोत्खातवन्तः । खै खनने । लङि शपि शित्यात्वाभावे आयादेशः । महाशिलाश्चागृह्णन् ॥

ततः समभवद्युद्धं प्राहरन् कपिराक्षसाः ।
अन्योन्येनाभ्यभूयन्त विमर्दमसहन्त च ॥ ५९ ॥

५९. तत इति ॥ ततः सन्नाहानन्तरं युद्धं समभवत् । कपिराक्षसाः प्राहरन् मिथः प्रजह्रुः । अन्योन्येनाभ्यभूयन्त इतरेतरमभिभूताश्च । कर्मणि लङ् । विमर्दं प्रहारमसहन्त च नाश्राम्यन्नित्यर्थः ॥

१ आपूर° T_3, T_4.
२ आपूर्य° T_3, T_4.
३ निःस्वनैः c.
४ संमर्दो Com.
५ महद्भिरनिमित्तैश्च T_3.
६ दारुणैः D.
७ °स्तुङ्गान् प्रागृह्णंश्च D.

प्रावर्धत रजो भौमं तद्व्याश्नुत दिशो दश ।
परात्मीयविवेकं[1] च प्रामुष्णात्कपिरक्षसाम् ॥ ६० ॥

६०. प्रेति ॥ भूमेरिदं भौमं रजः प्रावर्धत रथाश्वादिक्षोभादुत्थितमित्यर्थः । तद्रजो दश दिशो व्याश्नुत व्याप्नोत् । अशू व्याप्तौ । कपिरक्षसां परात्मीयविभागं स्वपरविवेकं प्रामुष्णात् प्रमुमोष । मुष स्तेये । क्रैयादिकः ॥

ततोऽद्विषुर्निरालोके स्वेभ्योऽन्येभ्यश्च राक्षसाः ।
अद्विषन् वानराश्चैव वानरेभ्योऽपि निर्दयाः ॥ ६१ ॥

६१. तत इति ॥ ततो रजोव्यापनान्निरालोके निष्प्रकाशे रणे राक्षसाः स्वेभ्यो राक्षसेभ्योऽन्येभ्यो वानरेभ्यश्चाद्विषुरक्रुध्यन् ॥ "क्रुधद्रुहेर्ष्या—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ द्विष अप्रीतौ । लङि शपो लुक् । शाकटायनमताज्झेर्जुस् । तथैव वानरा निर्भयाः सन्तो वानरेभ्यः । अपिशब्दाद्राक्षसेभ्यश्च । अद्विषन् । इतरमते झोऽन्तादिकार्यम् । प्रागेव क्रोधान्धा अथ रजोन्धाश्चेति युक्तमेतदिति भावः ॥

अघुरं[2]स्ते महाघोरमश्च्योतन्नथ शोणितम् ।
समप[3]द्यत रक्तेन समन्तात्तेन कर्दमः ॥ ६२ ॥

६२. अघुरन्निति ॥ ते हता महाघोरमघुरन्नशब्दायन्त । घुर भीमार्थशब्दयोः । अथ शोणितमश्च्योतदक्षरत् । श्चुतिर् क्षरणे । तेन रक्तेन कर्त्रा समन्तात् कर्दमः पङ्कः समपाद्यत संपादितः । पद्यतेर्ण्यन्तात् कर्मणि लङ् । अण्यन्तपाठे कर्तरि लङ् । समपद्यत संपन्न इत्यर्थः । रक्तेनेति हेतौ तृतीया ॥

गम्भीराः प्रावहन्नद्यः समजायन्त च ह्रदाः ।
वृ[4]द्धं च तद्रजोऽशाम्यत् समवेद्यन्त च द्विषः ॥ ६३ ॥

---

१ विभागं Com.
२ अघुरंश्च D.
३ समपाद्यत Com.
४ प्रवृद्धं तद्रजो T_3, T_4.

६३. गम्भीरा इति ॥ गम्भीरा अगाधा नद्यो रक्तनद्यः प्रावहन्। प्रवहन्ति स्म। ह्रदा रक्तह्रदाश्च समजायन्त संजाताः। वृद्धं पूर्ववृद्धं तद्रजो धूलिश्चाशाम्यत् शान्तम्। द्विषश्च समवेद्यन्त प्रहृता इत्यर्थः। स्वपरविवेकलाभादिति भावः। विद चेतनाख्याननिवासेष्विति धातोश्चौरादिकात्कर्मणि लङ्॥

ततोऽचित्रीयतास्त्रौघैर्धनुश्चाधूनयन्महत्।
रामः समीहितं तस्य नाचेतन् स्वे न चापरे॥ ६४॥

६४. तत इति ॥ ततस्तुमुलयुद्धप्रवृत्त्यनन्तरं रामोऽस्त्रौघैर्बाणसमूहैरचित्रीयत चित्रमाश्चर्यमकरोत्॥ "नमोवरिवश्चित्रङः क्यच्"॥ चित्रङ आश्चर्ये इत्याश्चर्यार्थे क्यच्। ङित्करणात्तङ्॥ "क्यचि च" इतीकारः॥ महद्धनुश्चाधूनयदधुनोत्॥ 'धूञ्प्रीञोर्नुग्वक्तव्यः' इति नुक्। तस्य रामस्य समीहितं शरसन्धानज्याकर्षणादिचेष्टितं स्वे स्वकीया नाचेतन्नाजानन्। परे शत्रवो नाचेतन्। तस्य तादृग्घस्तलाघवादिति भावः॥

छिन्नानैक्षन्त भिन्नांश्च समन्ताद्रामसायकैः।
क्रुष्टं हा हेति चाशृण्वन्न च[1] रामं न्यरूपयन्॥ ६५॥

६५. छिन्नानिति ॥ रामसायकैः समन्ताच्छिन्नान् द्विधाकृतान् भिन्नान् विदारितांश्चैक्षन्तापश्यन्। हा हेति क्रुष्टं क्रोशनं च। भावे क्तः। अशृण्वन्। रामं तु न न्यरूपयन्। अयमेव चेष्टत इति न निरधारयन्नित्यर्थः। रूप व्याक्रियायामिति चौरादिकः॥

अभिनच्छत्रुसंघातानक्षुणद्वाजिकुञ्जरम्।
अपिनद् च रथानीकं न चाज्ञायत संचरन्॥ ६६॥

६६. अभिनदिति ॥ स रामः शत्रुसंघातानभिनद् व्यदारयत्। वाजिकुञ्जरमक्षुणदचूर्णयत्। क्षुदिर् संपेषणे। रथानीकं रथसमूहं चापि-

[1] तु T_3, Com.

नद् समचूर्णयत् । पिष्लृ संचूर्णने । सर्वे रौधादिकाः । संचरन् सम्यक्चारीकुर्वन् स रामस्तु नाज्ञायत न ज्ञातः । तादृक् तस्य संचारलाघवमित्यर्थः ॥

दश दन्तिसहस्राणि रथिनां च महात्मनाम् ।
चतुर्दशसहस्राणि सारोहाणां च वाजिनाम् ॥ ६७ ॥

६७. तद्धस्तलाघवमेव श्लोकद्वयेनाह । दशेत्यादि ॥ धनुर्भृता राघवेण दिवसस्याष्टभागेनाष्टमांशेनार्धप्रहरेणेत्यर्थः । संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वं त्रिभागादिवत् । दश दन्तिसहस्राणि महात्मनां महामनसां रथिनां चतुर्दशसहस्राणि तथा सारोहाणां ससादिनां वाजिनां चतुर्दशसहस्राणि ॥

लक्षे[1] द्वे च पदातीनां राघवेण धनुर्भृता ।
अनीयन्ताष्टमे[2] भागे दिवसस्य परिक्षयम् ॥ ६८ ॥

६८. लक्षे इति ॥ तथा पदातीनां द्वे लक्षे च परिक्षयं नाशमनीयन्त । नयतेर्द्विकर्मकात् प्रधानकर्मणि लङ् ॥

यमलोकमिवाग्रश्नाद्रुद्राक्रीडमिवाकरोत्[3] ।
शैलैरिवाचिनोद्भूमिं बृहद्भी[4] राक्षसैर्हतैः ॥ ६९ ॥

६९. यमेति ॥ स रामो बृहद्भिर्हतै राक्षसैर्भूमिं यमलोकमिवाग्रश्नात् संदर्भितवान् । यमलोकमिवाकरोदित्यर्थः । ग्रन्थ संदर्भे । क्रैयादिः । रुद्रस्याक्रीडं क्रीडास्थानं श्मशानमिवाकरोत् । शैलैः पर्वतैरिवाचिनोत् चिनोति स्म । चिञ् चयने ॥

अस्तुवन् देवगन्धर्वा व्यस्मयन्त प्लवङ्गमाः ।
कपीन्द्रेऽतन्यत प्रीतिः पौलस्त्योऽमन्यताद्भुतम् ॥ ७० ॥

---

१ लक्षौ च द्वौ T_3, T_4.
२ °ष्टभागेन T_3, T_4, Com.
३ °क्रीडा इवातनोत् T_3.
४ बृहद्भिर्भीमराक्षसैः T_3, T_4.

७०. अस्तुवन्निति ॥ देवगन्धर्वा अस्तुवन् । प्लवङ्गमा व्यस्मयन्त विस्मितवन्तः । कपीन्द्रे सुग्रीवे प्रीतिरतन्यत ततान । सुग्रीवोऽपि संतुष्ट इत्यर्थः । कर्मकर्त्तरि लङि तङ् । पौलस्त्यो विभीषणोऽद्भुतमाश्चर्यममन्यत ॥

राक्षस्यः प्रारुदन्नुच्चैः प्राजुगुप्सन्त रावणम् ।
अमुह्यंद्बालवृद्धं च समरौदितरो जनः ॥ ७१ ॥

७१. राक्षस्य इति ॥ राक्षस्यो राक्षसस्त्रिय उच्चैः प्रारुदन् रुदितवत्यः । रावणं प्राजुगुप्सन्तागर्हन्त ॥ "गुप्तिज्किद्भ्यः सन्" इति गुपेर्निन्दायां सन् ॥ तदन्ताल्लुङि तङि "झोऽन्तः" । बालवृद्धाश्चामुह्यन् भयादमूर्च्छन् । इतरो जनः स्त्रीबालवृद्धातिरिक्तः पौरजनः समरौत् सम्यगाक्रन्दत् । रु शब्दे । शपो लुक् ॥ "उतो वृद्धिर्लुकि हलि" इति वृद्धिः ॥

सर्वतश्चाभयं प्राप्नोन्नैच्छन्नृभ्यस्तु रावणः ।
फलं तस्येदमभ्यायादुरुक्तस्येति चाब्रुवन् ॥ ७२ ॥

७२. सर्वत इति ॥ रावणः सर्वतः सर्वस्मादमानुषवर्गादभयं प्राप्नोत् । ब्रह्मणो वरं लब्धवानित्यर्थः । नृभ्यो मानुषेभ्यस्तु नैच्छदनादरादभयं न वव्र इत्यर्थः । तस्य दुरुक्तस्य दुर्भाषितस्येदं फलमभ्यायादायातमिति चाब्रुवन् । लङ्काजना इति शेषः ॥

ततोऽधावन्महाघोरं रथमास्थाय रावणः ।
अक्ष्मायत मही गृध्रास्तमारार्यन्त भीषणाः ॥ ७३ ॥

७३. तत इति ॥ ततो रामपराक्रमानन्तरं रावणो महाघोरमतिभयंकरं रथमास्थायाधावत् । रामं प्रतीति शेषः । अथास्य दुर्निमित्तान्याह । मही अक्ष्मायताधूयत । क्ष्मायी विधूनने । भौवादिः । भीषणा गृध्रास्तं रावणमारार्यन्त भृशमाच्छैन् । ऋ गतौ ॥ 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णो-

१ अमुह्यन् बालवृद्धाश्च T3, T4, Com.
२ गृध्राः समारार्यन्त N., B., D.

This verse is omitted in T3.

तीनामुपसंख्यानात्' अर्त्तेर्यङि "यङि च" इति गुणे अर्येति स्थिते 'यपरस्य रेफस्य न प्रतिषेधः' इति वचनाद्रेफसहितस्य यकारस्य द्विर्वचने अभ्यासकार्ये अरार्येति यङन्ताल्लुङि तङि शपि "झोऽन्तः"। अजादित्वादाडागमे आरार्यन्तेति सिद्धम् ॥

मेघाः सविद्युतोऽवर्षंश्चेलक्नोपं च शोणितम् ।
अवान् भीमा नभस्वन्तः प्रारुवन्नशिवाः शिवाः ॥ ७४ ॥

७४. मेघा इति ॥ सविद्युतो विद्युत्वन्तो मेघाः शोणितं रक्तं चेलान् क्नोपयित्वा सिक्त्वा चेलक्नोपमवर्षन् । क्नूयी शब्दे उन्दने च इति धातोर्ण्यन्तात् "अर्त्तिह्री—" इत्यादिना पुगागमे 'चेले क्नोपेः' इति णमुल्प्रत्ययः । भीमाः प्रतिकूला नभस्वन्तो वायवश्चावान् ववुः । जुसभावपक्षे "झोऽन्तः" । अशिवा अमङ्गलाः शिवाः शृगालाः प्रारुवन् ववाशिरे । रौतेर्लङि झेर्जुस्युवङादेशः ॥

आटाट्यतावमत्यासौ दुर्निमित्तानि संयुगे ।
अधुनोद्धनुरस्त्रौघैः प्रौर्णोनूयत[1] विद्विषः ॥ ७५ ॥

७५. आटाट्यतेति ॥ असौ रावणो दुर्निमित्तान्यवमत्यानादृत्य संयुगे रणे आटाट्यत भृशमाटत् । अट गतौ । 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनाम्—' इति यङि द्वितीयैकाचोर्द्विर्वचनेऽभ्यासकार्ये यङन्ताल्लङि तङि शबादिकार्ये चाजादित्वादाडागमः । धनुरधुनोत् धुनोति स्म । धू विधूनने । स्वादिः । शत्रूनस्त्रौघैः शरजालैः प्रौर्णोनूयत भृशमाच्छादयच्च । ऊर्णुञ् आच्छादने । नुवद्भावात् "सूचिसूत्रि—" इत्यादिना यङ् । अजादित्वाद्रेफवर्जितस्य द्वितीयैकाचो नुशब्दस्य द्विर्वचनम् ॥ "गुणो यङ्लुकोः" इत्यभ्यासस्य गुणः ॥ "अकृत्सार्वधातुकयोः—" इति दीर्घः । ततो यङन्ताल्लङि तङ् । आड्वृद्धिः ॥

---

१ अधुना° T4.

व्यनाशयंस्ततः शत्रून् सुग्रीवास्ता महीभृतः ।
ततो व्यरसद[1]ग्लायदध्यशेत महीतलम् ॥ ७६ ॥

७६. अथ युग्मेनाह । व्यनाशयन्नित्यादि ॥ ततो रावणविक्रमानन्तरं सुग्रीवेणास्ताः क्षिप्ता महीभृतः पर्वताः शत्रून् व्यनाशयन् विनाशयामासुः । ततः सुग्रीवबाधितं मांसादां बलं राक्षससैन्यं व्यरसदाक्रन्दत् । रस शब्दे । अग्लायद् ग्लानम् । ग्लै हर्षक्षये । शित्यात्वाभावादायादेशः । महीतलमध्यशेत तत्र पपातेत्यर्थः ॥ "शीङः सार्वधातुके गुणः" ॥

अश्च्योत[2]द्रुधिरं तोयमलैस[3]च्चातिविह्वलम् ।
अशीयत नॄ[4]मांसादां बलं सुग्रीवबाधितम् ॥ ७७ ॥

७७. अश्चोतदिति ॥ रुधिरमश्च्योतदक्षरत् । श्चुतिर् क्षरणे । विह्वलं सत्तोयमभ्यलष्यच्चाभिललाष चातृष्यदित्यर्थः । "वा भ्राश—" इत्यादिना लषेर्विकल्पेन श्यन् । अशीयत व्यशीयत । शद्लृ शातने ॥ "शदेः शितः" इति तङ् ॥ "पाघ्रा—" इत्यादिना शीयादेशः ॥

विरूपाक्षस्ततोऽक्रीडत् सं[5]ग्रामे मत्तहस्तिना ।
मुष्टिनादालयत्तस्य मूर्धानं वानराधिपः ॥ ७८ ॥

७८. विरूपेति ॥ ततो विरूपाक्षो नाम राक्षसः संग्रामे मत्तहस्तिना वाहनेनाक्रीडद्व्यजृम्भत । वानराधिपः सुग्रीवस्तस्य रक्षसो मूर्धानं मुष्टिनादालयद्दारयत् । दल विशरणे ॥

अचूर्णयच्च यू[6]पाक्षं शिलया तदनन्तरम् ।
संक्रु[7]द्धो मुष्टिनातुभ्नादङ्ग[8]दोऽलं महोदरम् ॥ ७९ ॥

---

१ व्यरमद° E_3.
२ अश्चोतद्रु° Com.
३ °यमभ्यलष्यच्च विह्वलम् Com., D., T_3, T_4.
४ च मांसादां T_4, Com.
५ संयुगे c.
(संग्रामे is also noticed by c.)
६ धूम्राक्षं T_3, T_4.
७ संक्रुद्धो T_3.
८ दङ्गदोऽपि E_3, T_3, T_4, Com.

७९. अचूर्णयदिति ॥ तदनन्तरं विरूपाक्षवधानन्तरं यूपाक्षं नाम राक्षसं च शिलयाचूर्णयच्चूर्णितवान् ॥ "सत्यापपाश—" आदिण्यन्ताचूर्णयतेर्लङ् । अङ्गदोऽपि संक्रुद्धः सन् महोदरं राक्षसं मुष्टिनातुभ्नादहन् । क्रैयादिः ॥

ततोऽकुष्णाद्दशग्रीवः क्रुद्धः प्राणान् वनौकसाम् ।
अगोपायच्च रक्षांसि दिशश्चारीनभाजयत् ॥ ८० ॥

८०. तत इति ॥ ततो विरूपाक्षवधानन्तरं दशग्रीवः क्रुद्धः सन् वनौकसां वानराणां प्राणानकुष्णाच्चकर्ष । कुष निष्कर्षणे । क्रैयादिः । रक्षांस्यगोपायद्रक्षच्च ॥ "गुपूधूप—" इत्यादिना आयप्रत्ययः । अरींश्च दिशोऽभाजयत् प्रापयत् । भजेर्ण्यन्ताल्लुङ् ॥

आ[1]लोकयत्स काकुत्स्थमधृष्णोद्घोरमध्वनत् ।
धनुरभ्रामयद्भीममभीषयत वि[2]द्विषः ॥ ८१ ॥

८१. आलोकयदिति ॥ स रावणः काकुत्स्थमालोकयदपश्यत् । लोकृ दर्शने । चुरादिः । अधृष्णोत् धृष्टः स्थितः । ञिधृषा प्रागल्भ्ये । घोरं भीममध्वनद् दध्वान । भीमं धनुरभ्रामयद् भ्रामितवान् । द्विषः शत्रून-भीषयत भीषितवांश्च ॥ "भीस्म्योर्हेतुभये" इति तङ् ॥ "भियो हेतु-भये षुक्" ॥

आ[3]स्कन्दल्लक्ष्मणं बाणैरत्यक्रामच्च तं द्रुतम् ।
राममभ्यद्रवज्जिष्णुरस्कु[4]नाच्चेषुवृष्टिभिः ॥ ८२ ॥

८२. आस्कन्ददिति ॥ जिष्णुर्जयशीलो रावणो लक्ष्मणं बाणैरास्कन्द-दाजघान । द्रुतं तं लक्ष्मणमत्यक्रामदतिक्रान्तश्च ॥ "क्रमः परस्मैप-देषु" इति दीर्घः ॥ राममभ्यद्रवदभिद्रुतः । द्रु गतौ । इषुवृष्टिभिरस्कु-नादावृणोच्च । स्कुञ् आप्रवरणे । आप्रवरणमावरणम् ॥ "स्तन्भुस्तु-न्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च" इति चकारात् श्नाप्रत्ययः ॥

---

१ अलोकयत् T4.
२ च द्विषः Com.
३ अस्कन्द° D., T3, T4.
४ °रस्कुभ्ना° T4.

अपौहद्बाणवर्षं तद्भल्लै रामो निराकुलः ।
प्रत्यस्कुनोद्दशग्रीवं शरैराशीविषोपमैः ॥ ८३ ॥

८३. अपौहदिति ॥ तद्रावणमुक्तं बाणवर्षं रामो निराकुलोऽनाकुलः सन् भल्लैर्बाणविशेषैरपौहदपाकरोत् । ऊह वितर्के । 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति पक्षे तिप् । तथा आशीविषोपमैः सर्पकल्पैर्बाणैर्दशग्रीवं प्रत्यस्कुभ्नोत् प्रत्यावृणोत् । स्कुन्भु आवरणे ॥ "स्तन्भु—" इत्यादिना श्नुप्रत्ययः । अस्कुभ्नादिति पाठे चकारात् श्नाप्रत्ययः ॥

मण्डलान्याटतां चित्रमच्छिन्त्तां शस्त्रसंहतीः ।
जगद्व्यस्मापयेतां तौ न च वीरावसीदताम् ॥ ८४ ॥

८४. मण्डलानीति ॥ वीरौ तौ रामरावणौ चित्रमाश्चर्यं यथा तथा मण्डलान्याटतामाचरताम् । अट गतौ । आडागमः । शस्त्रसंहतीरन्योन्यशरजालान्यच्छिन्त्तां चिच्छिदतुः । छिदिरयं रुधादिः । तसस्तामादेशः । जगल्लोकं व्यस्मापयेतां विस्मापितवन्तौ । स्मयतेर्ण्यन्ताल्लङि "भीस्म्योर्हेतुभये" इति तङ् ॥ "नित्यं स्मयतेः" इत्यात्वे पुगागमः ॥ ॥ तथापि नासीदतां नावसन्नौ ॥ "पाघ्रा—" इत्यादिना सदः सीदादेशः ॥

व्योम प्राचिनुतां बाणैः क्ष्मामक्ष्मापयतां गतैः ।
अभिन्त्तां तूर्णमन्योन्यं शिक्षांश्चातनुतां मुहुः ॥ ८५ ॥

८५. व्योमेति ॥ तौ वीरौ बाणैर्व्योमाकाशं प्राचिनुतामाच्छादयतामित्यर्थः । हतैः कपिराक्षसैः क्ष्मां भूमिमक्ष्मापयतामकम्पयताम् । क्ष्मायी विधूनने ॥ "अर्त्तिह्री—" इत्यादिना पुकि यकारलोपः ॥ तूर्णमन्योन्यमभिन्त्तां व्यदारयताम् । भिदेर्लङि तसस्तामादेशः ॥ "श्नसोरल्लोपः" ॥ चर्त्वे तकारद्वित्वम् । मुहुः शिक्षामभ्यासपाटवं चातनुतां व्यस्तारयताम् ॥

---

१ प्रत्यधूनो° T_3, T_4. प्रत्यस्कुभ्नो° Com.
२ बाणैश्चाशी° T_3, Com.
३ व्यस्मापयेतां T_3.
४ हतैः Com.
५ शिक्षां चातनु° Com.

समाधत्तासुरं[1] शस्त्रं राक्षसः क्रूरविक्रमः[2]।
तदक्षरन्महासर्पान् व्याघ्रसिंहांश्च भीषणान्[3]॥ ८६ ॥

८६. समिति॥ अथ क्रूरविग्रहो राक्षस आसुरमसुरदेवताकमस्त्रं बाणं समधत्त धनुषि संदधे॥ "श्नाभ्यस्तयोरातः" इत्याल्लोपः॥ "दध-स्तथोश्च" इति भष्भावः॥ "अधः" इति प्रतिषेधात् "झषस्तथोः—" इति न भवति॥ तदासुरमस्त्रं कर्तृ भीषणान् महासर्पान् व्याघ्रान्सिं-हांश्च प्राक्षरत्। असृजदित्यर्थः॥

न्यषेधत्पावकास्त्रेण रामस्तद्राक्षसस्ततः।
अदीव्यद्रौद्रमत्युग्रं मुसलाद्यगलत्ततः[5]॥ ८७ ॥

८७. न्यषेधदिति॥ रामस्तदासुरमस्त्रं पावकास्त्रेण न्यषेधन्न्यवारयत्। ततो राक्षसोऽत्युग्रं रौद्रमस्त्रमदीव्यद् व्यवहृतवान् प्रयुक्तवानित्यर्थः। ततो रौद्रास्त्रान्मुसलादि मुसलतोमराद्यनेकमस्त्रजातमगलदक्षरदि-त्यर्थः॥

गान्धर्वेण न्यविध्यत्तत् क्षितीन्द्रोऽथ नराशनः।
सर्वमर्मसु काकुत्स्थमौम्भत्तीक्ष्णैः शिलीमुखैः॥ ८८ ॥

८८. गान्धर्वेणेति॥ क्षितीन्द्रो रामस्तद्रौद्रमस्त्रं गान्धर्वेण गन्धर्वास्त्रेण न्यविध्यन्न्यवारयदित्यर्थः। व्यध ताडने। "ग्रहिज्या—" इत्यादिना संप्रसारणम्। अथ नराशनो राक्षसो दिव्यास्त्रवैफल्यात् क्रुद्धः सन्निति भावः तीक्ष्णैः शिलीमुखैः केवलबाणैः काकुत्स्थं रामं सर्वमर्मस्वौ-म्भदपूरयत्। उम्भ पूरणे। तौदादिकः। आड्वृद्धिः॥

---

१ समधत्ता° Com.
२ °विग्रहः Com.
३ ततोऽक्षरन् महासर्पाः सिंहा व्याघ्राश्च भीषणाः C.
तत् प्राक्षरन्म° T_3, T_4, Com.
४ सिंहव्याघ्रांश्च D., T_3.
५ मुशला° D.
मुसलान्यपतंस्ततः T_3, T_4.
मुसला° Com.

ततस्त्रिशिरसं तस्य प्रावृश्चल्लक्ष्मणो ध्वजम् ।
अमथ्नात् सारथिं[1] चाशु भूरिभिश्चातुदच्छरैः ॥ ८९ ॥

८९. तत इति ॥ ततो लक्ष्मणस्तस्य रावणस्य त्रिशिरसं त्रिशिखं त्रिशूलाग्रं ध्वजं शरैः प्रावृश्चदच्छिनत् । ओव्रश्चू छेदने । तौदादिकः । सारथिं चामथ्नात् जघानेत्यर्थः । क्र्यादौ मन्थ विलोडने । आशु भूरिभिः शरैरतुदच्च । तुद व्यथने ॥

अश्वान् विभीषणोऽतुभ्नात्स्यन्दनं चाक्षिणोद्द्रुतम् ।
नोक्षुभ्नाद्राक्षसो[2] भ्रातुः शक्तिं चोदवृहद्गुरुम् ॥ ९० ॥

९०. अश्वानिति ॥ विभीषणोऽश्वानतुभ्नात् हतवान् । क्र्यादौ तुभ हिंसायाम् । द्रुतं स्यन्दनं रथं चाक्षिणोद् बभञ्जेत्यर्थः । क्षिणु हिंसायाम् । तनादित्वादुप्रत्यये गुणः । राक्षसो रावणो भ्रातुर्विभीषणस्य । तं प्रतीत्यर्थः । सम्बन्धसामान्ये षष्ठी । अक्षुभ्नात् क्षुभितवान् गुरुं गुर्वीम् ॥ "वोतो गुणवचनात्" इति विकल्पादनीकारः ॥ शक्तिं कासूमुदवृहदुद्यतवान् । वृहू उद्यमने । तुदादिः ॥

तामापतन्तीं सौमित्रिस्त्रिधाकृन्तच्छिलीमुखैः ।
अशब्दायन्त पश्यन्तस्ततः क्रुद्धो निशाचरः ॥ ९१ ॥

९१. तामिति ॥ आपतन्तीं शक्तिं सौमित्रिः शिलीमुखैस्त्रिधाकृन्तदच्छिनत् । कृती छेदने । तुदादिः । मुचादित्वान्नुम् । पश्यन्तस्तत्कर्म प्रेक्षमाणा अशब्दायन्त शब्दमकुर्वन् हाहाकारं चक्रुरित्यर्थः ॥ "शब्दवैर—" इत्यादिना करोत्यर्थे क्यङ् ॥ तदन्ताल्लङ् । ततो निशाचरो रावणः क्रुद्धः सन् ॥

अष्टघण्टां महाशक्तिमुदयच्छन्महत्तराम् ।
रामानुजं तयाविध्यत् स महीं व्यसुराश्रयत् ॥ ९२ ॥

---

१ भूरिभिश्चाशु सारथिं चातु° Com. | २ अक्षुभ्ना° Com.

९२. अष्टेति ॥ अष्टौ घण्टा यस्यास्तां महत्तरां परिमाणतोऽप्यधिकां महाशक्तिं महतीं कासूमुदयच्छदुद्यतवान्। यमेर्लङि "इषुगमियमां छः" । अकर्त्रभिप्रायत्वात् "समुदाङ्भ्यः—" इति न तङ् । तयोद्यतया शक्त्या रामानुजं लक्ष्मणमविध्यत् प्राहरत् । स विद्धो रामानुजो व्यसुर्मह्यामाश्रयदाश्रितः । मह्यां पपातेत्यर्थः ॥

राघवस्याभृशायन्त सायकास्तैरुपद्रुतः[1] ।
ततस्तूर्णं दशग्रीवो रणक्ष्मां पर्यशेषयत् ॥ ९३ ॥

९३. राघवस्येति ॥ राघवस्य सायका अभृशा भृशा अभवन् अभृशायन्त अतितीव्रा अभवन्नित्यर्थः ॥ "भृशादिभ्यो भुवि—" इत्यादिना च्व्यर्थे क्यङन्ताल्लङ् ॥ ततस्तैः सायकैरुपद्रुतः पीडितो दशग्रीवस्तूर्णं रणक्ष्मां रणभूमिं पर्यशेषयत् शेषयति स्म । स्वपलायनेन तामेव[1] शेषितवानित्यर्थः । शिष असर्वोपयोगे इति चौरादिकः ॥

संस्फुरस्योदकर्षच्च[2] सौमित्रेः शक्तिमग्रजः ।
असिस्रदोषधीस्तां[3] याः समानीता हनूमता ॥ ९४ ॥

९४. अस्फुरदिति ॥ सौमित्रेरग्रजो रामोऽस्फुरदचेष्टत । शक्तिमनुजहृदयलग्नं शक्त्यायुधमुदकर्षदुद्धृतवांश्च । संस्फुरस्येति पाठे स्फुरतीति स्फुरोऽन्तः स्फुरन् प्राणवायुः । इगुपधलक्षणः कः । तेन सह वर्त्तत इति सस्फुरस्यान्तर्लीनप्राणस्य सौमित्रेः शक्तिं हृदयलग्नां कासूमग्रजो राम उदकर्षच्चेत्यादि योज्यम् । हनूमता समानीता आहृतास्ताः पूर्वोक्ता मृतसंजीविनीप्रमुखा ओषधीश्चासिस्रदक्षरच्च । विचिर् क्षरणे ॥

उदजीवत् सुमित्राभूर्भ्राताश्लिष्यत्तमायतम् ।
सम्यङ्मूर्धन्युपाघ्रासीद्[4]दपृच्छच्च निरामयम् ॥ ९५ ॥

---

१ शायका c., E3, D.
२ अस्फुरदुदकर्षच्च Com.
३ °स्तस्य संनीतास्ता हनू° T3, T4.
४ °पासिङ्क्ष° E3, D.

---

1 राममवशे° Th. Com.

९५. उदिति ॥ सुमित्रायां भवतीति सुमित्राभूर्लक्ष्मण उदजीवदुज्जीवितः । भ्राता रामस्तमुज्जीवितं लक्ष्मणमायतं दीर्घकालं यथा तथाश्लिष्यदालिङ्गत् । सम्यग्यथाशास्त्रं मूर्धन्युपाशिङ्घदजिघ्रत् । शिघि आघ्राणे । निरामयमनामयमपृच्छच्च व्यथाशान्तिमपृच्छदित्यर्थः ॥

ततः[1] प्रोदसहन् सर्वे योद्धुमभ्यद्रवन् परान्[2] ।
अकृच्छ्रायत च प्राप्तो रथेनान्येन रावणः ॥ ९६ ॥

९६. पुनरिति ॥ सर्वे रामादयः पुनर्भूयोऽपि योद्धुं प्रोदसहन् प्रोत्सेहिरे । षह मर्षणे इति धातोश्चौरादिकात् 'आधृषाद्वा' इति णिजभावपक्षे तङ्निमित्ताभावात्तिप् । भौवादिकात्तु तङेवेति पूर्वे व्याख्यातारः । भट्टमल्लस्तु 'तितिक्षतेऽधिकुरुते क्षान्तौ सहति सह्यति । मृष्यत्यामर्षति चेति आत्मनेऽपि चतुष्टयम् ॥' इत्याचष्ट । अथ रावणश्चान्येन रथेन प्राप्तो हरीन् कपीनभ्यद्रवदभ्यधावत् । द्रु गतौ । अकृच्छ्रायत कृच्छ्राय पापकर्मणेऽक्रामच्च । हन्तुं प्रवृत्तश्चेत्यर्थः ॥ "कष्टाय क्रमणे" इत्यत्र 'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्' इति कृच्छ्रायधातोः क्यङन्ताल्लुङि तङ् । कण्वं पापम् ॥

भूमिष्ठस्यासमं युद्धं रथस्थेनेति मातलिः ।
आहरद्रथमत्युग्रं[3] सशस्त्रं मघवाज्ञया[4] ॥ ९७ ॥

९७. भूमीति ॥ भूमौ तिष्ठतीति भूमिष्ठः पदातिः ॥ "सुपि स्थः" इति कप्रत्ययः ॥ "अम्बाम्बगोभूमि—" इत्यादिना षत्वे ष्टुत्वम् । तस्य रामस्य रथस्थेन रावणेन सह । पूर्ववत्कः । युद्धमसममसदृशमिति मत्वेति शेषः । गम्यमानार्थत्वादप्रयोगः । वासवाज्ञयेन्द्रादेशेन मातलिरिन्द्रसारथिरत्युग्रमतिभीषणं सशस्त्रं सायुधं रथमाहरदानयत् ॥

१ पुनः T_3, T_4, Com., D.
२ हरीन् Com. °द्रवन्हरीन् T_3, T_4.
३ आरुहद्रथ° E_3, B.
४ वासवाज्ञया T_3, T_4, Com.

सोऽध्यष्ठीयत रामेण शस्त्रं पाशुपतं ततः ।
निरास्यत दशास्यस्तच्छैक्रास्त्रेणाजयन्नृपः ॥ ९८ ॥

९८. स इति ॥ स रथो रामेणाध्यष्ठीयताधिष्ठितः । तिष्ठतेः कर्मणि लङ् ॥ "उपसर्गात्सुनोति—" इत्यादिना अड्व्यवायेऽपि षत्वम् ॥ ततो दशास्यः पाशुपतं शस्त्रं पाशुपतास्त्रं निरास्यतोदक्षिपत् ॥ 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति तङ् । नृपो रामस्तच्छक्रास्त्रेणाजयत् ॥

ततः शतसहस्रेण रामः प्रौर्णोन्निशाचरम् ।
बाणानामक्षिणोद्धुर्यान् सारथिं चादुनोद्द्रुतम् ॥ ९९ ॥

९९. तत इति ॥ ततो रामो बाणानां शतानां सहस्रेण लक्षेण निशाचरं रावणं प्रौर्णोदाच्छादयत् ॥ "गुणोऽपृक्ते" इति गुणः ॥ धुर्यान् रथाश्वानक्षिणोज्जघान । क्षिणु हिंसायाम् । तनादिः । द्रुतं सारथिं चादुनोत् दुनोति स्म । टुदु उपतापे । स्वादिः ॥ "प्वादीनां ह्रस्वः" ॥

अदृश्यन्तानिमित्तानि प्राह्वलत्क्षितिमण्डलम् ।
रावणः प्राहिणोच्छूलं शक्तिं चैन्द्रीं महीपतिः ॥ १०० ॥

१००. अदृश्यन्तेति ॥ अथ रावणस्याग्रे अनिमित्तानि दुर्निमित्तान्यदृश्यन्त । दृशेः कर्मणि लङ् । क्षितिमण्डलं भूगोलं प्राह्वलदकम्पत । ह्वल चलने । तद् दृष्ट्वा रावणः शूलं प्राहिणोत्प्रायुङ्क्त । हि गतौ । स्वादिः ॥ "हिनुमीना" इति णत्वम् ॥ महीपती राम ऐन्द्रीमिन्द्रदेवताकां तद्दत्तां वा शक्तिं प्राहिणोत् ॥

ताभ्यामन्योन्यमासाद्य समवाप्यत संशमः ।
लक्षेण पत्रिणां वक्षः क्रुद्धो रामस्य राक्षसः ॥ १०१ ॥

१०१. ताभ्यामिति ॥ ताभ्यां शूलशक्त्यायुधाभ्यामन्योन्यमासाद्य प्राप्य संशमः संक्षयः समवाप्यत संप्राप्तः । आप्नोतेः कर्मणि लङ् ।

१ °स्तत्सर्पास्त्रेण T_3, T_4.
२ निशाचरे D.
३ प्राज्वल° D.
४ शक्तिमैन्द्रीं D., T_3, T_4.

अथ राक्षसः क्रुद्धः पत्रिणां बाणानां लक्षेण शतसहस्रेण रामस्य वक्षः अस्तृणात् इत्युत्तरश्लोकस्थमाकृष्य योज्यम् । स्तृञ् आच्छादने । क्र्यादिः ॥

अस्तृणादधिकं रामस्ततोऽदेवत सायकैः[१] ।
अक्राम्यद्रावणस्तस्य सूतो रथमनाशयत् ॥ १०२ ॥

१०२. अस्तृणादिति ॥ अथ रामस्ततो रावणादप्यधिकं सायकैरदेवत चिक्रीड । देविरयं भौवादिकः । रावणोऽक्राम्यत् क्रान्तोऽमूर्च्छदित्यर्थः । तस्य रावणस्य सूतः सारथिः रथमनाशयददर्शनमगमयत् । अन्यतोऽनयदित्यर्थः ॥

राक्षसोऽतर्जयत् सूतं पुनश्चाढौकयद्रथम् ।
निरास्येतामुभौ बाणानुभौ[२] धुर्यानविध्यताम् ॥ १०३ ॥

१०३. राक्षस इति ॥ राक्षसः सूतमतर्जयत् किमर्थमित्थं कष्टं कर्म कृतमित्यभर्त्सयत् । तर्जिभर्त्स्योरनुदात्तेत्त्वेऽपि तस्य चक्षिङादेशस्य ङित्करणाज्ज्ञापकादनित्यत्वज्ञापनात् परस्मैपदप्रयोगः । पुनश्च रथमाढौकयद्रामान्तिकमगमयत् । तावुभौ रामरावणौ बाणान्निरास्येतामक्षिपताम् । 'उपसर्गादस्यत्यूह्योः' इति वा तङ् । अजादित्वादाडागमः । धुरं वहन्तीति धुर्यान् रथाश्वान् ॥ "धुरो यड्ढकौ" इति यत्प्रत्ययः ॥ अविध्यतां प्राहरतां चेत्यर्थः । व्यध ताडने । दिवादिः ॥ "ग्रहिज्या—" इति संप्रसारणम् ॥

उभावकृन्ततां केतूनै[३]व्यथेतामुभौ न[४] तौ ।
ऐदीप्येतामुभौ[५] धृष्णू[६] प्रायुञ्जातां च नैपुणम् ॥ १०४ ॥

---

१ शायकैः D., C., E_3, c.
२ बाणांस्तौ च धुर्या° T_3.
३ केतूनाव्यथेतामुभौ च तौ T_3, T_4.
४ इतौ D.
५ आदीप्यतो° c., E_3.
६ वीरौ D.

१०४. उभाविति ॥ उभौ परस्परं केतून् ध्वजानकृन्ततामच्छिन्ताम् । कृती छेदने । तुदादिः । नाव्यथेतां न भीतौ न चलितौ वा । व्यथ भयचलनयोः । अदीप्येतामराजतां धृष्णू धर्षणशीलौ ॥ "त्रसिगृधिधृषिक्षिपेः क्नुः" ॥ उभौ नैपुण्यं कौशलं च प्रायुञ्जातां प्रयुक्तवन्तौ । युजिर् योगे ॥

उभौ मायां[1] व्यतायेतां वीरौ नाश्राम्यतामुभौ ।
मण्डलानि विचित्राणि क्षिप्रमाक्रामतामुभौ ॥ १०५ ॥

१०५. उभाविति ॥ उभौ मायां कपटप्रयोगं च व्यतायेतां व्यतनुताम् । तायृ संतानपालनयोः । भुवादिः । वीरावुभौ नाश्राम्यतां न श्रान्तौ ॥ "शमामष्टानाम्—" इति दीर्घः ॥ उभौ विचित्राणि मण्डलानि मण्डलचारीः क्षिप्रमाक्रामतामाचरताम् ॥

न चोभावप्यलक्ष्येतां यन्तारावाहतामुभौ[2] ।
स्यन्दनौ समपृच्येतामुभयोर्दीप्तवाजिनौ[3] ॥ १०६ ॥

१०६. नेति ॥ उभावपि नालक्ष्येतां मण्डलचारवेगादयमत्रेति न लक्षितौ । लक्षेः कर्मणि लङ् । उभौ रथिनौ कर्त्तारौ यन्तारावन्योन्यसारथी कर्मणी आहतां प्राहरताम् । हन्तेर्लङि तसस्तामादेशः ॥ "अनुदात्तोपदेश—" इत्यादिनानुनासिकलोपः ॥ दीप्रवाजिनौ तेजिष्ठाश्वौ । दृप्तेति पाठे बलिष्ठाश्वावित्यर्थः । उभयोः रामरावणयोः स्यन्दनौ रथौ समपृच्येतां संश्लेषितौ । प्रत्यासादितावित्यर्थः । पृची संपर्के । कर्मणि लङ् ॥

ततो मायामयान्मूर्ध्नो[4] राक्षसोऽप्रथयद्रणे ।
रामेणैकशतं तेषां प्रावृश्च्यत[5] शिलीमुखैः ॥ १०७ ॥

---

१ °यामतायेतां T4.
२ °मुत T4.
३ दीप्र Com.
The 2nd half of the verse is omitted in T4.
४ मायामयो मू° T3.
५ तेषामवृश्च्यत T3, T4, D.

१०७. तत इति ॥ ततो रणे राक्षसो मायामयान् मूर्ध्नः शिरांस्यप्रथयत्। छेदे छेदे पुनः प्ररूढशिरस्कोऽभवदित्यर्थः। रामेण तेषां मूर्ध्नामेकशतमेकोत्तरशतं शिलीमुखैः शरैः प्रावृश्च्यत वृक्णम्। ओव्रश्चू छेदने। कर्मणि लङ्॥

समक्षुभन्नुदन्वन्तः प्राकम्पन्त महीभृतः।
संत्रासमबिभः शक्रः[1] प्रैङ्खच्च[2] क्षुभिता क्षितिः ॥ १०८ ॥

१०८. समिति ॥ उदन्वन्तः समुद्राः समक्षुभन् शिरःपातभरात् संचलिताः। क्षुभ संचलने। क्र्यादिः। महीभृतः पर्वताः प्राकम्पन्ताचलन्। शक्र इन्द्रः संत्रासमबिभः। भृञो लङि "श्लौ" इति द्वित्वम्॥ "भृञामित्" इत्यभ्यासस्येत्वम्॥ धातोर्गुणो रपरः। तिलोपे रेफस्य विसर्जनीयः। क्षितिश्च क्षुभिता सती प्रैङ्खत् डोलायते स्म। इखेर्भौवादिकाल्लङ्। इदित्वान्नुम्। आड्वृद्धिः॥

ततो मातलिना शस्त्रमस्मार्यत[3] महीपतिः।
वधाय रावणस्योग्रं स्वयंभूर्यदकल्पयत् ॥ १०९ ॥

१०९. तत इति ॥ ततः शिरःप्ररोहानन्तरं मातलिना महीपतिः रामः शस्त्रं वक्ष्यमाणास्त्रम्॥ "कर्मणि द्वितीया" ॥ अस्मार्यत स्मारितः। स्मर्यतेर्बुद्ध्यर्थत्वात् "गतिबुद्धि—" इत्यादिना अणि कर्त्तुः कर्मत्वमिति महीपतेः कर्मत्वम्॥ "कर्मणि द्वितीया" इत्यत्रानभिहिताधिकारादत्राभिहिते कर्मणि प्रथमा॥ अत्र शेषत्वाविवक्षायां न "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी। किं तच्छस्त्रं तदाह। स्वयंभूर्ब्रह्मा रावणस्य वधायोग्रं यदस्त्रमकल्पयदसृजत्॥

नभस्वान यस्य वाजेषु फले तिग्मांशुपावकौ।
गुरुत्वं मेरुसङ्काशं[4] देहः सूक्ष्मो वियन्मयः ॥ ११० ॥

---

१ शत्रुः D.
२ प्रैङ्खत्पाक्षुभिता T_3, T_4.
३ °मस्मर्यत T_3.
४ मेरुवयस्य Com.

११०. नभस्वानिति ॥ किं च यस्यास्त्रस्य वाजेषु पक्षेषु । 'छदः पक्षो गरुद्वाजः' इति यादवः । नभस्वान् वायुर्वसतीति शेषः । एतेन वेग उक्तः । फले शल्ये तिग्मांशुपावकौ सूर्याग्नी । दुःसहत्वदुर्धर्षत्वे उक्ते । यस्य मेरुवन्मेरोरिव गुरुत्वं दुर्भरत्वम् ॥ "तत्र तस्येव" इति वतिप्रत्ययः ॥ मेरुसङ्काशमिति पाठे मेरुगुरुत्वसङ्काशमित्यर्थः । यस्यास्त्रस्य देहः शरीरं वियन्मय आकाशात्मकोऽत एव सूक्ष्मोऽतीन्द्रियः ॥

रा[1]जितं गारुडैः प[2]क्षैर्विश्वेषां धाम तेजसाम् ।
स्मृ[3]तं तद्रावणं भित्त्वा सुघोरं भुव्यशाययत् ॥ १११ ॥

१११. वाजितमिति ॥ गारुडैः पक्षैस्तार्क्ष्यपक्षैर्वाजितं वाजवत् पक्षवत् यत् कृतम् । वाजवत्शब्दात् 'तत्करोति—' इति ण्यन्तात्कर्मणि क्तः । णाविष्ठवद्भावात् "विन्मतोर्लुक्" । विश्वेषां तेजसां धाम सर्वदेवतातेजोमयमित्यर्थः । सुघोरमतिदारुणं तदस्त्रं स्मृतं ध्यातं सद्रावणं भित्त्वा भुवि भूतलेऽशाययदपातयदित्यर्थः । शीङो ण्यन्ताल्लुङ् ॥

आबध्नन् कपिवदनानि सं[4]प्रहासं
प्राशंसत् सुरसमितिर्नृपं जितारिम् ।
अन्येषां विगतपरिप्लवा दिगन्ताः
पौलस्त्योऽजुषत शुचं विपन्नबन्धुः ॥ ११२ ॥

११२. आबध्नन्निति ॥ कपिवदनानि सुग्रीवादिमुखानि संप्रहासमाबध्नन् हर्षोद्धासमकुर्वन्नित्यर्थः । सुरसमितिः सुरसङ्घः जितारिं नृपं प्राशंसत्तुष्टाव । अन्येषां दिक्पालानां संबन्धिनो दिगन्तास्तत्तत्पाल्यदिग्भागा विगतपरिप्लवा वीतोपद्रवा जाताः । विपन्नबन्धुर्विनष्टभ्रातृकः

१ वाजितं Com., D.
२ पत्रैः T_3, T_4.
३ तत्स्मृतं T_3, T_4.
४ संप्रसादं D.

पौलस्त्यो विभीषणः शुचं शोकमजुषतामजत । दुष्टस्यापि भ्रातुर्विपत्तिर्दुःसहेति भावः । प्रहर्षिणी वृत्तम् । 'म्नौज्रौगस्त्रिदशयतिः प्रहर्षिणीयम्' इति लक्षणात् ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लङ्विलसितो
नाम सप्तदशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचितायां भट्टिकाव्यव्याख्यायां सर्वपथीनाख्यायां रावणवधो
नाम लङ्विलासाख्यः सप्तदशः सर्गः ॥

॥ श्रीः ॥

अथाष्टादशः सर्गः ।

व्यश्नुते स्म ततः शोको नाभिसंबन्धसंभवः ।
विभीषणमसावुच्चै रोदिति स्म दशाननम् ॥ १ ॥

१. अथ लड्विलासमधिकृत्याह । व्यश्नुत इति ॥ ततो रावणपातानन्तरं नाभिसंबन्धसंभव एकोदरसंभूतः शोको विभीषणं व्यश्नुते स्म व्याप्नोत् । अशू व्याप्तौ ॥ "लट् स्मे" इति भूतार्थे लट् । असौ विभीषणो दशाननं रावणं प्रत्युच्चैस्तारं रोदिति स्म विललाप । पूर्ववल्लट् ॥ "रुदादिभ्यः सार्वधातुके" इतीट् ॥

भूमौ शेते दशग्रीवो महार्हशयनोचितः ।
नेक्षते विह्वलं मां च न मे वाचं प्रयच्छति ॥ २ ॥

२. तदेवाह । भूमाविति ॥ महार्हशयनोचित उत्तमशय्यार्हो दशग्रीवो भूमौ शेते विह्वलं शोकार्त्तं मां नेक्षते न पश्यति मे मह्यं वाचं न प्रयच्छति न मया संभाषत इत्यर्थः ॥ "पाघ्रा—" इत्यादिना दाणो यच्छादेशः ॥ सर्वत्र "वर्त्तमाने लट्" इति लट् । विशेषस्तत्र तत्र वक्ष्यते ॥

विपाकोऽयं दशग्रीव संदृष्टोऽनागतो मया ।
त्वं तेनाभिहितः पथ्यं किं कोपं न नियच्छसि ॥ ३ ॥

३. विपाक इति ॥ हे दशग्रीव अयमीदृङ्मरणरूपो विपच्यत इति विपाकः फलं मया अनागत आगाम्येव संदृष्ट उपलब्धः । तेन कारणेन पथ्यं हितमभिहित उक्तोऽसि । दुहादीनामप्रधाने कर्मणि क्तः । तथापि किं किमर्थं वा कोपं न नियच्छसि न रुणत्सि । सामीप्ये वर्त्तमानप्रत्ययः । निरुद्धवानसीत्यर्थः । तस्येदं फलमिति भावः ॥

---

१ किं D. | २ तेनास्यभिहितः पथ्यं T_3, T_4.

भजन्ति[1] विपदस्तूर्णमतिक्रामन्ति संपदः ।
तान्मदान्नावतिष्ठन्ते ये मते न्यायवादिनाम्[2] ॥ ४ ॥

४. तदेवाह । भजन्तीति ॥ ये तावन्न्यायवादिनां हितोपदेशकानां मते संमते मदाद्दर्पान्नावतिष्ठन्ते मूढास्तूर्णं क्षिप्रमेव विपदो विपत्तीर्भजन्ति संपदः संपत्तीरतिक्रामन्त्युल्लङ्घयन्तीत्यर्थः ॥

अपथ्यमायतौ लोभादामनन्त्यनुजीविनः ।
प्रियं शृणोति यस्तेभ्यस्तमृच्छन्ति न संपदः ॥ ५ ॥

५. आप्तवाक्यातिक्रमिणो नश्यन्तीत्युक्तमेवमनाप्तवाक्यश्राविणोऽपीत्याह । अपथ्यमिति ॥ अनुजीविनो भृत्या लोभात् स्वभूतिलोभादायतावुत्तरकालेऽपथ्यमहितमामनन्त्युपदिशन्ति । यः स्वामी तेभ्योऽनाप्तेभ्यः प्रियं तत्कालमधुरं तदपथ्यं शृणोति तं प्रभुं संपदो नच्छन्ति । ऋ गतौ ॥ "पाघ्रा—" इत्यादिना ऋच्छादेशः । प्रहस्तादिमूर्खवाक्यश्रवणाद्भ्रष्टोऽसीति भावः ॥

प्राज्ञास्तेजस्विनः सम्यक् पश्यन्ति च वदन्ति च ।
तेऽवज्ञाता[3] महाराज क्लाम्यन्ति[4] विरमन्ति च ॥ ६ ॥

६. न केचिदस्माकमुपदेष्टार इत्याशङ्क्याह । प्राज्ञा इति ॥ प्राज्ञाः प्रज्ञावन्तः ॥ "प्रज्ञाश्रद्धार्चाभ्यो णः" इति मत्वर्थीयो णप्रत्ययः ॥ तेजस्विनः प्रतापसंपन्नाश्च । स्वपरबलविशेषज्ञाश्चेत्यर्थः । सम्यक् साधु पश्यन्ति कार्यसारमुत्प्रेक्षन्ते वदन्त्युपदिशन्ति च । हे महाराज ते मातामहादयोऽभिभूतास्त्वया निराकृताः क्लाम्यन्ति खिद्यन्ते विरमन्त्युदासते च । दुर्दान्तस्वामिसेवकानामीदृशी दशेति भावः ॥

लेढि भेषजवन्नित्यं यः पथ्यानि कटून्यपि ।
तदर्थं सेवते चाप्तान् कदाचिन्न स सीदति ॥ ७ ॥

---

[1] भजन्ति चापद॰ T_4.
[2] न्यायवादिनः T_3.
[3] तेऽभिभूता Com.
[4] ताम्यन्ति T_3, T_4.

७. लेढीति ॥ कस्तर्ह्यविनष्टो जीवतीत्यपेक्षायामाह । लेढीति ॥ यो राजा भेषजवदौषधवत् । 'भेषजौषधभैषज्यानि' इत्यमरः । कटून्यपि तत्कालतीक्ष्णान्यपि पथ्यानि परिणामसुखानि कार्याणि लेढि शृणोतीत्यर्थः । लिह आस्वादने । लटि शपो लुकि ढत्वादिकार्ये लघूपधगुणः । तदर्थं पथ्यपरिज्ञानार्थमाप्तान् वृद्धांश्च सेवते स राजा कदाचिदपि न सीदति न नश्यति ॥

सर्वस्य जायते मानः स्वहिताच्च प्रमाद्यति ।
वृद्धौ[1] भजति चापथ्यं नरो येन विनश्यति ॥ ८ ॥

८. ननु स्वयमप्रमत्तस्य किं वृद्धसेवयेत्याशङ्क्य तदेव दुर्लभमित्याह श्लोकद्वयेन । सर्वस्येति ॥ सर्वस्यापि पुंसो वृद्धौ सत्यां मानोऽहंकारो जायते ततः स्वहितात् प्रमाद्यति स्खलति ॥ 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानात्' तद्योगात्पञ्चमी । ततोऽपथ्यमपथ्यसेवनं च भवति येनापथ्येन नरो विनश्यति । तादृगपथ्यं भवति नाल्पमित्यर्थः ॥

द्वेष्टि प्रायो गुणेभ्यो[2] यश्च च स्निह्यति कस्यचित् ।
वैरायते महद्भिश्च शीयते वृद्धिमानपि[3] ॥ ९ ॥

९. द्वेष्टीति ॥ किं च यद्यस्माद् वृद्धिमान् प्रायो गुणेभ्यो द्वेष्टि वृद्धसेवादिगुणान् द्वेष्टि ॥ "क्रुधद्रुहेर्ष्या—" इत्यादिना संप्रदानत्वाच्चतुर्थी ॥ कस्यचिच्च न स्निह्यति केनापि सह न स्निह्यतीत्यर्थः । संबन्धसामान्ये षष्ठी । महद्भिर्वृद्धैः सह वैरायते वैरं करोति ॥ "शब्दवैर—" इत्यादि क्यङन्ताल्लट् ॥ ततः शीयते विनश्यति । शद्लृ शातने ॥ "पाघ्रा—" इत्यादिना शदेः शीयादेशः ॥ "शदेः शितः" इति तङ् ॥

समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतेः[4] ।
लोकत्रयपतिर्भ्राता यस्य मे स्वपिति क्षितौ ॥ १० ॥

---

१ भवति Com.
२ गुणेभ्योऽपि न° B., C., T1.
गुणेभ्यो यो न° D.
गुणिभ्योऽपि न° c.
गुणेभ्यो यश्च स्निह्यति च कस्य° T3, T4.
३ वृद्धिमांस्ततः T3, T4, Com.
४ दुःस्थितः D., T3, T4.

१०. समिति ॥ यस्य मे लोकत्रयपतिर्भ्राता क्षितौ स्वपिति शेते दुर्गतो दुर्दशापन्नः सोऽहं केनोपायेन समाश्वसिमि स्वस्थो भवामि । तत्तावदास्ताम् । कथं प्राणिमि जीविष्यामि न कथंचिदित्यर्थः । सर्वत्र "रुदादिभ्यः सार्वधातुके" इतीट् ॥

अहो जागर्त्ति कृच्छ्रेषु दैवं यद्बलभिज्जितः[1] ।
लुठ्यन्ति भूमौ क्लिद्यन्ति बान्धवा मे स्वपन्ति च ॥ ११ ॥

११. अहो इति ॥ अहो चित्रं दैवं कृच्छ्रेषु दुःखेषु विषये जागर्त्ति । दुःखोत्पादने नित्यं जागरूकमित्यर्थः । यद्यस्माद्बलभिज्जित इन्द्रजयिनः । संपदादिना क्विप् । मे बान्धवा कुम्भकर्णादयो भूमौ लुठ्यन्ति परिवर्त्तन्ते क्लिद्यन्ति पूयन्ति च । लुठिक्लिदी दैवादिकौ । स्वपन्ति दीर्घं निद्रान्ति चेत्यर्थः । स्वपिरदादिः ॥

शिवाः कुष्णन्ति मांसानि भूमिः पिबति शोणितम् ।
दशग्रीवसनाभीनां[3] समदन्त्यामिषं खगाः ॥ १२ ॥

१२. शिवा इति ॥ दशग्रीवसनाभीनां रावणसपिण्डानाम् । 'सपिण्डास्तु सनाभयः' इत्यमरः ॥ "ज्योतिर्जनपद—" इत्यादिना समानशब्दस्य सभावः ॥ मांसानि शिवाः क्रोष्टारः कुष्णन्ति कर्षन्ति । कुष निष्कर्षणे । क्र्यादिः । शोणितं भूमिः पिबति । आमिषं मांसशोणितातिरिक्तमान्त्रवपावसादिकं खगाः काकगृध्रादयः समदन्ति सम्यग्भक्षयन्ति ॥

येन पूतक्रतोर्मूर्ध्नि स्थीयते स्म महाहवे ।
तस्यापीन्द्रजितो[2] दैवाद् ध्वांक्षैः शिरसि लीयते ॥ १३ ॥

१३. येनेति ॥ येनेन्द्रजिता महाहवे महायुद्धे पूतक्रतोरिन्द्रस्य मूर्ध्नि स्थीयते स्म स्थितम् । तिष्ठतेर्भावे लट् ॥ "अपरोक्षे च" इति स्मश-

१ बलभिज्जितम् E_3, T_3.
२ राक्षसा T_4.
३ °नाभीनामाचामन्त्यामिषं T_3.
४ मं ऽधे T_3, T_4.

द्योगे भूतानद्यतनापरोक्षार्थे लट् ॥ पुरा विभीषणस्यापरोक्षत्वात् । तस्य महावीरस्येन्द्रजितोऽपि शिरसि दैवाद्दैववशाद् ध्वांक्षैः काकैर्लीयते स्थीयत इत्यर्थः । लीङ् ...ौ । दैवादिकः । भावे वर्त्तमाने लटि यक् ॥

स्वर्भानुर्भास्करं ग्रस्तं निष्ठीवति कृताह्निकः[1] ।
अभ्युपैति पुनर्भूतिं रामग्रस्तो न कश्चन ॥ १४ ॥

१४. स्वर्भानुरिति ॥ स्वर्भानुः राहुः । 'तमस्तु राहुः स्वर्भानुः' इत्यमरः । ग्रस्तं कवलितं भास्वन्तं निष्ठीवति निरस्यति । ष्ठिवु निरसने । भौवादिकः । सोऽपि कृताशितः संपादितराहुभोजनः सन् पुनर्भूतिं पुनरुत्पत्तिमभ्युपैति रामग्रस्तस्तु कश्चनापि पुनर्भूतिं नाभ्युपैति ॥

त्वमजानन्निदं राजन्नीडिषे स्म स्वविक्रम ्।
दातुं नेच्छसि सीतां स्म विषयाणां च नेशिषे ॥ १५ ॥

१५. त्वमिति ॥ हे राजन् त्वमिदं रामसामर्थ्यमजानन्नपश्यन् स्वविक्रममात्मपौरुषमेवेडिषे स्तौषि स्म । ईड स्तुतौ ॥ "ईडजनोर्ध्वे च" इति चकारात् सकारेऽपि परत इडागमः ॥ सीतां दातुं प्रत्यर्पयितुं नेच्छसि अहंकारान्नाङ्गीकरोषि । विषयाणां शब्दानां नेशिषे स्म न प्रभवसि स्म । 'मोहं विधत्ते विषयाभिलाषः' इति भावः ॥ "अधीगर्थ—" इत्यादिना कर्मणि षष्ठी । सर्वत्र "लट् स्मे" ॥ "अपरोक्षे च" इति लट् ॥ सर्वस्यास्य विभीषणेन प्रत्यक्षत्वादिति ॥

मन्त्रे जातु वदन्त्यज्ञास्[2]त्वं तानप्यनुमन्यसे ।
कथं नाम भवांस्तत्र नावैति हितमात्मनः[3] ॥ १६ ॥

१६. मन्त्र इति ॥ किं च मन्त्रे विचारकाले जातु कदापि अज्ञा मूढा एव ब्रुवन्त्युपदिशन्ति । त्वमपि तानेवानुमन्यसे आप्तत्वेनाङ्गीकरोषि ।

१ कृताशिकः Com.
२ ब्रुवन्त्य° T₄.
३ °मात्मने T₃.

उभयमप्येतद्गर्हितमेवेत्यर्थः ॥ "गर्हायां लडपिजात्वोः" इति गर्हाया-मपिजातुशब्दप्रयोगे लट्। तत्र भवान् सभवान् ॥ "इतराभ्योऽपि दृश्यन्ते" इति भवदादिशब्दयोगे सार्वविभक्तिस्त्रल्प्रत्ययः ॥ आत्मनो हितं कथं नाम नावैति न जानाति। विदुषस्ते गर्हितमेतदित्यर्थः ॥ "विभाषा कथमि लिङ् च" इति चशब्दात् कथंशब्दयोगे गर्हायां लट् ॥

अपृष्टो[1] नु ब्रवीति त्वां मन्त्रे मातामहो हितम्।
न करोमीति पौलस्त्य तदा[2] मोहात्त्वमुक्तवान्[3] ॥ १७ ॥

१७. आपृष्ट इति ॥ मन्त्रविचारकाले मातामहो माल्यवानापृष्टः किमि-दानीं कर्त्तव्यमिति पृष्टः सन् त्वां हितं सीतां प्रत्यर्पयेति शुभोदर्कं वाक्यं ब्रवीति नु ब्रवीति स्म। हे पौलस्त्य रावण तदा त्वमापृष्ट आप्त-वाक्यकरणं पृष्टो मोहान्मदान्ध्यान्न करोमीत्युक्तवान् ॥ "नन्वोर्वि-भाषा" इति ननुशब्दयोरुपपदयोः पृष्टप्रतिवचने भूतार्थे लट् ॥

त्वं स्म[4] वेत्थ महाराज यत्[5] स्माह न[6] विभीषणः।
पुरा त्यजसि यत्क्रुद्धो मां निराकृत्य संसदि ॥ १८ ॥

१८. त्वमिति ॥ हे महाराज विभीषणो यदाह स्म उक्तवांस्तत्त्वं न वेत्थ स्म न वेत्सि स्म हितत्वेन नाग्रहीरित्यर्थः। उभयत्रापि "लट् स्मे" इत्यपरोक्षे लट् ॥ "विदो लटो वा" इति विदेर्लटि सिप-स्थादेशः ॥ "ब्रुवः पञ्चानाम्—" इत्यादिना ब्रुवो लटि तिपो णला-देशः। कुतः यद्यस्मात् क्रुद्धः सन् संसदि सभायां मां निराकृत्य पुरा पूर्वं त्यजसि अत्याक्षीरित्यर्थः ॥ "पुरि लुङ् चास्मे" इति स्मशब्दव-र्जिते पुराशब्द उपपदे भूतानद्यतने लट् ॥ 'अविवेकः परमापदां पदम्' इति भावः ॥

१ आपृष्टो Com.
२ मदमोहात् T3, T4.
३ मोहात्समुक्तवान् C., D.
४ न T3, T4.
५ यदाह स्म D.
६ च T3, T4.

हविर्जक्षिति निःशङ्को मखेषु मघवानसौ।
प्रवाति स्वेच्छया वायुरुद्गच्छति च भास्करः ॥ १९ ॥

१९. हविरिति ॥ असौ मघवानिन्द्रः ॥ "मघवा बहुलम्" इति पक्षे आदेशः ॥ "उगिदचाम्—" इति नुमागमः ॥ संयोगान्तलोपस्यासिद्धत्वान्न नलोपः। मखेषु यज्ञेषु निःशङ्को हविराज्यादिकं जक्षिति भक्षयति। जक्ष भक्षहसनयोः ॥ "रुदादिभ्यः सार्वधातुके" इतीट् ॥ वायुः स्वेच्छया पतति[1] वाति। पवत इति पाठे पुनातीत्यर्थः। भास्करश्चोद्गच्छति स्वेच्छया तपन्नुदेतीत्यर्थः ॥

धनानामीशते यक्षा यमो दाम्यति राक्षसान्।
तनोति वरुणः पाशमिन्दुनोदीयतेऽधुना ॥ २० ॥

२०. धनानामिति ॥ अधुना यक्षाः कुबेरादयो धनानामीशते प्रभवन्ति। स्वाम्यं लभन्त इत्यर्थः ॥ "अधीगर्थ—" इत्यादिना कर्मणि शेषे षष्ठी ॥ ईश ऐश्वर्ये। शपो लुकि "आत्मनेपदेष्वनतः" इति झस्यादादेशः। यमोऽन्तकोपि राक्षसान् दाम्यति ग्लपयति। दमु ग्लानौ। वरुणः पाशं तनोति निःशङ्कं प्रयुङ्क्ते इत्यर्थः। इन्दुना उदीयते वृद्धिक्षयाभ्यामुदीयते न तु नित्यपूर्णेनेत्यर्थः। इणो भावे लट् ॥ "अकृत्सार्वधातुकयोर्दीर्घः" ॥

शाम्यत्यृतुसमाहारस्तपस्यन्ति वनौकसः।
नो नमस्यन्ति ते बन्धून् वरिवस्यन्ति नामराः ॥ २१ ॥

२१. शाम्यतीति ॥ ऋतूनां समाहारः संभूयवृत्तिः शाम्यति निवर्त्तते किं तु क्रमशो वर्त्तन्त इत्यर्थः। वनौकसो मुनयस्तपस्यन्ति विश्रब्धं तपश्चरन्ति ॥ "कर्मणो रोमन्थ—" इत्यादिना क्यङ् तपसः परस्मैपदं च ॥ अमरा देवाश्च ते तव बन्धून्[2] न नमस्यन्ति पूर्ववन्न पूजयन्ति। न वरिवस्यन्ति न परिचरन्ति ॥ "नमोवरिवश्चित्रङः क्यच्" ॥ नमसः पूजायां वरिवसः परिचर्यायाम् ॥

---

[1] पतति Com. पवते T_3 T_4.

[2] न Com.

श्रीर्निष्कुष्यति[1] लङ्कायां विरज्यन्ति समृद्धयः ।
न वेद तन्न यस्यास्ति मृते त्वयि विपर्ययः ॥ २२ ॥

२२. श्रीरिति ॥ लङ्कायां श्रीश्च कुष्यति द्वेष्टि । समृद्धयः संपदश्च विरज्यन्ति स्वयमेव विरक्ता भवन्ति । रञ्ज रागे ॥ "कुषिरजोः प्राचां श्यन् परस्मैपदं च" इति रञ्जेः कर्मकर्त्तरि यगात्मनेपदापवादिश्यन्प्रत्ययः ॥ किं बहुना त्वयि मृते यस्य विपर्ययो वैपरीत्यं नास्ति तद्वस्तु न वेद न वेद्मि । सर्वं विपर्यस्तमित्यर्थः ॥ "विदो लटो वा" इति मिपो वा णलादेशः ॥

शक्तिं[2] संस्वजते शक्रो गोपायति हरिः श्रियम् ।
देववन्द्यः प्रमोदन्ते चित्रीयन्ते घनोदयाः ॥ २३ ॥

२३. शक्तिमिति ॥ शक्रः शक्तिं कासूं सामर्थ्यं वा । 'कासूसामर्थ्ययोः शक्तिः' इत्यमरः । शचीमिति पाठे पौलोमीमित्यर्थः । संस्वजते परिष्वजते प्राप्नोतीत्यर्थः ॥ "दंशसञ्ज—" इत्यनुनासिकलोपः ॥ हरिर्विष्णुः श्रियं गोपायति स्वायत्तीकरोति ॥ "गुपूधूप—" इत्यादिना आयप्रत्ययः ॥ देववन्द्यः प्रमोदन्ते मुक्ता मोदन्त इत्यर्थः । घनोदया मेघोन्नतयश्च चित्रीयन्ते आश्चर्यीभवन्ति ॥ "नमोवरिवश्चित्रङः क्यच्" ॥ चित्रङ आश्चर्ये । ङित्करणात्तङ् ॥

बिभ्रत्यस्त्राणि सामर्षा रणकाम्यन्ति चामराः ।
चकासति च मांसादां तथा रन्ध्रेषु जाग्रति ॥ २४ ॥

२४. बिभ्रतीति ॥ किं चामराः सामर्षाः शस्त्राणि बिभ्रति धारयन्ति । रणमात्मन इच्छन्ति रणकाम्यन्ति च ॥ "काम्यच्च" इति काम्यच्प्रत्यये तदन्ताद्धातोर्लट् । चकासति प्रकाशन्ते च तथा मांसादां रक्षसां रन्ध्रेषु अवकाशेषु जाग्रत्यवदधति । उभयत्रापि "जक्षित्यादयः—" इत्यभ्यस्तसंज्ञा ॥ "अदभ्यस्तात्" इति झस्यादादेशः ॥

---

१ श्रीर्नं हृष्यति C., c., T1. श्रीश्च कुष्यति Com., T3, T4.

२ शचीं E3, c., B., C., T1.

चञ्चूर्यन्तेऽभितो लङ्कामस्मांश्चाप्यतिशेरते ।
भूमयन्ति स्वसामर्थ्यं कीर्त्तिं[1] नः कनयन्ति च ॥ २५ ॥

२५. चञ्चूर्यन्त इति ॥ किं च लङ्कामभित उभयतोऽन्तर्बहिश्चेत्यर्थः ॥ "अभितःपरितः—" इत्यादिना द्वितीया ॥ चञ्चूर्यन्ते गर्हितं चरन्ति स्वच्छन्दं चरन्तीत्यर्थः ॥ "लुपसद—" इत्यादिना चरतेर्यङ्प्रत्ययः ॥ "चरफलोश्च" इत्यभ्यासस्य नुगागमः ॥ "उत्परस्यातः" इत्युत्वम् ॥ "हलि च" इति दीर्घः ॥ अस्मानतिशेरते च अतिक्रामन्ति च ॥ "शीङो रुट्" इति रुडागमः ॥ स्वसामर्थ्यं स्वप्रभावं भूमयन्ति भूमवत्कुर्वन्ति बहूकुर्वन्तीत्यर्थः ॥ भूमशब्दान्मत्वन्तात् 'तत्करोति' इति णिचि णाविष्ठवद्भावे विन्मतोर्लुकि टिलोपे च साधुः । नोऽस्माकं कीर्त्तिं कनयन्त्यल्पयन्ति च । अल्पशब्दात् 'तत्करोति' इति णिचि णाविष्ठवद्भावे "युवाल्पयोः कनन्यतरस्याम्" इत्यल्पशब्दस्य वा कनादेशः ॥

दिशो व्यश्नुवते दृप्तास्त्वत्कृतां जहति स्थितिम् ।
क्षोदयन्ति च नः[2] क्षुद्रा हसन्तस्त्वां[3] विपद्गतम् ॥ २६ ॥

२६. दिश इति ॥ किं च दृप्तास्ते सुरा दिशो व्यश्नुवते सर्वा दिशो व्याप्नुवन्ति । त्वत्कृतां स्थितिं मर्यादां जहति त्यजन्ति । किं च क्षुद्रा अल्पास्ते विपद्गतं विपन्नं त्वां हसन्ति क्षोदयन्ति प्रत्युत त्वामेव क्षुद्रमाचक्षत इत्यर्थः । क्षुद्रशब्दात् 'तदाचष्टे' इत्यर्थे णिचि णाविष्ठवद्भावे "स्थूलदूर—" इत्यादिना यणादिपरलोपः पूर्वस्य गुणश्च ॥

शमं शमं नभस्वन्तः पुनन्ति परितो जगत् ।
उज्जिहीषे महाराज त्वं प्रशान्तो न किं[4] पुनः ॥ २७ ॥

२७. शमं शममिति ॥ नभस्वन्तो वायवः शमं शमं शान्त्वा शान्त्वा । आभीक्ष्ण्ये णमुल् द्विर्वचनं च । परितो जगत्पुनन्ति प्रवहन्ति । शान्ता अपि पुनरुज्जिहत इत्यर्थः । हे महाराज त्वं पुनः प्रशान्तो निर्वाणः

---

१ वीर्यं D.
२ ते Com.
३ हसन्ति त्वां Com., T4.
४ किंचन Com.

सन् किंचन किंचिदपि नोज्जिहीषे नोज्जीवसि । ओहाङ् गतौ ॥ "भृञा-मित्" इत्यभ्यासस्येत्वम् ॥ "ई हल्यघोः" इतीकारः ॥

प्रोर्णोति शोकश्चित्तं मे सत्त्वं संशाम्यतीव मे ।
प्रमार्ष्टि दुःखमालोकं मुञ्चाम्यूर्जं[1] त्वया विना ॥ २८ ॥

२८. प्रोर्णोतीति ॥ हे महाराज त्वया विना शोको म चित्तं प्रोर्णोत्याच्छृणोति । मे मम सत्त्वं प्राणः । 'प्राणे बलेऽन्तःकरणे' इति सत्त्वार्थेषु यादवः । संशाम्यतीव विरमतीव । दुःखं शोक आलोकं प्रकाशं प्रमार्ष्टि लुम्पतीत्यर्थः । ऊर्जं बलं च मुञ्चामि ॥

के न संविद्रते नान्यस्त्वत्तो बान्धववत्सलः ।
विरौमि शून्ये प्रोर्णौमि कथं मन्युसमुद्भवम् ॥ २९ ॥

२९. क इति ॥ बान्धववत्सलो बन्धुप्रियस्त्वत्तोऽन्यो नास्तीति के वा न संविद्रते न विदन्ति । सर्वेऽपि विदुरित्यर्थः ॥ "समो गम्यृच्छि—" इत्यादिना तङ् ॥ "वेत्तेर्विभाषा" इति रुडागमः ॥ अतः शून्ये रिक्ते सति विरौमि क्रन्दामि मन्युसमुद्भवं शोकोदयं कथं प्रोर्णौमि छादयामि वारयामीत्यर्थः ॥

रोदिम्यनाथमात्मानं बन्धुना रहितस्त्वया ।
प्रमाणं नोपकाराणामवगच्छामि यस्य ते ॥ ३० ॥

३०. रोदिमीति ॥ बन्धुना त्वया रहितमत एवानाथमात्मानं प्रति रोदिमि परिदेवये यस्य ते तवोपकाराणां त्वत्कृतोपकाराणामित्यर्थः प्रमाणमियत्तां नावगच्छामि न जाने । स त्वं कथं न शोच्य इत्यर्थः ॥

नेदानीं शक्रयक्षेन्द्रौ बिभीतो न दरिद्रितः ।
न गर्वं जहितो दृप्तौ न क्लिश्नीतो दशानन ॥ ३१ ॥

---

१ °म्यूर्जां c., D.

३१. नेति ॥ हे दशानन इदानीं शक्रयक्षेन्द्राविन्द्रकुबेरौ न बिभीतो न त्रस्यतः ॥ "भियोऽन्यतरस्याम्" इति विकल्पादीकारः ॥ न दरिद्रितो न दरिद्रौ भवतः । पुनः स्वसंपल्लाभादिति भावः । दरिद्रा दुर्गतौ । लटि तसि शपो लुक् ॥ "इद् दरिद्रस्य" इतीत्वम् ॥ इमौ तौ न गर्वं जहितो न त्यजतः ॥ "जहातेश्च" इतीत्वम् । न क्लिश्नीतो न त्वद्भयेनात्मानं पीडयत इत्यर्थः । क्लिश्नातिरयं सकर्मकः ॥ "ई हल्यघोः" इतीत्वम् ॥

त्वयापि नाम रहिताः कार्याणि तनुमो वयम् ।
कुर्मश्च जीविते बुद्धिं धिक् तृष्णां कृतनाशिनीम् ॥ ३२ ॥

३२. त्वयेति ॥ वयं त्वया रहिताः कार्याणि संधिविग्रहादिकृत्यानि अपि नाम तनुमः कुर्मः न करिष्याम इत्यर्थः । नामेति कुत्सने । गर्हितमेतदित्यर्थः । 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने' इत्यमरः ॥ "गर्हायां लडपिजात्वोः" इति लट् ॥ जीविते बुद्धिं च कुर्मः । कृतनाशिनां कृतघ्नानां तृष्णां धिक् । महोपकारिणं त्वां विना जीवितं गर्हितमित्यर्थः ॥

तृणेह्मि देहमात्मीयं त्वं वाचं न ददासि चेत् ।
द्राघयन्ति हि मे शोकं स्मर्यमाणा गुणास्तव ॥ ३३ ॥

३३. तृणेह्मीति ॥ हे राजन् त्वं वाचं न ददासि चेत् न संभाषसे यदीत्यर्थः । आत्मीयं मदीयं देहं तृणेह्मि हिनस्मि । तृह हिंसायाम् ॥ "तृणह इम्" ॥ तव गुणाः स्मर्यमाणा मे शोकं द्राघयन्ति दीर्घीकुर्वन्ति । दीर्घशब्दात् 'तत्करोति' इति णिचि णाविष्ठवद्भावे "प्रियस्थिर—" इत्यादिना द्राघ्यादेशः ॥

उन्मुच्य स्रजमात्मीयां मां स्रजयति को हसन् ।
नेदयत्यासनं को मे कर्हि मे वदति प्रियम् ॥ ३४ ॥

---

१ कुर्मः स्वजीवने बु° T_3, T_4.
२ कृतनाशिनाम् Com. जीवनाशिनीम् D.
३ °मात्मानं T_3.
४ च D.
५ कश्च मे T_3, T_4.

३४. उन्मुच्येति ॥ आत्मीयां स्रजं मालामुन्मुच्यापनीय को मां हसन् स्रजयति स्रग्विणं करोति करिष्यतीत्यर्थः । 'तत्करोति' इति णिचि णाविष्ठवद्भावे "विन्मतोर्लुक्" इति विनो लुकि "प्रकृत्यैकाच्" इति प्रकृतिभावान्न टिलोपः । को मे आसन्नं नेदयति अन्तिकमासन्नं करोति । को मां समीप उपवेशयतीत्यर्थः । अत्रापि णाविष्ठव त्वात् अन्तिकशब्दस्य नेदादेशः । कर्हि कदा ॥ "अनद्यतने र्हिलन्यतरस्याम्" इति किमो र्हिलप्रत्ययः ॥ को मे प्रियं वदति ॥ "विभाषा कदाकर्ह्योः" इति कदाशब्दस्य प्रयोगाद्भविष्यदर्थे लट् ॥

न गच्छामि पुरीं[1] लङ्कामायुर्यावद्धाम्यहम् ।
कदा भवति मे प्रीतिस्त्वां पश्यामि न चेदहम् ॥ ३५ ॥

३५. नेति ॥ अहं यावदायुर्दधामि जीविष्यामि तावत् लङ्कां पुरा न गच्छामि गमिष्यामि ॥ "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट् ॥ अहं त्वां न पश्यामि चेत् कदा मे प्रीतिर्भवति भविष्यतीत्यर्थः ॥ "विभाषा कदाकर्ह्योः" इति कदाशब्दयोगाद्भविष्यदर्थे लट् ॥

ऊर्ध्वं म्रिये मुहूर्त्ताद्धि[2] विह्वलः क्षतबान्धवः ।
मन्त्रे स्म हितमाख्यामि न करोमि तवाप्रियम् ॥ ३६ ॥

३६. ऊर्ध्वमिति ॥ क्षतबान्धवोऽत एव विह्वलो विवशोऽतः प्राप्तकालत्वान्मुहूर्त्तादूर्ध्वं म्रिये मरिष्यामि ॥ "म्रियतेर्लुङ्लिङोश्च" इति चकारात् शितश्च तङ् ॥ "लिङ् चोर्ध्वमौहूर्त्तिके" इति लोडर्थलक्षणे भविष्यति लट् ॥ प्राप्तकाललक्षणश्चात्र लोडर्थः । मन्त्रे मन्त्रविचारकाले हितमाख्यामि स्म आख्याम् ॥ "लट् स्मे" ॥ "अपरोक्षे च" इति भूतापरोक्षे लट् ॥ अप्रियमकार्षमिति पृच्छसि चेत् तवाप्रियं च न करोमि नाकार्षम् ॥ "नन्वोर्विभाषा" इति नशब्दयोगे पृष्टप्रतिवचने भूते लट् ॥

अन्तःपुराणि पौलस्त्यं पौराश्च भृशदुःखिताः ।
संश्रुत्य स्माभिधावन्ति हतं रामेण संयुगे ॥ ३७ ॥

१ पुरीं D. | २ मुहूर्त्ताद्वा T4.

३७. अन्तरिति ॥ पौलस्त्यं रावणं संयुगे रामेण हतं संश्रुत्य श्रुत्वा अन्तःपुराणि भृशदुःखिताः पौराश्चाभिधावन्ति स्म अभ्यधावन्। "लट् स्मे" इति भूते लट् ॥

मूर्धजान्[1] स्म विलुञ्चन्ति क्रोशन्ति स्मातिविह्वलम्[2]।
स्माधीयन्त्युपकाराणां[3] मुहुर्भर्तुः प्रमन्यवः[4] ॥ ३८ ॥

३८. तत्रान्तःपुरचेष्टितान्याह। मूर्धजानिति ॥ मूर्धजान् केशान् विलुञ्चन्ति स्म उलुञ्चन्ति स्म। अतिविह्वलमतिविक्लवं विक्रोशन्ति स्म विचुक्रुशुः। प्रमन्यु प्रवृद्धशोकं यथा तथा भर्तुः पत्युरुपकाराणां मुहुरधीयन्ति स्म। तल्लब्धसौख्यान्यस्मरन्नित्यर्थः ॥ "अधीगर्थ—" इत्यादिना कर्मणि षष्ठी ॥ इक् स्मरणे। लटि शपो लुक् ॥ "झोऽन्तः" ॥ इयङादेशः। अध्युपसर्गेण सवर्णदीर्घः ॥

रावणस्य नमन्ति[5] स्म पौराः सास्रा रुदन्ति[6] च।
भाषते स्म ततो रामो वचः पौलस्त्यमाकुलम् ॥ ३९ ॥

३९. रावणस्येति ॥ पौराः सास्राः सबाष्पाः सन्तो रावणस्य नमन्ति स्म रावणं प्रणता इत्यर्थः। सम्बन्धसामान्ये षष्ठी। रुवन्ति स्म चुक्रुशुश्च। अथ राम आकुलं शोकविह्वलं पौलस्त्यं विभीषणं वचो भाषते स्म बभाषे। सर्वत्र "लट् स्मे" ॥

दातुः स्थातुर्द्विषां मूर्ध्नि यष्टुस्तर्पयितुः पितॄन्।
युद्धाभग्नाविपन्नस्य[7] किं दशास्यस्य शोचसि ॥ ४० ॥

४०. दातुरिति ॥ दातुर्दानशीलस्य द्विषां मूर्ध्नि स्थातुः स्थायुकस्य यष्टुर्यायजूकस्य पितॄंस्तर्पयितुस्तर्पणशीलस्य। सर्वत्र "तृन्" इति

---

१ मूर्धजांश्च विलु° T_3, T_4, c.
२ °विह्वलाः c., B., E_3.
३ अधीय° D., C., N., T_1, T_3, T_4,
४ प्रमन्यु च N., C., Com., T_1, T_3, T_4.
५ नमस्यन्ति पौराः D.
६ रुवन्ति T_4.
७ युद्धेऽभग्नविपन्नस्य D. युध्यभग्नविपन्नस्य Com. युद्धाभग्न° T_4. युध्याभग्नाविपन्नस्य N.

ताच्छील्यार्थे तृन्प्रत्ययः ॥ "न लोक—" इत्यादिना षष्ठीप्रतिषेधः ॥ युधि युद्धे अभग्नविपन्नस्य अभिमुखहतस्य दशास्यस्य किं किमर्थं शोचसि प्रत्युत संतोष्टव्यमिति भावः ॥

बोभवीति न संमोहो व्यसने स्म भवादृशाम्[1] ।
किं न पश्यसि सर्वोऽयं जनस्त्वामवलम्बते ॥ ४१ ॥

४१ बोभवीतीति ॥ भवादृशां विदुषां व्यसनेषु दुःखेषु संमोहो मूढता न बोभवीति भृशं न भवत्येव । भू सत्तायाम् ॥ "धातोरेकाचः—" इत्यादिना यङि "यङोऽचि च" इति तस्य लुक् ॥ "गुणो यङ्लुकोः" इत्यभ्यासस्य गुणः ॥ "यङो वा" ॥ इतीट् ॥ गुणावादेशौ ॥ अयं सर्वो जनस्त्वामवलम्बते आश्रयते । किं न पश्यसि ॥

त्वमर्हसि भ्रातुरनन्तराणि
कर्त्तुं जनस्यास्य च शोकभङ्गम् ।
धुर्ये विपन्ने[2] त्वयि राज्यभारो
मज्जत्यनूढः क्षणदाचरेन्द्र ॥ ४२ ॥

४२. त्वामिति ॥ त्वं भ्रातुरनन्तराण्यग्निसंस्कारादीन्यस्य जनस्य शोकभङ्गं दुःखशान्तिं च कर्त्तुमर्हसि । हे क्षणदाचरेन्द्र राक्षसेश्वर धुर्ये धुरंधरे त्वयि विषण्णे खिन्ने सति असौ राज्यभारोऽनूढोऽननुसंहितः सन् निमज्जति नश्यतीत्यर्थः । तस्माद्धैर्यमालम्ब्य राज्यं बिभृहीति भावः ॥

इति भट्टिकाव्ये तिङ्काण्डे लङ्विलसितो नामाष्टादशः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने लङ्विलासो नामाष्टादशः सर्गः ॥

---

१ व्यसनेऽपि T_3, T_4. व्यसनेषु D.

२ विषण्णे Com., T_4.

॥ श्रीः ॥

अथैकोनविंशः सर्गः ।

उपमन्युस्ततो वाक्यं पौलस्त्यो राममुक्तवान् ।
अशोच्योऽपि व्रजन्नस्तं सनाभिर्दुनुयान्न किम् ॥ १ ॥

१. अथ लिङ्लिासमधिकृत्याह । उपेति ॥ ततो रामवाक्यानन्तरं पौलस्त्यो विभीषणः उपमन्युः पुनरुपगतशोकः सन् रामं वाक्यमुक्तवान् । अशोच्योऽपि त्वदुक्तरीत्या शोकानर्होऽपि सनाभिः बन्धुरस्तं नाशं व्रजन् कं न दुनुयान्नोपतपेत् । विवेकिनमपि विकुर्यात् । टुदु उपतापे । संभावने लिङ् ॥ "स्वादिभ्यः श्नुः" ॥ यासुडागमः । सर्वत्र विध्यादिषु लिङ् । विशेषश्च तत्र तत्र वक्ष्यते ॥

तं नो देवा विधेयासुर्येन रावणवद्वयम् ।
सपत्नांश्चाधिजीयास्म संग्रामे च मृषीमहि ॥ २ ॥

२. तमिति ॥ अथ किञ्चिद्धैर्यमवलम्ब्याह । तदिति ॥ देवा हरिहरादयो नोऽस्माकं तत्तादृग्भाग्यं विधेयासुः क्रियासुः । दधातेराशीर्लिङि यासुट् ॥ "घुमास्था—" इत्यनुवृत्तौ "एलिङि" इत्येकारः ॥ येन भाग्येन वयं रावणवत् सपत्नान् शत्रूंश्चाधिजीव्यास्माधिकं जीयास्मेत्यर्थः । उपसर्गवशादर्थान्तरत्वम् । क्वचित्तथैव पाठः । यद्वा अतिशय्य जीव्यास्मेत्यर्थः । संग्रामे मृषीमहि च प्राणांस्त्यज्यास्म च । सर्वत्र आशिषि लिङ् ॥ "उश्च" इति कित्त्वान्न गुणः ॥ आर्धधातुकत्वान्न लिङ्सलोपः ॥

क्रियेरंश्च दशास्येन यथान्येनापि नः कुले ।
देवब्यश्चो नराहारा न्यञ्चश्च द्विषतां गणाः ॥ ३ ॥

---

१ उपमन्यु° c., D., Com.
२ रामं पौलस्त्यो वाक्यमु° T2, T4.
३ कम् E3, Com.
४ सपत्नानधिजीयास्म T3, T4.
सपत्नांश्चाधिजीव्यास्म Com.
५ क्रियेरन्न c., E3, B., C., T1.

३. क्रियेरन्निति ॥ दशास्येन यथा दशास्येनेव नोऽस्माकं कुले अन्येनापि मादृशेनेत्यर्थः । नराहारा राक्षसाः देवानञ्चन्तीति देवद्र्यञ्चो देवसङ्घर्षिणः ॥ "ऋत्विक्—" इत्यादिना अञ्चेः क्विन्प्रत्ययः ॥ "विश्वग्देवयोः—" इत्यादिना टेरद्र्यादेशः ॥ द्विषतां गणा निकृष्टमञ्चन्तीति न्यञ्चो नीचाश्च । पूर्ववत् क्विन्प्रत्ययः । क्रियेरन् कृता भूयासुः । करोतेराशिषि कर्मणि लिङ् ॥

स एव धारयेत्प्राणानीदृशे बन्धुविप्लवे ।
भवेदाश्वासको यस्य सुहृच्छक्तो भवादृशः ॥ ४ ॥

४. स इति ॥ ईदृशे बन्धुविप्लवे बन्धुविपत्त्यां स एव प्राणान् धारयेत् यस्य शक्तः शोकापनोदनक्षमो भवादृशः सुहृदाश्वासक आश्वासयिता भवेत् संभवेत् । उभयत्रापि संभावनायां लिङ् ॥

म्रियेयोर्ध्वं[1] मुहूर्त्ताद्धि न स्यात्त्वं यदि मे गतिः ।
आशंसा न हि नः प्रेते जीवेम दशमूर्धनि ॥ ५ ॥

५. म्रियेयेति ॥ त्वं मे गतिः शरणं न स्याद्यदि मुहूर्त्ताद्रावणमरणमुहूर्त्तादूर्ध्वं म्रियेय प्राणांस्त्यजेयम् ॥ "लिङ् चोर्ध्वमौहूर्त्तिके" इति प्राप्तकाले लिङ् ॥ दशमूर्धनि दशास्ये प्रेते मृते सति जीवेमेत्याशंसाकाङ्क्षा नोऽस्माकं न हि ॥

प्रकुर्याम वयं देशे गर्ह्यं[2] तत्र कथं रतिम् ।
यत्र विंशतिहस्तस्य न सोदर्यस्य सम्भवः ॥ ६ ॥

६. प्रकुर्यामेति ॥ यत्र देशे विंशतिहस्तस्य सोदर्यस्य भ्रातुः संभवः सत्त्वं नास्ति तत्र देशे गर्ह्यं निन्द्या वयं कथं रतिमभिरतिं प्रकुर्याम न कुर्म इत्यर्थः ॥ "विभाषा कथमि लिङ् च" इति कथंशब्द उपपदे गर्हायां लिङ् ॥

---

१ म्रिये चोर्ध्वं T_3. | २ गर्ह्यास्तत्र Com.

आमन्त्रयेत तान् प्रह्वान् मन्त्रिणो[1]ऽथ विभीषणः ।
गच्छेत त्वरितं लङ्कां राजवेश्म विशेत च ॥ ७ ॥

७. आमन्त्रयेतेति ॥ अथानन्तरं विभीषणः प्रह्वान् प्रणतांस्तान् स्वानुगान् मन्त्रिणः सचिवानामन्त्रयेत नियुक्तवानित्यर्थः । अत्र भूतार्थो लक्षणीयः । त्वरितं लङ्कां गच्छेत गच्छतेत्यर्थः । गमेर्लिङि "तस्थस्थ–", इत्यादिना थस्य तादेशः ॥ यासुटि सलोपः ॥ "अतो येयः" इतीयादेशे गुणयलोपौ । एवमुत्तरत्रापि द्रष्टव्यम् । राजवेश्म विशेत च ॥

आददीध्वं महार्हाणि तत्र वासांसि सत्वराः ।
उद्धुनीयात[2] सत्केतून् निर्हरेताग्र्यचन्दनम् ॥ ८ ॥

८. आददीध्वमिति ॥ तत्र राजवेश्मनि महार्हाण्यतिश्रेष्ठानि वासांस्याददीध्वं गृह्णीध्वम् । आङ्पूर्वाद्दातेर्लिङि तङि ध्वमि सीयुट् । अल्लोपसलोपौ । सत्केतून् महाध्वजानुद्धूनुयातोच्छ्राययतेत्यर्थः । धूञ् कम्पने । स्वादिः । यासुटि थस्य तादेशः । क्रैयादिकस्यैव प्वादित्वान्न ह्रस्वः । 'प्वादयः क्र्यादिषु पठ्यन्ते' इति काशिका । अग्र्यचन्दनं श्रेष्ठचन्दनं निर्हरेताहरतेत्यर्थः ॥

मुञ्चेताकाशधूपांश्च ग्रथ्नीयात स्रजः शुभाः ।
आनयेतामितं दारु कर्पूरागुरु[3]कुङ्कुमम्[4] ॥ ९ ॥

९. मुञ्चेतेति ॥ आकाशधूपानाकाशव्यापिनो धूपांश्च मुञ्चेत मुञ्चत प्रसारयतेत्यर्थः । शुभाः स्रजो माल्यानि ग्रथ्नीयात संदृभ्नीतेत्यर्थः । ग्रन्थ श्रन्थ संदर्भे । क्र्यादिः ॥ "ई हल्यघोः" इतीकारः ॥ अमितमपरिमितं दारु काष्ठं कर्पूरागरुकुङ्कुमं चानयेतानयतेत्यर्थः ॥

उद्धरेन् यज्ञपात्राणि ह्रियेत[5] च विभावसुः ।
भ्रियेत चाज्यमृत्विग्भिः कल्प्येत च समित्कुशम् ॥ १० ॥

---

१ मन्त्रिणः स्वान् T_3, T_4.
२ उद्धूनुयात Com.
३ °रागरु° Com.
४ °चन्दनम् T_3, T_4.
५ ह्रियेरन्नग्नतोऽग्नयः Com.

१०. ह्रियेरन्निति ॥ यज्ञपात्राणि जुह्वादीन्युह्येरन्नुह्यन्तां नीयन्तामित्यर्थः । वह प्रापणे । विधौ कर्मणि लिङ् । यजादित्वात्संप्रसारणं च । अग्नय आहवनीयादयोऽग्रतो ह्रियेरन् ह्रियन्तां नीयन्तामित्यर्थः । पूर्ववल्लिङ् । ऋत्विग्भिरध्वर्य्वादिभिराज्यं च भ्रियेत आज्यादीनि हवींषि च संभ्रियन्तामित्यर्थः । भृञ् भरणे । पूर्ववल्लिङ् । समिधः कुशाश्च समित्कुशं कल्प्येत कल्प्यतां संपाद्यतामित्यर्थः । तथैव लिङ् ॥

स्नानीयैः स्नापयेताशु[१] रम्यैर्लिम्पेत[२][३] वर्णकैः ।
अलंकुर्यात रत्नैश्च रावणार्हैर्[४]दशाननम् ॥ ११ ॥

११. स्नानीयैरिति ॥ दशाननमाशु स्नानीयैः स्नानसाधनैः स्नापयेत स्नापयतेत्यर्थः । स्नातेर्ण्यन्ताद्विधौ लिङ् ॥ "ग्लास्नावनुवमां च" इति पक्षे मित्वालाभान्न ह्रस्वः । रम्यैर्वर्णकैश्चन्दनकुङ्कुमादिभिर्लिम्पेत लिम्पतेत्यर्थः । रावणार्हैस्तदुचितैः रत्नैः रत्नाभरणैरलङ्कुर्यातालङ्कुरुतेत्यर्थः । सर्वत्र विधिलिङि थस्य तादेशः ॥

वासयेत सुवासोभ्यां मेध्याभ्यां राक्षसाधिपम् ।
ऋत्विक् स्रग्विणमादध्यात् प्राङ्मूर्धानं मृगाजिने ॥ १२ ॥

१२. वासयेतेति ॥ राक्षसाधिपं मेध्याभ्यां शुद्धाभ्यां सुवासोभ्यां महार्हवस्त्राभ्यां वासयेत परिधापयत । वस आच्छादने । ण्यन्ताल्लिङि थस्य तादेशः । ऋत्विगध्वर्युः स्रग्विणं स्रग्वन्तम् ॥ "अस्मायामेधास्रजो विनिः" इति मत्वर्थीयो विनिप्रत्ययः ॥ प्राङ्मूर्धानं प्राक्छिरसं मृगाजिने कृष्णाजिने आदध्यान्निदध्यात् ॥

यज्ञपात्राणि गात्रेषु[५] चिनुयाच्च यथाविधि ।
जुहुयाच्च हविर्वह्नौ गायेयुः[६] साम सामगाः ॥ १३ ॥

---

१ स्नपयेदाशु D.
२ लिम्पे° D.
३ °र्लिप्येत E₃.
४ नानावर्णैर्द° C.
५ पात्रेषु T₃.
६ गायेत्साम च सामगः T₃, T₄, Com.

१३. यज्ञेति ॥ अथ ऋत्विगेव यज्ञपात्राणि स्रुवादीनि गात्रेषु नासिकादिषु यथाविधि यथाशास्त्रं चिनुयादुपदध्यात् । वह्नौ हविराज्यादिकं च जुहुयात् । सामानि गायत इति सामग उद्गाता ॥ "आतोऽनुपसर्गे कः" ॥ साम गायेत् । सर्वत्र विधौ लिङ् ॥

गत्वाथ[१] ते पुरीं लङ्कां कृत्वा सर्वं यथोदितम् ।
समीपेऽन्त्याहुतेः सास्राः प्रोक्तवन्तो विभीषणम् ॥ १४ ॥

१४. गत्वेति ॥ अथ ते मन्त्रिणो लङ्कां पुरीं गत्वा यथोदितं यथाज्ञप्तं सर्वं कृत्वान्त्याहुतेः प्रेताहुतेः समीपे सन्निहितोत्तरकाले सास्राः सबाष्पाः सन्तो विभीषणं प्रोक्तवन्तः ॥

कृतं सर्वं यथोद्दिष्टं[२] कर्त्तुं वह्निजलक्रियाम् ।
प्रयतेथा महाराज सह सर्वैः स्वबन्धुभिः ॥ १५ ॥

१५. कृतमिति ॥ हे महाराज यथोद्दिष्टं यथाज्ञप्तं सर्वं कृतम् । सर्वैः स्वबन्धुभिः सह वह्निजलक्रियामग्निजलदानक्रियां कर्त्तुं प्रयतेथाः प्रयतस्व प्रवर्त्तस्वेत्यर्थः । यती प्रयत्ने । प्रार्थनायां लिङ् ॥

अज्ञवन्नोत्सहेथास्[३]त्वं धेया धीरत्वमच्युतम् ।
स्थेयाः कार्येषु बन्धूनां हेयाः शोकोद्भवं तमः ॥ १६ ॥

१६. एवमुक्तेऽपि शोचन्तं तं बोधयन्ति । अज्ञवदिति ॥ अज्ञवन्मूढवत् किं नोत्सहेथाः किमित्युत्साहं न कुर्याः । गर्हितमेतदित्यर्थः ॥ "किंवृत्ते लिङ्लृटौ" इति किंशब्दयोगे गर्हायां लिङ् ॥ अच्युतमक्षतं धीरत्वं धैर्यं धेया धारय । बन्धूनां कार्येषु प्रयोजनेषु स्थेयास्तिष्ठ । शोकोद्भवं तमो मोहं हेया जहीहि । ओहाक् त्यागे ॥ सर्वत्र "आशिषि लिङ्लोटौ" इत्याशिषि लिङ् ॥ "घुमास्था—" इत्यनुवृत्तौ "एर्लिङि" इत्येकारः ॥

---

१ गत्वा तेऽथ D.
२ यथादिष्टं C., c., E₃, B.
३ °त्सहेथाः किं T₃, T₄, Com.

नावकल्प्यमिदं ग्लायेर्यत्कृच्छ्रेषु भवानपि ।
न पृथग्जनवज्जातु प्रमुह्येत्पण्डितो जनः ॥ १७ ॥

१७. नेति ॥ भवानपि कृच्छ्रेषु दुःखेषु ग्लायेद्विषीदेदिति यदिदं नावकल्प्यं न संभाव्यम् ॥ "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि" इत्यनवक्लृप्तावसंभावनायां लिङ् ॥ पण्डितो जनः पृथग्जनवत् प्राकृतजनवज्जातु कदापि न प्रमुह्येन्मोहं न गच्छेत् ॥ "जातुयदोर्लिङ्" इति जातुशब्दयोगादनवक्लृप्तावेव लिङ् ॥

यच्चे यत्र भवांस्तिष्ठेत्तत्रान्यो रावणस्य न ।
यच्च यत्र भवान् सीदेन्महद्भिस्तद्विगर्हितम् ॥ १८ ॥

१८. यच्चेति ॥ यत्र देशे काले च यद्भवांस्तिष्ठेत्तत्र रावणस्यान्यो न । त्वयि तिष्ठति तस्य मन्त्रार्थमन्यो नावकल्पत इत्यर्थः ॥ "यच्चयत्रयोः" इत्यनवक्लृप्तौ लिङ् ॥ किं च यत्र देशे काले च यच्च यद्भवान् सीदेत् सन्नः स्यात् तन्महद्भिर्विगर्हितम् ॥ "यच्चयत्रयोः" इत्यनुवृत्तौ "गर्हायां च" इति लिङ् ॥

आश्चर्यं यच्च यत्र त्वां प्रब्रूयाम वयं हितम् ।
अपि साक्षात् प्रशिष्यास्त्वं कृच्छ्रेष्विन्द्रपुरोहितम् ॥ १९ ॥

१९. आश्चर्यमिति ॥ किं च यत्र विषये वयं त्वां हितं यच्च प्रब्रूयाम उपदिशेम ॥ 'ब्रुविशासि—' इत्यकथितस्य कर्मत्वम् । तदाश्चर्यम् ॥ "यच्चयत्रयोः" इत्यनुवृत्तौ "चित्रीकरणे च" इति लिङ् ॥ इह सर्वत्र यच्चयत्रशब्दयोरेकैकस्योपपदत्वेन लिङ्निमित्तत्वमुदाहृतं काशिकायाम् । इह तु समुदायस्योक्तमिति चिन्त्यम् । चित्रीकरणं च गम्यमानमेव निमित्तमित्युक्तं तदिहाश्चर्यग्रहणं स्फुटार्थमिति ज्ञेयम् । तथा हि त्वं कृच्छ्रेषु साक्षादिन्द्रपुरोहितं बृहस्पतिमपि समर्थं बाढं प्रशिष्या उप-

१ ग्लायेत्कृच्छ्रेषु च भवानपि T_3.
२ यत्र T_4.
३ पुरोधसम् D.

दिशोः । शासु अनुशिष्टौ ॥ "उताप्योः समर्थयोर्लिङ्" ॥ सिपि यासुट् ॥ "शास इदङ्हलोः" इतीत्वम् ॥ "शासिवसिघसीनां च" इति षत्वम् ॥

कामो जनस्य जह्यास्त्वं प्रमोदं[1] नैर्ऋताधिप ।
उत द्विषोऽनुशोचेयुर्विप्लवे किमु बान्धवाः[2] ॥ २० ॥

२०. काम इति ॥ हे नैर्ऋताधिप राक्षसेश्वर त्वं विषादं जह्या जहीहीत्यर्थः । इति जनस्य पौरजनस्य काम इच्छा अभिप्राय इति यावत् ॥ "कामप्रवेदनेऽकच्चिति" इति जहातेरकच्चिति कच्चित्शब्दाप्रयोगे लिङ् । कामप्रवेदनमभिप्रायाविष्करणम् । अस्मिन् विप्लवे द्विषन्तः शत्रवोऽप्यनुशोचेयुः ॥ "उताप्योः समर्थयोर्लिङ्" ॥ बान्धवाः किं नु किमुतेत्यर्थः ॥

स भवान् भ्रातृवद्रक्षेद्यथावदखिलं जनम्[3] ।
न भवान् संप्रमुह्येचेदाश्वस्युश्च निशाचराः[4] ॥ २१ ॥

२१. स इति ॥ भवान् न संप्रमुह्येचेत् सोऽप्रमूढो भवान् भ्रातृवद्रावणवदेवाखिलं जनं यथावद्यथार्हम् ॥ "तदर्हम्" इति वतिप्रत्ययः । रक्षेत् । निशाचराश्चाश्वस्युर्दुःखं जह्युरित्यर्थः । श्वस प्राणने ॥ "हेतुहेतुमतोर्लिङ्" ॥ अप्रमोहस्य जनरक्षणे राक्षसाश्वासने च हेतुत्वात् ॥

ततः स गतवान् कर्त्तुं भ्रातुरग्निजलक्रियाम् ।
प्रोक्तवान् कृतकर्त्तव्यं वचो रामोऽथ राक्षसम् ॥ २२ ॥

२२. तत इति ॥ ततो मन्त्रिवाक्यानन्तरं स विभीषणो भ्रातुः रावणस्याग्निजलक्रियामग्न्युदकदानं कर्त्तुं गतवान् । अथ कृतकर्त्तव्यं राक्षसं विभीषणं रामो वचनं वाक्यं प्रोक्तवान् ॥

---

१ विषादं Com., D., T3, T4.
२ प्लवेऽस्मिन्कि न बान्धवाः D.
प्लवेऽस्मिन्कि नु बान्धवाः T3, T4.
३ पितृवच्च T4.
४ न संप्रमुह्येचेदानीं समाश्वस्युर्निशाचराः D.

अम्भांसि रुक्मकुम्भेन सिञ्चन्मूर्ध्नि समाधिमान् ।
त्वं राजा रक्षसां लङ्कामवेक्षेथा विभीषण ॥ २३ ॥

२३. किं कुर्वन्नित्यत आह । अम्भांसीति ॥ रुक्मकुम्भेन कनककलशेन मूर्ध्नि शिरसि अम्भांसि सिञ्चन्नभिषिञ्चन् प्रोक्तवानिति पूर्वेण संबन्धः । अथ आ सर्गसमाप्तेः रामवाक्यमेवाह । हे विभीषण समाधिमान् ध्यानमांस्त्वं रक्षसां राजा लङ्कामवेक्षेथाः परिपालयेत्यर्थः ॥

क्रुद्धाननुनयेः सम्यक् धनैर्लुब्धानुपार्जयेः[1] ।
मानिनो मानयेः काले त्रस्तान् पौलस्त्य सान्त्वयेः ॥ २४ ॥

२४. क्रुद्धानिति ॥ हे पौलस्त्य क्रुद्धान् कुतश्चित्कुपितान् सम्यगकपटेनानुनयेः प्रसादय । लुब्धान् धनगृध्रान् धनैरुपार्जयेर्दानेनावर्जय । 'लुब्धमर्थेन गृह्णीयात्' इति नीतेः । मानिनो मानधनान् काले संमानकाले मानयेः पूजय । त्रस्तान् भीतान् सान्त्वयेरुपलालय । सर्वत्र विधौ लिङ् ॥

इच्छा मे परमानन्देः कथं त्वं वृत्रशत्रुवत् ।
इच्छेद्धि[2] सुहृदं सर्वो वृद्धिसंस्थं यतः सुहृत् ॥ २५ ॥

२५. इच्छेति ॥ हे सखे त्वं वृत्रशत्रुवदिन्द्र इव कथं केन प्रकारेण परमत्यन्तमानन्देरिति मे इच्छा । इन्द्रानन्दं तवेच्छामीत्यर्थः ॥ "इच्छार्थेषु लिङ्लोटौ" इतीच्छार्थोपपदान्नन्दतेर्लिङि सिपि रूपम् ॥ कुतः यतः सर्वोऽपि सुहृत्सुहृदं वृद्धिसंस्थं समृद्धिस्थमिच्छेत् इच्छति ॥ "इच्छार्थेभ्यो विभाषा वर्त्तमाने" इति वर्त्तमाने लिङ् ॥

वर्धिषीष्ठाः स्वजातेषु वध्यास्त्वं रिपुसंहतीः ।
भूयास्त्वं गुणिनां मान्यस्तेषां[3] स्थेया व्यवस्थितौ ॥ २६ ॥

---

१ दानै° D.
२ इच्छेत्सर्वोऽपि सुहृदं T_3, T_4.
३ मान्यः स्थेयास्तेषां T_3.

D. omits verses 26–29 and the first half of 30.

२६. वर्धिषीष्ठा इति ॥ त्वं सजातेषु सजातीयेषु वर्धिषीष्ठा वर्धस्व । वृधु वर्धने ॥ "लिङः सीयुट्" ॥ "सुट्तिथोः" ॥ रिपुसंहतीः शत्रुसंघान् वध्या जहि ॥ "हनो वध लिङि" इति वधादेशः ॥ यासुडागमः । त्वं गुणिनां गुणवृद्धानां मान्यो भूयाः । लिङि सिपि यासुट् । तेषां गुणिष्ठानां व्यवस्थितौ प्रतिष्ठायां स्थेयास्तिष्ठ ॥ "एर्लिङि" इत्येकारः ॥ सर्वत्र "आशिषि लिङ्लोटौ" इत्याशिषि लिङ् ॥

धेयास्त्वं[1] सुहृदां प्रीतिं वन्दिषीष्ठा दिवौकसः ।
सोमं पेयाश्च हेयाश्च[2] हिंस्राः[3] हानिकरीः क्रियाः ॥ २७ ॥

२७. देया इति ॥ त्वं सुहृदां प्रीतिं देया देहि । प्रीतिकरो भवेत्यर्थः । दिवौकसो देवान् वन्दिषीष्ठा वन्दस्व । सीयुट्सुडागमौ । सोमं च पेयाः पिब । सोमेन यजस्वेत्यर्थः । हानिकरीः प्रत्यवायहेतुभूताः ॥ "कृञो हेतु—" इत्यादिना हेत्वर्थे टः ॥ हिंस्राः परोपकारघातिनीः क्रियाः कर्माणि त्वं हेया जहीहि । सर्वत्राशिषि लिङ् ॥ "एर्लिङि" इत्येकारश्च ॥

अवसेयाश्च कार्याणि धर्मेण पुरवासिनाम् ।
अनुरागं क्रिया राजन् सदा सर्वङ्कषं[4] जने ॥ २८ ॥

२८. अवसेया इति ॥ हे राजन् पुरवासिनां पौरजनानां कार्याणि व्यवहारान् धर्मेण धर्ममार्गेणावसेया निश्चिनु ॥ षो अन्तकर्मणि ॥ "आदेच—" इत्यात्वम् ॥ "एर्लिङि" इत्येकारः ॥ जने सदा सर्वङ्कषं सर्वव्यापिनम् ॥ "सर्वकूल—" इत्यादिना खच् ॥ अनुरागं क्रियाः कुरु । अवैषम्येण वर्त्तस्वेत्यर्थः । लिङि यासुट् ॥ "रिङ् शयग्लिङ्क्षु" इति रिङादेशः । आशिष्येवोभयत्र लिङ् ॥

---

[1] देया° Com.
[2] हेयास्त्वं T_3, T_4
[3] हिंस्रां हानिकरीं क्रियाम् T_3, T_4
[4] सर्वगतं D., B., N.

घानिषीष्ट त्वया मन्युर्ग्राहिषीष्ट समुन्नतिः ।
रक्षोभिर्दर्शिषीष्ठास्त्वं द्रक्षीरन् भवता च ते ॥ २९ ॥

२९. घानिषीष्टेति ॥ त्वया मन्युः क्रोधो घानिषीष्ट हन्यताम् । मुख्यशत्रुत्वादिति भावः । हन्तेः कर्मण्याशीर्लिङि सीयुट् । चिण्वदिटि वृद्धिर्घत्वं च । समुन्नतिरौन्नत्यं ग्राहिषीष्ट गृह्यताम् । रक्षोभिस्त्वं दर्शिषीष्ठा दृश्यस्व । उभयत्रापि चिण्वदिट्कार्यम् । भवता च ते राक्षसा द्रक्षीरन् दृश्यन्ताम् । दृशेः कर्मणि लिङि सीयुट् ॥ "झस्य रन्" ॥ सर्वत्र कर्मण्याशिषि लिङ् ॥

मन्युं वध्या भटवधकृतं बालवृद्धस्य राजन्
शास्त्राभिज्ञाः[1] सदसि सुधियः सन्निधिं ते क्रियासुः ।
संरंसीष्ठाः सुरमुनिगते[2] वर्त्मनि प्राज्यधर्मे
संभुत्सीष्ठाः सुनयनयनैर्विद्विषामीहितानि[3] ॥ ३० ॥

३०. मन्युमिति ॥ हे राजन् भटानां वीरभटानां वधेन कृतं बालवृद्धस्य हतभटसंबन्धिनां बालानां वृद्धानां चेत्यर्थः । 'सर्वो द्वन्द्वो विभाषैकवद्भवति' । मन्युं शोकं वध्याः समाश्वासनार्थदानैरपनुद ॥ "हनो वध लिङि" इति वधादेशः ॥ शास्त्रार्थज्ञा धर्मशास्त्रतत्त्वज्ञाः सुधियो विद्वांसस्ते तव सदसि सभायां संनिधिं क्रियासुः कुर्वन्तु नित्यं सन्निहितास्तिष्ठन्तु । 'न सा सभा यत्र न सन्ति वृद्धाः' इति स्मरणादिति भावः । सुरमुनिगते महर्षिप्रहते प्राज्यधर्मे प्रभूतपुण्ये वर्त्मनि संरंसीष्ठाः सम्यग्रमस्व । तेनैव मार्गेण व्यवहर न मूर्खपथेनेत्यर्थः । रमेर्लिङि थासि सीयुट्सुटौ । सुनयनयनैः सम्यङ्नयनेत्रैर्वि-

१ शास्त्रार्थज्ञाः T3, T4.

२ सुरगणगते T3.
सुरमुनिकृते E3, c.

३ सनयनयनै° T3.
स्वनयनयनै° C., T1, T4.
स्वजननयनै° E3, c.

द्विषां शत्रूणामीहितानि चेष्टितानि संभुत्सीष्ठाः सम्यग्बुध्यस्व । बुध अवगमने । चर्त्वभष्भावौ । सर्वत्राशिषि लिङ् । मन्दाक्रान्ता वृत्तम् । 'मन्दाक्रान्ता जलधिषडगैर्म्भौनतौ तौ गुरू चेत्' ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लिङ्विलसितो नामैकोन-
विंशतितमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथ-
सूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने
विभीषणाभिषेको नाम लिङ्विलासाख्य
एकोनविंशः सर्गः ॥

॥ श्रीः ॥

अथ विंशः सर्गः ।

संमुपेत्य ततः सीतामुक्तवान् पवनात्मजः ।
दिष्ट्या वर्धस्व वैदेहि हतस्त्रैलोक्यकण्टकः ॥ १ ॥

१. अथ लोटमधिकृत्याह । समुपेत्येति ॥ ततो विभीषणाभिषेकानन्तरं पवनात्मजः सीतां समुपेत्यासाद्योक्तवान् । तदेवाह । हे वैदेहि दिष्ट्या सानन्दं वर्धस्व । 'दिष्ट्या समुपजोषं चेत्यानन्दे' इत्यमरः । त्रयो लोकास्त्रैलोक्यम् । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्प्रत्ययः । तस्य कण्टकः शल्यभूतो रावणो हतः ॥

अनुजानीहि हन्यन्तां मयैताः क्षुद्रमानसाः ।
रक्षिकास्तव राक्षस्यो गृहाणैतासु मत्सरम् ॥ २ ॥

२. अन्विति ॥ क्षुद्रमानसाः पापचित्ता एतास्तव रक्षिका गोप्यो राक्षस्यो मया हन्यन्तां हन्तव्याः । विधौ लोट् । अनुजानीह्यनुमन्यस्व । एतासु विषये मत्सरं क्रोधं गृहाण । उभयत्र प्रार्थनायां लोट् ॥ "हलः श्नः शानज्झौ" इति शानजादेशे हिलुक् । सर्वत्र सामान्येन "लोट् च" इति विध्यादिष्वेव लोट् विशेषश्च तत्र तत्र वक्ष्यते ॥

तृणहानि दुराचारा घोररूपाशयक्रियाः ।
हिंस्रा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम् ॥ ३ ॥

३. तृणहानीति ॥ दुराचाराः पापसमाचारा घोरा रूपाशयक्रिया आकारमनःकर्माणि यासां ता एता राक्षसीस्तृणहानि हनानि । तृह हिंसायाम् । रुधादित्वात् श्नम् ॥ "आड्डुत्तमस्य पिच्च" ॥ "मेर्निः" ॥ एतासु ते हिंस्रा हन्त्री बुद्धिर्भवतु निष्ठुरं परुषभावं कुरु ॥

---

१ ततः सीतां समागत्य उक्त° D.

पश्चिमं करवामैतत्प्रियं देवि वयं तव।
ततः प्रोक्तवती सीता वानरं करुणाशया॥ ४॥

४. पश्चिममिति॥ हे देवि तवैतत् पश्चिममन्तिमं प्रियं करवाम। वयमित्यप्रयुक्तेऽपि लभ्यते तस्मात् "अस्मदो द्वयोश्च" इति चकारादेकत्वेऽपि बहुवचनम्। ततो हनूमद्वाक्यानन्तरं करुणाशया कृपार्द्रचित्ता सीता कपीन्द्रं प्रोक्तवती प्रोवाच॥

उपशाम्यतु ते बुद्धिः पिण्डनिर्वेशकारिषु।
लघुसत्त्वेषु दोषोऽयं यत्कृते निहतोऽसकौ॥ ५॥

५. उपेति॥ पिण्डनिर्वेशो ग्रासोपजीवनं तत्कारिषु भृत्यवृत्तिषु लघुसत्त्वेषु क्षुद्रजन्तुषु स्त्रीजनेषु। 'सत्त्वमस्त्री तु जन्तुषु' इत्यमरः। ते तव बुद्धिरुपशाम्यतु शान्तास्तु। प्रार्थनायां लोट्। किं चायं दोषोऽपराधो मदविक्षेपरूपो यत्कृतो येन रावणेन कृतोऽसकौ कुत्सितोऽसौ रावणः॥ "कुत्सिते" इत्यदःशब्दात्सर्वनाम्नोऽकच्प्रत्ययः॥ निहतः। बाणप्रयोक्तुरपराधो न बाणस्येति भावः॥

न हि प्रेष्यवधं घोरं करवाण्यस्तु ते मतिः।
एधि कार्यकरस्त्वं मे गत्वा प्रवद राघवम्॥ ६॥

६. नेति॥ घोरं प्रेष्यवधं करवाणि कुर्याम्। आशंसायां लोट्। इति मतिस्ते तव नास्तु माभूदेव। आशिषि लोट्। किं तु त्वमेव कार्यकरः कार्यानुकूलः॥ "कृञो हेतु—" इत्यादिना आनुलोम्ये टः॥ एधि भव। अस भुवि। प्रार्थनायां लोट्। सेर्ह्यादेशे "श्नसोरल्लोपः" इत्यकारलोपः॥ "घ्वसोरेद्धौ—" इति सकारस्यान्त्यस्य एत्वे तस्याभाच्छास्त्रीयस्यासिद्धे "हुझल्भ्यः—" इति हेर्धिरादेशः॥ कार्यमेवाह गत्वा राघवं रामं प्रवद॥

१ यत्कृतो Com.

दिदृक्षुर्मैथिली[1] राम पश्यतु त्वाविलम्बितम् ।
तथेति स प्रतिज्ञाय गत्वा राघवमुक्तवान् ॥ ७ ॥

७. दिदृक्षुरिति ॥ हे राम मैथिली त्वा त्वाम् ॥ "त्वामौ द्वितीयायाः" इत्यन्वादेशः ॥ दिदृक्षुर्द्रष्टुमिच्छुरविलम्बितं द्रुतं पश्यतु । प्रार्थनायां लोट् । इति प्रवदेति पूर्वेणान्वयः । स हनूमान् तथेति प्रतिज्ञाय प्रतिश्रुत्य राघवं गत्वोक्तवान् ॥

उत्सुकानीयतां देवी काकुत्स्थकुलनन्दन ।
क्ष्मां लिखित्वा विनिश्वस्य[2] स्वरालोक्य विभीषणम् ॥ ८ ॥

८. उत्सुकेति ॥ हे काकुत्स्थकुलनन्दन उत्सुका त्वां द्रष्टुमुत्कण्ठिता देवी सीता आनीयताम् । प्रार्थनायां लोट् । इत्युक्तवानिति पूर्वेणान्वयः । अथोत्तरश्लोकपूर्वार्धेन सहैकवाक्यतयाह । राघवः क्ष्मां भूमिं लिखित्वा पादाङ्गुष्ठेन विलिख्य विनिश्वस्य दीर्घमुष्णं च निश्वस्य स्वराकाशमालोक्य । 'स्वः स्वर्गे चान्तरिक्षे च' इति विश्वः । एते च क्ष्मालेखनादयश्चिन्तानुभावाः । चिन्ता च सीतास्वीकारलोकापवादशङ्कयेति द्रष्टव्यम् ॥

उक्तवान् राघवः सीतामानयालङ्कृतामिति ।
गत्वा प्रणम्य तेनोक्ता मैथिली मधुरं वचः ॥ ९ ॥

९. उक्तवानिति ॥ अलंकृतां सीतामानय । विधौ लोट् । इति विभीषणमुक्तवानिति योजना । अथ तेन विभीषणेन गत्वा सीतावासं प्राप्य प्रणम्य मैथिली मधुरं वच उक्ता । दुहादित्वादप्रधाने कर्मणि क्तः ॥

जहीहि शोकं वैदेहि[3] प्रीतये धेहि मानसम् ।
रावणे जहिहि द्वेषं[4] जहाहि प्रमदावनम् ॥ १० ॥

---

१ सा पश्यत्वविलम्बितम् D.
२ विनिःश्वस्य c.
३ संधेहि प्रीतये मानसं पुनः T_4, Com.
४ कोपं T_3, T_4.

१०. जहीहीति ॥ हे देवि शोकं पतिवियोगदुःखं जहीहि त्यज । पुनर्भूयोऽपि मानसं प्रीतये संतोषाय धेहि संधेहि ॥ "घ्वसोः—" इत्येत्वाभ्यासलोपौ । रावणे द्वेषं वैरं जहिहि । तस्य मरणान्तत्वादिति भावः । प्रमदावनं जहाहि इतो निर्गच्छेत्यर्थः । ओहाक् त्यागे । सर्वत्र विधौ लोट् । सेर्हिरादेशः ॥ "जहातेश्च" इति विकल्पादित्वमीत्वं च ॥ "आ च हौ" इत्यात्वं चेति त्रैरूप्यम् ॥

स्नाह्यनुलिम्प धूपाय निवस्स्वाविध्य च स्रजम् ।
रत्नान्यामुञ्च संदीप्ते हविर्जुहुधि पावके ॥ ११ ॥

११. अथ युग्मेन सीतायाः कर्तव्यमाह । स्नाहीत्यादि ॥ स्नाहि बाह्यान्तरशुद्ध्यर्थमाप्लुवस्वेत्यर्थः । 'आप्लवः स्नानं च' इत्यमरः । ष्णा शौचे । शपो लुकि सेर्हिरादेशः । आलिम्प चन्दनादिना गात्रमनुलिम्पेत्यर्थः । लिप उपदेहे । तुदादिः ॥ "अतो हेः" इति हेर्लुक् ॥ धूपाय श्रीवासादिधूपेनाङ्गं संस्कुर्वित्यर्थः । एतच्च स्नानान्तरकृत्यम् । धूप संतापे ॥ "गुपूधूप—" इत्यादिना आयप्रत्ययान्तात् लोटि सिपि हिलुक् ॥ निवस्स्व वस्त्रमाच्छादय । वस आच्छादने । अदादिः । लोटि "थासः से" ॥ "सवाभ्यां वामौ" ॥ धातुप्रत्ययसकारयोः श्लिष्टता । स्रजो माल्यानि चाविध्य ग्रथान । व्यध ताडने । दिवादिः । उपसर्गवशादर्थान्तरत्वम् ॥ "ग्रहिज्या—" इत्यादिना संप्रसारणम् ॥ हिलुक् । रत्नानि रत्नाभरणान्यामुञ्च प्रतिमुञ्च धारयेत्यर्थः । संदीप्ते प्रज्वलिते पावके हविराज्यादिकं जुहुधि जुहुतात् ॥ "हुझल्भ्यो हेर्धिः" ॥

अद्धि त्वं पञ्चगव्यं च छिन्द्धि संरोधजं तमः ।
आरोह शिबिकां हैमीं द्विषां जहि मनोरथान् ॥ १२ ॥

१२. अद्धीति ॥ सदनुपहतं गोरिमानि गव्यानि गोमयादीनि ॥ "गवादिभ्यो यत्" इति प्राक्क्रीतीयार्थेन यत्प्रत्ययेन सम्बन्धसामान्यं

---

१ स्नाह्यालिम्प च धू° T4, Com.
२ निवस धूपाय विध्य E3, c., C.
३ स्रजः Com.
४ अद्धि सत्पञ्च° T3, T4, Com.

लक्ष्यते। तानि पञ्च समाहृतानि पञ्चगव्यम्। पात्रादित्वात्स्त्रीत्वप्रतिषेधः। तच्चाद्धि आभ्यन्तरशुद्ध्यर्थं भक्षय। अद् भक्षणे। हेर्धिरादेशः। संरोधजं निरोधजन्यं तमः शोकम्। 'तमः शोके गुणान्तरे' इति विश्वः। छिन्द्धि त्यजेत्यर्थः। छिदेर्लोटि सिपि हेर्धिः। हैमीं सौवर्णीम्। विकाराणि "नस्तद्धिते" इति टिलोपः। शिबिकामारोह। द्विषां मनोरथान् जहि उन्मूलय। हन्तेर्लोटि सेर्हिरादेशे "हन्तेर्जः" इति जादेशः। सर्वत्र विधौ परिनियोगकरणे वा लोट्। अत्र प्रथमं स्नानं ततः पञ्चगव्यप्राशनं ततो होमस्ततोऽनुलेपनमित्यादिक्रमो द्रष्टव्यः। अर्थाच्चेति न्यायेन पाठक्रमादर्थक्रमस्य बलीयस्त्वादिति॥

तृणेढु त्वद्वियोगोत्थां राजन्यानां पतिः शुचम्।
भवतादवियुक्ता[1] त्वमत ऊर्ध्वं स्ववेश्मनि॥ १३॥

१३. तृणेढ्विति॥ किं च राजन्यानां पतिः राजराजो रामस्त्वद्वियोगोत्थां त्वद्विरहजन्याम्॥ "सुपि स्थः" इति कः॥ "उदः स्थास्तम्भोः पूर्वस्य" इति पूर्वसवर्णादेशः॥ शुचं शोकं तृणेढु हिनस्तु। तृह हिंसायाम्। लोटि तिपि एरुत्वम्॥ "हो ढः"॥ तकारस्य "झषस्तथोः—" इति धत्वम्॥ ततः ष्टुत्वे ढलोपः। हे देवि त्वमत ऊर्ध्वं स्ववेश्मनि स्वगृहे युक्ता पतियुक्ता भवताद्भव। आशिषि लोट्। सेर्ह्यादेशे "तुह्योः—" इति तातङादेशः॥

दीक्षस्व सह रामेण त्वरितं तुरगाध्वरे।
दृश्यस्व पत्या प्रीतेन प्रीता[2] प्रेक्षस्व[3] राघवम्॥ १४॥

१४. दीक्षस्वेति॥ रामेण सह त्वरितं तुरगाध्वरेऽश्वमेधे दीक्षस्व दीक्षाख्यं संस्कारं भज। आशिषि लोट्। प्रीतेन मुदितेन पत्या भर्त्रा दृश्यस्व प्रेक्ष्यस्व। दृशेः कर्मणि लोटि यकि थासः से॥ "सवा-

---

१ भवतादवियुक्ता N.
भवतादेवि युक्ता Com.

२ प्रीता D., Com.

३ वेक्षस्व T_3, T_4, Com.

भ्याम्—" इत्येकारस्य वादेशः ॥ त्वं च प्रीता राघवमीक्षस्व पश्य । निमन्त्रणे लोट् ॥

अयं नियोगः पत्युस्ते कार्या नात्र विचारणा ।
भूषयाङ्ग प्रमाणं चेद्रामं[1] गन्तुं यतस्व च ॥ १५ ॥

१५. अयमिति ॥ हे देवि अयं स्नानादिस्ते पत्युः रामस्य नियोग आज्ञा । अत्रास्मिन्नर्थे विचारणा विमर्शो न कार्या । प्रमाणं चेद्रामनियोगः कर्त्तव्यश्चेदित्यर्थः । अङ्ग शरीरं भूषय प्रसाधय । रामं गन्तुं यतस्व प्रवर्त्तस्व । निमन्त्रणे लोट् ॥

मुदा संयुहि काकुत्स्थं स्वयं चाप्नुहि[2] संमदम् ।
उपेह्यूर्ध्वं मुहूर्त्तात्त्वं देवि राघवसंनिधिम् ॥ १६ ॥

१६. मुदेति ॥ काकुत्स्थं रामं मुदानन्देन संयुहि मिश्रय । मोदयेत्यर्थः । यु मिश्रणे । अदादिः । शपो लुक् । हेर्ङित्त्वान्न गुणः । स्वयं त्वं च संमदमानन्दमाप्नुहि । हे देवि मुहूर्त्तादूर्ध्वं राघवसन्निधिं रामसमीपम् ॥ "उपसर्गे घोः किः" इति कर्मणि किप्रत्ययः ॥ उपेहि स्म ॥ "स्मे लोट्" इति स्मशब्दोपपदादूर्ध्वमौहूर्त्तिकार्थादिणः प्राप्तकाले लोट् ॥ एतत्कालातिक्रमे रामस्य त्वयि विरक्तताशङ्का स्यादिति भावः ॥

ऊर्ध्वं मुहूर्त्तादह्नोऽङ्ग स्वामिनी[3] स्म भव क्षितेः ।
राजपत्नी नियोगस्थमनुशाधि पुरीजनम् ॥ १७ ॥

१७. ऊर्ध्वमिति ॥ अङ्ग भो देवि त्वं मुहूर्त्तादूर्ध्वं क्षितेः स्वामिनी भव स्म । पूर्ववल्लोट् । राजपत्नी त्वं नियोगस्थमाज्ञावर्त्तिनं पुरीजनमयोध्यानगरवासिजनमनुशाधि कर्मसु नियुङ्क्ष्व । शासु अनुशिष्टौ । प्रार्थनायां लोट् ॥ "शा हौ" इति शादेशः ॥ तस्यासिद्धवद्भावे "हुझल्भ्यो हेर्धिः" ॥

---

१ रामो E_3.
२ समाप्नुहि च T_4.
३ स्वामिनि त्वं T_3, T_4

उत्तिष्ठस्व मते पत्युर्यतस्वालङ्कृतौ तथा ।
प्रतिष्ठस्व च तं[१] द्रष्टुं द्रष्टव्यं[२] त्वं महीपतिम् ॥ १८ ॥

१८. उत्तिष्ठस्वेति ॥ भर्त्तुर्मते संमते विषये उत्तिष्ठस्व उत्सहस्वेत्यर्थः । उत्थानमुत्साहः ॥ "उदोऽनूर्ध्वकर्मणि" इति तङ् ॥ तथालंकृतौ प्रसाधने च यतस्व प्रवर्त्तस्व । संद्रष्टव्यं महीपतिं रामं संद्रष्टुं प्रतिष्ठस्व प्रयाहि । प्रार्थनायां लोट् ॥ "समवप्रविभ्यः स्थः" इति तङ् ॥

अनुष्ठाय यथादिष्टं[३] नियोगं जनकात्मजा ।
समारूढवती यानं पट्टांशुकवृतानना ॥ १९ ॥

१९. अनुष्ठायेति ॥ जनकात्मजा सीता यथोद्दिष्टं यथोक्तं नियोगं स्नानादिभर्त्रादेशमनुष्ठाय कृत्वा पट्टांशुकेन वृतानना कोऽपि मा द्राक्षीदिति संवृतमुखी सती यानं शिबिकां समारूढवती ॥

लज्जानता विसंयोगदुःखस्मरणविह्वला[४] ।
सास्रा गत्वान्तिकं[५] पत्युर्दीना रुदितवत्यसौ ॥ २० ॥

२०. लज्जेति ॥ लज्जया नता नम्रमुखी विसंयोगस्य वियोगस्य स्मरणेन विक्लवा विह्वला अत एव सास्रा सबाष्पा पत्युरन्तिकं गता दीना शोच्यासौ सीता रुदितवती रुरोद ॥

प्राप्तचारित्र्यसंदेहस्ततस्तामुक्तवान्नृपः ।
इच्छां[७] मे नाददे सीते त्वामहं गम्यतामितः[८] ॥ २१ ॥

२१. प्राप्तेति ॥ ततः सीतागमनानन्तरं नृपो रामः प्राप्तश्चारित्र्ये पातिव्रत्ये संदेहो येन स सन् तां सीतामुक्तवान् । किमिति । हे सीते अहमि-

१ संद्रष्टुं Com., D.
२ त्वं दृष्टव्यं T3, T4.
दृष्टव्यं च D.
संदृष्टव्यं Com.
३ यथोद्दिष्टं Com., D., T3.
४ विक्लवा Com., D., T4.
५ गतान्तिके Com.
६ भर्त्तु° T4.
७ इच्छातो नाददे Com.
८ °मितः D.

च्छातो रागतो नाददे न परिगृह्णानि । त्वत्परिग्रहेच्छा मे नास्तीत्यर्थः ॥ "इच्छार्थेषु लिङ्लोटौ" इति ददातेर्लोटि तङ् ॥ "एत ऐ:" इत्येकारस्योत्तमस्यैकारः ॥ अतोऽस्माद्धेतोर्गम्यतां यथेच्छं गच्छेत्यर्थः। गमेर्भावे लोट् ॥

रावणाङ्कपरिश्लिष्टा[1] त्वं हृल्लेखकरी मम ।
मतिं बधान सुग्रीवे राक्षसेन्द्रं गृहाण वा ॥ २२ ॥

२२. स्वस्येच्छाभावे हेतुमाह । रावणेति ॥ रावणस्याङ्के उत्सङ्गे परिक्लिष्टा परिमृदिता त्वं मम हृल्लेखकरी हृदयव्यथाकारिणी । अतो नेच्छामीत्यर्थः ॥ "कृञो हेतु—" इत्यादिना हेतावानुलोम्येन वा टप्रत्ययः ॥ "हृदयस्य हृल्लेखयदण्लासेषु" इति हृदयस्य हृदादेशः ॥ का तर्हि मे गतिरत आह । सुग्रीवे प्रीतिं प्रेम बधान कुर्वित्यर्थः । राक्षसेन्द्रं विभीषणं वा गृहाण स्वीकुरु । उभयत्र "हलः श्नः शानज्झौ" इति शानजादेशे हिलुक् ॥

अशान भरताद्भोगान् लक्ष्मणं प्रवृणीष्व वा ।
कामाद्वा[2] याहि मुच्यन्तामाशा रामनिबन्धनाः ॥ २३ ॥

२३. अशानेति ॥ अथवा भरताद्भोगान् सुखान्यशान भुङ्क्ष्व । अश भोजने । पूर्ववच्छानजादेशे हिलुक् । लक्ष्मणं वा प्रवृणीष्व । वृञ् वरणे । क्रैयादिकः । कामाद्यथेच्छं वा याहि । रामनिबन्धना रामविषया आशा अभिलाषा मुच्यन्तां त्यज्यन्ताम् । सर्वत्र "प्रैषातिसर्ग—" इत्यादिनातिसर्गे लोट् । अतिसर्गः कामचाराभ्यनुज्ञा ॥

क्व च ख्यातो रघोर्वंशः क्व त्वं परगृहोषिता ।
अन्यस्मै हृदयं देहि नानभीष्टे घटामहे[3] ॥ २४ ॥

---

1 रावणाज्ञापरिक्लिष्टा T4. रावणाङ्कपरिक्लिष्टा T3, Com.

2 The latter half of the verse is not found in T3.

3 घटामहै D., Com., T4. This verse is not found in T3.

२४. त्यागे हेतुमाह । क्व चेति ॥ ख्यातो निष्कलङ्कत्वेन लोकविख्यातो रघोर्वंशः क्व परगृहोषिता परगृहवासकलङ्किता त्वं क्व । नानयोर्योगो घटत इत्यर्थः । तस्मादन्यस्मै पुंसे हृदयं देहि । अन्यं भजेत्यर्थः । वयं तु अनभीष्टेऽरुचितेऽर्थे न घटामहै न युज्यामह इत्यर्थः । उभयत्राप्यतिसर्गे लोट् ॥

यथेष्टं चर वैदेहि पन्थानः सन्तु ते शिवाः ।
कामास्तेऽन्यत्र तायन्तां[1] विशङ्कां त्यज मद्गताम्[2] ॥ २५ ॥

२५. यथेष्टमिति ॥ हे वैदेहि यथेष्टं चर गच्छ । अतिसर्गे लोट् । ते तव पन्थानः शिवाः क्षेमाः सन्तु । आशिषि लोट् । ते तव कामा अभिलाषा अन्यत्र पुरुषान्तरे तायन्तां वर्धयन्ताम् । अतिसर्गे लोट् । मत्कृतां मया करिष्यमाणाम् । आशंसायां भूतवत्प्रत्ययः । विशङ्कामनिष्टागमशङ्कां त्यज । प्राप्तकाले लोट् । शङ्कात्यागस्यायं काल इत्यर्थः ॥

ततः प्रगदिता वाक्यं मैथिलाभिजना[3] नृपम् ।
स्त्रीसामान्येन संभूता शङ्का मयि विमुच्यताम् ॥ २६ ॥

२६. तत इति ॥ ततो रामवाक्यानन्तरं मैथिलो जनकोऽभिजनः प्रभवो यस्याः सा सीता नृपं रामं वाक्यं प्रगदिता प्रगदितुं प्रवृत्ता ॥ "आदिकर्मणि क्तः कर्त्तरि च" ॥ तदेवाह । स्त्रीसामान्येन स्त्रियश्चपला इति सामान्यतः संभूता शङ्काविश्वासो मयि विषये विमुच्यताम् । प्रार्थनायां लोट् ॥

दैवाद्बिभीहि काकुत्स्थ जिह्रीहि त्वं[4] तथा जनात् ।
मिथ्या मामभिसंक्रुध्यन्नवशां शत्रुणा हृताम् ॥ २७ ॥

२७. दैवादिति ॥ हे काकुत्स्थ शत्रुणा हृतां बलाद्धृतामवशां तन्निरासासमर्थां मां मिथ्या असती त्वमिति मिथ्याभियुज्याभिसंक्रुध्यन्

१ तायन्तामाशङ्कां T_3, T_4.
२ मत्कृताम् Com.
३ मैथिल्याभिजना T_3.
४ च T_3, T_4.

मह्यं क्रुध्यन्नित्यर्थः ॥ "क्रुधद्रुहोरुपसृष्टयोः कर्म" इति संप्रदानत्वापवादेन कर्मत्वम् ॥ दैवाद्बिभीहि । तथा जनाज्जनं वीक्ष्य । ल्यब्लोपे पञ्चमी । जिह्रीहि लज्जस्व । ह्री लज्जायाम् । उभयत्र हेर्ङित्वान्न गुणः । अदुष्टायां मयि दोषमारोपयता त्वया दैवाद्भेतव्यं लोकतो ह्रेतव्यं चेत्यर्थः ॥

चेतसस्त्वयि वृत्तिं[1] मे शरीरं रक्षसा हृतम् ।
विदांकुर्वन्तु सम्यञ्चो देवाः सत्यमिदं वचः ॥ २८ ॥

२८. स्वस्यादुष्टतामेवाचष्टे । चेतस इति ॥ त्वयि मे चेतसो वृत्तिः । शरीरमेव रक्षसा हृतम् । सम्यगञ्चन्तीति सम्यञ्चः समवर्त्तिनो देवाः पृथिव्यादयः । अञ्चेः क्विन् ॥ "समः समि" इति सम्यादेशः ॥ इदं वचो मम वाक्यं सत्यं विदांकुर्वन्तु विदन्तु । त एव सुचारित्रशुद्धौ साक्षिण इत्यर्थः । विद ज्ञाने । प्रार्थनायां लोट् ॥ "विदांकुर्वन्त्वित्यन्यतरस्याम्" इति विकल्पादाम्प्रत्ययादिनिपातनात्साधुः ॥

त्वं पुनीहि पुनीहीति पुनन् वायो जगत्त्रयम् ।
चरन् देहेषु भूतानां[2] विद्धि मे बुद्धिविप्लवम्[3] ॥ २९ ॥

२९. संप्रति तानेव देवानेकैकशः प्रार्थयते । त्वमिति ॥ हे वायो पुनीहि पुनीहीति पुनः पुनः भृशं वा पुनामीति जगत्त्रयं पुनन् शोधयन् जन्तूनां प्राणिनां देहेषु चरन् वर्त्तमानस्त्वं मे मम बुद्धिविप्लवं चित्तदोषं विद्धि जानीहि । ज्ञात्वा तत्फलं प्रापयेत्यर्थः । प्रार्थनायां लोट् । अत्र "क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः" इति लोट् । तस्य च सर्वत्र वैकल्पिकौ सर्वलकारापवादिनौ हिस्वावादेशौ तत्र परस्मैपदे हिरादेशः । 'क्रियासमभिहारे द्वे भवतः' इति वचनात् द्विर्वचनं "यथाविध्यनुप्रयोगः पूर्वस्मिन्" इति पुनातेरनुप्रयोगः ॥

---

१ वृत्तिर्मे D.
२ जन्तूनां T4.
३ बुद्ध्यविप्लवम् B.

खमट द्यामटाटोर्वीमित्यटन्त्योऽतिपावनाः[1] ।
यूयमापो विजानीत मनोवृत्तिं शुभां मम ॥ ३० ॥

३०. खमिति ॥ अत्यन्तं पावयन्ति शोधयन्तीत्यतिपावनाः । क्लीबभावश्चिन्त्यः । अथवात्यन्तं पावनं शोधकं शोधकत्वधर्मो यासु ता इति बहुव्रीहिः । अनुपसर्जनाधिकारादनीकारः । हे आपः खमन्तरिक्षलोकमट । द्यां द्युलोकमट । उर्वीं भूलोमकट । अन्तरिक्षादित्रयमटाम इत्येवाटन्त्यो यूयं मम मनोवृत्तिं शुभां शुद्धां विजानीत । जानातेः प्रार्थनायां लोटि थस्य तादेशः । अत्र अन्तरिक्षादिकर्मकारकभेदेनाटनक्रियाभेदादनेकक्रियोपलक्षणसमुच्चयसंभवात् "समुच्चयेऽन्यतरस्याम्" इति लोट् लोटो यथायोगं हिस्वौ च ॥ "समुच्चये सामान्यवचनस्य" इत्यत्र पूर्वोक्ताटनक्रियाविशेषानुगताटनक्रियासामान्यस्यानुप्रयोगः ॥

जगन्ति धत्स्व धत्स्वेति दधती त्वं वसुन्धरे ।
अवेहि मम चारित्रं नक्तन्दिवमविच्युतम् ॥ ३१ ॥

३१. जगन्तीति ॥ हे वसुन्धरे धत्स्व धत्स्व दधे दधे धारयामि धारयामीत्येव जगन्ति दधती धारयन्ती त्वं मम चारित्रं नक्तन्दिवमविच्युतं कदाप्यस्खलितमवेहि जानीहि । प्रार्थनायां लोट् । अत्र क्रियासमभिहार इत्यादि सर्वं पूर्ववत् । केवलमात्मनेपदे लोटः स्वादेशः ॥

रसान् संहर दीप्यस्व[2] ध्वान्तं जहि नभो भ्रम ।
इतीहमानस्तिग्मांशो वृत्तं[3] ज्ञातुं घटस्व मे ॥ ३२ ॥

३२. रसानिति ॥ हे तिग्मांशो भास्कर रसानुदकानि संहर संहरामि । दीव्यस्व दीव्ये । ध्वान्तं जहि हन्मि । नभः खं भ्रम भ्रमामि । इती-

१ पावकाः D. पावनम् T4.
२ दीप्यस्व Com.
३ वृत्ति T3.

हमानो लोकहितार्थं चेष्टमानस्त्वं मे वृत्तं ज्ञातुं घटस्व प्रवर्त्तस्वेत्यर्थः। प्रार्थनायां लोट् ॥ अत्र "समुच्चयेऽन्यतरस्याम्" इति लोट् लोटो यथायोगं हिस्वौ च ॥ "समुच्चये सामान्यवचनस्य" इति संहाराद्यनुगतसामान्यस्येहनस्यानुप्रयोगः ॥

स्वर्गे विद्यस्व भुव्यास्स्व भुजङ्गनिलये भव।
एवं[1] वसन् ममाकाश संबुध्यस्व कृताकृतम्॥ ३३ ॥

३३. स्वर्ग इति॥ हे आकाश स्वर्गे विद्यस्व विद्ये। भुवि आस्स्व आसे। भुजङ्गनिलये पाताले भव भवामि। इत्येवं सर्वत्र सत् वर्त्तमानं त्वं मम कृताकृतं च ॥ "विप्रतिषिद्धं चानधिकरणवाचि" इति वैभाषिको द्वन्द्वैकवद्भावः ॥ संबुध्यस्व सम्यगवगच्छ। प्रार्थनायां लोट्। अत्र "समुच्चयेऽन्यतरस्याम्" इति लोट् लोटो यथायोगं हिस्वौ च ॥ "समुच्चये सामान्यवचनस्य" इत्यनुप्रयोगः॥ सदिति सत्तायां विद्यत्याद्यनुगतसामान्यरूपत्वात् ॥

चितां कुरु[2] च सौमित्रे व्यसनस्यास्य भेषजम्।
रामस्तुष्यतु मे[3] वाद्य पापां[4] प्लुष्णातु वानलः॥ ३४ ॥

३४. इत्थं पृथिव्यादिप्रार्थनानन्तरं लक्ष्मणं प्रार्थयते। चितामिति ॥ हे सौमित्रे ममास्य व्यसनस्य दूषणस्य भेषजं प्रतीकारं चितां काष्ठसंचयं कुरु रचय। विधौ प्रार्थनायां वा लोट्। अद्य रामो मां तुष्यतु निष्पापास्मि चेदिति शेषः। पापाद्धेतोरनलः प्लुष्णातु प्राणान्मोचयतु वा दहत्वित्यर्थः। प्रुषप्लुष स्नेहनमोचनपूरणेष्विति क्र्यादौ ॥

राघवस्य मतेनाथ लक्ष्मणेनाचितां चिताम्।
दृष्ट्वा प्रदक्षिणीकृत्य रामं प्रगदिता वचः॥ ३५ ॥

---

१ सर्वत्र सन्ममाकाश Com.
एवं सत्त्वं ममाकाश T_3.
२ मे कुरु T_3, T_4, D.
३ वाद्यैव D.
मामद्य Com., T_3, T_4.
४ पापात् Com.

३५. राघवस्येति ॥ अथ सीताप्रार्थनानन्तरं राघवस्य मतेन रामानुमत्या । भावे क्तः । लक्ष्मणेनाचितामारचितां चितां प्रज्वलितामिति शेषः । दृष्ट्वा प्रदक्षिणीकृत्य रामं वचः प्रगदिता प्रगदितुं प्रवृत्ता ॥ "आदिकर्मणि क्तः कर्त्तरि च" ॥

प्रवपाणि वपुर्वह्नौ रामाहं शङ्किता त्वया ।
सर्वे विदन्तु शृण्वन्तु भवन्तः सप्लवङ्गमाः ॥ ३६ ॥

३६. प्रेति ॥ हे राम त्वया शङ्किता दुष्टेति संदिग्धाहं वपुर्वह्नौ प्रवपाणि । आमन्त्रणे लोट् ॥ "आनि लोट्" इति णत्वम् ॥ सप्लवङ्गमाः पूर्वप्रार्थितदेवरक्षोगणानामप्युपलक्षणम् । सर्वे भवन्त इति रामलक्ष्मणयोः पूजायां बहुवचनम् । शृण्वन्तु विदन्तु साक्षात्कुर्वन्तु चेत्यर्थः । प्रार्थनायां लोट् ॥

मां दुष्टां ज्वलितवपुः प्लुषाण वह्ने
संरक्ष क्षतमलिनां[1] सुहृद्यथा वा ।
एषाहं क्रतुषु वसोर्यथाज्यधारा[2]
त्वां प्राप्ता[3] विधिवदुदीर्णदीप्तिमालम् ॥ ३७ ॥

३७. मामिति ॥ हे वह्ने दुष्टां चेन्मां ज्वलितवपुः प्रज्वलितरूपः सन् प्लुषाण दहेत्यर्थः । धातुरुक्तः ॥ "हलः श्नः—" इति शानजादेशे हिलुक् । क्षतमलिनां वा निष्पापां चेत् सुहृद्यथा मित्रमिव संरक्ष । एषाहं क्रतुषु वसोर्धनस्य फलभूतस्य सम्बन्धिनी वसोर्धारां जुहोति वसोर्मे धारा सदिति सत्साधनत्वे विधानात् । अथ चाङ्गेषु फलश्रुतेरर्थवादत्वात् वसोरग्नेर्विष्णोश्च देवतायाः सम्बन्धिनीत्यर्थः । अथ किंदेवता वसोर्धारेति । अग्निर्वसुस्तस्यैषा धारा विष्णु-

१ क्षतचरितां D.
२ वसोरिव T₂.
३ प्राप्ता त्वां T₂.

वसुस्तस्यैषा धारा इति श्रुतेः । आज्यधारा यथा घृतधारेव उदीर्ण-दीप्तिमालमूर्ध्वोद्भवज्वालाजालं त्वां विधिवद्यथाशास्त्रं प्राप्ता इति व्यवहरन्ती पावकं प्रविष्टेत्यर्थः । उपमोत्प्रेक्षयोः संसृष्टिः ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लोट्प्रदर्शनो
नाम विंशतितमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने लोड्विलासे
सीतावह्निपरिशुद्धिर्नाम विंशः सर्गः ॥

॥ श्रीः ॥

अथैकविंशः सर्गः ।

समुत्क्षिप्य[1] ततो वह्निर्मैथिलीं राममुक्तवान् ।
काकुत्स्थ दयितां साध्वीं त्वमाशङ्किष्यथाः[2] कथम् ॥ १ ॥

१. अस्मिन् सर्गे लङ्विलासमधिकृत्याह । समुत्क्षिप्येति ॥ ततः सीताया वह्निप्रवेशानन्तरं वह्निर्मैथिलीं सीतां समुत्क्षिप्य हस्ताभ्यामूर्ध्वमुन्नमय्य राममुक्तवान् । किमिति । हे काकुत्स्थ त्वं साध्वीं पतिव्रतां दयितां कथमशङ्किष्यथाः कथं शङ्कितवान् । गर्हितमेतत्कथं कृतमित्यर्थः । अत्र गर्हाकथंशब्दयोर्लिङ्निमित्तयोः संभवात् "लिङ्निमित्ते लृङ् क्रियातिपत्तौ"॥ "भूते च" ॥ "गर्हायाम्—" इतिचानुवृत्तौ "विभाषा कथमि लिङ् च" इति भूते गर्हायां च विकल्पाल्लृङ् । कुतश्चिद्वैगुण्यात् क्रियाणामनभिनिवृत्तिः क्रियातिपत्तिः । वैगुण्यं च सामग्र्यभावो विरुद्धप्रत्ययोपनिपातो वा । इह चासाधुत्वशङ्काविरुद्धसाधुत्वप्रत्ययोपनिपातादसाधुत्वशङ्कनक्रियातिपत्तिः । सामान्यतः क्रियातिपत्तौ लिङ्निमित्ते लृङ् । एते च विशेषाः क्रमशोऽनुसंधेयाः ॥

नाभविष्यदियं शुद्धा यद्यपास्यमहं ततः ।
न[3] चैनां पक्षपातो मे धर्माद[4]न्यत्र राघव ॥ २ ॥

२. नेति ॥ अहमेनां यदि नैवापास्यं नैवारक्षिषं ततस्तस्माद्रक्षणाद्धेतोरियं शुद्धेति ज्ञाता नाभविष्यत् । रक्षिता तु मया शुद्धेति ज्ञातेत्यर्थः । न च पक्षपातान्मया रक्षितेत्याह । अयमिति ॥ हे राघव अयं पक्षपातो ममता धर्मादन्यत्र मे नास्ति । पा रक्षणे । भू सत्तायाम् ॥ "भूते च" इति भूतार्थे लृङ् ॥ अरक्षणाशुद्धिज्ञानयोर्हेतुहेतुमद्भावो लिङ्नि-

---

१ तामुत्क्षिप्य E3, c., B., C.
२ त्वमशङ्कि° T3, T4, Com.
३ नैवेनां T3, T4.
४ धर्माश्चान्यत्र T3, T4.

मित्तम् ॥ "हेतुहेतुमतोर्लिङ्" इति विधानात् ॥ सामग्र्यभावेनाशुद्धि-ज्ञानानिष्पत्तेः क्रियातिपत्तिश्च ॥

अपि तत्र रिपुः सीतां नार्थयिष्यत दुर्मतिः ।
क्रूरं जात्ववदिष्यच्च जात्वस्तोष्यच्छ्रियं स्वकाम् ॥ ३ ॥

३. अथ सर्वसाक्षी भगवान्पावकः सीताशुद्धिप्रदर्शनाय सीतारावणयोः परस्परसमक्षं यद्वृत्तं तत् श्लोकद्वयेनाह । अपीत्यादि ॥ तत्र तस्मिन् समक्षभाषणसमये ॥ "सप्तम्यास्त्रल्" ॥ जयमङ्गलाकारस्तु तत्र रिपुः स भवान् रिपू रावणः । भवच्छब्दोऽर्थाद्गम्यते । तेन "इतराभ्योऽपि दृश्यन्ते" इति त्रल् इत्याह । तदतिक्लिष्टम् । भवदादिशब्दप्रयोग एव तद्विधानादार्थिकत्वायोगाद्दुष्टस्य रिपोस्तथाविशेषणायोगाच्च । हे राम रिपुर्दशास्योऽदुर्मतिरदुष्टबुद्धिः । यद्यभविष्यदिति शेषः । अपि बाढं सीतां नार्थयिष्यत् मां भजेत्यर्थमर्थनं प्रार्थनां नाकरिष्यत् । अर्थयतेरात्मनेपदित्वात् अर्थशब्दात् तत्करोतिण्यन्तात् "उताप्योः समर्थयोर्लिङ्" इत्यत्र बाढार्थापिशब्दे लिङ्निमित्ते तत्र "वोताप्योः" इति वाशब्दाननुवृत्तेर्नित्यं भूते क्रियातिपत्तौ लृङ् । अजादित्वादाडागमः । दुर्मतित्वेनादुर्मतित्वप्रयुक्ता प्रार्थना क्रियातिपत्तिः । किं च नाहमवकल्पयामि न संभावयामि यद्यदुर्मतिरभविष्यज्जातु कदापि क्रूरं परुषं न चावदिष्यत् । जातु स्वकां श्रियं संपदं च नास्तोष्यत् स्तुतवांश्च । अत्र "जातुयदोर्लिङ्" इति उक्तजातुशब्दयोगोऽनवक्लृप्तिश्च लिङ्निमित्तं पूर्ववत् । दुर्मतित्वात् तद्विरुद्धक्रूराभिवदनस्वसंपत्तिस्तवनक्रियातिपत्तौ भूते वा लृङ् ॥

सङ्कल्पं नाकरिष्यच्च तत्रेयं शुद्धमानसा ।
ससामर्षमवाप्स्यस्त्वं राम सीतानिबन्धनम् ॥ ४ ॥

४. संकल्पमिति ॥ हे राम इयं सीता शुद्धमानसा शुद्धचित्ता नाभविष्यच्च न भूता । नञो व्यवहितान्वयः । भवनक्रियाध्याहारश्च । तत्र

---

१ प्रार्थयिष्यत E_3, B., c.
प्रार्थयिष्यच्च D.
२ नार्थयिष्यदुर्मतिः Com.

३ शुभ° T_3, T_4.
४ मृषामर्ष° E_3, B., C., T_1.

रावणे संकल्पमकरिष्यत् कृतवती चेति नावकल्पयामि न संभावयामि । किं चेयं शुभमानसा नाभविष्यत्त्वं च सीतानिबन्धनं सीतागोचरं सत्यामर्षं यथार्थकोपमवाप्स्यसि अवाप्तवानसि । एतन्नमर्षयामीत्यर्थः । पूर्वत्रानवक्लृप्तिर्लिङ्निमित्तम् । उभयत्रामर्षः ॥ "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि" इत्यत्र तयोस्तन्निमित्तत्वमुक्तम् ॥ सीतायाः शुभमानसत्वात्संकल्पनसत्यामर्षणप्राप्तिक्रियातिपत्तिः ॥ "वोताप्योः" इति वाशब्दानुवृत्तेरुभयत्र भूते वा लृङ् ॥

त्वयाद्रक्ष्यत किं नास्याः शीलं संवसता चिरम् ।
अदर्शिष्यन्त वा चेष्टाः कालेन बहुना न किम् ॥ ५ ॥

५. त्वयेति ॥ किं च चिरं संवसता सह वसता त्वया तस्याः शीलं सद्वृत्तं नाद्रक्ष्यत किं न ज्ञातं किमित्यर्थः । दृशेः कर्मणि लृङि चिण्वद्भिडभावपक्षे रूपम् । न च मनोवृत्तिर्दुर्ज्ञानेत्याह । बहुनापि कालेन चेष्टा मनोवृत्तिव्याप्ता कायारम्भा वा नादर्शिष्यन्त न दृष्टाः किमित्यर्थः । दृशेस्तत्रैव चिण्वदिटि रूपम् । 'शीलं संवसता ज्ञेयं तच्च कालेन भूयसा' इत्याशयाल्लिङ्गतोऽपि त्वयावगतमेवेति गर्हितमेतत्कृतमित्यर्थः ॥ "किंवृत्ते लिङ्लृटौ" इत्युक्तयोर्गर्हानिमित्तयोर्लिङ्निमित्ते क्रियातिपत्तौ भूते वा लृङ् ॥ चिरसंवासलक्षणशीलचेष्टोपलम्भकारणसंभवात्तद्विरुद्धतदनुपलम्भक्रियातिपत्तिः ॥

यावज्जीवमशोचिष्यो नाहास्यश्चेदिदं तमः ।
भानुरप्यपतिष्यत्क्ष्मामक्षोभिष्यत चेदियम् ॥ ६ ॥

६. यावदिति ॥ इदं तमः परगृहवासमात्रादियमशुद्धेति विपरीतज्ञानं नाहास्यश्चेत् न हास्यसि न त्यक्ष्यसि चेत् यावज्जीवमशोचिष्यः शोचिष्यसि । तमःशोकयोर्हेतुहेतुमद्भावे लिङ्निमित्ते स्वोपदेशेन तमःशोकोत्पत्तिप्रतिबन्धात् क्रियातिपत्तौ च भविष्यदर्थे नित्यं लृङ् । किं

१ बहुनापि T4.

चेयमक्षोभिष्यताचलिष्यच्चेत् भानुरपि क्ष्मामपतिष्यत भुवि निपतेदि-त्यर्थः । तद्वदुत्पातप्रायमस्याश्चापलमसंभावितमित्यर्थः । दृष्टान्तजनितासंभावनाबुद्ध्या प्रतिबन्धात्तद्विरुद्धसंभावनाबुद्धिक्रियातिपत्तिः । सीताचापलभानुपातयोर्हेतुहेतुमद्भावो लिङ्निमित्तम् । भूते लङ् ॥

समपत्स्यत राजेन्द्र स्त्रैणं यद्यत्र चापलम् ।
लोकपाला[1] इहायास्यंस्ततो[2] नामी कलिद्रुहः ॥ ७ ॥

७. समिति ॥ किं च हे राजेन्द्र रामचन्द्र स्त्रीणां संबन्धि स्त्रैणं स्त्रीषु संभावितम् ॥ "स्त्रीपुंसाभ्याम्—" इति नञ्प्रत्ययः । चापलं चारित्र्यस्खलनं समपत्स्यत संपन्नं चेत् कलिद्रुहः पापासहिष्णवो लोकपालाश्च मूर्त्तिमन्तो विग्रहवन्तः सन्तो नायास्यन् नागमिष्यन् । आगताश्च ततः शुद्धेति विश्वसिहीत्यर्थः । चापलदिक्पालानागमयोर्हेतुहेतुमद्भावोऽत्र लिङ्निमित्तम् । आगमग्राहिप्रत्यक्षेणानागमनक्रियातिपत्तिः । भूते लङ् ॥

आश्चर्यं यच्च यत्र स्त्री कृच्छ्रेऽवर्त्स्यन्मते तव ।
त्रासादस्यां विनष्टायां[3] किं किमालप्स्यथाः फलम् ॥ ८ ॥

८. किं च नात्र स्त्रीसामान्यबुद्धिः कार्येत्याह । आश्चर्यमिति ॥ यच्चयत्रयोरेकस्यैव लिङ्निमित्तत्वात्तथैव योज्यते । यच्च यत्र वा स्त्री स्त्रीत्वे सति कृच्छ्रेऽतिदुष्करे तव मतेऽभिप्रायेऽग्निप्रवेशरूपेऽवर्त्स्यद्वर्त्तिष्ट तदाश्चर्यं चित्रमित्यर्थः । कृच्छ्रत्वगम्यस्य चित्रीकरणस्य स्पष्टार्थमाश्चर्यग्रहणम् । वृतु वर्त्तने इति धातोर्यच्चयत्रयोरन्यतरोपपदाच्चित्रीकरणे गम्यमाने क्रियातिपत्तौ भूते लङ् । स्त्रीणां सामान्यतः कृच्छ्राभिप्रायानुवृत्तिसामर्थ्यभावात्तदनुवृत्तिक्रियातिपत्तिः । इयं तु तत्रापि प्रवृत्तेति चित्रीकरणम् । किं चैवं त्वयि क्रुद्धे त्रासात् स्त्रैणाद्भयादस्यां विप-

---

१ लोकपालाश्च नायास्यन् मूर्त्तिमन्तः कलिद्रुहः Com.

२ ततोऽमी न T_2.

ततोऽमित्रकुलद्रुहः T_4.

३ विपन्नायां D., Com.

जायां प्रच्छन्नं मृतायां किं नाम फलमलप्स्यथा लप्स्यसे । न किंचि-द्वकल्पयामि ॥ "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि" इत्यपिशब्दात्किंवृ-त्तमनवक्लृप्तिश्च लिङ्निमित्तमुक्तं तस्मिन् क्रियातिपत्तौ लभेर्भविष्यति नित्यं लृङ् । मरणातिरिक्तफलप्राप्तिसामग्र्यभावात्तदतिपत्तिः । किं किलेति पाठः प्रामादिकः ॥ "किंकिलास्त्यर्थेषु लट्" इत्यस्यालिङ्नि-मित्तत्वादिति ॥

यत्र[1] यच्चामरिष्यत् स्त्री साध्वसाद्दोषवर्जिता ।
तदसूयारतौ[2] लोके तस्या वाच्यास्पदं मृषा ॥ ९ ॥

९. न केवलं फलाभावः प्रत्युतानिष्टफलमेव स्यादित्याह । यच्चेति ॥ यच्च यत्र वा दोषवर्जितैव स्त्री साध्वसादमरिष्यत् तन्मरणमसूयारते गुणेषु दोषा-विष्करणपरे लोके तस्या मृताया मृषा वाच्यास्पदं दुष्टत्वादेव मृतेति मिथ्यापवादहेतुरभविष्यदिति शेषः । तच्चातिगर्हितमित्यभिप्रायः । अत्र यच्चयत्रशब्द उपपदं गर्हा च लिङ्निमित्तम् । अत्र भूते लृङ् । अदुष्टायाः साध्वसलक्षणसामग्र्यभावान्मरणक्रियातिपत्तिस्तदभावादपवादक्रिया-तिपत्तिश्च ॥

अमंस्यत भवान् यद्वत्तथैवं[3] च पिता तव ।
नागमिष्यद्विमानस्थः साक्षाद्दशरथो नृपः ॥ १० ॥

१०. अमंस्यतेति ॥ भवान् यद्वद्यथामंस्यत दुष्टेत्यमंस्था एतन्मननं तथा चेत्तव पिता दशरथो नृपः साक्षात् प्रत्यक्षेण नागमिष्यत् । दोष-भवनदशरथानागमनयोर्हेतुहेतुमद्भावो लिङ्निमित्तम् । अग्निपरिशुद्धि-ज्ञानाद्विरुद्धप्रत्ययात् क्रियातिपत्तिः । भूते लृङ् ॥

नाकल्प्स्यत्संनिधिं स्थाणुः शूली वृषभवाहनः ।
अन्वभाविष्यतान्येन[4] मैथिली चेत्पतिव्रता ॥ ११ ॥

---

१ यच यत्र T₃, T₄, c., D., Com.
२ °दसूयारते Com.
३ तथैतच्चेत् T₃, T₄, Com.
४ नान्वभावि B., E₃, c., C., T₃, T₁.

११. नेति ॥ पतिव्रता मैथिली अन्येन पुरुषान्तरेणान्वभाविष्यत चेदनुभुक्तोपभुक्ता चेत् । भवतेः कर्मणि लृङ् । चिण्वदिटि वृद्धिः । शूली शूलहस्तो वृषभवाहनो वृषभारूढः स्थाणुरीश्वरः संनिधिं संनिधानं नाकल्प्स्यन्नाकल्पयिष्यदित्यर्थः । अन्तर्भावितणिजर्थोऽयं प्रयोगः । कृपू सामर्थ्ये । पूर्ववल्लिङ्निमित्तक्रियातिपत्त्यो लृङ् ॥ "लुटि च क्लृपः" इति चकारात् स्ये परस्मैपदम् ॥ "तासि च क्लृपः" इति चकारादनिट् ॥

आनन्दयिष्यदागम्य कथं त्वामरविन्दसत् ।
राजेन्द्र विश्वसूर्धाता चारित्र्ये सीतया क्षते ॥ १२ ॥

१२. आनन्दयिष्यदिति ॥ हे राजेन्द्र राजराज अरविन्दे सीदतीत्यरविन्दसत् पद्मासनः विश्वं सूते इति विश्वसूर्विश्वस्रष्टा । उभयत्र "सत्सूद्विष—" इत्यादिना क्विप् । धाता ब्रह्मा सीतायाश्चारित्रे पातिव्रत्ये क्षते सति कथमागम्य त्वामानन्दयिष्यत् । गर्हितत्वादित्यर्थः ॥ "विभाषा कथमि लिङ् च" इति कथंशब्दो गर्हा च लिङ्निमित्तम् । चारित्रक्षत्यभावादानन्दादिक्रियातिपत्तिः ॥

प्रणमन् ब्रह्मणा प्रोक्तो राजकाधिपतिस्ततः ।
नाशोत्स्यत् मैथिली लोके नाचरिष्यदिदं यदि ॥ १३ ॥

१३. प्रणमन्निति ॥ ततोऽग्निवाक्यानन्तरं राजकानां राजसमूहानामधिपती रामः प्रणमन् ब्रह्माणं वन्दमानो ब्रह्मणा चतुर्मुखेन प्रोक्तः । किमिति । मैथिली सीतेदमग्निप्रवेशकर्म नाचरिष्यद्यदि लोके नाशोत्स्यन्न शुद्धा भवेत् । अत्राग्निप्रवेशशोधनयोर्हेतुहेतुमद्भावो लिङ्निमित्तम् । शुद्धिहेत्वग्निप्रवेशोपनिपातादशोधनक्रियातिपत्तिः ॥

---

१ °दागत्य T_3.
२ सीतायाः क्षते Com.
सीतायाः क्षिते T_4.
३ नोऽचरिष्य° C., c., E_3, T_1, T_3.

नामोक्ष्याम वयं शङ्कामिहाधास्यन्न चेद्भवान् ।
किं वा चित्रमिदं युक्तं भवान् यदकरिष्यत ॥ १४ ॥

१४. नेति ॥ हे राजन् भवानिहाग्नौ नाधास्यञ्चेत् सीतां नाहितवान् । न प्रवेशितवांश्चेदित्यर्थः । तर्हि वयं शङ्कां शुद्धेऽपि संशयं नामोक्ष्याम न मुञ्चेम । अतो युक्तं कृतमित्यर्थः । स्वयं सर्वज्ञोऽपि लोकाभेदेन वयमित्याह । परमार्थतस्तु लौकिका न विश्वस्युरित्यर्थः ॥ अग्न्याधानशङ्कात्यागयोर्हेतुहेतुमद्भावाहे लिङ्निमित्तम् । अनाधानक्रियायास्तद्विरुद्धाधानादतिपत्तिः । किं च भवान् युक्तं न्याय्यमकरिष्यत कृतवानिति यत् इदं वा किं चित्रम् । चित्रमिति नावकल्पयामीत्यर्थः । अत्र किंवृत्तमनवक्लृप्तिश्च लिङ्निमित्तम् । राज्ञो हितकरणरूपत्वात् चित्रक्रियातिपत्तिः । तत्र भूते वा लृङ् ॥

प्रावर्त्तिष्यन्त चेष्टाश्चेदयाथातथ्यवत्तव[२] ।
अनुशास्ये त्वया लोके रामावर्त्स्यस्तरां ततः ॥ १५ ॥

१५. प्रावर्त्तिष्यन्तेति ॥ किं च हे राम तव चेष्टा व्यापारा यथातथं यथार्थम् । 'यथार्थं तु यथातथम्' इत्यमरः । यथार्थेऽव्ययीभावः । नपुंसकह्रस्वः । ततो नञ्समासे अयथातथम् । ततो ब्राह्मणादिष्यञ्प्रत्यये "यथातथायथापुरयोः पर्यायेण" इति विकल्पान्नञ्पूर्वपदवृद्धौ आयथातथ्यम् । तद्वदायथातथ्यवत् । मत्वन्तं क्रियाविशेषणम् । अयथार्थमयथातथेत्यर्थः । प्रावर्त्तिष्यन्त चेत् प्रवृत्ताश्चेत् । ततस्तवापरीक्ष्यप्रवृत्तेस्त्वयानुशास्ये शासनीये लोकेऽप्यवर्त्स्यस्तराम् । यथा राजा तथा प्रजेति न्यायादतिमात्रं प्रावर्त्तिष्यन्त । तादृशचेष्टाः प्रवर्त्तेरन्नित्यर्थः । वृतु वर्त्तने ॥ "वृद्भ्यः स्यसनोः" इति तिप् ॥ "तिङश्च" इति तमप् ॥ "किमेत्तिङव्यय—" इत्यादिना तिङ्घादामुप्रत्ययः ॥ रामचेष्टाप्रवृत्तिलोकचेष्टाप्रवृत्त्योर्हेतुहेतुमद्भावो लिङ्-

१ °मुपाधास्यन् T_3, T_4. | २ °दायथातथ्यवत् T_3, Com.

निमित्तम्। असमीक्ष्यकरणोपनिपातात्समीक्ष्यकरणक्रियातिपत्तौ भविष्यति लृङ्॥

प्रणमन्तं ततो[1] राममुक्तवानिति[2] शङ्करः।
किं नारायणमात्मानं नाभोत्स्यत भवानजम्॥ १६॥

१६. प्रणमन्तमिति॥ अथ ब्रह्मानन्तरं शंकरः प्रणमन्तं राममुक्तवान्। किमिति। भवानात्मानं न जायत इत्यजमनादिनिधनं नारायणमादिपुरुषं नाभोत्स्यत न बुद्धवान् किम्। अत्र किंवृत्तं लिङ्निमित्तम्। नारायणत्वानवबोधक्रियायास्तद्विरुद्धबोधोत्पादनादतिपत्तिः॥

कोऽन्योऽकर्त्स्यदिह प्राणान् दृप्तानां च[3] सुरद्विषाम्।
को वा विश्वजनीनेषु कर्मसु प्रार्घटिष्यत[4]॥ १७॥

१७. नारायणत्वमेवाह। क इति॥ इह लोके अन्यो नारायणादन्यः को वा दृप्तानां सुरद्विषां राक्षसानां प्राणानकर्त्स्यदच्छेत्स्यत्। कृती छेदने। को वा विश्वजनीनेषु विश्वस्मै जनाय हितेषु॥ "आत्मन्विश्वजन—" इत्यादिना खः॥ कर्मसु सेतुबन्धनादिकृत्येषु प्रायतिष्यत प्रयतेत। प्राघटिष्यत इति पाठेऽप्ययमेवार्थः। अत्रापि क इति किंवृत्तं लिङ्निमित्तम्। नारायणत्वबोधनादकर्त्तनाप्रयतनक्रियातिपत्तिः। तत्र भूते लृङ्॥

दैत्यक्षये महाराज यच्च यत्राघटिष्यथाः।
समाप्तिं जातु तत्रापि किं नानेष्यस्त्वमीहितम्[5]॥ १८॥

१८. दैत्य इति॥ हे महाराज त्वं दैत्यक्षयेऽसुरवधे निमित्ते यत्रावतारे यदीहितं यच्चेष्टितं नाघटिष्यथा नाकृथाः। जातु कदा तत्रावतारे समाप्तिमपि नानेष्यः न नेष्यसि। तत्किं सर्वं घटिष्यसे समापयिष्यसि चेदित्यर्थः॥ "जातुयदोर्लिङ्" इति जातुयच्छब्दानवकॢप्तिश्च लिङ्निमित्तम्। निजरूपबोधादघटनाया अतिपत्तिः। भविष्यति लृङ्॥

---

१ वचो राम° T_3, T_4.
२ °मुक्तवानथ D., T_3, T_4.
३ सुरविद्विषाम् c., D. नरविद्विषाम् T_3, T_4.
४ प्रायतिष्यत Com.
५ °नेष्यः स्वमीहितम् T_4.

तातं प्रसाद्य कैकेय्या भरताय प्रपीडितम् ।
सहस्रचक्षुषं रामो निनंसुः परिदृष्टवान् ॥ १९ ॥

१९. तातमिति ॥ रामो भरताय भरतराज्यार्थं कैकेय्या प्रपीडितं वरप्रार्थनया क्लिशितं तातं पितरं दशरथं प्रसाद्य कैकेयीविषयरोषत्याजनेन प्रसन्नं कृत्वा सहस्रचक्षुषं सहस्राक्षमिन्द्रं निनंसुर्नमितुमिच्छुः परिदृष्टवान् ॥

प्रेता वरेण शक्रस्य प्राणन्तः कपयस्ततः[१] ।
संजाताः फलिनानम्ररोचिष्णुद्रुमसद्रवः ॥ २० ॥

२०. प्रेता इति ॥ तत इन्द्रदर्शनानन्तरं प्रेता रणे पूर्वं मृताः कपयः शक्रस्य वरेण प्रसादेन प्राणन्तो जीवन्तः सन्तः । अन प्राणने । लटः शत्रादेशः । फलिनाः फलवन्तः ॥ "फलबर्हाभ्यामिनच्" ॥ अत एवानम्राः फलभरेणानता अत एव रोचिष्णवः शोभनाश्च तेषु द्रुमेषु सद्रवः सदनशीलाः संजाताः । निषण्णा इत्यर्थः ॥ "दाधेट्सिशदसदो रुः" इति सदो रुप्रत्ययः ॥

भ्रमरकुलाकुलोल्वणसुगन्धिसपुष्पतरु-[२]
स्तरुणमधूकसंभवपिशङ्गिततुङ्गशिखः ।
शिखरशिलान्तरालपरिक्लृप्तजलावसरः[३]
सरसफलश्रियं विततवान्स सुवेलगिरिः[४] ॥ २१ ॥

२१. भ्रमरेति ॥ भ्रमरकुलैराकुला व्याप्ता उल्वणसुगन्धयोऽत्यन्तसुरभिगन्धयः सपुष्पास्तरवो यस्मिन् सः । तरुणानां प्रत्यग्राणां मधूकानां मधूकपुष्पाणां संभवेनोद्भवेन पिशङ्गिताः पिशङ्गीकृतास्तुङ्गशिखा उन्नतशिखराणि यस्य सः । शिखरशिलानामन्तरालेषु परिक्लृप्ता निष्पन्ना

१ °स्तदा D.
°स्तथा T_4.
२ सुगन्धिपुष्प° N., C., c., B.
३ परिक्षिप्तजलापसरः D.
४ विततान सुवेल° N., C., c., B.

जलावसरा जलप्रसरा यस्मिन् सः। सुवेलगिरिः सुवेलाद्रिः सरसफलानां श्रियं समृद्धिं विततवान् वितताना। पादान्तादियमकम्। नर्दटकवृत्तम्। 'यदि भवतो नजौ भजजला गुरु नर्दटकम्' इति लक्षणात्॥

संवाद्भिः सकुसुमरेणुभिः समीरै-
रानम्रैर्बहुफलधारिभिर्वनान्तैः।
श्च्योतद्भिर्मधुपटलैश्च वानराणा-
माप्यानो रिपुवधसंभवः प्रमोदः॥ २२॥

२२. संवाद्भिरिति॥ वानराणां रिपुवधसंभवो रिपुवधप्रभवः प्रमोद आनन्दः संवाद्भिः संचरद्भिः। वातेर्लटः शत्रादेशः। सकुसुमरेणुभिः सुगन्धिभिरित्यर्थः। समीरैर्मारुतैर्बहुफलशालिभिरत एवानम्रैर्वनान्तैर्वनभागैः श्च्योतद्भिः स्रवद्भिर्मधुपटलैः क्षौद्रमण्डलैश्चाप्यानः प्रवृद्धः। ओप्यायी वृद्धौ। कर्तरि क्तः। ओदित्वान्निष्ठानत्वम्। यकारलोपः। व्यवस्थितविभाषावचनात् सोपसर्गस्य प्यायः पीभावो न भवति। प्रहर्षिणीवृत्तम्॥

आयान्त्यः स्वफलभरेण भङ्गुरत्वं
भृङ्गालीनिचयचिता लतास्तरूणाम्।
सामोदाः क्षितितलसंस्थितावलोप्या
भोक्तॄणां श्रममुदयं न नीतवत्यः॥ २३॥

२३. आयान्त्य इति॥ स्वेन फलभरेण भङ्गुरत्वं भङ्गुरशीलत्वम्॥ "भञ्जभास—" इत्यादिना घुरच्॥ आयान्त्यः प्राप्नुवत्यस्तथा फलिता इत्यर्थः। सामोदा मनोहरगन्धवत्योऽत एव भृङ्गालीनिचयैश्चिता व्याप्ताः क्षितितलसंस्थितैरनारूढैरेवावलोप्या अवलोप्तुमपचेतुं शक्याः करप्रचेया इत्यर्थः। लताः शाखाः। 'समे शाखालते' इत्यमरः।

१ बहुफलशालिभि° Com. वरफलभारिभि° D. | वरफलहारिभि° T₂.

भोक्तृणामपहर्तॄणां वानराणां श्रमं श्रान्तिमुदयमुद्गमं न नीतवत्यः किं तु प्रशमं निन्युरित्यर्थः । नयतिर्द्विकर्मकः । विनीतवत्य इति पाठे उदयमुदितम् । एतेरयतेर्वा पचाद्यच् । श्रममपनिन्युरित्यर्थः । एतच्च प्रहर्षिणीवृत्तम् ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लुङ्प्रदर्शनो नाम
एकविंशतितमः सर्गः ॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लि-
नाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने
एकविंशः सर्गः ॥

॥ श्रीः ॥

अथ द्वाविंशः सर्गः ।

ततो रामो हनूमन्तमुक्तवान् हृष्टमानसम्[1] ।
अयोध्यां श्वः प्रयातासि कपे भरतपालिताम् ॥ १ ॥

१. अथ लुड्विलासमधिकृत्याह । तत इति ॥ ततः सीताशुद्ध्यनन्तरं हृष्टमानसो रामो हनूमन्तमुक्तवान् । हे कपे भरतपालितामयोध्यां श्वः परेद्युः प्रयातासि गन्तासि गमिष्यसीत्यर्थः । प्रपूर्वाद्यातेरनद्यतनभविष्यति लुट् । विशेषस्तत्र तत्र वक्ष्यते ॥

गाधितासे[2] नभो भूयः स्फुटन्[3]मेघघटावलि ।
ईक्षितासेऽम्भसां पत्युः पयः शिशिरशीकरम् ॥ २ ॥

२. गाहितास इति ॥ हे कपे भूयः पुनरपि स्फुटन्त्यस्त्वद्गतिवेगवाताहत्या विशीर्यमाणा मेघघटावलयो मेघवृन्दपङ्क्तयो यस्मिंस्तन्नभो गाहितासे प्रवेक्ष्यसि । गाहू विलोडने । शिशिरशीकरमम्भसां पत्युः पय ईक्षितासे द्रष्टासि ॥

सेवितासे प्लवङ्ग त्वं महेन्द्राद्रेरधित्य[4]काः ।
व्युत्क्रान्तवर्त्मनो भानोः सहज्योत्स्नाकुमुद्वतीः[5] ॥ ३ ॥

३. सेवितास इति ॥ प्लवैर्गच्छतीति प्लवङ्ग कपे । 'खच्प्रकरणे गमेः सुप्युपसंख्यानं खच्च डिद्वक्तव्यः' इति गमेः खचि मुमागमः टिलोपश्च । भानोर्व्युत्क्रान्तवर्त्मन औन्नत्येनातिक्रान्तभानुमार्गस्येत्यर्थः ।

---

१ दृतमानसम् T₃, T₄.
हृष्टमानसः Com.
२ गाहितासे Com.
३ स्फुरन्मे° T₃.
४ °रधित्यकाम् T₃, T₄.
५ सहज्योत्स्नाः कुमुद्वतीः c., Com.
सहज्योत्स्नां कुमुद्वतीम् T₄.

सापेक्षत्वेऽपि गमकत्वात्समासः । महेन्द्राद्रेः संबन्धिनीः सहज्योत्स्नाश्चन्द्रमण्डलसान्निध्यात् सचन्द्रिकाः ॥ "वोपसर्जनस्य" इति सहशब्दस्य विकल्पादसभावः ॥ कुमुदान्यासु सन्तीति कुमुद्वतीः कुमुदप्रायाः । 'कुमुद्वान् कुमुदप्रायः' इत्यमरः ॥ "कुमुदनडवेतसेभ्यो ड्मतुप्" इति ड्मतुप्प्रत्यये टिलोपः ॥ "मादुपधायाः—" इति वकारः ॥ अधित्यका ऊर्ध्वभूमयः । 'भूमिरूर्ध्वमधित्यका' इत्यमरः ॥ "उपाधिभ्याम्—" इत्यादिना त्यकन्प्रत्ययः ॥ सेवितासे सेविष्यसे । अनद्यतने लुट् ॥

चन्दनद्रुमसंच्छन्नाँ निराकृतहिमश्रथाः ।
दर्शितारस्त्वया ताश्च मलयोपत्यकाः शुभाः ॥ ४ ॥

४. चन्दनेति ॥ चन्दनद्रुमैः संच्छन्नाः हिमस्य श्रथो हिमश्रथो हिमासारः । श्रन्थ विमोचनप्रतिहर्षयोरिति धातोः "अवोदैधौद्मप्रश्रथहिमश्रथाः" इति घञ्नलोपौ वृद्ध्यभावश्च निपात्यते इति काशिका । स तिरोहितोऽभिभूतो याभिस्ताः । ततस्तयोर्विशेषणसमासः । चन्दनसंपर्काद्धिमादपि शीतला इत्यर्थः । शुभाः शोभनास्ताः पूर्वदृष्टा मलयस्योपत्यका आसन्नभूमयश्च । पूर्ववत्त्यकन्प्रत्ययः । त्वया दर्शितारः श्वो द्रक्ष्यन्ते ॥ "स्यसिच्—" इत्यादिना दृशेः कर्मणि चिण्वदिटि रूपम् ॥

प्रतन्व्यः कोमला विन्ध्ये सहितारः स्यदं न ते ।
लताः स्तवकशालिन्यो मधुलेहिकुलाकुलाः ॥ ५ ॥

५. प्रतन्व्य इति ॥ विन्ध्ये विन्ध्याद्रौ प्रतन्व्यः कृशाः कोमला मृदुलाः स्तबकशालिन्यः कुसुमगुच्छमनोहरा अत एव मधुलेहिकुलाकुला मधुपवृन्दाकीर्णा लतास्ते तव स्यदं गतिवेगम् ॥ "स्यदो जवे" इति स्यन्देर्घञ्नलोपौ वृद्ध्यभावश्च ॥ न सहितारो न सोढारो न सहि-

१ संच्छन्नतिरोहितहिम° Com.
२ मत्यमाः T₃.
३ मधुलेहकुला° T₄.

ष्यन्ते । तनुत्वात् कोमलत्वात् स्तबकभक्तित्वाच्चेत्यर्थः ॥ "तीषसह—" इत्यादिना सहेर्विकल्पादिडागमः ॥

द्रष्टासि प्रीतिमानारात् सखिभिः सह सेविताम् ।
सपक्षपातं किष्किन्धां पूर्वक्रीडां स्मरन् मुहुः ॥ ६ ॥

६. द्रष्टासीति ॥ सखिभिः सुहृद्भिः सह सेवितां भुक्तां किं धीयतेऽस्यामिति किष्किन्धां गुहां सुग्रीववसतिम् ॥ "पारस्करप्रभृतीनि च संज्ञायाम्" इति निपातनात् साधुः ॥ मुहुः पूर्वक्रीडामत्रात्रैवं क्रीडितमिति सपक्षपातं साभिमानं स्मरन् प्रीतिमान् प्रीतियुक्तः सन् आरात् अदूरे समीपे वा द्रष्टासि द्रक्ष्यसि ॥

त्वया संदर्शितारौ ते माल्यवद्दण्डकावने ।
उपद्रुतश्चिरं द्वन्द्वैर्ययोः क्लिशितवानहम् ॥ ७ ॥

७. त्वयेति ॥ तव पूर्वानुभूते माल्यवांश्च दण्डकावनं च ते गिरिकानने त्वया संदर्शितारौ संद्रक्ष्येते । दृशेः कर्मणि लुटि चिण्वदिटि च "लुटः प्रथमस्य डारौरसः" इत्यातामो रावादेशः । ययोर्गिरिवनयोरहं चिरं सीतातीतभूतो द्वन्द्वैः शीतोष्णादिदुःखैः । 'द्वन्द्वं युग्मं हिमोष्णादिमिथुनं कलहे रहः' इति यादवः । उपद्रुतः पीडितः सन् क्लिशितवान् क्लिष्टवान् ॥ "क्लिशः क्त्वानिष्ठयोः" इति विकल्पादिट् ॥ कित्त्वान्न गुणः ॥

आप्तारौ[1] भवता रम्यावाश्रमौ हरिणाकुलौ ।
पुण्योदकाद्[2]द्विजाकीर्णौ सुतीक्ष्णशरभङ्गयोः ॥ ८ ॥

८. आप्ताराविति ॥ रम्यौ हरिणाकुलौ मृगाकीर्णौ पुण्योदकौ पवित्रजलौ द्विजैर्हारितादिभिराकीर्णौ सुतीक्ष्णशरभङ्गयोर्मुन्योराश्रमौ भवता त्वया आप्तारौ आप्स्येते आप्तव्यावित्यर्थः । आप्नोतेः कर्मणि लुट् ॥ तास्यातामो रावादेशः ॥

---

१ प्राप्तारौ E₂, c., C., T₁. | २ पुण्योदकौ Com.

अतिक्रान्ता त्वया रम्यं दुःखमत्रेस्तपोवनम् ।
पवित्रचित्रकूटेऽद्रौ त्वं स्थातासि कुतूहलात् ॥ ९ ॥

९. अतिक्रान्तेति ॥ रम्यमत्रेस्तपोवनं त्वया दुःखं यथा तथा अतिक्रान्ता । रम्यतया दुस्त्यज्यत्वात् कृच्छ्रेणातिकृच्छ्रं यास्यते । क्रमेः कर्मणि लुट् ॥ "स्नुक्रमोरनात्मनेपदनिमित्ते" इत्यात्मनेपदे इट्प्रतिषेधः ॥ विचित्रेऽद्भुते चित्रकूटाद्रौ त्वं स्थातासि कुतूहलादद्भुतदर्शनकौतुकात्स्थास्यसि ॥

ततः परं भरद्वाजो भवता दर्शिता मुनिः ।
द्रष्टारश्च जनाः पुण्या यामुनाम्बुक्षतांहसः ॥ १० ॥

१०. तत इति ॥ ततः परं चित्रकूटदर्शनानन्तरं भवता भरद्वाजो मुनिर्दर्शिता द्रक्ष्यते । दृशेः कर्मणि लुटि तासि चिण्वदिट् । यमुनाम्बुक्षतांहसो यमुनाजलसेवालुप्तपापा अत एव पुण्याः पवित्रा जना द्विजा विप्राश्च द्रष्टारो द्रक्ष्यन्ते द्रष्टव्या इत्यर्थः । दृशेः कर्मणि लुटि चिण्वदिडभावपक्षे रूपम् ॥

स्यन्त्वा स्यन्त्वा दिवः शम्भोर्मूर्ध्नि स्कन्त्वा भुवं गताम् ।
गाहितासेऽथ पुण्यस्य गङ्गां मूर्त्तिमिव द्रुताम् ॥ ११ ॥

११. स्यन्त्वेति ॥ अथ भरद्वाजदर्शनानन्तरं दिवो द्युलोकात् स्यन्त्वा स्यन्त्वा पुनः पुनः स्यन्दित्वा । स्यन्दू प्रस्रवणे ॥ "आभीक्ष्ण्ये णमुल् च" इति चकारादाभीक्ष्ण्ये क्त्वाप्रत्ययः । 'आभीक्ष्ण्ये द्वे भवतः' इत्युपसंख्यानाद् द्विर्वचनम् । पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम् । शंभोर्मूर्ध्नि स्कन्त्वा गत्वा पतित्वेत्यर्थः । स्कन्दिर्गतिशोषणयोः । अनिट् ॥ "क्त्वि स्कन्दिस्यन्दोः" इत्युभयत्र नलोपप्रतिषेधः ॥ क्षितिं

१ सुखमत्रे° T_3, T_4.
२ विचित्र° D., Com., T_3, T_4.
३ भवतो T_4.
४ यमुना° D., Com., T_4.
५ क्षितिं D., Com., T_3, T_4.
६ द्रुतम् T_3, T_4.

गतां द्रुतां द्रवरूपेण स्थितां पुण्यस्य सुकृतस्य मूर्तिं विग्रहामिव स्थितां गङ्गां भागीरथीं गाहितासे गाहिष्यसे ॥

तमसाया महानीलपाषाणसदृशत्विषः ।
वनान्तान् बहु मन्तासे नागराक्रीडशाखिनः[1] ॥ १२ ॥

१२. तमसाया इति ॥ महानीलपाषाणसदृशत्विष इन्द्रनीलशिलासच्छायायास्तमसायास्तमसानद्याः संबन्धिनो नागराणां पौराणामाक्रीडसाक्षिणो विहारद्रष्टॄन् वनान्तान् वनप्रदेशान् बहु मन्तासे बहु मंस्यसे । मन ज्ञाने । लुटि "थासः से" ॥ "तासस्त्योः—" इति सलोपः ॥

नगरस्त्रीस्तनन्यस्त[2]धौतकुङ्कुमपिञ्जराम् ।
विलोक्य सरयूं[3] रम्यां गन्तायोध्या त्वया पुरी ॥ १३ ॥

१३. नगरेति ॥ नगरस्त्रीणां स्तनेषु न्यस्तैर्धौतैर्जलक्रीडाकाले क्षालितैः कुङ्कुमैः पिञ्जरां रम्यां सरयूं विलोक्य त्वयायोध्या पूरी गन्ता गंस्यते गन्तव्येत्यर्थः । गमेः कर्मणि लुट् ॥

आनन्दितारस्त्वां दृष्ट्वा प्रष्टारश्चावयोः शिवम् ।
मातरः सह मैथिल्या तोष्टा च भरतः[4] परम् ॥ १४ ॥

१४. आनन्दितार इति ॥ अथ मातरः कौसल्यादयस्त्वां दृष्ट्वानन्दितार आनन्दिष्यन्ति । मैथिल्या सहावयोः पुत्रयोः शिवं क्षेमं प्रष्टारः प्रक्ष्यन्ति च । भरतश्च परमत्यन्तं तोष्टा संतोक्ष्यति ॥

आख्यातासि हतं शत्रुमभिषिक्तं विभीषणम् ।
सुग्रीवं[5] चार्जितं मित्रं सर्वांश्चागामुकान् द्रुतम् ॥ १५ ॥

१५. आख्यातासीति ॥ शत्रुं रावणं हतं विभीषणं चाभिषिक्तं लङ्काराज्ये स्थापितं सुग्रीवं च परमं मित्रं परमसुहृदं सर्वानस्मांश्च द्रुतमा-

---

१ °क्रीडसाक्षिणः Com., T_3, T_4.
२ स्तनस्तन्यधौत° c.
३ शरयूं D.
४ भरतः पुरम् T_3.
५ सुग्रीवमार्जितं मित्रं T_4.
सुग्रीवं परमं मित्रं Com.

गामुकानागन्तृन् ॥ "लषपत—" इत्यादिना गमेरुकञ्प्रत्ययः ॥ आख्या-तास्याख्यास्यसि । सर्वमेतदाख्यातमित्यर्थः ॥

गन्तारः परमां प्रीतिं पौराः श्रुत्वा वचस्तव ।
ज्ञात्वैतत्संमुखीनश्च समेता भरतो ध्रुवम् ॥ १६ ॥

१६. गन्तार इति ॥ पौरास्तव वचः श्रुत्वा परमां प्रीतिं गन्तारो गमिष्यन्ति । एतत्सर्वं ज्ञात्वा भरतश्च द्रुतं मां प्रति संमुखीनोऽभिमुख एता आगन्ता । आङ्पूर्वादिणः कर्त्तरि लुट् ॥

गते त्वयि पथानेन वयमप्यांहितास्महे ।
लब्धाहेऽहं धृतिं प्राप्ते भूयो भवति संमुखे ॥ १७ ॥

१७. गत इति ॥ अनेनोक्तेन पथा त्वयि गते सति वयमप्यांहितास्महे आगमिष्यामः । अंहि गतौ । लुटि ताङि महिङि तासि टेरेत्वम् । इदित्वान्नुम् । अजादित्वादाट् । भूयश्च त्वयि संमुखे प्राप्ते सत्यहं धृतिं संतोषं लब्धाहे लप्स्ये । लभेर्लुटि टेरेत्वे "ह एति" इति तासः सकारस्य हकारः ॥ "झषस्तथोर्धोऽधः" ॥

गते तस्मिन्गृहीतार्थे रामः सुग्रीवराक्षसौ ।
उक्तवान् श्वोऽभिगन्तास्थो युवां सह मया पुरम् ॥ १८ ॥

१८. गत इति ॥ तस्मिन् हनूमति गृहीतार्थेऽवधृतकार्यार्थे गते सति रामः सुग्रीवराक्षसौ सुग्रीवविभीषणौ युवामपि मया सह श्वः परेऽह्नि पुरमयोध्यानगरीमभिगन्तास्थः गमिष्यथ इत्युक्तवान् । गमेर्लुटि थसि तासिप्रत्ययः ॥

द्रष्टास्थस्तत्र तिस्रो मे मातृस्तुष्टान्तरात्मनः ।
आसन्तीनं सखित्वं च प्राप्तास्थो भरताश्रयम् ॥ १९ ॥

---

१ ज्ञात्वा सर्वं संमुखीनः Com.
२ संमुखीनं च T_3.
३ मामेता T_4, Com.
४ द्रुतम् Com.
५ पुरीम् T_3, T_4.
६ नो D., Com.
७ अत्यन्तीनं Com., D.

१९. द्रष्टास्थ इति ॥ तत्रायोध्यायां तुष्टान्तरात्मनस्तुष्टान्तरङ्गान् नोऽस्माकं तिस्रो मातृर्जननीः ॥ "न षट् स्वस्रादिभ्यः" इति निषेधात् "ऋन्नेभ्यः—" इति न ङीप् ॥ द्रष्टास्थः द्रक्ष्यथः। दृशेः कर्त्तरि लुङि थसि तास् ॥ "व्रश्च—" आदिना षत्वम्। भरताश्रयं भरतविषयमत्यन्तं गाम्यत्यन्तीनमात्यन्तिकम् ॥ "अवारपार—" इत्यादिना खप्रत्ययः ॥ सखित्वं सख्यं च प्राप्तास्थः प्राप्स्यथः। आप्नोतेर्लुटि थसि तास् ॥

नैवं[1] विरहदुःखेन वयं व्याघानितास्महे।
श्रमोऽनुभविता[2] नैवं[3] भवद्भ्यां च वियोगजः ॥ २० ॥

२०. अथ युग्मेनाह। नैवमित्यादि ॥ हे कपिराक्षसौ सुग्रीवविभीषणौ प्रातः श्वः प्रभाते मया सह गन्तुं प्रयतितासाथे प्रयतिष्येथे यदि। यती प्रयत्ने। एवं सति वयं विरहदुःखेन भवद्वियोगदुःखेन न व्याघानितास्महे न व्याहनिष्यामहे। हन्तेः कर्मणि लुटि तासि चिण्वदिटि वृद्धिः ॥ "हो हन्तेः—" इति हकारस्य घत्वं च ॥ एवं सति भवद्भ्यां च वियोगजोऽस्मद्विरहजन्यः श्रमः क्लेशो नानुभाविता नानुभविष्यते। अनुपूर्वाद्भवतेः कर्मणि लुटि पूर्ववत्तासि चिण्वदिटि वृद्धिः ॥

एवं युवां मम प्रीत्यै कल्प्तास्थः कपिराक्षसौ।
गन्तुं प्रयतितासाथे प्रातः सह मया यदि ॥ २१ ॥

२१. एवमिति ॥ एवं मया सह प्रस्थाने सति युवां मम प्रीत्यै संतोषाय कल्प्तास्थः कल्पिष्येथे संपत्स्येथे इत्यर्थः। कृपू सामर्थ्ये ॥ "लुटि च कृपः" तङभावपक्षे "तासि च कृपः" इतीट्प्रतिषेधः ॥ लपरो लघूपधगुणः। 'कृपेः संपद्यमाने चतुर्थी वक्तव्या'। शेषं व्याख्यातम् ॥

उक्तवन्तौ ततो रामं वचः पौलस्त्यवानरौ।
अनुग्रहोऽयं काकुत्स्थ गन्तास्वो यत् त्वया सह ॥ २२ ॥

---

[1] न वां T4.
[2] °नुभाविता Com.
[3] नैव T4.

२२. उक्तवन्ताविति ॥ ततो रामवाक्यानन्तरं पौलस्त्यवानरौ विभीषणसुग्रीवौ रामं वचो वाक्यमुक्तवन्तौ । किमिति । हे काकुत्स्थ त्वया सह गन्तास्वो गमिष्याव इति यत् अयमनुग्रहो महान् प्रसादः ॥

अनुमन्तास्वहे नावां भवन्तं विरहं[1] त्वया ।
अपि प्राप्ये[2] सुरेन्द्रत्वं किं नु[3] प्रत्तं त्वयास्पदम् ॥ २३ ॥

२३. अन्विति ॥ हे राम सुरेन्द्रत्वं प्राप्याप्यावां भवन्तं सन्तं त्वया विरहं नानुमन्तास्वहे । त्वया प्रत्तं दत्तम् ॥ "अच उपसर्गात्तः" इति दस्तकारादेशः ॥ आस्पदं प्रतिष्ठां किमु ॥ "आस्पदं प्रतिष्ठायाम्" इति निपातनात् सुडागमः ॥ त्वां विनैन्द्रं पदमपि न रोचयामहे किमुत पदान्तरमित्यर्थः ॥ इति लुङ्विलासः ॥

ततः कथाभिः समतीत्य दोषा[4]-
मारुह्य सैन्यैः सह पुष्पकं ते ।
संप्रस्थिता वेगवशादगाधं
प्रक्षोभयन्तः[5] सलिलं पयोधेः ॥ २४ ॥

२४. पुनः प्रकीर्णकमेवाधिकृत्याह । तत इत्यादि ॥ ततः संवादानन्तरं ते सर्वे कथाभिरिष्टालापैः रात्रिं समतीत्य नीत्वेत्यर्थः । सैन्यैः सह पुष्पकमारुह्य वेगवशात् पुष्पकवेगवाताहतिबलादित्यर्थः । अगाधं पयोधेः सलिलं संक्षोभयन्तः सन्तः संप्रस्थिता अयोध्यां प्रति प्रस्थिता इत्यर्थः ॥

सेतुं महेन्द्रं मलयं सविन्ध्यं[6]
समाल्यवन्तं गिरिमृष्यमूकम् ।
सदण्डकारण्यवतीं च पम्पां
रामः प्रियायाः कथयन् जगाम ॥ २५ ॥

१ क्रीडितुं विरहे त्वया B., C., T1.
२ प्राप्तौ D.
३ किमु प्रत्तं Com., D., T3, T4.
४ रात्रिं° E3, T4.
५ संक्षोभयन्तः Com.
६ च विन्ध्यं T3, T4.

२५. सेतुमिति ॥ राम एष सेतुरेष महेन्द्र इति सेत्वादीन्प्रियायाः कथयन् जगाम ॥

एते ते मुनिजनमण्डिता दिगन्ताः
शैलोऽयं ललितवनः[1] स चित्रकूटः ।
गङ्गेयं सुतनु विशालतीररम्या[2]
मैथिल्यां[3] रघुतनयो दिशन्ननन्द ॥ २६ ॥

२६. एत इति ॥ हे सुतनु सुगात्रि । ऊकारान्तोत्तरपदो बहुव्रीहिः । ततः संबुद्धौ नदीह्रस्वः । एते परिदृश्यमानास्ते पूर्वानुभूता मुनिजनमण्डिता दिगन्ताः । अयं स चित्रकूटः स्थगितपथः शैलः । विशालतीर्थरम्या इयं सा गङ्गा भागीरथी । इत्यादि मैथिल्या दिशन् सीतायाः कथयन् रघुनन्दनो ननन्द ॥

शिञ्जान[4]भ्रमरकुलाकुलाग्रपुष्पाः[5]
शीता[6]म्भःप्रविलयसंप्लवा[7]तिलीनाः ।
एते ते सुतनु पुरीजनोपभोग्या
दृश्यन्ते नयनमनोरमा[8] वनान्ताः ॥ २७ ॥

२७. शिञ्जानेति ॥ शिञ्जानैर्गुञ्जद्भिर्भ्रमरकुलैराकुलान्यग्रपुष्पाणि शिखाग्रकुसुमानि येषां ते । शीताम्भसां प्रविलयेनान्तःप्रवेशेन संप्लवानि समन्तात्प्लुतानि आलवालानि येषां ते । पुरीजनानामयोध्याजनानामुपभोग्याः । नयनानि मनांसि च रमयन्तीति तथोक्ताः । कर्मण्यण् । ते पूर्वानुभूताः वनान्ता वनप्रदेशाः हे सुतनु एते दृश्यन्ते । अयोध्यासमीपं प्राप्ताः स्म इत्यर्थः ॥

१ लुलितवनः D., N.
स्थगितपथः Com., T3, T4.
२ विलासतीर्थरम्या D.
विशालतीर्थरम्या Com.
३ सीताया D.
४ सिञ्जान° D.
५ °कुलाग्रपुष्पाः T4.
°कुलादिपुष्पाः T3.
६ सीता D., E3.
७ संप्लवालवालाः Com.
संप्लवाभिलीनाः N., T3.
संभवातिलीनाः T4.
८ °मनोहरा D.

स्थानं नः पूर्वजानामियमधिकमसौ प्रेयसी पूरयोध्या
दूरादालोक्यते या हुतविविधहविःप्रीणिताशेषदेवा ।
सोऽयं देशो रुदन्तं पुरजनमखिलं यत्र हित्वा प्रयातौ
आवां सीते वनान्तं सह धृतधृतिना लक्ष्मणेन क्षपान्ते ॥ २८ ॥

२८. स्थानमिति ॥ नोऽस्माकं पूर्वजानां मनुप्रभृतीनां स्थानं वसतिरत एवाधिकतरमत्यन्तं प्रेयसी प्रियतमा अयोध्या पूर्नगरी इयं दूरादालोक्यते दृश्यते । या पूर्हुतैर्विविधैर्हविर्भिराज्यादिभिः प्रीणितास्तर्पिता अशेषदेवा यया सा । किं च स देशोऽयं दृश्यते यत्र देशे रुदन्तमखिलं पुरजनं हित्वा त्यक्त्वा हे सीते आवां त्वं चाहं चेत्यर्थः क्षपान्ते प्रभाते धृतधृतिना धृतसंतोषेण लक्ष्मणेन सह वनान्तं प्रयातौ । स्रग्धरावृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्' इति लक्षणात् ॥

तूर्याणामथ निःस्वनेन सकलं लोकं समापूरयन्
विक्रान्तैः करिणां गिरीन्द्रसदृशां क्ष्मां कम्पयन् सर्वतः ।
सानन्दाश्रुविलोचनः प्रकृतिभिः सार्धं सहान्तःपुरः
संप्राप्तो भरतः समालितिरलं नम्रः समं मातृभिः ॥ २९ ॥

२९. तूर्याणामिति ॥ अथानन्तरं तूर्याणां वाद्यानां निस्वनेन सकलं लोकं समापूरयन् गिरीन्द्रसदृशां मेरुकल्पानां करिणां गजानां विक्रान्तैः पादविक्षेपैः सर्वतः क्ष्मां क्षितिं क्ष्मापयन् कम्पयन् । क्ष्मायी विधूनने । ण्यन्ताल्लटः शत्रादेशः ॥ "अर्त्तिह्री—" इत्यादिना पुगागमः ॥ यकारलोपः । सानन्दास्रे आनन्दबाष्पयुक्ते विलोचने

१ पूर्वजानामियमधिकतरं प्रेयसी Com. पूर्वजानामधिकमियमसौ c., T4. पूर्वजानामधिकमियमतः प्रेयसी D.
२ °लोक्यतेऽसौ D.
३ देशोऽनुयान्तं T3, T4.
४ निःस्वनेन N., B.
५ क्ष्मापयन् Com., T4.
६ सानन्दास्र° T3, Com.
७ समातालि° c.

यस्य स भरतः प्रकृतिभिः प्रजाभिरमात्यैश्च सार्धं सहान्तःपुरः सावरोधः समारुतिः सहनूमान् मातृभिः कौसल्यादिभिः समं संप्राप्तः सन् अलमतिभक्त्या नम्रः प्रणतः। शार्दूलविक्रीडितं वृत्तम्। लक्षणमुक्तम्॥

अथ ससंभ्रमपौरजनावृतो
भरतपाणिधृतोज्ज्वलचामरः[1]।
गुरुजनद्विजवन्द्यभिनन्दितः[2]
प्रविशति स्म पुरं रघुनन्दनः॥ ३०॥

३०. अथेति॥ अथ भरतप्राप्त्यनन्तरं रघुनन्दनो रामः ससंभ्रमैः सत्वरैः पौरजनैरावृतः परिवारितः। भरतपाणिना धुतं कम्पितमुज्ज्वलममलं चामरं यस्य सः। गुरुजनेन मातृवर्गेण द्विजैर्वसिष्ठादिभिर्वन्दिभिः स्तुतिपाठकैश्चाभिनन्दितः प्रशंसितः स्वां पुरीमयोध्यां प्रविशति स्म प्रविष्टः। द्रुतविलम्बितवृत्तम्। 'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात्॥

प्रविधाय धृतिं परां जनानां[3]
युवराजं भरतं ततोऽभिषिच्य।
जघटे तुरगाध्वरेण यष्टुं
कृतसंभारविधिः[4] पतिः प्रजानाम्॥ ३१॥

३१. प्रविधायेति॥ ततः पुरप्रवेशानन्तरं प्रजानां पती राजा रामो जनानां प्रजानां परां धृतिं विधाय सम्यक्पालनेन परमानन्दमुत्पाद्य भरतं युवराजमभिषिच्य युवराजं कृत्वेत्यर्थः। कृतः संभारविधिर्यज्ञसंपादनं येन स सन् तुरगाध्वरेण अश्वमेधयागेन। जातावेकवचनम्। तुरगाश्वमेधैरित्यर्थः। 'अश्वमेधशतैरिष्ट्वा ब्रह्मलोकं गमिष्यति' इति वाल्मीकिवचनात्। यष्टुं देवान् पूजयितुं जघटे घटते स्म प्रवृत्त इत्यर्थः॥

---

१ °भृतो° C., E3, B., T3, T1. °धुतो° Com.

२ °भिपूजितः T3, T4.

३ पुरीजनानां C., E3, T3, T4, T1.

४ धृत° T3.

इदमधिगतमुक्तिमार्गचित्रं
विवदिषतां वदतां च संनिबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहितमैश्वरं यथास्त्रम् ॥ ३२ ॥

३२. इत्थं नायकाभ्युदयान्तं काव्यमुक्त्वा संप्रति प्रेक्षावत्परिग्रहार्थं स्वकाव्यस्य सप्रयोजनतामाह । इदमिति ॥ उक्तिमार्गैर्भणितिभङ्गिभिश्चित्रमद्भुतं सुसमाहितं गुणालंकारपरिष्कृतमिदं काव्यमधिगतं परिशीलितं सत् युधि अधिगतमुक्तिमार्गमवगतमोचनप्रकारं तच्च तच्च चित्रमद्भुतं चित्ररूपं वा सुसमाहितं सुष्ठु धनुषि संहितमैश्वरमस्त्रं यथा पाशुपतास्त्रमिव संनिबन्धात् सम्यक्गुम्फनात् अन्यत्र सम्यङ्मात्रयोजनाच्च हेतोः विवदिषतां विवदितुं विचित्रं प्रयोक्तुमिच्छतां वदतां जनानां वक्तृजनानामन्यत्र जिगीषुजनानामित्यर्थः सदा जयं वादे जयमन्यत्र युद्धे जयं जनयति प्रयच्छति ॥

दीपतुल्यः[2] प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तामर्ष[3] इवान्धानां भवेद्व्याकरणादृते ॥ ३३ ॥

३३. संप्रति वैयाकरणस्यैवात्राधिकार इत्याह । दीपेति ॥ अयं मत्कृतः प्रबन्धः काव्यसंदर्भः शब्दलक्षणं व्याकरणं तदेव चक्षुर्येषां वैयाकरणानां दीपकल्पो दीपतुल्यः । वैयाकरणानामयं प्रबन्धश्चक्षुष्मतां दीप इवोपकरोतीत्यर्थः । व्याकरणादृते तद्रहितानामित्यर्थः अन्धानां हस्तादर्शः करस्थदर्पण इव भवेत् । अवैयाकरणस्यायं प्रबन्धोऽन्धस्यादर्श इव नोपकरोतीत्यर्थः ॥

व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता[4] दुर्मेधसश्चास्मिन् विद्वत्प्रियतया[5] मया ॥ ३४ ॥

---

१ संनिबद्धम् T3.
२ दीपकल्पः Com.
३ हस्तादर्श Com.
This verse is given after the next in C.
४ दुर्मेधसो हतास्त्वस्मिन् T3.
५ विदुषां प्रीतये B., E3.

३४. किं चेदं काव्यं न सर्वसुलभमित्याह। व्याख्येति॥ इदं काव्यं व्याख्यया व्याख्यानेनैव गम्यं गुरुमुखवेद्यमित्यर्थः। एवमेव सुधियां विदुषामलमत्यन्तमुत्सव आनन्दः। मया विद्वांसः प्रिया यस्य तस्य भावस्तत्ता तया विद्वत्प्रियतया विद्वल्लुब्धतयेत्यर्थः। अत्रास्मिन् काव्ये विषये दुर्मेधसो दुर्बुद्धयो मूढाः॥ "नित्यमसिच् प्रजामेधयोः" इत्यसिच्प्रत्ययः॥ हता उपेक्षिताः। विदुषामेवात्र प्रवेशोऽस्तु माभूदविदुषां ततः किमिति भावः॥

काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम्।
कीर्त्तिरतो[1] भवतान्नृपस्य तस्य
प्रेमकरः[2] क्षितिपो यतः प्रजानाम्॥ ३५॥

इति भट्टिकाव्ये द्वाविंशतितमः सर्गः॥

इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते भट्टिकाव्यव्याख्याने सर्वपथीनाख्याने तिङन्तकाण्डे लुड्विलासो नाम द्वाविंशः सर्गः॥

---

१ कीर्त्तिरियं भवतादतो नृपस्य C.
२ क्षेमकरः E_3, B.
क्षेमङ्करः C.

This verse is dropped in T_3, and the Com.

NOTES.

CANTO X.

Stanza 1—

This stanza illustrates वृत्त्यनुप्रास, which is defined by Vidyânâtha as 'एकद्वित्रप्रभृतीनां तु व्यञ्जनानां यदा भवेत् । पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥'

ज्वलदुद्धतवालधिः. उद्धत means 'raised up'. In 'लाङ्गूलमुद्धतं धुन्वन्' C. IX. St. 7 Malli. explains उद्धतम् by उत्क्षिप्तम्. Jaya. paraphrases it by ऊर्ध्वीकृतम्.

Stanza 2—

21 stanzas beginning with this illustrate यमक, a figure of speech, which consists in the repetition in the same order or succession, generally in the same verse or in any part of it, of words or syllables similar in sound but different in meaning or purport. Rudraṭa defines it as:—

'तुल्यश्रुतिक्रमाणामन्यार्थानां मिथस्तु वर्णानाम् ।
पुनरावृत्तिर्यमकं प्रायश्छन्दांसि विषयोऽस्य ॥'

Namisâdhu, a Commentator on Rudraṭa's Kâvyâlaṅkâra, thus explains the purport of the several words used in this definition:—

'श्रुतिग्रहणाद्यत्र वर्णविकारेण षत्वणत्वादिना वपुष्टा वपुस्ता इत्यादौ तथा पुनर्गता पुना रौतीत्यादौ च सत्यपि क्रमे तुल्यश्रुतित्वाभावस्तत्र यमकत्वनिरासः । क्रमग्रहणात्प्रतिलोमानुलोमसर्वतोभद्रानुप्रासादीनां यमकत्वनिरासः । न हि तेषु तुल्यश्रुतिसद्भावेऽपि तुल्यक्रमो विद्यते । मिथोऽन्यार्थानां परस्परं भिन्नार्थानामित्यनेन तु पुनरुक्तस्य यमकत्वव्यदासः । यथा 'अहो रूपमहो रूपमहो मुखमहो मुखम् । अहो कान्तिरहो कान्तिस्तस्याः सारङ्गचक्षुषः ॥' इत्यादिषु । अन्यार्थानामित्यर्थशब्दः प्रयोजनवाच्यपि । तेनेहापि यमकत्वं सिद्धं भवति । 'विजृम्भितोद्दामरसेन चेतसा निरूप्यमाणं किमपि प्रियावपुः । तदैव वैराग्यवता विभागशो निरूप्यमाणं किमपि प्रियावपुः ॥' अत्र हि वर्णानामेकाभिधेयत्वेऽपि प्रयोजनं भिद्यते । अस्य च यमकस्य प्रायो बाहुल्येन छन्दांसि पद्यं विषयः । प्रायोग्रहणाद्गद्यमपि क्वापीति ॥'.

The यमक in this stanza is युक्पादयमक, which consists in the repetition of the युक् or even Pâdas. 'युक्पादयमकमिति युजोर्द्वितीयचतुर्थयोः पादयोर्यमितत्वात् ।'. Bha. Mal. defines it as:—

'द्वितीये च चतुर्थे च यमकं यत्र दृश्यते ।
युक्पादयमकं तत्तु विज्ञेयं कविपुङ्गवैः ॥'.

This kind of Yamaka is generally known as संदष्टक. Rudraṭa defines it as follows:—

'प्रत्येकं पश्चिमयोरावृत्त्या पादयोर्द्वितीयेन ।
यमके संजायेते गर्भः संदष्टकं चेति ॥'

i. e. The similarity in sound of the third Pâda with the second constitutes गर्भयमक, and that of the fourth Pâda with the second constitutes संदष्टकयमक. 'प्रथमपादो यदि द्वितीये पादे यम्यते तदा मुखं नाम यमकम् । तृतीये चेत्तदा संदंशः । चतुर्थे चेत्तदा आवृत्तिः । एवं द्वितीयपादश्चेत्तृतीये तदा गर्भः । चतुर्थे चेत्संदष्टकम् । तृतीयश्चेच्चतुर्थे तदा पुच्छम् । प्रथमस्त्रिषु चेत्तदा पङ्क्तिः । महायमकमिति केचित् ।' काव्यप्रदीप.

This is called विक्रान्तयमक by Bharata. 'एकैकं पादमुत्क्षिप्य द्वौ पादौ सदृशौ यदा । विक्रान्तयमकं नाम तज्ज्ञेयं नामतो यथा ॥'.

In Vâgbhaṭa's Kâvyânus'âsana पादयमक is divided into nine classes:—
'पादयमकं मुखं संदंश आवृत्तिगर्भसंदष्टकपुच्छपङ्क्तिपरिवृत्तियुग्मकभेदैर्नवधा ॥'

These are defined as follows:—

'प्रथमद्वितीययोः पादयोरावृत्त्या मुखयमकम् । प्रथमतृतीययोरावृत्त्या संदंशः । प्रथमचतुर्थयोरावृत्त्या आवृत्तिः । द्वितीयतृतीययोरावृत्त्या गर्भः । द्वितीयचतुर्थयोरावृत्त्या संदष्टकम् । तृतीयचतुर्थयोरावृत्त्या पुच्छम् । चतुर्णामपि परस्परावृत्त्या पङ्क्तिः । प्रथमचतुर्थयोर्द्वितीयतृतीययोरावृत्त्या परिवृत्तिः । प्रथमद्वितीययोस्तृतीयचतुर्थयोरावृत्तिर्युग्मकम् ॥'. In Sarasvatîkaṇṭhâbharaṇa this Yamaka is called चतुष्पादयमकेषु अव्यपेतमादियमकम्.

Stanza 3—

The Yamaka illustrated in this verse is called **पादान्ताम्रेडित** by Bharata. 'पादस्यान्त्यं पदं यत्र द्विर्द्विरेकमिहोच्यते । पादान्ताम्रेडितं नाम विज्ञेयं निपुणैर्यथा ॥'. The following is the instance given in the Nâṭyas'âstra:—

विजृम्भितं निःश्वसितं मुहुर्मुहुः कथाभिधानं स्मरणं पदे पदे । यथा च ते ध्यानमिदं पुनः पुनस्तथागता ते रजनी विना विना ॥. According to Bharata पादान्तयमक consists in the repetition of the same word at the end of each Pâda. 'चतुर्थे यत्र पादानामन्ते स्यात्सममक्षरम् । तद्वै पादान्तयमकं विज्ञेयं नामतो यथा ॥'.

The following is the instance given for it:—

दिनक्षयात्संवृतरश्मिमण्डलं दिवीव लग्नं तपनीयमण्डलम् ।
विभाति ताम्रं दिवि सूर्यमण्डलं यथा तरुण्याः स्तनभारमण्डलम् ॥.

In वाग्भटालंकार, आदियमक, मध्ययमक, and अन्तयमक are each divided into two classes. They are either संयुतावृत्तिकृत, brought about by the

repetition of words that are close (*i. e.* where there is no व्यवधान), or अयुतावृत्तिकृत, where words repeated are separated (*i. e.* where there is व्यवधान). The following instance is given there for संयुतावृत्तौ अन्तयमकः-

यदुपान्तिकेषु सरलाः सरला यदनूच्चलन्ति हरिणा हरिणा ।
तदिदं विभाति कमलं कमलं मदमेत्य यत्र परमाप रमा ॥.

The instance for अयुतावृत्तौ अन्तयमक is as under:—

गिरां श्रूयते कोकिला कोविदारं यतस्तद्वनं विस्फुरत्कोविदारम् ।
मुनीनां वसत्यत्र लोको विहारं न च व्याधिचक्रं कृतौको विहारम् ॥.

The instances given in the text (Sts. 3, 4 and 5) represent according to वाग्भटालंकार, संयुतावृत्तौ अन्तयमक, आदियमक, and मध्ययमक respectively. Bhoja in his Sarasvatîkaṅṭhâbharaṇa calls it चतुष्पादेषु अव्यपेतमन्तयमकम्.

Stanza 4—

विततम् is also the reading of Jaya. **निचितम्**, adopted in the text, means the same thing.

Jaya. and Bha. Mal. explain **सकलैः** as meaning 'sweet'. 'सकलैः समस्तैः सकलैः माधुर्यवद्भिः । कलशब्दस्य गुणमात्रवृत्तित्वात्र तद्वति वर्तते ।' जय०. 'सकलैः संपूर्णैः सकलैरव्यक्तमधुरैः । कलशब्दोऽत्र धर्मवचनः ।' भर०.

The Alaṅkâra in this verse according to Bharata is संदष्टयमक which is thus defined:—

'आविद्धे यत्र पादौ तु भवतामक्षरे समे ।
संदष्टयमकं नाम विज्ञेयं तत्तु वै यथा ॥'.

The instance given is:—

पश्य पश्य रमणस्य मे गुणान् येन येन वशगां करोति माम् ।
येन येन दिनमेति दर्शनं तेन तेन वशगां करोति माम् ॥.

According to him पादादियमक consists in the repetition of the same word at the beginning of each Pâda. 'आदौ पादस्य यत्र स्यात्समावेशसमाक्षरः । पादादियमकं नाम तद्विज्ञेयं बुधैर्यथा ॥'. The instance given is as under:—

विष्णुः सृजति भूतानि विष्णुः संहरते प्रजाः ।
विष्णुप्रसूतं त्रैलोक्यं विष्णुर्लोकादिदैवतम् ॥.

Stanza 5—

The Alaṅkâra in this verse is **पादमध्ययमक.** Daṇḍin calls it अव्यपेतमध्ययमक. His instance is:—

स्थिरायते यतेन्द्रियो न हीयते यतेर्भवान् ।
अमायते यतेऽप्यभूत् सुखाय तेऽयते क्षयम् ॥

This is called अव्यपेतमध्ययमक; because nothing intervenes the words in the middle of the Pâdas, that are repeated. In the Sarasvatîkaṇṭhâbharaṇa also it is named चतुष्पादयमकेषु अव्यपेतं मध्ययमकम्.

Stanza 6—

ह्रसितं स्मरभासितम्=The exhibition of love-sports was lessened; love-sports disappeared.

Jaya. explains चक्रवालयमक as follows:—'चक्रवालयमकमिति मण्डलाकारेण यमितत्वात् । तथाहि द्वयोर्द्वयोः पदयोरन्त्यवर्णानां नेमिवदवस्थितत्वात् मध्यस्य वर्णस्य विसदृशस्य नाभिवदिति ।'.

This stanza is quoted in the Sarasvatîkaṇṭhâbharaṇa as आवृत्त्याधिक्येऽपि यमकम् *i. e.* in which words are repeated more than once. The चक्रवाल of Bharata is different. 'पूर्वस्यान्तेन पादस्य परस्यादिर्यदा समः । चक्रवचक्रवालं तद्विज्ञेयं नामतो यथा ॥'. This is the instance given for it:—शैले यथा शत्रुभिराहता हता हताश्च भूयोऽप्यनुपुङ्गैः खगैः । खगैश्च सर्वैर्युधि संचिताश्चिताश्रिताधिरूढा निहताः फलैः फलैः ॥. This is called काञ्चीयमक (Stanza 8) in the text.

Stanza 7—

Jaya. takes समिद्धशरणादीप्ता as one word and explains it as under:—
'समिधो दधति हुतवन्तो वेति समिद्धा ऋषयः । . . . . तान् शृणन्ति हिंसन्तीति . . . . समिद्धशरणा राक्षसास्तान् दानमानाभ्यामादीपयति प्रोत्साहयतीति क्विप् । समिद्धशरणादीप् रावणः तेन ताप्यते पाल्यत इति . . . . . . समिद्धशरणादीप्ता रावणस्य पालनीया ।'.

The Alaṅkâra in the verse is समुद्गयमक which Jaya. explains as 'समुद्गयमकमिति समुद्गाकारेण यमितत्वात् । पादद्वयोरर्धद्वयोश्च संपुटवत्सादृश्यात् ।'. Rudraṭa defines it as:—

'अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम ।'. Namisâdhu notes:—'अर्धद्वयसारूप्येण च समुद्गकसादृश्यम् ।'. The definition given in the Bhâratîya Nâṭyas'âstra is as under:—

'अर्धेनैकेन यद्वृत्तं सर्वमेव समाप्यते ।
समुद्गयमकं नाम तज्ज्ञेयं पण्डितैर्यथा ॥'

Daṇḍin's समुद्ग is divided into three classes. He defines it as:—'अर्धाभ्यासः समुद्गः स्यादस्य भेदास्त्रयो मताः ।'. अर्धाभ्यास is the repetition of Pâdas,

not that of half the verse. The similarity of the 1st and 3rd Pâdas and of the 2nd and 4th Pâdas makes up the first variety; the similarity of the 1st and 2nd Pâdas and of the 3rd and 4th Pâdas constitutes the second sort (This is repetition of half the verse); and the similarity of the 1st and 4th Pâdas and of the 2nd and 3rd Pâdas forms the third kind. The stanza in the text thus comes under the first kind of समुद्ग. Bhoja follows Daṇḍin. The first variety, which corresponds to the verse in the text he calls व्यपेतसमुद्ग, the second अव्यपेतसमुद्ग, and the third व्यपेताव्यपेतसमुद्ग.

Stanza 8—

This stanza illustrates **काञ्चीयमकम्.** Jaya. remarks:—'काञ्चीयमकमिति रसनाकारेण अमितत्वात् तथाद्यपादस्यान्ते परस्यादौ च सदृशो विन्यासः ॥. Bha. Mal. quotes the following definition of it:—

'एकस्यान्ते परस्यादौ सदृशं दृश्यते यदि ।
तत्काञ्चीयमकं नाम स्यादुक्तं कविपुङ्गवैः ॥'.

Daṇḍin calls it संदष्टयमक. 'सन्दष्टयमकस्थानमन्तादी पादयोर्द्वयोः' ।. The instance given there is:—

उपोढरागाप्यबला मदेन सा मदेनसा मन्युरसेन योजिता ।
न योजितात्मानमनङ्गतापितागतापि तापाय ममास नेयते ॥.

Rudraṭa calls it वंश and gives the following instance:—

ग्रीष्मेण महिमानीतो हिमानीतोयशोभितः ।
यशोऽभितः पर्वतस्य पर्व तस्य हि तन्महत् ॥.

Rudraṭa's काञ्चीयमक is quite different. The following instance illustrates it:—

या मानीतानीतायामा लोकाधीरा धीरालोका ।
सेनासन्नासन्ना सेना सारं हत्वाहत्वा सारम् ॥.

Bharata has also a different sort of काञ्चीयमक. He defines it as under:—

पादस्यादौ तथा चान्ते स्यातां यत्र समे पदे ।
तत्काञ्चीयमकं नाम विज्ञेयं सूरिभिर्यथा ॥
e.g. 'रामारामा विस्मयते च स्मयते च ॥'.

Stanza 9—

Bha. Mal. quotes the following definition of यमकावलिः—

'पादेषु यत्र सर्वेषु सादृश्यं दृश्यते यदि ।
यमकावलिरुद्दिष्टा श्लिष्टा यमककोविदैः ॥'.

This is generally known as माला or यमकमाला. Rudraṭa defines it as under:—

'आवृत्तानि तु तस्मिन्नाद्यधर्न्यर्धशो विभक्तानि ।
वक्त्रं तथा शिखान्त्यान्युभयानि च जायते माला ॥'

i. e. if the first halves of each Pâda are यमकित (have यमक in them), it forms वक्त्र, if the second halves of each Pâda are यमकित, it forms शिखा, and the combination of both वक्त्र and शिखा constitutes यमकमाला.

Bharata has a different sort of मालायमक.

'नानारूपैः स्वरैर्युक्तं यत्रैकं व्यञ्जनं भवेत् ।
तन्मालायमकं नाम विज्ञेयं पाठकैर्यथा ॥'.

His instance is:—

'हली बली लली माली शूली जाली लली जली ।
बलो बलोच्चलोलाक्षो मुसली त्वभिरक्षतु ॥'.

This, however, is generally designated by Âlaṅkârikas as अनुप्रास and not यमक.

This stanza is quoted in the Sarasvatîkaṇthâbharaṇa as an instance of श्लोके स्थूलाव्यपेतमस्थानयमकम्. The remark there is:—'अत्रावृत्त्यष्टकेन श्लोकोऽपि व्याप्त इत्यस्थानयमकमिदं श्लोके स्थूलाव्यपेतमुच्यते ।'. The reading there is ललितं ललितं or वलितं वलितं, adopted in the text.

Stanza 10—

अयुग्मपादयमकम् or अयुक्पादयमकम् consists in the repetition of odd (1 and 3) Pâdas. It is otherwise known as संदंश. *Vide* the note on stanza 2.

Jaya. explains न वा नरैः पराक्रान्ताम् as equal to न वा अनरैः शक्रादिभिः पराक्रान्ताम्.

Stanza 11—

If there is यमक in the beginning of each Pâda, and also at the end of each Pâda, it constitutes पादाद्यन्तयमकम्. Bharata in his Nâtya-s'âstra calls it काञ्चीयमकम्. *Vide* the note on St. 8.

This very verse is quoted in the Sarasvatîkaṇthâbharaṇa as an instance of आद्यन्तयमक.

Stanza 12—

The metre of this stanza is तनुमध्या or तनुमध्यमा. 'त्यौ चेत्तनुमध्यमा'; or as Bharata defines it 'आद्ये पुनरन्त्ये द्वे द्वे गुरुणी चेत्। सा स्यात्तनुमध्या गायत्रसमुत्था ॥'.

The यमक in this verse is called मिथुनयमक; because the two Pâdas that are similar in sound are close together and form a pair. 'मिथुनयमकमिति पादद्वयस्य चक्रवाकमिथुनवदवस्थितत्वात्' जय०. In वाग्भटालंकार, this यमक is called संयुतावृत्तौ पादान्तयमक. The instance there given is:—'द्विषामुद्धतानां निहंसि त्वमिन्द्रः। मुदं भो धराणामुदम्भोधराणाम् ॥'.

Stanza 13—

Bha. Mal. explains वृन्तयमक as follows:—

'वृन्तयमकमिति प्रतिपादं पुष्पफलस्येव मूले वृन्तवदवस्थितत्वात्। तथाहि "पादादौ सदृशं यस्य प्रतिपादं प्रदृश्यते। तद्वृन्तयमकं नाम कथ्यते कविपुङ्गवैः ॥" इति ॥'. Dandin calls it सर्वपादगतं व्यपेतमादिभागयमकम्. Bharata calls it पादादियमकम्. *Vide* the note on Stanza 4. In वाग्भटालंकार it is called आदियमक. Bhoja calls it चतुर्षु पादेषु व्यपेतमादियमकम्.

Stanza 14—

As opposed to वृन्तयमक, the यमक in this verse is very significantly named पुष्पयमक. 'पुष्पयमकमिति प्रतिपादान्ते वृन्तोपरि पुष्पवत् स्थितत्वात्'. Bha. Mal. This according to वाग्भटालंकार is अयुतावृत्तौ अन्तयमक. Bharata calls it पादान्तयमक. *Vide* the note on Stanza 3. In the Sarasvatîkanṭhâbharaṇa the figure is named चतुर्षु पादेषु व्यपेतमन्तयमकम्.

Stanza 15—

'आदिमध्ययमकमिति पादानामादौ मध्ये च घनवनजनतरुशब्दानां यमितत्वात्।' जय०.

This verse is quoted in the Sarasvatîkanṭhâbharaṇa as an instance of चतुर्षु पादेषु व्यपेतमादिमध्ययमकम्.

Stanza 16—

'विपथयमकमिति पादद्वयातिक्रमाद्विपथेन विमार्गेण यमितत्वात्।' जय०. This यमक is very properly called विपथयमक as opposed to मिथुनयमक. In the latter, the two Pâdas, that are similar in sound, being close, form a pair as it were. In the former the first Pâda goes crooked as it were, forming यमक not with the second, or third Pâda, but with the fourth.

This kind of यमक is generally known as आवृत्ति. *Vide* the note on Stanza 2. In वाग्भटालंकार it is called आद्यन्तयमक.

Stanza 17—

'मध्यान्तयमकमिति पादस्य मध्ये अन्ते च यमितत्वात्' जय०. This verse is quoted in the Sarasvatîkaṇṭhâbharaṇa as चतुर्षु पादेषु व्यपेतं मध्यान्तयमकम्.

Stanza 18—

'गर्भयमकमिति द्वयोः पादयोर्मध्ये पादद्वयस्य यमितत्वात्' जय०. गर्भयमक is the name given by रुद्रट, वाग्भट (काव्यानुशासनकर्ता), and प्रदीपकार to that sort of यमक, which consists in the similarity of the two middle (2 and 3) Pâdas. In वाग्भटालंकार, it is called मध्यपादयमक.

Stanza 19—

'सर्वयमकमिति चतुर्णामपि पादानां सदृशत्वात्' जय०. This is called पङ्क्ति by प्रदीपकार, वाग्भट (author of काव्यानुशासन), and रुद्रट. 'अन्योन्यं पश्चिमयोरावृत्त्या पादयोर्भवेत्पुच्छः । सर्वैः सार्धं युगपत्प्रथमस्य तु जायते पङ्क्तिः ॥' (रुद्रट's काव्यालंकार ३. १०). Some Âlaṅkârikas call it महायमक. *Vide* the note on Stanza 2. In वाग्भटालंकार and सरस्वतीकण्ठाभरण it is called महायमक. 'एकाकारचतुष्पादं महायमकमुच्यते' सर०. Bharata calls it चतुर्व्यवसित. 'सर्वे पादाः समा यत्र भवन्ति नियताक्षराः । चतुर्व्यवसितं नाम विज्ञेयं तद्बुधैर्यथा ॥' नाट्यशास्त्र १६. ७९. The same word is met with in the Agnipurâṇa (343.16).

Stanza 20—

Rudraṭa defines महायमक as follows:—

'अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम । श्लोकस्तु महायमकं तद्देवभिकारदेशेतानि ॥'. Daṇḍin calls it श्लोकाभ्यास. 'श्लोकद्वयं तु युक्तार्थं श्लोकाभ्यासः स्मृतो यथा ।' काव्या० ३. ६७.

अभियाता, adopted in the text, is the 3rd Person singular of the 1st Future of अभिया.

Stanza 21—

'श्लोकाद्यन्तयमकमिति श्लोकस्यादावन्ते च यमितत्वात्' जय०.

Stanza 22—

With the stanza 22 begins the illustration of Arthâlaṅkâras. As Malli. settles the Alaṅkâras according to the later school of Âlaṅkârikas, I have not given above the verses the names of the figures as found in most of

the MSS. They will be shewn in these notes. It may be remarked that the exact work on poetics, which Bhaṭṭî has followed in ascertaining the figures of speech, cannot be settled, as the oldest works on the subject are not available. The order of the figures seems in most cases to be identical with what is found in Udbhaṭa's Alaṅkârasâra-saṅgraha. The order there is:—

पुनरुक्तवदाभासं छेकानुप्रास एव च । अनुप्रासस्त्रिधा लाटानुप्रासो रूपकं चतुः ॥ उपमा दीपकं चैव प्रतिवस्तूपमा तथा । इत्येत एवालंकारा वाचां कैश्चिदुदाहृताः ॥ आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना । समासातिशयोक्ती चेत्यलंकारान्परे विदुः ॥ यथासंख्यमथोत्प्रेक्षां स्वभावोक्ति तथैव च । अपरे त्रीनलंकारान् गिरामाहुरलंकृतौ ॥ प्रेयो रसवदूर्जस्वि [illegible]क्तं समाहितम् । द्विधोदात्तं तथा श्लिष्टमलंकारान्परे विदुः ॥ अपह्नुतिं विशेषोक्ति[illegible]य तुल्ययोगिताम् । अप्रस्तुतप्रशंसां च व्याजस्तुतिविदर्शने ॥ उपमेयोप[illegible]सहोक्तिं संकरं तथा । परिवृत्तिं च जगदुरलंकारान् परे गिराम् ॥ अनन्वयं ससं[illegible]ष्ट भाविकं तथा । काव्यदृष्टान्तहेतू चेत्यलंकारान् परे विदुः । According to Ja[illegible]gala and Bharatamallikâ, who follows him, Sts. 22, 23 and 24 [illegible]e the three varieties of Dîpaka, आदिदीपक, अन्तदीपक, and [illegible]ीपक respectively. Jaya. remarks as follows:—

'आदिदीपकमिति क्रियापदस्यादौ श्रूयमाणत्वात् । द्विविधं ह्यादिदीपकम् । एकतिङ्नेकतिङ्सहितं च । तत्र यत्पूर्वं तदेकमप्यनेकार्थप्रकाशकम् । यथाह भामहः । मदो जनयति प्रीतिमानन्दं मानभङ्गुरम् । यत्प्रियासङ्गमोत्कण्ठामसह्यां मनसः शुचमिति । यत्तु द्वितीयं तत्समस्तवाक्यार्थप्रकाशकं यथेदमेव । तत्र ह्युत्तरेषां वाक्यार्थानामाद्येनैव दीपनात् तस्मिन्नसति शेषाणामस्फुटत्वात् । पूर्वकं परित्यज्य द्वितीयस्य प्रदर्शनं यत् तत्प्रतीपदीपकं नाम चतुर्थमस्तीति दर्शनार्थम् । तद्यथा । तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् । मान्यान् मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान् गुणान् कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितमिति । शेषो यदत्र परस्परमसंबद्धमिति ॥'.

Thus according to Jayamaṅgala the Alaṅkâra in the 22nd St. is the 2nd kind of आदिदीपक, noticed by Bhâmaha, a very old Âlaṅkârika, whose works are not now available. When a verse consists of a number of sentences and when the meaning of the first sentence *throws light on* the meanings of subsequent sentences, in other words, when the meanings of subsequent sentences depend upon the meaning of the first sentence, it is according to Bhâmaha, the 2nd kind of आदिदीपक. In fact in this verse the meaning of each subsequent sentence depends on that of the preceding sentence. Each preceding state-

ment is the cause of the statement that follows it, the throwing off of the waters of the ocean by Hanumat leads to the shaking of trees on the banks, the shaking of trees, to the spreading of beds of flowers, and the spreading of beds, to the sitting on them of Kinnaras, excited by love. This according to the later school of Âlaṅkârikas, whom Malli. follows, constitutes कारणमाला. The Sûtra quoted by Malli. is from अलंकारसर्वस्व. In वाग्भट's काव्यानुशासन also the Sûtra for कारणमाला is almost the same. 'पूर्वस्योत्तरमुत्तरं प्रति हेतुत्वे कारणमाला'. The later Âlaṅkârikas, Mammaṭa (' यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता । तदा कारणमाला स्यात्'), Vidyânâtha ('पूर्वं पूर्वं प्रति [illegible] हेतुः स्यादुत्तरोत्तरम् । तदा कारणमालाख्यमलंकरणमुच्यते ॥'), Râjânaka [illegible]ka, whose Sûtra from the Alaṅkârasarvasva is quoted by Malli., V[illegible] whose Sútra from the Kâvyânus'âsana is quoted above, Appayâ Di[illegible]गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः'), Vis'vanâtha ('परं परं प्रति [illegible]र्वस्य हेतुता । तदा कारणमाला स्यात्'), Jagannâtha ('सैव शृङ्खला आनुगुण्यस्य [illegible]ग-भावरूपत्वे कारणमाला'), and others consider the Ornament in th[illegible] be कारणमाला.

Stanza 23—

The MSS. call the figure of speech in this verse अन्तर्दीपकं: 'अन्तर्दीपकमिति अमण्डयदिति क्रियापदस्यान्ते निर्दिष्टत्वात्' जय०. 'अत्र वाक्यभेदाभावेऽपि अमण्डयदित्यन्तिमक्रियापदेन संपूर्णवाक्योपकारादन्तर्दीपकं किं वा गिरिमवाप्य तं स्वयममण्डयत् कपिसैन्यैश्चामण्डयदिति वाक्यभेदोऽत्र मन्तव्यः ।' भर०. Jaya. calls the figure अन्तर्दीपक, simply because the verb (अमण्डयत्) stands at the end of the verse. He must have followed some old Âlaṅkârika whose works are now lost to us. The oldest author on the subject whose works are available *viz.*, Daṇḍin, holds that to constitute Dîpaka there must be more than one sentence, and that as a lamp standing in a corner of a room illuminates the whole room, so in the Dîpaka, a word, used in one sentence, elucidates all the sentences which make up the verse, by being construed in them all. The instance of अन्तर्दीपक given by him is:— ' जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम् । चलं च तडितां दाम बलं कुसुमधन्वनः ॥'. Here बलं, which occurs in the last sentence, is to be construed in each sentence, as जलधरोद्गीर्णं जलं कुसुमधन्वनः बलम् is the first sentence, गृहशिखण्डिनां कुलं कुसुमधन्वनः बलम् is the second sentence, and तडितां चलं दाम कुसुमधन्वनः बलम् is the last sentence. Bha. Mal. seems to think that there must be more than one sentence to constitute Dîpaka and

therefore tries to make the verse (23rd) consist of two sentences (गिरिं स्वयममण्डयत् कपिसैन्यैश्चामण्डयत्); but really speaking there is only one sentence in the verse (there being no such word as स्वयम् in the sentence and there being no necessity of taking it as understood). In fact the verse contains neither the essentials of the Dîpaka as explained by the old Âlaṅkârikas whose works are known to us, such as Daṇḍin ('जातिक्रियागुणद्रव्यवाचिनैकत्र वर्त्तिना। सर्ववाक्योपकारश्चेत् तमाहुर्दीपकं यथा ॥'), Bhoja who follows Daṇḍin ('क्रियाजातिगुणद्रव्यवाचिनैकत्र वार्त्तिना । सर्ववाक्योपकारश्चेद्दीपकं तन्निगद्यते ॥'), Rudraṭa ('यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति । तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥'), Vâgbhaṭa, author of Kâvyânus'âsana ('आदिमध्यवर्त्तिनैकेन जातिक्रियागुणद्रव्यरूपिणा पदार्थेन यत्रार्थसंगतिस्तद्दीपकम्'), Vâgbhaṭa, author of Vâgbhaṭâlaṅkâra ('आदिमध्यान्तवर्त्येकपदार्थेनार्थसंगतिः । वाक्यस्य यत्र जायेत तदुक्तं दीपकं यथा ॥'), Bharata ('नानाधिकरणार्थानां शब्दानां संप्रकीर्त्तितम्। एकवाक्येन संयोगात्तद्दीपकमिहोच्यते॥'), Udbhaṭa ('आदिमध्यान्तविषयाः प्राधान्येतरयोगिनः। अन्तर्गतोपमाधर्मा यत्र तद्दीपकं विदुः'), and Vâmana ('उपमानोपमेयवाक्येष्वेका क्रिया दीपकम्') whose (*i. e.*, of Udbhaṭa and Vâmana) definitions correspond to those of later Âlaṅkârikas, nor the essentials of the Dîpaka as explained by later Âlaṅkârikas, Mammaṭa, ('सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् । सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥' प्रकृताप्रकृतात्मनाम् means उपमानोपमेयानाम्), Vidyânâtha, whose definition of Dîpaka is quoted by Malli. in his commentary on the next verse ('प्रस्तुताप्रस्तुतानां तु सामस्त्ये तुल्यधर्मतः । औपम्यं गम्यते यत्र दीपकं तन्निगद्यते ॥'), Appayâ Dîkshita ('वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः'), Vis'vanâtha ('अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते । अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥'), Râjânaka Ruyyaka ('प्रस्तुताप्रस्तुतानां तु दीपकम्' औपम्यस्य गम्यत्व इत्याद्यनुवर्तते), and Jagannâtha ('प्रकृतानामप्रकृतानां चैकसाधारणधर्मान्वयो दीपकम्'). It will be seen that generally speaking according to old Âlaṅkârikas a noun signifying a class, a quality or a proper name, or a verb used in one sentence and construed in all other sentences constitutes Dîpaka ; while according to later Âlaṅkârikas that is Dîpaka, in which two or more objects, some relevant and some irrelevant, have the same attribute and therefore their औपम्य (similarity) is implied. The Dîpaka in the 23rd St. of the text cannot be justified by any of the above definitions. Jaya. does not explain it clearly. He simply says 'क्रियापदस्यान्ते निर्दिष्टत्वात्.' It must be based on the definition of some old Âlaṅkârika, whose works are lost, and were not known, it seems, even to Malli., who, therefore, finds another

Alaṅkâra in the verse. The compound word स्मितदर्शितकार्यनिश्चयः (Hanumat indicating the accomplishment of the object by his smile) being the cause of the sense of the fourth Pâda (Hanumat being surrounded by the overjoyed monkeys), the Alaṅkâra is काव्यलिङ्ग. The definition quoted by Malli. is found in Vidyânâtha's Pratâparudra.

It is not necessary to take आत्मानममण्डयत्. Construe गिरिं समवाप्य स्मितदर्शितकार्यनिश्चयः मुदितैः कपिसैन्यैः (तम् *viz.* गिरिम्) अमण्डयत्.

The metre of this verse is सुन्दरी, otherwise known as वियोगिनी or वैतालीय. 'अयुजोर्यदि सौ जगौ युजोः सभरा गौ यदि सुन्दरी तदा' छन्दो०.

Stanza 24—

The MSS. call the figure मध्यदीपक. 'मध्यदीपकमिति क्रियापदस्य मध्ये निर्दिष्टत्वात्'. जय०. As in the preceding verse so in this verse also there is no Dîpaka according to the works available to us. Jaya.'s explanation is very lame. Mall. criticizes him rather very severely. Jaya. explains आदिदीपक in St. 22 according to Bhâmaha and the Dîpaka in Sts. 23 and 24 must have also been based upon some old work now lost to us and not known it seems even to Malli.

Stanza 25—

Jaya. also calls the figure रूपक, though he takes वानरभूधरः as उपमितसमास. His definition of रूपक, 'उपमानेन तुल्यत्वमुपमेयस्य रूप्यते । गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥', is found in the Agnipurâṇa with a slight difference ('उपमानेन यत्तत्त्वमुपमेयस्य &c.' अग्नि० ३४४. २२).

The metre is औपच्छन्दसिक. 'विषमे ससजा गुरू समे चेत् सभरा यश्छन्दसिकं तदौपपूर्वम् ॥'.

Stanza 26—

Jaya. says:—'एतदपि रूपकमेव किं तु कलधौतत्वेन सानूनां विशिष्टत्वाद्विशिष्टोपमायुक्तं कमलकं नाम ।'.

The metre of the Stanza is प्रमिताक्षरा. 'प्रमिताक्षरा सजससैः कथिता ।'.

Stanza 27—

The MSS. call the figure in the verse 'शेषार्थान्ववसितमवतंसकम्.' Jaya.'s note runs as follows:—

'एतद्रूपकं शेषार्थान्ववसितम् । रूपिताद्न्यो योऽर्थः आनन्दपरीतनेत्रवारीणिति स शेषः तेनान्ववसितं युक्तमवतंसकं नाम विसदृशस्यार्थस्य लपितत्वात । तदेवान्यैः खण्डरूपकमित्युच्यते ।'.

In Vâgbhaṭâlaṅkâra खण्डरूपक and अखण्डरूपक are mentioned; but they are of a different sort. The instance for खण्डरूपक there given is:—

'अधरं मुखेन नयनेन रुचिं सुरभित्वमाब्जमिव नासिकया ।
नववर्णिनीवदनचन्द्रमसस्तरुणा रसेन युगपन्निपपुः ॥'

The खण्डरूपक here is thus explained :—

'अत्र वदनचन्द्रमसो मुखेनाधरं नयनेन रुचिमित्यादिखण्डकरणात् खण्डरूपकमिदम् ।'.

This corresponds to सावयवरूपक of later Âlaṅkârikas.

The following instance illustrates अखण्डरूपक :—

'ज्योत्स्नया धवलीकुर्वन्नुर्वीं सकुलपर्वताम् ।
निशाविलासकमलमुदेति स्म निशाकरः ॥'

The अखण्डरूपकत्व in this verse is thus explained by the commentator :—

'अखण्ड एव चन्द्रो निशाया विलासकमलं स्यादतोऽखण्डं रूपकमेतत् ।'

This is निरवयवरूपक of later Âlaṅkârikas.

Stanza 28—

The figure in the verse is named अर्धरूपक in the MSS. 'अर्धरूपकमिति पश्चिमार्धे कपिनागा इति रूपितम् ।'. जय०.

Stanza 29—

एतदन्वर्थोपमायुक्तललामकम् is found in the MSS. for this verse. 'एतदिति रूपकमन्वर्थयोपमया युक्तं ललाम नाम । यत उदेत्यस्मादित्युदयः । अकर्तरि च कारके इत्यच् । स चासौ गिरिश्चेत्यनुगतार्थता । यत्रान्वर्थता नास्त्युपमायाः तदुपमायुक्तमेव रूपकं द्रष्टव्यम् ।' जय०.

Stanza 30—

The MSS. call the figure इवोपमा. 'इवोपमेति इवशब्देनोपमार्थस्य गम्यमानत्वात् । उपमाया लक्षणम् । विरुद्धेनोपमानेन देशकालक्रियादिभिः । उपमेयस्य यत्साम्यं गुणमात्रेण सोपमा ॥ इति । अत्र विरुद्धदेशकालक्रियागुणः पुरुषोत्तम उपमानं तेन रामस्योपमेयस्य तपोवनस्थत्वेन विधृतजटाजिनवल्कलत्वेन नरानुकारिलक्ष्मणेनानुगतत्वेन च गुणमात्रेण साम्यमुपमानम् ।'.

Stanza 31—

The figure in the verse is called यथोपमा in the MSS. 'यथोपमेति यथाशब्देनोपमार्थस्य गम्यमानत्वात् ।' जय०.

Stanza 32—

सहोपमा is the name found for the figure in the MSS. 'सहोपमेति सहशब्देन जीविताशया उपमाद्योतनात्' जय०. Malli.'s definition of सहोक्ति is found in Vidyânâtha's Pratâparudra.

Stanza 33—

The MSS. read **तद्धितोपमा** over the verse. Jaya. says:—'तद्धितोपमेति तद्धितप्रत्यया द्रष्टव्याः ।'. Our commentary breaks abruptly, omitting समपश्यत्.

Stanza 34—

लुप्तोपमा is found in the MSS. over the verse. 'लुप्तोपमेति चिन्तामणिरित्यत्रेवशब्दार्थस्य गम्यमानत्वात् लुप्तोपमेति ।'. जय०.

Stanza 35—

The MSS. have **समोपमा** over the verse. 'समोपमेति समशब्देनोपमाया अभिधानात्। अत्र निभसदृशादयोऽपि द्रष्टव्याः ॥' जय०.

Stanza 36—

The MSS. read **अर्थान्तरन्यासः** for the verse. Jaya. notes:—'अर्थान्तरन्यास इति उक्तादर्थादन्यस्योपन्यासात् । यथोक्तम् । उपन्यसनमर्थस्य प्रक्रान्तादपरस्य यत् । ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो यथेति ॥'. Malli.'s definition is found in the Pratâparudra.

The metre of the verse is नन्दन. 'नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ।'. The same verse is quoted in the Chhandomañjarî as an instance of this metre.

Stanza 37—

आक्षेपः is found in the MSS. for this verse. Jaya. says:—'आक्षेप इति प्रतिषेधो नाम । यथोक्तम् । प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया । आक्षेप इति तं सन्तः शंसन्ति द्विविधो यथेति । अत्र पूर्वार्धेनोक्तो य इष्टोऽर्थः तस्य को वेत्यादिना विशेषप्रतिपादनेच्छया प्रतिषेध इति । स च उक्तवक्ष्यमाणविषयभेदाद् द्विविधः । अयमुक्तविषयः ॥'. A similar definition of आक्षेप is found in the Âgneya:—'प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया । तमाक्षेपं ब्रुवन्त्यत्र ।'. Udbhaṭa's definition of आक्षेप is the same:—'प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया । आक्षेप इति तं सन्तः शंसन्ति कवयः सदा ॥'.

Stanza 38—

The MSS. have आक्षेपः एव over the verse. 'स एवेत्ययमप्याक्षेप एव किं तु वक्ष्यमाणविषयः । अत्र पूर्वार्धेनोक्तो य इष्टोऽर्थः तस्य विशेषाभिधित्सया प्रोक्तेनेत्यादिना शेषार्थप्रतिषेधः ॥' जय॰. Malli.'s definition is drawn from the Pratâparudra.

Stanza 39—

The MSS. read व्यतिरेकः for this verse. Jaya.'s note is:—'व्यतिरेक इति अयं व्यतिरेको नामान्वयः । पूर्वार्धेनोपमानोपमेययोरर्थो दर्शितः तस्य पश्चार्धेन भेददर्शनात् । यथोक्तम् । उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम् । व्यतिरेकं तमिच्छन्ति विशेषोत्पादनाद्यथेति ॥'. Malli.'s definition is found in Vidyânâtha's Pratâparudra. This is यद्यर्थातिशयोक्ति of Mammata. The verse is like 'राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः । तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥' mentioned by Mammata for यद्यर्थातिशयोक्ति. In such cases there is व्यतिरेकध्वनि of course.

Stanza 40—

The MSS. read विभावना for the verse. 'विभावनेति परीक्षा सेवा विरोधनं चेति तिस्रः क्रियाः तासां यः प्रतिषेधः नञा तेन अपरीक्षापूर्वकं यत्करणं तथावृद्धसेवापूर्वकत्वं यत्पण्डितत्वं यच्चाविरोधपूर्वकं निष्ठुरत्वं तस्य क्रियाफलस्य विभावनात् प्रकाशनात् । यथोक्तम् । क्रियायाः प्रतिषेधेन तत्फलस्य विभावनात् । ज्ञेया विभावनैवासौ सान्वर्थं कथ्यते यथेति ।' जय॰. Udbhata's definition of विभावना is almost the same as that given by Jaya:—'क्रियायाः प्रतिषेधे या तत्फलस्य विभावना । ज्ञेया विभावनैवासौ समाधौ सुलभे सति ॥'.

Stanza 41—

The MSS. have समासोक्तिः for this verse. 'समासोक्तिः । यथोक्तम् । यत्रोक्तेर्गम्यतेऽन्योऽर्थस्तत्समानविशेषणः । सा समासोक्तिरुदिता संक्षिप्तार्थतया यथेति । एवं च कृत्वायं श्लेषाद्भिद्यते । श्लेषे हि द्वयोरपि श्रूयमाणत्वात् ॥' जय॰. Jaya.'s definition of समासोक्ति is found in the Âgneya:—'यत्रोक्ताद्गम्यतेऽन्योऽर्थस्तत्समानविशेषणः । सा समासोक्तिरुदिता संक्षेपार्थतया बुधैः ॥'.

Stanza 42—

The MSS. read अतिशयोक्तिः over the verse. 'अतिशयोक्तिरिति अतिशयाभिधानात् । अत्र सुद्धपि नामासौ लक्ष्मणे च तुल्यरूपवेषः स्यात् न तु प्रत्यक्षप्रमाणपरिच्छेद्य इति लोकातिक्रान्तवचनमेतद्वचनम् । अवश्यं च कश्चिद्विशेषोऽस्ति यथोक्तम् । निमित्ततो यत्र वचो लोकातिक्रान्तगोचरम् । मन्यन्तेऽतिशयोक्तिं तामलंका-

रतया यथेति ॥' जय०. Udbhata's definition of अतिशयोक्ति is the same as that quoted by Jaya.:—निमित्ततो यत्तु वचो लोकातिक्रान्तगोचरम् । मन्यन्तेऽतिशयोक्तिं तामलंकारतया बुधाः ॥. Bha. Mal. justifies the figure as follows:—'अतिशयोक्तिरिति अतिशयार्थप्रतिपादनात् । अत्र हि आज्ञानन्तरमेव कपीनामनुगमनेनैव भक्त्यतिशयत्वं लक्ष्मणतुल्यताभिधानेन तद्गतहर्षशोकातिशयत्वं च । तथा च विवक्षाया विशेषस्य लोकसीमातिवर्त्तिनी । असावतिशयोक्तिः स्यादलंकारोत्तमा च सा ॥ सा तु प्रायो गुणानां च क्रियाणां चोपकल्पते । न हि द्रव्यस्य जातेर्वा भवत्यतिशयः क्वचिदिति ॥'. Bha. Mal.'s definition of अतिशयोक्ति is from the Kanthâbharana of Bhojarâja who follows Dandin. According to the later school of Âlankârikas the figure is स्वभावोक्ति as Malli. states. Malli.'s definition is similar to that of the Pratâparudra:—'स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ।'. विद्या०.

Stanza 43—

The MSS. have यथासंख्यम् for the verse. 'यथासंख्यमिति मुमुचुरित्यादिना क्रियाणां वसुधादीनां च कर्मणामनुक्रमशो निर्देशात् । यथोक्तम् । भूयसामुपदिष्टानां क्रियाणामथ कर्मणाम् । क्रमशो योऽनुनिर्देशो यथासंख्यं तदुच्यत इति ॥' जय०. Udbhata's definition of यथासंख्य is the same as that given by Jaya. Udbhata's reading is अर्थानामसधर्मणाम् for क्रियाणामथ कर्मणाम्. Dandin and Bhojarâja call it क्रम. Malli.'s definition is from the Pratâparudra.

Stanza 44—

The MSS. have उत्प्रेक्षा for this verse. Jaya. says:—'उत्प्रेक्षेति यथोक्तम् । अविवक्षितसामान्यात्किञ्चिच्चोपमया सह । अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्वितेति । अत्र महीधरसामान्यस्यापि विवक्षितत्वादविवक्षितं सामान्यत्वं रक्षितुमिवेति किञ्चिदुपमया सह महेन्द्रगिरेरतद्गुणतया रक्षणक्रियायोगः । गगनतलं वसुन्धरां व्याप्य स्थितमित्यतिशयान्विता ॥'. Udbhata's definition of उत्प्रेक्षा is almost the same as the one quoted by Jaya.:—साम्यरूपाविवक्षायां वाच्येवाद्यात्मभिः पदैः । अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता ॥.

Stanza 45—

The MSS. have वार्त्ता over this verse. 'वार्त्तेति तत्त्वार्थकथनात् । सा द्विविधा विशिष्टा निर्विशिष्टा च । तत्र या पूर्वा सा स्वभावोक्तिरुदिता यथेयमेव । तथा चोक्तम् स्वभावोक्तिरलंकार इति केचित्प्रचक्षते । अर्थस्य तादवस्थ्ये च स्वभावोऽभिहितो यथेति ॥ निर्विशिष्टा वार्त्ता नामालंकारः यथोक्तम् । गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः । इत्येवमादिकं काव्यं वार्त्तामेतां प्रचक्षत इति ॥'. जय०.

Stanza 46—

The MSS. have प्रेयः for the verse. 'प्रेय इति प्रियतमवस्त्वभिधानात् ।' जय०. Malli.'s definition of प्रतीप is similar to that in the Pratâparudra:— 'आक्षेप उपमानस्य कैमर्थ्यायदि कथ्यते । उपमेयोत्कर्षतो वास्योपमेयत्वकल्पनात् ॥'. विद्या०. Udbhaṭa's definition of प्रेयस्वत् is:—रत्यादिकानां भावानामनुभावादि-सूचनैः । यत्काव्यं बध्यते सद्भिस्तत्प्रेयस्वदुदाहृतम् ॥.

Stanza 47—

The MSS. have रसवत् over the verse. Jaya. says:—'रसवदिति दिवौ गिरेश्च स्त्रीपुंसयोरिव शृङ्गाररसाभिधानात् । तथा चोक्तम् । रसवद्दर्शितं स्पष्टं शृङ्गारादि-रसं यथेति ॥'. Udbhaṭa's definition is:—रसवद्दर्शितस्पष्टशृङ्गारादिरसाश्रयम् । स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम् ॥.

Stanza 48—

The MSS. give ऊर्जस्विन् as the name of the figure in the verse. Says Jaya.:—'ऊर्जस्वीति साहंकारवस्त्वभिधानात् ।'. Daṇḍin defines the three figures प्रेयः, रसवत्, and ऊर्जस्विन् in one verse as follows:—'प्रेयः प्रियतरा-ख्यानं रसवद्रसपेशलम् । ऊर्जस्वि रूढाहंकारं युक्तोत्कर्षं च तत्त्रयम् ॥'. Udbhaṭa's definition is:—अनौचित्यप्रवृत्तानां कामक्रोधादिकारणात् । भावानां च रसानां च बन्ध ऊर्जस्वि कथ्यते ॥. The Commentator, Pratîhârendurâja, remarks on this as under:—क्वचित्खलु रसभावानां शास्त्रसंविदविरुद्धेन रूपेणोपनिबन्धः क्रियते क्वचित्तु तद्विरुद्धेन । तत्र यत्र शास्त्रसंविदविरुद्धेन रूपेण तेषामुपनिबन्धस्तत्र प्रेयोऽलंकारो रसवदलंकारश्चाभिहितः । यत्र तु तद्विरुद्धत्वं तन्मूललोकव्यवहारविरुद्धत्वं च तद्विषयाणां रसभावानामुपनिबन्धे सत्यूर्जस्वि काव्यं भवति तत्र हि रागद्वेषमोह-कारणका अनौचित्येन रसभावा उपनिबध्यन्ते । अत एव तत्र स्वकल्पनापरिकल्पि-तत्वेन ऊर्जसो बलस्य विद्यमानत्वादूर्जस्विव्यपदेशः ॥

Stanza 49—

The MSS. read पर्यायोक्तम् over the verse. Jaya. notes:—'पर्यायोक्ति-रिति । अमरपुरमतिं इधतमित्यनेन पर्यायेण वचनगत्या तदेवामरपुरमिति प्रतिपादनात् । तथा चोक्तम् । पर्यायोक्तं यदन्येन प्रकारेणाभिधीयत इति ॥'. Udbhaṭa defines पर्यायोक्तम् as:—पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते । वाच्यवाचकवृत्तिभ्यां शून्ये-नावगमात्मना ॥. Malli.'s definition of भ्रान्तिमत्, which is the figure in the verse according to later writers on poetics, is found in Vidyânâtha's Pratâparudra.

Stanza 50—

The MSS. have समाहितम् for this verse. 'समाहितमिति अनन्यमनस्क

तथा विशोऽवलोकनात्. ।' जय०. Udbhaṭa's definition is :—रसभावतदाभासवृत्तेः प्रशमबन्धनम् । अन्यानुभावनिःशून्यरूपं यत्तत्समाहितम् ॥.

Stanza 51—

The MSS. give उदारम् over the verse. Jaya. remarks:—'उदारमिति उदात्तमित्यर्थः महानुभावताप्रतिपादनात् । यतो महातरङ्गैर्जलसमूहैर्भुवनभरक्षममपि अभिनवेलमिति । द्विविधमुदारं महानुभावतया विविधरत्नयोगाच्चेति । इयं महानुभावता दर्शिता ॥'. Bha. Mal. quotes from Daṇḍin the following definition of उदात्त, otherwise called उदार:—'आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् । उदात्तं नाम तं प्राहुरलंकारं मनीषिणः ॥'. Udbhaṭa's definition is:—उदात्तमृद्धिमद्वस्तु चरितं च महात्मनाम् । उपलक्षणतां प्राप्तं नेतिवृत्तत्वमागतम् ॥.

Stanza 52—

The MSS. have उदारमेव for the verse. Jaya. says:—'एतदेवापरेऽन्येन वाक्यार्थेनान्यथा विदुः । नानारत्नार्द्धियुक्तं यत्तत्किलोदारमुच्यत इति ॥'. Bha. Mal. says:—'उदात्तमेवेति विविधरत्नर्द्धियुक्तत्वात् । यदुक्तम् । पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवम् । विवक्षितमिति व्यक्तमुदात्तं द्वयमप्यदः ॥ इति ॥'. The Sûtra quoted by Malli. is from the Alaṅkârasarvasva.

Stanza 53—

उदारमेव is found in the MSS. over the verse. 'उदारमेवेति रत्नयोगात् ।' जय०.

Stanza 54—

The MSS. have श्लिष्टम् for this verse. Jaya.'s note runs as under:—

'श्लिष्टमिति । उपमानेनोपमेयत्वस्य साधनात् । तथा चोक्तं विशेषणेन श्लिष्टम् । उपमानेन यत्तत्त्वमुपमेयस्य साध्यते । क्रियागुणाभ्यां नाम्ना च श्लिष्टं तदभिधीयत इति । अत्रोपमानभूतैरहिभिरुपमेयभूतानां गिरीणां तत्त्वस्य ताद्रूप्यस्य भुवनभरादिताद्रूप्यक्रियया तद्गुणेन च साधनेन गिरिभिरहिभिश्च नाम्ना च शब्देन भुवनभरसहानित्यादिना साध्यमानत्वात् । रूपकमपीदृशमेव । किं तु श्लिष्टस्य भेदेनोपमानोपमेययोर्युगपत्प्रयोगात् । रूपके पुनरेकस्यैवोपमेयपुरुषस्य व्याघ्र उपमानम् । तथा चोक्तम् । लक्षणं रूपकेऽपीदं विद्यते काममत्र तु । इष्टः प्रयोगो युगपदुपमानोपमेययोरिति । तदुक्तम् । लक्षणं श्लिष्टं सहोक्त्युपमाहेतुनिर्देशात् त्रिविधम् । यथोक्तम् । श्लेषादेवार्थवचसोरस्य च क्रियते भिदा । तत्सहोक्त्युपमाहेतुनिर्देशात् त्रिविधं यथेति । तत्रेदं सहोक्तिश्लिष्टमुक्तं गिरानदीश्चेति सहोक्त्या निर्देशात् ॥'. The three divisions of श्लिष्ट are noticed by भामह:—'भामहो हि "तत्सहोक्त्युपमाहेतुनिर्देशात् त्रिविधं यथा" इति श्लिष्टस्य त्रैविध्यमाह ॥'. Pratîharendurâja on Udbhaṭâlaṅkârasârasaṅgraha.

Malli., following the later school of writers, calls the figure तुल्ययोगिता. His definition is found in the Pratâparudra.

Stanza 55—

The MSS. have श्लिष्टमेव over the verse. 'इदमपि यथानिर्दिष्टविशेषणात् श्लिष्टं जलमुच इवेत्युपमाननिर्देशात् ।' जय०.

Stanza 56—

हेतुश्लिष्टम् is met with in the MSS. over this verse. Jaya. says:—'इदमपि यथानिर्दिष्टमेव किं तु हेतुश्लिष्टं हेतुद्वारेण विशेषणानां निर्देशात् । विद्रुममणिकृतभूषत्वात् जलहस्तिभग्नत्वाच्च वपुरिति ॥'.

Stanza 57—

The MSS. have अपह्नुतिः for this verse. 'अपह्नुतिरिति मायामित्यन्तर्गतोपमारूपतया निर्देशात् विद्यमानार्थस्य चापह्नवात् । तथा चोक्तम् । अपह्नुतिरितीष्टात्र किञ्चिदन्तर्गतोपमा । भूतार्थापह्नवादेषा क्रियतेऽस्या भिदा यथेति ॥' जय०. Udbhaṭa's definition is the same:—'अपह्नुतिरभीष्टा च किंचिदन्तर्गतोपमा । भूतार्थापह्नवेनास्याः निबन्धः क्रियते बुधैः ॥' उद्भ०. Malli.'s definition is drawn from Vidyânâtha's Pratâparudra:—'निषिध्य विषयं साम्यादन्यारोपे ह्यपह्नुतिः । तस्यास्त्रैविध्यम् । अपह्नुत्यारोपः । आरोप्यापह्नवः । छलादिपदैरसत्यत्वप्रतिपादनं च ॥'. The verse illustrates अपह्नुति of the first kind, in which the real nature of the object is denied and another is attributed to it. समुद्रत्व is denied of the ocean and मायात्व is attributed to it.

Stanza 58—

The MSS. read विशेषोक्ति for the verse. Jaya. says:—'विशेषोक्तिरिति शय्यादेरेकदेशस्य विगमेऽपि प्रभुत्वकान्त्या गुणान्तरेण स्तुतिविशेषस्य प्रतिपादनात् । यथोक्तम् । एकदेशस्य विगमे या गुणान्तरसंस्तुतिः । विशेषप्रथनायासौ विशेषोक्तिर्मता यथेति ॥'. Malli. calls the figure विरोध. It is generally known as विरोधाभास. Vidyânâtha defines it as 'आभासत्वे विरोधस्य विरोधाभास इष्यते ।'. Mammaṭa calls it विरोध:—'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ।'.

Stanza 59—

The MSS. read व्याजस्तुति for this verse. ''व्याजस्तुतिरिति क्षित्यादिधारणादधिकगुणस्य जलनिधेः स्तोत्रव्यपदेशेन वराहेण तुल्यत्वात् । तमपि महावराहं

अयन्तमिति किञ्चिद्विधातुमिच्छया निन्दनात् । तथा चोक्तम् । दूराधिकगुणस्तोत्रव्यपदेशेन तुल्यता । किंचिद्विधित्सया निन्दा व्याजस्तुतिरसौ यथेति ॥'.

Stanza 60—

We have उपमारूपकम् in the MSS. over this verse. Jaya. notes:—'उपमारूपकमिति तथोक्तम् । उपमानस्य तद्भावमुपमेयस्य रूपयन् । यो वदत्युपमाभेदमुपमारूपकं यथेति ॥'. Premachandra in his Commentary on Kâvyâdars'a explains उपमारूपक as follows:—

'अन्ये तु उपमासहितं रूपकमुपमारूपकं यदुक्तम्
"उपमानेन तद्भावमुपमेयस्य रूपयन् ।
यद्वदत्युपमाभेदमुपमारूपकं यथा ॥" इति ।

अस्योदाहरणं यथा

"दिवाकरकरस्पर्शादुदयाद्रेः पयोधरात् ।
नीलांशुकमिव प्राच्यास्तमो गलति संप्रति ॥".

अत्र नीलांशुकमिवेत्युपमया सहितमुदयाद्रेः पयोधरादिति रूपकमित्याहुः ॥'.

Dandin defines उपमारूपक as under:—

'इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥'.

His example for उपमारूपक is:—

'अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।
सन्नद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥'.

Vâmana has उपमारूपक of a different sort:—'उपमाजन्यं रूपकमुपमारूपकमिति । यथा

निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इव भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥'.

This corresponds to the परम्परितरूपक of the later school of writers.

Stanza 61—

The MSS. have तुल्ययोगिता for this verse:—'तुल्ययोगितेति न्यूनानामपि तेषां सुग्रीवादीनां विशिष्टेन जलनिधिना महाद्भुतत्वादिगुणसाम्यविवक्षया तुल्यस्य कार्यस्य भासनलक्षणस्यानुष्ठानेन तुल्ययोगात् । तथा चोक्तम् । न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया । तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगितेति ॥'.

Vâmana has a similar तुल्ययोगिताः—'विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता ॥ विशिष्टेन न्यूनस्य साम्यार्थमेककालायां क्रियायां योगस्तुल्ययोगिता । यथा—

जलनिधिरशनामिमां धरित्रीं वहति भुजङ्गविभुर्भवद्भुजश्च ॥'.

Malli. calls the figure सम and quotes Vidyânâtha's definition of it.

Stanza 62—

The MSS. name the figure निदर्शनः.—'निदर्शनेति प्रतिक्षणं वीचीनां पृथुत्वप्रशान्तत्वभवनक्रिययैव महिमभवनस्य तदर्थस्य विपत्तिफलस्य उपादानात् न यथेववतिशब्दानां प्रयोगात् । तथा चोक्तम् । क्रिययैव तदर्थस्य विशिष्टस्योपदर्शनात् । इष्टा निदर्शना नाम यथेववतिभिर्विनेति ॥' जय०.

In examples of निदर्शन or निदर्शना a word signifying similarity like इव, यथा, is not used. Even in Dandin's instances इव is not found. Dandin's definition is :—'अर्थान्तरप्रवृत्तेन किञ्चित् तत्सदृशं फलम् । सदसद्वा निदर्श्येत यदि तत्स्यान्निदर्शनम् ॥'. His instances are :—'उदयन्नेष सविता पद्मेष्वर्पयति श्रियम् । विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥ याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम् । सद्यो राजविरुद्धानां सूचयन्तो दुरन्तताम् ॥'. The first illustrates सत्फलनिदर्शन and the second असत्फलनिदर्शन. The following instance is generally given by the later Âlankârikas to illustrate असदर्थनिदर्शनाः—

'उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥'.

There is no सादृश्यद्योतक word in these instances. Malli. therefore calls the figure in the verse उत्प्रेक्षा, इव being उत्प्रेक्षाद्योतक according to दण्डिन्. 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥'.

Stanza 63—

The MSS. have विरोध over the verse. Jaya. notes :—'विरोध इति पुष्पबाणानां यन्मार्दवं मरुतां च जलसंसर्गाद्यच्छैत्यं तयोर्भेददाहलक्षणे क्रिये विरुद्धे तयोरभिधानात् । तयोश्च क्रिययोर्या विरोधिनी क्रिया क्षतार्चिर्घोरवतानलक्षणा तस्याः कामोद्रेकप्रतिपादनाभिधानात् । तथाचोक्तम् । गुणस्य च क्रियाया वा विरुद्धान्यक्रियाभिधा । या विशेषाभिधानाय विरोधं तं विदुर्यथेति ॥'. Udbhata's definition is :—

'गुणस्य वा क्रियाया वा विरुद्धान्यक्रियावचः ।
यद्विशेषाभिधानाय विरोधं तं प्रचक्षते ॥'.

Stanza 64—

The MSS. call the figure **उपमेयोपमा.** 'उपमेयोपमेति तयोः पर्यायेण उपमानोपमेयत्वात् । तथा चोक्तम् । उपमानोपमेयत्वं यत्र पर्यायतो भवेत् । उपमेयोपमां धीरा ब्रुवते तां यथोदितामिति ॥' जय०. Malli.'s definition is found in the प्रतापरुद्र.

Stanza 65—

सहोक्तिः is the name over the verse in the MSS. 'सहोक्तिरिति अन्धकारमन्मथाश्रितयोर्वर्धनक्रिययोस्तुल्यकालयोः ववृध इत्यनेन पदेन कथनात् । तथा चोक्तम् । तुल्यकालक्रिये यत्र वस्तुद्वयसमाश्रिते । वाक्येनैकेन कथ्येते सहोक्तिः सा मता यथेति ॥' जय०. Udbhata's definition of it is :—

'तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रिते ।
पदेनैकेन कथ्येते । सा सहोक्तिर्मता सताम् ॥'.

Stanza 66—

The MSS. have **परिवृत्तिः** for this verse. 'परिवृत्तिरिति दृशां कृतावकाश इत्यनेन विशिष्टस्य वस्तुन आदानात् तमः क्षिपन्नित्यनेनास्य वस्तुनः अपोहात् भवतीत्यादिना अर्थान्तरन्यासात् । तथा चोक्तम् । विशिष्टस्य यदादानमन्यापोहेन वस्तुनः । अर्थान्तरन्यासवती परिवृत्तिरसौ यथेति ॥' जय०.

Stanza 67—

The MSS. read **ससन्देहः** above the verse. Jaya. remarks:—'ससन्देह इति अशनिशरवर्षाभ्यामुपमेयस्य चन्द्रस्य तत्त्वमशनिशरवर्षमिति प्रयोक्तुरभिधानात् । कुतो निरभ्रे तदप्यशार्ङ्गमिति पुनरुपमानोपमेययोर्भेदाभिधानात् न निश्चिकाय चन्द्रमिति स्तुत्यर्थं सन्देहवचोऽभिधानाच्च । तथा चोक्तम् । उपमानोपमेयस्य तत्त्वं च वदतः पुनः । ससन्देहवचः स्तुत्यै ससन्देहं विदुर्यथेति ॥'. Udbhata defines it as follows :—

'उपमानेन तत्त्वं च भेदं च वदतः पुनः ।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्बुधाः ॥.

Malli. follows Vidyânâtha and calls it सन्देह of the 2nd kind. Vidyânâtha divides it into three classes. 'सा (सन्देहालंकृतिः) त्रिविधा । शुद्धा निश्चयगर्भा निश्चयान्ता चेति ।'. The following is the instance given there for निश्चयगर्भा संदेहालंकृति :—

'कालाहिः किमयं मृणालमृदुलं भोगं स धत्ते पुनः
कालभ्रूकुटिरेष किं तु मुख एवोज्जृम्भते सा पुनः ।

कालोग्रानलधूमपद्धतिरसौ किं सा पुनर्धूयते
वातेनेति विकल्प्यते प्रतिभटै रुद्रस्य कौक्षेयकः ॥'.

Stanza 68—

The MSS. have **अनन्वयः** over the verse. 'अनन्वय इति तत्सदृशस्य साम्यस्याविवक्षातश्चन्द्रस्योपमानोपमेयत्वात् । तथा चोक्तम् । यत्र तेनैव तस्य स्यादुपमानोपमेयता । सादृश्यस्याविवक्षातस्तमित्याहुरनन्वयमिति ॥' जय०. Jaya.'s definition is drawn from उद्भटालंकारसार, where the reading in the second line is 'असादृश्यविवक्षातः' for 'सादृश्यस्याविवक्षातः'.

Stanza 69—

The MSS. have **उत्प्रेक्षावयवः** for this verse. Jaya. notes :—'उत्प्रेक्षावयव इति भीतवत्ससारेति उपमाश्लेषलक्षणस्य श्लिष्टस्यार्थेन योगात् शरणमिव गतमित्युत्प्रेक्षायोगात् विटपिनिराकृतचन्द्ररश्म्यरातावेति रूपकार्थेन योगात् । तथा चोक्तम् । श्लिष्टस्यार्थेन संयुक्तः किञ्चिच्चोत्प्रेक्षयान्वितः । रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथेति ॥'. Dandin regards उत्प्रेक्षावयव as included in the divisions of उत्प्रेक्षा :—'उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि च ।'. On this Premachandra comments as follows :—'उत्प्रेक्षावयवश्च उत्प्रेक्षाया आरम्भकमलंकारान्तरं तच्च श्लेषादिकं यदुक्तम् ।

"श्लिष्टेनार्थेन संस्पृष्टः किञ्चिच्चोपमयान्वितः ।
रूपकार्थेन वा युक्त उत्प्रेक्षावयवो यथा ॥"

इति । तत्र श्लिष्टार्थसंस्पृष्टो यथा

मुक्तोत्करः संकटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः ।
जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद्गुणवत्त्वमाप ॥

अत्र गुणवत्त्वे श्लेषः । उपमयान्वितो यथा कुमारसंभवे

अङ्गुलीभिरिव केशसंचयं संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥

अत्राङ्गुलीभिरिव मरीचिभिरित्यत्र कुड्मलीकृतसरोजलोचनमित्यत्र चोपमा चुम्बतीवेत्युत्प्रेक्षामारभते । एवं रूपकार्थसंयुक्तोत्प्रेक्षापि । केचित्तु यत्रावयवक्रियैवोत्प्रेक्ष्यते नावयविक्रिया स उत्प्रेक्षावयवः । यथा लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च इत्यादीत्याहुः ॥'.

Vâmana defines उत्प्रेक्षावयव as follows :—'उत्प्रेक्षाहेतुरुत्प्रेक्षावयवः'. The Vritti is :—'उत्प्रेक्षाया हेतुरलंकार उत्प्रेक्षावयवः । अवयवशब्दो ह्यारम्भकं लक्षयति ॥'.

Stanza 70—

